

॥श्रीकाशीजीमेमहल्लाकर्णघंटापरलालाशिवरतनलालाकेमकानमैंविद्यासागरछापाखानेमैंचौखं
टीकाभैरवीबहुतशुद्धतापूर्वकछपादेबीप्रसादतिवाडीकेंद्र हाँछापाजिस्कोलेनाहोयसोचान्दनीचौ
कमैंकुंजगलीकेपश्चिमफाटककेपासदेबीप्रसादतिवाडीकेदुकानपरमिलैगाछापनेवालादरसनका·

भै॰
१

श्रीगणेशाय नमः ॥ सीतार्चितपादपद्मयुगलं ध्यात्वाऽद्वितीयं विभुम्मुद्रां ज्ञानमयीन्दधानमपरं हस्ताम्बुजं जानुनि कुर्वं चन्द्रकलां शिवां शिशुहितां टीकामजं राघवं सुग्रीवाङ्गदमारुतिप्रभृतिभिः संस्तूयमानम्परम् १ शब्देन्दुशेखरस्येयं टीका चन्द्रकलाभिधा रच्यते भैरवेणात्र क्षमध्वन्द्वयया वुधाः २ मान्यान्प्रणम्य विज्ञप्तिं करोमि यदिदं वचः दूष्यं विचार्य्य मात्सर्यं विहाय विवुधाः परम् ३ धीमत्त्वेहेतुभूतानर्थान्स्वीयग्रन्थे शिवसाहश्यं स्वस्य कुलशुद्धत्वञ्चव्यञ्जनया शाब्दतो वा दर्शयन् विघ्नविघातायकृतम्मङ्गलं शिष्यशिक्षायै निवध्नाति पातञ्जल इत्यादिना॰ प्रथमं पतञ्जलिशब्दोपादानं वलवत्तरमङ्गलाय महाभाष्यमात्रोक्तौ शारीरकसूत्रभाष्यस्यापि वोधस्स्यादतः पातञ्जलपदम् तावन्मात्रोक्तौ चरकेऽतिव्याप्तिरतो महाभाष्येति। महत्पदानुपादाने पतञ्जलिप्रणीतसूत्रसम्वन्धिभाष्ये व्यासकृतेप्यतिव्याप्तिरतो महत्पदम्। न च पातञ्जलपदस्य प्रोक्तार्थे कारणत्वरतया न दभेदस्य व्यासकृते विरहान्नातिव्याप्तिरिति वाच्यम् दृष्टिघटितत्वादिरूपमहत्वस्य भाष्यान्तरे विरहाद तेनैव सकलातिप्रसङ्गनिरासे पातञ्जलपदमत्र योगभाष्यसङ्ग्रहार्थमेवेत्याशयात् विनापि चकारमहरहर्नयमानो गामश्वम्पुरुषम्पशुमित्यत्र समुच्चयस्य दृष्टत्वात् एतेन शब्दज्ञानानुपातीवस्तुशून्यो विकल्प इति पातञ्जलसूत्रमादाय वक्ष्यमाणं सिद्धान्तार्थकथनमसङ्गतं पातञ्जलभाष्यार्थानवबोधादिति शंकायानावकाश इति सूचितम् कृतभूरिपरिश्रम इति॰ सापेक्षत्वेपि गमकत्वात्समासः। न च चैत्रस्य गुरुकुलमित्यत्रेव

राम
१

नित्यसापेक्षत्वादेवनदोषइतिवाच्यम्· नित्यसापेक्षत्वाभावेपिसक्थ्काढकमापणीयानाङ्किःमोदनःशालीनामित्यादौसमास
दर्शनेनगमकत्वस्यैवप्रयोजकत्वात् गमकत्वंचविग्रहवाक्यजन्यशाब्दबोधसमानप्रकारकशाब्दबोधप्रयोजकत्वमेवाकृ
तभूरिपरिश्रमइत्यनेनपातञ्जलमहाभाष्यप्रभावादेवसर्वेतन्त्रार्थज्ञानजननबोधनेनान्यत्रपरिश्रमाभावोध्वनितः॥ पि
तृकीर्त्यैर्थेन्तत्रामोल्लिखति शिवभट्टसुतइति धीमान् ऊहापोहकुशलः।एतेनस्वस्यविवेचकत्वंध्वनितम्।सतीदेव्याइति सञ्ज्ञा
सतीति।भाषितपुंस्कत्वाभावान्नपुंवद्भावः।नचसञ्ज्ञापूरण्योश्चेतिसूत्रेणसञ्ज्ञायाःपुंवत्त्वनिषेधसामर्थ्याद्भाषितपुंस्कत्वम
स्यास्तीतिवाच्यम्·योगरूढस्यदत्तादिशब्दस्यतत्रग्रहणात् देवीसुपादानंतदन्तत्वमेतिसूचनाय।सतीदीव्यतिपातिव्रत्येनजिगी
षतीतिवा।दुष्टान्नभक्षणेबुद्धिमान्द्यसम्भवात्कथंधीमत्त्वमतआहयाचकानामित्यादि अभेदरूपकद्वयम् अरिकक्षेति अरय
एवकक्षाः शुष्ककाननम्।तत्रहुताशनः।एतेनमहाशूरत्वन्ध्वनितम्।रामतः।रामसिंहनामकक्षत्रियात्।नागेशाइति
एतेनव्याकरणसिद्धान्तज्ञानवत्त्वंसूचितम्।ननुमनोरमयैवमूलार्थज्ञानसम्भवान्नयासवैयर्थ्यमतआहमनोरमोमाईदे
हमिति·एतेनतदुक्तानामर्थानांप्रायःकथनाभावोध्वनितः लघुशब्देन्दुशेखरमिति·शब्दइन्दुःशब्देन्दुः।लघुश्चासौशा
ब्देन्दुश्चलघुशब्देन्दुःकलात्मकश्चन्द्रःसशेखरेयस्य।यद्वालघवःशब्दायस्मिन्सलघुशब्दःसइन्दुशेखरमिवेत्यर्थः शब्दो

भै०
२

पा

व्याकरणाभिव्यङ्ग्यः। स इन्दुरिव शब्देन्दुः। तस्मिन्निन्दुतादात्म्यमर्थप्रकाशकत्वेन दोषरहितत्वेन वा विवक्षितम्। स एव शेखरः शिरो
भूषणं यस्येति वा। न चेन्दुसादृश्यादेवार्थप्रकाशकत्वे लब्धेऽर्थप्रकाशकमित्यस्य पृथग्भूतस्योपादानं व्यर्थमिति वाच्यम्‌ मनोरमादि
नायादृशार्थप्रकाशो न तस्यापि प्रकाशकमित्यर्थात्‌ ग्रन्थप्रचारादीति आदिना तदध्येतृव्याख्यातॄणां श्रद्धातिशयादिपरिग्रहः समुचि
नेति त्रयाणामपि शास्त्रप्रणेतृत्वात्‌ अनुषंगतइति कुल्याइवान्यार्थकृतस्यानुद्देश्यफलप्रयोजकत्वात्‌ नमः स्वस्तीति चतुर्थीमाशंक्याह कारक
विभक्तेरिति० उपपदविभक्तेः कारकविभक्तिर्बलीयसीति न्यायादित्यर्थः। कृधातूपस्थाप्यक्रियानिरूपितकर्मत्वात्‌ केवलनमःशब्दयोगे चतु
र्थीविधानं चरितार्थम्‌। इदमस्तु सन्निकृष्टमित्यभियुक्तवचनेन सन्निकृष्टस्यैवेदमा परामर्शो युक्तः कौमुद्यास्तु सिद्धत्वाभावादेतदनुपप
न्नमत आह भाविन इति० यथा भाविघटविषयेऽत्र घटो भविष्यतीति व्यवहारस्तथेयमिति निर्देशः। सत्कार्यवादसिद्धान्ताश्रयणेन वा इय
मिति निर्देश इति भावः। स्त्रीलिङ्गनिर्देशोऽपि ग्रन्थे उपमानकौमुदीगतलिंङ्गस्यारोपेणोपपद्यत एव। बुद्धिसत्त्वासमाविष्टस्य शाब्दबोधविष
यत्वमिति सिद्धान्त इति भावः। कौमुदीसादृश्यप्रयोजकधर्ममाह सिद्धान्तेति० अत्रोपमालङ्कारो व्यङ्ग्यः। सञ्ज्ञा च परिभाषा च विधिर्नियम एव
च अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणमिति प्राचीनपठितसूत्रलक्षणेष्वयस्य संत्वं तदाह। एषामिति क्रमबोधकत्वेपीति० अत्र क्रम
परामर्श आद्यजन्तम्। क्रमेण बोधकत्वेपीति वार्थः। एतेन क्रमे शक्त्यभावेन क्रमबोधकत्वेपीत्यनुपपन्नमित्यपास्तम्। एषां क्रमेण बो

राम
२

धकत्वादेवयमांयमीतियथासङ्ख्यविज्ञानस्येणादिप्रत्याहारेउकारादिग्रहणस्यचरितार्थत्वसिद्धिः। वृत्तिपरिच्छेदकत्वञ्च शक्तिग्राहकत्वम्।
ननुवृत्तिपरिच्छेदकत्वन्नसञ्ज्ञासूत्रत्वसाधकम्। कर्त्तरिकृदित्यादौव्यभिचारात् आदिरन्त्येनसहेति सूत्रैकवाक्यतापन्नत्वेसतिवृत्तिपरि
च्छेदकत्वंमपिनाकृञ्चानुप्रयुज्यतेइतिसूत्रघटककृञ्पदस्यादिरन्त्येनेत्यनेनैकवाक्यतयाशक्तिग्राहकत्वेपिसञ्ज्ञासूत्रत्वाव्यवहारात्। उक्त
हेतोरेङ्क्विरादैजित्यादावसत्त्वेनसञ्ज्ञासूत्रसमानावृत्तितयापरिभाषाद्यन्यतमभिन्नत्वविशिष्टसूत्रत्वरूपपक्षतावच्छेदकाव्यापकतयास्वरूपा
सिद्धत्वाच्चेतिचेन्नसञ्ज्ञास्वरूपावच्छिन्न शक्तिग्राहकत्वमात्रस्यैवहेतुत्वात्। तादृशहेतोः पक्षेष्वेषुसूत्रेषुसत्त्वमादिरन्त्येनेतिसूत्रैकवाक्यत
येतिस्पष्टयितुमादिरन्त्येनेत्यनेनैकवाक्यतयेतितत्त्वीयान्तोल्लेखः एकस्योभयार्थत्वमत्राविरुद्धमित्याह। क्रमस्येति· इतासदृशेनेति· अयम्भाव
प्रत्याहारेऽनुबन्धानाङ्ग्रहणेपुनेतिपूर्वपक्षेआचारादप्रधानत्वाल्लोपश्चबलवत्तरइत्युत्तरोत्तरीत्यान्त्येनेनासहोच्चारणासम्भवेनेत्य
दसेन्सदृशलक्षणाया आवश्यकत्वात् प्रसङ्गादाहस्वौजसित्यादि· आदिनातिपूतसङ्ख्यस्यकृञ्चानुप्रयुज्यतेइत्यस्यसङ्ग्रहः एतेषुस
न्धिकार्यमाशङ्क्याह एष्विति· अनुकरणत्वेनेति· अनुकार्यानुकरणयोरभेदविवक्षायामित्यर्थः भेदविवक्षायान्त्वाह सौत्रत्वाच्चेति· अयम्भावः
यदानुकार्यानुकरणयोरभेदविवक्षापक्षस्तदाशब्दजन्यशाब्दबोधप्रकारतयायदनुकरणभानंतदैवानुकार्यस्यापिभानंभेदाभावादितिनानु
कार्येशक्तिरित्यनुकरणशब्दस्यवृत्त्यार्थबोधकत्वरूपार्थवत्त्वाभावात्प्रातिपदिकत्वाभावेनविभक्त्यनुत्पत्तिः। वस्तुतस्तुभेदोनिरूपयितुम
शक्यः। पटदित्यादिध्वन्यनुकरणस्थलेऽनुकार्यस्यध्वनिमयत्वादनुकरणस्यवर्णमयत्वादिरुद्धधर्मयोरेकत्रासमावेशात्। घटपटादि
शब्दानुकरणस्थलेप्यर्थपदार्थकत्वशब्दपदार्थकत्वाभ्यांभेदस्यन्यायप्राप्तत्वात्। नचतयोर्भेदेऽनुकार्योपस्थितिप्रयोजिकानभवत्तिरुपेय।

भै०
३

तिप्रातिपदिकत्वमनुकरणस्यप्राप्नोतीतिवाच्यम्।सादृश्यसम्बन्धेनोपस्थितस्याप्यनुकार्यस्यशाब्दबोधेव्युत्पत्तिवैचित्र्येणभान
सम्भवात्।यदित्वनुपस्थाप्यस्यशाब्दबोधेभानानङ्गीकारस्तदानत्रानुकरणशक्तिसत्त्वेपिसौत्रत्वाद्विभक्त्यभावइति॰ ननुसंहितैक
पदेनित्यानित्याधातूपसर्गयोः नित्यासमासेवाक्येतुसाविवक्षामपेक्षतेइत्यनेनवाक्यएवसंहितायाविवक्षाधीनत्वबोधनम् प्रकृते
विभक्त्यभावेनवाक्यत्वस्यैवानुपपत्तिरितिवाच्यम् यत्रकारकान्वितक्रियाप्रतीयतेतत्रैववैतादृशवाक्यत्वाङ्गीकारात्।प्रकृतेतुशक्यप
दसमुदायस्यवाक्यपदेनग्रहणम् यथागवित्ययमाहेत्यस्यवाक्यत्वात्समासग्रहणनिवर्त्यत्वोपपत्तिः।नचैतादृशवाक्यत्वस्यवाक्ये
तुसैत्यत्रग्रहणेचक्रतुरित्यत्रकदाचिद्यणरहितप्रयोगोपिस्यादितिवाच्यम् संहितैकपदेइत्यनेनतत्रसंहितायानित्यत्वबोधनात्।स्वरस
न्धिस्तुनप्रवर्तते वर्णोपदेशकालेऽज्ञादिसञ्ज्ञानामनिष्पादादितिकैयटःकथितवान् तच्चकौस्तुभेमूलकारोवर्णोपदेशेइत्सञ्ज्ञाया
मच्प्रत्याहारेनिष्पन्नेप्रवर्तमानानांयणादीनांसुध्युपास्यइत्यादौतटस्थइवोदेश्यतावच्छेदकरूपाक्रान्तेवर्णोपदेशादावपिप्रवृत्तेराव
श्यकत्वादन्यथातुल्यास्यप्रयत्नमित्यादौसवर्णदीर्घोनस्यादितिरीत्यादूषितवाँस्तदुद्धारःसिद्धान्तरत्नाकरेकृतस्तन्दूषयितुमुपन्यस
ति यत्त्विति अयम्भावः।अविकृताकारादिविषयताविशिष्टशक्तिज्ञानस्याद्गुणइत्यादिवाक्यजन्यशाब्दबोधहेतुतयातदुत्तरंतादृशवि
षयताविशिष्टशक्तिग्रहासम्भवइति॰ एतद्दूषयति तन्नपुनरित्यादिना॰ अर्थान्तरे विकृताकारादौसन्धौ सतीतिशेषः।व्याख्यानतइ
त्ति॰शिष्टकृतादित्यर्थः।पाणिनिपठितप्राथमिकशिष्यज्ञानपरम्परयानिर्णयसम्भवादितिभावः।समाम्नायइतिव्यवहारइति॰ अस्य
भाष्येकृतइत्यादिः।अस्यैववेदाङ्गत्वमिति॰ एवकारेणेतरव्याकरणानांव्यवच्छेदोनतुङ्गानाम् सजातीयत्वात्।नन्वेषांमहेश्वरप्रसादत्व।

श० म
३

अत्वेलण्सूत्रेआचार्यप्रवृत्तिरित्यत्राचार्यैत्यसङ्गतमाचार्यपदेनतत्रतत्रपाणिनेर्व्यवहारादतआह। लण्सूत्रेणकारविषयेति· नन्वनु
बन्धानांपाणिनिकर्तृकत्वपाकथम्महेश्वरग्रहणमतआह अनुबन्धाश्चेति· अनुपदम् नृत्तावसानइत्यादिना। नन्वनुबन्धानांमहेश्वर
कृतत्वेऽत्रमङ्गलनमित्यत्रनमस्कारप्रत्याख्यानपरभाष्यविरोधइत्यतआह

॥ नमङ्गलानमित्यत्रेति· एवम्परम्। एवंविचारपूर्वकमुद्धादृष्टार्थत्वप्रतिपादनम् इकोणचीति सूत्रइतिएतत्सूत्रस्थभाष्यइत्यर्थः
सामर्थ्ययोगादितित्यस्यलोपइतिपञ्चमीफलजननसामर्थ्ययुक्तविहायेत्यर्थः। तच्चफलंवहुप्रदृष्टादृष्टोभयम्। क्वचिच्छुद्धादृष्टमेव॥
ननुनाज्झलावित्यादिसूत्रप्रत्याख्यानपरभाष्यासङ्गतिः। वृद्धिसूत्रभाष्येप्रमाणभूतआचार्योदर्भपवित्रपाणिः शुचाववकाशेप्राङ्मुख
उपविश्यमहताप्रयत्नेनसूत्राणिप्रणयतिस्म। तत्राशक्यंवर्णेनाप्यनर्थकेनभवितुंकिंपुनरियतासूत्रेणेत्युक्तत्वादतआह वृद्धिसूत्रस्थइति·
अतएववर्णसमाम्नायस्यश्रुतित्वादेव। प्रतिमण्डितइति· शोभितइत्यर्थः। ननाद। अन्तर्भावितण्यर्थत्वनादयामासेत्यर्थकम्। एतत् ढ
क्कानादरूपंशिवसूत्रजालंचतुर्दशसूत्रीरूपेणपरिणतंवभूवेतिशेषः। इत्येतद्विमर्शेविचारयामि। आर्षमेतत्। अथवासप्तम्यन्तमेतत्
विमर्शेविचारेकृतेसति। पतीमइतिसर्वशेषः। एतेनम्नशतेः परस्मैपदित्वाद्यप्त्ययेनात्मनेपदेप्युत्तमपुरुषैकवचनस्यैटोडित्त्वाद्गुणानुपप
त्तिः सर्वकार्योशोछान्दसत्वकल्पनेगौरवमितिपरास्तम्। अत्रसर्वत्रेति· ढक्कानादरूपसूत्रेष्वित्यर्थः। अन्त्यंवर्णचतुर्दशमिति· वर्णा
नाञ्चतुर्दशमितिसमासः। चतुर्दशत्वञ्चचतुर्दशसंख्यापूरकत्वंतच्चसर्वेषामस्ति। यथाभाष्येयदासमर्थः पदविधिरित्येवोऽध्याय
श्चरमंगणयतेतदासोप्यष्टमोभवतीत्युक्तम्। क्वचित्तुअन्त्यवर्णंचतुर्दशमितिपाठः अन्त्यावर्णाश्चतुर्दशायस्मिन्निस्यर्थः। वर्णानामुप

भै· ४

देशश्चत्रोपदेशशब्दो बोधनपरः। अक्षरञ्छन्द इति· अक्षरबोधको वेद इत्यर्थः वर्णश इति· वीप्सायां शस् वर्णंवर्णं समनुक्रान्तम् सम्य
गनुक्रमेण दर्शितम् मयेति शेषः। पूर्वोक्तं छन्दस्त्वं दृष्टान्तप्रदर्शनेन द्रढयति यथेति पाणिनिकर्तृकत्वशङ्कां वारयति। अतएवेति· अ
न्यकर्तृकत्वादेवेत्यर्थः। एतेन पाणिनिकर्तृकशास्त्रबहिर्भूतत्वमस्य स्पष्टमेव लभ्यते अतएव मङ्गलार्थमादितो वृद्धिशब्दं प्रयुङ्क्त इति भा
ष्यं सङ्गच्छते। एतच्चोपपादितमिति· एतेषां क्रमबोधकत्वेपीत्यादिनेति शेषः। सञ्ज्ञाप्रयोजनमाह सञ्ज्ञेति· रप्रत्याहारेति· उरण्रपर इति सू
त्रनिर्दिष्टेति शेषः। कैयट इत्युक्तिसूचितामरुचिम्प्रकाशयति परे त्वित्यादिना· नन्वतोल्रेति सूत्रेपि प्रत्याहारनिर्देशे रदाभ्यां वनो रचेति
सूत्रेपि रप्रत्याहारग्रहणापत्तिरतस्तत्र तथा निर्देशो रप्रत्याहारानित्यत्वज्ञापनार्थः। न च रदाभ्यामित्यत्र फलाभाव इति वाच्यम् प्रफुल्लत
मित्यत्र नत्वापत्तेः सुवचत्वात्। वनो रचेत्यत्रानुपसर्गे लत्वप्राप्तिः स्फुटैव किञ्च प्रत्याहारसिद्धिरिच्चाधीना तच्चानुनासिकत्वप्रतिज्ञासम
धिगम्यमिति। अतोल्रेति सूत्रेऽनुवाद्यसमर्पके तोल्रेति पदेऽनुनासिकत्वप्रतिज्ञाया अकल्पनेपि न क्षतिरित्यरुचेराह किञ्चास्येति·
थशब्दशक्तिग्रहस्त्वरशब्दस्येव पाणिनीयव्यवहाराद्भविष्यतीति भावः। नन्वतोल्रेति सूत्रे लकारोच्चारणेनानुनासिकमजनुबन्ध
मादाय प्रत्याहारः क्वचिदेवेति कल्प्यते। अतएव रात्सस्ययोचीत्यादौ न दोषः। यणशब्दे णकारोच्चारणाच्च चरितार्थमित्यरुचेराह
किञ्चानुबन्धेति· अत्राच्प्रत्याहार इत्यजघटितपाठः प्रत्याहारेऽनुबन्धानामित्यस्य सूत्रचतुष्टयानन्तरं पाठेन भाष्यकृतोपन्यासा
त्कृतः। वस्तुतस्त्व इउणित्यादिसूत्रघटकानुबन्धानां तत्तद्व्यक्तित्वेन पक्षत्वे पक्षतावच्छेदकानां नानात्वापत्तिरतोऽनुबन्धपदव्य
वहारविषयतात्वावच्छिन्नविषयतापक्षतावच्छेदिका बोध्या। प्रत्याहारघटकत्वाभावः साध्यः। आचारादिति हेतुः। अत्राचारः

एम ४

पाणिनेः कृतिरेवानन्याचार्यकृतेः पक्षेसमवायेनासत्त्वात्स्वरूपासिद्धिरिति वाच्यम्। तादृशकृतेः स्वसाध्यप्रत्याहारप्रयोज्यका
र्यजनकत्वसम्बन्धावच्छिन्नस्वनिष्ठप्रतियोगिताकाभाववत्त्वसदृशत्वसम्बन्धेनहेतुत्वात्। सुप्सुपास्वइत्यत्रैकारेस्वसाध्यणत्व
रूपकार्यजनकत्वसम्बन्धेनस्थितायाः कृतेस्तत्सम्बन्धावच्छिन्नाभावस्तद्भिन्नृषिकृषेरितिसूत्रघटकेकृषिशब्दावयवककारेऽ
नुबन्धसदृशेऽस्तीतिहेतोः पक्षसत्त्वोपपत्तेः। तत्त्वनियामकसम्बन्धस्याभावप्रतियोगितानवच्छेदकत्वेहेतुतावच्छेदकसम्बन्धा
प्रसिद्धिरितिहेत्वन्तरमाह अप्रधानत्वादिति अत्रप्रधानत्वंप्रत्याहारग्रहणफलकमहेश्वराभिप्रायविषयत्वम्। तदभावः स्वरूपस
म्बन्धाप्रसिद्धिरितिहेत्वन्तरमाह अप्रधानत्वादिति अत्रप्रधानत्वंप्रत्याहारग्रहणफलकमहेश्वराभिप्रायविषयत्वम्। तदभावः।
स्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकोहेतुः हेत्वन्तरमाह लोपश्चबलवत्तरइति· लोपस्यबलवत्त्वञ्चप्रत्याहारसिद्धिप्राक्कालि
कप्राप्तिकर्तृत्वम्। बलवत्तरलोपप्रतियोगित्वंहेतुरितिफलितम्। तृतीयहेतोरव्यापकत्वापत्तिरिति· नचहेतोः साध्यव्याप्यत्वमे
वानुमायकत्वप्रयोजकन्तुव्यापकत्वमित्येतदसङ्गतमितिवाच्यम् एक्षतावच्छेदकाव्यापकत्वापत्तिरित्यर्थात्। पक्षतावच्छेदका
वच्छेदेनानुमितौहेतौपक्षतावच्छेदकव्यापकत्वावगाहिपरामर्शस्यैवहेतुत्वादितिभावः तदेतदुपपादयति तथेत्यादि· मतद्
तिशेषः। एतदुपपादनमित्सञ्ज्ञालोपयोरभावेनेत्यन्तेन नन्वेवमपियस्यानुनासिकत्वंनस्पष्टंस्यैप्रत्त्वादेवनदोषइत्यतआह
प्रत्याहारेष्विति अतएवसर्वेनकाराणांरुलु पदवोध्यत्वोपपत्तिः अनुनासिकत्वसमानाधिकरणजातिविवक्षायामप्याह मा
मांस्त्रायस्वेति· अनितः किवन्तस्यानितिसम्बुद्ध्यन्तम्। ननुतर्हिह्रस्वत्वविशिष्टजातिनिर्देशएवास्तामतआह सोऽस्तीति· ननुप

णच्परितसूत्रेष्वित्यादिनोपपादितलाघवञ्च सार्वत्रिकस्मादृणोयण इत्यण इत्यादौ तदभावात् किञ्च इको यणचीति सूत्रे यप्रत्याहारेण निर्देशे
प्रक्रियागौरवम् कश्चिन्मात्रालाघवासत्वेपि जातेरस्त्रीविषयादयोपधात् ङीप्र्यः। यो चीत्यादीनां विषयविभागानुपपत्तिः तथासति जातेरि
ति सूत्रे प्रत्याहारग्रहणे महाशूद्रीत्यत्र ङीषभावापत्तिः ङीप्र्य इत्यत्र प्रत्याहारनिर्देशे वकारादेरप्यादेशत्वप्रसङ्गः। एवं यो चीत्यत्राप्यनिष्टं
वोध्यम्। एवञ्च तृतीयहेतोरव्यापकत्वापत्तिरित्यसङ्गतम्। पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धेरुद्देश्यत्वादिति चेन्न उदा
त्तस्वरितयोः संयोगादेशातः। उदात्तयणो हल्पूर्वादित्यादौ लाघवाय प्रत्याहारेणैव निर्दिश्येदित्याशयात्। यत्र तु न लाघवं तत्रान्यार्थे लणित्यत्र
कृतेन णकारानुबन्धेनैव निर्देशोऽस्तु। जातेरिति सूत्रे प्रत्याहारग्रहणन्तु न शंकास्पदम्। तादृशप्रत्याहारग्रहणस्य भाष्येऽदर्शनात् कष्ट
येति निर्देशस्यैव सत्वात् ङे यं इत्यत्रापि तथा शंका। यो चीत्यत्रापि न प्रत्याहारसम्भावना पूर्वोक्तरसूत्रयोः प्रत्याहारबोध्याविधायकत
याऽत्रापि तत्साहचर्येण तथाकल्पनात् पक्षतावच्छेदकसामानाधिकरण्येनेत्यादि तु शंकास्पदमपि अइउणित्यादिसूत्रचतुष्टय नि
दिष्टानामनुबन्धानामुक्तानुगतधर्मपुरस्कारेणैव पक्षतयाऽवच्छेदकावच्छेदेनैव साध्यसिद्धेर्भाष्याभिप्रेतत्वात्। न च सोऽस्यादिरि
ति निर्देशेनाकारस्य लोपाभावज्ञापनात्सोऽस्तीत्यस्य सिद्धिरिति वाच्यम् तेन निर्देशेनानेकक्लिष्टकल्पनापेक्षया लणसूत्राकारस्या
नुनासिकत्वाभावकल्पने लाघवसम्भवात् अत एव लणसूत्राकारस्यानित्संज्ञकत्वादेवाप्रत्याहार इति व्याख्यातमेतत्। न हल्
प्रत्याहार इति। अन्यथा अकारानुबन्धस्य विजातीयत्वं तस्यापि हल्प्रत्याहारग्रहणशंकासमाधानयोः कर्तुमुचितत्वादिति भावः।
दग्रहणस्यापत्तिरिति। तथा च रामष्टीकत इत्यादौ दृशिचेत्युत्वापत्तिः पुनः पुनरकारोच्चारणेनेति। न चाकारोच्चारणाभावे व्यञ्जनोच्चा

रणासम्भवइतिवाच्यम् हयादिवर्णानांसंयुक्तानामुच्चारणसम्भवात्।तदघटितेति॰ उच्चारणार्थोवर्णसहितहल्घटितेत्यर्थः न
चकोयष्टिकष्टीकतइत्यादिकविप्रयोगदर्शनात्तद्विषयप्रयोगाणामदर्शनादित्यनुपपन्नमितिवाच्यम्।तंयातयाम्रयममासकरेण
पश्चादित्यादिमहाकविप्रयोगतुल्ययोगक्षेमत्वात्।उपसंहरतितस्मादिति॰ अस्यलणसूत्रस्थाकारस्य।नचोच्चारणार्थोनामित्संज्ञायावक्ष्य
माणत्वादिदमसङ्गतमितिवाच्यम॰ हकारादिस्थाकारवदस्याप्युच्चा रणमात्रफलकत्वान्नित्त्वस्याभावेपिक्षत्यभावात्प्रत्याहारेहकारादिघ
टितेग्रहणापत्तिस्तुनापुनःपुनरुच्चारणात्।अप्रधानत्वाद्धानदेतद्दूरस्यति नपुनरत्तरेणाचमित्यादिना॰ नविभक्तावित्यादेरिति॰ आदिना
जातिपदघटितविधिसूत्राणाम्परामशामरनरेणाचमित्यादिना॰ अन्योन्याश्रयाभावायशंकतेनन्विति॰ रुप्रभृताविति॰ रुशब्दइति
निर्दिष्टधातुप्रभृतिष्वित्यर्थः अशोकवनिकान्यायेनैवतदुक्तिः।अनुनासिकश्चेदिङ्भवतितर्ह्यजेवेतिविपरीतनियमशंकांवारयति॰ भि
दचोन्त्यादितीति॰ अस्यादोषत्वादिति॰ अपाणिनीयत्वस्यादोषत्वादित्यर्थः।अत्रैवभाष्यसम्मतिमाह सूत्रभेदमिति॰ उपाचरन्निर्वर्ण
यन्तिानदेव॰तदर्थकमेव।भूयः।तदपेक्षयाऽधिकम॰ तद्वाशयः।पूर्वपक्षाशयः।राजाज्ञाऽस्तीति॰ एवञ्चपूर्वोक्तव्याख्यानेगौरवमिति।
भावः।कस्यचिन्मतन्दूषयति नचेति॰ अत्रसहेनाशब्दउद्देश्यबोधकः।एवञ्चसहेनामध्यमोवर्णः।अन्येनसहितोयआदिस्तदभिन्न
इतिवाक्यार्थः।अत्रसहेनाशब्दोयोगरूढः।सहयुगपत् एतेनबुद्धिविषयोभवतीत्यर्थः मध्यमइति रूढ्यर्थप्रदर्शनम्।मतंखण्ड
यति॰ अन्योन्याश्रयेत्यादिना।अत्रइणगना।विन्यतश्चेत्यपपाठः।एत्त्येधत्यूठस्विनिरुद्ध्यापत्तेः।एतद्विवाध्यसामान्यचिन्तयापररू
पमात्रस्यवाधकमतएवांवेहीतिवृद्धिघटितस्यनेनसाधुत्वमुक्तम् नचवाध्यविशेषचिन्तामाश्रित्यदीक्षितैर्दूषितमितित्वन्यत्॥

सञ्ज्ञापूर्वकविधेस्तेनानित्यत्वस्वीकारान्न द्वीन्यावाएतदभिधानम्।एवञ्च योगरूढिसङ्गावेमानाभावइतिभावः अत्र भाष्यमपि
साधकमित्याह·भाष्येपीति·कैयटकृतंभाष्यव्याख्यानंदूषयति·हृसमीपइत्यादिना·इत्सूत्रमिति·सामीप्यस्यषष्ठ्यर्थत्वाभावइत्यपि
वोध्यम् नन्वेवमिति· पूर्वोक्तान्योन्याश्रयपरिहारेपि·अभावज्ञानेप्रतियोगिज्ञानस्येवेति·विशेषणतावच्छेदकप्रकारकज्ञानस्यका
रणत्वादितिभावः।ननुपूर्वेत्यपवादाइतिभाष्योक्तापवादवाक्यार्थज्ञानस्यकारणंब्रूमइत्यतआह पूर्वमिति·अपवादशास्त्रपर्यालो
चनेन अपवादशास्त्रार्थबोधेनेत्यर्थः।तदविषयमिति·अपवादशास्त्राविषयमित्यर्थः एतेनलक्ष्मसंस्कारेक्रमापेक्षानतुवाक्यार्थ।
बोधइतिभावः।यत्विति·यथानसम्प्रसारणेसम्प्रसारणमित्यपवादशास्त्रप्रवृत्तिःस्वयोग्यविषयेभवति तथापरिचिन्त्यपूर्वमुत्सर्गःस्वयु
वेत्यादिःप्रवर्त्ततइत्यर्थः एतेनान्यस्यसम्प्रसारणमितिफलितम्।एतत्कैयटोक्तव्याख्यांखण्डयति।तन्नेति·भाष्यविरोधमुपपादयति
।नहीति·न्यायेन।पूर्वंहीतिन्यायेनपूर्वोदङ्कि·तान्योन्याश्रयासम्भवमुपपादयति।नविभक्ताविति·पदार्थज्ञानमात्रेणेति·मात्रपदेन
वाक्यार्थज्ञानव्यवच्छेदः अत्रापीति·आवृतहलन्त्यमितिसूत्रइत्यर्थः।आदिरितिकिमिति·अन्त्यपदेनतल्लाभःसम्भवतीतिभावः।
नचाश्रितस्यशाब्दबोधविषयत्वंपदानुपस्थितत्वान्नसम्भवतीतिवाच्यम्·प्रविशापिएडीमित्यत्रेवसम्भवात्·आदेरेवाक्षेपइ
त्यत्रमानाभावइत्युत्तराभिप्रायः।अन्यतरानुपादानेइदंत्यसहितःपूर्वः।परसहितआदिरित्यपिसम्भाव्येतास्वंरूपमित्यनुवृत्ति
परव्याख्यानंनिष्प्रयोजनमित्याशयेनाह।अत्राद्यन्तेति·प्रत्याहारप्रसङ्गादाह।अचिश्वेति·पूर्वनिपातापत्तेरिति·विशेषणत्वा
त् सूत्रकारशैलीसिद्धत्वादिति·प्रायोवादोऽयम्।अपृक्तएकाल्।निपातएकाच् इत्यादौसमासदर्शनात्·अतएवेति·समुदाया

न्यग्रहणादेवाइत्संज्ञापरित्राणमिति॰ इत्संज्ञायाः परित्राणमित्यर्थः। सुपुंसुपेति पञ्चम्यन्तपूर्वपदकः समासः। नत्सिद्धिरिति॰ इत्संज्ञासि
द्धिरित्यर्थः। अत्राद्योच्चारणकाले विद्यमानस्यापि णकारस्येत्संज्ञाविधायकशास्त्रजन्यवाक्यार्थबोधान्न प्राप्तिरिति भावः। अन्यत्रस
नादिप्रत्ययावयवनादौ। पदार्थोपस्थितिरिति॰ अनुबन्धविनिर्मुक्तस्यैव पदार्थस्योपस्थितिरित्यर्थः। चैत्रस्य गुरुकुलमितिवत् सापे
क्षत्वेपि समासः। एतादृशे विषये प्रायः पदं जसः शीत्यादिस्थले विलम्बेनैव सेति सूचनाय। यद्यपि नाज्झलाविति सूत्रे उत्तरत्वमात्र
मुक्तं तथापि न दव्यवहितत्वसहितं तन्त्रे पमधिककालव्यवायसाधकाभावात्। ननु तदुपस्थाप्ये चेदित्कार्यं तदा वैयाकरण इत्यत्र
चिदुपस्थाप्यैकारस्य चित्कार्यप्रसङ्गः। तत आह॰ वैयाकरण इति। नन्वनुबंधविनिर्मुक्तस्य पदार्थस्योपस्थितिस्वीकारे सुबविषये। नरङ्
त्वादित्संज्ञासादेवस्त्र जसादावित्सञ्ज्ञायां लोपे च कृते जकारमात्रस्य विभक्तिसंज्ञाप्रसङ्गः। न विभक्ताविति सूत्रस्य प्राग्दिशीये चारितार्थ्या
दत आह। विभक्त्यादिसंज्ञापीति॰ आदिना प्रत्ययादिसंज्ञापरिग्रहः। अत्रार्थे भाष्यसम्मतिमाह। अत एवेति॰ अनुबन्धविनिर्मुक्तोपस्थिति
स्वीकारादेव॰ तत्सूत्रभाष्ये अप्रत्यय इति किमर्थम्। सनाशंसभिक्ष उः। अल्पत्वमिदमुच्यते। अप्रत्ययादेशटित्किन्मित इति वक्तव्यमित्यु
क्त्वा आदेशोदाहरणमिदमइशित्युपन्यस्तम्। न चानुबन्धविनिर्मुक्तपदार्थोपस्थितिस्वीकारेणित्कर्मण्यण सूत्रघटकः। सन्प्रत्ययो
य श्चैतदुपस्थाप्यः प्रयोगस्थः प्रत्ययो न सणिदिति कुम्भकार इत्यादिरूपासिद्धिरिति वाच्यम्। यथा हरेरफौ यस्मिन्निति व्युत्पत्त्या भ्रमरपद
स्य हिरेफपदव्यवहार्यत्वेपि शब्दार्थयोस्तादात्म्यान्मधुव्रते पि द्विरेफपदप्रवृत्तिस्तथोपस्थापकस्य सूत्रघटकस्य णित्वादुपस्थाप्येपि णित्वमि
त्याशयात्। यद्यनुबन्धरहितस्य पदार्थस्योपस्थितिस्तदेशादेशस्यापि शकाररहितस्योपस्थितिः स्यात्तथा च शिद्ग्रहणस्य ज्ञापकत्वोपपाद

नपरभाष्यविरोधइत्यतआह यत्त्विति॰ अनुबन्धप्रसङ्गादाह। अत्रकेचिदित्यादि॰ अत्र॰ अनुबन्धविषये। एकान्तशब्दोऽवयववाची। तत्र॰ अव
यववति॰ कदाचित्॰ छेदनानन्तरंतत्रानुपलम्भात्। तथाचयस्यावयवित्वमभिप्रेतन्तत्रकदाप्यनुपलम्भेननावयवत्वमितिभावः। तथाचानुब
न्धाः। अवयवत्वाभाववन्तः। अवयवित्वाभिमतविषयितासमानाधिकरणविषयिताकत्वाभावादितिपर्य्यवसन्नम्॰। ननूपस्थापकस्यापि
णित्वन्नस्यादन्यावयववाचकस्यान्यशब्दस्यतत्राप्रवृत्तौहलन्त्यमितिसूत्रप्रवृत्त्यसम्भवादतआह। हलन्त्यमित्यत्रेति॰ अत्रपक्षेज्ञापकमाह। अ
अतएवेतिअनुबन्धानामनेकान्तत्वादेव। तस्याप्तिरिति॰ आदितश्चेत्यत्रापिसमीपेऽवयवत्वारोपेणैवबहुव्रीह्युपपादनात्। सिद्धान्तमाह। परेत्वि
त्यादिना॰ नन्वनवयवत्वसाधकहेतोरुक्तत्वात्कथमवयवत्वमितिवाच्यम्॰ शास्त्रेतत्रोपलम्भादित्यनेनोक्तहेतोःस्वरूपासिद्धत्वोपपादनात्
तत्र॰ बोधके। एवञ्चवाच्यवाचकयोस्तादात्म्याद्वाचकविषयितासामानाधिकरण्यस्यानुबन्धविषयितायाःसत्वेनपक्षेहेतुतावच्छेदकाव
च्छिन्नाभावसत्वमक्षतमितिभावः। अन्यत्र॰ बोध्ये। अनवयववैधर्म्यमाह। अनवयवोहीति॰ एकजातीयेति॰ संयोगेनेत्यर्थः अनवयवत्वे
बाधकमाह। किञ्चेति॰। दोषान्तरमाह॰ किञ्चेति॰ नन्ववयवत्वेऽभ्रआँअदितइत्यत्रोक्तप्रयोजनोपपत्त्यभावादुपदेशग्रहणमनर्थकमत।
आह॰ उपदेशेऽजिनीति॰ स्पष्टार्थमिति॰ ननूत्तरसूत्रेणाग्निचिदित्यादौतुकआगत्येत्यादौचरितार्थस्येत्संज्ञाप्रवृत्त्यर्थमुपदेशग्रहणमस्त्वि
तिचेन्न॰ वक्ष्यमाणरीत्योत्तरसूत्रेप्यस्यानावश्यकत्वात्। नचावयवत्वसाधनावसरेयदवयवत्वमभिप्रेतंतदन्यस्मिन्ननुपलम्भस्यहेतुत्वं
सूचितंतच्चायुक्तम्। कर्मशब्दावयवककारस्यकरणशब्देउपलम्भादितिवाच्यम्। ककारस्यव्यक्तिभेदेनयस्यककारस्यकर्मशब्दावय
वत्वन्तस्यकरणशब्देऽसत्वात्। अनुबन्धविनिर्मुक्तस्यपदार्थस्योपस्थिति॰ सिद्धान्तेविधिवाक्यस्ययादृशबोधजनकत्वन्तदाह। सर्वे

त्रेति॰ यत्त्वनवयवत्वपक्षे माङेव्यनीहार इति निर्देशो ज्ञापकः। लाघवं चात्र पक्षे। अत एतत्पक्षे नानुबन्धकृतमनेजन्तत्वम्। नानुबन्ध
कृतमसारूप्यम् नानुबन्धकृतमनेकाल्त्वमिति परिभाषाणामनारम्भादिति तत्त्व॰ दध्नश्चश्च कारवैयर्थ्यापत्त्या एकान्तत्वपक्षस्यैव पा
णिनिसम्मतत्वात्। उभयमिदमनुबन्धेषूक्तमेकान्ता अनेकान्ता इति किं पुनरत्र न्याय्यमेकान्ता इत्येव न्याय्यमिति भाष्योक्तेश्च। माङ इति
निर्देशेन श्रूयमाणोप्यनुबन्ध एजन्तत्वविघातक इति कल्पनात्। अनेकाल्शिदिति सूत्रे शिद्ग्रहणेनानुबन्धानामल्व्यवहारविषयत्वा
भावकल्पनेन न सर्वेष्टसिद्धेः। अत एवानुबन्धकार्ये नल्विधाविति निषेधो न प्रवर्तत इति प्रवादस्याप्युपपत्तिः। षिन्किदित्यादिबहुव्रीहे
रप्युपपत्तिः। स्पष्टञ्चेदमिति॰ तत्र हि निष्ठासंज्ञायां समानशब्दप्रतिषेधः। लूनो गर्त इति निष्ठासंज्ञायां समानशब्दानाम् प्रतिषेधः। निष्ठा
संज्ञा कस्मान्न भवति अनुबन्धोन्यत्वकर इति चेन्न लोपात्। इति शंकायां यद्यपि लुप्यते जानाति त्वसौ सानुबन्धकस्येयं संज्ञा कृतेत्युक्तम्। ए
तेनानुबन्धलोपेपि विधिसूत्रे तत्तदनुबन्धोपादानात्तदुपलक्षिते कार्यं भवतीति स्पष्टमेवोक्तम्। वाचाल इति॰ अत्र लस्येत्त्वे ल्लित्स्वरा
पत्तिरन्तरङ्गत्वात्। चित्त्वङ्किमर्थमिति चेत्पर्यायार्थं स्यात्। अथवा वाचाल इत्येतत्साधकसूत्रसाध्यवाचाट इत्यस्योपलक्षणम्। अ
त्र हि टस्येत्त्वे ङीबापत्तिः। अत एवेति॰ दिशेरुच्चारणार्थत्वादेव॰ हलन्त्यमिति सूत्रे भावघञन्तोपदेशपदानुवृत्तिं सूचयन् सिद्धान्तमा
ह। परेत्वित्यादिना॰ उपदेशे किमिति॰ पूर्वसूत्र एव किमर्थमिति प्रश्नः। अत एव सूत्रद्वयविषये उपदेशपदस्य प्रत्यक्षाख्यानपरत्वेदू
षणाभिधानसंगतिः। प्रत्यक्षमाख्यानमिति॰ अत्राख्यानं शब्दोच्चारणम्। तत्र प्रत्यक्षत्वाव्यभिचार इतीन्द्रियजन्यतावच्छेदक
विषयताश्रयविषयकत्वम्। विषयता च व्यापारानुबन्धिनी। तथा चेदृशार्थस्य यदाख्यानं स उपदेशः। लुटः स इत्यादि। अत्र सदा।

दिशब्दजन्योपस्थितिविषयेतादृशविषयत्वाभावःस्पष्टएव॰ सदादिसञ्ज्ञाऽनुबन्धविनिर्मुक्तस्येतियदिग्रूपात्तदाप्याह।तथाराजसूये
त्यादि।अतएव॰एकसम्बन्धिनोऽन्यसम्बन्धित्वाभावादेव।नचराजसूयेत्यादिनिपातनेनैवानुबन्धलोपोभविष्यतीतिवाच्यम्।निपा
तनेनापूर्वसञ्ज्ञाकल्पनापेक्षयाहलन्त्यमित्यत्रोपदेशपदासंबन्धकल्पनेलाघवमितिभावः।लोकव्यवहारेणेति अनुवाकप्रश्नेइषे
त्वकाद्यनुवाकाख्यानेउद्दिष्टोमेऽनुवाकइति।मार्गेप्रश्नेऽमुष्मिन्नवकाशेहस्तदक्षिणोग्राह्यइत्याद्याख्यानेउपदिष्टोमेपन्थाइतिव्यवहारादि
तियावत् एतेनसर्वेषुपूर्वेष्वित्वसिद्धिरनिष्टेतदभावइतिविषयविभागालाभःसूचितः।वार्त्तिकेउपदेशनइत्यनन्तरमुच्चारितइत्या
ध्याहारोबोध्यः प्रयोगशासनकरणेति॰अत्रकरणशब्दोपादानेनपरिनिष्ठितभिन्नस्यग्रहणमितिसूचितम्।लटःसदित्यादिषुसञ्ज्ञा
सञ्ज्ञिभावबोधकेऽनुबन्धउच्चारितएव राजसूयेत्यादिष्वनुबन्धरहितानुमानामितिभावः।हलन्त्यसूत्रेव्यवसितपदार्थत्वेनेति॰एते
नतत्सूत्रेउपदेशपदासम्बन्धःसूचितःतत्सम्बन्धेदोषमप्याह॰किञ्चेति॰ अतएवेति॰हलन्त्यसूत्रेउपदेशप्रयोजनाभावादेव।अत्रसूत्रे॰उ
पदेशोऽजितिसूत्रे॰ व्यवसितान्त्यमिति।धात्वादिनापरिच्छिन्नान्त्यमित्यर्थः।अन्त्यग्रहणसामर्थ्येनेतियत्वादिव्यावृत्त्यर्थमन्त्यग्रहणं
चरितार्थमितिचिन्त्यमेतदितितदेवचिन्त्यम्।षःप्रत्ययस्य।चुटूइतिसूत्रारम्भेणादेर्हलोयदीत्वंभवतितदोक्तस्थलेष्वेवेतिकल्पनात्।न
तुनधातुलोपसूत्रभाष्येधातुग्रहणंकिम् लूञ्लविता पञ्पविताइत्यनेनानुबन्धलोपोत्तरमेवधातुसञ्ज्ञेत्यस्यलाभाद्धात्वादिनाप
रिच्छिन्नान्त्यस्येत्वमित्यनुपपन्नमतआह॰ तत्रानुबन्धेति॰ पूर्वोक्तार्थेवार्तिकान्तरसम्मतिमाह एवञ्चेतिउदश्विदादीति॰ आदिनाशकृ
दित्यस्यसङ्ग्रहः।एतावत्युत्पन्नाविति कैयटः कुम्भकारइत्यादाविति॰ननुपूर्वमित्सञ्ज्ञाततःप्रातिपदिकसञ्ज्ञेतिक्रमात्कथमत्रप्रतिषे

धप्राप्तिरत आह· अपवादेति· यदि चोदकेन श्वयति वर्द्धत इति व्युत्पत्तिसिद्ध उदश्विच्छब्द इत्युच्यते तदापि द्वितीयस्याव्युत्पन्नत्वमेव। न
चास्यापि शंकेर्रिति क्तिन्नित्युणादिसूत्रनिष्पन्नत्वमिति वाच्यम्। तथाप्युपदेशेऽन्त्यत्वं तकारस्येत्यभिप्रायात्। प्रत्याख्यातमिति·
नचोणादिप्रत्ययान्तानामव्युत्पत्तिपक्षे राजन्नित्यादौ नकारस्येत्वव्यावृत्त्यर्थमस्य वार्त्तिकस्यावश्यकत्वम्। न च फलाभावः। नि
त्वस्यैव फलत्वादिति वाच्यम्। भीह्रीति सूत्रात् श्लावितीत्यत्रेव प्रत्ययादित्यस्यानुवृत्त्या सप्तम्या विपरिणामेन चेन चेष्टसिद्धेः। अग्रह
णेति· गणोदाव पठितानामित्यर्थः· उपदेशपदाननुवृत्तौ भाष्यविरोधमाशङ्कते। नन्विति· क्वचित्पूर्वत्रेति· इतोऽत्सर्वनामस्थाने
गोतोणिदित्यादौ। क्वचिदुत्तरत्र ङमो ह्रस्वादचि ङमुण्नित्यम् मयउञोवोवेत्यादौ। उभयोः प्रकल्पकत्वेति· पर्यायेणेत्यादिः। एक
पूर्वपरयोरित्यस्य युगपत्प्रकल्पकत्वाभावज्ञापकत्वाश्रयणम्। लक्ष्यासिद्धिरिति· ठक्छसावित्यादिविहितेत्यर्थः। खरीत्याव्यवसि
तान्त्यग्रहणे सूत्रस्य तत्राग्रहणात्कथं तदन्त्यस्येत्सञ्ज्ञेत्यत आह अइउणित्यादीनामिति· लोपश्चेति· तत्र लोप इति भिन्नं पदं श इ
ति च भिन्नम्। पूर्वस्य विभक्तिसकारस्य श्चुत्वेन शकारे द्विशकारको निर्देशः· व्यपदेशिवद्भावेन शकारस्य प्रातिपदिकान्तत्वादि
त्सञ्ज्ञा। अनेकान्तत्वपक्षे समीपेऽवयवारोपेण बहुव्रीहिस्वीकाराल्लोपस्य शित्वम्। मुख्यपक्षे त्वाह अनुबन्धानामिति· नन्वेका
च उपदेश इति सूत्रस्थस्येत्सञ्ज्ञाविधावुच्चारणवचन उपदिश्र्गृह्यत इति कैयटस्य कागतिरित्यत आह एकाच उपदेश इति· नि
पदिकान्तत्वादित्सञ्ज्ञा अनेकान्तत्वपक्षे स अन्योपि उपदेशेऽत्वत इति सूत्रस्थः। वस्तुत अयमेव ग्राह्यः। एकाच उपदेश इति सूत्रस्थ
स्य कर्मणि व्युत्पन्नत्वात् तत्वेति· अनुनासिकत्वादित्यर्थः· व्यवहारश्चेति· इदितो नुमित्यादिव्यवहारश्चेत्यर्थः। यणापत्तिरिति· न

चकारस्यात्वेऽनुनासिकशब्दावयवैककारे यणादेशं वाधित्वा यस्येति लोप एव वक्तुमुचित इति बोध्यम् । यण पदस्यात्रिमित्त
कार्यसामान्योपलक्षणत्वात् यणमात्रोपादाने तु ऋषि मृषि कृषेरित्यत्रादिपदग्राह्ये यणएव प्राप्तिरित्यभिप्रायेण । मूलभूतेति ।
निर्देश मूलभूतेत्यर्थः ननु वर्णसमाम्नायेऽकारस्य प्राथम्यादाकालइत्युचितमत आह । कुक्कुटेति । व्याख्यानादिति । विभाषापृष्टे
तिह्वेः प्लुतविधानान्नमात्रिकस्यान्ते अनोदीर्घोपन्नीति दीर्घविधानान्नमध्ये प्रवेशः । द्वित्रिमात्रयोर्नद्विमात्रस्यान्ते प्रयोगः । ओ
मभ्यादान इति लिङ्गादित्यादिः । सदृशो लक्ष्यत इति । न चैवमुकारोच्चारणकारोच्चारणकालस्य स्वसदृशत्वाभावादुकारे एतत्सूत्र
विधेयसञ्ज्ञा न स्यादिति वाच्यम् । ननिवयुक्तमिति वाक्येऽन्यशब्दोपादानसामर्थ्येन सादृश्यस्य भेदाघटितत्वात् । वक्ष्यमाणा तुल्यास्ये
ति सूत्रव्याख्या कालिकीरीति र्बोध्या । ननूकालइतिवाक्येऽकारस्योद्देश्यत्वादणुदितिसूत्रप्रवृत्तौ प्रथमसदृशस्य संज्ञात्रयप्रस
ङ्ग इत्याशंकते । नन्विति । अधुना यथासंख्यमनुस्पतासोलुटोरितिवच्छब्दतः साम्यात् न च स्वविषये दीर्घप्लुतसञ्ज्ञाभ्यां वाधः आ
काडारीयसंज्ञातिरिक्तत्वात् न चैवमभ्यासस्यह्रस्वविधाने दीर्घप्लुतयोरप्यापत्तिरिति वाच्यम् आपोऽन्यतरस्यामिति सूत्रेण वि
कल्पेन ह्रस्वविधानात् प्लुतापत्तिस्तु न । प्लुतश्च विषये स्मृत इति न्यायात् वर्णग्रहणे जातिग्रहणादिति निपात एकाजनाङिति सूत्र
स्थैकग्रहणेन ज्ञापितत्वात् । अन्तरङ्गत्वेन उकारमात्रस्य कार्पित्वात् अव्यवस्थितत्वादिति । नीचैरपि रोगार्त्तस्योच्चैः । उच्चैरपिक
र्णापाटवयुक्तस्य नीचैः । एवं हि सवदत्तिकिमुन्नर्दन्नकमाधीशो इति । प्राचामनुरोधेनेति । यस्य शास्त्रभाष्ये अनुसरन्ति काकुदमि
त्युक्तत्वात्तदनुरोधेनेत्यर्थः । लोकप्रसिद्धत्वेन । यथा चैव भाष्ये । ननु न केवलमत्रव्यवहार एव प्रयोजकः किन्तु राजदषदित्यादौ ।

समासान्तोदात्तत्वमन्यहलोऽज्ग्रहणाननुवृत्तौ प्राप्नोतीत्यत आह। ह्रस्वरेति· यतोऽनावइति सूत्रे नौ प्रतिषेधाल्लिङ्गात्। अन्य
थायः स्वरयोग्योनासावादिरितिनद्यर्थं स्यात्। नकारस्यस्वरस्तुवक्तुमशक्योनिमित्तस्यद्व्यच्कत्वस्यविनाशायत्तेः। मेलनविरो।
धादिति· नचोदात्तानुदात्ततादात्म्यसंभवत्येवेतिवाच्यम्। धर्मिद्वयतादात्म्यस्यक्वाप्यदृष्टत्वात्। धर्मद्वयसमावेशस्तुसम्भवत्ये
व· यथानानाजातीयरसवद्द्रव्यवारब्धेऽवयविनिस्वाश्रयसमवेतत्वसम्बन्धेनावयवगतस्यरसस्यैवभानन्नतुचित्ररसाङ्गी
कारस्तथाऽत्रापि। अतएवतस्यादितउदात्तमर्द्धह्रस्वमितिसूत्रंस्वरसतःसङ्गच्छते। तेनानुवर्तमानयोरुदात्तानुदात्तशब्दयो
र्भावप्रधाननिर्देशपरत्वमावश्यकमितिभावः। नचानुवर्त्तमानयोरुदात्तानुदात्तपदयोर्लक्षणयाधर्मपरत्वेतयोर्द्वन्द्वेततो
भावप्रत्ययेउदात्तत्वानुदात्तत्वशब्दाद्वर्णधर्मवन्निधर्मबोधापत्तिरितिवाच्यम् इतरेतरयोगद्वन्द्वेपिसमूहस्यैवप्राधान्यस्य
स्वीकारात्तंप्रतिसमूहिनोविशेषणतयाद्वन्द्वोत्तरत्वप्रत्ययेनधर्मस्यैवप्रतिपादनसम्भवात्। तस्यादितइतिसूत्रस्यार्द्धह्रस्व
शब्दस्यह्रस्वस्यार्द्धमित्यर्थकत्वेदीर्घप्लुतस्वरितयोरसङ्ग्रहइत्यतआह ह्रस्वपदघटितेति· स्वशास्त्रसङ्केतितरूपेण· अवयव
व्युत्पत्त्या पूर्वोपदर्शितरीत्यालब्धेनधर्मेण अर्द्धमात्रारूपेति· तदुक्तम्भाष्ये अर्द्धह्रस्वशब्दोऽर्द्धमात्रायांरूढइति· हरिरप्या
ह· प्रमाणमेवह्रस्वादावनुपात्तप्रतीयतेइति इतआरभ्येति· इमंमेगङ्गेयमुनेइतिमन्त्रेमेशब्दमाश्रित्यसर्वेषांनिघातइम।
मित्युदात्तात्परस्यानुदात्तमेशब्दावयवैकारस्यस्वरितत्वेस्वरितात्संहितायामितिगङ्गेप्रभृतीनांप्रचयोयथास्यादितिदेवब्र
ह्मणोऽनुदात्तइत्यनेनज्ञापकेनैतत्काण्डस्यअअइत्यतः प्राक्पाठस्यकल्पनमावश्यकमन्यथादेवाब्रह्माणइत्यत्रामन्त्रिता

भै· १०

द्युदात्तत्वेशेषनिघातेनानुदात्तस्योदात्तादनुदात्तस्यस्वरितइतिसूत्रेणस्वरितस्यदेवब्रह्मणोरनुदात्तइत्यनुदात्तत्वेकर्त्तव्येऽ
सिद्धत्वात्तदसङ्गतिःस्पष्टैव।गुणाभावइति·अहिशब्देघेर्ङितीतिसूत्रेणप्राप्तगुणाभावइत्यर्थः।अहिरिवभोगैरित्यत्राद्यु
दात्तत्वेनपठ्यमानतयाग्रामादित्वाद्वृषादित्वाद्वाआद्युदात्तत्वंभवतिततःशेषनिघातेनेकारस्यानुदात्तत्वेउदात्तादनुदात्त
स्यस्वरितत्वेनतस्ययणिस्वरितस्थानिकयणःपरत्वाद्विभक्त्यकारस्यस्वरितत्वम् नचोदात्तादनुदात्तस्येत्यस्यासिद्धत्वात्पूर्वमे
वयणितस्वरितस्थानिकत्वम् छान्दसत्वेनासिद्धत्वाभावस्यकल्पनात् यद्वातत्राद्युदात्तपाठेऽपिप्रवृत्तेघृतादित्वादन्तोदात्ते
तस्ययण् यद्वायोद्यइत्यत्रयच्छब्दःफिषइत्यन्तोदात्तस्ततस्सोरुत्वोत्वेउदात्तानुदात्तयोरेकादेशस्योदात्तत्वेपूर्वरूपेस्वरितोऽस्य
स्यवैकल्पिकत्वात्तदभावेएकादेशउदात्तेनेतिपुनरुदात्तत्वेअहिशब्देकारस्यस्वरितत्वेनतस्ययणिकृतेस्वरितयणःपरस्यसु
पःस्वरितत्वसिद्धिः।उदात्तयणइति·स्वरितेउदात्तभागसत्त्वाभिप्रायेणेदम्।यदिचोदात्तस्वरितयोरितिसूत्रेस्वरितशब्दस्यपृ
थगुपादानात्स्वतन्त्रोदात्तस्यैवादेशोयण् उदात्तयणपदेनगृह्यतइत्युच्यतेतदानेनसूत्रप्राप्तिरितिबोध्यम्।किंबहुनाऽ
त्रशास्त्रेयद्यदुदात्तसम्बन्धिकार्यंतत्स्वतन्त्रोदात्तसम्बन्ध्येव।अतएवात्रमूलेतस्यचोदात्तस्वरितपरत्वेश्रवणंस्पष्टमित्यत्रो
दात्तात्पृथक्स्वरितशब्दोपादानंसङ्गच्छते।यमानुस्वाराणामेवेति·अनुस्वारयमानाञ्चनासिकास्थानमिष्यतइतिशिक्षो
क्तेःस्वोक्तमष्टादशत्वंधर्म्यंव्युत्पादयति·ह्रस्वत्वादीनामित्यादिना अतएवेति·दीर्घाभावादेवेत्यर्थः।अतएवानुदात्ततरस्येति
लौकिकेप्रयोगेऽनुपलम्भादेवेत्यर्थः।एकश्रुतेःस्वरान्तत्वइति·किमियमेकश्रुतिरुदात्ताआहोस्विदनुदात्ताइतिविचारेनोदा

राम १०

त्तायदयमुच्चैस्तरांवावषट्कारइत्याह अनंतरनरनिर्देशः।नानुदात्तायदयमुदात्तस्वरितपरस्यसन्नतरइत्याह॰ अनन्तरनरनिर्दे
शः इतिभाष्येस्पष्टम्॰ व्याख्यानादिति॰ वायुसंयोगस्यग्रहणेह्रस्वदीर्घयोःसावर्ण्याभावापत्तौतुल्यास्येतिरूपस्यैवानुपपत्ति
रितिभावः भेदघटितेनेति॰ लोकेभिन्नेवस्तुनिसदृशव्यवहारस्यसुप्रसिद्धत्वात् इदंसादृश्यस्योपमानत्वाभिप्रेतप्रतियोगिभि
दविशिष्टसाधारणधर्मरूपत्वमतेन।वस्तुतःसादृश्यमतिरिक्तमखण्डोपाधिरतएवकेनधर्मेणसादृश्यमाल्हादकत्वे
नमुखेचन्द्रसादृश्यमितिव्यवहारःसंगच्छते।यजुष्येकेषामितीति॰ यत्किञ्चिदास्यभवग्रहणेइकारैकारयोस्तालव्य
त्वाविशेषात्सवर्णेदीर्घापत्तेरितिभावः सवर्णग्रहणेनज्ञापकेनेति॰ हलोयमांयमीत्यत्रेवयथासङ्ख्यनिरासायसवर्णग्र
हणम् तेनशिण्ढीत्यत्रडकारस्यढकारेपरेलोपसिद्धिः।प्रयत्नांशेपिचेद्यावत्तौल्यन्तदाडकारढकारयोर्यावत्प्रयत्नतौल्या
भावाद्रूपासिद्धिःस्फुटैव।अकाराद्युच्चारणेतुनेति॰ एतेनयदुच्चारणेयद्व्यापारआवश्यकस्तत्तस्यस्थानमितिसूचितम्॰ जि
ह्वामूलेतुकुःप्रोक्तइतिशिक्षाविरोधंपरिहरति॰ अत्रकरणेति॰ अतएव॰ रूढिस्वीकारादेव।यदिकवर्गोपिजिह्वामूलीयः
स्यात्तदातस्याक्षरसमाम्नायेप्रयोगसत्वाज्जिह्वामूलीयानानन्तेषुगणनंविरुध्येतेतिभावः।उरश्चपश्चेतियोगेनोपध्मानीप
दस्यपवर्गोपिग्रसङ्गइत्यतआह॰ रूढत्वाच्चेति॰ अतएव॰ नासिकायाःस्थानत्वादेव॰ परमतंखण्डयितुंतन्मतमनुवदति
यत्त्विति॰ नासिकाकरणमिति॰ शिक्षायांस्थानत्वोक्तिकरणत्वादेवेतितद्भावः।अस्यन्त्यनेनेतिभाष्यीयव्यवहारात्स्थान
मात्रेकरणत्वंप्राप्नोतिकण्ठादौस्थानत्वव्यवहारस्यप्रयोजकंतन्नासिकायामपिसमानमित्याशयेनखण्डयति॰ तन्नेति

वर्णानांनित्यत्वादाह वर्णाभीति॰ वर्णजनकेत्यपिनदर्थकमेव। तत्सम्बन्धजनकइति॰ एतेनव्यापारत्वसूचनात्करणत्वव्यव
हारेणानुपपन्नइतिभावः। वाह्यप्रयत्नेषुगुणव्यवहारस्तमुपपादयति॰ वर्णाभीति॰ भेदकत्वाद्गुणस्येतिभाष्यीयव्यवहाराद्यत्नद्र
वानुनासिक्यमपियथागुणस्तथोपपादयति॰ अकारादीति तथाचघटपदादौगुणः पश्चादुत्पद्यंतेतथैतस्यापि ननूदात्तत्वा।
दौगुणव्यवहारस्सभाष्यादिस्थस्यकागतिरतआह॰ उदात्तत्वादीनामिति॰ ङादीनामुभयस्थानमित्युपपादयति॰ ङादीनामिति॰
नन्वेवंकङादीनांसवर्णसञ्ज्ञायावत्स्थानसाम्याभावान्नप्राप्नोतीत्यतआह॰ कङयोः सावर्ण्यन्त्विति॰ इदमुपलक्षणञ्चञादी
नाम्। आस्येतुल्यदेशप्रयत्नमितिवार्तिककारीयन्यासेयद्यास्यशब्दः प्रयत्नविशेषणंतदासौत्रत्वाद्द्वन्द्वोबोध्यः। वदताम्म
तइति॰ इदमन्यत्रोपपादितम्। ऐचः सर्वस्येति॰ हसेहसने। टुओश्वीत्यादाविङ्वि॰ षयेऽनुनासिकपाठदर्शनादेचइतिनोक्तम्। यव
योरनुनासिकत्वंप्लुवोरनाकाविति सूत्रभाष्येऽनुनासिकयणोरितिभाष्यीयव्यवहारादस्यैवकस्यचिदुक्तिंखण्डयति॰ यन्नि
ति॰ दन्तोष्ठादिसमुदितमिति॰ अत्रसमुदितपदोपादानेनोभयपर्याप्तद्वित्वमधिकरणतावच्छेदकमितिसूचितम्। प्रत्येकम
नुत्पत्त्यापत्तेरिति॰ स्थानतावच्छेदकधर्मविशिष्टवाचकप्रातिपदिकाद्यतः शिक्षायांदर्शनेनोभयत्वस्यस्थानतावच्छेदक
त्वेकेवलदन्तादिप्रातिपदिकस्योभयत्वावच्छिन्नावाधकतयाप्रत्येकमनुत्पत्तिर्यतस्स्यादितिभावः। एतेन॰ समुदायाद्यतः
सम्भवाभावेन। दन्तोष्ठरूपमिति॰ व्यासज्यवृत्त्युभयत्वन्नस्थानतावच्छेदकम्॰ अपितुएकविशिष्टापरत्वरूपमविशिष्ट।
त्वंकेवलादप्यदितिवादिनोमतेनेदमभिहितमितिनपूर्वकल्पादभेदइतिभावः प्रयत्नशब्दस्याभ्यन्तरप्रयत्नबोधकत्वेमूलो

क्तं द्वैविध्यमुपपादयितुमाह· सूत्र इति· नाज्झलाविति सूत्रेणेति· एवञ्च सूत्रकारमताभिप्रायेण मूलमिति भावः। यथोत्तरमि
तिन्यायेनाह· भाष्यमत इति· स्पृष्टादीनामाभ्यन्तरत्वमुपपादयति· स्पृष्टादीनामिति· प्रयत्नमित्यप पाठ इत्येतत्खण्डनाभि
प्रायेण ज्ञानीयादित्यस्याध्याहार इति तु नयुक्तम् प्रयत्नो द्विधेत्युपक्रमे प्रथमायाएवदर्शनेन द्वितीयाया विरुद्धत्वादित्या
शयेनाह· नपुंसके भाव इति· मूलोक्तं यस्य यस्य पद्यत्स्थानं तत्र मानमाह· तथा चेति· पाणिनीयेति शेषः स्पर्शाभावरूपइ
ति· एतेन दूरावस्थानलाभः। यणस्त्वीषदिति· अत्रेषदित्यस्य विशेष्यानुपादानेपि मध्यमणिन्यायेन विवृतत्वं स्पृष्टत्वञ्चास्य
विशेष्यमित्याशयेनाह· यणस्त्वीषदित्यनेनेति· यत्तु स्वराणामूष्मणामित्यनेनाचांविवृतत्वस्योक्ततया ऽचो ऽस्पृष्टा इति वाक्ये
न पुनस्तद्बोधनं किमर्थमिति चिन्त्यमिति तन्न· ताभ्यामैचाविति पूर्ववाक्येन विवृततमत्वस्योक्ततया यणस्त्वीषदित्यत्र वि
शेष्याकांक्षायां तस्यैव परामर्शापत्तेः। दीर्घोकारस्य विवृततरत्वन्त्विति· अत एवाइउण्सूत्रे अकारस्य विवृतोपदेश आकार
ग्रहणार्थ इति वार्त्तिकं सम्यगुपपद्यते व्याख्यानादिति· यथोद्देशत्वे ऽस्य सूत्रस्यासिद्धत्वात् व्यापकजातिनिर्देशेपि न ऽतपर
निर्देशादेकशेषनिर्देशाद्वा सिद्धमिति भाष्यमूलकाद्व्याख्यानादिति। अतिदेशस्य फलम्मनोरथ्यादिसिद्धिरूपं मनोरमायामे
वस्फुटमिति· सूत्रस्याधिकारत्वे फलमाह· अधिकारत्व इत्यादिना· गोधुङ्क्ष्वानिति· अयम्भावः। सिद्धान्ते हस्य रूयभिन्नत्वेना
दौ निरवकाशत्वेन जश्त्वापवादत्वाद्धलन्तो जश्त्वानुनासिकयोरसिद्धत्वाद्घषभावे ऽनुनासिकस्यासिद्धत्वाज्जश्त्वे ततो ऽनुनासि
केतेषामसिद्धत्वाप्राप्त्या गोधुङ्क्ष्वानित्यस्य सिद्धिः। अधिकारत्वाभावे तु निरवकाशत्वेजश्त्वात्पूर्वं घस्ततो ऽन्तरङ्गत्वेनानुनासि

भै॰
१२

कात्परत्वेनतुभष्भावादादौजश्त्वम्।एवंसतिभष्न्तत्वविरहाद्भष्भावानापत्तिरितिननुप्रागुक्तरीत्याजश्त्वात्पूर्वंघत्वेपितदु
न्तरमनुनासिकत्वजश्त्वाभ्यांपूर्वंनिरवकाशत्वेनयेननाप्राप्तिन्यायेनबाधकयोर्ढत्वभष्भावयोरेवप्राप्तिः।यद्यपितसाविति
भत्वविषयेतडित्वानित्यादौवत्वस्यचारितार्थ्यम् तथापिप्रत्याहारनिर्देशसामर्थ्याद्ढत्वस्यजश्त्वबाधकत्वम् तयोश्चवर्णमा
त्रापेक्षत्वेनानन्तरङ्गत्वाद्ढत्वमेवोचितमितिचेन्नत्थैवाह॰वस्तुतइति॰उक्ताशयानभिज्ञःशंकते॰नचेति॰परोक्तमार्गेरीत्यापिसमा
धाने॰विप्रतिषेधइति॰यथोद्देशपक्षेदोषाभावेपिकार्यकालपक्षेदोषएवेतिचेन्नत्राह॰पूर्वत्रासिद्धेनास्तीति॰अधिकारत्वेस
तितत्रतत्रयथावाक्यार्थस्तन्दर्शयति॰ तत्रायमर्थइति॰तत्र अधिकारत्वेसति॰अतएवेति॰विधेयभेदेवाक्यभेदस्वीकारा
दित्यर्थः इत्यादिरित्यादिनानमुटादेशइतिवार्तिकसङ्ग्रहः।तन्निषेधः।शास्त्रासिद्धत्वनिषेधः।यदिपदैकवाक्यतास्यात्तदा
होढइतिसूत्रस्यपूर्वत्रकर्त्तव्येऽसिद्धत्वविशिष्टोढोभवतीतियथार्थस्तथाअदसोसेरितिसूत्रस्यापिपूर्वत्रकर्त्तव्येऽसिद्धविशिष्टोमू
भावोभवतीतिपर्य्यवसितार्थःस्यादेवञ्चनमुनेइतिसूत्रस्यापिनाभावेकर्त्तव्येऽसिद्धत्वविशिष्टोमूभावोनभवतीत्यर्थःस्यात्त
थाचामुनेतिरूपासिद्धिःस्यादितिभावः नचैवंवाक्यभेदेपिकार्य्यासिद्धत्वस्यैवलाभःस्यादिति शंक्यम् पूर्वत्रेतिशब्देनपूर्व
शास्त्रस्यपुरःस्फूर्त्तिकतयाप्रत्यासन्नपूर्वशास्त्रेकर्त्तव्येएतत्कार्यविधायकशास्त्रमसिद्धमित्यर्थस्यलाभादितिमनोरमादिसि
द्धिसम्भवात्॰सङ्ग्राहकमिति॰उपस्थितानांसूत्राणामेकेनशब्देनबोधकमित्यर्थः।इह॰व्याकरणे॰शास्त्रेति॰पूर्वत्रेतिशास्त्रे॰
त्यर्थः।यत्राप्यनन्तरङ्गत्वादिति॰अत्रानन्तरङ्गत्वंसपादसप्ताध्यायीशास्त्राप्राप्तिकालिकप्राप्तिकत्वमात्रम् नत्वनन्तरङ्गपरि

राम
१२

भाषायाः प्रवृत्तिः। त्रिपाद्यांसर्वथातदप्राप्तेर्ग्रन्थकारसम्मतत्वात् यथा ऊढमाख्यदितिग्रहेणिजन्तात्लुङि· च्लेश्चङि· ढत्वादिकंद्वि कर्त्तव्ये ऽसिद्धम्भवति। तथाचहतशब्दबुद्ध्यैवद्विर्वचनम्। नचैवमपिरञ्जतायोन्मीलितंचक्षुः परंनहिनपश्य। तीतिन्याये नास्यसार्वत्रिकत्वेपिहतशब्दबुद्ध्याजायमानंद्वित्वंवस्तुगत्याढकारविशिष्टस्यैवस्यादित्यौजढदित्यस्यासिद्धिरितिवाच्यम्· हित्वाविधायकशास्त्रदृष्ट्याययाढत्वादीनामसिद्धत्वंभवतितथाकुहोश्चुरित्येतद्दृष्ट्याप्यसिद्धत्वादुकारबुध्याचुत्वस्याप्रवृत्तिसम्भवात् यत्रत्विति· अमूअमीइत्यत्र· पूर्वत्रनेति· पूर्वत्रकर्त्तव्येजातंतत्कालप्राप्तिकत्त्वपरत्वंभवतीत्यर्थो भविष्यतीतिभावः। अत्रपूर्वशास्त्रप्राप्तावित्यर्थोवापूर्वशास्त्रविषयत्वसम्भावनायामीत्यर्थोवोभयथापिनसम्भवतीत्याह· पूर्वशास्त्रेत्यादिना· एतन्निषेधाप्रवृत्तौपूर्वत्रेतिनिषेधस्याप्रवृत्तावित्यर्थः ननुजातस्यापिसत्त्वात्तेननिषिध्यतइत्यत आह· भुक्तवन्तमितीति· एतदप्रवृत्तौ· पूर्वत्रनेत्यस्याप्रवृत्तौ। नचैवमुक्तौपौनरुक्त्यमितिवाच्यम्· पूर्वत्राप्राप्तिश्शास्त्रस्यस्वोद्देश्यतावच्छेदकाभावात्पुनस्तुभुक्तवन्तमितिन्यायहेतुका ऽप्राप्तिरुक्तेत्याशयात्। ननुनियमानुपयोगेतदकरणेलाघवमेवेत्यत आह· राजभ्यामित्यादावपीति· द्वितीयमर्थंदूषयति· पूर्वशास्त्रेति· दिगिति· अत्रासिद्धमि। त्यस्यानिष्पन्नमितिव्याख्यानेनजातस्यासिद्धत्वमेवलभ्यतइतिनशंक्यम् पूर्वशास्त्रप्राप्तिकाभावप्रतियोगीत्यर्थेनसर्वसामञ्जस्यादित्यादिकमनेनसूचितम्। ध्वनिविशेषरूपनादेति· एतद्विशेषपदोपादानेनोत्तरत्राभिहितेनपौनरुक्त्यम् आत्मेति· आत्माअन्तःकरणंबुद्ध्यास्वसमवेतबुद्ध्यात्मकवृत्तिविशेषणार्थोन्समेत्यएतस्यैवपरिणामविशेषोमनः

तत्कर्म्मेच्छयास्वीयवृत्तिविशेषणयुक्तंकरोति।उभयत्रात्मनः कर्त्तृत्वमितिसमानकर्तृकत्वोपपत्तिः।संस्काररूपेण
स्वगतानिति·संस्कारस्यापिमनः परिणामतयापरिणामपरिणामिनोरभेदाद्विषयाणांसंस्कारविषयत्वेस्वविषयकसं
स्कारपरिणामित्वसम्बन्धेनविषयाणामन्तःकरणगतत्वमितिभावः।युङ्क्ते इत्यनन्तर्भावितण्यर्थम्· अतएवयुक्तंकरोतीति
तिविवरणंसंगच्छते।आस्यान्तर्गतनत्कार्येति·स्पर्शादिरूपकार्येत्यर्थः।वृद्धिभूतदेशाइति·काकलकाधस्तद्देशाइत्यर्थः
ह्रस्वत्वादीनाञ्चात्रैवान्तर्भावइत्याशयेनाह· मात्राकालिकत्वादिति· सर्वेकार्यजनकइति· स्वोत्पादितवर्णनिष्ठह्रस्वत्वा
दिजनकइत्यर्थः।वर्णनाशकइति· नचयत्नस्यवर्णनाशकत्वेमानाभावइतिवाच्यम्· येनैवयत्नेनैकोवर्णउच्चार्यतेतेनै
वविच्छिन्नेतस्मिन्वर्णेतंयत्नमुपादायद्वितीयः प्रवर्ततइतिपरःसन्निकर्षइतिसूत्रभाष्यस्यैवमानत्वात् न्यूनत्वंमूलस्य
परिहरति·इदमिति·एवञ्चात्रप्रकरणेमूलोक्तंननियमपरमितिभावः पूर्वसदृशाइतिमूलेपूर्वेणैवसदृशाइत्यर्थः। किञ्च
पूर्वसदृशएवननुपूर्वइत्यर्थः तत्रोभयत्रप्रमाणमाह· अतएवेति· एवञ्चवर्णान्तरत्वंस्पष्टमेवेतिभावः।इतिभाष्यादि
ति·तत्रह्येवमुक्तमलुकिकिमुदाहरणम् आर्द्रेचर्मन् लोहितेचर्मन् नैतदस्ति।पूर्वसवर्णेनाप्येतत्सिद्धम् नसिध्यतिय
द्यत्रपूर्वसवर्णस्यान्तदान्तर्य्यतोदकारःस्यादिति· जिह्वामूलीयपयमादीनामिति· आदिनाऽनुस्वारविसर्गपरिग्रहः।आन्त
रतम्यपरीक्षादाविति·आदिनासावर्ण्यकार्यपरिग्रहः। शाङ्खयोरपीति·तत्वेहिप्राङ्क्षि·म्छिन्धीत्यत्रानुस्वारपक्षेरूरोरू
रीतिलोपापत्तिः।अनन्त्याशब्दआदन्तः।हकारंपञ्चमैर्युक्तमन्तस्थाभिश्चसंयुतमितिशिक्षावचनमत्रप्रमाणम्।ए

वच्चायंविजनः।यद्वावाहुलकादातश्चोपसर्गेइतिकर्त्तर्यपिङिःकृतेनततशाप्ययंसाधुः।अतएवसामान्येनोक्तमादन्तइतिन
त्वावन्तइतिऊष्मावायुरिति·एवञ्चोष्माणइत्यत्रविनापीत्यनेनोत्तरपदलोपोवोध्यः।एवंहिप्रातिशाख्येनाविरोधस्सूच
नमाह।एवंसोष्माणइति·भाष्यादूष्मत्वमिति·तत्रह्येवमुक्तम्·।वर्गेवर्गेचप्रथमावघोषौयुग्मौसोष्माणाविति·।कूष्मा
दीनामिति·यावदाभ्यन्तरप्रयत्नतौल्याभावादितिभावः।तद्धर्मत्वादिति·तात्स्थ्यात्ताद्धर्म्यमितिभावः।ननुऋऌवर्णयोः
परस्परसावर्ण्येईकारादीनामिकारादिनेवऋकारेणऌकारग्रहणसिद्धौऌकारोपदेशोव्यर्थइत्यतआह एतदर्थमेवे।
तिऋकारऌकारयोःसवर्णसञ्ज्ञावाधनार्थमेवेत्यर्थः।अन्यथा·ऌकारोपदेशाभावे।ध्वनितञ्चेदमेओङितीति·वर्णस
माम्नायानुपदिष्टस्यासत्वम्भाष्येध्वनितमित्यर्थः द्विव्यञ्जनाश्रयइति·संयोगसञ्ज्ञारूपः।वर्णैकदेशानांवर्णग्रहणेन
ग्रहणाभावइतिभावः।अत्रयद्यप्येवमाकारादिष्वप्यसत्वशङ्काभवतितथापिपथिमथीत्यादिविधानादिनासत्यथाऽपत्ती
यतेतथाऌकारविषयेपिगम्लृधातौऌकारोपदेशेनऌदितइत्यनुवादाच्चसानिवर्त्तनीयेतिवोध्यम्·अतएवशङ्कापदे
पादानम्·न्यूनताभङ्गायाह·एकारस्येति·इतिमतइति·तालव्यावेकारस्तवर्गोविकारेकारौयकारःशकारःशेषओष्ठोप
पाद्यइतिवह्वृचप्रातिशाख्येयेषांमतइत्यर्थः।एकारादीनांशादिभिःसावर्ण्येकदेशेते।एधावहेशङ्कागोयानं।भानौया
तीत्यादावेचोयवायावइत्यस्यापत्तिः।ननुहकारादिवर्णयोःपरस्परंसवर्णसंज्ञायांहशिचेत्येवसिद्धेऽतोरोरितिव्यर्थमि
त्यनेनैवज्ञापकेनाकृलोःसावर्ण्याभावेसिद्धेनाकृलावितिव्यर्थमतआह·हशिचेति·अतएवआकारप्रश्लेषादेव।समा

भै· १४

सान्तरशंकां वारयति· अज्झलिति समाहारद्वन्द्वं कुर्वेति· अज्भिराकारस्येति·। अत्रेष्टापत्तिं वारयति· अत एवेति· अज्झ
लोरेव सावर्ण्याभावसाधनादेव। यद्यकाराकारयोरपि सावर्ण्याभावः सूत्रकाराभिप्रेतः स्यात् तदाऽज्झलोः प्रयत्नभेदेनै
वैतयोरपि सावर्ण्याभावः प्रकारान्तरेण साधितः स्यादिति भावः। अच्त्वं स्यादिति· नन्वच्छब्दस्य सञ्ज्ञाशब्दत्वेनात्र श
ब्दरूपस्यैव प्रवृत्तिनिमित्तत्वेन भावप्रत्ययान्तेऽनन्वयापत्तिरत आह· अच्पदबोध्यत्वमिति· एवञ्चाच्त्वमच्पदं हकारा
दिसम्बन्धी स्यादित्यभिप्रेतमिति भावः। ननूच्चारितः शब्दः प्रत्यायको न त्वनुच्चारित इतीकारस्याच्पदबोध्यत्वेऽपि तस्यानु
च्चारितत्वात्प्रत्यायकतानोपपद्यत इति हकारादीनामित्यादिपदानुपपत्तिरत आह· इदं प्रत्याहारघटकेत्यादि· मते· अ
ज्झलोः प्रतिषेधे आकारप्रतिषेधो ज्झल्त्वादिति वदतो वार्त्तिककारस्य मते। जातिपक्षे ग्रहणकशास्त्रस्यैवाभावादाह·
व्यक्तिपक्षे चेति· अणुदित्सवर्ण· कुक्कुटुगादौ तु नैतत्सूत्रप्रवृत्तिरुकारस्योच्चारणमात्रफलकत्वात् अस्य सूत्रस्य मूलोक्त
सञ्ज्ञासञ्ज्ञिभावबोधकत्वसमानाधिकरणपदोपादानाभावादयुक्तमत आह· अणमुद्दिश्य सवर्णबोधकत्वेति· स्वसि
द्धान्तमाह· परेत्विति· प्रत्ययस्यापि भाव्यमानतया भाव्यमानसमानस्य प्राचीनसम्मतपरिभाषाविषयत्वसिद्धौ प्रत्ययस्या
पि तत्त्वं सिद्धमेव स्थालीपुलाकन्यायेनेति भावः। तदर्थत्वम्· यौगिकार्थपरत्वम्· वार्तिककृतेति· तदुक्तं भाष्ये। अप्रत्य
य इति किमर्थम् सनाशंसभिक्षउः। असाम्प्रतिके। अत्यल्पमिदमुच्यते अप्रत्ययादेशटित्किन्मित इति वक्तव्यमिति· य
त्त्वत्राप्रत्ययग्रहणमित्यस्य व्यर्थं स्यादिति शेषः। प्रत्ययसञ्ज्ञाया अन्वर्थत्वात्सनाशंसेस्तु कारबोध्यदीर्घस्याप्रत्ययत्वेन

राम १४

विधातुमशक्यत्वादितितन्न॰ उपक्रमस्य भाष्ये प्रत्ययपदस्य यौगिकार्थपरत्वन्नाभिप्रेतमन्यथा वार्त्तिकोक्त्यानस्यैवासम्भवाप
त्तेः। एवञ्चौकाराकारप्रत्यययोर्ग्राहकत्वव्यावृत्त्यर्थम प्रत्ययग्रहणं चारितार्थ्येन शेषपूरणासङ्गतेः किञ्चात्र सूत्रे ऽप्रत्य
यग्रहणाभावे ऽणूसामान्यस्य सवर्णबोधकत्वमुद्देश्यतावच्छेदकावच्छेदेन विधेयान्वयबोधकत्वं स्युसन्निसिद्धमित्युका
राकारयोरपि दीर्घग्राहकत्वं स्यादेव अन्वर्थसञ्ज्ञयातु न व्यावृत्तिः। अत्यन्तस्वार्थिकानां यथाकनादीनां तत्र प्रत्ययपदोप
स्थितिसामर्थ्याद्भावेपि प्रत्ययसञ्ज्ञानथा ऽणत्वरूपोद्देश्यतावच्छेदकाक्रान्तयोरुकाराकारयोर्ग्राहकसूत्रोपस्थितिसा
मर्थ्यादन्वर्थाभावे ऽपि दीर्घयोः प्रत्ययसञ्ज्ञा स्यादेवेस्याशयात् उद्देश्यतावच्छेदकसंकोचे तु न मानमिति भावः। ज्ञापक
मिति॰ ननु सूत्राक्षरमर्यादया भाष्यकृता ऽयमर्थः साधितः। प्रत्ययशब्दस्य प्रत्ययसञ्ज्ञकपरत्वे भाष्यान्तरमपि साधक
माह॰ ज्यादादीयस इतीति॰ भाव्यमानेनेतिपरिभाषायाइहाश्रयणे फलान्तरमप्याह॰ जातिपक्ष इति॰ भाव्यमानेनेतिप
रिभाषाया अस्वीकारे प्रत्ययपदस्य यौगिकार्थत्वे यत्राणुदित्सूत्रेण ग्रहणप्रसङ्गस्तत्रैव निषेधप्रसङ्गः स्यात्तन्तु जातिपक्षे
एवञ्च व्यापकत्वात्परिभाषास्वीकार एवावश्यक इति भावः। व्यक्तिपक्ष इति॰ अस्मिन्पक्षे ऽणसत्वेपि यौगिकार्थाश्रयणे
सूत्रप्राप्तस्यैव सवर्णग्रहणस्याऽप्रत्यय इत्यनेन वारणं कर्तुं शक्यन्तु गुणाभेदकत्वात्प्राप्तस्येति भावः। वकार इति वका
रस्यानुनासिकत्वान्मादुपधाया इत्यनेनानन्तरं स्यादनुनासिकः स्यादिति भावः। कौस्तुभोक्तिं खण्डयति॰ एतेनेति॰ भाव्य
मानेनेति परिभाषाया ज्ञापकत्वस्य खण्डनेनेत्यर्थः। विधेयविषये गुणाभेदकत्वप्रयुक्तदोषस्यानया परिभाषयैव व्यावर्त्ते

नेनोद्देश्यविषयेभेदकत्वस्यप्रयोजनाभावेनाण्ग्रहणस्यस्वविषयेचारितार्थ्याभावेनज्ञापनासम्भवादितिभावः।
अनुवादेकथमिति·विधेयेतूपदेशसत्वादुपदेशेऽइत्संज्ञयासिद्धमितिभावः।अस्यापि·चोरित्याद्यनुवादविषयस्या
पि।नचोच्चारणार्थोनाभित्संज्ञांविनानिवृत्त्यभावेनकुकुडुगादौसवर्णग्राहकत्वंदुर्वारमितिवाच्यम्।उदित्यदे
वधारणगर्भवहुव्रीह्याश्रयणेनादोषात्· व्याख्यानादिति· उरृदितिसूत्रेनपरकरणमूलकादितिभावः।एतत्स्वरूप
मन्यत्रोक्तम्।लृकारग्रहणेनेति·इदंतपरसूत्रस्यविधायकत्वमते।यत्तुसूत्रकारमतेऋकारलृकारयोस्सावर्ण्याभावे।
नवार्त्तिककारमतेऽण्ग्रहणस्यैवाभावेनतत्रज्ञापकानुपयोगाच्चिन्त्यमेतदितितन्न·लृकारग्रहणेनेत्यस्यसवर्णसंज्ञा
ज्ञापनद्वारेत्यादिपूरणेनऋकारलृकारयोःसवर्णविधिरितिवार्त्तिकोक्तार्थस्यापिक्रोडीकारसम्भवात्।एवञ्चनद्वार्त्तिक
न्यापूर्वमितिभावः इणपिपरेणैवेति· अस्यसर्वत्रेतिशेषः।व्याख्यानादिति· अत्रज्ञापकातिरिक्तंव्याख्यानमुपदेशपरम्प
राह्रूपम्बोध्यम् व्यक्तिपक्षाभिप्रायेणाशङ्कते·।नन्विति·एतद्व्यतिरिक्तेति·लृकारव्यतिरिक्तेऋकारे।अत्रपक्षे·जातिपक्षे·
योगविभागेनेति· अत्रपक्षेसूत्रेऽण्ग्रहणाभावेनोदिद्धटित्तवाक्येऽप्रत्ययइत्यस्यप्रयोजनाभावेनयोगविभागइतिभावः
तन्नाप्नोति·जातिपक्षप्राप्तिरित्यर्थः।पूर्वोक्तमपिदार्ढ्यायपुनराह·गुणाभेदकत्वेनेति· नन्वैऔजितिसूत्राभावेएचोऽयवाया
वइत्यादौयथासंख्यानुपपत्तिरतआह·एचइति· ननुयत्रैचप्रत्याहारनिर्देशस्तत्रानुपपत्तिरतआह·नय्वाभ्यामित्या
दि॰ मूलेनाज्झलाविति निषेधोयद्यपीत्यादिनोक्तमयुक्तम् हकाराकारयोस्सावर्ण्येऽप्यत्वजातेस्तत्राभावेनदोषाभावाद्

तआहः इदंव्यक्तिपक्षइति। एतेनसवर्णेणेति। पूर्वोक्तसमूहयुक्ताणुदित्सूत्रेणेत्यर्थः।समूहघटकेषुपूर्वंपूर्वेषुतत्तदुपकारक
त्वंस्पष्टमेवेतिभावः।बाधकसम्भावनयेति। अयम्भावः विधिनिषेधयोः पर्युदासन्यायेनैकवाक्यताऽनुभवसिद्धासाचनि
षेधवाक्यार्थग्रहात्पूर्वंनसम्भवति विधिवाक्यार्थमात्रस्यज्ञानंयद्यपिभवति तथाप्येतस्यबाधकंसूत्रमस्तीतिज्ञानेन एत
ज्ज्ञानंप्रमानवेतिसन्देहोजन्यते तथाचाप्रामाण्यज्ञानानास्कन्दितसवर्णपदशक्तिग्रहाभावेनसवर्णपदार्थानुपस्थितौणुदि
त्सूत्रजन्यवाक्यार्थबोधासम्भवइति। ननुविश्वपाभिरित्यत्रढत्वसंयोगान्तलोपयोः प्राप्तौढत्वस्यासिद्धत्वात्संयोगान्तलो
पएवस्यादितिढत्वंमित्यनुपपन्नमतआह। हकारेणेत्यादि। नन्वइउणसूत्रभाष्येयणस्सानुनासिकानिरनुनासिकाश्चे
त्युक्तमितितद्वदत्रापियणोद्विधाइतिकुतोनोक्तमतआह। अमइति। नह्याविति। अत्रचहयवरट्सूत्रस्थरेफस्यानुनासि
कपरसवर्णद्विर्वचनप्रतिषेधोवक्तव्यइतिप्रघट्टकस्थभाष्यम्मानम्। अनुनासिकयवलानामिति। वापदान्तस्येतिसूत्रे
णसवर्णपदेनैवविधानेनविशेष्याणांबोधकशब्देनेतिभाष्यमानेनेतिनिषेधोनशङ्क्यः।हलोयमांयमीतिलोपइति। अस्य
वैकल्पिकत्वेइदमेवाणग्रहणम्मानमितिभावः।अभिमानेनेति। अस्यभाष्यसिद्धान्तासम्मतत्वादितिभावः।बहुव्रीहिपञ्च
मीतत्पुरुषाविति। इदम्पञ्चमीभयेनेतिसूत्रेपञ्चमीतियोगविभागेनतत्पुरुषसञ्ज्ञाविधायकमितिमतेन। वस्तुतस्तत
त्पुरुषपदमाचारक्विबन्तम्। तेनसुप्सुपेतिसमाससङ्ग्रहइतिवर्णग्रहणेत्विति। यथासहिवहोरोदवर्णस्येत्यादौतेनउ
दवोढामित्यादौवकाराकारस्यवृद्ध्युत्तरमप्योत्वसिद्धिः।सञ्ज्ञेति। राजितियथा। तपरकरणादिति। नचायमाकारार्थोगु

णाभेदकत्वेनैव सङ्ग्रहसम्भवात्। तपरकरणस्यासन्देहार्थतया पूर्वोर्थत्वं सम्भवत्येवेत्यत आह। भाष्यप्रामाण्यादिति· एओङ् ऐऔजिति सूत्रस्थभाष्यप्रामाण्यादित्यर्थः। तत्र हि खट्वेन्द्रः खट्वैलकेत्यादौ त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रादेशाः प्राप्नुवन्तीत्याशंक्य तपरे गुणवृद्धी इत्यादिना समाहितम्। इदं चेति· तपरसूत्रं चेत्यर्थः। इदं वार्त्तिककारमतम्। विधित्वपक्षे ऽनो भिस ऐसित्यादावष्टादशानां ग्रहणं वारयति। गुणाभेदकतयेत्यादि· परत्वं विरोधे सत्येव बलवत्त्वप्रयोजकमतो विरोधमुपपादयति· संख्याकृतेति· न हि त्रिपुत्रो द्विपुत्रव्यपदेशं लभत इति भाष्यकारोक्तेः। अनवकाशत्वेति· अनणित्वृद्धिरादैजित्यादौ यदनेन साध्यं तद्गुणाभेदकत्वेनैव साधितमिति तपरत्वमतो भिस ऐसित्याद्यर्थं तच्चानवकाशमिति भावः। ननु तद्गुणवद्बहुव्रीहिणा सञ्ज्ञात्वं तान्ते विश्राम्यति तत्समकालवर्णस्याप्रसिद्ध इत्यत आह· अत्रावध्यवधिमतोरिति· तथा च पञ्चम्यर्थे ऽनद्गुणसंविज्ञानबहुव्रीहिणा वर्णमात्रस्यैव सञ्ज्ञात्वं बोध्यते तत्समकालस्य प्रसिद्ध एवेति भावः। एवं सति विशिष्टादत इत्यादौ विभज्यनुत्पत्तिः कथमत आह· सौत्रत्वादिति· भाष्यकारमतमाह· जातिपक्ष इति· सवर्णग्रहणानुवृत्तेरिति· तपरः स्वर्णस्य चेद्ग्राहकस्तदा समकालस्यैव नान्यस्येति नियमः पर्यवसन्नः। एवंविधनियमः सवर्णग्रहणानुवृत्तिमन्तरा न सम्भवतीत्यत्र पक्षे सवर्णग्रहणानुवृत्तेरित्युक्तमिति भावः। व्यक्तिपक्षेप्याह· एवं गुणानामिति· ननु तान्तत्वादृदोरवितिसूत्रेणाप्यवस्तवइत्यादावेवस्यात्तुलवः पवइत्यादावित्यत आह· ऋदोरबिति· पञ्चमीसमासाभावइति· नेदं पञ्चमीसमासस्य कर्त्तव्यताभिप्रायेण किन्त्वादौ यदा बहुव्रीहिसमासो दर्शितस्तदा तकारो मुखसुखार्थ एवेति भावः। तपरसूत्रे दका

रप्रश्लेषपक्षेत्विति· अयम्भावः। किरतिगिरतीत्यादौस्वरितत्ववारणायतीतिप्रत्ययग्रहणंकर्त्तव्यमित्युक्तम्। ततश्चतद्भ्य
त्रेनैषस्तकारः कस्तर्हिदकारः। यदिदकारोदीर्घस्यऋकारस्यदीर्घः प्राप्नोतीतिशंकाम्भाव्यमानत्वेनपरिहृत्ययदिभाव्य
मानोनग्राहकस्तदाऽदसोऽसेरित्यादौदोषइत्याशंक्यभाव्यमानोऽप्युकारस्सवर्णान्गृह्णातियदयंदिवउदितितपरकरणं।
कुरोतीत्युक्तम्। ततोदिवउदित्यत्रवकारस्यार्द्धमात्रिकस्यान्तर्यतोमात्रिकएवोकारोभविष्यतीत्याशङ्क्यद्युभ्यामित्यादौत
परत्वात्वृद्धिग्रहणानुवृत्तिपक्षेऊठिकृतेऽपिद्विमात्रस्योकारस्यपुनःप्रसङ्गःविज्ञानान्मात्रिकोकारोयथास्यादित्येवमर्थं
तपरत्वमेवंभाव्यमानोकारस्यसवर्णग्राहकत्वेज्ञापकमुक्तम्। एवञ्चप्रत्ययग्रहणाभावेस्वरितत्वंद्युभ्यामित्यादौप्राप्नो
तीतिदकारस्तपरसूत्रेप्रश्लिष्यतइति चर्त्वस्यासिद्धत्वाज्जश्त्वंतुनभवतिसौत्रत्वात् अत्रदकारप्रश्लेषपक्षेत्वितितुना
ऽरुचिःसूचितासाचद्युभ्यामित्यादौस्त्रंसनधर्मिणोवकारस्यान्तरतमेऽनुदात्तउकारेकृतेदकारेकारस्योदात्तस्ययणिउ
दात्तस्वरितयोरितिसूत्रेणोकारस्यस्वरितत्वंप्राप्नोतीत्युकारस्योदात्तत्वन्निपातनीयम्· एवञ्चतेनैवनिपातनेनतित्।
स्वरितमित्यस्यापिबाधसिद्धोदिवउदस्तान्तत्वेपिनक्षतिरितितदेतद्वक्ष्यति। अयमुकारान्तोदात्तोनिपात्यतेतेनद्युभिरि
त्यत्रान्तोदात्तत्वंप्ररूप्यमानंनविरुद्धमतइति। वृद्धिरादैच्· इहस्पदत्रयमिति· वृद्धिः। आत्। ऐजितिभाष्येपदविभागप्रदर्श
नात्। वृद्धिशब्दोऽत्रपक्षेआवृत्त्योद्देश्याभ्यामन्वेति· असन्देहार्थंतपरेति· एतेनाकारार्थत्वमस्यनेतिध्वनितम्। तदेतदुपपा
दयति· प्रकृतसूत्रइति· परार्थमपीति· तात्परइतिपञ्चमीसमासाश्रयणादिभेदाभेदरूपतादात्म्यस्यस्वीकारेयादृशो·

वाक्यार्थबोधोऽन्यत्रप्रसिद्धस्तन्दर्शयति।रामेति·रामेतिद्व्यक्षरन्नाममानभङ्गःपिनाकिनः।धैर्यभङ्गोरावणस्यमदभङ्ग।
श्चवालिनइति· अत्रभेदाभेदयोर्मध्येभेदोव्यावहारिकोऽभेदःप्रातिभासिकः।नतुद्वौसमसत्ताकौविरोधात्।अभेदस्यप्रा
तिभासिकत्वादेवैतादृशाशुक्तिरजतेनकटकादिवन्नमुखादिदाहः।शब्दार्थयोस्तादात्म्यादेवसर्वेषुसञ्ज्ञाशब्देषुसञ्ज्ञास।
ञ्ज्ञिनोस्सामानाधिकरण्येननिर्देशःसङ्गच्छते।तथातत्तत्सञ्ज्ञासूत्राधीनोऽभेदबोधएव।सञ्ज्ञासञ्ज्ञिभावस्तुफलितः
।सञ्ज्ञात्वन्तुव्याख्यानादिति·एकस्यानेकाःसमानफलिकाःसञ्ज्ञानप्रमाणसिद्धाः।एतच्चानाकृतिःसञ्ज्ञेत्यादिनाभाष्ये
एवस्पष्टम्· ननुवृद्धिशब्दस्यसञ्ज्ञात्वेविधेयतावाच्यासाचनसम्भवतिउद्देश्यस्यपूर्वमप्रयोगादतआहःविधेयत्वेपीति·
मङ्गलार्थइति·मङ्गलादीनिमङ्गलमध्यानिमङ्गलान्तानिशास्त्राणिप्रथन्तइतिभाष्योक्तेः।सञ्ज्ञासूत्राणांनियमार्थत्वंप्रा
चीनोक्तंकटाक्षयन्नाहःसर्वशब्दानामिति·योगिदृष्ट्यातेषांसर्वशब्दार्थज्ञानात्सामान्यतःसामान्यरूपेणतत्त्वरूपंकेवला
न्वयिप्रमेयत्वादिकम्।तथाचसामान्यलक्षणयासर्वशब्दार्थानांज्ञानसम्भवेऽपियावच्छक्यतावच्छेदकस्याखिलशक्यताव
च्छेदकस्यचाज्ञानात्तत्तद्धर्मावच्छिन्नविशेष्यकस्यशक्तिग्रहस्याभावेनतत्तद्धर्मावच्छिन्नविषयकशाब्दबोधसम्भवइति
भावः।एतेनसामान्यतइतिप्रतीकमुपादायइदञ्चिन्त्यम् घटाइतिसामान्याकारस्यतस्यबोधोपयोगित्वदर्शनात्।सर्वेविष्णुमय
ञ्जगदित्यादौगत्यन्तराभावादितियत्तत्स्वरास्तमसमानधर्मप्रकारकबोधेतुतत्तद्धर्मावच्छिन्नविशेष्यकशक्तिग्रहस्यसर्वेघ
टारूपवन्तइत्याकारकवाक्यजन्यशाब्दबोधहेतुतायाअनुभवसिद्धत्वात्।सर्वशब्दस्यचोद्देश्यतावच्छेदकव्यापकविधेयत्वा

प्यपर्याप्तिकोधर्मः प्रवृत्तिनिमित्तम्। उद्देश्यतावच्छेदकव्यापकत्वञ्चतत्समानाधिकरणान्योन्याभावप्रतियोगितानवच्छेद
कत्वम्। विधेयव्याप्यत्वञ्चस्वाभाववद्वृत्तित्वसम्बन्धावच्छिन्नप्रतियोगिताकतत्तद्विधेयतावच्छेदकावच्छिन्नप्रतियोगिता
काभाववत्त्वमतोनसर्वेघयाः प्रमेयत्ववन्तइत्यादौविधेयतावच्छेदकावच्छिन्ननिरूपितस्वस्वाभाववद्वृत्तित्वरूपव्याप्यत्व
स्योद्देश्यतावच्छेदकव्यापकधर्मेऽप्रसिद्धावपिनक्षतिः। व्यधिकरणसम्बन्धावच्छिन्नप्रतियोगिताकाभावस्यसुलभत्वात् इ
त्यञ्चतादृशोधर्मस्सर्वेघटाइत्यादौघटनिष्ठयावत्त्वमेव एवमेवसर्वंविष्णुमयंजगदित्यत्राप्युपपत्तिः। अत्रजगत्पदम्प्रागभा
वप्रतियोगिपरम्। विष्णुपदार्थस्यविष्णुसमवेतवृत्तिप्रयोज्यपरतयाप्रागभावप्रतियोगित्वव्यापकंतादृशंयावत्त्वम्सुलभ
मेव। तत्तत्स्थानेप्रसिद्धानांव्यवहाराणामेकवाक्यतामाह· तत्रैवेत्यादिना· एषामिति· सञ्ज्ञाशब्दानामित्यर्थः। आसामिति·
स्वेच्छयाकृतानांसञ्ज्ञानामित्यर्थः। अतएव· नित्यत्वादेव· एतेननियमार्थत्वंफलितम् ननुशब्दमर्यादालब्धम् किन्तुयस्यस
ञ्ज्ञाकृतातस्यैवोपस्थितिर्नान्यस्येति· कृतः। अस्यहरिणेतिशेषः। ननुपाणिनिकृतसञ्ज्ञानामनादित्वाभावाच्छास्त्रविषयता
नस्यादसाधुत्वादतआह। आसांत्वेति· शिष्टेति· शब्दतत्त्वविद्भिः। एतेनभाष्यानुसारेणक्रियमाणानांलौकिकसञ्ज्ञानामसा
धुत्वमितिसूचितम्॰। केचित्तुसञ्ज्ञाविषयेयदियथोद्देशपक्षस्तदास्वप्रदेशएववाक्यार्थबोधस्तस्मिन्कालेचाविधीयमान
त्वात्त्रिमात्रादीनामपितपरत्वाभावेवृद्धिसञ्ज्ञास्यात्तदाखट्वेन्द्रादौत्रिमात्रादिव्यावृत्त्यर्थंतपरत्वंपरार्थमितिसम्भवति· कार्य।
कालपक्षेतुविधिशास्त्रैकवाक्यतयामृजेर्वृद्धिरित्यादिशास्त्रैकवाक्यतयासञ्ज्ञासूत्राधीनोबोधोवाच्यः। एवञ्चविधेयतया

नसवर्णग्राहकत्वासम्भवइतिनतपरकरणम्परार्थमित्याहुस्तान्दूषयितुमुपक्रमते॰ कार्य्यकालपक्षइत्यादिना॰ अतएवसन्त्रा।
सूत्रस्यसम्पूर्णस्योपस्थितिसत्त्वादेव॰ अत्रपक्षे। कार्यकालपक्षे॰ एतेनवाक्यैकवाक्यताविधिसूत्रैरितिसूचितम्॰ वाशब्दस्येति॰
धातुसूत्रेष्वर्थनिर्देशस्यापाणिनीयत्वेनवाइत्यानुपूर्व्याद्योभयत्रसमानत्वेनविकल्पार्थकवाशब्दस्यापिभ्वादित्वमितिभावः। पदत्वा
नापत्तेरिति॰ अत्रकेचित्तनिपातस्यानर्थकस्येतिवार्त्तिकेऽनर्थकग्रहणमकृत्वानिपातसामान्यस्यतेनप्रातिपदिकत्वेऽस्यापिप्रातिपदि
कत्वसम्भवइत्याह॰। सूत्रारम्भकारकेवार्तिकाभावेतद्ग्रीत्यैतत्प्रयोजनकथनात् भाष्यरीत्यादिवशब्दएवाव्युत्पन्नेक्रियावाचिनइ
त्यस्यप्रयोजनमस्तुक्रियात्वाभावादिति॰ कालपरिछेद्यत्वस्यक्रियात्वव्यापकत्वात्क्रियाभेदायकालस्त्विति हर्य्युक्तेः सौत्राणांधा
तुत्वमुपपादयति॰ स्तम्भ्वादीनामिति॰ प्राग्रीश्वरात्॰ अत्ररीश्वरादितिल्यब्लोपेपञ्चमीरीश्वरशब्दमभिव्याप्येत्यर्थबोधनायः ए
षामिति॰ प्रादीनांचादीनाञ्चेत्यर्थः। द्योतकत्वमिति॰ अतएवप्रजयतीत्यत्रप्रकर्षस्यप्रशब्दद्योत्यस्यधात्वर्थविशेषणत्वसिद्धिः
। द्योतकत्वञ्चसमभिव्याहृतपदशक्त्युद्बोधकत्वम्। पदमत्रशक्तम्। तच्च प्रादिसमभिव्याहाररूज्ञानस्यतत्तत्पदजन्यतत्तदुपस्थि
तौसहकारित्वकल्पनायोपपद्यते अतएवानुभूयतेसुखम् साक्षात्क्रियतेगुरुरित्यादौकर्मणित्वकारस्यैश्वरमनुभवतीत्यत्र
कर्मणिसुपश्चसिद्धिः। नचैतेष्वनुभवादिप्रादिनिपानामेवार्थः स्वस्वयुक्तनिपातार्थफलव्यधिकरणव्यापारवाचकत्वंस
कर्मकत्वमितिनानुपपत्तिरितिवाच्यम्॰ अनुगच्छतीत्यादितोप्यनुभवानुकूलव्यापारबोधापत्तेः। संयोगात्मकफलानुरुद्ध
व्यापार्थ्यनुशब्दार्थान्वयासम्भवेनगमधातोर्व्यापारसामान्यार्थकत्वस्यास्वीकार्यत्वात्। अनुभ्वादिष्वविशिष्टानुपूर्वीशक्त

एम

तावच्छेदिकेतिचेन्न॰ गौरवात्। धातोः फलव्यधिकरणव्यापारवाचकतया सकर्मकत्वापत्तिता दवस्थ्याच्च॰ न च धातो
र्नतादृशार्थवाचकत्वं किन्तु लक्षणया तत्तदर्थबोधकत्वम् लाक्षणिकार्थमादायैव चेष्टपूर्वोक्तप्रयोजनसिद्धिरितिवा
च्यम्॰ प्रादीनां तात्पर्य्यग्राहकतां विना विलक्षणार्थावगमासम्भवेन द्योतकत्वस्यैव सिद्धिसम्भवात् तात्पर्यग्राहकत्वस्यै
व द्योतकत्वात् उपसर्गाः क्रियायोग इति सूत्रस्यापि प्रादयः क्रियाविशेषणीभूतार्थतात्पर्यग्राहकत्वे उपसर्गसञ्ज्ञाः स्यु
रित्यर्थसम्भवात् एवं प्रतिष्ठत इत्यत्र द्योतकतां विना न निर्वाहः। प्रशब्दस्याभावबोधकत्वे धातोरनेकार्थत्वेन गतिबो
धकत्वेपि गत्यभाव एव प्रतीयते। यदि स्था धातुर्गतिनिवृत्त्यर्थक एव प्रशब्देन चाभावः प्रतिपाद्यत इत्युच्यते तदा गत्यभा
वत्वावच्छिन्नाभावो ज्ञाप्येत न तु विलक्षणगतिस्तेन नो धातोरेव तादृशार्थकत्वं प्रशब्दस्तात्पर्यग्राहकः एवं चैत्र मिवप।
श्यतीत्यादौ चैत्रपदस्य चैत्रसादृश्यविशिष्टे लक्षणा इवशब्दस्तात्पर्यग्राहकः। एवं साक्षात्क्रियते अलंक्रियते नमस्क्रिय
ते उरीक्रियते गुरुरित्यादौ तत्तदर्थवर्त्तमानात्कृञो लकारस्य कर्मणि सिद्ध्यर्थं तस्य तत्तद्वाचकत्वमुपेयम् तात्पर्यग्राहक
त्वममीषामस्तु। न च कृञः सकर्म्मकत्वात्कर्मणि लकारो नानुपपन्न इति वाच्यम् साक्षात्काराद्यर्थे न स्यात् क्वचित्सकर्म
कत्वात्कर्मणि लकारे विकुरुते वायुरित्यत्रापि स्यात्साक्षात्कारादेरधात्वर्थत्वे तु धात्वर्थफलाश्रयत्वरूपकर्म्मत्वविशिष्टए
व तत्त्वज्ञात्तल्लंरारव्यात स्य विधानान्न स्यात न च साक्षात्कारादेः साक्षात्पदादिशक्यत्वमस्तु तदनुकूलव्यापारस्तु धात्वर्थ इति
वाच्यम् स्वार्थफलव्यधिकरणव्यापारवाचकतया धातोः सकर्मकत्वाभावापत्तेः। किञ्च साक्षात्पदार्थस्य नामार्थत्तया धा

त्वर्थभेदसम्बन्धेनान्वयोपि न स्यात् विशेष्यतासम्बन्धे भेदसम्बन्धावच्छिन्ननामार्थप्रकारताकशाब्दबोधे प्रत्ययजन्योपस्थितेर्हेतुत्वस्यौदनः पचतीतिवाक्यात्कर्मत्वसंसर्गकबोधवारणाय स्वीकरणीयत्वात् एवं पटो घटश्चेत्यादौ समुच्चयोपि द्योत्य एव अन्यथा शोभनः समुच्चय इतिवच्छोभनश्चेत्यस्याप्यापत्तिः। न च चशब्दार्थसमुच्चयस्य नित्यपरतन्त्रतया न विशेषणान्वय इति वाच्यम् किञ्चिन्निष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबोधे इतराविशेषणतपापदजन्योपस्थितेर्हेतुत्वेन वाचकत्वस्वीकारे तथोपस्थितेः सत्त्वाच्छाब्दबोधे शोभनादिविशेषणान्वयसम्भवात् एवञ्च कारशक्यार्थस्य समुच्चयस्य षष्ठीं विनाऽनन्वयापत्तिश्च स्यात्। विभक्त्यर्थमद्वारीकृत्य नामार्थयोर्भेदेनान्वयबोधायोगात् अन्यथा राजा पुरुष इत्यत्रापि तदापत्तेः। धवखदिरयोः समुच्चय इतिवद्धवस्य च खदिरस्य चेत्यपि वाचकत्वपक्षे स्यात् यदि च समुचिताभिधायकत्वं चकारस्योपेयते एवञ्च भेदाभावान्न घटादिपदेभ्यः षष्ठी शब्दशक्तिस्वाभाव्यात्तस्यासत्त्वरूपतैव धातूपस्थाप्यार्थस्येवोपेयत इति मन्यसे तदा धर्म्मांशस्यानुपलभ्यत्वात्तत्र पुनश्चस्य शक्तिकल्पने गौरवम् न च षष्ठीवारणान्यथानुपपत्त्या फलमुखत्वेन नायं दोष इति वाच्यम् घटः पटश्चेत्यत्र पटपदार्थस्य समुच्चये प्रतियोगितासम्बन्धेनान्वयो वाच्यः स च पदार्थैकदेशत्वान्न स्यादिति द्योतकत्वस्वीकारस्यावश्यकत्वात् एवं शरैरुस्रैरिवोदीच्यानुद्धरिष्यन् रसानिवेत्यत्रापि वाचकत्वेऽगतिः। उस्रपदोत्तरतृतीयया उस्रपदार्थस्य करणत्वं प्रतिपादनीयं तच्च न सम्भवति उदीच्यकर्मकोद्धारे उस्राणामकरणत्वात् इवशब्दस्य सदृशार्थकत्वेप्यसत्त्वार्थकतया तदुत्तरतृतीयाया अभावेनोस्रसदृशाभिन्नैः शरैरिति बोधासम्भवा

त्‌ यदित्वव्ययादितिज्ञापकात्सर्वविभक्त्युत्पत्तिः स्वीक्रियते तदोस्य पदोत्तरत्तृतीयानन्वयप्रसङ्ग इति समभिव्याहृत
पदार्थे उपमानत्वस्याभेदान्वयस्य च द्योतक इवशब्द इति स्वीकार्यमिति न कापि क्षतिः। एवमेव वागर्थाविव सम्पृक्ता वि
त्यत्राप्यूह्यमिति दिक्‌। वाचकत्वञ्चेति· अयम्भावः यथा घटमानयेत्यादिवाक्यात्प्रथमं बोधः प्रयोज्यवृद्धस्येति बालस्य
यद्यप्यन्वयव्यतिरेकाभ्यां शक्तिग्रहस्तथा प्यावापोद्वापाभ्यां घटादिपदस्यैव वाचकत्वं कल्प्यते तथेहापि निपातानामन्वयव्यति
रेकाभ्यां सिध्यति। न च प्रतिष्ठत इत्यादावुक्तानुपपत्तिरिति वाच्यम्‌ प्रकारता सम्बन्धेन धात्वर्थविशेष्यकबोधे कारकवि
भक्तिनिपातान्यतरजन्योपस्थितेर्हेतुत्वस्य कल्पनात्‌ निपातातिरिक्तत्वं विशेषणं नामार्थधात्वर्थयोरभेदान्वयबोधप्र
योजकव्युत्पत्तौ देयम्‌ नामार्थयोरभेदान्वयप्रयोजकव्युत्पत्तावप्येवम्‌। वाचकत्वादेव नेत्युक्तेऽभावमात्रप्रतीतिः सार्व
जनीना निर्वहति। न च प्रसज्यप्रतिषेधार्थकनञः क्रियान्वयनियमभङ्ग एवं सतिस्यादिति वाच्यम्‌। गम्यमानक्रिया
मादाय कस्मात्त्वं न याहीत्यत्रेव तदुपपत्तेः। अथवा प्रकृष्टादिधर्मा प्राद्यर्थस्तथा च स्तोकं पचमीत्यादिस्थलवदभेदा
न्वयसम्भवः। न च निपातानां वाचकत्वे घटादिपदानामिव केवलानामपि प्रयोगः स्यादिति वाच्यम्‌ केषाञ्चिन्नञा
दीनां तथात्वस्येष्टत्वात्‌ कुत्रचित्तु ते प्राग्धातोरिति सूत्रस्य नियामकत्वात्‌। कुत्रचित्तु प्रकृतिप्रत्यययोरिव स्वभाव
तः केवलाप्रयोगस्वीकारात्‌। एवं सति यत्र द्योतकतां विना न गतिस्तत्र द्योतकत्वस्यैव स्वीकार उचित इति नास्माक
मेकतरपक्षाग्रह इत्याशयेनाह· यथाकार्यं यथाप्रयोगमिति· विशेष्यतयेति· द्रव्यावृत्ति विशेष्यताकोपस्थितिज

नकाइत्यर्थः। अत्रद्रव्यपदंनगुणाश्रयपरम् किन्तुवस्तूपलक्षणम् यत्रसर्वनामप्रयुज्यतेद्रव्यमित्युच्यतेसोऽर्थोभेद्यत्वे
नविवक्षितः इतिलक्षणलक्षितमेवगृह्यते। वस्तूपलक्षणम्। वस्तूपलक्ष्यतेपरामृश्यतेयेनतत्सर्वनामयत्रपरामर्शाय
प्रयुज्यतेसोऽर्थोद्रव्यमित्युच्यते। अथवाभेद्यत्वेनलिङ्गसंख्याभिरूपितविधेयत्वेनविवक्षितइत्यर्थः। क्रियाविशिष्टे
ति· प्रकर्षविशिष्टपूरणादिक्रियेत्यर्थः। अद्रव्यार्थाः किम्। पशुः इत्यर्थेवोधायेति· क्रियायामित्येवास्तु। अन्वेतीत्यस्य
ध्याहारेणक्रियायोगइत्यर्थलाभसम्भवादितिभावः समावेशार्थइति· अन्यथाआकडारीयत्वात्सनस्यात् निपात
त्वायेति· तेनप्रगतआचार्यः प्राचार्यइत्यादावव्ययपूर्वपदप्रकृतिस्वरसिद्धिः। नन्वेतन्निपातसञ्ज्ञायानफलम्। उ
पसर्गप्रतिरूपकत्वादेवाव्ययत्वसिद्धेरतआह· एतन्सिद्धमेवेति· योगविभागसिद्धमेवेत्यर्थः। अनुकार्यानुकरणयो
रिति· इदम्प्राचामनुरोधेन। अनुकरणमनुकार्याद्भिन्नमेवेतिसिद्धान्तिमतेसुवुत्पन्नावपिप्रकृतिवदित्यतिदेशेना
व्ययत्वाद्विभक्तिर्लुक् अनुकार्यस्वरूपभङ्गभियाच्चपदान्तत्वप्रयुक्तंकार्यन्न। सान्तग्रहणइति· यथानिसस्तपतावना
सेवनेइत्यत्रयत्रतुरुत्वमसिद्धन्तत्र। यथानसुदुर्भ्याम् निरःकुषः। सुदुरोरधिकरणइत्यत्र। यत्रतुरुत्वस्यसिद्धत्वमिति
स्फुरतिस्फुलत्योर्निर्निविभ्यइत्यत्र। यथाषत्वणत्वयोः। अत्रच्छेदः तद्विषयोपसर्गत्वप्रतिषेधपरंवार्त्तिकेइति· इदं
वार्तिकंयद्यपिगतिश्चेतिसूत्रेपठितन्तथाप्युपसर्गसञ्ज्ञायाः कार्यकालत्वेनप्रतिषेधवचनस्यरुत्वापेक्षयापरत्वं
वोध्यम्। एतच्चइहणत्वंमाभूदितिभाष्यकारोक्त्यादुःस्थितमित्यस्यार्थेदुःष्ठितमित्यापन्नप्रयोगादर्शनाच्चाध्यवसी

यत्ने रेफसान्तस्यापि ग्रहणमिति· तेन दुःसेधतीत्यत्र कदापि षत्वं न।अत एव· वार्तिके उभयोर्ग्रहणादेव।यदि रेफान्त
स्यैव ग्रहणं स्यात् तदा सान्तपूर्वकस्य षत्वे सिद्धे सुषामादिषु षत्वार्थं तत्पाठो व्यर्थः स्यादिति भावः उपसर्गत्वाभा
वइति· क्रियाविशेषणीभूतार्थद्योतकत्वाभावात् नच यदादुरपूर्वकात्कुस्तदा वार्तिकेन निषेधे प्राप्ते षत्वार्थं।
पाठस्यावश्यकत्वेन।अत एव तत्सङ्गतमिति वाच्यम्।उणादिव्युत्पन्नानां सञ्ज्ञाशब्दतया तस्यानभिधानादिति
।नच निस् निर् इत्यनयोः स्वीकारे स्वरतिसूतीति विकल्पानन्तरं निरः कुष इत्यस्यैव यथार्थम्।एकाच उपदेशइति
सूत्रान्तरं रेफान्तनिर्घटितं निरः कुषोऽनिष्ठायामिति पठनीयं तेन सान्तोपपदे सत्वस्यासिद्धत्वादिट् भविष्यती
तिरूपद्वयसिद्धौ लाघवं स्यात् भवादिति वाच्यम्।अनिष्ठायामित्यस्य पर्युदासत्वे कृत्स्वेव प्रवृत्त्यापत्तेः।प्रसज्यप्र
तिषेधे तु लाघवाभावः लोकेऽर्थे पदार्थकस्येतिः।यथा घटः पट इत्यादौ घटादिपदाच्छब्दप्रकारिकार्थोपस्थि
तिर्यद्यपि भवति तथापीति शब्दसमभिव्याहारे घट इत्यादौ न शब्दप्रकारिकोपस्थितिस्तथाऽत्र शास्त्रेऽग्नेर्ढगित्या
दौ स्वंरूपमिति परिभाषणाच्छब्दस्यैव प्राधान्येन भानम्।इति शब्दसमभिव्याहारे तु शब्दप्रकारिकैवोपस्थिति
रित्येव पदार्थविपर्यासकृत्त्वम्।यद्यपि शब्दार्थौ द्वावपि पदार्थौ तथापि तयोर्या विषयता तद्विपर्यासकृत्त्वमेव
पदार्थविपर्यासकृत्त्वमिति भावः अनुवादवाक्यइति· यथा आः किमेतदिति क्रोधादाभाष्य महिषासुर इत्यत्र इ
तिहेतुस्तद्वद् इत्यत्र च जयेति देवाश्च मुदा इत्यादौ च निषेधविकल्पयोर्विभाषासञ्ज्ञाविधानोपयोगं दर्शयितुम्

पक्षमते।प्राप्तविभाषास्विति॰ वैरूप्यापत्त्या वाक्यभेदापत्तेश्चेति॰ यतोनैकत्रोभयरूपेण प्रवृत्तिः किन्त्वेकत्र विधिमु
खेनापरत्र निषेधमुखेन एवञ्च वै॥ ॥रूप्यमिति॰ सूत्रापत्त्या क्वचिद्विधिमुखेन क्वचिन्निषेधमुखेन प्रवृत्तौ वा
क्यभेदापत्तिरितिभावः।प्राप्तविभाषायथा निरोऽन्तर्द्धाविति सूत्रादन्तर्द्धावित्यनुवर्त्तमाने विभाषाकृञीति अत्रभावो
शास्यसिद्धत्वात् पक्षेनिवृत्तिफलिकैवास्य प्रवृत्तिरित्यादि अप्राप्तविभाषायथा विभाषोपयमने अत्रोपयमनं गम्य
नाङ्क विवक्षितम् यदा तदायमो गन्धन इति नित्यमेव शास्त्रम्पूर्वविप्रतिषेधेन प्रवर्त्तनइति तत्सूत्राविषयमेवेतत्सू
त्रप्रवृत्तिर्वाच्या तत्राभावांशस्य सिद्धत्वाद्विधिमुखेनैवास्य प्रवृत्तिः।विभाषा श्वेरित्यादावुभयत्र विभाषासु उभयमु
खेनैव प्रवृत्तिर्वाच्या सा पूर्वोक्तरीत्या न सम्भवतीति सूत्रस्यावश्यकतेतिभावः।काकाक्षिगोलकन्यायेनोभाभ्या
मिति शब्दः सम्बध्यतइति प्राचामुक्तिं खण्डयति॰ इति शब्दस्येति॰ जातिव्यक्तिपक्षयोरिति॰ जातिपक्षेक्वचिदे
करूपेण प्रवृत्तावपिचारितार्थ्येन सूत्रंसार्थकमिति वैरूप्यमेकस्य विभाषा श्वेरित्यस्योभयरूपेण प्रवृत्तौ स
म्भाव्यतइति न चेति सूत्रमावश्यकम्। व्यक्तिपक्षे तु प्रतिलक्ष्यं लक्षणभेदात्क्वचिन्निषेधमुखेनैकस्य क्वचिद्विधि
मुखेनापरस्य प्रवृत्तिर्भविष्यतीतिनार्थः सूत्रेणेति प्राचामुक्तिः सानयुक्तेतिभावः।पत्त्वत्रेदञ्चिन्त्यम् अशिष्यो
वाविदितत्वादिति प्रत्याख्यानभाष्यं वा शब्दस्वारस्येन तस्य पाक्षिकत्वलाभाज्जातिव्यक्तिपक्षमाश्रित्यारम्भाना
रम्भाभिप्रायेणैव व्याख्यानमुचितमिति तन्न॰ अशिष्येत्यस्य स्वारस्यभङ्गापत्तेः।सूत्रस्य प्रयोजनकथन समये ए

कस्यैव सूत्रस्य प्राप्तिविषये मप्राप्तिविषये चोपयोगाभावमुपपाद्योभयविभाषायां विभाषाश्वेरित्यत्र विधिप्रति
षेधयोर्युगपद्वचनानुपपत्तिरित्यनेनाप्येकस्यैव वैरूप्येणावृत्तिं शंकां कृत्वा सिद्धान्तु पूर्वेणोत्तरस्य बाधितत्वादि
त्यनेन नश्रुतक्रमानुरोधेन सञ्ज्ञिनो निर्षेधविकल्पयोर्विधिप्रदेशेऽउपस्थित्यासत्तिभेदेन वाक्यभेदं व्युत्पाद्य साशं
परिहृता। एवञ्च यथारम्भपक्षे शङ्कासमाधानाभ्यामेकस्यैव लक्षणस्य निर्दिष्टत्वम्प्रतिपादितन्तथैवाशिष्योंवेति
प्रत्याख्यानभाष्येऽपि व्याख्यानमुचितम् न तु व्यक्तिपक्षेऽनावश्यकत्वाभिप्रायेणेति दिक्। ननु स्वंरूत्रस्य सञ्ज्ञास्व
रूपबोधकत्त्वं सम्भवति सामानाधिकरण्येनोभयोरनिर्देशान्नापि षष्ठ्यान्यादेशभावबोधकत्वम् सूत्रस्यैव वैय
र्थ्यापत्तेर्नाप्यागमागमिभावस्य लिङ्गानुपलम्भात्। अतस्सूत्रारम्भसार्थक्याय बोध्यमित्यस्याध्याहार एवेत्याशयेना
ह· व्याख्यानादिति· नियमार्थमिति· स्वरूपमेव बोध्यमित्यर्थः। उभयंसञ्ज्ञीति· रूपग्रहणसामर्थ्यात्। प्रकृतिप्र
त्ययादीति· आदिना निपातपरिग्रहः। उपपादितमेतत् शास्त्रीयोपीत्ययिना लौकिकपरिग्रहः। तत्र प्रकृतेः शास्त्री
यार्थग्रहणाद्दोजग्धिरितिजग्धादेशो मदीहृषे इति धात्ववयवाच्छब्दस्य न अर्थवतः प्रत्ययस्य ग्रहणात्सन्यङो
रिति द्वित्वम्प्रत्तेरीयङिति विहिते यङि न प्रवर्त्तते। उपसर्गस्यार्थवतो ग्रहणादुदः स्थास्तम्भोरिति पूर्वसवर्णो गर्भुत्स्था
नमित्यादौ न मुख्यः। प्रसिद्धश्चेतीति· अत्र शीघ्रोपस्थितिकत्वेनान्तरङ्गत्वं बीजं मुख्य इत्यस्य मुख्यमिव प्राथमिको
पस्थितिविषय इत्यर्थो न तु प्रकारतानात्मकविशेष्यताश्रय इत्यर्थः। तत्र मुख्य इत्यनेन गौणलाक्षणिकस्यव्याव

त्तिः। एतेनाग्निसोमौ माणवकाविव्यत्रेदग्नेरितिना प्रसिद्धत्वमित्यनेन सञ्ज्ञाशब्दव्यावृत्तिः तेन सञ्ज्ञाश्वश्रुरस्य
पत्यमित्यत्र राजश्वशुराद्यदिति न ननु वर्णग्रहणाइति॰ तेनैकोपणचीत्यादौ न परिभाषाप्रवृत्तिरन्यथा दध्यत्रेत्या
दाविव यणादिः स्यात्र न पचत्यत्रेत्यादौ तस्मादित्यत्र रस्येत्यादिनिर्देशोप्यत्र मूलम्। इह ल्पधोरित्यत्र चारितार्थ्येतेनि
आनइत्यनुवृत्त्येति भावः। पूर्वोक्तं सूत्राशयवर्णनमात्रमित्याशयेनाह॰ भाष्येत्विति॰ द्वितीयप्रयोजनान्यथासिद्धिमाह॰
उपस्थितार्थेति अशब्दसञ्ज्ञेत्यपि व्यर्थ मित्याह लस्यानुस्वारादिति॰ अत एव॰ सूत्राभावादेवः वृक्षादिष्विति॰ वि
भाषावृक्षेति सूत्रे॰ यत्नः कर्त्तव्य इति॰ तदुक्तं भाष्ये सित्तद्विशेषाणां वृक्षाद्यर्थं मपित्पर्यायवचनस्य च स्वाद्यर्थम्।
चेन विशेषाणां स्वरूपस्य सङ्ग्रहः। भित्पर्यायवचनस्यैव राजाद्यर्थम् झित्तस्य च तद्विशेषाणां च मत्स्याद्यर्थम् अ सै
कस्य पर्यायवचनस्येष्यते मीनान् हन्ति मैनिक इति॰ ननु यदा षष्ठशब्दस्य सञ्ज्ञात्वकरणेन ज्ञापकेन स्वरूपाग्रह
णमिति स्वीक्रियते तदा नदीपदेन स्वरूपग्रहणं न प्राप्नोतीत्यत आह॰ ज्ञापकपक्षेपीति॰ अत एव॰ ज्ञापकसिद्धस्या
सार्वत्रिकत्वादेव येनेतिकरणे तृतीयेति॰ कर्त्तरि तु न सम्भवति षष्ठ्याबाधात् नापि हेतौ करणतृतीयायाः कारकवि
भक्तित्वेन प्राबल्यात्॰ न लक्षणेति॰ कर्तृकर्मणोः कृतीति सूत्रारम्भात् यदि सुविभक्तावपि लक्षणा स्यात्तदा तद्विषयेशे
षषष्ठीं विधाय लक्षणाया कर्त्तृत्वकर्मत्वाभ्यामेव बोध्यस्यापुपपत्तिकृत्वा कर्तृकर्मणोरिति सूत्रस्यानारम्भ एव कार्यः
न केवलं सुविभक्तावेव न लक्षणा किन्त्वन्यत्रापीत्याह किम्वहीति॰ प्रत्ययः पुंयोगादिति॰ आद्येप्रत्यये तिमहासंज्ञाकर

योनप्रत्ययन्तीति प्रत्ययइत्यनेन यस्मिन्नर्थे शास्त्रेण विधानं कृतं तत्रैव साधुत्वं भवति नान्यत्रेत्यनेन न लभ्यते साधुत्ववि
धानपर्यन्तशास्त्रव्यापारात् एवं परश्चेति सूत्रेण तस्य प्रयोगनियमार्थत्वं व्यवस्थापितम् प्रत्ययः परो भवत्येवेति हि नि
यमस्तस्मात्कल्प्यः। एतेन प्रकृतेः प्रत्ययासमभिव्याहारे साधुत्वमुक्तं प्रायमपुंयोगादिति सूत्रेपि किंपुनरिहोदाह
रणम्। प्रष्ठीप्रचरीकथम् पुनरयं प्रष्ठशब्दोऽकारान्तः स्त्रियां वर्त्तते न स्येदमित्यनेन नाभिसम्बन्धेन यद्येवं
पुंयोगादाख्यायां तद्धिलुग्वचनं कर्त्तव्यम् तस्येदमिति प्राप्नोति ननर्हीदानीमिदम्भवति प्राष्ठ्यइमाः प्राचार्य्यइ
माः भवति च विभाषा लुग्वक्तव्यः। यदा लुक् तदा प्रष्ठी यदा न लुक् तदा प्राष्ठी यद्येवं नार्थो लुका विभाषा तद्धितो
त्पत्तिः। यदा तद्धितोत्पत्तिस्तदा प्राष्ठी यदा न तद्धितोत्पत्तिस्तदा प्रष्ठी एवमपि लुग्वक्तव्यः। न ह्यन्तरेण लुकं परा
र्थे शब्दो वर्त्तते। अत्र परार्थे शब्दो न वर्त्तत इति सामान्यतोऽभिधानेन प्रकृतेः प्रत्ययस्य प्रसिद्धस्वार्थेभ्यो रित्यज्या
न्यत्र वृत्तिर्नास्तीति स्पष्टमेव लभ्यते ततो यदि पुनस्तस्यामेव प्रष्ठशब्दो वर्त्तते कथं पुनस्तस्याम प्रतिष्ठमानायाम्प्र
ष्ठशब्दो वर्त्तते यथैव स्वसा वकुर्वती किञ्चिन्न्यापं न तत्कृतान्वथवन्ध्यन स्त्रैणो लभ्यते। एवम्प्रष्ठशब्दमपि लभत इत्यु
क्तम्। एतेन भाष्यप्रघट्टकेन नह्यन्तरेणोत्पत्तं स्वार्थस्येन प्रकृतिमात्रस्य लुकमन्तरा तद्धितार्थे वृत्तिर्नास्तीति प्रतिपा
दितमिति लक्षणाया वृत्तिर्नेति स्पष्टमेव लभ्यते। अग्निमस्य यदि पुनरित्य प्रस्थानादि क्रियायाय श्राकथञ्चित्तस्म
र्थाचरणादिना कर्त्तृत्वात्प्रष्ठशब्दप्रवृत्तिर्भविष्यतीत्यभिप्रायः। यथा पञ्चभिर्हलैः कृषतीत्यत्र प्रतिविधानात्कर्त्तृ

भै· २२

स्वमितिकथं पुनस्तस्यामितियदाप्रतिविधानमपिनेतिभावः। तत्कृतानभर्त्तृपापकृतान् तथा च भर्त्तृसम्ब॥
न्धाद्दाम्पत्यरूपाद्यथावधबन्धनादिजनितक्लेशानुभवस्तस्य तथा तच्छब्दस्यापि तत्सम्बन्धादेवप्रवृत्तिरिति॥
भावः साचतत्रप्रष्ठत्वरूपप्रवृत्तिनिमित्तारोपरूपा एवञ्चारोपितप्रष्ठत्वप्रवृत्तिनिमित्तकोऽत्रप्रष्ठशब्दस्स्वार्थए॥
वप्रवर्त्तते शक्यतावच्छेदकारोपात्मिका लक्षणा यत्र शास्त्रेण यस्य साधुत्वमन्वाख्यायते ततोऽन्यत्रापीष्यतेएव॥
लक्षणया साधुत्वाभाव इत्यस्य स्वत्वयम्भावः शक्यतावच्छेदकातिरिक्तधर्मप्रकारकबोधफलिकान्यधर्म्मावच्छि॥
न्नेशाक्यसम्बन्धे प्रयोज्या लक्षणा नास्त्येवेति गौणमुख्यविभागस्यापि शब्दस्य स्वीयप्रवृत्तिनिमित्तप्रकाशकप्रती॥
तिविशेष्यप्रसिद्धार्थकत्वम्मुख्यत्वम् तद्धर्मप्रकारकप्रतीतिविशेष्याप्रसिद्धार्थकत्वञ्च गौणत्वमित्युपपत्तिरिति॥
दिक्। इतरव्यावृत्तिकरणाम् विशेष्यप्रकारकेतरभेदानुमितिकरणज्ञानविशेष्यीभवनमित्यर्थः अन्येन चान्यस्येति।
अन्यशब्दसम्बन्धी यो विधिः सोऽन्येन भवति तत्र दृष्टान्तः। चैत्रस्येति चैत्रसम्बन्धीपः संग्रामं हस्त्यश्वरथपदातिभि॥
र्विधत्त इत्यन्वयः एवञ्च विशेषणासम्बन्धाभावे उद्देश्यसामान्यसम्बन्धित्वेन सम्भाव्यमानं विधेयं विशेषणेन परि॥
च्छिन्नविशेष्यसम्बन्धित्वेन बोधयति एवञ्च विशेषणस्य करणत्वमुपपन्नम् अत्र दृष्टान्ते व्यापारान्तरस्यापि संबन्धी॥
भवनादिरूपस्य करणत्वाभिप्रेते हस्त्यश्वादौ यद्यपि सम्भवस्तथापि करणत्वमात्रे दृष्टान्ततेति बोध्यम्। तत्र विशे॥
ष्येषु। तादृशं। शब्दोपस्थितम्। यथा पादः पदित्यत्राकचित्सति गमक इति। यथा सर्वादीनि सर्वनामानीत्यादौ। त॥

राम २२

श्चेति· विशेषणश्चेत्यर्थः अन्तरङ्गत्वादिति· इतरसम्बन्धानवच्छिन्नविशेषणाविशेष्यमात्रस्य तत्रसम्बन्धत्वात्।नन्वे
वमिन्हन्निन्यत्रोपात्तेन शब्दस्याङ्गविशेषणस्य तदन्तग्राहकतेष्यते।साचनोपपद्यते नहीनङ्गमितिसम्भवती
त्यत आह तत्र तदन्तविधाविति· एवञ्चेदृशे विषये सूत्रघटकशब्दजन्यप्रथमोपस्थितस्य विशेष्याभिन्नत्वं स्व
स्वरूपात्मकवाच्यमादाय यद्यपि न सम्भवति तथापि तदन्तोपस्थितौ विशेष्याभिन्नत्वं सम्भवतीत्येतादृशयो
ग्यताया अप्येतच्छास्त्रप्रवृत्तिनियामकत्वं ग्राह्यमिति भावः।पाठ्यमिति· लोकप्रसिद्धव्यपदेशविवक्षावस्यशा
स्त्रेणावाधायेतिशेषः समासेतिवचनाङ्गीकारे गौरवं स्यादत आह विशेषणेनेति· समर्थैरित्यस्येति· इदं विभक्ति
विपरिणामेन निर्दिष्टम्।तस्य· विशेष्यस्य।सुपा इत्यनेनान्यथा सर्वत्रान्वयासम्भवः।यद्यपि श्रियां सम्बुद्धौ
च संभवस्तथापि शास्त्रस्यान्यत्रापि कष्टंश्रितः कष्टंश्रितइत्यत्र यथा स्यात् कष्टम्परमश्रितइत्यत्र माभूदिति
भाष्यप्रामाण्यात्प्रवृत्तिरिष्टैवेति भावः।उगिदिति· उगितावर्णेन च यत्र विशेष्यन्ते तत्र तदन्तविधिर्भवत्येवेति
फलितम्।अभिभवतीति· सर्वादिपठितभवतुशब्दान्तमेतत्।उगितश्चेति· सूत्रे उगिन्नप्रातिपदिकग्रहणा
त् एवञ्च वर्णग्रहणे तदन्तविधिस्वीकारे च।गृह्यमाणप्रातिपदिकेति· प्रातिपदिकमात्रवृत्तिधर्मप्रकारक
प्रतीतिजनकतावच्छेदकरूपेणोपात्तम्प्रातिपदिकं यत्रेत्यर्थः।नायं निषेध इति· न चास्य निषेधे पिवन्मात्रस्य
प्रातिपदिकत्वात्सामर्थ्यात्तदन्तविधिः स्यादिति वाच्यम्।एवमपि वन्नन्तान्नइत्यर्थलाभो न स्यादित्यत्र तात्पर्यात्

समासप्रत्ययेतिवचनस्य प्रत्ययविधिविषयत्वस्वीकारादग्न्नित्यादौगृह्यमाणप्रातिपदिकविषयेपितदन्त
विधिर्भवत्येव॰ वर्णानांसिद्धान्तेनित्यत्वात्तत्सामान्याभावाप्रसिद्धिरतआह॰ उच्चारणाभावइति॰ सच॰ वर्णोच्चार
णाभावश्च॰ व्याख्यानादिति॰ रञ्जनोहल्लादेर्लघोरितिसूत्रेतद्व्याख्यानभाष्येचरेफस्यविसर्गोकरणामूलकादि
न्त्यादिः।नचपूर्वकालिकोच्चारणाभावस्यावसानसञ्ज्ञायामपिनास्तिरेफस्यप्रकृतेप्राप्तिः।रेफस्यपदान्तत्ववि
रहादितिवाच्यम् अवसानेयत्ररेफस्यविसर्गप्राप्तिस्तत्रपदान्तत्वंरेफस्यावश्यमस्त्येवेतितद्धदितवाक्येपदान्त
इत्यस्यासम्बन्धात् किञ्चतद्धदितवाक्येतत्सम्बन्धेपिर्वोरुपधायादीर्घइत्यनत्सूत्रेयआदौरेफस्तस्यपदान्ततया
विसर्गापत्तिर्दुर्वाराचसञ्ज्ञानचैवमपितस्मिन्नितिपरिभाषयाऽवसानपरत्वएवविसर्गप्रवृत्त्यानतत्रविसर्ग।
प्राप्तिरितिवाच्यम् तस्मिन्नितिसूत्रेदिशेरुच्चारणार्थकस्यसत्त्वेनयस्योच्चारणासम्भवस्तद्विषयेएवतत्परिभाषा
प्रवृत्तिरवसानस्यतुवर्णोच्चारणाभावरूपतयाऽभावस्योच्चारणासम्भवेननात्रपरिभाषाप्रवृत्तिः किन्तुबौद्धोप
श्लेषसत्त्वाद्विसर्गापत्तिरित्याशयात्।वर्णवदिति॰ यथावर्णानामुच्चारितप्रध्वंसितयानोपश्लेषसम्भवः।उपश्ले
षस्यस्थिरपदार्थनिष्ठत्वात् किन्तुबौद्धएवसतथाऽभावस्यापिवाच्यः पूर्वेणापि।अवसानविषये।अवसानकार्या
णाम॰ वावसानइत्यादीनाम॰ तदधिकारे॰ संहिताधिकारेसावकाशायास्संहितासञ्ज्ञायाइति॰ एतेनावसानस।
ञ्ज्ञानुनिरवकाशेतिसूचितम् यदित्वेषापिहेरइत्यादौसम्बोधनेसावकाशेतिमन्यते तदापरत्वादवसानसञ्ज्ञाप

संहितासञ्ज्ञाया बाधः स्यादिति शंकाभिप्रायः। अग्ने· नौल्लीत्यादौ अग्निचिच्छुनातीत्यत्र संहिताभावे परसवर्णो माभू
दित्यर्थमिति भावः· ध्वन्वितमिति· तत्र हि अनवकाशत्वाद्बाधपक्षे पूर्वपरसन्निकर्ष एव संहितासञ्ज्ञेति पक्षे चाणो
प्रगृह्यस्येत्यत्रोभयसम्बन्धेन सदोबोद्धावनेन एतेन मण्डूकप्लुतिरयुक्तेति स्पष्टमेव लभ्यत इति भावः। सन्निकर्षसं
योगादि वर्णानान्न सम्भवतीत्यत आह· सन्निकर्षः सामीप्यमिति· व्याख्यानादिति· न कपः नापि सप्तमी बहुवचन
मेव किन्तु तिङ्·साहचर्यात्सुपः पकारेण प्रत्याहार इत्यर्थकात् अन्तग्रहणवैयर्थ्यं शङ्कते। यद्यपीति· अयुक्तत्वा
दिति· एतेन यत्र वर्णानां विरामस्तत्र रामइत्यादौ द्वयोस्सञ्ज्ञयोस्समावेश इति सूचितम् यत्तु इदं प्रकृतसूत्रभा
ष्यके यट विरुद्धम् तत्र वर्णाद्वर्णान्तरोच्चारणे प्रतिवर्णे विरामसद्भावादवसानसञ्ज्ञया संहितासञ्ज्ञाबाधः
प्राप्नोतीत्याशंक्य वृक्षइत्यादौ वर्णान्तरानुच्चारणे सावकाशामवसानसञ्ज्ञां संहितासञ्ज्ञा बाधते यद्युभयोः स
मावेशस्तर्हि बाधकथनासङ्गतिरिति तन्न· द्वयोः सञ्ज्ञयोर्लौकिकत्वेपि बाध्यबाधकभावो यथा राज्ञा स्वस्याधि
कारदानसमये एका सञ्ज्ञा क्रियते पुनस्तदपेक्षयाऽपि महतोऽधिकारस्य दानसमयेऽपरा सञ्ज्ञा क्रियते तयैव
च सञ्ज्ञया लोके लौकिकैर्यावज्जीवनं संव्यवह्रियते तथाऽत्रापि संहितासञ्ज्ञया लौकिकत्वेऽप्यनयाऽवसानस
ञ्ज्ञाया बाधो भविष्यतीत्यभिप्रायेणात्र बाधकथनात् अयञ्च बाध्यबाधकभावेन युक्त इत्यभिप्रायेण। अथवाऽ
वसानसञ्ज्ञायां प्रकर्षगतिर्विज्ञास्यते। साधीयो विराम इति कश्च साधीयः यः शब्दार्थयोर्विरामः। अथवेति सर्व

त्र विरामसद्भावात्पुनः श्रुत्या विशेष आश्रीयते अन्यत्र तु सत्यपि शब्दाविरामे इति पदार्थस्य वाक्यार्थस्य वा विरामा
न्न भवत्यवसानसञ्ज्ञा इति भाष्यकैयटयोरुक्तम्। अत्र शब्दस्य विरामश्रवणाकृतोऽर्थस्य बोधकृत इति भावः अ
न्यत्र त्विति· वर्णानन्तरवर्णोच्चारणे मध्यमकाल इत्यर्थः। एतेन पूर्वभाष्यमभ्युपेत्यवादेनेति स्पष्टमेव। प्राचा
मुक्तिं खण्डयति। प्रत्ययेनेति· प्रकृतिं विना प्रत्ययोत्पादासम्भवादिति भावः। आक्षेपासम्भवादिति· प्रत्ययो
त्पत्तौ प्रकृतेरपेक्षासत्त्वेपि तस्य स्थितौ व्यभिचारेण प्रकृतेराक्षेपासम्भवादिति भावः। आक्षिप्तस्य शाब्देऽनन्वया
दिति· पदजन्यपदार्थोपस्थितेः शाब्दबोधे कारणत्वात् आक्षिप्तार्थस्य मानसज्ञानविषयत्वेऽपि तद्वाचकशब्दा
नुच्चारणेन उच्चारितः शब्दः प्रत्यायको नानुच्चरित इति भाष्यसंवादेन तस्यार्थस्य वृत्त्या पदजन्यपदार्थोपस्थिते
रभावादिति भावः गौरीब्राह्मणितरेति· इदन्न परिनिष्ठितम् किन्तु लौकिकसमासार्थं वाक्यम्। अत्र गौरीश
ब्दस्य नद्या ह्रस्व इत्यर्थः कल्प्यः। अत्र तु पुम्वद्भावेन गौरब्राह्मणितरेति भवति नदन्तस्य सञ्ज्ञायानुपरत्वात्पुंवद्भाव
स्य बाधकं ह्रस्वं गौरीशब्दस्य स्यादिति गौरब्राह्मणितरेति स्यादिति भावः। एतन्निषेधसामर्थ्यादिति·। सञ्ज्ञावि
धाविति निषेधसामर्थ्यादित्यर्थः॥ प्रदेशेषु·। घरूपकल्पेत्यादिषु घादेः प्रत्ययस्य तदन्तग्राहकतया यद्यपि
प्राप्ता सञ्ज्ञाविधाविति वचनेन तस्मिन्प्रदेशे निषेधस्तु कर्तुमशक्यः। सञ्ज्ञाविधावित्यत्र सञ्ज्ञायाविधाविति।
कर्मषष्ठ्या समासात् ननु सञ्ज्ञाविधाविति समासाभिप्रायेण प्रत्ययग्रहणे चापञ्चम्या इत्यस्य व्याख्यावसरे कै

यंटेन रदाभ्यामित्यत्र रेफदकाराभ्यामुत्तरो यो निष्ठान्तस्तस्य यस्तकारस्तस्य नत्वमिति व्याख्यानेप च्छङ्कि तन्न च सञ्ज्ञा
विधाविति निषेधावतार इति ततः कर्मषष्ठ्या समासे विरुध्यत इति चेन्न। तृतीयासमासे कैयटस्यापि यत्र सञ्ज्ञावि
धानन्तत्रायन्निषेध इत्यादिलेखनेन सम्मतिर्नास्तीति कल्पनात् नेदग्रे पुनस्तेनैव शङ्कितं सञ्ज्ञाविधाविति निषेधस्य
तर्हि किं प्रयोजनम् तर्हीति प्रदेशेषु तदन्तग्रहणार्थं यदि न हीत्यर्थः उच्यते यदि सञ्ज्ञाविधौ प्रत्ययग्रहणे तदन्तस्य स
ञ्ज्ञास्यात्प्रदेशे पुनस्तदन्तविधिस्स्यादिति प्रत्ययान्तानां ग्रहणे तत्तस्मात्सञ्ज्ञाविधावपि तदन्तविधेः प्रतिषेधो रदा
भ्यामित्यत्र च एतज्ज्ञोद्योते व्याख्यानम् घादिभिरुत्तरपदस्य विशेषणादिति भावः। तस्मादिति सञ्ज्ञाविधौ प्रत्ययग्र
हणादिति प्रत्ययग्रहणे चापञ्चम्या इति वचनाभ्यामिति भावः। एवं शङ्कासमाधानाभ्यां षष्ठीसमासस्यैव तदभिप्रेतत्वं
लभ्यते। न च तद्व्याख्यावसरे एतन्निषेधसामर्थ्यादिति नोक्तावित्ता किन्तु तदन्तविधिद्वयप्रसक्तिरेवोक्ता वित्तानेनास्य
विरोध इति वाच्यम् तत्र कैयटेन प्रोद्धात तथाभिधानात् उद्योतेपि स्वरूपव्याक्रियैव पराक्रिया इत्याशयेन निषेध
सामर्थ्येनोक्तमित्येव युक्तम् नहि तदन्तविधिद्वयप्रसक्तिभिया प्रत्ययग्रहणपरिभाषाया अप्रवृत्तिः किन्तु ह्येतत्प्र
हणाज्ज्ञापनबलेनैव तत्त्वज्ज्ञापनं प्रदेशे पुनस्तदन्तग्रहणेनैव निर्वहतीति बोध्यम्। न च लेखग्रहणाज्ज्ञापितेनोत्तर
पदाधिकारे प्रत्ययग्रहणेन तदन्तग्रहणमिति वचनेनैव घरूपेति सूत्रे तदन्तविध्यभावोपपत्त्या निषेधसामर्थ्यान्तत्र
तदन्तविध्यभावोपपादनमयुक्तमिति वाच्यम् उत्तरपदे इति वचनस्य रात्रेः कृतीति सूत्रस्थभाष्यप्रामाण्येनानित्यत्वात्

भै०
२६

तत्रहितदन्तस्य रात्रिमटो रात्र्यट इत्युदाहरणमुक्तम् रात्रिशब्दात्कृतोऽसम्भवात् नच रात्रिशब्दप्रकृतिकाचारा
क्विवन्तात्कृन्तस्सम्भव इति वाच्यम्। अभिव्यक्तपदार्था ये इति न्यायेन तत्रैतत्सूत्राप्रवृत्तेः पद्ध्युत्तरपदाधिकारे प्र
त्ययग्रहणाइति वचनस्य प्रत्ययपदं प्रत्ययसञ्ज्ञाशक्यतावच्छेदकानुपूर्व्यवच्छिन्नपरम् तथा च तादृशानुपूर्व्य
वच्छिन्नस्योपादानं यत्र तत्र प्रत्ययग्रहणेन तदन्तग्रहणमित्यर्थः। यथाणिति रात्रेः कृतीति सूत्रं तु कृत्त्वेनैवोपादान
मिति निषेधाप्रवृत्तिर्वह्वरूपेति सूत्रेपि घशब्देन तदुपादानम् तच्च न तच्छक्यतावच्छेदकमित्युत्तरपदेतिवचनाप्र
सक्तौ घशब्देन पुनस्तदन्तविधौ सञ्ज्ञाविधावितिवचनसार्थक्यानुपपत्तिरिति निषेधसामर्थ्यात्तत्राप्रवृत्तिरित्युपा
दानं सार्थकम् तत्र रात्रेः कृतीति सूत्रमेवमानमिति दिक्। पदप्रदेश इति। सुप्तिङ्मात्रपदसञ्ज्ञायामपीत्यादिना चात्र पू
र्वोक्तसामर्थ्यात्तदन्तविधिरिति समाधानं सम्भवति। सुप्तिङ्मात्रस्य पदसञ्ज्ञाविधानसामर्थ्यात्तदन्तविधिग्रहणसम्भ
वात् पदान्ते एष प्रवर्त्तमानदश्चेति सूत्रमेव तदन्तग्रहणाज्ञापकं भविष्यतीत्यपि बोध्यम्। प्रकृतिसाधारणमिति।
स्वादिष्विति न प्रकृतेरपि तदन्तसञ्ज्ञाविधानात्पदसञ्ज्ञाविधायके शास्त्रे यस्मात्प्रत्ययविधिरित्यनुवृत्त्याव्या
नेयस्मादिति परिभाषायाः स्मरणात्तदेकवाक्यतया कृत्तद्धितेति सूत्रेणापि प्रातिपदिकत्वमियानित्यादौ साधनी
यन्तच्च प्रकृतेरभावान्नोपपद्यत इत्याशंक्याह यानित्यादाविति। अशास्त्रीयस्यापीति। व्यपदेशिवद्भावस्य लौकि
कत्वात् नन्वसहायस्य व्यपदेशिवद्भावप्रवृत्तौ निजौ चत्वार एकाच इति भाष्यमिकारमात्रे एकाच्त्वोपपादना

राम
२६

सम्भवेनानुपपन्नमत आह निजौ चत्वार इति· ध्वनिनन्त्विदमिति· असहायेप्येव व्यपदेशिवद्भाव इत्येतत् असहा
य एवेति· एवञ्चार्थवत्त्वेन त्रिनापूर्वमिति भावः। दिगिति· अर्थस्यन्यागोपादानाभ्यां व्यपदेशिवद्भाव इति कैयटोक्तन्त्व
युक्तम् तथोपादाने मुख्यस्यैव व्यवहारस्य भाष्यरीत्या सम्भवादित्यादिरन्यत्र प्रपञ्चितम्· विशेषणताया एवौचि
त्यादिति· एवञ्चानन्तर्ये संयोगपदशक्यतावच्छेदकघटकमिति सूचितम्। अनन्तरा इत्यत्रा विद्यमानमन्तरं वर्ण
शून्यकालो येषामिति अविद्यमानमन्तरा येषामिति वा समासः। उभयथा समुदायस्यैव लाभः द्वयोश्चैवमध्यसम्भ
वात् कैयटोक्तिं खण्डयति यत्त्विति· अनिष्टापत्तेरिति· भवदुक्तरीत्या विप्रेति· समुदायस्य सञ्ज्ञायां शोभनविप्रश
ब्दावयवनकाराकारस्य गुरुसंज्ञापत्तौ तस्य लघुतापत्तिरूपानिष्टापत्तेरित्यर्थः नन्वेवं महासंज्ञाकरणं व्यर्थमत आह
महासञ्ज्ञाकरणान्त्विति· तेन समुदायसञ्ज्ञाकरणेन सौत्रमिति· द्वयोर्हि वचनस्यन्याय्यत्वात् सौत्रत्वकल्प
ने गौरवप्रसङ्गादाह यद्वेति· नन्वेवमपि भिन्नवचनोपादानेन सह विवक्षाप्रदर्शनमयुक्तमन्यत्रादर्शनादत
आह स्वरितादिति· तथैकशेषस्य· अनुदात्तस्यानुदात्तयोश्चानुदात्तानामित्येवम्प्रदर्शनेनैकशेषस्य। तत्रय·
याऽनुदात्तयोरित्यत्रानुदात्तानामित्यत्र चैकशेषं कृत्वा पुनरेकशेषस्तद्वत् अत्रैवं विग्रहप्रदर्शनेन विभक्त्यन्ता
नामेकशेष इति न भ्रमितव्यम् एवंप्रदर्शनस्यानेकार्थत्वप्रदर्शनमात्रतात्पर्यकत्वात्तच्च तन्त्रेणैकशेषस्तद्विय
य इति चेत्। एकशेषशब्दस्य तत्परत्वस्यैव कल्पनात् द्वयोरपीति· ॥ न चापि शब्दसंग्राह्याणां बहूनां संयोगसञ्ज्ञा

भे॰
२७

यां फलाभावात् न सेत्यपि शब्दोपादानमनर्थकमिति वाच्यम् बहुस्थलीयतादृशसमुदायसमुच्चायकत्वात् ननु
बहूनां संयोगसञ्ज्ञायाः फलं द्वयोः संज्ञायाव्यावृत्तिरेव भविष्यतीत्यत आह तत्र तत्रेति॰ तथा च शास्त्रबोध्यस्यता
त्फलस्यासम्भवेन बहूनां निष्फलत्वान्न भविष्यतीति भावः। कुत्वंन्याप्यमिति॰ पदान्तत्वात्। परन्तु सञ्ज्ञास्वरू
पभङ्गापत्त्यानक्तृतम्। उचिनेति॰ सन्देहस्यैव तत्रानुदयादिति भावः। तितउदेवेति॰ तितउना दीव्यतीति विग्रहः।
अत्र तकारावयवाकारोकारसमुदायस्य संयोगसञ्ज्ञायां तीतीकारस्य गुरुसञ्ज्ञा स्यात् न चैवं घटेत्यादावव्यापा
दनसम्भवात् विशिष्यात्रैजस्योपादानमनर्थकमिति वाच्यम् अशोकवनिकान्यायेन तस्योक्तेः। यदि तु विजातीय
व्यवहितभिन्नासजातीया वर्णा एव गृह्यन्ते तदा तितउभ्यामित्यत्र संयोगान्तलोपापत्तिर्बोध्या। अजूलोपि लोप
विधानात्। एवं हे नरअङ्गतिकुरुइत्यत्र प्लुतापत्तिः। द्रप्समिति॰ द्रप्सं दधिघनेतरत्। अत्र सकारमकारयोः संयो
गसञ्ज्ञायां संयोगादिलोपापत्तिः। यद्यपि भाष्ये पनसमित्येतद्यावत्पेमुक्तं तथापि पञ्चम्पन्तस्य रूलइत्यस्य स्को
रितिसूत्रे ऽनुवृत्तिं कृत्वापि सकारलोपाभावशङ्का स्यादित्यस्योपन्यासः वस्तुतस्तु तत्र नरूलइत्यस्य सम्बन्धः।
भ्रष्टित्यादौ सकारलोपानापत्तेः। ननु संयोगे गुरुसञ्ज्ञा यदि ह्रस्वस्य लघुव्यवहाराभावसाधिका तदा नित्यत्वा
त्तासि गुरुसञ्ज्ञायां गुणो न स्यादत आह भेत्तेत्यादाविति॰ यत्तु समप्रवृत्तया गुरुसञ्ज्ञया लघुसञ्ज्ञाया बाधेपि
पूर्वं प्राप्तायाअन्तरङ्गाया स्तस्य बाधे मानाभाव इति तन्न। परसंयोगनिमित्तिकाया गुरुसञ्ज्ञायायेन नाप्राप्तिन्या

राम
२७

येल्लघुसञ्ज्ञापवादत्वात्। नचाप्राप्तेन्यादावकारादौ संयोगे गुरु इति चरितार्थमिति वाच्यम् शास्त्रीयसञ्ज्ञामात्रस्या
न्यासाध्यतत्तत्फलजनकत्वस्य क्लृप्तत्वेनैतादृशे पुदीर्घश्चेति सूत्रेणैव सिद्धतया प्रकृतसूत्रस्य तद्विषयकत्वात्।
नचह्रस्वं लघ्विति सूत्रे सत्याकडारीयत्वाद्गुरुसञ्ज्ञया लघुसञ्ज्ञाबाधः प्रसज्यते तद्वेवन। ऊकालोऽज्झ्रस्वदीर्घप्लुत इति
सूत्रे ह्रस्वग्रहणमपनीय तत्स्थाने लघुग्रहणस्यैव करणेन लघुसञ्ज्ञाया अनाकडारीयत्वं तु यत्र यत्र ह्रस्वग्रहणं तत्र
सर्वत्र लघुग्रहणेनैव निर्वाहादिति वाच्यम्। संयोगे गुर्विति सूत्रेऽनुवृत्त्यर्थं ह्रस्वग्रहणस्यावश्यकत्वात् न च संयोगे ल
घुगुरुरित्येव सूत्रमस्त्विति वाच्यम्। तथा सत्यत्र सूत्रे लघोरुद्देश्यतया लघुगुरुसंज्ञयोः समावेशापत्तेः। न चेष्टाप
त्तिः अचिक्षमदित्यत्र दीर्घो लघोरिति सूत्रेण दीर्घापत्तेः। न च तस्मिन् सूत्रे लघुग्रहणस्यैवं सति वैयर्थ्यापत्तिरिति
वाच्यम्। स्वाभाविकस्य लघोः परिग्रहार्थत्वात् तथाकल्पने सूत्रस्य प्रवृत्तिरततक्षदित्यत्र प्रसादः प्रवृत्तिश्चाविभा
वदित्यत्र स्यात् अनिष्टफलस्यापि सूत्रे लघुग्रहणेन कल्पनसम्भव एवमततक्षदित्यादौ सन्वद्भावे सनि सन्पतद्भा।
तीत्वस्यापत्तिः। प्रथमाध्यायेत्यादि। अत्राद्यविशेषणेनाभ्याससंज्ञाम्रेडितसंज्ञयोर्द्वितीयेन प्रगृह्यसंज्ञाया व्यावृत्तिः
। न च टिसंज्ञायाः शकन्ध्वादिषु पररूपमिति वार्त्तिकसाध्यसन्धिकार्योपयोगित्वेनात्र प्रकरणे तदनुपादानान्न्यू
नतापत्तिरिति वाच्यम् तत्र शकन्ध्वादिसिद्ध्यनुगुणं पररूपमिति व्याख्यानेनेष्टसिद्ध्या टेरित्यनुपादानेऽपि क्षति
विरहात्। मूले यद्युक्तं टेरिति तत्फलितार्थकथनमित्याशयः। ननु कथं सञ्ज्ञानुक्रमे अङ्गस्य पूर्वत्रासिद्धमित्यस्य

चोपादानमत आह· अअङ्ग्याद्युपेति· प्रासङ्गिकइति· ननुप्राधान्येनेनिशेषः।इतिशब्देन्दुशेखरटीकायांचन्द्रक
लायांसञ्ज्ञाप्रकरणम्· इकोगुणवृद्धी।परिभाषयमिति· ननुविधिः।तन्नद्विधायकशास्त्राणांवैयर्थ्यापत्तेः।नापिनि
यमः।प्रकरणोत्कर्षेणाकरणेनलाघवतात्पर्यकत्वात नाप्यधिकारः।पृथक्पाठसामर्थ्यादित्याशयेनाह व्याख्यानादि
ति· सामर्थ्यादितिभावइति· एवञ्चैतत्सूत्रघटकोगुणवृद्धिशब्दोगुणवृद्धिशब्दबोध्याकारादिलाक्षणिकः।ननुपूर्वसू
त्रस्थयोर्गुणवृद्धिशब्दयोस्स्वरूपपरतया।नुवृत्त्यैवसिद्धइत्यनुपपन्नमतआह· अनुवर्त्तमानमिति· घ्मान्नाषडिन्य
त्रयथा· तथाचशब्दाधिकारेणसङ्ख्याशब्दोयथास्वस्वरूपबोधकसूत्रभिन्नसूत्रान्तरैकवाक्यतापन्नत्वादर्थ
परस्तथा।यमपिस्यात· अनुवर्त्तमानगुणवृद्धिशब्दोभयपक्षः।सञ्ज्ञिबोधकत्वंसाध्यम्· स्वस्वरूपबोधकसूत्र
भिन्नसूत्रैकवाक्यतापन्नत्वंहेतुरित्यूह्यम्· स्पष्टप्रतिपत्तयेवक्ष्यमाणदोषाच्च· पक्षान्तरमाह· यद्वेति· योयत्सूत्रोपा
त्तशब्दस्सतत्रो।न्यत्रार्थान्तरपरइति सामान्यतोननियमः।स्वादिष्वितिसूत्रे।नुवृत्तपदशब्देव्यभिचारादित्याश
येनाह· स्वादिष्विति· सिद्धान्तरत्नाकरोक्तिइ· खण्डयति· लक्षणेति· साक्षादुच्चारितस्येति· यथागातिस्थेतिसूत्रेपा
शब्देनपापानेइत्यस्यधातुषुपठितस्यतत्तच्छब्दानुवादेनेतिविभाषादिक्समासइत्यत्रदिङ्नामान्यन्तरालइतिसू
त्रकृतबहुव्रीहिसञ्ज्ञाविशि· स्ययथाशीघ्रोपस्थितिकत्वमेवोभयत्रहेतुर्बोध्यः।ध्वनितमिति· लक्षणप्रतिपदो
क्तपरिभाषयाविवक्षितार्थकथनाभावेनध्वनितमित्यर्थः।विधेयसमर्पकेति· विधेयतात्पर्यकतयोपात्तगुणवृ

द्धिपदश्रवणमित्यर्थः। न च वृद्धिर्यस्येत्यत्र वृद्धिपदस्य प्रथमान्ततया प्रथमायाश्च विधेयबोधतात्पर्यकतया तत्रा
पि परिभाषोपस्थितिः स्यादिति वाच्यम्। तत्सूत्रे तच्छब्दपुंस्कस्य वृद्धिपदस्यैव विधेयबोधकत्वात्। वृद्धिशब्दस्तु
यच्छब्दयुक्तोद्देश्यबोधकवाक्यार्थप्रधानार्थविशेषणबोधक एव। एवञ्चात्र सूत्रे विधीयत इति पदाध्याहारो
बोध्यः। एतेन विधीयत इति पदाध्याहारेण वाक्यार्थपर्यवसानकरणेन एतत्सूत्रे गुणवृद्धिपदश्रवणमेव तदध्या
हारे लिङ्गम्। एतन्मूलक एवेति। अध्याहारमूलक इत्यर्थः। उक्तदोष इति। एतेन तस्या उदीचामात इति सूत्रोक्तस्थानश
ब्दज्ञापितत्वं नेति सूचितम्। प्रथमाया इति। वृद्धिरेचीत्यादौ। अत एव विधेयसमर्पकत्वादेव। वाक्यार्थान्वयितेति।
स्वार्थसमर्पणद्वारा एतत्सूत्रप्रयोजनमाह। इदञ्चेति। ननु दक्षः कित्यादिज्ञापकेनाकारादेर्गुणो न भविष्यतीत्यत
आह। भिन्नमित्यादाविति। आदिना न्यधुवीन्यादिसङ्ग्रहः। केचित्तु विधौ परिभाषोपतिष्ठत इति परिभाषाज्ञापनार्थं
मुदीचामिति सूत्रे स्थानेग्रहणमावश्यकमेव। अत एव प्रतिदीव्न इत्यत्र व्यवहिताकारस्याचः परस्मिन्निति स्थानि
वत्त्वाद्लोपाभावः। किन्त्वेषा विधाविति परिभाषायां पुनर्गुणवृद्धिपदोपादानेनानित्येति ज्ञायते। तेनोदात्तस्व
रितयोरित्यनुवादे न दोष इत्याहुः। अत्रेदं चिन्त्यते। परिभाषासत्त्ववादिनः कोऽर्थोऽभिमतः साक्षादनूद्यमानविशे
षणा नियामिका परम्परया वा यद्विशेषणान्नियामिका साक्षात्परम्परासाधारणविशेषणनियामिकेति वा। ना
द्यः। इको यणचीत्यस्य व्यवहितेऽपि प्रवृत्त्यापत्तेस्तस्मिन्निति सूत्रे वैयर्थ्यापत्तेश्च। न द्वितीयः। स्थानेग्रहणस्य ज्ञापक

भे
२९

त्वासङ्गतेः। नत्वभीयः इको यणचीत्यादौ दोषतादवस्थ्यात्। प्रतिदीव्नेत्यत्र स्थानिवद्भावस्तु न पदान्तेति सूत्रे दीर्घग्रहणेन ज्ञापकेनाचः परस्मिन्नित्यत्र पूर्वत्वस्य व्यवहिताव्यवहितसाधारण्येन कल्पनेन सिद्धः। परिभाषाभावादेवोदात्तस्वरितयोरित्यत्रोदात्तस्थाने यणोऽन्यस्य षष्ठीस्थाने इति परिभाषया लाभः। न च विधाविति परिभाषाभावेऽचः परस्मिन्नित्यस्य व्यवहितेऽपि प्रवृत्त्यर्थम् दीर्घग्रहणस्य ज्ञापकत्वं कल्पनीयमिति गौरवमिति वाच्यम्। परिभाषासत्त्वे तत्र स्थानेग्रहणस्य ज्ञापकत्वं तदनित्यत्वे च प्रकृतसूत्रस्थगुणवृद्धिग्रहणस्य ज्ञापकत्वं कल्पनीयमिति भवन्मत एव गौरवात्। शेषग्रमिति· अत्रापि विधीयते इत्यस्याध्याहारः। तस्मिन्सति यत्र विधेयसमर्पकह्रस्वादिपदोपादानं तत्राच इत्यस्योपस्थितौ सम्भवति सामानाधिकरण्ये इति न्यायेन ह्रस्वो नपुंसक इत्यादौ सामानाधिकरण्येन ग्रामामष्टानामित्यादौ वैयधिकरण्येन सम्बन्ध इति लक्ष्यानुसारिव्याख्यानात्कल्पनीयमिति भावः। नैकत्रान्वय इति· यत्रैको धर्मोऽन्वयितावच्छेदकस्तत्रैव साहित्यव्यवहारस्य प्रसिद्धत्वादिति भावः। समूहयोरिति· साहित्यस्योद्देश्यतावच्छेदककत्वं विधेयतावच्छेदकत्वञ्च प्राथमिकबोधे ततो यथासङ्ख्यसूत्रसहायेन लक्ष्यसंस्कारसिद्ध्यर्थं द्वितीयोऽपि बोधः कल्प्यत इति भावः। लोक इति· अजाविधनौ देवदत्तयज्ञदत्ताविति केन ज्ञाप्यते कस्याजाधनं कस्यावय इति भाष्यात् तत्र गमकाभावेन प्रत्येकमन्वयः। इह तु यथासङ्ख्यसूत्रमेव गमकमिति भावः। अत एवाह· अत्रैवेति· द्वन्द्वान्त इति· यदि द्वन्द्वान्ते श्रूयमाणस्य प्रत्येकमन्वयस्तदैव साहित्यस्योपपत्तिः। एवं द्वन्द्वादौ श्रूयमाणस्यापि समन्वयो बोध्यः पुरस्तादिति।

राम
२९

वाध्यविशेषचिन्तयेतिभावः। चर्करीतादय इति· आदिना त्सुडादिसञ्ज्ञाग्रहः। अत एव· स्थानेयोगत्वमात्रोपवादत्वादेव· प्रकृतार्थलाभायाह· आद्यन्ताक्षिप्त इति· एतेनाक्षेपः प्रकृते युक्त एव। आद्यन्तावयववाचकपदस्यावयविनि नित्यसा काङ्क्ष्यत्वात्तच्छब्दाध्याहारो वाध्यः। इतावितिकिमिति· टकावित्येवार्थे आद्यजन्तमस्त्वित्यभिप्रायेण प्रश्नः। न चैके नककारेणाकुको ऽन्यावयवत्वे सिद्धे ककारद्वयोच्चारणमेवेत्सञ्ज्ञकत्वेन परावयवत्वबोधनं नान्येनेत्यत्र ज्ञापकम्भ विष्यतीति प्रकृतमिङ्ग्रहणं व्यर्थमिति वाच्यम्· ककारांश एव विशेषापेक्षज्ञापकत्वसम्भवात् मिदच इति सूत्रविष येवाध्यसामान्यचिन्तायां ज्ञापकमाह। ट्टणहेति· अत एव· समुदायावयवत्वस्वीकारादेव· एवञ्च पञ्चारत्नीनीत्यत्र नुमः समुदायभक्तत्वादिगन्तकालेति स्वरसिद्धिस्तदाह· समुदायेत्यादि· इत्यंशे प्रवृत्तिरिति· परत्वांशस्तु प्रवर्तत एव· नेनमुचादीनामित्यस्य स्थानषष्ठीत्वसम्भावनया ऽलोन्त्यपरिभाषाप्रवृत्तिः। परशब्देन चात्र न परावयवत्वबोधनं किन्तु य स्यमिद्विहितस्तस्ययोऽन्त्याच्ततः परत्वमात्रमन्यथा पञ्चारत्नीनीत्यत्र स्वरासिद्धिस्स्यात् अमुञ्चदित्यादौ मुमि कृते विशि ष्टस्याङ्गत्वन्तु तन्मध्यपतितन्यायेन। न चावयवावयवस्य समुदायावयवत्वेन यस्याईधातुकेति सूत्रविहितेड्नुस्य टित्व वृद्धिस्स्यात् एवञ्च कारितास हुडिरित्यादौ टित्वान्ङीबापत्तिरिति वाच्यम्। तुदष्ठित्वेनैव सिद्धेर्घुघुलोष्ठित्वे नागमे न तद्व्य वहारसम्पादकानुवन्धस्य न स्वीयागमस्य यदागमत्वन्तद्घटितसमुदाये तद्व्यवहारप्रयोजकत्वमिति स्वीकारात् न चा वयवानुवन्धस्य समुदायोपकारकत्वाभावे तुल्यन्यायेन धेटष्ठित्वान्तनन्धयीनिप्रयोगस्यासिद्धिरेवं सति स्यादिति वाच्यम्·

टित्वस्य धात्वावुपकाराभावेन समुदायोपकारसम्भवात् आगमविषय एव पूर्वोक्तिज्ञापककल्पनाच्च· इत्यञ्चयद्वय
वसम्बन्ध्यनुबन्धोऽवयवस्योपकारकोऽनिसमुदायानुबन्धोनभवतियत्रतुनावयवोपकारस्तत्रसमुदायोपकारकत्वं
कल्प्यतेइति दिक् स्थानपदार्थेत्यादि· सचसम्बन्धआदेश्यादेशभावरूपः। निपातनादिति· तृतीयासमासे निपातना
दित्वमितिभावः। स्थानरूपः सम्बन्धो नषष्ठ्यर्थः स्थानसंयोगस्सम्बन्धोयस्याइत्यर्थकस्थानयोगेत्युपादानेनसिद्धेस्तृती
याएत्वंनिपातनादितिभाष्येणतथावोधनाद्वैयधिकरण्यबहुव्रीहिकरणमितिज्ञापकमितिवोध्यम् नन्वेवमस्तेर्भूरिति
सूत्रघटकषष्ठ्यंशेऽस्तेरनन्तरेसमीपेवेत्यादिभाष्ये अनन्तरादिपदोपादानेनतेषांषष्ठ्यर्थत्वंकल्प्यतेतेनथाचस्थानात्मक
एवसम्बन्धः षष्ठ्यर्थोभविष्यतीत्यत आह अस्तेरनन्तरइति· एवञ्च यद्यनन्तरपदाध्याहारस्यात्तदाऽनन्तरपदार्थनिरू
पितोयोऽव्यवहितदेशवृत्तित्वरूपस्सम्बन्धस्सभूशब्देप्रतीयेत· परन्तुप्रकृतेषष्ठीस्थानेयोगेतिशास्त्रवलात्स्थानप
दार्थनिरूपितसम्बन्धार्थिकाषष्ठीवोध्या· परिभाषायाअनियमेनियमकारकत्वस्वभावत्वाद्यत्रषष्ठीमात्रोच्चारणे
नानेकसम्बन्धसम्भावनातत्रषष्ठ्याः स्थानपदार्थनिरूपितसम्बन्धार्थकत्वमनयाषष्ठ्यावोध्यतइतिनिष्कर्षः अ
न्यत्र· उदात्तादौ प्रसङ्गइति। ननुस्थानपदस्यप्रसङ्गार्थकत्वमन्यत्रनदृष्टमतआह· दर्भाणामिति॰ सतिसम्भवइति· ए
तेनइकोयणचीत्यादौतस्मादित्युत्तरस्येत्यादिनिर्देशादनर्थकस्यस्थानित्वेपिनक्षतिः। शब्दानान्नित्यत्वसमर्थनायक
ल्पनायामप्याह· इकोयणचीति· अर्थवोधनायप्रसङ्गइति· अनुमानिकस्थान्यादेशभावकल्पकंवाक्यंस्थान्यर्थवो

धनसमर्थमेवकल्प्यतइतिभावः।कार्यविपरिणामात्सिद्धमितिवार्तिकरीत्याह किन्त्वेकारेति· कार्यस्यसम्प्रत्ययस्यवि
परिणामइतिनदर्थः।एवञ्चविषयिबुद्ध्युन्मज्जननिमज्जनयोर्विषयेआरोपेणानयोस्स्थान्यादेशभावव्यवहारःसङ्ग
च्छतइति· अन्यथासर्वत्रसमुदायादेशत्वेऽजादेशाप्रसिद्धिरेवस्यादितिभावः।दाधाघ्वितिसूत्रइति· तत्रहिप्रनिदा
रयतीत्यत्रणत्वाभावार्थंकृतस्यसमानशब्दानाम्प्रतिषेधइतिवार्तिकस्यार्थोऽपरिभाषाखण्डनंकृत्वाप्रनिदारयती
त्यत्रणत्वाप्राप्तिमाशङ्क्यनचार्थवतोह्यागमस्तद्गुणीभूतस्तद्ग्रहणेनगृह्यतेइत्युक्त्वानित्येष्वागमविधानमनुपपन्न
मित्याशङ्क्यनित्येष्वादेशाशासनेयथाबुद्धिविपरिणामेनतथात्रापीत्याशयेनादेशास्तर्हिभविष्यन्तिअनागमकानां।
सागमकाआदेशाःकथंसर्वेसर्वपदादेशाइत्युक्तम्· स्थानिवत्सूत्रेतुकार्यविपरिणामादितिस्पष्टमेवाभिप्रेतम्।अ
तएव· प्राप्यसर्वेसर्वपदादेशाइत्युक्तम्· स्थानिवत्सूत्रे· अदेङ्गुणइतिसूत्रेतपरकरणात्· स्थानेऽन्तरतमइति· स्था
नेऽन्तरतमउरण्रपरइतिसंहितापाठेऽन्तरतमशब्दस्सप्तम्यन्तःप्रथमान्तोवेतिसन्देहः सप्तम्यन्तपाठेआदेशानु
रोधेनस्थानिसंकोचः।प्रथमान्तत्वेस्थान्यनुरोधेनादेशसङ्कोचः।तत्रसप्तम्यन्तत्वेदोनयुक्तः।दीर्घेषुयणोऽसि
द्धापत्तेस्तत्रस्थानिनोऽत्यन्तविलक्षणत्वात्· तृज्वत्क्रोष्टुरितीति· यदितुतृज्वत्क्रोष्टुरितित्रिसूत्रीप्रयोगनियमार्थे
तिनायमादेशइतिविभाव्यतेतदासर्वेसर्वपदादेशाइतिपक्षेएरुरित्यत्रऋतयोस्स्थान्यादेशबाधकपदयोस्तदन्तप
रतयाइवर्णान्तस्योवर्णान्तादेशइतिकल्पनायामपिभवत्वित्यत्रनिशब्दस्यनुशब्दएवननुतुशब्दइत्यत्रार्थेतआन्त

भै·
३१

रत्नम्यमेवनियामकम्· व्याख्यानादिति· तस्मिन्नणि च युष्माकास्माकाविति सूत्रस्य पौष्माकीणअस्मभ्यन्देहीत्यत्रप
रस्यादेशनिवृत्तिः पूर्वसूत्रस्योच्चरितअनुपलभनंइत्यत्रोत्तरसूत्रस्यपूर्वशसवयवसकारे प्रवृत्तिश्च फलंयद्यपि
स्वसमानानुपूर्वीकानुकार्यग्रहणंसम्भाव्यतेतथापितस्मिन्नणि चेत्यत्रनिर्दिष्टयोःप्रत्ययत्वात्ताभ्यांयस्माद्विहित
स्तदादेरित्यस्याक्षेपेणतस्माच्छसिनस्तस्माल्लुङचीत्यनयोःपरस्येत्युपादानेनवादोषाभावस्सूत्रद्वयानारम्भोपिस
धयितुंशक्यइत्याशयमूलकादृष्टलक्ष्यसंस्कारानुरोधाच्चेत्यर्थस्तदाह· व्याख्यानादित्यादि· सप्तम्यन्तानामिति· न
त्वस्त्रावयवानामचिहलीत्यादीनाम्· नन्वेवमितिशब्दोव्यर्थइत्यतआह· इतिशब्दइति· इतिशब्दाभावेसप्तम्यन्त
पदानामेवसप्तमीप्रकृतिवाच्यत्वंस्यात्तथाचतस्यलक्ष्येनिरन्तरोच्चरितत्वासम्भवइतिभावः। तस्यः सप्तम्यन्ताची
त्यादिपदस्य· तदर्थपरत्वम्· सप्तम्यन्तपदार्थपरत्वम्· नचनेड्वशिकृतिङसीत्यादिषष्ठ्यर्थेसप्तमीनिर्देशोयत्र
तत्रापितस्मिन्निति सूत्रप्रवृत्तिस्स्यादितिवाच्यम्· तदर्थपरत्वमित्यस्यसप्तम्यर्थविशिष्टप्रकृत्यर्थपरत्वमित्य
र्थः। नेड्वशीत्यादौतुनसप्तम्यर्थइतिभावः। पदस्यचार्थइति· सप्तम्यर्थविशिष्टप्रकृत्यर्थोलिङ्गमित्यर्थः। नचसप्तमी
निर्दिष्टेपूर्वस्येतिकृतोनसूत्रितमितिवाच्यम्· तथासप्तमीपदंयत्रोच्चरितंतत्रसप्तम्यासज्ञनेडइत्यादावेवप्रवृत्त्यापत्तेः
विद्धमिति· शब्दयोरूपश्लेषोनसंयोगः। द्रव्ययोरेवसंयोगात् नापिसात्यन्ताधिकरणक्षणाव्यवहितक्षणोत्पत्ति·
कत्वम् वर्णस्यनित्यत्वात् किन्तु स्वज्ञानाधिकरणक्षणाव्यवहितक्षणवृत्तिनत्समानाधिकरणज्ञानविषयत्वमे·

राम
३१

वश्चोपश्लेषोबुद्धिकृतएवपर्यवसन्नइतिभावः।नन्वायमुपश्लेषःपूर्वपरसाधारणोयद्यव्यवधानगर्भस्तदानस्यव्यव
हितसाधारणयत्नोपपद्यतइतिनिर्दिष्टपदंव्यर्थमितिशंक्यम्ःज्ञानस्यहिक्षणवृत्तितयासुध्युपास्यइत्यत्रोपशब्दावयु
वोकारविषयकज्ञानव्यवहितक्षणावृत्तिज्ञानविषयत्वंयथाधकारेकारेतथाईकाराधिकरणाव्यवहितधकारज्ञानो
त्पत्त्यधिकरणक्षणावृत्तिज्ञानविषयत्वंसुइत्युकारविषयकज्ञानेपीतिसुशब्दावयवोकारस्ययणभावार्थंनिर्दिष्टपदो
पादानात्।यदिचस्वविषयकज्ञानोत्पत्त्यधिकरणक्षणाव्यवहितक्षणोत्पन्नज्ञानविषयत्वमेवोपश्लेषस्तुचस्वाभा
विकार्द्धमात्राकालव्यवधानेनोच्चारणएवनतुतदधिककालेनोच्चारणइतिकल्प्यते·तदानिर्दिष्टपदंव्यर्थमेवतदे
तद्ध्वस्यति।यदित्वर्द्धस्यादिनियमार्थमिदमिति·एतेनैतयोःपरिभाषात्वंध्वनितम्·अल्लोपइतिसूत्रेभाष्येउक्त
मिति·तत्रहिकिमर्थमनश्शकारस्यग्रहणंक्रियतेइतिप्रश्नेनन्दितानन्दकइत्यत्रापिप्राप्नोतीतिदोषेकथितेङितीति
निवर्त्ततेएवमपिहिनस्तीत्यत्रनप्राप्नोति।नैषापरसप्तमीकातर्हिसत्सप्तमीङितिसति एवमपिनन्दमानइत्यत्रा
पिप्राप्नोति एवन्तर्हिनशब्दएवङित्त्वेनविशिष्यते ङिच्चेन्नशब्दोनभवतीत्युक्तम्।एतेनप्रघट्टकेनैवोपश्लेषिकाधा
रपत्रसप्तमीतत्रतस्मिन्नितिपरिभाषाप्रवृत्तिरितिलभ्यते।ननुव्यवहितेऽर्द्धमात्राधिककालेनवाव्यवधानेप्युपश्लेषः
स्तदाऽवग्रहेप्यानङ्भवतिभवदुक्तनियमेसनस्यादतआह·अवग्रहइति·तदनुरोधेन·अवग्रहानुरोधेन।एतेन·पूर्वो
क्तव्याख्यानेन।उत्तरांशविकल्पेति·परश्चेत्यस्यनियामकत्वेतुषष्ठ्यंशविकल्पेतिबोध्यम्·अतएवतदंशरहितस्याप्युप

स्थितिस्वीकारादेव। अतिदेशविषयेप्याह गाङिति· एतत्परिभाषाप्रवृत्तिरिति· तस्मादितिपरिभाषाप्रवृत्तिरित्यर्थः।न
नुपरिभाषात्वमनियमेनियमकारकत्वमितिशिष्टसमाचारस्सनोपपद्यते।परिभाषात्वमभिमतवाक्यैकवाक्यत।
याविधिसूत्रैर्लक्ष्यसाधनादितिशंकापरिहारार्थमाह· परिभाषाणान्नियमत्वञ्चेति· सूत्रमि· त्येकवचनन्तु जातौ। एवञ्च
र्थिकोनियमत्वव्यवहारइतिभावः षष्ठीस्थानेइत्यनुवृत्तौपयावाक्यार्थस्तथादर्शयतिस्थानइति· निर्दिष्टइत्यध्याहारल
व्यम् स्थानेन्त्यादिकिमिति· अनुवृत्तेः प्रश्नः।षष्ठ्यन्तमिति·ननुजसन्तम् लोपात्मकादेशविषये।रुर्मनस्वसुरित्यादौपरि
भाषाप्रवृत्त्यनापत्तेः।अन्त्यस्यपदस्येति· अधिकारलब्धस्येत्यादि।लिङ्गमिति·एवञ्चाल्समुदायबोधकपदोत्तरस्यत्रस्था
नेषष्ठीतत्रान्त्यस्यालइत्युपतिष्ठतइतिवाच्योऽर्थः।अत्रमानन्तुपरिभाषायानियमकारकत्वमेव।यत्राल्समुदायोत्तरं।
स्थानषष्ठीतत्रैतत्परिभाषाभावे।नियमप्रसक्तेः।आदेरलइति· अल्ग्रहणानुवृत्त्याऽयमर्थः फलतीति·तेन· अल्ग्रह
णानुवर्तनेन· अन्यथालोऽन्त्यसूत्रान्ङिच्चेत्यत्रान्त्यपदानुवृत्तेः कृत्स्नत्वादन्त्यस्यादेरित्यर्थोपत्त्यापाञ्जसमुदायस्यापत्तिः
।अल्ग्रहणानुवृत्तौतूपात्तशब्दस्यादेरलोऽन्त्यादित्वासम्भवेनतदनुवृत्तिः रित्यस्यविहितेति·इदम्बधातोरित्यस्यफल
भावेप्यनुवृत्तिशङ्कायाम् वस्तुतस्तस्याननुवृत्तिरेवयुक्ता। ननुविधेयत्वाख्यविषयतायाविशिष्टेस्वीकारेऽणुदित्सूत्रे
ऽप्रत्ययादेशटित्किन्मितइतिवक्तव्यमितिवार्तिकव्याख्यावसरे आदेशोदाहरणमिदमइश्निन्युक्तम्भाष्येन त्त्रोपपद्य
तेविधेयत्वाख्यविषयतापर्याप्तिर्यादृशसमुदायेतस्यनाणत्वम् यस्य चाणत्वंतस्यन तादृशविषयत्वाधिकरणत्व

मिति शङ्कायामाह· उद्देश्यत्वेति ननु श्विग्रहणाभावे ध्वसोरिति विहितलोपस्य सर्वादेशत्वार्थं यद्विशकारको निर्देशः इ
त्युक्तन्तद्विरोध इत्यत आह घ्वसोरितीति· नन्वनुबन्धानामनेकान्तत्वेनेशोनानेकालत्वमित्यत आह· अनुबन्धानामि
ति· नानुबन्धकृतमिति· अनुबन्धत्वयोग्यकृतमित्यर्थः एवञ्चात्र सूत्रे शित्पदस्येत्सञ्ज्ञायोग्यशकारवत्त्वमेवार्थः नन्वेन
त्तकार उच्चारणार्थ इति कथमस्येत्सञ्ज्ञेत्यत आह· अस्य चेति· उच्चारणार्थानामित्सञ्ज्ञां विना निवृत्त्यसम्भवादिति वा
च्यत इत्यर्थः मात्रालाघवाभिप्रायकशङ्कायामाह· नानेकालेत्यादि· निषेधापत्तेरिति· न चान्यस्यादेरित्युभयानुवृत्त्याभ
पाठ्यत्वेनैदोषाभाव इति वाच्यम् पारिशेष्यान्मध्यगस्यैवेत्यपि सम्भावनापत्तेः।एतेन ङिच्चेत्यत्र ङित्त्वानेकालिति· अत्राने
कालिति पदाभावात्कथमस्य लाभ इति नाशङ्कनीयम् ङिच्चेति सूत्रस्यानङाद्यादेशार्थमेवारम्भेण तेषामनेकालत्वात्
।अपास्तमिति· आदिरित्येतद्बाधकतयाऽनेकालित्यस्यावश्यकत्वात्। इत्थम्भूतलक्षणे तृतीयेति· अत्र सूत्रे रन्त्यादिः
।अधिकारत्वप्राप्तस्येदं स्वरितत्वलक्षणम् विनियोगः स्वीयसूत्रान्तरसूत्रैकवाक्यतया विवक्षितवाक्यार्थनिष्पादनम्
यत्र तु पूर्वत्र विनियोगस्तत्र पूर्वसूत्रैकवाक्यतया विवक्षितवाक्यार्थनिष्पादनम् यथा हलीत्यत्र हलीति पदस्य यथा।
असातिगमक इति· यथा प्राग्दीव्यत इत्यस्य सत्त्वेनाणस्तेन दीव्यतीत्यतः प्राग्विनियोगः। यत्र तु न तथा तत्र लक्ष्यानु
सारिशिष्टकर्तृकव्याख्यानमेव। मुख्यसूत्रप्रयोजनमाह· अधिकारगतिरिति· अस्मिन्पक्षेऽधिकारगतिरिति शब्दस्या
धिककार्यज्ञानमित्यर्थः। तेन गोणाधारस्याप्यधिकरणसञ्ज्ञा यथा सङ्ख्येन सम्बन्धः। गोस्त्रियोरिति सूत्रे स्त्रीग्र

हणेनस्त्र्यधिकारीमहावादिग्रहणमित्येषाव्यवस्थासिध्यति· एतेन· किंचेत्यादिनार्थोन्नरकरणेन· तत्कल्पनमिति·
अभावकल्पनमित्यर्थः। एवञ्चनित्येनानित्यस्यबाधेलाघवरूपायुक्तिःप्रमाणमितिफलितम् वहिरङ्गपरिभाषांनि
रूपयितुंतद्घटकपदार्थानाह अन्तरिति· मध्यत्वस्यनियतावध्याकाङ्क्षत्वात्तच्छान्यर्थमाह· वहिरङ्गेति· शेषपूरणे
नव्याचष्टे· अन्तर्भूतेति· अङ्गशब्दस्यलोकेशरीरावयववाचकत्वेपिप्रकृतेनिमित्तमित्याशयेनाह· निमित्तानीति· इ
यञ्चवाहऊठ्सूत्रेणाज्ञापितेति· तत्रत्योठ्ग्रहणेनज्ञापितेत्यर्थः तथाहितस्मिन्सूत्रेऊठ्ग्रहणाभावेपिसम्प्रसारणमा
त्रविधानेनलघूपधगुणेवृद्धिरेचीतिवृद्धौविश्वौहइत्यादिसिद्धौतद्वैयर्थ्येसिद्धमेव। सत्योहितस्यांवहिरङ्गसम्प्रसारण
स्यासिद्धत्वाल्लघूपधगुणेनस्यादिस्यूठ्ग्रहणंसफलम् ननूठ्ग्रहणाभावेरूपासिद्ध्यभावेपिविश्वौहइत्यादावूडिद
मितिसूत्रेणोडादिभ्यःपरायाःसर्वनामस्थानविभक्तेरुदात्तत्वंस्यादित्यर्थकेनविभक्त्युदात्तत्वन्नस्यात् तस्मिन्सूत्रे
ऊठ्स्थानेसम्प्रसारणग्रहणानुकर्त्तुमशक्यम्। यूनःयूनेत्यादावतिप्रसङ्गादितिचेन्न। ऊडिदमितिपठित्वास्थानस
म्बन्धार्थकषष्ठ्यावऊरितिसमासेनन्नः वुश्चऊठ्चेतिद्वन्द्वेनसुवचत्वात वकारपाठफलंतुप्रधानोः क्विपिपुरःपुरेत्या
दौतस्याःप्रवृत्तिः। नचैवमपिवप्रधानोःक्विपिउपडपेत्यत्रप्राप्नोतीतिवाच्यम् ऊठ्साहचर्येणणन्ताङ्गोद्देश्यकस्य
वोर्ग्रहणेनादोषात् ऊव्युपधाग्रहणमितिवार्तिकेपिवृव्युपधेतिपाठ्यम् नचैवमपिवेञः क्विपिसम्प्रसारणेउच्छ
ब्दात्प्राप्नोतीतिवाच्यम् ठुण्णन्तेन्यस्यपरिनिष्ठितिश्चप्रमाणोयइणतदन्तेत्यर्थात किञ्चैवंसत्यक्षद्युवेत्यादौस्वराप्रा

प्राऊरुपधाग्रहणमितिवार्त्तिकमनावश्यकम्। ऊहू उदाहरणानुजूरजूरेत्यादि अथवा ऊडिदमितिसूत्रानन्तरं ख
हइतिसूत्रंकर्त्तव्यम्। यदिचहलादिविभक्तेरपिप्राप्नोतीत्युच्यते नराशरानुरनुमइतिसूत्रानन्तरन्तया पाठेनसामञ्ज
स्यात् नचैवंसूत्रान्तरकरणेगौरवमितिवाच्यम् अधिकपदाकरणेनसाम्यात् नचास्याःपरिभाषायाज्ञापकानुपयो
गः। लोकन्यायेनैवसिद्धेरितिचेन्न· जातस्यवहिरङ्गस्यासिद्धत्वप्रतिपादनार्थमस्यावश्यकत्वात्। तदेतद्युत्यादयति
यद्यपीति· प्रत्यङ्गवर्त्तीति· अङ्गानांप्रत्यासन्नत्वात्प्रत्यासन्निरूपगुणसम्बन्धादङ्गशब्दःप्रत्यासन्नेलाक्षणिकस्तेनवी
सायाम्प्रतिशब्दस्यापीतिभावः। सर्वविषयतेति· अन्तरङ्गेकर्त्तव्येजातंतत्कालप्राप्तिकञ्चासिद्धमित्यर्थकल्पनेनेति
भावः। एवञ्चसापरिभाषापृथक्करनकार्यैति ध्वनितम्। ननुवहिरङ्गान्तरङ्गयोरितिपरिभाषानिरपवादा। असिद्ध
मितिपरिभाषानुनाजानन्तर्येवहिष्ट्वप्रक्लृप्तिरित्येतदपवादसहितेतिसर्वविषयत्वमस्याइत्यनुपपन्नमित्यतआ
ह· नाजानन्तर्येपरिभाषात्विति षत्वतुकोरसिद्धइतिसूत्रेतुग्ग्रहणमस्याज्ञापकम् तदुदाहरणमधीत्यप्रेत्येतिन
चासिद्धपरिभाषयैवसिध्यति। अन्तरङ्गेतुकिकर्त्तव्येपदद्वयसम्बन्धिवर्णद्वयोपेक्षस्यैकादेशस्यासिद्धत्वात् ना।
जानन्तर्येपरिभाषास्वीकारेतुकन्तरङ्गेनाजानन्तर्याश्रयणानासिद्धपरिभाषानिषेधेल्पवुत्पत्तियन्तम् संहित
यावस्थानाभावेनपूर्वमेवैकादेशेतुगर्थंतुग्ग्रहणञ्चरितार्थम् परिभाषास्वीकारादेवाक्षद्यूरितिसिध्यति। अन्यथा
ऽन्तरङ्गेयणिऊठोऽसिद्धत्वाद्यणनस्यात्। नास्त्येवेति· षत्वतुकोरितिसूत्रस्थतुग्ग्रहणमसिद्धपरिभाषायाअनित्य

त्वस्यवत्तापकमस्तु। एवञ्च सिद्धपरिभाषा आवृत्त्यैव सकलेष्टसिद्धौ सानारब्धेति भावः। वचनप्रामाण्यादिति· तच्चाप
वादत्वन्द्विविधम् यननाप्राप्तिन्यायेन। निरवकाशत्वेन वा। अधिकमन्यत्रस्पष्टम्· अकृतेति· कैयटादिसम्मतव्याख्यान
माह· नकृतेति· विशब्दद्योत्यमर्थमाह· विशिष्टइति· ऊहस्तकेइत्येतद्द्विष्ट एवं तेनिमित्तविनाशेपीति· ऊहस्यान्यत्रज्ञानरू
पत्वेपिप्रकृते निश्चीयमानत्वाद्दशकार्यस्थितिरेव ऊहपदेन विवक्षितेतिभावः। पाणिनीयाः। पाणिनिप्रोक्ताध्येतारो निमित्त
विनाशसमानकालिककार्यस्थितिविषयकनिश्चयाभाववन्तइतिफलितम् एतेन। निमित्तापायेनैमित्तिकस्याप्यपायइति
फलितम् लाघवादाह· अन्येत्विति· व्यूढोन्तरङ्गशास्त्रमिति· प्रकृतस्य व्यूहपदस्याचारक्विवन्तप्रकृतिकात्क्तप्रत्ययान्तत्वा
त्· यथालौकिकव्यूहसंसैन्यरचनाविशेषस्यपरबलनिवारकत्वं तथा। अन्तरङ्गशास्त्रमप्यस्मिन्व्याकरणे परिभाषाबला
द्बलवत्भाविनिमित्तविनाशइत्यध्याहारः। निमित्तत्त्वोपस्थितत्वादन्तरङ्गस्यगृह्यते तथा च स्वनिमित्तविनाशसम्भावना
समानकालिकीया अन्तरङ्गशास्त्रप्रवृत्तिस्तद्विषयकनिश्चयाभाववन्तः पाणिनीया इतिफलितम् अन्येत्वित्यनेनास्या।
र्थस्यलोकाप्रसिद्धत्वमेवारुचिस्सूचिता। शेषमन्यत्रद्रष्टव्यम्·॥ इति परिभाषाप्रकरणमिति· प्राधान्येन सूत्रात्मकपरि
भाषाणाम्प्रकरणं समाप्तमित्यर्थः। परिनिन्येत्यादितुप्रासङ्गिकत्वेनोक्तमितिदिक्॥ इतिश्रीचन्द्रकलायांपरिभाषाप्रकर
णंसमाप्तम्· इकोयणचि· नन्वत्रयणस्यादितिव्याख्यानेनयण कर्तृकं भवनम्प्रतीयते। तच्चोपपद्यते शब्दानान्नित्यत्वादाह· क
र्येशब्देति· संहितायामितिवैषयिकाधारसप्तमीवाच्या एवञ्च संहितायां विषयभूतायामितिपौनरुक्त्यादनुपपन्नमत

आह· कार्मेनिमित्तयोरिति· संहितायामिति सप्तम्यन्तपदप्रतीयमानस्वार्थ। स्पष्टत्वार्थं विवृतमिति भावः। इदं यथासं
ख्यसूत्रइति· यथासङ्ख्यमनुदेशः समानाम् किमुदाहरणं इकोयणचि दध्यत्र मध्वत्रेनैनदर्शितं। स्थानेऽन्तरतमेना
पेत्सिद्धमुदत्युक्तम्। ननु स्थानेऽन्तरतमइतिसूत्रे यथासङ्ख्येनापेतन्सिद्धमुक्तम् तच्चानुपपन्नम् यणशब्दबोध्या
सप्तइक्शब्दबोध्याः षट्षष्टिरितिवैषम्यादित्यतआह· जातिपक्षइति· ननु यदीकोयणचीतिसूत्रविषयेऽन्तरतम
परिभाषया निर्वाहस्तदास्वोजसेत्यत्रानुनासिकोकारस्यवकारोऽनुनासिकः प्राप्नोत्यतआह अनुनासिकेति· गुणाभि
दकत्वपक्षेतर्हि प्राप्नोतीत्यतआह गुणाभेदकत्वइति· लक्षणां कटाक्षयन्नाह· दीर्घीदीनामिति· अतएव· जातिप
क्षाश्रवणादेव· जातिपक्षमानमप्याह त्वादिभ्यइति· लक्ष्मलमवात्रामित्यत्रसलोपः सूत्रन्त्वभित्याद्युक्त्यन्त्र चरिता
र्थम् ननुपदीत्यंविधायकसूत्राभेस्तदाऽस्यणास्त्रस्यसाध्वनुशासनत्वभङ्ग इत्यतआहः व्याकरणस्येति· करणव्यु
त्पत्त्या व्याकरणमत्रसूत्रम् परिनिष्ठितेति· अथवृत्ननित्यविध्युतेभ्यनावच्छेदकानाक्रान्तेनसमुदायेनज्ञाप्यमृगा
दीनामुच्चारणप्रसङ्गेयणादि अर्थोपतीति· तथाचसौत्रप्रमाणमितिभावः सूत्रोक्तसन्तम्यन्तपक्षेपिसाध्वनुशासनत्व
मुपपादयतिकार्यशब्दवादइत्यादिना· एतेनेति· जातिपक्षाश्रयणेनैवेत्यर्थः। भवदुक्तपाठेसंपाठेसंगच्छतेतदेवने
त्यभिप्रायेणदोषान्तरमाह· स्थानेऽन्तरतमइति· प्रथमान्तपाठेस्थान्यनुरोधेनादेशसंकोचः। सप्तम्यन्तपाठेतुस्था।
निसंकोचः सचायुक्तइतिभावः। चोविध्यर्थइति· विधेरपि शाब्दत्वसूचकइत्यर्थः। एओङ्सूत्रइति· एओङ् सूत्रेयरि

त्वान्हिकमन्यपदार्थः तेनतस्मिन्नान्हिके हयवरट्सूत्रइत्यर्थः तत्रचयोगवाहानामविशेषेणपाठः कर्त्तव्यं इत्यस्यप्र
योजनकथनावसरे संयोगोपधासञ्ज्ञाऽलोन्त्यविधिर्द्विर्वचनस्थानिवद्भावप्रतिषेधाइत्येतद्वदकद्विर्वचनस्यप्रयो
जननिरूपणावसरे उरः कः उरः पः अनचि च अचउत्तरस्ययरोद्वे भवतइति द्विर्वचनं सिद्धम्भवतीत्युक्तम् द्वेवाखइती
ति· परोऽनुनासिकइत्तिसूत्राद्वाग्रहणमनुवर्त्ततइतिभावः।वत्रमानमाह· सूत्रकृतेति· निषेधविकल्पे विधिविकल्पः
फलतीतिभावः।अवसानइति· वाक्वाक्इतिभाष्योदाहृते।अन्यथाहलोत्यवदेतादिः प्रयोगएवेति· यथाषाष्ठद्वि
र्वचनं द्विः प्रयोगरूपंनवादेशरूपंतथाषष्ठमेकमपीत्यर्थः।ननुषाष्ठद्विर्वचनमादेशरूपमेवास्त्विति चेन्न· स्थानेद्वि
र्वचनेषष्ठीस्थानेयोगेतिपरिभाषयाकल्पिते आरिटदाशिशादिस्यादौवस्त्रसादाविव प्रकृतिप्रत्ययविभागसंमोहे
नणेरनिटीतिणिलोपानापत्तेः किञ्चजिघांसतीत्यत्रसनस्सकारेणविशिष्टस्यद्विर्वचनेकुत्वन्नस्यात् एतस्यापिद्वि
र्वचनस्यस्थानेद्विर्वचनत्वेस्थातिस्थातावत्सरइत्यादौसकारस्यतकारस्यचैकस्यसद्वयात्मकादेशद्वयोर्भेदस्यवस्त्र।
सादाविवात्राप्यबुद्धेः प्रत्येकं शरः परत्वबुद्ध्यसम्भवेनशरःखपइतिद्विर्वचनन्नस्यात् यदिचनचमात्रिकंव्यञ्ज
नमस्तीतिभाष्येकिर्नार्धमात्रिकएववर्णात्मकादेशः।किंतर्हिवर्णद्वयात्मकएवेतिनपूर्वोक्तदोषइतिमन्यतेतथा
पिदधिष्यतिमधुस्यतीत्यादौक्वचित्सर्वप्रातिपदिकेभ्यः क्वचिल्लालसायामित्यनेनसुगागमे अनचिचेतिद्विर्वचना
देशे आदेशप्रत्ययोरितिषत्वम् सकारोच्चारणांत्लवणस्यतिक्षीरस्यतीत्यत्रचरितार्थम· यदित्तुद्वित्वस्यासिद्धत्वा

न्नायंदोषइत्युच्यतेनदासाधकान्तरमाह परइत्यादेरिति· नचस्थानेद्विर्वचनपक्षस्यापिस्थानपदाध्याहारेणानन्नि
रूपितसम्बन्धार्थकत्वंषष्ठ्याःकल्पयित्वोपपत्तिः कार्या एवञ्चोभयत्राप्यध्याहार अविशिष्टइतिवाच्यम्।द्विः
प्रयोगपक्षस्योपपदविभक्तेरितिपरिभाषानुगृहीतन्यायेनपुनर्वृद्धिर्नैलिसिचिवृद्धिरितिसूत्रेभाष्यउक्तम्।स्थानि
वत्सूत्रारम्भस्यप्रयोजनमाह।स्थान्यादेशयोरिति· अत्रभेदादित्यस्यस्थानिकार्यमादेशेनस्यादित्यनेनान्वयः।
तत्स्थानापन्नइतिलोकन्यायेनसिद्धिःस्यादतआह स्वरूपमित्युक्तेरिति: प्रत्यासत्तीति· आदेशस्थानिवदितिवाक्य
जन्यशाब्दबोधेस्थानिनोविषयत्वात्तेनैवानल्विधावित्यत्राल्पदार्थविशेषणीभूतसम्बन्ध्याकाङ्क्षायानिवृत्ता
वनुपस्थितकल्पनायाम्मानाभावइतिभावः।यद्यपितथादेशोप्युपस्थितस्तथापिसनाल्विशेषणीकृत्यायक्रमण
इतिनिर्देशात् आदेशस्यस्थानिभूतइति· अत्राप्यादेशस्यैवस्थानिवाक्यार्थघटकइत्यत्रप्रत्यासत्तिरेवप्रयोजि
का।अनल्विधावित्यत्रचप्रसज्यप्रतिषेधएव।नपर्युदासस्तथासतिव्यूढोरस्केनेत्यादौस्थान्यल्भिन्नकवर्गा
द्याश्रयणेनणत्वापत्तेः।स्थान्यलाश्रयविधिभिन्नविधावित्यपिनार्थः।तथासतिवभूविवेत्यत्रेड्विधौवलादित्वं।
निमित्तावच्छेदकत्वेनाश्रितन्तच्चस्थानिसम्बन्धिवकारघटितमितिस्थानिवद्भावोनस्यात् प्रसज्यप्रतिषेधेयद्व
र्ध्यैवैकल्योपदेशाप्रवृत्तौस्थानिवद्भावः।प्रार्थ्यतेतस्यधर्मस्यस्थानिस्थान्यवयवान्यतरात्वृत्तित्वमाश्रयएवनि
षेधप्रवृत्तेः।प्रकृतेचवलादित्ववैकल्पप्रयुक्तानोपदेशाप्रवृत्तिः।किन्त्वार्द्धधातुकत्ववैकल्पप्रयुक्तातच्चनताद्वशा

मितिभावः यदितुयद्रूपवैकल्यप्रयुक्तोपदेशाप्रवृत्तिः प्रसज्यतेस्थानिस्थान्यवयवान्यतरालवृत्तिभिन्नतद्धर्मोश्रय
विधौस्थानिवद्भावोभवतीत्यर्थआश्रीयतेतर्हिपर्युदासेपिनदोषइत्यवधेयम् स्थानिभूतइत्यर्थेनिवेशेमानमाहअ
तएवेति· आद्यार्थनिवेशादेवेत्यर्थः।नन्वेवमारेत्यत्रऋधातोर्द्वित्वेऽभ्याससंज्ञायामुरदत्वेरपरेकृतेऽरित्यस्याभ्या
सत्वमलभ्यन्तस्यस्थान्यलवृत्तिधर्मत्वात् एवञ्चहलादिशेषाप्रवृत्तिरतआह ऋधातोरिति·पुनरिति· सञ्ज्ञायाः।
कार्यत्वात्कार्यस्यचभेदेननन्नत्प्रयोजकसञ्ज्ञाया अपिभेदः प्रधानानुरोधेनकल्प्यतेइतिभावः।अतएव· आद्यार्थनि
वेशादेवः यत्रत्वेएनिरत्नयइति· धिन्वन्तीत्यत्रेत्यर्थः।अपरविधाविन्यस्यस्थानिभूतादचः परस्यविधौवेत्यर्थः।तेन
नैधयइत्यस्यसिद्धिः।प्रकारान्तरेणासिद्धत्वमेवैकदेश्युक्तित्वसाधकम्· ननुतस्यान्यथासिद्धत्वेपिधिन्वन्तीत्यस्यसि
द्धिरेवदृशान्यासकार्याभविष्यतीत्यतआह· नस्यापीति· धिन्वन्तीत्यस्यापीत्यर्थः।इतिवार्तिकइति· अचः परस्मिन्निति
सूत्रघटकपूर्वशब्दार्थस्यावधिसाकाङ्क्षत्वात्तदाकाङ्क्षाशान्त्यर्थमिदंवार्तिकंवैयाकरणाइत्यादावापाद्यप्रवृत्त्य
र्थमितिचबोध्यम् स्थान्यवयवालनिवेशस्यप्रयोजनमाह· प्रदीव्येत्यादाविति· तत्रापिस्थानिविशेषणप्रयोजनमा
ह· स्थान्यलीति· एवञ्चतत्फलितमभ्यासत्याशेषपूरणेनचतदाह· यन्निमित्तेत्यादि· स्थान्यलसाधारणेति· अत्रस्था
न्यलसाधारणेत्यस्यस्थान्यलितरावृत्तित्वेसतिस्थान्यलवृत्तित्वमित्यर्थोऽसाधारणनिवेशात्प्रतीयते परन्त्वयन्नयुक्तः
धिन्वन्तीत्यत्रवकारस्यान्युकारवृत्त्याइधातुकत्वमात्रंविवक्षितम् तयाचाइधातुकत्वस्यस्यान्युकारवृत्तित्वेनस्थानि

वद्भावप्रसक्तिः। अत एव भोभगोअघोइति सूत्रभाष्योक्तेरेफवृत्तिरुत्वस्य विसर्गोऽनत्विदेशस्साधुसंगच्छते। नन्वेवम्
त्वशोटॄअचकात् अचकाद्दन्यादौ सार्वधातुकत्वतिपत्वसिब्वादिधर्मावच्छिन्ननिमित्तकाइन्यादयो न सिध्यन्ति तेषां
स्थान्यलवृत्तिधर्मावच्छिन्ननिमित्तकत्वादिति· प्रत्ययलक्षणसूत्रस्य विधायकत्वमेव स्यादिति भाष्योक्तनियमार्थत्व
पक्षासङ्गतिरिति चेन्न· यथाऽग्रहीदित्यस्य सिद्धये विशिष्टंद्धेषोऽनलमाश्रयते। इटन्नामेति भाष्य उक्तन्तेनैव न्यायेनैते।
षांसिद्धिसम्भवात् तथाहि स्थानिस्थान्यवयवालवृत्तिधर्मे आदेश विधावुपात्तत्वविशेषणन्देयम्। एवञ्चादेशविधौस्था
नितावच्छेदकत्वेनोपात्तोयस्स्थानिस्थान्यवयवान्यतरालमात्रवृत्तिधर्मस्तत्समानाधिकरणधर्मावच्छिन्ननिमित्त
कविधौस्थानिवत्वन्नग्रहोलिटिदीर्घ इति विधावुपात्तस्थानितावच्छेदकमिट्त्वन्तच्चनाल्मात्रवृत्तीति स्थानिवत्वसङ्ग
तिः। धिन्वनीत्यत्रादेशस्य यणोविधौस्थानितावच्छेदकमिकत्वंतच्च स्थान्यलमात्रवृत्तीनितत्समानाधिकरणार्द्धधा
तुकत्वावच्छिन्नोद्देश्यकइट्न। स्थानितावच्छेदकत्वेनोपात्तत्वोद्देश्यबोधकशब्दजन्योपस्थितिविषयतावच्छेदक
तापर्याप्त्यधिकरणत्वम्। एवञ्च हल्ङ्यादिलोपे न केवलं हल्त्वमेवोद्देश्यतावच्छेदकतापर्याप्त्यधिकरणं किन्तु
सुतिस्यभेदविशिष्टहलत्वन्तन्निष्ठा चोद्देश्यतावच्छेदकताख्याविषयतानाल्मात्रवृत्तिनितावच्छेदकधर्मनिष्ठावच्छे
दकतापर्याप्त्यवच्छेदकधर्मपर्याप्त्यावच्छेदकताकेविषयताकमिति तेषु निषेधाप्रवृत्त्यास्थानिवद्भावेन तत्तत्कार्य
सिद्धौ प्रत्ययलक्षणसूत्रस्य नियमार्थत्वसङ्गतिः। अत्र हल्ङ्यादिलोपकार्ये उद्देश्यतावच्छेदकतयोपात्तं सुतिस्यभे

भै० ३७

दविशिष्टहल्त्वन्तन्निष्ठावच्छेदकतापर्याप्त्यवच्छेदकविशिष्टहल्त्वन्तच्चात्र न तादृशान्त्यमात्रवृत्तिनावच्छेदकतापर्या
प्त्यवच्छेदकमिति। अग्रहीदित्यत्र च स्थानितावच्छेदकतापर्याप्त्यवच्छेदकमिट्त्वन्तच्च नान्त्यमात्रवृत्तितावच्छेदकता
पर्याप्त्यवच्छेदकमिति स्थानिवद्भावनिर्वाहः। नचैवमपि वृक्षः प्लक्ष इत्यत्र विसर्गविधावुद्देश्यतावच्छेदकतयोपात्तस्य
रत्वस्यान्त्यवृत्तितया तत्समानाधिकरणसुप्त्वावच्छिन्नोद्देश्यकम्परत्वन्न स्यादिति वाच्यम्। पदसञ्ज्ञायां यथोद्देश्यप
क्षस्यैवाश्रयणेन रुत्वात्पूर्वं जायमानपदत्वस्य समुदायनिष्ठस्य स्थानिवद्भावेन विशिष्टबुद्धिसम्भवात्। नच साम्नी
लोम्नी इमे इत्यत्र श्यादेशस्य स्थान्यौकारनिष्ठद्विवचनत्वस्य श्यादेशेऽतिदिशासम्भवेन भत्वाभावाद्विभाषा ङिश्योरिति
ल्लोपः प्रगृह्यसञ्ज्ञा च न स्यादिति वाच्यम्। ङानसञ्ज्ञाकरणेन औङ आप इति सूत्रजन्यबोधीयोद्देश्यतायामिट्त्वव
दीङ्त्वावच्छिन्नस्वीकारात्। ननु घेर्ङितीति गुणविधावुपात्तस्य स्थानितावच्छेदकघित्वन्नञ्च स्यान्त्यवृत्तीति स्थानि
वद्भावासम्भवेन कृन्मेजन्तसूत्रस्थभाष्यविरोध इति चेन्न। तदन्तस्य घिसञ्ज्ञेति पक्षाभिप्रायेण तदुपपत्तेः। एवमेव कु
म्भकारेभ्य इत्यत्राप्यादेशविधावुपात्तस्य स्थानितावच्छेदकस्यात्वस्यापीट्त्वतोल्यम्भविष्यति तदेतदुक्तम्विशिष्टं ये
षोऽनल्माश्रयते रूपमेव तच्च नाल्रूपमिति इड्ड इत्यादि न स्थान्यल्वृत्तिधर्माश्रयम्। एवञ्च यत्र शास्त्रे विशेष्यतया
विशेषणतया वा आदेशस्थानिभूतोऽल् तत्सम्बन्धी च योऽल् तन्मात्रवृत्तिधर्माश्रयणन्तादृशे विधौ हि निषेधोऽत्र
चशब्दतो विशिष्टमेवानल्माश्रयते बलादेरित्यत्र च शब्दतो विशिष्टमल्मिति भाव इति एतदाशय उक्तः। नच स्थानि

राम ३७

नावच्छेदके उपात्तत्वविशिषणदाने प्राचीनोक्तासाधारण्यनिवेशेऽनुपस्थितिकल्पनायां गौरवस्य स्फुटत्वात् तन्न चैवं व्या
ख्यानेऽपि मात्रपदस्य निवेशेऽसाधारण्यनिवेशकृत्तृमतादविशेष इति वाच्यम्। आधेयत्वस्य निष्ठाल्मात्रवृत्त्युपात्त
धर्मपर्याप्त्यवच्छेदकताकविषयता सामानाधिकरण्योभयसम्बन्धेन तादृशान्यतरविशिष्टायो धर्मस्तद्धर्मसमा
नाधिकरणधर्मावच्छिन्नोद्देश्यके विधौ स्थानिवत्त्वं न त्वित्यर्थः। एतादृशोभयसम्बन्धेन वैशिष्ट्यनिवेशस्तु चनाय
यन्निमित्तवैकल्यप्रयुक्तोपदेशाप्रवृत्तावतिदेशो भग्यते तस्य निमित्तस्य स्थान्यल्साधारणधर्मत्व एव निषेधप्रवृत्ते
रित्यत्रासाधारण्यं सुक्तम्। ननु तस्य विशेषणत्वाभिप्रायेण अणुदित्सूत्रस्थभाष्यप्रामाण्येनोद्देश्यत्वविधेयत्वाख्य
विषयतया बोधविषयताया अनुबन्धविनिर्मुक्ते स्वीकारेऽपि सानुबन्धकनिर्देशे स्थानिवदादेशत्वयोरनुबन्धविशिष्टे
सूत्रोपात्तैः स्वीकारात् अत एव ङेर्यादेशस्य सुप्त्वादित्युक्तिसङ्गतिः। अल्मात्रवृत्तित्वत्रयेन सम्बन्धेन स्थानितावच्छे
दकत्वेन सम्बन्धेन न विवक्षितम् एवञ्च घ्यादिसञ्ज्ञायायत्र सञ्ज्ञिनः स्थानिवत्त्वं बोध्यते तत्र तादात्म्येन सञ्ज्ञायाए
वावच्छेदकत्वं तेन सम्बन्धेन च तस्याः स्वस्वरूपेणापि सम्बन्धितया स्वस्वरूपस्य वानल्त्वेन स्थानिनिष्ठविषयताया
अल्मात्रवृत्तिधर्मपर्याप्तावच्छेदकताकत्वाभावस्स्फुट एव। एवमेवाच्छब्दे नोपादाने बहुवचने कृत्येदित्यादावपि
एतत्कल्पनायां कृन्मेजन्तसूत्रस्थभाष्ये चिकीर्षवे कुम्भकारेभ्य इति प्रयोगेष्वतिव्याप्तिप्रदर्शनपरम्भाष्यमेवमानमि
तिभाष्यतत्त्वविदामाशय इति दिक्। ननु स्थानिवद्भावस्वीकारे गमकइत्यत्राकदिशस्य स्थानिवद्भावेन हलादित्वमा

दायादेशोनस्यादतआह· प्रत्यासन्नेति· आयादेशप्रनिबन्धकस्तुनशास्त्रीयइतिभावः।प्राधान्यादिति· सर्वातिदेशानां।
कार्यार्थत्वादितिभावः शास्त्रातिदेशस्यकार्यातिदेशादभिन्नरूपत्वेसाधकनाह।भाष्येपीति· ननुकार्यातिदेशस्वीका
रेइदमेवकार्यसाधकमितिलभ्यते· एवंसतियादशस्यस्थानिवद्भावेनसुप्त्वात्सुपिचेतिदीर्घइतिग्रंथानामसङ्गति
रतआहतत्रानपेक्षितार्थेति· यथासुप्त्वाव्यवहारेस्वादिपान्तसमुदायघटकत्वन्निमित्तंतस्यपादेशेऽभावेपिअनेना
तिदेशेनसुप्त्वबुद्धौतादृशव्यवहारोभवतिपश्चात्स्वनिमित्तसद्भावबुद्ध्यासुपिचेतिशास्त्रंप्रवर्ततेतथासर्वत्रज्ञेय
मिति· परिवीरित्यादाविति· अत्रवेञः क्विपिसम्प्रसारणोकृतेस्थानिवद्भावेनैवतुर्दीर्घत्वयोः प्राप्तौस्थानिवत्सूत्रसै
वोभयविधायकत्वेतुकः परत्वाद्धलइतिदीर्घइतिव्यवस्थानस्यादितिभावः।पक्षान्तरमाह यद्वेति· किञ्चिन्निमित्त
वैकल्येपीति· यन्निमित्तवैकल्यप्रयुक्तोपदेशाप्रवृत्तिस्तन्निमित्तवैकल्येपीत्यर्थः।आदेशः स्थानिवत्कार्यंप्रवर्त्तेप
तीतिसूत्रार्थात् ततः किंकार्यमित्याकाङ्क्षायांततोविधिशास्त्रपर्यालोचनम् ततस्तत्कार्यनिर्णयइति यद्देश
स्येतिकार्यस्वरूपनिश्चयस्तद्देशोपपरत्वस्यविप्रतिषेधशास्त्रप्रवृत्तिनियामकत्वमितिभावः।एतदेव· पूर्वोक्त
ममेव।उत्पतिदेशः।उत्पत्तिमन्निश्चयविषयकार्यबोधकशब्दघटितसूत्राधिकरणादेशः।क्वचित्तूपदेशदेशइति
पाठः।नतुसुगमएव।अत्र· अनयोर्मध्ये।अतएव· आद्यपक्षस्यैतत्सूत्रभाष्यसम्मतत्वादेव।स्थान्यल्विधिप्रतिषे
धइति· तत्रहिस्थान्यलविधिरूपेकार्येप्रतिषेधआहोस्विदल्मात्राश्रयकार्यइतिसन्दिग्ध्येवमुक्तम्।अत्रलघूप

धत्वादित्यादिनाऽदुपधत्वपरिग्रहः लघूपधगुणादिरित्यत्रादिनावृद्धेः परिग्रहः अत्र लघूपधगुणादित्येवोक्तं नन्व
नेनातिदेशेनेति तेनाद्युपदस्य स्वभाष्यसंमतत्वं लभ्यते। पूर्वत्र किंचिन्नि। मित्तवैकल्येपीत्युक्तं तत्र यन्निमित्तवैक
ल्यप्रयुक्तोपदेशाप्रवृत्तिस्तद्भिन्नस्यापि कस्यचिद्ग्रहणशङ्कावारणार्थमाह एवन्निमित्तेति एवम्पूर्वोक्तिवत्
सर्वनिमित्तकत्वमिति तेन सर्वस्मिन्नित्यत्र यञादित्वाभावाद्दीर्घो न अन्यथा किंचित्पदे नयजादित्वयजादि
त्वस्यापि ग्रहणे स्यादिति भावः अत एव तादृशसर्वनिमित्तकत्वादेव इष्टवद्भावेनेति अनेनेष्टत्वमेवातिदिश्य
ते भत्वं तु यचिभमित्यनेन वर्णाश्रयत्वमिति तेन सुवन्नात्मिजितिपक्षेऽन्तर्वर्तिसुपायत्पदत्वं तस्य णिलोपे जाते
पि प्रत्ययलक्षणेन प्राप्तं यद्भत्वं तेनेन बाधो नेति मनोरमोक्तं संगच्छते प्रकृतसूत्रविषयेप्याह सर्वातिदेश इतितेन
राम स्य त्यादौ न दीर्घः शास्त्रीयमेवेति शास्त्रबोधमेवेत्यर्थः तेन बयादेशोस्थानिवद्भावेनतासौ नित्या नित्यानिद्ग
त्वं न तस्य स्थानिनि शास्त्रबोध्यत्वाभावात् श्रौतस्थान्यादेशभावस्यैव तस्य पुरस्स्फूर्तिकत्वात् सर्वे सर्वपदादे।
शा इत्यत्र पदशब्दोऽर्थवत्परः अत एकदेशविकृतन्यायस्य लौकिकत्वादेव अत एव अशास्त्रीयस्यापि वकार
स्य ग्रहणादेव आयसावित्यत्रासन्ननिष्ठसुनिरूपितागत्वमेकदेशविकृतन्यायेन सान्तत्वं आगतमिति नुम आ
प्तिरत्र वृद्धेः शास्त्रीयत्वेप्यकारनिवृत्तिर्न शास्त्रीयेति भावः। एतदेव समर्थयितुं साधकान्तरमाह अंतादिवदि
ति ननु शब्दैकदेशस्य विकारस्वीकारे शब्दनित्यत्वसिद्धान्तविरोध इत्यत आह शब्दानां नित्यत्वमिति रेखागव

यवत्सर्वो विकारादिकल्पनावास्तविकत्वं तु नित्यत्वमेवेति भावः अन्यत्वाभाव इति आरोपितान्यत्वमित्यर्थः तेन
शक्तताव च्छेदकानुपूर्व्यग्रहात्तनोवोधानापत्तिरिति दूषणस्यनावकाशः जातिव्यञ्जकेति यत्र जातिव्यञ्जकाव
यवसंस्थानमस्ति तत्रैव लोके ऽयं श्वेत्यभेदप्रत्ययः अभेदप्रत्यय एव व्यक्त्यैक्यसाधकस्स किञ्चिद्धिकारएव यत्र
त्वङ्गत्तदधिकवा विकृतत्वं तत्र शुनोयमवयवो न तु श्वेति व्यवहारः शुनोयमिति प्रत्ययेन तु भेदस्यैव सिद्धिरिति
भावः प्राचीनानुरोधेनाह किञ्चेति परिच्छिन्नपरिमाणेति परिच्छिन्नानुपूर्वीकसमुदायनिष्ठतयेत्यर्थः प्रकृ
ते च परिच्छिन्नपरिमाणार्थवाचकतिङ् शब्दः भाष्य इति तत्र हि यथा द्रोणादिशब्दानां न्यूनाधिकयोर्न प्रवृत्ति
स्तथा सर्वेत्यानुपूर्वी विशेषोपादानेन कृतसंकेतस्य सर्वनामशब्दस्यापि सर्वेकादावप्रवृत्तिमाशङ्क्य तदेक
देशभूतं तद्ग्रहणेन गृह्यत इति समाहितम् न तु शुनो ऽधिकस्फोटादिविकार इति भावः स्थानिवद्भावविषय ए
विशेषावकृशङ्क्य नेनन चेति शंकायां स्थानिवद्भावेनेत्युपादानमन्तादिवच्चेति सूत्रस्य स्थानिवद्भावेन गतार्थमिति
मतेन प्रातिपदिकत्वापत्तिरिति तथा च नलोपापत्तिः न चैतादृशे विषये यदि नलोपस्तर्हि तस्माच्छसि पुंसीत्ये
वास्तु अक इत्यनुवर्त्तते अचीति निवृत्तम् अकः शसि पूर्वसवर्णदीर्घो भवतीति सूत्रार्थः विधानसामर्थ्येन च
त्वादेः परसेत्यस्य बाध इति निर्विसर्गरूपे सिद्धे नकारादेशविधानं तच्छ्रवणार्थमिति नलोपो न भविष्यतीति वा
च्यम् तण्डुलानित्यादावित्यादिपदेन सर्वस्मिन्नित्यत्र तस्यापत्तिरित्याशयात् न ह्यापि नकारोच्चारणसामर्थ्येव

कुं शकम· सर्वस्मिन्नशाय इत्यत्र तु पवासेन्त्वलुकि संज्ञाविधौ न लोपस्यासिद्धतया गुरुसंज्ञायां तु न सिद्धेः फलित्वात्
अत एव अतिदेशस्वभावसिद्धत्वादेशवत्त्वनवलादेव ननु असिद्धवद्भावेपि यदि स्वाश्रयं धर्मं प्रयुक्तं कार्यन्तदा सिद्ध
वत्सूत्रमपि व्यर्थमत आह असिद्धवत्सूत्रन्त्विति पर्युदासत्व इति अयम्भावः अप्रत्यय इत्यस्य पर्युदासत्वे प्रत्ययान्तभि
त्वं प्रातिपदिकसंज्ञाप्रयोजकं तदभावप्रयुक्तः प्रातिपदिकसंज्ञाभावस्तु न शास्त्रबोध्य इत्येतत्प्रयोजकप्रत्ययान्तत्वबुद्धि
सम्पादकस्थानिवद्भावो न स्यादिति उत्तराभिप्रायस्तु यदि प्रत्ययान्तत्वप्रयुक्तप्रातिपदिकत्वाभावशास्त्रतात्पर्य्य
विषयो न स्यात्तदार्थवत्सूत्रेण प्रत्ययान्ते न विधिर्नापि निषेध इति अप्रत्यय इति विशेषणं व्यर्थमेव स्यादिति तत्साम
र्थ्याच्छास्त्रतात्पर्य्यकल्पनया सिद्धोप्ययं शास्त्रीयवद्भवतीति तत्सम्पादकस्थानिवद्भावो भवत्येव अस्मिन्नर्थे सा
धकान्तरमाह वेस्स्कन्देरिति पर्य्युदासत्वे निष्ठाभिन्ने कृत्त्वेन निष्ठासदृशे प्रत्यये एव षत्वन्न तु तिङन्ते इति लभ्यते
प्रसज्यप्रतिषेधे समर्थसमासो वाक्यभेदश्च स्यादतो लाघवात्पर्य्युदासः अत एव न्याय्यः तिङन्ते षत्वाभावस्येष्टत्वे स
म्मतिमाह वन्यादीति विस्कन्न इति अत्र हि सर्वे सर्वपदादेशा इति न्यायेन त शब्दस्य न शब्दादेशस्तस्याशास्त्रीयेपि ष
त्वाभावे स्थानिवद्भावो भवतीति न चैवं चो यवायाव इति सूत्रे चीत्यनुवर्त्तमानाद्धल्पयाद्यभावशास्त्रतात्पर्य्ये विष
य इति नायक इत्यादिरूपप्रतिबन्धकस्थानिवद्भावः स्यादिति वाच्यम् पर्य्युदासलभ्येति ज्ञाप्यशरीरे निवेशेनैव दो
षवारणात् अत्र वन्यादिसम्मतत्वेनोपादानम्भाष्यानुग्रहरूपारुचिः सूचनाय अत एवाह तस्य प्रसज्यप्रतिषे

धइतितस्यनिष्ठायामित्यस्यवस्तुनस्तूक्तार्थोलाघवात्कल्प्यतेतत्रनज्ञापकापेक्षेत्याशयेनाहकेचित्तुभाष्यइति॰अस्य
उक्तमित्यनेनान्वयः तेनसिद्धिरितिलोकन्यायेनसिद्धिरित्यर्थः नन्वशास्त्रीयस्याप्यतिदेशेतासौनित्यानिट्त्वस्याप
निष्ठस्यघस्लादेशेऽतिदेशादुपदेशेऽत्वतइत्यस्यप्राप्त्याजघसिथेत्यत्रऋतोभारद्वाजस्येतिविकल्पायतिरिष्यतेतत्र
क्र्यादिनियमान्नित्यमिडिस्यतआह॰ अतिप्रसंगस्त्विति नधातुलोपइत्यादेर्धातुकइतिसूत्रप्रत्याख्यानपरभाष्यध्व
नितश्चायंविकल्पः तथाहिलोलुवः योपुवइत्यादौयङवयवयकारावकारयोः पृथग्लोपेऽप्यन्यनिमित्तकगुणस्या
चःपरस्मिन्नितिसूत्रेणाल्लोपस्यस्थानिवद्भावादादौप्रतिषेधेपियङवयवाकारमाश्रित्यैवोवङ्पुनरन्निमित्तकल
घूपधगुणस्याचःपरस्मिन्नित्यल्लोपस्यस्थानिवद्भावान्निवृत्तिर्नस्यादुवङवयवोकारस्यानादिष्टादचःपूर्वत्वाभा
वात् अशास्त्रीयस्याप्यतिदेशेतुस्यात्सुकारनिष्ठस्यानादिष्टादचःपूर्वत्वस्यस्थानिवत्सूत्रेणातिदेशादचःपरस्मि
न्नितिस्थानिवद्भावस्सिध्यतीति अनादिष्टादचः पूर्वत्वस्याशास्त्रीयस्यातिदेशादेवनिराद्यादित्यत्रातउपधायाइति
णोवृद्धौसर्वेसर्वपदादेशाइतिन्यायेनकृतदोजग्धिरितिजग्ध्यादेशस्यवधादेशस्यचनापत्तिः अनादिष्टादचः पू
र्वत्वस्यस्थानिनिनिष्ठुस्यकृतेवृद्धिकेतिदेशादितिबोध्यम् यदुक्तंकेचिल्लोकन्यायानाश्रयणेनेतितत्रसाधकमाह
ब्राह्मणाकराइरितिउवङियणिवेतिः यदाकंड्वादयोधातवः प्रकृतित्वेनाश्रियन्तेतदोवङः प्राप्तिःयदातुप्रातिपदि
काद्यक्प्रत्ययस्तदायणादेशस्यप्राप्तिः। पूर्वोक्तंपर्युदासबोध्यमर्थंद्रढयति एवंचेतितत्राप्यतिदेशप्रवर्त्तनादेवाअ

त्रार्थैकेयपरोक्तेविरोधमाशङ्क्यपरिहरतीत्यन्तिव्त्यादिना अनल्विधाविति विधिग्रहणादिति। अन्यथाऽनल्वीत्युच्यमा
नेन्यविभक्त्यर्थस्यक्रोडीकारेणस्यात् विधिग्रहणेत्वलाश्रयविधिसामान्यग्रहणसिद्धिः तेनप्राधान्येनाप्राधान्येनवा
पत्र्यालाश्रयणतत्रसर्वत्रनिषेधसिद्धिः यत्रविधौ शब्दतइतिएतन्निकर्षउक्तः अत्रसूत्रेविशेषेतितथाचसा
मान्यातिदेशेविशेषानतिदेशइत्येषापरिभाषानप्रवर्ततेइतिभावः प्रपञ्चेत्यत्रविशेषणतयालाश्रयणेस्थानि
वद्भावनिषेधोपिविधिग्रहणस्यप्रयोजनमितिव्याख्यानसामर्थ्यात्। नल्यपीतिसूत्रमप्यत्रज्ञापकमित्याह हल्य
दिकिन्निमित्तकइतिसामान्योपस्थापकसामग्रिकालेनियमेनविशेषोपस्थापकसामग्र्यभावमूलिकायास्सामा
न्यातिदेशइतिपरिभाषायास्त्यागेपिनल्यपीतिसूत्रस्यनचारितार्थ्यम्। प्रदायप्रधायेत्यादौस्थानिवद्भावेनकि
त्त्वस्यविशेषणतयाऽलाश्रयणान्निषेधस्यादतआह अनुबन्धकार्येष्विति। इतिशेषइति। एतेननानुबन्धकृत
मनेकाल्त्वमितिपरिभाषान्तरन्नारब्धव्यमितिसूचयतिध्वनितंचेदमिति अनुबन्धानामल्त्वव्यवहाराभावस्वरू
पंवस्त्वित्यर्थः एवम्भगवतोङिच्चपिन्नपिच्चङिन्नेतियाकल्पनासाप्यनुबन्धानामल्त्वव्यवहाराभावसूचिकेतिबो
ध्यम् अचएवेति अचःपरस्मिन्निति सूत्रेऽनुवृत्तादिदिपदार्थेऽच्पदार्थस्यस्वमात्रनिवर्त्तकस्वरूपसम्बन्धःषष्ठ
र्थः अतएवचङिति। उक्तार्थस्वीकारादेव। चङ्परनिर्ह्रासइत्यस्यकर्त्तव्यइतिशेषः निषेधइतिक्लिन्नुपधात्वे।
ति। निषेधस्सार्थकइत्यर्थः यलोपोनस्यादिति। स्वाश्रयनिवर्त्तेरप्येतत्सूत्रासाध्यत्वात् ननुयुवजानिरित्यत्रयलो

पविधिम्प्रतिनस्थानिवदित्यनेनापिगतार्थमत आह वैयाघ्रपद्यइति· यद्यत्रस्थानिवद्भावस्स्यात्तदापद्भावोनस्या
त् आदीध्यइति अत्रस्थानिवद्भावेपिपवर्णयोरितिलोपस्यापत्तिःस्या त्र्य यद्यच्चत्वनिवृत्तेरितिगौरीणामुख्यावासङ्ख्या
पूर्वोसङ्ख्यावाधतइतिन्यायात्· निगाल्यतेइति· अत्राचिविभाषेतिलत्वम्·पटयतीतिटिलोपस्यस्थानिद्भावा
दुपधावृद्धिर्नभवतिलघुपधत्वेति अदुपधत्वइत्यर्थः व्याख्यानाच्चेतियरसिन्नित्यस्य श्रवणाद्यदिपरस्यावधित्वं
तदालवनइत्यत्रगुणनिमित्तल्युणिनिमित्तकस्यस्थानिवद्भावेवादेशोनस्यादित्यंचकिरतोलवनइतिनिर्देशासं
गतिरितिभावमूलकादित्यर्थः तस्यैव· अचएव पूर्वसम्बन्धिन्येव शास्त्रविधेयइति अत्रमानमजादेरित्यादि
निर्देशः अन्यथाघेङितीतिगुणस्यस्थानिवद्भावेसतिङ· सिङ· सोरितिपूर्वरूपानापत्तिः सूत्रन्तुगोशब्दान्ङ·सिङ·
सोश्चरितार्थम् अधिकार्थसङ्ग्रहार्थमाह· वस्तुतोऽत्रेतितंत्रमिति· विवक्षितोयावानर्थस्सपर्य्यायशब्दांतरे
णबोध्यते बोद्धुश्श्रोतुश्चशब्दतंत्रेणवानेकार्थप्रतीतिरितिभावः भावइत्यन्तार्थमाह· तन्निधिनाविति ॥
तंत्रनिर्देशेमानमाह· अतएवेतिद्विनीयार्थाङ्गीकारादेवेत्यर्थः भाष्यसम्मतिरप्यत्रार्थइत्याहः प्रकृतसूत्रेपीनिन
भावसाधनंविधिशब्दपक्षेयद्ययमेवार्थस्तदानिगाल्यते· एवमादिपूर्वोक्तार्थप्रयोजनासंगतिरतआहसोपीत्य
र्थइतिसाधारणमिति· तच्चकार्य्यशब्दवादेस्वोत्पत्त्यधिकरणक्षणवृत्तिध्वंसप्रतियोगिसमयवृत्तित्वरूपम् नि
त्यत्वपक्षेतुतज्ज्ञानघटितम्बोध्यम्प्रकृतइति· सुध्युपास्यइतिप्रयोगेनन्वत्रद्विर्वचनादिग्रहणंव्यर्थंनेषांत्रे

पादिकत्वेनासिद्धत्वात्तेषु कर्तव्येषु स्थानिवद्भावस्याप्रसक्तेरत आह अत्र द्विर्वचनेनीत्यत्रान्येतिन स्त्राणां शास्त्रविषयं
किन्तु फलमन्यत्र· एतत्सूत्रविषये नु पूर्वत्रासिद्धेन स्थानिवदित्यवष्टभ्य द्विर्वचनादिग्रहणस्याकरणमेव भाष्यकृ
त्सम्मतमेवञ्च द्विर्वचनग्रहणस्य ज्ञापकत्वं वर्णानावसरे त्वाण्यंवचनवति घटितानिर्देशानां त्रिपाद्यामपि प्रव
त्तिरित्येव एवञ्च स्थानिवदादेश इत्यस्यान्तादिवच्चेत्यस्य व्यपदेशिवदेकस्मिन्नित्यस्य त्रिपाद्यामपि प्रवृत्तिः प्रथ
मप्रयोजनमाह हेरामइत्यादाविति द्वितीयस्य प्रयोजनम मीक्षीरपेणाअत्रैकादेशे अदसशब्दसंबंधित्वम्· तथैक
देश एकाजुत्तरपदत्वमन्तादिवच्चेत्यनेन· तृतीयस्य प्रयोजनम चैषीदित्यत्र संदेवान्यसदित्यत्र च सिचः सिप
श्च सकारस्य प्रत्ययावयवत्वात्यत्वं व्यपदेशिवद्भावेन वस्तुतस्तु वति घटितानामतिदेशानां त्रिपाद्यामन्येषा
न्तु प्रवृत्तिरेव अचः परस्मिन्नित्यस्य तु सर्वथाप्रवृत्तिरेव न किन्तु क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिरेव च्चतस्य दोषइ
त्यपि नापूर्वमिति विशेषसूचकं द्विर्वचनादिग्रहणम्· तेनैषइति भावसाधनत्वेन पदचरमावयवक र्मकेवि
धानेन स्थानिवदिति वाक्यार्थ निष्पन्नो एषोपन्नित्यत्र विधेयस्य लोपस्याभावरूपस्य पदानवयवतयातस्मि
न्कर्तव्ये निषेधाप्रवृत्त्यास्थानिवद्भावे रपरत्वाभावेन लोपोन अनेन सूत्रेण पदचरमावयवस्य प्रापकः प्रति
बंधकश्च स्थानिवद्भावो निषिध्यते विनिगमनाविरहात्· कानिसन्निकोस्त इत्यत्र प्रापकः एषोपन्नित्यत्र प्रति
बंधकस्थानिवद्भावो निषिध्यते·। अत्र पदेऽन्तइतीति अन्तशब्दस्य च रमावयवाचकतया पदे परत्वश्च रमावय

वकः पूर्वपदस्यैव सम्भवतीति तत्साधकः प्रतिबन्धको वा स्थानिवद्भावः परपदस्याजादेशस्यैवेति तदेकवाक्य
तया षष्ठीसमासपक्षेऽपि नादेशः एवाजादेशो गृह्यते वेतस्वानित्यत्र तु न तथा पदचरमावयवसकारस्थानिकरुत्वस्य
प्रतिबन्धकस्थानिवद्भावो भवत्येव परपदस्याजादेशस्य स्थानिवत्त्वाप्रसक्तेः न चैवमिति अस्यापूर्वत्वपक्षेऽनेन
उपपादितरीत्या क्वाचित्कत्वकल्पने च तस्यैव अत एव पदचरमावयवातिरिक्तस्य त्रैपादिकस्य ग्रहणादेवेदम
त्र वोध्यम् यदापि वेतस्वानित्यत्र पदान्तविधिशब्दे षष्ठीसमासपक्षे स्थानिवद्भावनिषेधः प्राप्नोतीत्याशंक्य पदे
ऽन्त इति सप्तमीसमासेन निषेधाप्राप्त्योभयोपादानं यदि न दालोपशाकल्यस्येति सूत्रव्याख्यावसरे वक्ष्यवकरोतीत्यत्र
ग्रहणाभावेऽपि स्थानिवन्निषेधस्तत्र पदान्तत्वज्ञानं तन्निर्णये च स्थानिवत्त्वाभावज्ञानमित्यन्योन्याश्रय इति निषेधा
प्रवृत्तिरिव वक्ष्यमाणरीत्या निषेधो न प्राप्नोतीति सप्तमीसमासप्रदर्शनं वैयर्थ्यशङ्का भवति तथापि न पदान्तसू
त्रस्य भाष्ये पदान्तविधिशब्दस्य कानि सन्ति कोस्त इति प्रयोगे निषेधप्रवृत्तिः प्रयोजनमित्युक्तं तत्प्रामाण्येन यत्र
पदान्तत्वसिद्धं तत्र निषेध इति कल्प्यते वेतस्वानित्यत्र तु पदान्तत्वमसिद्धमिति निषेधो न प्रवर्तते परन्तु सूत्रस्थप
दान्तशब्दस्य पदान्तत्वपरतया स्वादौ पूर्वम्पदमिति पदत्वे कर्तव्ये निषेधप्रवृत्तिः तसौ मत्वर्थ इति भत्वे तु निषेधप्रा
वृत्त्यभावात् स्थानिवत्त्वेन तदकारान्तमिति न भत्वेन पदत्वबाधः यदि तु सप्तमीसमासेन परपदस्याजादेशस्यैव स्था
निवद्भावनिषेधस्तदात्र न निषेधप्रवृत्तिरिति पदत्वबाध एव इत्युपाध्यायानुयायिनः वस्तुतस्तु द्विर्वचनशब्द

सशास्त्रीयार्थबोधकतयापक्षान्तशब्दोपिशास्त्रीयार्थस्यैवबोधकस्तत्साहचर्य्यादितियुक्तम् एवंतस्यानित्यत्र
रुत्वपदचरमावयवत्वेनतस्मिन्कर्त्तव्येतिषेधः प्रवर्त्तते।नचपदसञ्ज्ञानपदचरमावयवइतिवाच्यम्। तस्याका
र्य्यार्थत्वाद्रुत्वस्यपदचरमावयवत्वेनतत्सम्पादकपदसञ्ज्ञायाअपिपदचरमावयवत्वेनग्रहणमितिपूर्वपक्षा
शयः सिद्धान्त्येकदेशिनातुसमाहितम्भसंज्ञाबाधिकाभविष्यतितस्यापम्भावः यदिपदचरमावयवसम्पादकस्या
पिपदचरमावयवत्वेनग्रहणान्तदासात्तनिष्ठयदत्वाप्रतिबंधसम्पादकत्वाद्रुत्वमायकभत्त्वंपदचरमावयवसा
धकत्वात्पदान्तशब्देनगृह्येतनचभत्वम्पदत्वम्प्रतिबन्धकंनतुयदत्वाप्रतिबन्धसम्पादकमितिशङ्कंभत्वेकर्त्त
व्यटिलोपस्यस्थानिवद्भावः क्रियतेततश्चयदत्वम्भवतीतिभत्वम्प्रतिपतिबन्धकस्थानिवद्भावप्रयोजकेङ्गानविष
यत्वाङ्गत्वम्परम्परयारुत्वसम्पादकत्वात्पदत्वप्रतिबन्धकमितिव्यपदिश्यतइत्याशयात् एवम्पदचरमावयवे
भत्वेकर्त्तव्येटिलोपस्यस्थानिवद्भावनिषेधाद्भसञ्ज्ञायापदत्वबाधाद्रुत्वन्नेतिभावः परन्त्वेवरीत्यासमाधानेम
हन्तत्केशइत्यतआह अत्रपदेऽन्त्यइतीति। पदचरमावयवविधायकातिरिक्तस्यैवत्रैपादिकस्येत्यर्थस्यावश्यक
त्वमाह अतएवेतिताद्दशार्थकल्पनादेवमहिम्नानित्यत्रेति अत्रभत्वविषयेतीतिभावः एवंत्वत्रटिलोपस्यस्था
निवद्भावोभवत्येवननुजश्विधिम्प्रतिनस्थानिवदितिनिषेधस्स्यादतआहसूत्रेजश्पदेनेति चरसन्निहितेति
प्रकृतसूत्रेचरसन्निहितपाठेनयस्यजशश्चरसन्निधानंतस्यैवग्रहणमितिभावः नन्वन्तरङ्गेजश्त्वेबहिरङ्गस्यासि

हत्वाज्जश्त्वन्न भविष्यतीत्यत आह॰ कार्यकालपक्षइतियत्तुजश्त्वन्नेतिवस्तुतोझलांजशोऽन्तइत्यत्र झलपदस्यवि
शेषणाज्झलन्तपदस्यालोऽन्त्यस्यजशित्यर्थेनसिद्धेऽन्तग्रहणात्पदान्तस्यैव झलोजशभवतिनतुलोपकृतपदान्तस्या
पीत्यर्थस्यक्रोडीकाराज्जश्त्वंप्राप्तिरेवनेतितत्रभ्रस्जेर्णिचिक्विपिभ्रडित्यसिद्धापत्तेः अत्रहिसंयोगस्यलोपकृतमेव
पदान्तत्वम् किन्त्ववबुधमाचष्टेवबुधयतिवबुधयतीतिभुदित्यस्यसिद्धिर्नस्यात॰ किन्त्वेतत्सूत्रभाष्येभावसाधनविधि
पक्षेब्रह्मवंध्याब्रह्मवन्ध्वैरित्यत्रजश्त्वम्प्राप्नोतीतिशङ्क॰ किलम् अत्रकैयटः डुडःन्डुडोरेकादेशढङःग्रहणेनगृह्ये
तन्तस्मिन्स्वादिष्वितिपदसंज्ञायांधकारस्यजश्त्वंस्यात्इतितदेतद्विरुध्येतधकारोनहिपदान्तएवनचैवंगतिकार।
कोपपदानामितिसुवुत्पत्तेःप्राक्समासेउत्तरपदस्यपदत्वाभावेनपदेऽन्तइतिसमासेगोचेत्यत्राचइत्यल्लोपस्यस्था
निवद्भावादवङादेशापत्तिरतआह गोचेत्यादाविति। साहितस्यधनक्रीतेत्यत्रयथानन्त्वेवमपोद्मनुपपन्नमुत्तर
पदत्वेचेतिनिषिनोत्तरः पदस्यपदत्वाभावादतआह उत्तरपदत्वेइति उत्तरपदत्वेचापदादिविधौप्रतिषेधइतिहि
वार्त्तिकम्॰ उत्तरस्यपदत्वेउत्तरपदत्वेउत्तरशब्दपरोत्रोत्तरशब्दःपदैकदेशलोपात्॰ एवञ्चोत्तरपदस्यपदव्यपदे
शेकर्त्तव्येप्रत्ययलक्षणेनेत्यस्यार्थः परमवाचापरमवाचेगोदुहाश्वलिलिहाअत्रोत्तरपदस्यपदत्वेप्रत्ययलक्ष
णप्रतिषेधात्कुत्वघत्वढत्वादीनिनअपदादिविधाविति किमुदधिसेचौदधिसेचः अत्रोत्तरपदस्यपदत्वेसात्पदा
द्योरितिनिषेधस्सिद्धोभवतिःनचमाषकुम्भवापेनेत्यत्रकुम्भशब्दव्यवायेनयःपदव्यवायेतिनिषेधस्सनस्यात॰

कुम्भशब्दस्य उत्तरपदत्वेनेति पदत्वनिषेधादिति वाच्यम् अपदादिविधाविति पर्युदासादुत्तरपदस्य कार्य्यित्वे
एवप्रवृत्तिस्वीकारात् नच पूर्ववदेङि प्रियइत्यत्र त्रिपदे बहुव्रीहौ प्रियशब्दे तद्धितार्थे तिसमासे ङ्णिति त्यस्य न लोपा
त्मककार्य्याधिकरणात् तयाप्रत्ययलक्षणनिषेधे सति न लोपो नस्यादिति वाच्यम् उत्तरपदशब्देन मध्यमपदत्वा
नाक्रान्तस्यैवोत्तरपदस्य ग्रहणात् न चैवं सति माषकुम्भवापेनेत्यत्र कुम्भपदस्य मध्यमपदत्वाक्रान्ततया निषेधा
विषयत्वेन पदव्यवायेनापि निषेधसिद्धौ कार्य्यित्वनिवेशोव्यर्थ इति वाच्यम् प्रत्यासत्त्या तत्समासीयमध्यमपद
त्वानाक्रान्तस्य ग्रहणात् एवञ्च माषस्य कुम्भो माषकुम्भः माषकुम्भस्य वाप इति षष्ठीतत्पुरुषपूर्वपदकषष्ठीतत्पुरुषे
कुम्भशब्दस्य तत्समीपमध्यमपदत्वानाक्रान्ततया तस्य प्रत्ययलक्षणेन पदत्वसिध्यर्थं कार्य्यित्वनिवेशस्यावा
श्यकत्वात् नचैवमपि पूर्ववदेङि प्रियइत्यत्र त्रिपदे बहुव्रीहौ अवान्तरतत्पुरुषे यत्समासोत्तरपदत्वं दे ङिन्नित्यस्य
तत्समासीयमध्यमपदत्वानाक्रान्ततया निषेधापत्तिरिति वाच्यम् तत्समासप्रयोजकैकार्थीभावप्रयोज्यसमा
सीयमध्यमपदत्वानाक्रान्तेत्यर्थस्वीकारात् प्रकृते चोभयसमासप्रयोजकैकार्थीभावस्यैकत्वेन दङिन्नित्यस्य
विवक्षितमध्यमपदत्वमस्त्येव न चैवम्परमवाचेत्यादौ वागादिशब्दस्य तत्समासीयमध्यमपदाप्रसिद्ध्या विशि
ष्टार्थाप्रसिद्धिरिति प्रक्रान्तप्रयोजनस्यैवासिद्धिरिति वाच्यम् तत्समासीयमध्यमपदानाक्रान्तेत्यस्य तत्समासीय
चरमपदाव्यवहितपूर्ववर्त्तित्वविशिष्टपदत्वानाक्रान्तेत्यर्थात् अतद्धितइत्यस्य प्रत्याख्यानाय पदेव्यवायेइत्य

भै. ४४

र्थस्यावश्यकत्वेनच कार्यित्वनिवेशावश्यकत्वादन्यथा वापशब्दस्य पदत्वाभावेन माषकुम्भवापेनेत्यत्र निषे
धो न स्यात् न चैवं सति परमदण्डिनावित्यादौ ङमुट् स्यादिति वाच्यम् अजादेः परस्येति व्याख्यानात् न च सुगण्णी
शावित्यत्र ङमुडागमो न प्राप्नोति ईशशब्दस्य मध्यमपदत्वानाक्रान्तत्वात् कार्यित्वाच्चेति वाच्यम् पूर्वोक्तवत्पदान्त
त्वनिमित्तकविधावित्युपादानेनैतत्संग्रहात् न चैवं मध्यमपदत्वेन तत्समासीयत्वविशेषणं व्यर्थम् कुम्भशब्दस्य वा
पशब्दस्य वा पदत्वमनायासेन सिध्यति यदव्यवाये यीति निषेधस्य पदान्तत्वनिमित्तकविधित्वाभावादिति वाच्यम् दधि
सेचिशय दधिसेचवास इत्यादौ शयवासवासीति सप्तम्या अलुकि सेक्शब्दस्य पदान्तत्वनिमित्तककुत्वाभावार्थम्प्रत्या
सत्तिलभ्यस्य तत्समासीयत्वनिवेशस्यावश्यकत्वात् अत एव गोदुघासेत्यस्य च सिद्धिः न च पदे व्यवाये इत्यर्थे वाप
शब्दस्य पदत्वसिद्ध्यर्थं कार्यित्वनिवेश इति प्रागुक्तं तत्पदे इत्यत्र पदशब्दस्य पदत्वयोग्यपरत्वेनाप्यन्यथासिद्धमिति
वाच्यम् शास्त्रान्तरशङ्किति नोत्तरपदशब्दस्य तादृशेऽर्थे लक्षणापेक्षया स्वशास्त्रशङ्केति तत्पदशब्दस्य लक्ष
णानौचित्यादिति दिक् न पदान्तसूत्रे पदे इत्यत्र पदशब्दस्य लक्षणायामपि गोचेत्यस्य सिद्धिरित्यभिप्रायेणाह पदे
इतीति तत्सूत्रभाष्ये इति पूर्वत्रासिद्धे च। पूर्वत्रासिद्धे न स्थानिवदिति वक्तव्यमूर्वरे यलोपस्वरवर्जमेतावदेव यद्या
पितत्रोक्तं तथापि दीर्घस्याप्युपलक्षणमेतदित्याशयेनाह वरे यलोपस्वरदीर्घग्रहणवर्जमिति अयम्भावः यद्यपि
दीर्घग्रहणस्य प्रतिदीव्न इति प्रयोजनं पूर्वत्रासिद्धत्वेन सिध्यति तथापि कमेर्णिङि तिसूत्रस्थभाष्यप्रामाण्येन स

राम ४५

पादसप्ताध्यापि स्याद्दीर्घस्यापि ग्रहणमावश्यकमित्यत्रत्यम्भाष्यमुपलक्षणम्। तत्र हि किमेणिङोऽङ्कारस्य णेरनीटाम्
रत्र णिसामान्यग्रहणार्थत्वमुक्ताऽङ्कारस्यात्मनेपदार्थमप्युद्भाव्य प्रतिषेधस्य बलवत्त्वेन कामयत इत्यत्र द्धिरिति चेति।
प्रतिषेधः प्राप्नोतीति शंकितमत्राहक प्रकरणादिग्लक्षणयोरेव गुणवृद्ध्योर्निषेध इत्यनुज्ञानेन शङ्केयम् एवमेव
चान्ते समाहितं सिद्धान्तिनामध्ये सिद्धान्त्येकदेश्याह एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति कामेर्वृद्धिप्रतिषेधो भवती
ति यदयन्नकम्य मिव माभिति मित्त्वप्रतिषेधं शास्ति पूर्वपक्ष्याह अर्थवान् मित्त्वप्रतिषेधः कामयमानमप्युङ्।
क्त इत्यर्थे णिङन्ताणिचि यावृद्धिस्तस्या ह्रस्वत्वं स्माभूदिति नैवाणिचि वृद्धिः प्राप्नोति किङ्द्धिति प्रतिषेधात्सि
द्धान्त्येकदेश्याह ङ्किति चेत्यत्र तन्निमित्तग्रहणान्न तस्योपा वृद्धिस्तस्या प्राप्तेर्बाधः नैवणिङन्तस्य णिवि वृद्धिः प्रा
प्नोति णिङा व्यवहितत्वात् लोपेनास्ति व्यवधानमस्यानिवद्भावाद्व्यवधानमेव इदं तर्हि प्रयोजनम् यत्त्विस
मुल्लो दीर्घोऽन्यतरस्यामिति दीर्घत्वं शास्ति तत्कमेणिङि माभूत किं पुनः कारणं तत्र दीर्घोऽन्यतरस्यामित्युच्यते
न ह्रस्वोऽन्यतरस्यामित्येवोच्यत पश्चात् प्राप्तं कमेर्ह्रस्वत्वम्। तत्रायमर्थः ह्रस्वग्रहणं न कर्त्तव्यं भवति प्रकृतमनु
वर्त्तते मितां ह्रस्व इति अशामि अशामि शामम् शामम् शामम् वृद्ध्या सिद्धं न सिध्यति नोदात्तोपदेशस्येति प्रति
षेधः प्राप्नोति चिणि कृतो सप्रतिषेधः णिव्यवहितेष्ट तर्हि यङ्लोपे चोपसङ्ख्यानं कर्त्तव्यं स्यात् शमयतम्प्र
योजितवान् अशामि अशामि शंशामयते अशंशामि अशंशामि किं पुनः कारणं न सिध्यति चिस्सल्परेणव

भै·
४५

मित्तामङ्गानांह्रस्वोभवतीत्युच्यते· पश्चात्रणिश्विसमल्परोतत्तस्मिन्मिदङ्ःमयस्मिन्मिदङ्त्रासौचिस्समुल्पर
णिलोपेचङ्कृतेचिसामुल्पर: स्थानिवद्भावान्नचिसोमुल्पर: अथ्यदीर्घोन्यनरस्यामित्युच्यमानेशावनास्थानि
वद्भाव: कथमेतत्सिध्यति: एतदिदिदानींदीर्घग्रहणस्यप्रयोजनंदीर्घम्प्रतिनस्थानिवदित्यजादेशस्यस्थानि
वत्प्रतिषेधस्सिद्धोभवतीत्युक्तम् एतेनभाष्यप्रघट्टकेनत्रैपादिकातिरिक्तोपिदीर्घोनपदान्तेतिसूत्रेदीर्घग्रह
णेनगृह्यतेइतिस्पष्टमेवलभ्यतेतेनचहेडधातोर्घटादिपठितास्यणिचिअहिडिअहीडीतिरूपंदीर्घोऽन्यत
रस्यामित्युच्यमानेसिध्यतिह्रस्वविकल्पेतुअहिडिअहेडीतिफलभेदस्पष्टतयाकथमेतत्प्रघट्टकमितिवा
च्यम्। एतत्भाष्यप्रामाण्येनहेडधातोर्घटादिपाठस्याप्रामाणिकत्वात्नचङ्कितिचेतिसूत्रस्थस्यतङ्कितकाम्यो
रिवप्रकरणादितिवार्त्तिकस्यविस्मरणेनैतत्प्रघट्टकेप्येकदेश्युक्तत्वान्नप्रकृतसूत्रस्थभाष्यस्योपलक्षणत्वेमा
नमितिवाच्यम्चिस्समुल्लोन्यतरस्यामितिसूत्रस्थभाष्यसम्वादिनात्रत्यभाष्येदीर्घग्रहणस्योपलक्षणत्वावश्य
कत्वात् अत्रहि अशंशमि अशंशामीत्यत्रयङ्व्यवधानेस्थानिवद्भावाद्दीर्घत्वंनप्राप्नोतीत्याशङ्क्यप्रतिषि
ध्यतेऽत्रस्थानिवद्भाव: दीर्घविधिम्प्रतीतिएवमप्यसिद्धत्वान्नप्राप्नोतिसमानाश्रयवचनात्सिद्धमेवतदीत्यु
क्तम्तथाऊकालइतिसूत्रेभाष्येपितत्पाठस्याप्रामाणिकत्वंध्वनितम्तत्रह्युकालोह्रस्वसञ्ज्ञकइतिवाक्योग्र
हणकशास्त्रप्रवृत्तौदीर्घेप्युतयोपूर्वसञ्ज्ञाप्रसङ्गइतिशङ्कायाकालग्रहणेनसमाधायअथवाह्रस्वसंज्ञाव

राम
४५

चन सामर्थ्याद्दीर्घप्लुतयोः पूर्वसञ्ज्ञा न भविष्यतीत्युक्तम् तत इदन्तर्हि ह्रस्वसंज्ञावचने प्रयोजनम् एच इग्घ्रस्वा
देशे इति । अन्यथा ह्रस्वो नपुंसके णौ चङि ह्रस्व इत्यत्र च ङि ह्रस्वप्रदेशेषु एच इति गिति वक्तव्यं स्यात् इति गौरवं
स्यात् । एतेनापि घटादिषु हेड धातोः पाठ अप्रामाणिक इति लभ्यते अन्यथा हि डयनीति रूपसिद्ध्यर्थमितां
ह्रस्व इत्यत्रापि तथा पाठस्यावश्यकतया त्रिष्वेव गौरवोद्भावनं विरुध्येत अत्र वार्त्तिकम् । प्रतिषेधे स्वरदीर्घ
यलोपेषु लोपाजादेशो न स्थानिवत् । स्वरे यथा आकर्षकः चिकीर्षकः जिहीर्षकः आकर्षक इत्यत्र ण्वुलो लित्वाल्
कारात् अकारस्योदात्तत्वम्भवति लित्वसामर्थ्याद्व्यवहितस्यापीति चेन्न आकारस्यापि स्यात् । चिकीर्षक इत्यादौ ण्वुलो
लित्वादीकारस्योदात्तत्वम्भवति । अन्यस्त्वादेशस्थानिवद्भवे यथा आरत्न्योदशारत्निप इत्यत्र णादेशस्य स्थानिवद्भावाद्रि
गन्तु कालकपालेति स्वरो भवति तथा वहुखट्वकः अत्र ह्रस्वत्वस्य स्थानिवद्भावाद्ध्रस्वान्तेऽन्त्यादिति स्वरो न भवति ।
दीर्घे यथा प्रतिदीव्न यो ह्यन्य आदेशः स्थानिवदेवासौ भवति किर्य्यो गिर्य्यो रिति यलोपे यथा ब्राह्मणाकराड इतिः क्षत्रिय
क एइतिः यो ह्यन्य आदेशः स्थानिवदेवासौ भवति वाय्वोः अध्वर्य्वो रिति एतच्चान्यथा सिद्धमिति भाष्ये उक्तम् । लोपो
पि प्रकृतः आदेशोपि विधिग्रहणमपि दीर्घादयोपि निर्दिश्यन्ते केवलं तत्रापि संबंधमात्रं कर्त्तव्यम् । प्रकृतसूत्र
स्थो लोपशब्द आवर्त्यते प्रकृत इत्यस्य प्रस्तुत इत्यर्थः क्लिलुगुपधात्वचङ्परनिर्ह्रासकुत्वेषूपसङ्ख्यानम् अत्र
क्नोपधेशो दे धात्वाख्यातः क्नोलुप्तनं स्थानिवत् । क्नौविधिम्प्रति न स्थानिवदिति विधावित्यस्याध्याहारो स्क्नौ इत्यस्या ।

तृन्या आदेशेन संभवं धातुः क्विनिमित्तअजादेश इत्यर्थेन क्वौलुप्तमित्यस्य लाभः अस्योदाहरणम् कण्डूरिति कण्डु
यतेरप्रत्ययः अत्र यणा न यलोपश्च भवति यद्यपि यलोपविधिं प्रतीत्यनेन यलोपः सिध्यति तथापि यणादेशाभा
वो मुख्यम्प्रयोजनम् पिपठिषतेरप्रत्ययः पिपठीः अत्राल्लोपस्य स्थानिवद्भावनिषेधाद्दीर्घस्सिध्यति यद्यपि त
द्दीर्घविधिम्प्रति न स्थानिवदित्यनेन सिध्यति तथापि रुत्वमेतत्साध्यमेव यद्यपि पदान्तविधिम्प्रतीत्यस्य षष्ठीसमा
से प्राप्तिस्तथापि सिद्धान्तिसम्मते सप्तमीसमासे न दा प्राप्तिरेवला वतेर्लौः यावतेः यौः अत्र णिलोपस्य स्थानिवद्भावा
दूरं न प्राप्नोति यदि तु एयल्लोपाविय ङि निवचन सूचित पूर्वविप्रतिषेधेन प्रथमं णिलोपस्ततः प्रत्ययलक्षणेन वृ
द्धिरिति प्रक्रियानतु वान्तस्य क्वौ पर्ठतो ऽङ्कस्व मितिनात्रो ठतदा लवमाचक्षाणो लौ यौ रितिलवशब्दादाख्याने णिचि
टिलोपे वकारस्य ऊट् क्रियते स णिलोपस्य स्थानिवद्भावान्न स्यात् क्वौ विधिम्प्रती तिवचनेनतस्यापि सिद्धिरिति च
तदा एयत्तदिव धातु प्रकृतिक क्विवन्तस्य दयूरित्येतस्मि लोपस्य स्थानिवत्वन्न स्यात् न चात्राणिलोपस्य स्थानिवद्भाव
दुकारस्य वृद्धिस्स्यादिति वाच्यम् ऊठ् आदिष्टादचः पूर्वत्वात् यदि चेदमपि क्वौ विधिम्प्रती त्येव सिद्धमित्युच्यते तदा
स्यन्यादिति सूत्रभाष्योदाहृतं सखीयतेः सख्युरिति रूपमन्यथा न स्यात् अल्लोपस्य स्थानिवद्भावो यणादेशप्रत्यय
निमित्तककर्तव्ये स्यात्तथा गोमत्यते गोमानिनिङगिद्वामिति सूत्रे भाष्योदाहृतम् एयन पदे पदेः यात् पदइतियेनु
विधिरितिभ्याष्योदाहृतं स्थानिवद्भावान्न स्यात् प्रथमे ऽल्लोपस्य स्थानिवद्भावात्सवर्णनाम स्थान परत्वाभावान्नुमद्धिनो

राम
४६

कस्युक्त्यभावादित्यर्थः त्रैपादिकाद्दित्वादिति पक्षद्वये त्रिपाद्यां तदप्रवृत्तेरभिप्रेतत्वात्· ननु विसर्गद्वित्वे
नाधिक्याच्चत्वारीत्यसङ्गतमत आह· धकारपकारयोरिति नन्वेकस्य धकारस्य जश्त्वेन दकाराद्वित्वमनुपप
न्नमत आह प्रक्रियायामिति एकस्या आह्वतेस्स्वरूपस्य कृतः प्रयोगो न द्वितीयस्यास्त्वित्ययस्या इति न्यायोय
याऽन्यत्राश्रियते: अत एव गवामश्वानाञ्च स्वामीत्येव प्रयोगो न तु गवांस्वामी अश्वेषु चेति तथाऽत्रापि द्वित्वा
कृतेर्धकारविषये युकारस्यापि द्वित्वमेवोचितं न तदभाव इत्यभिप्रायेणाशङ्कते एकस्या इति अत एव व्री
हीणां पागसाधनत्वेनोपादाने यवोपादानं न भवति सार्थकानेकेति· अत्रार्थशब्दोऽभिधेयपरः फलपरश्च प्र
कृते द्वित्वविषये नैकस्यापि संभवः गवां स्वामी अश्वेषु इत्युच्चमाने तु अश्वानामधिकरणत्वमप्रतिपत्ति
विषयस्स्यात् तथा एकस्मिन्नेव यागे व्रीहियवयोरुपादानं न भवति फलभेदस्स्यादिति भावः प्राधान्यादिति
अत एवात्र द्वित्वस्यासिद्धत्वात्प्रथमेकादेशे पुत्रादिनीस्यत्र पुत्रशब्दस्यादिनीशब्दपरत्वं दुर्लभमित्यपास्तम्॥
अत एव ह्रुनसप्तस्यन्तादिव त्रिप्रभृतिष्वित्यस्य व्याख्याने संयुक्तेष्वित्युक्तं तल्लाभायाघमाह त्रिप्रभृतीत्यादि·
अत्र सूत्रशब्दप्रयोगस्सादृश्यात् अत एव आदिन्यामेवग्रहणादेव श्रुतत्वादिति श्रुतानुमितयोरिति न्यायात् न
तूत्तरसूत्रानुरोधेन परएव विशेषणमुचितमत आह व्याख्यानादिति प्रन्यासस्त्याश्रुतं विशेषणत्वस्सत्याप्यरुपारि
त्परस्यास्तम्भोरिति सूत्रभाष्ये उत्पूर्वे स्कन्दे श्छन्दस्युपसङ्ख्यानमिति वार्त्तिकस्य अग्रे दूरमुत्कन्देत्युदाहणे तथा

रोगे चेति वक्तव्यमिति वार्त्तिकस्य उत्कन्दको रोग इत्युदाहरणे चोदरस्थेति सूत्रनिष्पन्नसकारस्य स्थानिकथकारस्य
चर्त्वेन तकार एव व्यन्यासाभावे तु चर्त्वे दृष्टाथकाराभावेन तकारघटितरूपासिद्धिस्स्यात्. न्यासेनो यत्नेन्यादावति
त्र सङ्ग इति वदेतन्न्यासेपि यथासङ्ख्यसूत्रेण सम्बन्धो बोध्यः अत्राहुरित्यनेनापाणिनीयत्वरूपारुचिस्सूचि
तनन्वकारस्य विवृतोपदेशस्यैव करणात्सम्वृतावर्णस्येत्ययुक्तमत आह एतद्भाष्येति प्रत्याख्यानेनेतीति. अलो
ऽन्त्यात्सूत्रस्य भाष्ये प्रत्याख्यानेत्यर्थः फलानामन्यथासिद्ध्या तस्मान्नुडचीत्यादीति. आदिनानेस्थधीत्यादेः परिग्र
हः परिभाषार्थस्तु अल्ग्रहणे येन शब्देन तस्मिन्सप्तम्यन्ते यो विधिस्स तदादौ बोध्य इति न युक्तः इको यणचीत्यादा
वपि तदादिविध्यापत्तेः किन्तु ग्रहणे इतरभिन्नत्वेन ज्ञायते येन तद्ग्रहणम् अल्च तद्ग्रहणञ्चेति समासः वि
शेषणस्यापि पूर्वनिपातप्रकरणस्यानित्यत्वात्परनिपातः यस्मिन्निति सप्तम्यन्तानुकरणम् तथा च सप्तम्यन्ते
. तरूपे विशेषणे यो विधिस्स तदादौ बोध्यः प्राचीनसम्मतप्रकारं दूषयति पूर्वसूत्र इत्यादि. तथा च यदि वा
क्यार्थपर्यालोचनस्यात्तदा ओकारौकारयोर्वान्तादेशस्यानेन निर्णयस्सचनसम्भवतीति भावः कैयटस्यापि
पूर्वापरविरोध इत्याह अत एवेति. ओदौतोरिति वक्तव्यमिति वार्त्तिकोपवादको ग्रन्थः. गोपानमिति. ननु वान्त
इति सूत्रे प्रत्ययग्रहणाभावे गव्यूतिरित्यस्यानायासेन सिद्धौ गोर्यूताविति वचनं नियमार्थम् अप्रत्यययादौ चे
द्यूतावेवेति एवञ्च गोपानमित्यस्य व्यावृत्तिसिद्धौ वान्त इति सूत्रे प्रत्ययग्रहणं व्यर्थमिति चेन्न यूतौ चेद्गोशब्दस्य

येणिलोपस्यस्थानिवद्भावात् यदभावश्चेन्नस्यात् तथायुष्मानस्मान्त्वाआचष्टेयुष्मयतिअस्मयतितुतःक्विप्त्वम्
अहम् अत्रणिलोपेसोत्वाहौसाविति कर्त्तव्येणिलोपोनस्थानिवत् नचभाष्येलवमाचक्षाणोलौपौरित्यस्यसाध
नावसरेनैवंविज्ञायतेक्वौलुप्तन्नस्थानिवदितिसुक्तंनदेतद्विरुध्यतइतिचेन्ननैवंविज्ञायतेइत्यस्यैवमेवनविज्ञाय
तेकिंतुक्वौविधिम्प्रतिनस्थानिवदित्यपिएवञ्चलवमाचक्षाणोरित्यत्रणौवकारलोपस्यऊठिकर्त्तव्येस्थानिवत्त्वा
भावस्सिध्यतिएवञ्चार्थद्वयमपिलक्ष्यसिद्धयेआश्रीयतेइतिभावः लुकालुप्तंनस्थानिवत् पञ्चेन्द्राण्योदेवताअ
स्यपञ्चेन्द्रः पञ्चाग्निः शताग्निः अत्रस्त्रीप्रत्ययलुकस्थानिवत्त्वादानुक् ऐकारश्चश्रूयेतउपधात्वविधिम्प्रतिनस्था
निवत् पारिखीयपरिखाशब्दाच्चातुरर्थिकेणिआकारलोपस्यस्थानिवत्त्वात्परिखेभवइतिरद्वादकेकारोनस्यात्यथा
दितिर्ङीनस्यात्चङ्परनिर्ह्रासेनस्थानिवत् वादितवन्तंप्रयोजितवानवीवदद्वीणांपरिवादकेनअत्रयोणौणि
लुप्यतेतस्यस्थानिवद्भावाद्ध्रस्वत्वन्नप्राप्नोतिनचात्राप्युपधात्वविधिम्प्रतिनस्थानिवदित्येवासिद्धमतस्यनिषे
धस्यप्रत्ययविधिविषयत्वात् अत्रैतद्वचनस्यैवमानत्वात् अतएवपठ्यतेतत्रटिलोपस्यस्थानिवद्भावस्सि
ध्यतिकुत्वेकर्त्तव्येनस्थानिवत् अर्चयतेरर्कः मर्चयतेमर्कः अत्रौणादिकेकप्रत्ययेतस्मिन्कुत्वेणिलोपस्यस्था
निवत्त्वंनप्राप्नोतिशास्त्रइतियथा लिटधुगित्यादौस्त्रोजसेत्यादिग्रास्त्वतः प्रशक्तस्यस्वादेहल्ङ्याभ्यइत्यादिनालो
पविधानमल्पवलोपइत्यादिविषयसङ्ग्रहायार्थेइतिअवर्जनीयतयेतिविषयमानप्रयोजकसामग्रीसन्नि

धानेनतज्ज्ञानंचजायतामितीच्छायामपितज्ज्ञानंभवत्येवतत्सामग्रीतिज्ञानसामग्रीत्यर्थः ननुयत्रलोपवि-
धानंतत्रलोपप्रसक्तवर्णकृतसंज्ञानिवृत्तिः शास्त्रतोलभ्यतेनश्रुतस्यवर्णस्याभावइतिचेन्नसमनीयताभावा-
नामेकस्वीकारात् ननुस्वरूपमितिशास्त्रसत्त्वाददर्शनशब्दस्यैषासंज्ञास्यादतआह अर्थस्यैवेतिलक्षणया
ऽदर्शनप्रतिपाद्यस्योच्चारणाकृतत्वभावस्यव्याख्यानादितिमहासंज्ञाकरणरूपात् निपातएकाजनाङितिनि-
र्द्दिशाच्चअदर्शनशब्दस्यसंज्ञित्वेचानङित्यस्यप्रथमान्तत्वमनुपपन्नमितिभावः स्वंरूपमित्यस्यप्रत्याख्या-
नेतुप्रकृतेऽर्थैकार्थ्येविधाभावेनार्थग्रहणेबाधकाभावइतिननुग्रामस्यदर्शननिरूपिताधिकरणत्वमस्त्येवेत्य-
तआहतत्स्त्वेवितिननुपितः प्रत्ययत्वात्तेनप्रकृत्याक्षेपेणात्रपुजत्वित्यत्रनपूर्वोक्तदोषइत्यतआहः कृत्प्रत्यये
नेतिअनिर्देशातः प्रत्ययलोपशास्त्रतस्यानित्वत्वेनवायदिपरदेशावच्छेद्यत्वविशिष्टप्रत्ययज्ञानस्यप्रकृति-
ज्ञानंव्यापकंस्यात्तदाकृत्प्रत्ययेनप्रकृतेरनुमानात्प्रकृत्याक्षेपस्स्यान्नतुनसम्भवतिअत्रैवव्यभिचारात् प्रत्यय-
ग्रहणपरिभाषयायस्मात्प्रत्ययविधिस्तदादेरेवतुम्भविष्यतीत्यपिवक्तुंशक्यम्ः उत्तमैकाभ्यामितिनिर्देशेन
यत्रप्रत्ययोनिमित्तत्वेनाश्रियते तत्रपक्षमन्तस्ययस्मात्प्रत्ययविधिस्तदादेरित्यस्यनियमेनोपस्थितिस्स्यात्तद-
साधनेमेतत्वेनाभिप्रेतस्यप्रत्ययस्यतदाद्यन्तार्थसत्त्वं विनानिमित्तत्वानुपपत्तिस्स्यात्साचाधुनानेतिभावः
विनिगमनाविरहादितियणोयपएतयोर्मध्येएकतरस्यपञ्चम्यन्तत्वमिवापरस्यषष्ठ्यन्तत्वमेवेत्यत्रसाध

वर्गोशब्दस्य चेघूत्तावेवेति वा नियमोपि सम्भाव्येत· एवञ्च वणोयानमित्यत्र तद्यावत्स्यऽर्थि प्रत्ययग्रहणस्यावश्यकत्वा
न्नः हलि सर्वेषामिति लोपस्स्यादिति· एवञ्चैतत्तदर्थः तत्र वकारोप्यनुवर्त्तत इति भावः निमित्तवाध इति· एवञ्च वान्त
इत्यत्र वकारात्पूर्वं वकारप्रश्लेषे वकारस्लोपो नस्स्यादिति भावः नदप्राप्तियोग्ये विषयेऽचारितार्थ्यं वाधकत्ववी
जन्तदत्र नास्तीत्याह निमित्तत्वानाक्रान्त इति ननु माभूद्येन नाप्राप्तिन्यायेन वा धस्तु तक्रकौण्डिन्यन्यायेन तु स्याद
त आह नक्रेत्यादि· तथाच येन नाप्राप्तिन्यायएवास्यान्तर्भावः। विधेयविषयश्चेति विधीयमानदधिदानस्यैव वा
धकत्वदर्शनात् अत्रार्थे मानं दर्शयितुमाह तद्धितेष्वचेति तत्र हि तद्धितेष्वचामादिर्वृद्धौ अन्त्योपधलक्षणाया वृ
द्धेः प्रतिषेधो वक्तव्यः क्रौष्टेयोऽजागत इति न चादिवृद्धिरन्त्योपधलक्षणां वृद्धिं वाधिष्यते कथमन्यस्योच्यमाना ऽन्यस्य
स्य वाधिका स्यात् असति खल्वपि सम्भवे वाधनं भवति अस्ति च संभवो यदुभयं स्यात् लोकविज्ञानात्सिद्धमसत्यपि
संभवे वाधनं भवतीति तद्यथा ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्यायेति· सत्यपि सम्भवे दधिदानस्य तक्रदान
न्निवर्त्तकं भवति· एवमिहापि सत्यपि संभवेऽचामादिवृद्धिरन्त्योपधलक्षणां वाधिष्यते विषमउपन्यासः नाप्राप्ते दधि
दाने तक्रदानमारभ्यते तस्मात्प्राप्ते आरभ्यमाणं वाधकं भवति· इह पुनः प्राप्तायामन्त्योपधलक्षणायां वृद्धौ अचामादिवृद्धि
रारभ्यते सुश्रुतसौश्रुतः एतेन वचनेनैवादिवृद्धिर्यत्र तत्रान्त्योपधलक्षणा वृद्धौ अचामादिवृद्धिरारभ्यते· सुश्रुत सौ
श्रुतः एतेन वचनेनैवादिवृद्धिर्यत्र तत्रान्त्योपधलक्षणावृद्धिर्निवर्त्तनीयेति सूचितम् पुष्करसच्छब्दपाठादेहसक्तम·

मै॰
५९

अन्येइति॰ धातोरेकाचोहलादेरितिसूत्रइत्यर्थः उत्तरयोरितिनित्यंकौटिल्येगतौलुपसदचरेतिसूत्रयोरित्यर्थः नित्य
ग्रहणस्यतुलुपेत्यस्यतत्राप्यनुवृत्तेः सम्भावनायामिदम्॰ वस्तुतस्तुउत्तरयोर्विग्रहेणविशेषासम्प्रत्ययान्नित्यग्रहा
णानर्थक्यमितिवार्त्तिकंयद्यपिसम्प्रत्युपलभ्यमानभाष्यपुस्तकेनित्यंकौटिल्येलुपसदेतिसूत्रद्वयपाठानन्तरमु
पलभ्यतेतथापिपूर्वसूत्रस्थमत्रपतितम् तत्रप्रथमसूत्रविषयेभाष्येउक्तम् नहिकुटिलंक्रामतीतिवाक्येनशंक
त्यन्यपिनुमितितदर्थानभिधानादेववाक्यंनभविष्यतिकुटिलंपन्थानंक्रामतीतिसम्प्रतीयतइतिभावः द्वितीय
सूत्रविषयेआह अथैतेभ्यःक्रियासमभिहारेयङ्भवितव्यम्क्रियासमभिहारेचनैतेभ्योभवितव्यम्भृशंज्वलति॰
ब्राह्मणभृशंसमिधोदहतीत्येव अत्रभाष्येक्रियासमभिहारेचेत्यत्रयश्चकारस्तेनविशेषासम्प्रत्ययादित्यस्यसम्बन्धा
द्भृशंजपतीत्याद्यर्थेविशेषस्ययङ्॰ न्नादप्रत्ययादित्यर्थः यस्तुकैयटः तत्रकौण्डिन्यन्यायेनकौटिल्यभावगर्हा
भ्यांयङःक्रियासमभिहारादाच्छाद्यस्वीकृतत्वादितिभावइतितन्नविशेषविहितेनसामान्यविहितंवाध्यतइतिहि
न्यायोलोकेशास्त्रेचप्रसिद्धस्तत्रविहितपदोपादानसामर्थ्येनविधीयमानयोरेववाध्यवाधकभावःप्रतीयतेनत्व
नूद्यमानयोःयदित्वत्रापियोयेननस्यात्तर्हिविशेषासम्प्रत्ययादिनुकर्षेकचकारवैयर्थ्यमेवस्यादितिभावः त
स्यचेतिप्रश्लिष्टवस्यचेत्यर्थः ननुलोपोव्योरितिसूत्रेस्थितस्यवकारस्यभाष्यकृताप्रत्याख्यानाद्वकारप्रश्लेषता
न्निवृत्तिर्नस्यादतआहलोपोव्योरिति॰ मूलखण्डयतिपरेत्वितिसापूर्वप्रदर्शिता॥ गोल्लान्तस्येत्यत्रखलुप्तनिर्दिष्टोवका

राम
४९

रइति भाष्योक्तिः पूर्वपक्षयुक्तिरिति तथाहि उत्तरार्थे सिजर्थे वृद्धिग्रहणं कर्त्तव्यमिति वृद्धिग्रहणस्य प्रयोजनं नेकथितेन्यनुवीत्
न्यधुवीदित्यत्र ङ्किति प्रयोजने च प्रतिपादिते नैतदस्ति प्रयोजनम्· अन्तरङ्गत्वादत्रोवङादेशे कृते ऽनन्त्यत्वाद्वृद्धिर्न
भविष्यति· यदि तर्हि सिच्यन्तरङ्गं भवति· अकार्षीत् अहार्षीत्· गुणे रपरत्वे चानन्त्यत्वाद्वृद्धिर्न प्राप्नोतीति माभूदेवमूह
लन्तस्येत्येवं भविष्यति इदं तर्हि न्यस्तारीत् न्यदारीत् गुणे रपरत्वे चानन्त्यत्वाद्वृद्धिर्न प्राप्नोति· माभूदेवमतो लान्तस्य
त्येवं भविष्यति इह तर्हि अलावीत् अपावीत् गुणे ऽवादेशे चानन्त्यत्वाद्वृद्धिर्न प्राप्नोतिः माभूदेवमल्लो ऽन्त्यस्येत्येवं
भविष्यति लान्तस्येत्युच्यते न चेदं लान्तम् ल्रान्तस्येत्यत्र वकारो ऽपि दृश्यतेः किं वकारो न श्रूयते लुप्तमिति निर्दिष्टो
वकारः इत्येवं पूर्वपक्षिणो ह्यन्तेति सूत्रेण श्विग्रहणे न ज्ञापकेन सिच्यन्तरङ्गं नास्तीति प्रतिपादिते वकारप्रश्लेषस्य न
फलमिति स्पष्टमेव· मूलोक्तम् प्रयोजनमप्यन्यथासिद्धमित्याह किञ्चेत्यादि धातोस्तन्निमित्तेति सूत्रे धातुग्रहणा
भावे प्राप्तिर्यदि कृद्विषया वा सामान्यतो वा नियमस्स्यात् तत्र क्रमेण दूषणमाह धातोरित्यस्याभावे इति न चास्मिन्सू
त्रे धातुग्रहणसत्त्वे क्विवन्तभूशब्दाद्गवादिभ्यो यदिति यति गुणे धातोः कार्य्यमिति परिभाषया वादेशो न स्यादि
ति वाच्यम् यत्र कार्य्यविधौ धातुत्वाश्रयस्य समुदायस्योद्देश्यत्वेनोपादानं तत्र तत्परिभाषाप्रवृत्तेः न धातुलोप इति सू
त्र भाष्यरीत्येति यथा तत्र धातुग्रहणाभावे उपेन्द्रमेदु इत्यत्र जायमान आद्गुणो ऽपि निषेध्येतेति प्रयोजनं स्यादुक्तस्त्र
निषेध्यदृष्ट्या बहिरङ्गगुणस्यासिद्धत्वात् वएङ्नङ्कृतमूनचात्र सूत्रे एवकाराभावे ऽपि सिद्धे सतीति न्यायेन विषमो

भै
५०

भविष्यतीतिवाच्यम् एवकारस्येष्टतोऽवधारणार्थत्वात अन्यथातन्निमित्तस्येच श्वे द्वान्तादेशस्तदाधातोरेवेत्यपि
सम्भाव्येत अत्रेष्टापत्तिस्तु न सम्भवति तथा सति वभुशब्दादपत्येऽर्थे मधुवभ्रोर्ब्राह्मणकौशिकयोरिति सूत्रेणाय
ञि कृते वाभ्रव्य इत्यत्र वान्तादेशो न स्यात् ननु तन्निमित्तस्येत्यस्य ओयते औपतेत्येव यदि प्रत्युदाहरणन्तदा नयकीत्ये
वसूत्रं लाघवात्कर्त्तव्यम् पूर्वसूत्रप्राप्तस्य वान्तादेशस्य प्रतिषेधेन लक्ष्यसिद्धिर्निर्बाधेति अत्र केचित् गोशब्दादा
चारक्विबन्तात्कर्त्तरि क्विपि गोषु साधुरित्यर्थे तत्र साधुरिति यति वान्तादेशसापत्तेरिति तत्र वदव्रजेति सूत्रे ओतश्श्यनी
ति सूत्रस्य भाष्यविरोधात् प्रथमे हल्ग्रहणं किमर्थम् समुच्चयो यथा विज्ञायेत अजग्रहणादेव समुच्चयो भवि
ष्यति वदिव्रज्योरस्त्वश्चेति अस्त्वन्यदत्र ग्रहणे प्रयोजनम् वदिव्रजिविशेषणं यथा विज्ञायेत वदिव्रज्योस्त्व इति अ
थवा एतदपि न ब्रूयात् अतइतिवर्त्तते इदं तर्हि प्रयोजनम् हलन्तस्य यथा स्यादजन्तस्य माभूत् तकस्य पुनरजन्तस्य प्रा
प्नोति अकारस्य अचिकीर्षीत् अजिहीर्षीत् तल्लोपोऽत्र बाधको भविष्यति आकारस्य तर्हि प्राप्नोति अयासीदवासीत् ना
स्त्यत्र विशेषः सन्ध्यक्षरस्य तर्हि प्राप्नोति नैव सन्ध्यक्षरमन्त्यमस्तीत्युक्तम् गोशब्दाचोरे क्विप सत्यपि तर्हि रोधस्स्पष्ट
एव अन्ये ओतश्शितीतिवक्तव्यम् किम्प्रयोजनम् ष्ठिवुक्लम्वितिसूत्रे शितीति न वक्तव्यम् ननु श्यन्ग्रहणे पि शामाम
ष्टानामित्यत्र श्यन्ग्रहणं न कर्त्तव्यम् तत्रापि शितीत्येव सिद्धमित्युक्तम् ओकारान्तेभ्य आचारे क्विप् सत्त्वे शितीत्युच्यमा
ने लोपः प्राप्नोति श्यनीति न्यासे तु नेति फलभेदस्स्पष्ट एव अत्राहुः नयकीति न्यासे लावयत लौपावयतेपोः जनान

राम
५०

युगपत्प्राप्तिस्तथापि येन क्रमेणावर्णश्रवणात्तेन क्रमेणोत्तरद्व[…]वाच्छब्दसंस्कारः कार्य्य इत्यत्र न पदान्तसूत्रस्थकानि सन्ति
कौस्तु इत्यत्र पदान्तग्रहणप्रयोजनप्रतिपादनपरम्भाष्यमेव[…]नम्· परिभाषालब्धमिति· अनुवादेपि परिभाषाप्रवृत्ते
पूर्वोक्तार्थे भाष्यसम्मतिमाह अत एवेति रेफस्यावयवत्वस्वीकारादेव तत्सादृश्येति· अवयवसादृश्येत्यर्थः यथादृष्य
वयस्यावयविबोधकशब्दजन्यप्रतिपत्तिविषयत्वं तथा स्ववृद्धिगुणादिशब्दबोध्यत्वम्· अन्यथासादृश्यापर्य्यव
सानेहलन्ताच्चेति तत्र ह्ययुक्तोयन्निर्देशः कथन्तर्हि नामेको हलन्तं स्यात्· अन्यस्यान्यद्द्युक्तम्· अत्र कैयटः अ
न्यस्यान्यद्द्रति· अत्यन्तभेदमनयोर्दर्शयति· एतदेकवाक्यतयेति वाक्यैकवाक्यतया अत एवयवत्वस्वीकारादेव
एतेनेति यदुक्तन्तदर्थमाह उक्तनियमेनिज्ञातस्याणो रपरत्वमिति पक्षेऽन्येनोहितं दूषणं खण्डयति अत्र पक्षे इति
कस्यापि कल्पनाद्दूषयति तन्त्रं तन्त्रेति· ऋत इत उदोष्ठ्येत्यत्र तकारस्य स्थाने रेफ एवोच्चारणीयः वृद्धिरादैच्·।
अरलदेङ्गुण एवेरीत्या पाठे बहूनां रेफलकाराणामुच्चारणेन यद्यपि गौरवरूपं दूषणं स्फुटम्भवति· तथापि दूषण
न्तरमाह· आवित्यादि अत्र यथा श्रुते भीर्त्सतीति न सिध्येत्· एतदर्थमत्रारिनिकरणेन ईप्सतिरीप्सतीति न सिध्येत्· भू
ज्ञाभिदिति अत्र तपरात्परपाठयोर्यद्यपि न दोषः हलादिशेषेण रेफनिवृत्तेः तथापि माङ ओहाङः विषये हलादिशेष
इत्येतस्य स्मरणमत्र पक्षे कर्त्तव्यमिति गौरवमेव दोषः प्रत्याहाराभावेन निनिरूपितमतस्त्राकः भःयोह इति यथास्थि
तपाठे भाष्यसम्मताष्टाध्यायीपाठे आह वावसाने रति· फलविशेष एव प्रवृत्तेरिति ननु सन्वन्ते ईत्सतीति कमपादा

भै. ५२

यतिपूर्वत्रासिद्धीयमद्वित्वेइति चर्त्वैकृतेर्त्से शब्दस्य द्वित्वमित्युक्तम्ः नन्वचत्वात्प्राक् द्वित्वेपि रूपसिद्धौ निर्बाधायां
रूपे विशेषाभावे परिभाषाप्रवृत्तिर्नैस्यात्सा च स्वीकृतेति तेन ग्रंथेनास्य विरोध इति चेन्नः अकृतिकारशास्त्रमग्निव
तः यथा अग्निर्वदग्धं दहतीति न्यायानुसारित्वादस्य ग्रंथस्य तस्य तु ग्रन्थस्य तु ग्रन्थस्य कृतकारिवत्खल्वपि शास्त्रम्
र्प्यन्य वदिन्येत न्यायानुसारित्वात्ः पृथक्पदमिति नात्र षष्ठीसमासस्य प्राप्तिः पूरणगुणेति निषेधादिति भावः क
श्चिदिति संज्ञाप्रमाणत्वादिति निर्देशात्तन्निषेधस्यानित्यत्वात्समासेपि न क्षतिरित्यस्वरसः अदिश एवेति एतेनडद
उपघात इति धातुव्यावृत्तिः व्याख्यानादितिः असिद्धवद्विरंगमंतरंग इति परिभाषाज्ञापकपरवाह ऊठ् सूत्रस्य भाष्यम्
लकाद्व्याख्यानादित्यर्थः प्रसिद्धत्वादिति एतेन वीगतीत्यत्र प्रश्लिष्टस्य व्यावृत्तिः भाष्यस्वरस इति तत्र हि ओतो म्शसोरि
त्यत्राचीत्यनुवर्त्यैनैवं विज्ञायते अच्यमीति कथं तर्हि अपचीति एतेनास्मिन्प्रकरणे यत्र यत्राचीति सम्बध्यते तत्र सर्वत्रा
च्पदार्थस्य विशेष्यत्वमित्येकादेशस्य वर्णाश्रयत्वमित्युक्तम्ः एवश्चायमेवार्थ इत्यस्य शाब्दोर्थ इत्यर्थ इति तात्पर्यम्ः
वृद्धिर्भवत्येवेति· एवञ्च एयन्तस्य शब्दान्तरत्वेपि प्रकृतिभागस्यानन्यत्वानुपपत्तिरिति भावः अवैहीति वृद्धिरसाधुरेवे
त्युक्तं तच्चायुक्तमाङोऽभावेनोमाङोरित्यस्याप्राप्तेरत आहः आङि तोरेकादेशेतिः स्वंरूपमिति सूत्रे उक्तमिति तस्मिन्सू
त्रे स्वंरूपमित्युभयो रूपादानादात्मीयार्थविशिष्टशब्दरूप[illegible]सञ्ज्ञित्वादेतल्लाभः अत्र मनोरमायामुक्तम्ः सीदेवस्त्वा
ह व्र श्रेति सूत्रे राजेः पृथग्राजिग्रहणमिह ज्ञापकमनन्वेत[illegible]दयुक्तम्ः फणादिना राजिसाहचर्यात्तथाभूतस्यैव षत्वा

राम ५२

वर्त्तीति जनेः एभ्यस्सम्पन्नेभ्यस्तत्र साधुरिति सूत्रेणापतिथा[illegible]स्तन्निमित्तेति न्यासे वान्तादेशो न भवतीति सम्प्राप्नोति नच वा
चः परस्मिन्निति बद्धेस्थानिवत्त्वम्· अपूर्वविधित्वात्· णिलोपस्यापि न आदिष्टाद् चः पूर्वत्वात् तत्कोलुप्तमिति निषेधाच्चे
त्ति दिक्· ङिज्योरेव ग्रहणं व्याख्यानादित्युक्तं तदेव व्याख्यानं स्पष्टयति अत एवेति क्रय्यस्तदर्थे इत्यत्र प्रधानक्रय्यणक
र्मणो न तच्छब्देन परामर्शस्तदर्थग्रहणब्दोपादानसामर्थ्यादतो गुणभूतक्रयणक्रियाया एव परामर्श इत्याशयेनाह व्याख्या
नाङ्कुरोति सर्वनाम्ना प्रधानपरामर्शकत्वमित्युत्सर्गः दर्शितो राजमातंगास्तस्यैवा मोतुरङ्गः मा इत्यत्र यथा तदर्थत्वञ्च त
न्निरूपितफलोपधानात्मकतज्जनकत्वम्· न तु स्वरूपयोग्यत्वम्· विशेषणोपादानसामर्थ्यात्तदाह क्रियार्थत्वञ्चेति·॥
केचित्विति· अयम्भावः क्रय्य शब्दे विक्रये क्रीणाति वर्त्तते एवञ्च यद्धान्यं विक्रीतं तत्क्रय्यम्· तत्र विक्रीता मदीयमिदं क्र
य्यमिति व्यवहर्त्तव्यम्· येन तु धान्यं क्रीतं तेनेदं धान्यं क्रेयमित्येव वक्तव्यम्· शब्दशक्तिस्वभावात्· तत्सूत्रस्थभाष्याच्च
एवं हि तत्र भाष्यम्· यदित्यनेन न किम्प्रतिनिर्दिश्यते स च क्रीणात्यर्थः इह माभूत्· क्रेयन्नो धान्यम्· क्रेतव्यमिति तदर्थः
न चास्ति क्रय्यमितिः अयमभिप्रायः अत्र क्रीणाति विक्रये वर्त्तते· तथा च यत्र मया विक्रीतमिति व्यवहारस्तदा क्रय्या
मिति भवति· तथा व्यवहारयोग्यता च धान्यस्यैव तुद्रव्यस्य येन तु स्वीयं द्रव्यं दत्वा धान्यं क्रीतं प्रति किञ्चिद्ग्रहणे कृते इदं धा
न्यमस्मभ्यं देयमिति तदा स क्रेता एवमुत्तरं ब्रूयात्· क्रेयन्नो धान्यमिति· अयमेव भाष्यस्वरसः प्रातिपदिकाणिजन्य
न्येति· प्रातिपदिकाद्धात्वर्थे इत्यनेन च तत्करोति तदाचष्टे तेनातिक्रामतीति· विभिन्नविभक्तिनिर्देशात्सुवंतात्णिजिति।

लभ्यते तत्कथमुक्तम्प्रातिपदिकादिनेति वाच्यम् तत्त्वेनेत्यनेन कर्मत्वाद्यर्थान्तर्भावेण वृत्तिप्रदर्शनमात्रं क्रियते णि
च् सुप्प्रातिपदिकादेवेत्याशयात् पूर्वत्रासिद्धीयमिति न च पदसञ्ज्ञायां यथोद्देशपक्षस्यैव सिद्धान्तितया पदसञ्ज्ञा
अत्रैपादिकत्वेन कथं पूर्वत्रासिद्धेन स्थानिवदिति निषेध इति वाच्यम् साक्षात्पदत्वस्यात्रैपादिकत्वेपि पदत्वद्वार
कपरम्परया पूर्वत्रासिद्धीयमल्लोपप्रतिबन्धकस्य स्थानित्वस्यानेन निषेधात् न पदान्ताहल्लोऽण इति यद्यपि लक्षणसूत्रेभा
ष्ये न हि पदान्तापरेणाः सन्तीत्येव पाठ उपलभ्यते तथापि तदर्थे तत्रैव न नुन्वायमस्ति कत्वं हन्तं इति प्रदर्शितभूतेनाक्षरूपस्या
णसम्भवाद्हल्लोपदर्शनाच्च पदान्ताहल्लो न सन्तीति गम्यत इत्यभिप्रायेणाहल्लोण इतीत्युक्तम् न च सुद्ध्युपास्य इत्यादौ पदा
न्तस्य हल्लोऽणो दर्शनादिदमसंगतमिति वाच्यम् प्रकृतकार्यभाजो न सन्तीति तदर्थात् अणोऽप्रगृह्यस्येति सूत्रेण प्रस्ता
द्वारः पूर्वेणान परेण कृत एव तत्पराभावात् न हि पदान्तापरेऽणस्सन्तिन नुचायमस्ति कत्वं हन्तं यद्यप्यनुनासिकवि
धौ यदान्ताधिकारो नास्ति तथापि पदान्तान्तामेवावसानेऽनुनासिको विधीयत इत्यभिप्रायेणापदान्त इत्युक्तम् चक्षवा
देः प्रामाणिकत्वेऽनुनासिकयोग्यस्य यस्याप्यणसम्भवादितमसङ्गतमेव स्यात् सुध्युपास्य इत्यादौ तु यणोऽनुनासिकप्रवृ
त्तियोग्यत्वाभावेन तत्सत्त्वे बाधकाभावात् अत्रैव गमकान्तरमाह भोभगो इति तत्र त्यवार्त्तिकेन कथमेतावल्लब्धमत
आह अणोऽप्रेति एतन्निमित्तकार्यस्य कार्यिणोऽभावादित्यर्थः [illegible]स्मिन्नर्थे तदग्रिमव्याख्यानभाष्यविरोध इत्यत आह न
ह्यन्यत्रेत्यादि अत एव प्रकृतसूत्रे शेषग्रहणस्य प्रयोजनाभावो[illegible]व। वाक्यसंस्कारपक्ष इति यद्यप्यस्मिन्पक्षे सर्वकार्याणां

र्थतया भ्राजिग्रहणस्योपक्षीणत्वादिति चेत्। विभाड् विभ्राक [illegible] निरूपद्रवं साध्यम्। तच्च व्रश्चादिसूत्रे राज इति पठित्वापि
सुसाधम् एकस्य भ्राजतेर् ऋकारस्य प्रागा [illegible] दातुं शक्यत्वात्। [illegible]जभासेति विकल्पस्य वाचनिकतया ऋकारस्यास्मिन्नेव पद
मात्रफलकतायां वक्ष्यमाणत्वेन तत्स्थानेऽकारस्यापि दातुं शक्यत्वात्। एवञ्च ऋकारानुबन्धकस्य व्रश्चेति सूत्रे ग्रहणात्त
स्य विभ्राडिति रूपमन्यस्याकारानुबन्धस्य विभ्रागिति भविष्यतीति भावः। तस्मात्सीरदेवोक्तं ज्ञापकं सम्यगेवेति शब्दरत्ने सी
रदेवोक्तमिति। अत्रारुचिप्रयोजनं तु व्रश्चादिसाहचर्येण धातुसञ्ज्ञकराजेर्ग्रहणस्यादेवञ्च भ्राजन्तर्गतस्य राजेरधा
तुत्वान्न तेन तत्र षत्वसिद्धिरिति भ्राजिग्रहणस्यावश्यकत्वम्। किञ्च भ्राजन्तर्गतराजेर्न ऋकारानुबन्धत्वं तस्य समुदायानु
बन्धत्वादिति समुदायानुबन्धे हि नावयवानुबन्धः तस्थस्थमिपामिति सूत्रे चतुर्णां भेदेनोपादानात्। अन्यथा तस्थपामि
त्येव वदेत्। तेन महिङो ङकारस्य तिङादिप्रत्याहारार्थत्वेन समुदायानुबन्धतया महिप्रत्ययस्य
न ङित्त्वमिति सम्प्रच्छिमह इत्यत्र सम्प्रसारणाभाव इति। यत्तु अस्यामर्थवस्य परिभाषायाम् ऋकारस्य समुदायावय
वोभयोरुपकारकत्वसम्भवेन राजग्रहणे न भ्राजिग्रहणस्यादेवेति तन्न। तत्रत्यऋकारस्य समुदायोपदेशप्रयुक्तत्वे
वेत्सञ्ज्ञावाच्याव्यवसितानुनासिकस्यैवेत्सञ्ज्ञाविधानात्। एवञ्च यदुपदेशप्रयुक्तापक्षेत्सञ्ज्ञा तस्य तदुपकारकत्व
मित्युभयोपकारकत्वासम्भवात्। नन्वेवं सति याटष्टकारस्य समुदायानुबन्धत्वेन रमायै इत्यत्राटश्चेति वृद्धिरिति मा

चोनलेखनासङ्गतिरितिवाच्यम् ज्ञापकसिद्धस्यासार्वत्रिकत्वेनशरीरावयवत्वस्यपादाधवयवत्व वाहुल्यादेशरीरावय
वत्वस्यलोकप्रसिद्धव्यवहारेणचप्राङ्भस्तथाभिधानात् यत्तुवृश्वादिसाहचर्य्येणधातुसम्बन्धकानामेवग्रहणेछष
विषयेपिसाहचर्य्याच्छषान्तधातोरेवग्रहणंस्यादेवञ्च निड्भ्यंगनिड्भिरितिरूपासिद्धिरितितन्नः तत्रापिनिजूभ्यांनि
जूभिरितिरूपाभ्युपगमात् यदितुनिड्भ्यामित्यादीष्टं तर्हिसाहचर्य्यानित्यत्वेनसाधनीयम् यदपिफूणादिभिन्नेराजा
वतिप्रसंगनिवारणायकृतस्यराज्ञइत्यत्रऋकारस्ययदिनराजुपकारकत्वंतदाऋकारपाठवैयर्थ्यमितितदपिनसमु
दायोपकारकत्वेनतस्यचारितार्थ्यात् तपरकरणादिति· प्रकृतसूत्रेतुनफलम् ऋकारादिवधातोरप्रसिद्धत्वात् ऋक
रांयतीत्यादाविति· आदिनाऋकारइवाचरतिऋकारीयतीत्यस्यसंग्रहः नगृह्यतेव्याख्यानादिति· एतत्सूत्रभाष्येयत्
क्रियाइतिवचनेनोपसर्गग्रहणेनधातुग्रहणंसिद्धं पुनर्धातुग्रहणंसोपसर्गोङ्गतिधातोरूढिर्यथास्याद्यदन्यत्प्राप्नो
तितन्माभूत् किञ्चात्रप्राप्नोतिर्हिस्वस्यशीघ्रोपस्थितिकतयातद्ग्रहणंसिध्यात्वं ऋत्यकइतिप्रतिपादितम् यद्यस्मिन्सू
त्रेऋतिसोत्रोविवक्षितस्यात्तदाधातुग्रहणसत्वेसौत्रस्यशीघ्रोपस्थितिकतयातद्ग्रहणंसिध्यति अन्यथाऋतीयस्यव
र्गग्रहणमेवऋत्यकइतिवत्सम्भाव्येततश्चपुनर्विधानार्थत्ववर्णनमसंगतस्यात्तेनसौत्रएवगृह्यतेइतिनेतिव्याख्यानादि
त्यर्थः अतएवधाताविति किमर्थम् इहमाभूत् प्रर्षभवनम् एतत्प्रत्युदाहरणंभाष्योक्तंसंगच्छते ।यदुक्तंपूर्वस्यपरस्यस
मुदा[illegible]स्येतितत्फलमाह तद्वर्णमात्रवृत्तीत्यादिना· एवञ्च वि[illegible]शिष्टधर्मातिदेशोनेतुवर्णवृत्तिधर्मस्येतिसिद्धवचन
मितियोजना असिद्धवचनमिति· असिद्धत्वबोधकंवचनमि[illegible]त्यर्थः उक्तार्थेवार्त्तिकसम्मतिमप्याह तदुक्तमितिवार्त्तिक

कृतेतिशेषः अत्र प्राञ्चस्स्थानिवत्सूत्रेणागतार्थमेनन्सूत्रमिति [illegible]न्नयुक्तमित्याशयेनाह क्षीरपेइत्यादिन चत्रोत्तरपदत्वा
[illegible]त्र[illegible]त्वत्रातिदिश्यते एकाच्त्वं तु तस्य स्वतस्सिद्धमिति सम[illegible]ते एकाजुत्तरपदकत्वमर्थसमाजग्रस्तमिति स्थानिवत्त्वे
नैव निर्वाह इति वाच्यम्‌ एकाजुत्तरपद इति सूत्रे समासनिर्देशेनैकाज्वयववकत्वविशिष्टोत्तरपदकसमासावयवपूर्व
पदस्थत्वस्य निमित्ततावच्छेदकत्वेनाश्रयणात्तच्च विशेषणीभूताल्घटितमेव किञ्चात्र सौत्रस्थान्यादेशभावो वा आ
नुमानिको वा उभयथोत्तरपदसत्वमत्रातिदेष्टुमशक्यम्‌ औनस्थानिनि पूर्वापरघटितसमुदाये तस्याभावात्‌ अनुमानिका
देशास्तु क्षीरपेणेति तस्य स्थानी क्षीरपइनेति तस्मिंस्समुदायेपि नोत्तरपदत्वमिति तस्यातिदेष्टुमशक्यत्वादिति भावः।
भीइभीयइति आत्वपक्षे भियोहेतुभये षुगिति सूत्रेण षुगागमवारणाय भियइति सूत्रे ईकारप्रश्लेषः कृतस्तन्निर्देशोयम्‌
येत्वरूदितामित्यन दृष्टान्तेन स्थानिवद्भावमुपपादयन्ति ते मान्याः तत्र तसस्तामादेशे तस स्थानिवद्भावे न सावधानक
त्वसम्पादनसमयेन कथमप्याश्रयणमिति वैषम्यं स्पष्टमेव तथा प्राचाम्पूर्वापरविरोध इत्याह किञ्चेति अभीयादित्याध
सिद्धिरिति इणो यण उपसर्गास्परत्वस्यातिदेशेन लाभसम्भवात्‌ अचः परस्मिन्नित्यस्येति पूर्वसूत्रापेक्षया चः परस्मिन्नि
त्यनेनाभावोप्यतिदिश्यत इति पूर्वापरविरोधो दर्शितो नत्वयमित्युभयत आश्रयेणाप्युतदरप्रवृत्तिविनिगमनाविरहा
च्च यत्तूभयत आश्रयणे प्रवृत्तिसन्देहे भयोरप्रवृत्तिस्स्यात्स्लायतेइत्यस्यासिद्धिः अत्रायत्तिपरत्वं न कार्यिरेफविशेष
ण निलयते दुलयते इत्यादौ चरितार्थस्य स्लायते इत्यादौ व्यवहिते प्रवृत्तिर्न स्यादत उपसर्गविशेषणमेवास्त्वस्लायतेइत्यत्र ल

भै.
५४

त्वंस्यानिवर्त्त्वेनैवसाधुनीयमितिभावः पदद्वयसद्वयसम्बन्धित्वेनवर्णद्वयनिमित्तत्वेनाश्रयणंनशास्त्रबोध्यंकिन्तुत्रसुग
न्तायुगास्यपदद्वयसम्बंधिवर्णनिमित्तकत्वंवाच्यम् तच्चविसर्गस्यापीत्याहगुणस्येवेतिकार्य्यकालपक्षेत्रिपाद्यामसिद्धपरि
भाषाप्रवृत्तिरितिप्राचीनसम्मतोर्थोनोचितइत्याहः किञ्चेतिअनयाअसिद्धपरिभाषयाविनिगमानाविरहादितिग्रन्थस्य
नुमानयोःसमत्वमभ्युपगम्येदम् उक्तेर्थेभाष्यसम्मतिमप्याह अतएवेतिकार्य्यकालपक्षेप्यप्रवृत्तेरित्यर्थः इमामिति
एवंहीत्याद्युक्तामः तत्रहिनार्कुरेणापत्यइत्यत्र न विसर्गनिवारणापारब्धस्यविसर्जनीयोत्तुत्तरपदइतिवचनस्यप्रत्याख्यानायप्र
वृत्तम्बहिरंगपरिभाषयासमाधानमयुक्तंकिन्तुवचनेनसमाधानंकार्य्यमतत्रतत्रसंयोगान्तस्यरदाभ्यांनिष्ठातःक्षियोदी
र्घात्खरवसानयोरित्येषुसत्रेषुवचनानीतिसंयोगान्तलोपयणःप्रतिषेधःतथाकार्त्तिरित्यत्रनत्वव्यावर्त्तकंरेफादयुरनि
मित्तात्तथाक्षितिरित्यत्रनत्ववारकनिष्ठानत्वमप्यद्देरितिएवञ्चेदंव्यापकत्वादादरतेव्यमनेनैवसिद्धपूर्वोक्तन्नकार्य्यमूना
र्कुरेविसर्गनिवारकविसर्जनीयोत्तुत्तरपदइत्येववचनञ्चकार्य्यमित्यर्थः उत्तरपदेसतियोरेफः उत्तरपदनिमित्तकइतिय
वत्तस्यनेत्यर्थःनचनार्कुटइत्यादौउत्तरपदस्यनरेफनिमित्तत्वंकिन्तुतद्घितस्येतिवाच्यम् उत्तरपदेसतरकरिआदित्वम
पदेशेनवृद्धिप्राप्ताःपरम्परयारेफस्योत्तरपदनिमित्तकत्वात्[illegible]चैवमपिनार्कत्यिरित्यत्ररेफस्योत्तरपदनिमित्तकत्वाभा
वात्विसर्गोदुर्वारइतिवाच्यम् उत्तरपदशब्दस्योत्तरंयत्पदंअर्थ[illegible]वत्तत्परत्वात्तकत्यत्रन्ययस्यघोस्येनार्थवत्वात् ननुतत्र
वचनारंभेगौरवमतआह ज्ञापकानुसरणमितिसंयोगान्त[illegible]लोपइत्यत्रफलमहणापकर्षस्याप्युपलक्षकमेतत् एवञ्च

राम
५४

विसर्गविधौ उभयथर्क्षु कर्त्तेरित्वर्षीत्यादि संयोगान्तलोपविषये ल्ग्रहणापकर्षे वा तस्मादित्युक्तरस्येत्यादिनिर्देशस्य वाज्ञा
पकत्वमनन्त्यविषये निष्ठानत्वमवच्छेदः वृद्धेः परस्य प्रतिषेध इत्यर्थः थवचनमेव कर्त्तव्यमेव च ज्ञापकानुसरणं वेत्यत्र वाकारो
ऽनास्थायां द्रष्टव्यः यदर्थे क्रियारूपे उपसर्गाः क्रियायामित्यव सिद्धे योगग्रहणं तु क्रियायोग इत्यस्योपलक्षित्वा विवक्षितार्थला
भः सुवन्तप्रकृतिके धाताविति सुवन्तप्रकृतिर्यस्येतादृशोपप्रत्ययः क्यजादिस्तदन्ते धाताविति ननु सुवन्ते धाताविति शेषः
अनुपसर्गत्वादिति क्रियायोगाभावादिति भावः ॥ अथापीति पूर्ववत् व्यञ्जनासमैकेनिनन्हि व्यञ्जनपरकस्यैकस्याने
कस्य वोच्चारणे विशेषेषोऽस्तीत्यत्र व्यञ्जनात्परस्य व्यञ्जनपरं यस्मादिति वा समासद्वयं विवक्षितम् अनवक्लृप्तादिचेति
अत्रादिनामर्षपरिग्रहः यथा नवक्लृप्तिः प्रतीयते तथा स्पष्टयति किंकिलेत्यादिनिर्द्धारणे षष्ठीति सौत्रत्वादेकवचनम् अत्रा
न्यशब्दस्य सापेक्षत्वेपि समासोपपादनं करोति गमकत्वादिति गणे सीमन्तशब्दो नानडावत्तयोरपि निर्दिष्टः केशविशद्
त्यस्य रचनाविशेषविशिष्टकेशेष्वित्यर्थः मृनां ऽडाडादाग त इति एतेनाणप्रत्ययसंज्ञायां पररूपमिति सूचयति अत्राधि
करणस्य हेतुत्वविवक्षया पञ्चमी आगत इत्यस्य भवेत्यर्थः बुधशापवशाद् दितेरुदरे स्थित एव गर्भ अचेतनः सम्पन्नः
पश्चान्नतो निस्सरणे सचेतनोऽभूदिति भारते प्रसिद्धम् शब्दज्ञानानुपातीति शब्दश्च ज्ञानञ्च शब्दज्ञाने ते अनुपातिनो
जनके यस्य शब्दज्ञानानुपातिनी वस्तुशून्यो वा स्यवस्तुशून्यस्तद्विषयित्वाधावत्वानिति यावत् एतादृशो यः प्रत्ययस्स वि
कल्प इत्युच्यते शशशृंगादिशब्दे केनचित्पुरुषेण यशशशृंगवानित्यादिवाक्योच्चारिते इदमशब्दबोध्यस्य दुःखज्ञाय

भै॰
५५

ते॰ दुःखोत्पत्तौ च न दर्शविषयवा शाब्दबोधो हेतुः स च शाब्दबोधः पदार्थोपस्थितिसाध्यः सा चोपस्थितिस्तस्मादेव शब्दाद्भा-
वेति यत्र शाब्दबोधो भवति स उच्चारितशब्दः जन्यः ज्ञानञ्च प्रयोक्तुः परम्परया शाब्दबोधस्य प्रयोजकवाक्यप्रयोगे
वाक्यार्थबोधस्य कारणत्वात् बौद्धपदार्थस्वीकाराच्च एष वन्ध्यासुतो याति खपुष्पधृतशेखरः मृगतृष्णाम्भसि स्नातः
शशशृङ्गधनुर्धर इत्यस्योपपत्तिः शकन्ध्वादिष्विति वचनस्य शकन्ध्वादिषु शब्देषु यथा शब्दा उच्चारितास्तथा येन प्र
कारेण सिध्येरंस्तथा पररूपम्भवतीत्यर्थोऽभियुक्तैरुक्तः तेन टेरिति लब्धम् यत्तु स्वच्छन्दस्याञ्जलिशब्देन समासे य
द्यपि पतञ्जलिशब्दसिद्धिर्भवति शकन्ध्वादौ पतञ्जलिशब्दपाठश्च चरितार्थो भवति तथापि कस्यचिदृषेरञ्जलेप
तिन इत्यर्थे पतञ्जलिशब्दस्तस्यानेन सिद्धिर्न भवतीति सिंहावलोकन्यायेनाह पतञ्जलिरिति त्विति अत एव भगवा
न्भाष्यकार एवं तत्र तत्राह गोनर्दीयस्त्वाहेति तथा चेयमेव व्युत्पत्तिर्युक्तेति सूचितम् ननु च वर्णादौ त्वादि शब्दावयवे
चिवायर रूपमित्यर्थे ओत्वोष्ठादिशब्दस्य विशेषणतया स्यापि पदसम्बन्धिविधित्वेन समर्थपरिभाषोपस्थित्या
समास एव प्रवृत्तिर्भविष्यतीति समाग्रहणं व्यर्थमेव स्यात् ननु तस्याप्यकरणे लाघवमेवेत्यत आह पदविधिरिति
सूत्रस्वरसेन चेति न चैतावता सुबन्तत्वेनेन्यस्य लाभ इत्यत आह सूत्रस्वरसे नचेति अत्र साक्षादुद्देश्येन्यस्य पद
स्येन्यादि॰ तेन पदसञ्ज्ञकसमुदायस्योद्देश्यतायामेव समर्थपरिभाषा प्रवर्त्तते समासो डुलेरित्यत्रौत्वोष्ठयोरित्य
त्र च न पदस्योद्देश्यत्वं किन्तु उद्देश्यविशेषणत्वमिति भावः तत्र सुबन्तत्वेनोद्देश्यसमासादिविधौ स्फुटैव पदत्वेनोद्दे

राम
५५

श्यतापामवृत्तिगतिर्गताविति सूत्रे भाष्ये कैयटेन दर्शितानन च समासादिविधौ समर्थपरिभाषया एकार्थीभावो बोध्य
ते सच्चैकार्थीभावस्साक्षाद्विध्युद्देश्ययोर्विधेयोद्देश्ययोर्वा कल्प्यते· समासविषये विध्युद्देश्ययोरिति ग्राह्यम्। अत्र द्वि
त्वस्याविवक्षितत्वात् हृहू नामपि सङ्ग्रहः कर्मण्यणित्यादौ विधेयोद्देश्ययोरिति ग्राह्यम्· तथा सति महान्तं कुम्भं करोती
त्यत्र नाणिति ग्रन्थासंगतिः कुम्भमित्यस्योद्देश्यत्वाभावादिति वाच्यम्· उद्देश्यपदस्योद्देश्ये सोपपदको द्देश्ये च लाक्षणि
कत्वात् एवञ्च उद्देश्योपपद विधेयानामपि क्वचित्सकल्प्यते अत एव मूलकेनोपदंशमित्यादौ मूलकेनेति तृतीयान्तेनेन
सह कल्प्यते उपपदांशे चेद्विशेषणान्तदा तु नः तेन महता मूलकेनोपदंशमित्यसाधु इति ग्रन्थसङ्गतिः· उपपदमतिङि
ति सूत्रे सुप्सुपेत्यस्य निवृत्ताव पियद्त्वेनोद्देश्यतासत्वान्न क्षतिः गतिर्गताविति सूत्रे भाष्ये गताविति किमर्थमन्नन च
तिङन्ते प्राप्नोति तिङन्ते चेदुदात्तवत्वे वेति नियमेनान्यतिङन्तव्यावृत्तेरिति प्रश्नः आमन्द्रैरिन्द्र हरिभिर्याहीत्यत्र मन्द्र
शब्दे परे आङो पि निघातव्यावृत्त्यर्थम्· गताविस्युक्तमित्युत्तरम् अत्र कैयटः पदाप्रयोगनियमे धातोः प्रागेव प्रयो
क्तव्याइति तदोपसर्गत्वेपि प्रकृते छन्दसि परेपीत्यनेन नियमबाधेन व्यवहितप्रयोगसिद्धिस्तदा गते एङो निघात
स्स्यात्· यदा तु सन्ज्ञा नियमपक्षो धातोः प्राक् प्रयुज्यमानानामेव गतित्वमेत्त्वे तदात्र न गतित्वमिति नैतं ङ्ता विन्यस्य
प्रयोजनमिति न च मन्द्रैरित्यस्मिन् मन्द्रशब्दात्प्राक् प्रयोगात्स्यादेव गतिसञ्ज्ञेति वाच्यम्· यत् क्रियायुक्ताइ
ति वचनात् मतिक्रियायोगस्तत्प्राक् प्रयोगे सत्येव गतित्वमिति मन्त्रत्यगतित्वादिस्युक्तम्भाष्ये तत्र कैयटः पत्रप

रनिमित्तोयादानन्तत्रैवयत्क्रियायुक्ताइत्यस्योपस्थितिः यथोपसर्गस्य घृत्रीत्यादौ प्रकृते तस्यानुपादात्रपत्क्रियायु
क्ताइत्यस्योपस्थितिरिति शङ्क्यपदस्येत्यधिकारात्पदविधित्वात्समर्थः परिभाषोपस्थानादेतद्दोषलाभइत्याह
येनगतेस्सामर्थ्यन्तत्प्रतिप्रयोगस्सतस्मिन्परेनिहन्यतेइत्यर्थइतिभावः वस्तुतइदंचिन्त्यम्· एकार्थीभावविष
येएवसमर्थपरिभाषाप्रवृत्तेः तद्विषयत्वन्नप्रकृते क्रियावाचकस्येतिस्पष्टमेवननुप्रागुक्तभावविषयएवसमर्थप
रिभाषाप्रवृत्तेस्तद्विषयत्वन्नप्रकृते क्रियावाचकस्येतिस्पष्टमेवननुप्रागुक्तभाष्यस्यतर्हिकागतिरितिचेत्· ययाक्रि
ययाऽव्यवहितपरशब्दवाच्ययायुक्तास्तम्प्रत्येवगतित्वमितिप्रकृतेतुयद्वाच्ययोगस्तव्द्यवहितत्वेनसञ्ज्ञानियम
पक्षेगतित्वाभावोयेनचाव्यवधानन्तस्यक्रियत्वाभावइतिसर्वथागतित्वाभावइतिकिन्तर्हिपाहिशब्दम्प्रतीतिभा
ष्यस्यतद्व्यवहितत्वाद्गतित्वाभावइतिभावः एवंयत्रसुबन्तत्वावच्छिन्नोद्देश्यकविधिसाहचर्य्यन्तत्रापिसुबन्तादा
वेकार्थीभावोभाष्यकारादिसम्वादात्· स्वीक्रियतेइतिबोध्यम्· इतिनिषेधादिति· अनुकरणावयवाच्छब्दस्यानर्थक
त्वंस्फुटमेवनानर्थ·कइतिपरिभाषाविनापिलक्ष्यसिद्धिमाह· आम्रेडितस्येति· वटगितीति· इदंकपोतोच्चारितध्वने
रनुकरणम्· । वैचित्र्यार्थमिमितिमात्रादिलाघवाभावेपिप्रतिपत्तिलाघवयथाभवतितथेनवक्तव्यमितिनियमाभा
वसूचनार्थमित्यर्थः फलकल्पनाभिनिवेशस्त्विति नाम्रेडितइत्यंशस्यान्वाचयशिष्टत्वद्वारावटम्वटगितीत्यादाव
न्यस्यपररूपम्भवतीत्यवंरूपमितिभावः प्रमादकृतमितिः ननुतत्रद्विस्तद्ग्रहणेनाधीयानविदुषोरुभयग्रहणंसिध्य

ति॰ अन्यथा यो धीते वेदं च न त्रैव स्यादिति फलकल्पना कारी तेन दीव्यति खनति जयतीत्यादि यथा पृथगेव निमि
त त्वं न तथा पृथगेव भविष्यतीति भावः ननु ग्रहणकशास्त्रस्य सावर्ण्यविधिनिषेधाभ्यां प्रागनिष्पन्नेरित्यनुप
पन्नम॰ सूत्र निष्पन्ने नाज्झलाविति शास्त्रजन्यशाब्दबोधहेतुत्वे मानाभावादतो निष्पन्नेरित्यसत्ता वद्ग्रहणबोध
कत्वे स्यादि पूरणोनव्याख्यायुक्तेत्याशयेनाह नाज्झलावितीति॰ यद्यप्यतित्र्ऋत्वेऽप्येववचनं तथाप्यनुवृत्त्यैतादृशा
र्थलाभ इत्याह॰ सूत्रस्येति॰ वार्त्तिकद्वयविधेययोरप्रसिद्धत्वाद्विलक्षणात्वं वार्त्तिकारम्भेणैव ज्ञायते एवञ्चाच॰
कार्य्यसिद्धिः कथमत आह एतद्विधेययोरितिनरपरत्वमिति प्रथमणाकारेण णग्रहणस्यैव तस्मिन्सूत्रे निर्णीतत्वा
त॰ अत एव द्विमात्रत्वादेव रेफद्वयवत्ता हयेति॰ स्थानार्थगुणप्रमाणेति चतुर्विधमेवांतरतम्यमिति नियमस्यो
रणिति सूत्रे अनानन्त्यमेवान्तर्य्यमिति भाष्यकृतोक्तत्वेनत्यागादिति भावः कदाचिद्द्विवृत्तस्येति प्रसिद्धस्य दीर्घ
ऋकारस्येत्यर्थः द्विलकारस्येति॰ वार्त्तिकविधेयस्यैषत्स्पृष्टस्य दीर्घल्ऋकारस्य त्वान्नात्र सिद्धत्वादिति भावः रेफ
वत्तासाम्येन चेति॰ यो हि द्वयोः षष्ठीनिर्द्दिष्टयोः स्थाने भवति लभते सावन्यतरतोपदेशमिति भाष्यकृतैवो क्तत्वेन
पूर्ववृत्तिधर्मवत्त्वेनोत्तरवृत्तिधर्मवत्त्वेन वा साम्यस्य ग्रहीतुमुचितत्वादिति भावः तदेव भाष्यमिति प्रत्याख्यानप
रभाष्यमेवेत्यर्थः तदेवोपपादयति द्वि रेफत्वे हीति॰ अवश्यमंगीकर्त्तव्यमिति । ऋवर्णमात्रस्येति तु पक्षान्तरेणैति
भेदेनाप्रतिभासमानेष्विति॰ उकाराद्यवयवेष्वित्यर्थः प्रातत्रीं तमित्यत्रेति एतेन मूलेवार्त्तिकव्याख्यानावसरेऽभि

नोज्झभक्तेरितिपदुक्तन्नद्वार्तिकविधेययोरेवेति शङ्काव्युदासः रेफात्परंभक्तेरिति रेफाङ्गक्तेः परमितियोजनात
थैवोचितत्वादितिअभितोऽभागस्योचितत्वादितिभावः वार्त्तिकविधेययोर्यत्रसाधुत्वन्तद्विषयन्दर्शयति अत्रह्रस्व
वृत्तिऋतीतितपरकरणेनह्रस्वस्यैवस्थानित्वलाभात् पूर्वस्यपूर्ववार्त्तिकविधेयस्यह्रस्वऋकारेतिपदेन्तइतीतिएत
दनइतिवक्ष्यामीतिभाष्यात् ऌकारेति तस्यैवद्वितीयेउपपादनात् अतएवउक्तव्यवस्थाश्रयणादेवेत्यर्थः सावर्ण्ये
न्नकार्य्यमिति सावर्ण्यस्यहोत्ऌकारइतिस्थितेसवर्णदीर्घरूपंयत्फलंतस्यनिनवार्त्तिकेनैवसिद्धिर्भविष्यती
तिवार्त्तिकस्थवाशब्दस्यचरितार्थत्वम् एवञ्चवार्त्तिकेऋतइतिकरणेहोत्ऌकारइत्यत्रैवद्वितीयवार्त्तिकविधेयो
भविष्यतइतितत्रसवर्णग्रहणानुवृत्तिर्नकार्य्येतिभावः वार्त्तिकविधेययोरीषत्स्पृष्टत्वेप्रमाणमाहउपस्थि
तेतिएतेनान्यप्रयत्नकत्वशङ्कानिरस्तानतुप्रसिद्धऋकारस्यप्रयत्नएवास्त्वित्यतआहविवृतत्वेहीतिअनयोर
पिदुकारत्वस्योपपादितत्वात् नचापदान्ताच्चेदभवतीति नचात्रशापिगुणेसन्निपातपरिभाषयानपररूपमि
तिवाच्यम् विभक्त्यैश्चेर्न्ङसिङसोरेवेतिनियमपरतयापिसूत्रसार्थक्यसम्भवात् हरयः असुनवमित्यादिव्या
वृत्त्यर्थंस्यात् स्फोटायनेति स्फोटस्यऋषेरपत्यमित्यर्थः अतएवतन्निवृत्तिस्वीकारादेव ननुसन्निपातपरि
भाषयावडादेशोहतेदीर्घोनस्यादतआहसन्निपातेति देवत्रातइति क्तिच्क्तौचेतिसंज्ञायांक्तेनुदविदेतिननत्व
मन्नगलइति अचिविभाषेतिलत्वंप्राण्यवयवेनित्यंग्राहइतिजलचरेतिविभाषाइतिग्रहणप्रत्ययएवइति

यो ग[illegible]तेहन्तीतिपलायतइत्यादौलक्षणाहेत्वोरितिशत्रादिवानायनेऽवङ्नित्यव्रतविषयेशाकोरितिनित्यमेवेत
म[illegible]नत्वादयोमिथोनविभाष्यन्तेएकस्मिन्विषयेपर्य्यायेणानभवन्तिअन्याअपिव्यवस्थितविभाषाभाष्यप्रामा
ण्यान्नत्रतत्रस्वीकार्य्यानतुस्वेच्छयातदाशयेनाह· अग्नीत्प्रेषणइतीतिः अग्नीध्रः प्रेषणोयद्वाक्यंतस्यादेस्तस्मात्प
रस्यचप्लुतोभवतिसयथाआश्रावयेत्यत्रभवतितथाअग्नीदग्नीन्विहरेत्यत्रापिस्यादित्यर्थः नन्वत्रापिव्यवस्थित
विभाषास्वीकारेइन्द्रेचेतिसूत्रंव्यर्थमित्याशङ्क्यनिराचष्टेनचेतिएवञ्चभाष्यतात्पर्य्येविषयएवव्यवस्थितविभा
षात्वमितिसिद्धम्। इन्द्रावयवेचीति· अवयविनआधारत्वविवक्षायांसप्तमी· अत्राप्यचीत्यनुवर्त्तमानविशेष्य
समर्पकमेवतदुक्तम्न्यायोनैवंविज्ञायतेइन्द्रेऽचीति· किन्तर्हिअचीन्द्रइतिनचेदानीमप्याक्षेपादुत्तरपदभूतेन्द्रश।
ब्दावयवेऽचीतिव्याख्यानेनानुपपत्तिस्समानैवेतिवाच्यम्· अचीत्यनुवृत्तिसामर्थ्यात्तथार्थकल्पनात्सामञ्जस्य
मितिप्लुतप्रगृह्याइत्यस्यप्रथमान्तत्वात्। अचीत्यनुवर्त्तमानइतिनचाज्ग्रहणानुवृत्त्यभावेपिप्लुताः प्रगृह्याप्रकृ
त्याइत्यनेनैवसामञ्जस्येऽज्ग्रहणानुवृत्तिसामर्थ्यादुक्तार्थोभविष्यतीतिवाच्यम्· अनुवृत्तिसामर्थ्यात्तस्मिन्नितिप
रिभाषायाः षष्ठ्यन्तपदरहितायाअप्युपस्थितिस्सम्भाव्यतेत्याशयात् आश्रयादितिअनुवादसामर्थ्यादित्यर्थः वाग्रह
णानिवृत्त्यैवेतिसर्वत्रविभाषेतिसूत्रादनुवर्त्तमानस्यविभाषाग्रहणस्यइन्द्रेचेतिसूत्रेसामर्थ्यान्निवृत्तेरुक्तत्वात्।
अयमेवेतिएतच्चमूलएवेत्युक्तम् प्रथममपाविपरिणम्यतइतिइवइत्यस्यजसन्तस्यविशेष्यस्यानुरोधात्· पञ्चम्याः

कृतार्थत्वात् विकल्पसिद्धिरिति शाकल्यग्रहणान् सिद्धस्य विकल्पस्य सिद्धिरित्यर्थः तदसम्बन्धइति प्रकृत्येत्यस्यास
म्बन्धइत्यर्थः आवश्यकत्वेनेति॰ उत्तरसूत्रेऽवश्यंतथा वक्तव्ये पूर्वसूत्रे तथास्त्विति भावः नचह्रस्वाभावे प्रकृति
भावार्थश्चकारोस्त्विति वाच्यम्॰ भाष्यप्रामाण्येन ह्रस्वप्रकृतिभावयोरेकत्रैव प्रवृत्तेस्स्वीकारात्॰ यत्रैकस्याभावस्त
त्रापरस्याप्येवाङ्गीकारात्॰ तथासति चक्र्यत्रेत्यस्यासिद्धिरत आह चक्र्यत्रेति इति वार्त्तिकमिति॰ सिन्नित्यसमा
सयोः शाकलप्रतिषेधो वक्तव्य इति वार्त्तिके ष्वण निर्देशः इति णसिति पर्श्वनां समूह इत्यर्थ इत्यादि पदत्वमिति तेन गु
णाभाव इति भावः वह्वृच्छकइति अत्र वहुजवयवोकारस्यापदांतत्वंसुलभमेव एतेन वह्वृच्छकइत्यस्यव्यावर्त्यंला
भेनव्याख्यानादिति पूर्वसूत्र प्राप्तियोग्यस्यैवोदाहरणस्य भाष्येउपन्यासमूलकात् सित्साहचर्य्यमूलकाद्व्याख्यानादि
त्यर्थः प्रथमोपात्ते तिलोके प्रथमोपात्तेएव प्रथमं जिज्ञासोदयस्यानुभवसिद्धत्वात् यस्मृतिसंभाषते इति एवञ्चाशी
र्वचनम्प्रत्यभिवाद इत्येवनकिन्तु यद्गुर्वादिवक्तिस्वीयानुग्रहसूचकवाक्यमात्रमाशीर्वचनरूपंवातत्सर्वम्प्रत्यभि
वादशब्दवोध्यमिति भावः विधेयत्वादिति॰ सम्वोध्यतावच्छेदकत्वेनाभिमतोयोधर्मस्तदवच्छिन्नस्य यत्रसिद्धत्व
न्तत्रैवसम्वोधनविभक्त्यंगीकारात्नभवेत्यस्याप्युपलक्षणमिति॰ आयुष्मान् भवसौम्येति वाच्योविप्रोभिवादन इ
ति ...नुसम्वादात् नन्वेधीति प्रयोगस्तर्हि निमूलएवेति चेन्न मनूक्तोभवेतिपत्तदर्थपरमित्यभिप्रायात्॰ अत्रैवकिम्मा
नमि...चेत्॰ आयुष्मानेधि अग्निभूताई इत्यनुपदमुदाहरिष्यमाणभाष्यप्रयोगएवेति गृहाण॰ शर्मान्तन्नामेति॰ य

त्रशर्मा[illegible]दि प्रयोगस्तत्र तस्य तदवयवत्वन्न तु तदन्तमेव नाम उक्तः भाष्यप्रयोगस्यैवात्रापि मानत्वादिति भावः त्रि
या[illegible]पीति तद्विषयेन थैवोदाहृतत्वात् नाम गोत्रमेवेति असौ नामाहमस्मीति स्वन्नाम परिकीर्त्तयेदिति मनुवचने
नामपद गोत्रस्याप्युपलक्षणम् प्रत्यासत्त्येति वाक्यसम्बन्धि दित्वसिद्ध्यर्थमेतस्य वाक्यान्तत्वम् गोशब्दस्याप्रा
प्नइति अस्य नामगोत्रभिन्नत्वात् दूरत्वस्यानियतत्वादाह यावति देश इति प्राकृतेति स्वाभाविके इत्यर्थः उपलक्षण
मिति एवञ्चाव्यानाभावेपि न क्षतिरिति भावः तत्र मानमाह अत एवेति उक्तार्थाङ्गीकारादेवेत्यर्थः समावेश इति।
लघुगुरुसञ्ज्ञे वर्णस्य नदोसञ्ज्ञे तु तदन्तस्येति समावेशसिद्धिः अत्राकडारसूत्रे इति पाठे रेफानानुकरणादाग
नुनाऽकारेण निर्देशो बोध्यः केवलाभ्यामपीति यत्र नामग्रहणस्यात्मनामेत्यादिना निषेधस्तत्रागच्छहे हे इति प्रयो
गदर्शनादित्यर्थः नचैवमपि हेशब्दस्य समभिव्याहृतपदगतशक्त्युद्बोधकत्वरूपद्योतकत्वस्यानुपपत्तिः समभि।
व्याहृतस्य तादृशस्य पदस्याभावादिति वाच्यम् प्रादेशा विमाप परिलिखतीत्यर्थे विधानस्य वाक्यैकदेशान्वयिन प्रादेश
परिलिखतीत्यस्य तादृशार्थबोधकत्वेन लड्टकस्य विशब्दस्य यथा विमानक्रियाक्षेपकत्वव्यवहारस्तथात्रापि स्व
घटिताग्रहणायोग्यनामघटिताग्रहणायोग्यनामघटितवाक्यार्थे आगच्छहे हे इत्यस्य वर्त्तमानत्वेन द्योत्यत्वोपपत्तेः ए
वञ्च दंस्तत्रन्नियमार्थमिति सिद्धम् हेहेऽन्त इत्येवमिति वाक्यसंटेरित्यधिकारादन्यग्रहणमनर्थकमिति नशङ्
क्यम् अन्तग्रहणाभावेऽधिकारबलादनन्त्ययोस्तयोः प्लुतस्याप्राप्तौ व्यर्थमित्येतत्सूत्रं स्यादित्याशयात् हैहयो

रितित्तु यत्र हैहे ह्वयोः प्रयोगस्तत्र हैहे सम्बन्धिनोऽन्यस्यापि प्लुतो भवतीति प्लुतयोरेकत्र समावेशः स्यादित्येवमर्थमप्र
योगग्रहणं सत्त्वे तु हैहे प्रयोगे इत्यस्यानुवाद्यसमर्थकत्वं हैहेयोरित्यस्य च विधेयबोधकत्वमिति निश्चयो भवतीति स्था
सिद्धिः स्वसिद्धान्तमाह केचित्त्विति एकमिति आद्यमित्यर्थः प्रयोगे हैहयोरिति निर्देशेऽपि प्रत्यासत्त्या हैहे प्रयोग इति ल
भ्यत एव तन्त्वेवमपि हैहयोरित्येवास्तु प्रयुज्यमाने सतीत्यध्याहारेणैव वाक्यार्थपर्यवसानं भविष्यतीत्यत आह प्रयो
गइतीति प्रयोगग्रहणाभावे हूराद्धूत इत्यस्यानुवृत्त्या हूयमानार्थत्वं यत्र तत्रैवेति कल्पनया हैरामेत्यादावेव स्यादि
तिभावः अन्यथा प्रयोगे ग्रहणस्यानर्थक्ये हैहयोः प्लुतार्थत्वाभावेन हैहयर्थ्यं स्पष्टमेवेति सति तु प्रयोगशब्देन तत्सामर्थ्या
दानर्थक्ये यत्र तयोः प्रयोगस्तत्र तयोः प्लुतसिद्धिः अप्राप्ते विध्यर्थमिति राम है ३ इत्यादौ सामर्थ्यादन्यस्य हूयमाना
र्थभिन्नस्य स्यादिति भावः अत्र केचिदिति दर्शनेनारुचिं कल्पयन्ति यद्यपि सर्वं भाष्यकैयटारूढं तथापि हैहयोः प्र
योगे इत्यनेन प्रत्यासत्तिन्यायेन षष्ठ्युच्चारणासामर्थ्येन च तयोरेव प्लुतसिद्ध्या तद्बाधार्थमेवेति अत्रेदं चिन्तनीय
म् हैहे प्रयोगे हैहेग्रहणं क्रियते हैहयोः प्लुतो यथा स्यात् देवदत्त है३ देवदत्त हे३ अक्रियमाणे हि हैहे ग्रहणे तयोः
[illegible] स्य स्यादिति भाष्ये उक्तम् एतेन हैहयोरित्यस्य प्रयोजनमुक्तम् भाष्ये हैहे प्रयोग इत्यत्र प्रयोगपदोपाद
नात् [illegible] अत्र कैयटः अन्यथारम्भसामर्थ्यादनन्यस्यापि हूयमानवाचिन एव प्लुतः स्यात् देवदत्त हे३ इत्यादौ हूयमान
वाचि[illegible]ः देवदत्तशब्दस्य देवदत्तेत्यादौ पूर्वेणैव सिद्धेरिति भावः तदनन्तरं भाष्येऽथ प्रयोगग्रहणं किमर्थम् प्र

योः [illegible]ग्रहणमर्थवद्ग्रहणेनर्थकार्थम्· प्रयोजनमाह शिवृहेइत्यादौइति· अहंसर्वप्लुतेनिएतत्त्रयहेशब्दस्यपूर्वोक्तरीत्या
हूयमानार्थत्वाभावस्पष्टएवनन्नुसर्वप्लुतप्रकरणस्यायंशेषोस्त्वित्यतआहसर्वप्लुतेनिएतत्त्रयेतिप्रत्यभिवादेऽशूद्रेदूरा
द्धूतेहैहेप्रयोगइत्येतत्त्रितयेस्यर्थः वृत्तौस्पष्टमितिभाष्यन्त्वत्रोदासीनम्· एतद्विहितानामिति· एकसूत्रोपात्तत्वात्·
व्याख्यानादिति· अपिशब्दस्यानन्यसमभिव्याहारेणान्यसमुच्चायकतयाटेरित्यस्यप्रकारान्तरस्यसमुच्चयकत्व
नेलाघवमित्येतन्मूलकादित्यर्थः ननुवाक्यस्यटेःप्लुतउदात्तइत्यधिकारात्तत्तद्विधेयप्लुतस्यापेक्षयाशेषस्यानुदात्त
त्वापत्तिरतआह· अनुदात्तंपदमिति· तत्सूत्रस्थैकग्रहणेनत्रैपादिकोदात्तस्वरितयोरग्रहणादितिभावः व्यवस्थित
विभाषेति· अत्रस्यंमूलम्प्रागुक्तम्· भाष्येतुप्राचामितियोगविभागोनोक्तःकिन्तुविभाषेतिकृतस्तेनप्राचामितियो
गविभागेनसर्वस्यप्लुतस्यवैकल्पिकत्वलाभेपिप्राचामुदीचाञ्चस्वस्वमतप्रच्युतिरूपोदोषोनसम्भाव्यतेइत्याश
येनाहभाष्येत्विति· कैयटइति· नचास्याव्यवस्थितविभाषात्वंकण्ठतोभाष्यकृतानोक्तमितिवाच्यम्· प्रत्याख्यानेन
भाष्यकृतातथासूचनादित्याह अतएवेतिव्यवस्थितविभाषात्वादित्यर्थःप्लुतइत्यध्याहारइति· अन्यथोद्देश्याका
ङ्क्षाशान्त्यभावेनवाक्यार्थपर्य्यवसानंनस्यात्· सनिवर्त्तेति· नचपर्य्युदासपरतयाव्याख्यानेप्लुतसदृशोदीर्घस्स्या
त्· अचूत्वेनसादृश्यात्प्रयणेप्रथमोपस्थितत्वाद्ध्रस्वोवास्यादितिवाच्यम् प्लुतश्रवणाभावेतात्पर्य्यात्जायमानोदीर्घो
नह्रस्वोनउभयथ्यासन्धिकार्य्येणतस्यनिवृत्तिस्स्यादिति· फलतोनविशेषइत्याशयः कस्यचिद्व्याख्यानंदूषयति· प्रस

ज्यप्रतिषेधेनेति॰ अग्नीइतीति॰ अत्रगुरोरनृतइतिप्लुतः वतत्करणाभावेऽप्लुतोद्देशेसवर्णदीर्घोपपत्तेः वत्करणास
त्वेपियत्केनचित्कृतंव्याख्यानन्तद्दूषयति॰ अप्लुतवदित्यस्येतिनत्नुप्लुतस्यप्रगृह्यत्वंदुर्लभमोदितिसूत्रेदीर्घाणामेवस
माश्रयणात्तेषाञ्चानणत्वात् नहिपूर्वम्प्रवृत्तम्प्रगृह्यत्वंस्यानिवद्भावलभ्यमल्विधित्वादतआहप्लुतेकृतेपीतिनप्लुत्र
लक्ष्येलक्षणंसकृदेवप्रवर्त्तम्भवतीतिपुनः प्रगृह्यत्वन्नस्यादिति शङ्कायाम्॰ सञ्ज्ञायाः कार्य्यार्थतयाकार्य्यस्यप्रकृतेप्लु
तोत्तरम्प्राप्त्यापुनःप्रवृत्तेःस्वीकारात्तस्यासिद्धत्वादितिप्लुतस्यासिद्धत्वादित्यर्थः। विभाषाशब्दस्याव्ययत्ववादिमतनि
रासायाह विभाष्यतइति॰ नवेतिविभाषायामर्थस्यसञ्ज्ञाकरणमितिभाष्यप्रयोगोऽत्रानुकूलः ईचाक्रवर्मणस्येतिसू
त्रस्योभयत्रविभाषात्ववादिमतंदूषयति॰ भाष्येत्विति॰ अभावांशवाधकत्वादितिनचसूत्रवाधकत्वादितिवक्तव्येइ
दमनुपपन्नमितिवाच्यमभावांशविधानेपूर्वोत्तरयोर्द्वयोरपिसमत्वेनाभावांशवाधेसूत्रवाधस्यैवपर्य्यवसन्नत्वादि
तिभावः एकञ्चानुपस्थितार्थमेवेदंसूत्रम् उभयत्रविभाषेयमितिमूलस्यत्वयमर्थः।उभयत्रनिमित्तद्वये एतदाहम्मू
लन्त्विति॰ कथञ्चिदितिप्राप्ताप्राप्तविभाषायामेवताद्दृशशब्दप्रयोगस्यशिष्टसम्मतत्वात् अत्रकैयटानुपायिनः वस्तु
तः पूर्वविप्रतिषेधकल्पनेगौरवप्रसङ्गादनुपस्थितार्थमितिभाष्यस्यतदर्थमपीत्यर्थउवित्तः तत्रईग्रहणेननार्थः अ
विशेषेणचाक्रवर्मणस्येत्यादितदुत्तरभाष्येच विशेषेणत्यस्यस्थान्यंशेनिमित्तांशेचेत्यर्थात्कैयटमतस्यसयुक्तित्वमि
तिऽ[illegible]मप्यूहनीयम्॰ विप्रतिषेधसूत्रेपरशब्दस्येष्टवाचकत्वात्सर्वेषांपूर्वविप्रतिषेधानांसङ्गृहीतत्वात्तस्यकल्पना

प्यान्ना[illegible]कल्पना॰ अनुपस्थितार्थमितिभाष्यस्य तदर्थमपीत्यध्याहारेण व्याख्याने एव गौरवम्॰ किन्त्वयदोनरसूत्रे।
ईश्वर[illegible]णान्नास्ति तदायेननाप्राप्तन्यायेन पूर्वसूत्रस्यानुपस्थितेर्विकल्पबाधकत्वस्यैव लाभादपि शब्दपूरणेन भाष्यव्याख्या
नंन्यायाविरुद्धमिति ननु योगस्य सूत्रस्य बोद्देश्यतपाङ्पमिति स्त्रीलिंगनिर्देशोऽनुपपन्न इत्यत आह॰ उद्देश्येति ऐक्य
मापादयत्॰ एकं बोधयत्॰ यं पदार्थम्बोधयितुं यच्छब्दं पूर्वम्प्रयुक्तस्तस्यैव तत्पदेन तत्समानविभक्तिकेन बोधनस्या
नुभवसिद्धत्वात् उद्देश्यलिंगत्वं यथा॰ यद्यत्पापम्प्रतिजहि जगन्नाथ नम्रस्य तन्मे इत्यादावुद्देश्यलिंगत्वास्मरणा
विति सूत्रेऽणो यत्कर्मणौ चेतित्कर्मेति कर्मणा उद्देश्यस्य परामर्शार्थमुपात्तस्यापि प्रकृत्वस्य कर्तैन्यत्र पपुल्लिंगताद्दश्य
तेन नुड्ढिवचनसंज्ञायाः प्रत्ययबोधकतया प्रत्ययग्रहणपरिभाषया तदन्तग्रहणापत्तिरित्यत आह॰ सञ्ज्ञाविधा
विति॰ नन्वचनाडि॰ति पर्युदासबलेनार्थवत एव ग्रहणान्न पुनः प्रत्ययेऽतिप्रसङ्ग इत्यत आह प्रत्ययस्येति॰ स्वातन्त्र्येण
प्रयोगार्हत्वविशिष्टार्थवत्त्वं तु वक्तुमशक्यम्॰ आङो द्योतकतया तस्याप्यतथात्वात्॰ पर्युदासबललभ्यार्थवत्त्वाभिप्रा
पेणाशङ्कायामयं ग्रन्थः एतेन वर्णग्रहणेऽर्थवत्परिभाषाया: प्रवृत्त्यभावेन प्रकृतेऽर्थवद्ग्रहणविचारासंगतिरि
त्यपास्तम्॰ अंतरंगत्वादिति॰ यद्यपि कर्मधारयवहुव्रीह्योरेकार्थीभावसमानत्वथाप्यजहत्स्वार्थावृत्तिरिति पक्षे॰
वयववृत्तिसहकारेणैव समुदायशक्त्या बोधात्कर्मधारय नन्यशाब्दबोधसामग्र्यपेक्षया वहुव्रीहिजन्यशाब्दसा
मग्र्या अन्यपदार्थोपस्थितिघटिततया गुरुत्वेन सामग्रीलाघवगौरवं मादाय कार्ययोरन्तरंगत्ववहिरङ्गत्वम्बोध्य

मै॰
६१

म॰ नन्वेवमेकशब्देन कापि बहुव्रीहिर्न स्यादेव त्रैकाचो द्वे प्रथमस्येत्यादावप्यनुपपत्तिरत आह व्याहरतीति॰ एवञ्च
व्याहरतीति निर्देशात् कर्मधारयस्य हलादिशेष इति सूत्रारम्भाद्बहुव्रीहेः प्रामाणिकत्वेपि अनेन निर्देशेन कर्मधारयस्य
एवेति भावः। पर्युदासस्योचित्यात्॰ असमर्थसमासाकल्पनादेकवाक्यतया शाब्दबोधजननाच्च ओदिति सूत्रे प्रतिषि
द्धार्थोऽपमारम्भ इति भाष्यं तु गम्यमानप्रतिषेधमादायोपपादनीयम् न्यायसिद्धं लिङ्गमप्याह॰ अत एवेति॰ पर्युदासस्या
भिप्रेतत्वादेवेत्यर्थः एतत्पक्षे शङ्कते वासुदेवेत्यादि सति प्रगृह्यत्वे व्ययीभावसंज्ञकस्याशब्दस्याम् शब्दावयवाऽकारे
प्रकृतिभावापत्तेः नच पर्युदासपक्षे आङि न सूत्रव्यापार इति पूर्वान्तवत्त्वेन निपातत्वेपि आङ्त्वातिदेशेन भविष्यतीति
वाच्यम्॰ आङ्भिन्नत्वरूपोद्देश्यतावच्छेदकधर्मज्ञानप्रतिबन्धार्थमेवाङ्त्वातिदेशस्स्यात्॰ अत एव ओदिति सूत्रस्या
स्य ओ षु प्रातन्मित्यत्र प्रयोजनं कथितम्॰ अन्यथा तत्राप्याङ्त्वातिदेशाभावेनानाङिति निषेधाप्राप्त्या भाष्यासङ्गति
स्स्यष्टैव॰ पर्युदासलभ्याशास्त्रीयेपि शास्त्रीयवत्कार्य्यस्योपपादितत्वाच्च न च आ उ ओ इत्यत्रैकादेशे कृते आङ्भिन्न
त्वस्योकारनिष्ठस्यातिदेशेन निपात एकाजित्येव सिद्धे प्रतिषिद्धार्थोयमारम्भ इति भाष्यमेवमप्यनुपपन्नमिति वाच्य
म्॰ आङ्भिन्नत्वस्याशास्त्रीयत्वेनातिदेशालभ्यत्वात्॰ शास्त्रीयत्वञ्च न शास्त्रान्वितत्वम्॰ किन्तु शास्त्रबोध्यत्वमिति॰
स्पष्ट[illegible]मिति निपातस्यैकाचस्सर्वस्य सङ्ग्रहो यथा स्यात् आङ्सदृशस्यैकाचोऽर्थवतो निपातस्यैव पर्युदासवलाद्ग्रह
णं भाष्यम्॰ अनेन रूपेण सादृश्यग्रहणे हि पूरणार्थस्य कमोमिदु इत्यस्य व्यावृत्तिः स्यात् समुदाये ऽच्त्वाभावादिति॰

एम
६१

लक्ष्यत इति शेषः ननु गोऽभवदित्यादौ चानेनओदितिसूत्रेण प्रगृ
अच्त्वस्य प्रत्येक पर्य्याप्तत्वात् अनभिमतत्वमिति
ह्यत्वम्प्राप्नोतीत्याशङ्क्य गौणमुख्यन्यायेन समाहितं भाष्ये तच्च तदा संगच्छते यदि गौणमुख्यन्यायमूलभूताया
अर्थवद्ग्रहणपरिभाषाया विशिष्टरूपोपादानविषयायाः प्रवृत्तिः स्यात् तस्यास्तु प्रवृत्तिमुपपादयति · निपातस
न्नेत्यादि अर्थवतामेवेति · अर्थविशिष्टानाञ्चादीनामुद्देश्यतयोपस्थितत्वात् एतत्परिभाषेति गौणमुख्यपरिभावेस
र्थः। अनित्यत्वादिति। इणः षीध्वमिति सूत्रे ङ्गादिस्युपादानेनार्थवत्परिभाषाया अनित्यत्वस्य ज्ञापितत्वात्तन्मूलि
कायागौणमुख्यपरिभाषाया अप्यनित्यत्वमिति। अव्ययसंज्ञादावित्यादिना प्रातिपदिकसंज्ञापरिग्रहः ननु संबुद्धौ
शाकल्यस्येत्यस्मिन्सूत्रे सम्बुद्धाविति सप्तमी श्रवणेन तस्मिन्निति परिभाषाबलात्सम्बुद्धिपरोय ओकार इत्येव व्याख्या
नं युक्तमत आह सम्बुद्धिपर इति। नच लक्षणप्रतिपदोक्तपरिभाषानुग्रहाय तस्मिन्निति परिभाषानुग्रहाय चतथै
व व्याख्यानं युक्तमिति वाच्यम्। लक्षणप्रतिपदोक्तपरिभाषाया अनित्यत्वात्। निर्दिष्टपरिभाषापि लक्ष्यानुसारा
त्क्वचित्यज्यते। नच लुनातीतिलोः। पुनातीतिपोः। अत्र हि लोपो इति विजन्तस्य रूपम् गोतो णिदिति सूत्रे गोत इति
यथाश्रुतमिति मूते सम्बुद्धौ लोपोइति रूपम्। गकारस्याविवक्षितत्वे तु लोः पोरिति तदा गोरित्यत्रेव स्थानिवद्भावा
त्प्राप्तिः तदवयवौकारस्य सम्बुद्धिनिमित्तकत्वाभावाल्लो इति पोइतीत्यत्र प्रगृह्यत्व प्रयुक्त प्रकृतिभावो न स्यादिति वा
च्यम्। अचः परस्मिन्निति सूत्रभाष्यप्रामाण्येन लोपोइत्यादीनां विजन्तानामनभिधानात्। तत्र हि अपूर्वविधावि ति

किमर्थम्। हे गौः। वाभ्रवीयः। निधेयः। हे गौरित्यौकारः परनिमित्तकस्तस्य स्थानिवद्भावादेङ्ह्रस्वादिति लोपः प्राप्नोति।
पूर्वविधाविति वचनान्न भवति। नैतदस्ति प्रयोजनम् आचार्यप्रवृत्तिर्ज्ञापयति न सम्बुद्धिलोपे स्थानिवद्भावो भवती
ति यदयमेङ्ह्रस्वात्सम्बुद्धेरित्येङ्ग्रहणं करोति। नैतदस्ति ज्ञापकम् गोर्थमेतत्स्यात्। यत्तर्हि प्रत्याहारग्रहणं करोति।
इतरथा हि ओह्रस्वादित्येव ब्रूयादित्युक्तम् अत्र कैयटः। नयतीत्यादीनां विजन्तानां गुणे नलोपोऽइति कथं सम्बुद्धिलोप इ
ति चेन्नैतेभ्यो विच् दृश्यत इत्याह। ओह्रस्वादित्येवेति। सिस्मृतौ शब्दादावप्येवम्। नैतेभ्य इति। एवन्दीर्घैकारान्तप्रकृति
कसे इत्यादीनामेकाक्षरकोशबाधितस्य ए इत्यस्य च सम्बुद्धावभिधानाभावो बोध्यः अत्रेदम्बोध्यम्। ओग्रहणस्य भा
ष्यकृतत्वेन दीर्घौकारान्तप्रकृतिकौकारान्तानामनभिधाने मानाभावः किञ्च द्योशब्दस्य सर्वसंमतत्वेन गोर्थमेतदिति
भाष्यमोकारान्तोपलक्षणतया व्याख्येयम्। किञ्च सम्बुद्धावनभिधानेन भाष्यस्योपपत्तौ सर्वथा विजभावकल्पनानौ
चिता। एवं सति सम्बुद्धौ शाकल्यस्येति सूत्रस्य सम्बुद्धिनिमित्तक ओकार इति व्याख्यानमपि न विरुध्यत इति किञ्चि
त्सम्बुद्धिग्रहणमत्र सूत्रेऽनर्थकम् न चाहो इतीत्यादौ परत्वाद्विकल्पाभावार्थमिति वाच्यम् ओदिति पूर्वसूत्रविहि
तनित्यसंज्ञाया अपरनिमित्तकत्वेनान्तरङ्गत्वात्। इति शब्दसापेक्षत्वेन परभूतविकल्पस्यैव बहिरङ्गत्वात्। न च पू
र्वसूत्रस्य मोन्यदन्निपातपदसम्बद्धमभूदिति प्रकृतसूत्रे निपातपदासम्बन्धबोधकं सम्बुद्धिपदमिति वाच्यम्। यद्येता
व[illegible]त्र प्रयोजनकं सम्बुद्धिग्रहणं तदा प्रकृतसूत्रेप्योद्ग्रहणङ्कर्तव्यन्तेन निपातपदानुवृत्तिर्भविष्यत्यन्यथोत्पदानुवृ

त्ये [illegible]मिदं प्रकृतसूत्रे ओदित्येतत्पदं व्यर्थमेव स्यादिति कल्पनसम्भवादित्याहुः। अत्रेदन्तत्त्वम्। स्वरादिषु पठिते मियोऽ
त्यव्यये प्रगृह्यत्वाभावो यथा स्यादित्येवमर्थं सम्बुद्धिग्रहणमिति उन्नऊमित्येव सूत्रं न योगविभागेन व्याख्यातम् उञ इति
निपात एवेति। प्रतिपदोक्तत्वात्। योगविभागफलं दर्शयति। उञ्नऊमित्येकसूत्रत्वइति। सहविधानादिति। यद्य
पि विधेयभेदाद्वाक्यभेदोऽन्याय्य एव तथापि द्वयोर्वाक्ययोः सहप्रवृत्तिः स्यादित्याशयः एवं सत्यादेशे प्रगृह्यकार्यं इष्ट्य
मत आह। आदेशे प्रगृह्यकार्यन्त्विति न तु उञ इतीति। विधेयतया प्रक्रान्तयोर्द्वयोरेवैकस्मिन्प्रयोगे विकल्पः स्यादिति। तदभा
वेऽपि तात्पर्यो[illegible]ति। शाकल्यातिरिक्तमते प्रगृह्यत्वनुञो नेत्यर्थात्। न च योगविभागाभावेऽपि निरनुबन्धकोकारमादाय
उ इति रूपं सिद्ध्यत्येवेति वाच्यम्। किमः परत्वं यत्र तत्र किम्विति किन्विति रूपद्वयं न स्यादित्यत्र तात्पर्यात्। योगवि
भागे सति उञ इति सूत्रे षष्ठ्यन्तार्थोऽन्वयायाह। उञोवाचकमिति। उञ इति सूत्रे विकल्पफलं दर्शयति। विकल्पाननुवृ
त्ताविति। विपर्य्यापतिश्चेति। अननुनासिकाननुनासिकयोर्द्वयोरप्यादेशोरूपे विशेषाभावादिति भावः। विकल्पमात्रे
ति। शाकल्यशब्दमात्रस्येत्यर्थः। प्रगृह्यत्वमादेशाश्चेति उञ इति पूर्वसूत्रेण प्रगृह्यत्वमूँ इत्यनेन चादेशत्वमित्यर्थः।
ननु प्रगृह्यपदस्योद्देश्यसम्बन्धस्यकृप्तनयेति पूर्वोपपादितरीत्या विशिष्टस्य विधिरिति न युक्तमिति चेन्मूलानुसारे
ण तथाभिधानादित्याशयेनाह। वस्तुत इति। नन्वेवम्प्रगृह्यसंज्ञकश्चेति भाष्यविरोध इत्यत आह। भाष्ये प्रगृह्यसंज्ञश्चे
ति। न्यायविदइति। असति साधके कृप्तसम्बन्धत्यागे मानाभाव इति न्यायेत्यर्थः। न च प्रगृह्यपदस्य प्रथमान्तत्वेन स

भै. ६५

मानाधिकरण्यमेवात्रसाधकमितिवाच्यम्। प्रथमान्तसामानाधिकरण्यस्यपूर्वसूत्रएवत्यक्तत्वात्। ननुमयउ
ञइतिसूत्रेमयुपदेनमयूपथानोरेवग्रहणंकुतोनेत्यतआह। व्याख्यानादिति। वहुलस्यसंस्कारमूलकादित्यर्थः।न
नुप्रगृह्यस्योञः प्लुतप्रगृह्याइत्यनेनकार्यान्तरप्रवृत्तिप्रतिवन्धकेनमयउञइत्यस्यापिप्रवृत्तिप्रतिवन्धःकुतोने
त्यतआह अस्यत्रैपादिकत्वेनेति। अनुस्वारेभवत्येवेति। एतेनत्रिपाद्यांवत्वविधानस्यानुस्वाराभावः फलमितिसू
चितम्। तदुक्तम्मनोरमायाम्। प्रकृतिभावमात्रवाधनार्थत्वेहिइकोयणीत्यनन्तरंमयउञइत्येवावक्ष्यत्। यणञ्चा
नुवर्तयिष्यदिति। नचत्रिपाद्याम्मयः परस्यञोवत्वविधानेपिमयः परत्वमुपजीव्यकृतंवत्वंसन्निपातपरिभाषयाऽनुस्वार
निमित्तन्नभविष्यतीतित्रिपाद्यांवत्वविधानस्यानुस्वाराभावरूपप्रयोजनकथनासङ्गतिरितिवाच्यम्। त्रिपाद्यान्तथापा
ठेनसन्निपातपरिभाषायाअनित्यत्वस्यापिज्ञापनात्। नचत्रिपाद्यान्तथापाठेवत्वस्यासिद्धत्वात्प्रत्यङ् उउक्तमितिस्थितेङ
मुडिकृतेङमुट्शिष्टस्यञ्ग्रहणेनग्रहणेपिनिर्दिश्यमानस्यङमुटाव्यवधानाद्वत्वस्याप्राप्तिः। इकोयणचीतिसूत्रानन्त
रम्पाठेतुङमुटोऽसिद्धत्वाद्वत्वेकृतेऽजादित्वाभावान्ङमुटोऽप्राप्तिरितिफलभेदस्यस्पष्टतयाकथंसन्निपातपरिभाषायाअ
नित्यत्वज्ञापनमितिवाच्यम्। त्रिपाद्यामपिवहिरङ्गपरिभाषाप्रवृत्तिवादिप्राचीननयेऽन्तरङ्गेङमुटिकर्त्तव्येवहिरङ्गस्यय
णादेशस्यासिद्धतयापूर्वङमुटिनफलभेदः नचोभयोरण्यपिपरद्वयसापेक्षत्वेनान्तरङ्गवहिरङ्गभावइतिवाच्यम्। पू
र्वो[illegible]स्यतनिमित्तकत्वरूपान्तरङ्गत्वस्यङमुटिसत्वात्। नचान्तरङ्गपरिभाषाप्रवृत्तिस्वीकारेकिमुक्तमित्यत्रान्तरङ्गेऽनु

राम ६५

स्वाद्येव हि रंगस्य यणादेशस्यासिद्धतयाऽनुस्वाराप्राप्तेरिति कौमुदीमनोरमाग्रन्थयोर्विरोध इति वाच्यम्। मान्तपद
समुदायसापेक्षत्वेन पदसंज्ञासापेक्षत्वेन चानुस्वारस्यापि बहिरङ्गत्वात्। प्राचीननये यवङ्कपेक्षस्य बहिरङ्गत्वं स्पष्टमेव
वस्तुतः सन्नियोगपरिभाषाया अनित्यत्वं न्यासयोरिति निर्देशात् क्लृप्तमेव। बहिरङ्गपरिभाषापि त्रिपाद्यां न प्रवर्तत इ
ति त्वसकृदावेदितमेव॥ ॐ॥ नपरत्वमसन्देहायेति। न च गुणाभेदकत्वपक्षे तथात्वेऽपि भेदकत्वपक्षे गुणानां स्युक्तस
ङ्ग्रहार्थं तपरत्वमावश्यकमिति वाच्यम्। अस्य ग्रन्थस्याभेदकत्वपक्षाभिप्रायकत्वात्। ह्रस्वान्ताभ्यामिति। अस्य पर
स्येति शेषः। तदावश्यकमिति। अर्थग्रहणमावश्यकमित्यर्थः। वैजात्यमित्यस्य प्रकृतसूत्रे इत्यादि। असम्भवादिति। ऊ
कारान्तसप्तम्या असम्भवादित्यर्थः। अनभिधानमेवेतीति। प्रकृतसूत्रस्थभाष्यप्रामाण्यात्तथा कल्प्यत इति भावः। तत्सं
स्पृष्टार्थेति। पूर्वपदार्थसंस्पृष्टाऽधेयार्थवृत्तेरित्यर्थः। एतदुपपादयति। संज्ञायामिति समास इति। जहत्स्वार्थायां वृत्तावि
ति। जहत्स्वयं सजहत्स्वस्तादृशोऽर्थो यस्यामिति बहुव्रीहिगर्भो बहुव्रीहिः। अत्र स्वशब्द आत्मीयवाची अर्थस्य चात्मीयः
शब्द एव। एवञ्च वृत्तेः पूर्वपदार्थसंबन्धी शब्दः स्वार्थं न प्रतिपादयति किन्तु समुदायशक्त्या तदर्थविशिष्टार्थान्तरस्य
यत्र प्रतीतिः सा जहत्स्वार्था वृत्तिरित्युच्यते। वस्तुतस्तु साऽत्र न युक्ता। जहत्स्वार्था तु तत्रैव यत्र रूढिर्विरोधिनीत्यभियुक्तोक्तेः
यथा कुशलप्रवीणादिशब्दे। वाप्यश्व इत्यत्र तु रूढेरभावान्न जहत्स्वार्थता युक्ता। किन्तूपसर्जनपदं स्वार्थमजहदन्यदार्थ।
मप्यभिधत्ते। भिक्षुको हि नीयां भिक्षामासाद्य न पूर्वां जहाति सञ्चयायैव प्रवर्तत इति भाष्यात्। एवञ्च वाप्यश्व इत्यत्र

भै॰
६४

वापीपदवाप्यधिकरणकाश्वपरमितिसप्तम्यर्थमात्रे पर्यवसन्नत्वाभावान्न प्रगृह्यसंज्ञा। अर्थग्रहणसामर्थ्याच्छ्रूयमा।
णायां सप्तम्यां यथा आधेयासंसृष्टाधिकरणप्रतीतिर्भवति न तथा लुप्तायामपि तस्यामाधेयासंसृष्टाधिकरणप्रतीति।
र्यत्र तत्रैव प्रगृह्यत्वस्वीकारादिति न तु सोमो गौरी अधिश्रित इत्यत्र गौरीपदस्य विरुद्धविभक्तिरहितनामार्थयोरभेदान्व।
यस्यौत्सर्गिकतया गौर्यधिकरणकलक्षणास्वीकारान्नाधेयासंसृष्टाधिकरणप्रतीतिरत आह। गौरी अधिश्रित इत्य।
त्रेति। एवं चात्रोभयोर्विरुद्धविभक्तिरहितत्वेपि कारकस्य क्रियायामन्वयस्यावश्यकत्वेन गुणीभूतक्रियायान्तदन्वये।
न वाक्यार्थस्योपपत्तौ लक्षणायां मानाभावइति भावः नित्याधिकारबाधे मानाभावादिति। यस्मिन्नित्याधिकारपाठस्त।
त्र विभाषाधिकारबाधोत्र चात्र तथेति व्याख्यानादिति। अप्रगृह्यस्येति पर्युदासबलान्नानुनासिकादेशयोग्यत्वं परा॥
णासङ्ग्रहार्थत्वे त्वन्यग्रहणमेव कुर्यादित्यणग्रहणसामर्थ्यमूलकादित्यर्थः। आगच्छतमग्नीइत्यत्र प्रगृह्यत्वाप्राप्तिमाशं॥
क्य पूर्वं प्रगृह्यसंज्ञायामपि समाधत्ते। आगच्छतेति। कार्यमेव बीजमिति। न च लक्ष्ये लक्षणस्येति न्यायविरोधइति वाच्यम्॥
।समः सुटीति सविधानज्ञापितस्य ज्ञापकसाजात्येन तस्य संज्ञातिरिक्तविधेयपरत्वस्वीकारात्। ननु प्रगृह्यसंज्ञोद्देश्ये ई॥
कारे न हि द्विवचनत्वमपि तस्यादत आह। द्विवचनत्वन्त्विति। ननु परादिवद्भावेनापि ताद्रूप्यातिदेशो नेत्यत आह। ता॥
द्रूप्येति। ताद्रूप्यस्य वर्णमात्रवृत्तिधर्मस्यानतिदेशेपि वर्णावृत्तिधर्मस्यातिदेशास्वीकारात्। द्विवचनत्वञ्च न वर्णमात्र॥
वृत्तीति भावः। एतदेव दृढयति। अत एवेति सुप्त्वस्यात्र वर्णावृत्तित्वेपि तस्य वर्णमात्रवृत्तित्वाभावेनान्तादिवच्चेत्यनेना॥

एप
६४

त्तिर्देशो भवत्येव । अचः संधिरित्यत्राप्यदेकुत्वस्य च योगे श्चुत्वस्याप्राप्त्यर्थमाह । सिद्धमनच्त्वादितीति । यत्तु संज्ञात्वभंगापत्तेर्नेह कुत्वश्चुत्वे इ
तीति । तन्न प्रत्याहारेऽनुवंधानां कथमज्ग्रहणेषु नेत्यत्र वार्त्तिके जश्त्वस्य एषा ह्याचार्यस्य शैली लक्ष्यते यत्तुल्यजातीयांस्तुल्यजातीयेषूप
दिशन्ति अचोऽस्तु हलो हलुष्विति भाष्यप्रयोगेऽश्चुत्वदर्शनेन संज्ञात्वभङ्गस्याकिञ्चित्करत्वात् ॥ इति स्वरसन्धिः ॥ स्तोः श्चुना । अत्र समा
हारद्वन्द्वे नपुंसकत्वापत्तिः इतरेतरयोगे द्विवचनापत्तिरत आह । स्तोरिति । न च समाहारद्वन्द्व इत्येवास्तु · सौत्रं पुंस्त्वमस्तु · न त्वत्र गौरवम् · भिन्न
विभक्तिकत्वेऽपि सौत्रत्वेनैव विभक्तिलुकः कल्पनादिति वाच्यम् । समाहारद्वन्द्वे सौत्रत्वेन पुंस्त्वकल्पनायां सनपुंसकमिति शास्त्रस्य बाधक
ल्पनापेक्षया विभक्तिलुकः कल्पनायां सुपां सुलुगिति शास्त्रप्रवृत्तिकल्पनायां लाघवादित्याशयात् स्तोः श्चुरिति सूत्रे वृद्धो यूनेति निर्देशाद्
नायितरेतरयोगं तृतीया श्चुना योगस्संबन्धस्स चाव्यवधानरूप एव ग्राह्यः बहुषु बहुवचनमिति निर्देशात् · ष्टुनेत्यत्रापि तथा पूरणगुणसु
हितेति निर्देशात् · तथा च संयोग एव पर्यवसानमित्याशयेनाह संयोग इति तदर्थ इति । ननु पदस्येत्यधिकृतत्तस्य स्तोरिति विशेषणमिति प
दान्तयोस्सकारतवर्गयोरित्यर्थ उचित इत्यत आह · अत्र पदस्येत्यधिकृतमपीति · शादिति ज्ञापकादिति · तादृशार्थस्याभिमतत्वे विश्नः प्रश्न
इत्यत्र श्चुत्वाप्राप्त्या तदर्थमेव स्यादिति भावः शादितिलिंगादेवेति न त्वेकेनैकमेव ज्ञाप्यते · किन्तु यावता विनाऽनुपपत्तिस्तस्य सर्वस्य ज्ञाप्यत्वा
त् । यथासङ्ख्यमिति शेष इति । अत्र यथासङ्ख्यशास्त्रबाधे साधकाभावात् · वैचित्र्यार्थ इति · यद्यप्येतल्लक्ष्यतावच्छेदकाक्रान्तं तथापि
तयोरत्राप्रवृत्तावपि सच्चिदित्यस्य सिद्धिरिति सूचनमेव वैचित्र्यम् लक्ष्यतावच्छेदकाक्रान्ते लक्षणप्रवृत्तेर्न्याय्यत्वानुसारेण तु चुत्वस्या
सिद्धत्वादित्याद्युक्तिः ॥ सम्प्रसारणाभाव इति · न चानेन निर्देशेनैव श्चुत्वाभावस्यापि सिद्धौ शादिति सूत्रवैयर्थ्यमिति शङ्क्यम् · तस्य विश्न

प्र·
८५

इतिप्रयोगार्थत्वात्तन्न त्वेकमुदाहरणं इतिन्यायस्यात्र नविषयता पूर्वोक्तज्ञापनस्याप्येतत्फलत्वात् स्पष्टार्थमिति न च तद्ग्रहणाभावे पद
त्वेन ग्रहणात्समर्थपरिभाषोपस्थितिस्स्यादिति वाच्यम् अत्रैव सूत्रे नामित्यस्योपादानेन समर्थपरिभाषानुपस्थानात् पदत्वेनोद्देश्यत्वा
भावाच्च पृथक्पदे इति दिक्समस्यसन्त्यानामिति नियमेन समासाप्राप्तेः न्यूनताम्परिहर्तुमाह उपलक्षणमिदमिति वलयोरिति कम
ल इति सवृण इतयोरभिधाने कमलमनोरथः इति सवृण आश्विनो तीन्यादावितिशेषः जातिपक्ष इति स्थानप्रयत्नाभ्यामन्तरतमे चारितार्थ्येनैव च
नं सफलमिति भावः व्यक्तिपक्षे न हि दोष एवेत्यत आह व्यक्तिपक्षेपीति सिद्धान्तमाह परेत्विति न दोष इति प्रथमान्तपाठे आदेशसंज्ञैव पिन
दोष इत्यर्थः सवर्णान्न सन्तीति एतेन सवर्णग्रहणापकर्षः सूचितः उपपत्त्यभावादिति प्रमाणे द्वयसजिति सूत्रप्रमाणशब्दस्य परिच्छेद
कपरत्वाच्चितः परिच्छेदकत्वासम्भवात् ननु चिन्मात्रं ग्रहीतिप्रयोगस्य का गतिरित आह मयूरेति ननु यवादिगणे दकारनिपातनादित्यनु
पपन्नम् तत्र प्रकृतिमात्रपाठस्य तत्स्वरूपप्रतिपत्तौ मात्याद्यादित्यत आह यवादिगणे इति न च वावसाने इति चर्त्वेन निर्देशोऽकृतं व्यदकारान्त
पाठे मतुपि विकाराभावार्थ इति कल्पनयैव सामञ्जस्ये समुदायपाठस्वीकारेण मूलयोजनं निष्फलमिति वाच्यम् प्रायोगणेषु प्रातिपदिका
नुकरणस्यैव सत्त्वेन चर्त्वस्याप्राप्तेरित्याशयात् समनियतत्वेनेति त्रयाणां परस्परमव्यभिचरितत्वेन अन्यतमेति त्रयाणां यस्य कस्यचिदि
त्यर्थः एतेनात्र द्वयोर्ग्रहणादन्यतमप्रयोगासङ्गतिरित्यपास्तम् त्रिपाद्याम्परत्वादिति पूर्वसवर्णस्येत्यादि ननु चैवं परे श्वघेति सूत्रे कैयटेनो
क्तमुपघष्येतत्सूत्राभावेपि हलोहलीत्यनेन सलोपे उक्तस्थानस्य सिद्धिस्तथापि हलादेशप्रत्यये तन्नलोप इत्यर्थं ज्ञापनार्थमेतदिति पन्नदिदानीं
विरुध्यते लोपपक्षे हियकाराघटितस्वरूपस्यैव सिद्धिः पूर्वसवर्णे तु हरोहसीति लोपाभावे द्वियकारस्य प्राप्तेरिति चेन्न तत्रत्यकैयटस्य भा

व्यसम्मतोऽष्टाध्यायीपाठाभिप्रायकत्वात्· तदेतत्सूचयति· हल्लोयमामितीति पाठव्यत्यासेप्रमाणमाह· अत एवेति· अन्यथात्रापिथ
स्यासिद्धत्वाच्चर्त्वाभावेथकारस्य श्रवणप्रसङ्ग इति भावः। उत्थानस्यासिद्धेरिति· नचलोपपक्षेउदोदकारस्य चर्त्वेन तस्य द्वित्वे द्वितकारकं
रूपम् सकारस्य थकारादेशेन तस्य पूर्वोक्तरीत्या तकारे पूर्वेन तकारस्य द्वित्वे तकारत्रयस्य श्रवणमिति वाच्यम्· एवंविधे विशेषेपि नहि
व्यञ्जनपरस्यैकस्यानेकस्य वोच्चारणे विशेष इति न्यायमाश्रित्य शङ्कानात् विशेषो नेत्यस्य दुर्लभ्यो विशेष इत्यर्थः। झयो ह इति सूत्रेझ
यरित्यस्य षष्ठ्यन्तत्वे झयः स्थाने ह इत्युचितमिति विपर्यासनिरासायाह· पदान्तादित्यपीति· तेन तत्सामानाधिकरण्याय झय इति पञ्चम्य
न्तमुत्तरसूत्रे· एवञ्च पूर्वसूत्रेपि झय इति पञ्चम्यन्तमर्थाधिकारानुरोधात्· अत एव नीज्झलाविति निर्देशसङ्गतिः। उत्तरसूत्रे झय इत्य
स्य पञ्चम्यन्तत्वे फलमाह· विरपशमित्यादाविति· अत्र विपूर्वाद्रपेर्णादिकः शप्रत्ययः अत एव पृथक्पदत्वादेव परसवर्णपरस्यस
मासमासत्वे एकदेशसम्बन्धेक्लेशः। दंशानमित्यादाविति· आदिना कंसेत्यस्य सङ्ग्रहः। शकारसवर्णाप्रसिद्धेरिति· इदन्नाज्झलाविति सू
त्रस्थत्वाच्चप्राणस्य पञ्चधाप्रयत्नाङ्गीकर्तृमतेन· तेन दीर्घेकारस्य तादृशस्य प्रसिद्धावपि न क्षतिः। शकारसवर्णः शकारो यद्यपि प्रसिद्ध
स्तथापि सनानुनासिकोऽस्मिन्सूत्रे परोऽनुनासिक इत्यतोऽनुनासिकपदानुवृत्तेः। अन्यथा कुण्डरथेनेत्यत्र परे रेफसवर्णस्य रेफस्यैवानु
स्वारस्य स्थाने आपत्तिः स्यात्। अनुस्वारस्यैव स्यादिति· नच सन्यायो यथा न षड् इत्यत्र त्यज्यते तथात्रापि तत्त्यागोऽस्त्विति वाच्यम् तत्र तथा
व्याख्यानस्याकरेक्तत्वेन त्यागेपि तत्त्यागस्यात्रस्वीकारे मानाभावात् तदाह· ध्वनितमिति· तत्र हि मोराजीत्यनुस्वारादिबाधनार्थमित्युक्तम
अत्रादिपदोपादानं हेमपरे इत्येतत्सूत्रविषयेनत्वसङ्ग्रहार्थम्· येनक्रमेणपदज्ञानं पदादुपस्थितिर्वेति· आद्योदाहरणन्तु दीशलानुरेत्यादि

भै· ६६

अत एव स्यतासी लृलुटोरित्यत्र यथासङ्ख्यनिर्वाहः। अन्योदाहरणम्परस्मैपदानां णलतुसेत्यादि· ओतिपक्षे इको यणचीत्यादि च· स्थाना
ख्येति· स्थानश्चात्र क्रमः शप्तुसित्रं विप्रतिपत्तिश्च जयरञ्ज यमञ्जयेत्यत्र यथा· क्रमेण सम्बन्धो यत्र क्रमेणोच्चारणं तत्र· यत्र तु न तथा तत्र ना
लौकिकप्रमाणावसर इत्याशयेन समाधत्ते· तथापीति। नन्वेवमविधेयेऽपि लौकिकप्रमाणैरेव सिद्धिरत आह· आद्यन्ताविति· साहित्ये द्वन्द्ववि
धानादिति· इतरेतरयोगेऽपि साहित्यस्यैव प्राधान्यादिति भावः। लोके तु यत्रासमासेनोच्चारणं तत्रैव क्रमेण सम्बन्धोऽनुभवसिद्धः। अत ए
वाजाविधनौ देवदत्तयज्ञदत्ताविन्युक्ते न ज्ञायते कस्याजा धनं कस्य वेति भाष्ये उक्तम्। आशयः। यद्येवं विधेयविषये क्रमेणान्वयः
स्यात्तर्हि द्वन्द्वघटकानामेकधर्मावच्छिन्नान्वयित्वाभावेन साहित्यस्यैवानुपपत्तिरिति· वाक्यकल्पनेति· प्राथमिकबोधस्तु साहित्याव
च्छिन्ने साहित्यावच्छिन्नस्यैव। यथा राजपुरोहितौ स्वाराज्यकामौ यजेयातामित्यत्र। उत्तरकालिकस्तु राजा स्वर्गकामो यजेत पुरोहितश्च
राज्यकाम इति प्रकरणादिवशाद्बोधः। प्रतिपत्तिकालिकं प्राथमिकवाक्यार्थबोधकालिकम्· प्रवृत्त्युपयोगीति· तेन स्यतासी लृलुटोरित्य
त्र लृशब्देन लृङ्लृटोर्द्वयोः पश्चादुपस्थितावपि नानुपपत्तिः। तमङ्णनमित्यत्र भाष्य इति· तत्र हि मकारप्रत्याख्यानेयमकारेण प्रत्या
हारात्सेन नकारेणैव सन्तु ङमो ह्रस्वादचि ङमुण्नित्यमिति यथा· नर्हीहपदान्तयोर्मकारमकारयोरभावात्यश्चागमास्त्रय आगमिन इति
वैषम्यात्सङ्ख्यातानुदेशो न प्राप्नोतीत्याशङ्क्य येषामागमानामागमिनः सन्ति त एव भविष्यन्तीति प्रतिपत्तिकालिकन्तु सङ्ख्यासाम्यम
स्तीतिपादितम्। एतेय वलावइति· यद्यप्येतेऽनुनासिकस्थानिकत्वादान्तरतम्यादनुनासिकत्वयुक्ताः प्राप्तास्तथापि भाव्यमानेन सव
र्णानाङ्ग्रहणमितिनिषेधान्निरनुनासिका एवेत्यर्थः। अत एवेति· भाव्यमानत्वादेवेत्यर्थः। एतेन तद्धानितिनिर्देशान्मोर्मस्य नानुनासि

राम ६६

कोयक्कार इति केषाञ्चित्कल्पनमपास्तम्· चयो द्वितीया इति वार्त्तिकं निष्पन्नद्वितीयस्य चर्त्वमाशङ्क्याह· एतत्सामर्थ्यादिति· ननु प्रातिशा
ख्यविरोधात्कथमत्र द्वितीयादेश इत्यत आह· ऊष्मोदयमिति· एवञ्च सुगण्ठ् षष्ठ इत्यादौ द्वितीयादेशो भवत्येवेति भावः चर्त्वासिद्धत्वेनेति·
चयो द्वितीया इत्येतद्दृष्ट्या चर्त्वस्यासिद्धत्वादित्यर्थः। अत्र तु· द्वितीये तु। अस्य द्वितीयस्य· ननु अप्सु सरतीत्यर्थकस्याप्सरशब्दस्या
पयवः प्रकारोऽपि चर्त्वनिष्पन्न एवेति भाष्योक्तस्याप्सरा इत्युदाहरणस्यासङ्गतिरत आह· अप्सरा इत्यादि· छन्दसि सर्वविधीनां वै
कल्पिकत्वेन द्वितीयादेशो असिद्धत्वस्यापि वैकल्पिकत्वमिति भावः। पक्षान्तरमाह· यद्वेति· उणादिषु अव्युत्पन्नपक्षस्यैव सिद्धान्तत
त्वात् सप्तमी षष्ठ्यर्थ इति सीति सप्तम्या अप्यकृतार्थत्वात्सकाराव्यवहितपूर्ववर्त्तिनोऽडान्तपरस्याव्यवहितस्य धुडित्यर्थः। सस्येति फलि
तमेवञ्च सप्तम्याः षष्ठ्यर्थे पर्यवसानमिति भावः॥ न च उ इति षष्ठ्यन्तमेवास्त्विति शंक्यम्· स्वलिट् त्सायमा मधुलिट् त्सायमित्यत्र नप
दान्ताट्टोरनामिति ष्टुत्वप्रतिषेध इति भाष्यविरोधापत्तेः। उभयनिर्देशे पञ्चमीनिर्देशो बलीयानिति परिभाषाबलात्सप्तम्यन्तस्य षष्ठ्यन्तत्व
कल्पनमिति तु न युक्तम् तस्मिन्निति तस्मादिति परिभाषयोः प्रवृत्तावुभयोरागमित्वे विरोधस्य सद्भावात्तस्मादिति परिभाषायाः परत्वाद्व्य
वस्थिता। नदादिविधौ विशेषणविशेष्ययोरुभयोः सप्तम्यन्तत्वान्नियामकमित्यत्र विशेष्यस्य परस्य सप्तम्यन्तत्वान्नदादिविधिः। ननु
ट्स्त्वित्यत्र धुट् सिद्धिः। पञ्चम्या विपरिणम्यत इति: एवञ्च नकारान्तात्पदादिति फलितम्। ङमुट्सूत्रस्थभाष्यस्वरस इति· तत्र हि पदावय
वङमः परस्येति व्याख्यातमेवञ्चोत्तरसूत्रे पदस्येत्यस्यैव वैयधिकरण्येन सम्बन्धे पूर्वसूत्रेऽपि तथैवास्त्विति भावः। शि तुगिति सूत्रे शीति स
प्तम्या अचरितार्थत्वान्नत इति पञ्चमी तु पूर्वसूत्रे चरितार्थेति पञ्चम्यन्तस्यैव षष्ठ्यन्तत्वकल्पनमिति भावः। इत्युचितमिति वर्णग्रहणञ्च

भै
६७

सर्वत्रेति तदन्तविधिसम्भवादिति भावः रूपाण्णभाधिक्यस्यापि सम्भवाच्चतुष्टयमित्यस्योपपन्नत्वे आह वक्ष्यमाणेति विशेषणसम्ब
न्धमनुभूयेति गुणः कृतात्मसंस्कार इति न्यायादिति भावः लाघवार्थ इति वक्ष्यमाणरीत्यान्तरादिविद्यर्थमपीति बोध्यम् एतेन सप्त
मीनिर्देशस्य कृतार्थत्वाद्बाधकत्वशङ्कापि निरस्तासिद्धान्तमाह भाष्येत्विति। एतदर्थमेवेति ननु लाघवार्थ इत्येवकारस्य व्यवच्छेद्यम् उच्चा
रणकृतलाघवेपि मनोव्यापाराधिक्येन धिक्गौरवात् अत एव वक्ष्यते हलन्त्यनपुंसके उत्तरपदत्वे चेति वचनस्य भाष्ये प्रयोजनान्य
थासिद्धिप्रदर्शनेन प्रत्याख्यानेपि ज्ञानगौरवेण प्रत्याख्यानस्यायुक्तत्वात् स्थापनमेव कृतमिति परेद्रन्यनुदन्तेरावश्यकत्वमपि द
र्शयति ङमन्तमपदमित्यर्थयीति उत्तरपदस्य यत्र कार्यित्वमिति अत्र पद्कृतेव्यन्तलपदान्तसूत्रे उक्तम्॥ ङमुडागमस्य नित्यत्वादिकोयण
चीति प्रयोगानुपपत्तिरत आह सौत्रनिर्देश इति एवमादिप्रयोगाः संहितायाअविवक्षयापि साधयितुं शक्याः वस्तुतः सनाद्यन्ता धातवः
सुपिङन्तमित्यादिषु बहुषु सौत्रत्वकल्पनापेक्षया इन्निघटकङमन्तपदस्य लेङमुटः क्वाचित्कत्वमित्येव युक्तम्। तेनाणादिसम्तार्थो
नौत्यादिप्रयोगसङ्गतिः। रुप्रकरणविधेय इति तेन सविधानपक्षे सकारस्य लोपपक्षे भावस्योपलक्ष्यस्य सङ्ग्रहः। ल्यब्लोप इति ल्य
पोल्यबन्तस्य विहायेत्यस्य लोपे गम्यमानार्थत्वात्प्रयोगे ल्यबन्तार्थक्रियाकर्मणि पञ्चमीत्यत्रेत्यर्थः व्याख्यानादिति यद्यत्रदिस्योग
लक्षणपञ्चमीस्यात्तदा [illegible] त्रानुस्वारपरानुनासिकः पर्वस्य तु वेत्येव वदेत्तथा तु न कृतमित्येवं रूपादित्यर्थः। अयमिति अनुस्वार इत्यर्थः
अत्र परपदोपादानेन परश्चेति सूत्रे कवाक्यापन्नसूत्रविधेयसादृश्यस्य लाभादनवयवत्वसिद्धिः स्वरीत्यस्य मण्डूकप्लुत्यानुवृत्तौ गौर
वादाह विसर्गेति इदमस्मरीत्या वस्तुतस्तु मण्डूकप्लुतिरेव युक्ता। नत्वाक्षेपः। आक्षिप्तस्य शब्दबोधविषयत्वाभावस्यान्यत्रोक्तेः। व्याख्या

६७

नाशितिः लक्ष्यानुरोधमूलकारत एव प्रत्यय इत्यादिनिर्देशसङ्गतिः एवञ्चेतिः एतैः सकारविधाने वेत्यर्थः। भाष्य इति समः सुटीति सूत्र
भाष्य इत्यर्थः। ननु वार्त्तिके न विसर्गस्य स्थाने सकारविधानत्यागे बीजं किमत आहः विसर्गस्थाने नेतिः प्रातिशाख्यविरोधपरिहार
तिः प्रकृतिभाव इतिः अत्र प्रकृतिभावशब्दः शास्त्रविधेयतत्कार्यप्राक्कालिकस्वरूपावस्थानपरः। तच्च नॄन्पाहीत्यत्रास्त्येव नॄन्य इत्यस्य
वैकल्पिकत्वात्। नोपधेतिः रोः पूर्वस्यैवानुनासिको न तु प्रकरणविधेयात् एवञ्च लोपपक्षे नोपधारुत्वं न प्राप्तिरिति भावः। प्रातीतिः
प्रातिशाख्यम्भवमिति प्रातिशाख्यमुासमाख्याबलादृक्सम्बन्धितच्छाखापरमिदं शास्त्रं तु सर्वसाधारणमिति भावः। पूर्वोक्तमेव इत्यय
तिः अत एवेतिः तस्य तच्छाखामात्रविषयत्वादेवः यदि सर्वसाधारणं स्यात्तर्हि रुत्वपक्षे उपधारुत्वं नस्य प्राप्तिस्तत्पक्षे च तस्याभाव इ
ति फलभेदस्य स्पष्टत्वात् रुत्वपक्षेऽनुनासिकाद्यप्रवृत्तिरयुक्ता स्यात् एवमनेतु रुप्रकरणविधेयात् पूर्वस्यानुनासिकादेशस्येष्टत्वात् रुत्वप
क्ष इव सत्वपक्षेप्यनुनासिकादेशस्य सम्भव इति रुत्वेऽनुनासिकापत्तिकथनं युक्तमेवा एवञ्च लोपेप्युपधारुत्वं न सम्भवत्येवेति भावः॥
एतेन त्रिसकारकरूपासाधनेन। इदं वचनं व्यर्थमेवेति नहीति भाष्योक्तवचनं तु दुर्लक्ष्यत्वाभिप्रायं तत्तु सर्वथा विशेषाभावपरमि
ति भावः। इदमितिः शरः खय इत्येतत्। ननु हे इत्यनेनोच्चारणद्वयस्यैव विधेयत्वाद् द्वयोर्वचनयोर्युगपत्प्रवृत्तौ हि रुच्चारणस्यैकस्यैवाभा
भ्यां वचनाभ्यां लाभे न त्रित्वस्य निर्वाह इत्यत आहः पूर्वत्रेत्यादिः वार्तिकेपि पूर्वापरीभावं व्युत्पादयति अनचि चेत्यत्रेतिः कविभिः कृतमि
त्यादिव्यावृत्तये इदुदुपधेति सूत्रे प्रत्ययशब्दस्य प्रत्ययावयवे लाक्षणिकत्वादाह इदुदुपधस्येनीतिः नन्वघसेः किच्चेत्यौणादिकसूत्रेणेरन्वि
धानेन क्षीरशब्दस्य व्युत्पादनाच्चर्त्वस्यासिद्धत्वात् खयपरत्वाभावेन नैतत्प्राप्तिरत आहः स्मर धातोरितिः यत्कृतार्थदार्ढ्येतिः यद्यप्यभावाभाव

मै
६८

स्य अन्तियोगिरूपनयाय त्वर्तकम् आप्राविन्येव लभ्यते। तथापि तन्न हृयोपादानसामर्थ्याद् दार्ढ्यलाभकल्पना· दार्ढ्यं त्वापवादत्वाभिमतशा
स्त्रोद्देश्यतावच्छेदकस्योत्सर्गशास्त्रोद्देश्यतावच्छेदकव्याप्यत्वमेवेति बोध्यम्· तदप्राप्तीति· उत्सर्गाप्राप्तीत्यर्थः। अत्रैव सम्मतिमाह·
तदुक्तमिति· ननु बाध्यबाधकभावे द्वैविध्यमप्रसिद्धम्। समानफलकत्वं विरोधश्च। यथा दध्नस्तक्रस्य चोदनोपसेकात्मकसमानफलक
त्वम्· अष्टाश्रिर्यूपो भवति वाजपेयस्य चतुरश्र इत्यत्र सङ्ख्याकृतविरोधाच्चतुरश्रत्वेनाष्टाश्रित्वस्य बाधः। द्विविधापि विधा प्रकृते न सम्भ
वति। हलादिः शेषे लोपः स्यादित्यत्र सकारस्य शर्पूर्वत्वेनेन पकारस्य शेषः सम्भवादिति चेन्न· शेषपदार्थस्येतरनिवृत्तिपूर्वकावस्थानरूप
त्वात्। उभयोरपि सकारपकारयोर्निवृत्तिस्थित्योर्विरोधाद्भवतीह बाध्यबाधकभाव इति भावः। न चास्य विसर्गस्येति· एतत्सूत्रविहितस्येत्यर्थः।
तथा च वासः क्षौममित्यादिरूपमेव कुप्वोरित्यस्योदाहरणं भविष्यति। शर्परे इति सूत्रविहितविसर्गस्य श्रवणं तु कः त्सरुः। कः त्सरितेत्या
दिषु भविष्यति। एतयोः ≍क≍पयोः शर्परे इति सूत्रविहितविसर्जनीयस्य तु न सत्वप्राप्तिः खरि इत्यस्यासिद्धत्वादिति भावः। वाक्यभेदेनेति कुप्वो
रिति पदस्यावृत्तिं कृत्वाभिन्नवाक्यं सम्पादनीयमिति भावः। ननु विसर्जनीयोर इति संज्ञासूत्रं कृत्वा खरवसानयोरित्यादिसूत्रे विसर्जनीयप
दस्थाने लाघवाद् र इत्येव पठनीयमिति चेन्न· पर्यायशब्देषु लाघवगौरवचर्चा नाद्रियत इत्यस्य ज्ञापनार्थं तदुपपादनात्। कस्कादिषु चेति सू
त्रव्याख्यावसरे एषु इणः उत्तरस्य षत्वमन्यस्य सत्वमिति विविच्य तेन कृतं त्वाभप्रकारमाह इण इति· तथा च कस्कादिषु यथापठितं तथैव साधु
र्भवतीति सूत्रार्थः। संहितायाम्· यद्यपीदमिको यणचीत्यादिसूत्रे षष्ठ्युपयुज्यत इति तत्रैव व्याख्यातुमुचितं तथाप्यष्टाध्यायीस्थसौत्रक्रमानुरो
धादिह कृतम्। ननु निर्मलेरुढेस्वच्छशब्दे तस्यापदान्तत्वात्कथं जश्त्वमत आह· स्वशब्द इत्यादि· अव्ययमेवेति· तेन क्विवन्तमादाय मा भूदिति

६८

धातोर्ग्रहणाशङ्कायाम्माच्छेद इत्यत इति सम्भव इति साव्युदस्ता· वक्ष्यमाणज्ञापकादिति· सुराच्छायेति ज्ञापकादित्यर्थः ननु दीर्घादिति सूत्रमपदान्त
विषयकम् सेनासुराच्छायेत्युदाहरणानुपदान्ताद्वेति सूत्रस्य विषय इत्यत आह· व्याख्यानादिति· वर्णैकदेशानां वर्णग्रहणेन ग्रहणमिति पक्षे
अग्नेरन्द्र इत्यादौ सवर्णदीर्घत्वन्दीर्घे ह्रस्वाक्षराश्रयमालूय इत्यादौ ह्रस्वस्यापिति कृतीति तुकश्चाशङ्क्य दीर्घे ह्रस्वाक्षराश्रयो विधिर्नभवती
त्यर्थं पदद्वयं दीर्घाच्छे तुकं शास्तीत्युक्तम्भाष्ये। यदि च्छस्यायं तुक् स्यात्तदा ह्रस्वस्य पूर्वेण छस्यत्वेनेनेति विशेषस्य स्पष्टत्वात्तस्य ज्ञापकत्वाधान
सङ्गतिरिति भाष्यपर्यालोचनमूलकादित्यर्थः॥ ॐ ॥ ध्वनितमिति· ध्वनितत्वञ्च तथा ज्ञापकोयपादनेनैव· स्थानिद्वारेति· यथा उरदिति सूत्रानि
ष्यन्तस्यारित्यस्यावयवो रेफश्चकारजहारेत्यादौ निवर्तते। साक्षात्सन्निहितत्वमिति सुपदाचेत्यादौ स्पष्टैव· चरितार्थमिति· पद्युत्तरकालभा
सिकस्य स्थानिद्वारकत्वाप्तिकर्तृभिन्नस्यापि तेनैर्गानिदइति· स्यात्तदा तुकोपि नित्यापत्तौ यंयम्पत इत्यादौ नुक् च वृत्तिभावेनन्तदैयर्थ्यं स्पष्टमे
व· दीर्घस्य पदान्तस्येति· अपद्यर्थे पञ्चमीत्युक्तत्वादिति भावः। समर्थपरिभाषानुपस्थित्यर्थमिति· यत्र सुबन्तत्वेन पदत्वेन वोद्देश्यतात्र
समर्थपरिभाषोपस्थितेरुक्तत्वात्। पदान्तस्य दीर्घस्येत्यर्थे दीर्घस्यैवोद्देश्यत्वन्नतु पदत्वावच्छिन्नस्य· पद्यत्र समर्थपरिभाषोपस्थितिः॥
स्यात्तदा लक्ष्मीच्छाया इत्यादावेवास्य प्रवृत्तिः स्यान्नतु तिष्ठतु लक्ष्मीच्छाया देवदत्तस्येत्यादाविति भावः। यत्त्वेवमेव नपदान्तादोरनामिति
सूत्रेप्यन्तग्रहणस्यावश्यकत्वेनान्तग्रहणं स्पष्टार्थमिति तत्र तस्य ग्रन्थविरोध इति तन्न षष्ठ्यामित्यत्र निषेधाभावफलकेनानामित्यस्योपादा
नेन पदत्वेनोद्देश्यत्वाभावेन च तत्र समर्थपरिभाषोपस्थित्यभावस्य पूर्वमुपपादितत्वात् किञ्च समासेऽङ्गुलेः सङ्ग इति सूत्रस्य समास
ग्रहणेन ज्ञापकेन सजातीयामेक्षत्वाद्यत्र भावकार्यस्य विधेयत्वं तत्र समर्थपरिभाषाप्रवृत्तिरतोऽन्तग्रहणं तत्र स्पष्टार्थमेवेति॥ इति ह

भै॰
दर्प॰

ल सन्धिः॥ यो नरुत्वंशङ्कापरिहारायाह प्राग्व्याख्यातमपीति। वृक्षो हिरिति। कर्मधारयस्याभिप्रेतत्वे खरीत्येव वदेत्। विसर्जनीयापत्ति
रिति। स्थानिनो विसर्जनीयस्य निमित्तेन तत्सूत्रविषये खरेवेति शर्परे खरीति पदसमुदायार्थेन तदेकदेशस्य शर्पर इति पदस्य शक्तिस्वीकारादनेनो
पस्थितः खरेवेति भावः। एतेनाश्रितस्य शाब्दबोधे भानानङ्गीकारादिदमसङ्गतमित्यपास्तम्। व्याख्यानादिति। अव्ययीभावश्चेति सूत्रे भाष्ये
ऽव्ययीभावस्याव्ययत्वे लुङ्मुखस्वरोपचारा इति परिगणनेन प्रयोजनमुक्तोपचारस्य विसर्गस्थानिकसकारस्योपपयःकार इत्यत्राप्रवृत्तिः
प्रयोजनमिति प्रदर्श्य तस्मिन्सूत्रेऽनुत्तरपदस्थस्येत्यनुवृत्त्योपपयःकार इत्यादौ विसर्गस्योत्तरपदस्थत्वात्सत्वाभावसिद्धौ तदव्ययत्वस्य नप्र
योजनमिति दर्शितपरिगणनं च प्रत्याख्यातम्। यदि सोपदादाविति सूत्रशेषभूते अनव्ययस्येति वार्त्तिके यदनव्ययपदं तेनोपपयस्काम्य
तीत्यत्र प्रतिषेधः स्यात्तदोपचारस्येदं प्रयोजनं संभवत्येवेति प्रत्याख्यानपरम्भाष्यं विरुध्येत। तस्मादुपचारपदं न परिगणनस्थं नातः
कृकमीति सूत्रनिष्पन्नसत्वस्यैव ग्रहणमिष्यते। तच्चाव्ययत्वप्रयोजनमन्यथासिद्धमित्यव्ययीभावस्याव्ययत्वप्रयोजननिराकरणमूलक
व्याख्यानादित्यर्थः॥ ❀ ॥ उपत्वक्षणमिति। एवञ्चेणः ष इति सूत्रस्यायमविषय इति भावः। सर्पिष्याशमिति। उणादीनामव्युत्पन्नत्वमि
ति पक्षे त्रेदुदुपधस्येत्यस्य प्राप्तिः। गीष्याशमिति। अत्रेदुदुपधस्येति तपरकरणात्सत्वप्राप्तिरेव न। अत एव। उक्तत्रितयस्येणः ष इति सूत्र
स्याविशेषत्वादेव। यद्युक्तत्रितयस्येणःसूत्रशेषत्वं न स्यात्तदा स्वातन्त्र्येण षत्वविधायकत्वपक्षे उच्चैः कल्पमित्यादौ षत्वप्राप्त्या सकारस्य ष
त्वमिति पक्षे चैषु सकाराभावेन षत्वाप्राप्त्या फलभेदः स्पष्ट एव। ननु क्वार्थस्यत्वेवमुक्तमकिमविशेषेण सत्वमुक्त्वा इण उत्तरस्य षत्वमुच्य
त आहोस्विदिण उत्तरस्य विसर्जनीयस्यैव षत्वं विधीयते। अत्र यदा सकारस्य षत्वविधानमिति पक्षस्तदा सोपदादावित्यतोऽनुवृत्तस्य प्र

यमानस्य षष्ठ्यादिपरिणामः कार्यः। किञ्चात्रः। यद्यविशेषेण सम्भमुक्त्वा इणउत्तरस्य सकारस्य षत्वमुच्यते तदा निष्कृतन्निष्वीतमि
त्यत्र सत्वस्यासिद्धत्वात्षत्वन्न प्राप्नोति· सत्वस्यासिद्धत्वादिति· निष्कृतमित्यादौ इदुदुपधस्येति सूत्रे तौ व सत्वमस्मिन्पक्षे वाच्यन्तस्य च इणः षदू
त्येत दृष्ट्या सिद्धत्वात्षत्वन्न प्राप्नोतीत्यर्थः॥ इतः प्रभृति सर्वत्र विपारणं नस्य सइत्यस्य षइत्यस्य विसर्जनीयस्येत्यस्य च सम्बन्धः। किञ्च विस
र्जनीयस्यानिकस्य सस्य षत्वमिति पुंस्वित्यत्र दोषवारणाय स्त्री कार्यम्। एवञ्चोत्तरत्र विसर्जनीयस्येत्यस्य मण्डुकानुवृत्तिः क्लेशो विनेति
अत्र पक्षद्वयसम्भावनाकाले सोपदादाविति सूत्रविहितस्य सस्य स्थाने नेन षत्वमिति स्त्री कार्यम्। सोपदादावित्यस्यानुपूर्वोक्तत्रितयं शे
षइति इणः षइत्यस्यापि तत्त्रितयं शेष इत्युक्तम्प्राक्। यदा तु द्वितीयपक्ष एव परिगृह्यते तदाह। अनव्ययस्येत्यादीति· भाष्योक्तइष्टेनै।
वेममप्यसं खण्डयति· परन्त्वयामिति· ननु नयोगे योगः सिद्धः किन्तु प्रकरणे प्रकरणमिति पक्ष आश्रीयत इति सत्वषत्वप्रकरणस्यैक।
त्वान्नायन्दोष इत्यत आह प्रकरणे प्रकरणमसिद्धमिति· उपपादयिष्याम इति· तत्र हि पूर्वपदात्संज्ञायामग इति सूत्रात्पूर्वपदादित्य
नुवृत्तौ तदाक्षिप्तसमास एव स्यादित्यसमासेपीति। ननु व्याख्यानतः पूर्वपदादित्यस्यानिवृत्त्या समासेपीति व्यर्थम्। न च पूर्वपदात्संज्ञा
यामिति नियमव्यावर्तितणत्वप्रतिप्रसवाय इदमावश्यकमिति वाच्यम्। पूर्वपदादित्येन दुष्टोपसर्गादसमास इत्यस्यासिद्ध्या नियमेनव्या
वृत्तेः। न चासमासेपीति पदमेव न योगे योगः सिद्धः किन्तु प्रकरणे प्रकरणमसिद्धमित्यर्थे ज्ञापकमस्त्विति वाच्यम्। समानपद इत्यस्याख
ण्डपद इत्यर्थकत्वावश्यकत्वेन पूर्वपदादिति सूत्रस्य विधायकतया समासेपीत्यस्योक्तरीत्या प्रतिप्रसवार्थकत्वासम्भवादिति चेन्न· ए
ष्टार्थत्वादित्येवन्निरूपयिष्यत इत्यर्थः॥ ननु मूलोक्तपक्षे सत्वषत्वयोः सर्वत्र सम्बन्धेन नमस्पुरसोर्गतिरिति सूत्रेणापि षत्वापत्तिरत आह·।

भै॰
७०

विसर्जनीयस्यैवेति । मण्डूकप्लुत्येति । इयञ्च भाष्य एव स्पष्टा । इतउत्तरमिति । इतः प्रभृतीत्यर्थः । व्याख्यानादिति । नारायणन्नमस्कृत्येत्या
दिलक्ष्यदर्शनमूलकादित्यर्थः । ननु नमस्करोतीत्यादौ नमःशब्दस्य च्व्यर्थवृत्तित्वाभावात्साक्षात्प्रभृतित्वादित्यसङ्गतमत आह । उपर्य
दित्वादिति । लाघवादिति । वाक्यभेदाभावेनेत्यादिः । प्रत्ययभिन्नस्येति व्याख्यानन्न युक्तमित्याह । तत्र प्रत्ययपदमिति ॥ ॥ ननु वि
सर्जनीयस्यैकादेशशास्त्रनिमित्तकत्वन्नेत्यत आह । एकादेशशास्त्रेति । नच कस्कादिगणे भ्रातुष्पुत्रशब्दपाठस्य ज्ञापकत्वमसङ्ग
तम् । इदुदुपधेति षत्वे कर्तव्ये एकादेशस्य षत्वतुकोरसिद्ध इत्यसिद्धतया उदुपधत्वाभावेन षत्वाप्राप्तौ तत्पाठेन षत्वस्य साध्यत्वादिति वा
च्यम् । षत्वतुकोरिति सूत्रे पदान्तपदाद्योरेकादेशोऽसिद्ध इति वार्त्तिकात्रादेशे विष
अन्यथा शकन्धुषु परिवीणा इहेच्छत्रम् इहेच्छत्रमित्यादौ षत्वतुकोरसिद्ध्यापत्तेः । यत्तु इकोऽसाचूयणः सम्प्रसारणमिति सूत्रकायम्
सम्प्रसारणञ्चेति सूत्रञ्च न कार्यमेवञ्च शकन्धुष्वित्यादावेकादेशस्यैवाभावेनासिद्धत्वशङ्कैव नेति षत्वविषये पदान्तपदाद्योरिति नि
यमो न स्वीकार्यः । एवञ्च भ्रातुष्पुत्र इत्यादावेकादेशस्यासिद्धत्वादुदुपधत्वाभावेन षत्वाप्राप्तौ षत्वसिध्यर्थं कस्कादिषु भ्रातुष्पुत्रशब्द
पाठश्चरितार्थ इति ज्ञापकत्वोपपादनमसङ्गतमिति । तन्न । श्वानमाचष्टे श्वयतीति रूपवारिमते नस्तद्धिते इति टिलोपे सम्प्रसारणे
नापत्तेः । नच श्वादीनां सम्प्रसारणे नकारान्तग्रहणमिति वार्त्तिकविरोधात्कथमत्र सम्प्रसारणमिति वाच्यम् । टिलोपस्याभीयासिद्धत्वेन स
म्प्रसारणप्राप्तेः । वस्तुतस्तु श्वुनयतीत्येव युक्तम् । अषपूर्वेति सूत्रभागस्याल्लोपोन इत्येतद्बाधकतायाः अप्युक्तत्वेन नैकाजित्येव सिद्धे प्रकृति
ग्रहणेन प्रकृतिभावे कर्तव्ये न्यायाप्रवृत्तिबोधनेन येन नाप्राप्तिन्यायस्यात्राप्राप्त्या नस्तद्धिते इति टिलोपस्य दुर्लभत्वात् । तर्हि इकोऽसाच

७०

पण इति न्यासे दोषाभाव इति चेन्न अच्साहित्यस्याव्यवहितेन पूर्ववृत्तित्वसम्बन्धेनैव स्वाव्यवहितोत्तरत्वसम्बन्धेनापि स्यादिति मघोन इत्यसि
द्ध्यापत्तेः। यून स्त्रिरिति निर्देशस्य स्वाव्यवहितपूर्ववृत्तित्वस्यैव निवेशे तात्पर्यग्राहकत्वाश्रयणे प्रतिपत्तिगौरवम्। किञ्च श्वन् इत्यत्र श्वन् शब्
दस्यान्तोदात्तस्य सम्प्रसारणे वकारस्य स्रंसनधर्मिणोऽनुदात्तोकारे पूर्वरूपे एकादेश उदात्तेनोदात्त इत्युदात्तस्योकारस्य श्रवणम्भवति। यदि तु
साच्कस्य समुदायस्य सम्प्रसारणस्यानित्वमिष्येत तदा समुदायस्योदात्तत्वाभाववत्त्वरूपानुदात्तत्वेन तत्स्थानिकसम्प्रसारणस्याप्यनुदात्त
त्वापत्तिः साच्कण इति श्रवणे नानुदात्तत्वोदात्तत्वयुक्तयोर्वकाराकारयोर्योऽन्तरतमः स एव भविष्यतीति चेत्स्वरितत्वापत्तिरिति। शुनो दन्ते
त्यस्यापत्तेः श्वन इति निर्देशस्य वा आद्युदात्तत्वांशे ज्ञापकत्वाश्रयणे तु सुतरां गौरवम्। किञ्च मघवन् शब्दान्मघवानमाचष्टे इत्यर्थे णिचि
टिलोपे पूर्ववद्भिलोपस्यासिद्धत्वात् सम्प्रसारणेन वकारस्योकारे घकाराकारे एङ्गुणे क्विप्यम् शसोः औ नोः मघासोरित्यात्वे मघामू मघा इ
ति भवति सम्प्रति तु वकारस्य स्वाव्यवहितपूर्ववृत्तित्वसम्बन्धेनाच्साहित्याभावात्सम्प्रसारणाभावापत्तौ मघवम् मघव इति स्यादित्यपि बो
ध्यम्। अभिव्यक्तेरित्यायमुपरकार्य एवेति दिक्। षत्वापत्तेरिति। तथा च वैयधिकरण्येन सम्बन्धो न युक्त इति भावः। हयवरट्सूत्रभाष्यो
क्तेरिति। अयोगवाहानामविशेषेण पाठ इति पक्षे उपधासंज्ञारूपस्य प्रयोजनस्य खण्डनाय तत्रैवमुक्तम्। तिरस्कारशब्दस्येति। अनादरः
परिभवः परिभावः तिरस्क्रिया इति कोशात्। विसर्गविशेषणमिति। तस्य प्राधान्यात्तथा प्रसज्येत। परन्तु लक्ष्यानुरोधाच्छुनत्वाच्चाहिरादीनामभ
वविशेषणमिति भावः। लाघवसम्भावनयाह। उसुसोरिति सूत्रे वक्ष्यमाणेति। सुचः प्रत्ययत्वात्प्रत्ययग्रहणपरिभाषया सुजन्तस्य पदस्येत्य
र्थपरमहिम्बकरोतीत्यादौ न स्यादतो वक्ष्यमाणरीत्या विशेष्यसत्त्वेऽपि शब्दः रूपं विशेष्यमादाय तदन्तविधौ पुनस्तदन्तस्य पदविशेषणत्वे

मै· ७१

सुजन्तात्तस्य पदस्येत्यर्थः स्त्री कार्य इति भावः अव्युत्पन्न इति· एवञ्चौणादिषु च नेरु इत्येतिपाठो युक्त इति भावः अत्र मानमाह· अत ए
वेति· अव्युत्पन्नत्वादेवेत्यर्थः। आदिना चतुष्पो दोगर्भिर्लयेत्यस्य सङ्ग्रहः। भाष्यतात्पर्यादिति· एवञ्च तत्रत्यं सग्रहणं विसर्गस्यानुपलक्ष
णमिति भावः। उपलक्षणे भाष्यान्तरं साधकमित्याह· अत एवेति· उपलक्षणत्वादेवेत्यर्थः। षत्वापादनम्· इदुदुपधेति सूत्रेण· अन्यथा
नस्य सस्यानिकत्वाभावाद्भाष्यमनुपपन्नं स्यादिति भावः। अत्र लाघवाभिप्रायेणैवाशङ्कते· न चेति· पूर्वोक्तसुच इति न्यासेन तदन्तविधिद्वय
मस्मिन्न्यासे तु न यत्नेति भावः। चतुः शब्द इति एवञ्च चतुष्करोति चतुः करोतीति रूपद्वयमिष्यते तन्न सिध्येत। यदा तु द्विः त्रिश्चतुरिति पाठस्त
दा चतुश्शब्दोपादानसामर्थ्यान्नासिद्धमिति भावः· नन्वेवं सुच इति सूत्रेपि तु मुचितमिति पूर्वग्रन्थविरोधस्तादृशन्यासस्य हि द्विष्करोति त्रिष्क
रोतीत्यत्र चरितार्थतया चतुष्करोतीत्यत्रास्यासिद्धत्वान्नित्यषत्वापत्तेः। न च द्विष्करोति त्रिष्करोतीत्यत्र विकल्पस्य इसुसोरित्यनेनैव
सिद्धेः सुच इति सूत्रं चतुष्करोतीत्यत्रैव विकल्पार्थमित्यारम्भसामर्थ्यादसिद्धत्वं न भविष्यतीति वाच्यम्· देवदत्तः पचतु द्विः करोतीत्यत्र
दत्तः पाकमित्याद्यर्थमस्यावश्यकत्वात्। न च सुच इति सूत्रानन्तरं र इति पठनीयम्। सुच इत्यस्य तत्रानुवृत्तिः कार्या वर्णग्रहणेन तदन्तग्र
हणमिति पूर्वोक्तरीत्या सुजन्तं सुजन्तान्तञ्चाव्ययं तदेरेफान्तं तदवयवस्य विसर्गस्य वा षत्वमित्यर्थान्न पूर्वोक्तस्थले नित्यषत्वापत्तिरिति
वाच्यम्· सूत्रान्तरकरणे पदलाघवसम्भवेपि सुच्यदेस्वरितत्वकल्पनेन पृथग्वाक्यार्थकल्पनेन गौरवस्य स्पष्टत्वादिति चेन्न· इणः
ष इति सूत्रानन्तरं सुच इति पठनीयमित्यभिप्रायात्· ष इति वा सरीत्यतो वेति चानुवर्तते· सुजन्ते उकारोपधत्वस्यैव सम्भवात् इणः
त्तिनापेक्ष्यते। यदि वा शब्दस्य मण्डूकप्लुत्यानुवृत्तौ नोपपत्तिरस्युच्यते तदा स्वस्थान एव सुच इति सूत्रानन्तरं र इत्येव पठनीयमथवात्रयाण

७१

मेकग्रहणेनसुचामितिपठनीयमित्यपवादत्वादसिद्धत्वान्नप्रसज्जनीयमित्यभिप्रायादितिदिक्।अन्यत्रविस्तरःभाष्यादौविस्तरः।तदुक्तं
म्भाष्ये·अधिकारःप्रतियोगंतस्यानिर्देशार्थइतियोगेयोगेउपतिष्ठतइति।तथाचसुचइत्येवसूत्रमस्तु।चतुःशब्देनित्यत्वात्प्राप्तिस्तुन
अस्मिन्सूत्रेइदुदुपधेत्यतोयोभयोरनुवृत्तिस्तत्रेदुपधेत्यस्यचारितार्थ्येप्युदुपधांशेचारितार्थ्याभावादसिद्धत्वात्प्राप्तिर्नेति·एतेनयत्तुचइ
तिन्यासेप्रत्ययग्रहणपरिभाषायांयस्त्रन्नोशस्तोपियेनविधिरितिसूत्रबोधितएवेतिनिर्दिश्यमानपरिभाषयानिर्दिश्यमानसुचएवेष
त्वंस्यात्ततुतदन्तस्येतिचतुष्करोतीत्यस्यासिद्धिदूषणंतदपिनिरस्तम्।उदुपधत्वांशेविधानसामर्थ्येननिर्दिश्यमानपरिभाषायाअप्र
वृत्तेरिति।अपिचकृत्वोऽर्थइतिन्यासपक्षेपिउदुपधेत्यस्यांशस्यचारितार्थ्यविरहेणसिद्धत्वस्यपरिहारःकर्तुंशक्यइतिद्रष्टव्यम्·य
दुक्तम्प्रातिपदिकावयवइतितत्रमानमाह·नित्यंसमासइतीति·॥अतएवेति·तदन्तविधिद्वयसिद्ध्यर्थमुपात्तविशेष्यसत्त्वेपिशब्दस्व
रूपंविशेष्यमासायादौतदन्तविधिस्वीकारादेवेत्यर्थः·अत्रद्विसर्पिःप्रियइत्येतद्व्यावर्त्तकतयाऽनुत्तरपदस्थेत्यस्यचारितार्थ्यसं
भवतीतिशंकायांयद्यपिभवतितथापिभाष्योक्तस्यपरमसर्पिःकुण्डिकेत्यस्योपपत्तिस्तदन्तविधिद्वयम्बिनानभवतीत्यभिप्रायः·तस्ये
कार्थीभावसामर्थ्यमिति।स्पष्टञ्चेदम्भाष्ये।अधात्वभिहितमिति·समर्थसूत्रेभाष्यएवस्पष्टम्।ननुसर्पिष्पीयतइत्यत्रकर्मणोनधात्व
भिहितत्वमतआह·धातुसहचरितेति·तथाचधातुपदस्यतुसहचरितेलक्षणेतिभावः।अनेन·इसुसोरित्यनेन॥नन्वेवंसमासेइ
दुदुपधेत्येवसिद्धेनित्यंसमासइतिव्यर्थमतआह·नित्यंसमासइतीति·प्रतिषेधार्थमिति·तथाचपरमसर्पिःकुण्डिकेत्येवभवति।न
न्वस्मिन्पक्षेसर्पिरित्यत्रसकारस्यषत्वन्तस्यातस्सकारस्यादेशप्रत्ययावयवभिन्नत्वादतआह·व्याख्यानादिति·उत्तरसूत्रेसमासग्रहण

मै·
७२

ससत्वेन तस्यैकार्थीभावविषयकतया इसुसोरिति सूत्रे सामर्थ्यस्य व्यपेक्षाविषयकत्वमित्येवंरूपादित्यर्थः। एतेन। तत्र चारितार्थ्येन। तेन। इदुदु
पधेत्यनेन॥ ॐ॥ एतेन। व्यपेक्षामानित्यार्थश्चेति कथनेन। तस्य। कस्कादिषु चेत्यस्य। समासाश्रितेति। नित्यं समास इति सूत्रात्समासग्रहणानु
वृत्तेः। ननु समासाश्रितो न रपरस्योपस्थितत्वात्कुम्भादिरूपस्यैव ग्रहणं स्यादित्यपरकुम्भीत्यत्र न स्यादत आह। लिङ्ग· विशिष्टेति·॥ इति विसर्गस
न्धिः॥ लाघवमूलकभ्रान्त्या व्याख्यानं दूषयति। यत्त्विति। न च ससजुषो रुरिति सूत्रस्यान्यार्थमावश्यकतया प्रकृते सकारस्य रेफस्य वोच्चारणे को वि
शेष इति वाच्यम्। प्रक्रियालाघवसत्त्वात्। प्रथमैकवचन इति। न चैवं सति ससजुषो रुरिति सूत्रविधेयरुशब्दे उकारोच्चारणं व्यर्थमिति वाच्यम्।
भोभगो इति सूत्रे उभयोर्ग्रहणसम्पादनेन चारितार्थ्यात्। न च यदि रोरसिद्धत्वं तदा ह्लि सुखो नाइत्यादौ रुत्वस्यासिद्धत्वादुत्वं नैव प्राप्नोतीत्य
तुनग्रहणसामर्थ्यादसिद्धत्वबाध इति वाच्यम्। देवदत्ताः इगतो ग्रामान् किमित्यादावनन्यस्यापीतिसुतविषये तस्य चारितार्थ्यात्। अन्यथासि
धिविषयमिति। ज्ञापकस्य सजातीयापेक्षत्वात्। जश्त्वापवाद इति। सस्य स्थाने प्राप्तस्य जश्त्वस्य निरवकाशत्वेन ससजुषशब्दविषये येन ना
प्राप्तिन्यायेन च प्राप्तस्य जश्त्वस्य च बाधक इत्यर्थः ननु उत्वदृष्ट्यापत्वस्यासिद्धत्वात्तेन येन नाप्राप्तिन्यायाभावादुत्वापवादत्वोक्तिरसङ्ग-
तेत्यत आह। यदीदमिति। इदम्। उत्वशास्त्रम्। हलीत्यस्मिन्। अस्मिन् सूत्रे। एतेन शास्त्रासिद्धत्वस्यैव सिद्धान्तितत्वादिदमित्याद्यसङ्गत
मित्यपास्तम्। व्याख्यानादिति। अत्र प्रथमयोरित्यनेन न यस्य कस्यचिद्ग्रहणं किं तु वा सुपीत्यतः सुवद्ग्रहणानुवृत्तेः सुविभक्त्योरेव तयो
रपि न प्रथमवचनयोः। अचीत्यधिकारात्तस्माच्छस इत्यत्र तत्तस्य पूर्वसवर्णदीर्घार्थकतच्छत्वस्य नादिचीति निषेधसूत्रस्य च दर्श
नमूलकादित्यर्थः। पक्ष इति। पूर्वपरयोरित्यनेन पूर्वपरयोरुपस्थितत्वात्पर्यायेण कदाचित्परसवर्णस्यापि प्राप्तिरिति भावः। अत्रिमाओमा

७२

भूदिति· आन्तरतम्यात्त्वाप्रवृत्तिभावः। पूर्वजातीय इति· तथा च पूर्वस्य दीर्घत्वात्पूर्वशब्दस्य लक्षणया पूर्वजातीयबोधकता भविष्यतीति भा
वः॥ न च यत्र पूर्वो दीर्घस्तत्रास्य चारितार्थ्यात्कथं लक्षणेति वाच्यम्· दीर्घाज्जसि चेति निषेधादप्रवृत्तेरिष्टत्वात् यत्र पूर्व आकारः परश्च ऋस्तत
त्र सवर्णदीर्घस्यैव प्राप्त्येष्टस्यासिद्धेः दीर्घकारादेशासिप्रवृत्तिरस्य वाच्या। तथा चास्याल्पविषयत्वात्प्रवृत्तिरतो लक्षणाया आवश्यकत्वात् ऋकार
ऌकारयोः सवर्णविधिरित्यनेन समानजातीयत्वमेवानिदिश्यत इति गम्यत इत्यादीनामनुपपत्तिः॥ ॐ॥ ननु वृद्धिप्राप्तिकालोत्तरप्राप्तिकालि
कप्राप्तिकर्तृकपूर्वसवर्णदीर्घस्य नादिचीत्यनेन निषेधश्चाप्रष्टावसरन्यायेन वृद्धिरेचीति वृद्धिर्न स्यादत आह· भ्रष्टावसरेति· सुस्नातस्त्वाब्द
इति· एतेनैतदकारान्तस्य ह्रस्वमिति कस्यचित्स्खलितमपास्तम्· नन्वनोरेरितिसूत्रे· प्लुतस्य निमित्तत्वेनाश्रयणान्न तु प्लुतस्येति तत्सामर्थ्या
दित्यसङ्गतमत आह· प्रतियोगित्वेनेति ननु यदि सामर्थ्यादुल्लदृष्ट्या प्लुतस्य सिद्धत्वं तदा वक्ष्यमाणरीत्या उत्वं न स्यादित्यत आह· पयस
टमीति। अटतेः क्विबाद्ये· पयोरटतीति· टाधातोराततोः नुपसर्ग इति कः प्रतियोगित्वेन प्लुतस्याश्रयणात्पूर्वत्रासिद्धत्वमेव बाध्यते नत्व
न्तरङ्गपरिभाषया बोध्यस्यासिद्धत्वस्य। एतद्बाधेमानाभावात्। ननु परिभाषायाः षाष्ठीत्वादेतद्दृष्ट्या प्लुतस्यासिद्धत्वात्कथं बहिरङ्गपरिभा
षाप्राप्तिरत आह· परिभाषेति। स्वदृष्ट्या विद्यमानस्येति· अयञ्च न्यायो लोके प्रसिद्धः। नन्वेवं त्रिपाद्यामन्तरङ्गपरिभाषाया अप्रवृत्तिरिति
सिद्धान्तविरोध इत्यत आह· अन्तरङ्गस्यासिद्धत्वे चेति· प्रतिपाद्याभाव इति· यथा द्वयोः शास्त्रयोरन्तरङ्गबहिरङ्गभावविचारस्तत्र द्वयोरन्त
रङ्गत्वे बहिरङ्गत्वे वा परिभाषाया अप्रवृत्तिस्तथा ऽन्तरङ्गस्य त्रैपादिकत्वेन निरूपितबहिरङ्गत्वस्य पूर्वशास्त्रे प्रतिपादनासम्भवादिति भा
वः। पूर्वोक्तप्रयोगयोर्येन शास्त्रेण प्लुतस्तदाह· तत्राद्य इति· तयोर्मध्ये इत्यर्थः। अत्र दूराद्धूत इत्यनेन प्लुतः॥ ननु प्रतियोगित्वेनाश्रयणे साम

भै·

र्थ्यो दुभयविधासिद्धत्वस्य वाधोऽस्त्वित्यत आह· आश्रयेणान्विति· प्रत्यक्षत्वेन चेमि· एतेन पूर्वत्रासिद्धत्वस्य शीघ्रोपस्थितिकत्वान्न द्वाधेनो

७३

पपन्नौ विलम्बोपस्थितिकस्यानुमानिकासिद्धत्वस्य वाधे मानाभाव इति भावः। स्पष्टम्भाष्य इति। अतोरोरप्लुतादप्लुत इति सूत्र इत्यर्थः केचित्तु

एतेन प्लुतप्रगृह्या इति सूत्रे प्लुतस्यासिद्धत्वज्ञापनद्वारा एकादेशान्प्लुते विप्रतिषेधान्काने प्रकृतिभावः। देवदत्ता ३ अत्र न्वमसि इति भाष्योक्तेः प्लु

तस्यैकपदाश्रयत्वादन्तरङ्ग· त्वादेकादेशस्यानुपदद्वयापेक्षत्वाद्बहिरङ्ग· त्वाच्चिन्त्यमेतन्नैव प्लुतस्यापि वाक्यत्वसम्पादकपदान्तरसापेक्षतया ए

कादेशसमत्वाच्चिन्त्यमेवचिन्त्यमिति विवरणोक्तिः प्रत्युक्ता· वाक्यस्य टेः प्लुतार्थम्। देवदत्ता ३ इत्यस्या दावेहीति शेषपूरणस्यावश्यकत्वाद्द्वा

क्यद्वयसापेक्षैकादेशस्यैव बहिरङ्गत्वादित्याहुः तत्र शेषपूरणादित्यसङ्ग·तम· अन्ते पूरण एव शेषपूरणव्यवहारात् वाक्यसापेक्षैकादेशस्ये

त्यपि चिन्त्यम्। वस्तुतो वाक्यद्वयसापेक्षत्वमन्तरवयववर्णद्वयसापेक्षतया यद्यप्यस्ति तथापि वाक्यत्वेन वाक्यद्वयापेक्षायाम्मानाभावः। प्लुतस्य

यादृशसमुदायसापेक्षत्वन्तादृशसमुदायस्य शब्दतोऽपेक्षाया एकादेशस्य विरहादेकादेशस्यैवान्तरङ्गत्वात्। यद्येवन्देवदत्ता ३ अत्र त्व

मसीति वाक्यस्य का गतिरिति चेत्· अत्र केचित्· एतादृशविषये द्वयोर्वाक्ययोः संहितयोरयम्प्रयोग एव न्व प्लुतस्य प्रकृतिभाव इति अ

परे तु वस्तुतो वाक्यद्वयावयवसापेक्षैकादेशस्यापि प्लुतसमत्वान्नात्र बहिरङ्ग· परिभाषाया विषयत्वमिति सङ्गिरन्ते। यदि त्वेकादेशस्य व

र्णमात्रापेक्षयान्तरङ्ग· त्वन्तदासपादसमाप्त्याधीस्थैर्यस्यान्तरङ्ग· त्वस्यानुरोधादनित्यत्वेन बहिरङ्ग· परिभाषाया अप्रवृत्तिरिति दिक्। उ

७३

कारानुबन्धग्रहणादित्यस्योकारस्यानुबन्धस्यस्थानित्वेन ग्रहणमित्यर्थस्य प्रकृतेन सम्भवः। उकारस्येत्सञ्ज्ञालोपाभ्यामपहारात्कित्त

बहुव्रीहिमभिप्रेत्याह· उकार इत्सञ्ज्ञकेति· आदिना तरुमूलमित्यस्य सङ्ग्रहः। अकारान्त इन्द्रे नेति· न चैवमकारस्य पूर्वनिपातापत्तिरि[illegible]

वाच्यम् पूर्वनिपातप्रकरणस्यानित्यत्वात्। भाष्ये त्विति। स्थानिवत्सूत्रव्याख्यावसरे यदत्र वक्तव्यं तदुक्तम्। वाच्यवृत्त्येति। वाच्यनिष्ठा
वृत्तिः शक्तिस्तया नियमशास्त्रघटकशब्दोऽर्थबोधक इत्यर्थः। ननु यदि मा चोक्तरीत्याऽसाधारण्यानिवेशस्तदा हेराम इत्यादौ पदत्वासिद्धिरि
त्याशङ्कते। नन्वेवमिति। पदत्वाभावे सति हेराम याहि मामित्यादौ निघातो न स्यादिति भावः। लक्षणपदोपादानेति। प्रत्ययलोपे प्रत्ययवदिति
न्यायेन सिद्धो लक्षणपदोपादानेनैतादृशार्थलाभः। प्रत्ययनिमित्तककार्यस्येति। अस्य प्रकृतसम्बन्धिन इत्यादिः। अत एव नखभिन्न इत्या
दौ नैसादिः। न चैवमपि स्थानिवद्भावेनैसादेशः कस्मान्न भवतीति वाच्यम्। अचः परस्मिन्पूर्वविधाविति सूत्रे पूर्वविधिशब्देन तत्राद्याश्रय
णे न भावरूपस्य कार्यस्य चिकीर्षायामभावात्मकादेशस्थानिनः स्थानिवत्त्वे तद्घटकस्थानिपदेनाग्रहणबोधनात्। तन्निमित्तकव्यवहा
रस्येति। प्रकृतिनिष्ठप्रत्ययपरत्वव्यवहारस्येत्यर्थः। एतेन श्रूयमाणप्रत्ययान्ते यो व्यवहारस्तस्य सर्वत्र स्थानिवत्सूत्रेणैव सिद्धिरिति सूचि
तम्। कार्यातिदेशस्य फलमाह। एवमिति। प्रथमप्रकारेणेत्यर्थः। तथा न केवलं सम्बुद्ध्यन्त एव स्थानिवत्त्वेन प्रत्ययान्तत्वबुद्धिः। किन्तु रा
जपुरुष इत्यादावपि स्थानिवत्त्वेनेति बोध्यम्। नरेफ इति। यद्यपि प्रत्ययलक्षणेन सुप्परत्वव्यवहारस्यापि लाभेन नेन सूत्रेण सिद्धिः। तथा
पि स्थानिवत्सूत्रेण सिद्धिकथनं नियमार्थत्वाभिप्रायेण। हेराम इत्यादौ तु स्थानिवत्सूत्रेणैव। यत्तु वस्तुतस्तु नपेक्षितार्थसन्निधानस्य तन्नि
मित्तरूपकार्यव्यवहारस्यैव स्थानिवत्सूत्रेणातिदेशात्तथाभूतस्य चात्र सुप्परत्वस्याशास्त्रीयत्वादिति देशाभावाच्चिन्त्यमेतदिति। तन्न। रो
ऽसुपीति सूत्रस्य वाक्यभेदेन मूल एव व्याख्यानत्वात् सुपीति पदेन तस्मिन्निति परिभाषैकवाक्यतया सुव्यवहितपूर्वत्वात्मकशास्त्रीयध
र्मावच्छिन्न एव बोध इति वृत्तिकृतो मते नैतानि निपातानां नाम्नि दर्शितत्वेन तेषामित्यनेन निपातानामेव बोधनात्। सिद्धान्तमाह। परे त्विति। एषामिति

मनुवसोरिति सूत्रे ऽस्य पाठात्तस्मिन्नलो ऽन्त्यपरिभाषाप्रवृत्तिवदत्रापि तस्याः प्रवृत्तिः। नन्वेवमवांशे ऽप्यलो ऽन्त्यपरिभाषाप्रवृत्तिः स्यादत आह अ
वग्रहणेति। नानर्थकपरिभाषानुमत्या ख्यातैवेति भावः। अन्यत्रेति। मनोरमादावित्यर्थः। ननु लघुप्रयत्नतर इत्यनुपपन्नम्। अवर्ज्ञिपदार्थस्यान्य
पदार्थेन प्रकर्षेण चायुगपदन्वयविवक्षायामप्यरत्वात्तरप् स्यात्। ततो बहुव्रीहौ लघुतरप्रयत्न इति स्यादत आह। अन्यपदार्थेति। न चैवमपि प
दार्थस्यान्यपदार्थविशेषणत्वात्कथं प्रकर्षयोग इति शंक्यम्। शुक्लतरः पट इत्यादौ विशेषणप्रकर्षबोधकस्य तरपो बहुशु दृष्टत्वात्।
वार्त्तिककृतापि सूचितमिदम्। पूर्वपदार्थातिशये आतिशायनिका बहुव्रीहिस्सूक्ष्मवस्त्रतराद्यर्थ इति। अत्र बहुव्रीहिरित्यस्य पूर्वविप्र
तिषेधेनेति शेषः। लघुप्रयत्नतर इति निर्देश एवात्र गमक इति बोध्यम्। इत्तिरिति। भाष्यानुक्तत्वमत्रारुचिः। यकारसाहचर्यादिति। ओका
रान्यरस्य परान्तस्य धात्ववयवस्य यस्यासम्भवादिति भावः। स्मृतोवच्युन इति। स्मृत उः शम्भुर्येन स स्मृतोः स्मृतं वातिगच्छतीति स्मृतोवाः।
तमाचष्टाणस्मृतोवू इति। न दीहेति। तदभिप्रेत्याहेत्यर्थः। एवञ्च यकारांश एव स्वरितत्वमथवा व्योरित्यनुवर्तमानमत्र यकारमात्रतात्प
र्यकमिति भावः। विच्छेदादिति। लोपः शाकल्यस्येत्यत्रास्यानुवृत्तेः। व्याख्यानादिति। अत्र भाष्ये किमर्थमिदमुच्यते न लोपः शाकल्य
स्येत्येव सिद्धम्। लोपः शाकल्यस्येत्यनेन पाक्षिकः सिद्ध एव लोपः। नेनापि गार्ग्यस्य मतेन लोपो नान्येषामिति विकल्पेनैव विधेय इति प्रश्न
इति कैयटः। ओकाराल्लोपवचनं नित्यार्थम्। ओकाराल्लोपवचनं क्रियते नित्यार्थो ऽयमारम्भ इत्युक्तम्। तद्दर्शनमूलकादित्यर्थः। कैयटो ऽपि
गार्ग्यः स्वस्यां स्मृतौ वो नो नित्यमेव लोपं स्मरतीति पाणिनिरपि तथैवेच्छति। एवञ्च भो अत्रेति नित्यं भवति न तु भोयत्रेति इति। न च स्वस्वम
प्रच्युत्यभावाये दमस्तीति वाच्यम्। गार्ग्यशाकल्याभ्यां लोपस्यैव स्मृत्यात्तद्वाक्ये ऽन्यग्रहणेन तयोरग्रहणात्। भाष्यानुसारिण इति। नित्यार्थे ऽप

भारम्भ इति भाष्यतात्पर्यविद इत्यर्थः। अयम्भावः लोपः शाकल्यस्येति सूत्रे अवर्णपूर्वस्येति यद्व्याख्यानं तस्य न भोभगो इति सूत्रादवर्ण
मात्रानुवृत्त्या सम्भवः। अशब्दस्य द्वन्द्वघटकतया तन्मात्रस्य पूर्वशब्देन समासासम्भवात् तस्मिन् सूत्रे भोभगोअघोअपूर्वस्येत्यनुवर्तने
तत्र भोभगोअघोपूर्वत्वे ओतो गार्ग्यस्येत्यनेन नित्येन भवितव्यम् तस्मादपूर्वस्येति परिशेषसिद्ध्यर्थं कथनमनादृत्यास्यैव समुदायस्य ओ
त इति सूत्रेऽप्यनुवृत्तिरत एवानित्यार्थत्वकथनमप्यारम्भसामर्थ्यादिति साधु सङ्गच्छते। एवञ्च विच्छेदादित्यसङ्गतम्। स्मृतेत्यादौ च प्रा
प्तिरेव नेति फलितम्। तस्यनभिधानादिति। वृक्षकूशब्द इवेत्यादिः। वृत्तिरिति। अत्रापि प्रागवदेवारुचिः। अत एवेति। मण्डूकप्लुतिस्वीका
रादेव। अन्यथा हलि सर्वेषामित्यत्र पद इति सप्तम्यन्तानुवृत्तौ हलादौ पद इत्यर्थः स्यात् एवञ्च भाभ्यामित्यादौ लोपानापत्तिस्तदाह। अत एवेति।
मध्येऽसम्बन्धादेवेत्यर्थः। उभयोरपीति। लघ्वलघूच्चारणयोरपीत्यर्थः। न चेति। एवमित्यस्य शेषः। समाधत्ते। लघुप्रयत्नस्यैवेति। परिशेषा
देतत्सिद्धम्। हलि विधानाभावेन। लघुप्रयत्नस्य विधानाभावेनेत्यर्थः। ननु हलीति सूत्रन्न ऋषिमात्रतात्पर्यकमपि तु नित्यार्थमत आ
ह। विकल्पस्येति। अत्र चेति। हलीति सूत्रे चेत्यर्थः। फलाभावादिति। वकारानुवृत्तेः फलाभावादित्यर्थः। अस्मिन्नर्थे सौत्रनिर्देशस्य सा
धकत्वमाह। अव्यपर इति। सौत्रत्वादीति। आदिना निपातनादिपरिग्रहः। तदाद्येति। तदेतत्सर्वं हृदि निधायाह। लघ्वलघूच्चारणस्ये
ति। अत्र लघ्वलघूच्चारणेति सर्वेषामित्यनेन लभ्यते। रोऽसुपीत्यत्र यत्प्रसज्यप्रतिषेधपरत्वेन व्याख्यानं तत्फलमाह। पर्युदासे हीति।
एवञ्च लक्ष्यानुरोधाद्गौरवं युक्तमेव। ननु सुबन्तातिरिक्ते शब्दे परे इत्यर्थे च पूर्वोक्ताव्याप्त्यतिव्याप्ती इति पर्युदास एव लाघवाद्रुचित इत्यत
आह। उत्तमैकेति। यदि सप्तमीनिर्दिष्टेऽपि तदन्तविधिः स्यात्तदा सुपि चेत्यत्रापि तदापत्तौ दीर्घानापत्तिरिति भावः। प्रत्ययग्रहणपरिभाषा

भै॰
७५

याः प्राप्तिरपि नेत्याह · तस्यानुरोधेनेति · अत एवेति · तस्यानुरोधस्वीकारादेव · अन्यथा रदाभ्यां परं यन्निष्ठान्तमित्यर्थापत्त्या वृषन्तीर्णदृत्य
धातु नकारस्यापि नत्वापत्तिः। न चात्र प्रत्ययग्रहणं चापञ्चम्या इत्यनेन प्रत्ययग्रहणपरिभाषाया निषेधान्निष्ठान्तमित्यर्थसम्भव इति वाच्यम्·
अस्यापि वचनस्य शब्दविशेषणविशेष्यभावतात्पर्यग्राहकत्वात् आनिर्देशिकस्येति · अत्राहुः शब्दद्वारोपितस्वप्रवृत्तिनिमित्तक इति कर्मधा
रयः। अहः सर्वैकदेशेति सूत्रेण रात्रिशब्दान्तसमासादच् प्रत्ययः एकदेशविकृतन्यायेन च रात्रिशब्दत्वम्। ननु न चोदाहरणमादरणीय
मित्यभियुक्तोक्तेरिदमयुक्तमत आह · न लोपः प्रातिपदिकान्तेति सूत्र इति तर्हि अहः · अहोभ्यामित्यत्र रुत्वरत्वयोरसिद्धत्वेन नलोपमाश्र
क्याह नित्यस्याहत्याः सिद्धत्वस्य वारणे प्रमाणं भाष्य उपन्यस्तम्। न हि रूपरात्रिरथन्तरेषु रोरेव विशेषोऽस्तीति ननु समासान्तस्य रात्रिशब्द
विकारत्वाभावादेकदेशविकृतस्येत्यनुपपन्नमत आह · रात्रिशब्दान्तसमासादिति द्वन्द्वादित्यर्थः॥ नन्वृरूप इति · द्वयोर्लोप इति तन्नु रूप इ
त्यर्थः। अनीयरीति · एवं सति करणीयमित्यत्र दीर्घापत्तिः। ननु मात्रे रेफस्य तन्मात्रलोपविधायक शब्देन लोप इत्यत आह · च चारेत्यादी
ति · न चात्रापि कथमिति वाच्यम् · अभ्यासपरात् तत्तदङ्गसम्बन्धिनो विभिन्नस्याभ्यासस्य प्रतिलक्ष्यं लक्षणप्रवृत्तिन्यायेन वा धातुत्वमस्तीत्य
प्रापात् · न चात्र सत्यपि दीर्घह्रस्व इति सूत्रे ह्रस्वादेशे रूपसिद्धिरस्त्येवेति वाच्यम् · आङ्गत्वात् पर्जन्यवल्लक्षणन्यायेन ह्रस्वेन तो दीर्घलक्ष्ये
ले स्ये लक्षणस्येति न्यायेन पुनर्ह्रस्वानापत्तेरिति भावः। मूलोक्तरीत्या व्याख्यानेऽपि जनात्कर्मण्येवोपपदसमासे वृत्तिह्रप्रसङ्गस्तत्राघ चाभिप्राये
णाह · भाष्ये त्विति · न च समानाधिकरणानामेव बहुव्रीहिविधानाद्व्यधिकरणबहुव्रीहिरनुपपन्न इति वाच्यम्। सप्तमीविशेषणे इति सू
त्रेण सप्तम्यन्तस्य पूर्वनिपातविधानाल्लिङ्गाद्व्यधिकरणबहुव्रीहिरपि साधुत्वज्ञापनात् · ढ्यग्रहणेनेति · रग्रहणं तु न ज्ञापकम्, पुनारमते

इत्यत्र चारितार्थ्यात् । अच इत्येवेति · अचश्चेति परिभाषया लब्धमित्यादिः · व्याख्यानादिति · यदि परेणाण्ग्रहणं स्यात्तदा हलरूपाणि प-
लाभावाद्व्यानर्थकमेवाण्ग्रहणम्भविष्यतीति तदभावेप्यचश्चेति परिभाषयैव तत्सिद्धिर्भविष्यतीत्येवंरूपादित्यर्थः । परस्परविरोधेति
विविधं यद्गमनन्तदत्र विवक्षितमेवञ्च विरोधलाभ इति भावः । तुल्यबलविरोध इत्येतत्परिशेषसिद्धमित्येतदुपपादयति · तत्रमित्यस्येति ·
समर्पणञ्च स इति · अत्र चो वाक्यालंकारे यदुक्तम्प्रायेणेति तत्फलितमाह · क्वचिन्केवलेति · न्यायद्वयोपपत्तिमाह · तन्त्रयुगपदिति · तृजादि-
वदिति · यथास्तु तृन्तृचौ पर्यायेण भवतस्तथा पूर्वपरावपि पर्यायेण भवेतामेवञ्च यदा पूर्वशास्त्रप्रवृत्तिस्तदा योऽप्रामांशस्तत्पूरणम्परेण क्रि-
यत इति नियमः फलितो भवति · पूर्वशास्त्रस्य चैतद्विषयाविषयकत्वं कल्पनीयम् । लौकिकदृष्टान्ते न पुनः प्रसङ्ग · न्यायमुपपादयति · यद्वेति
लक्ष्यप्रेक्ष्ययोः । लक्ष्योपकारकत्वादेवं व्यवहारः । अप्रतिपत्ताविति · अप्रवृत्ताविन्यर्थः । तत्र कृते · यस्मिन्कृते · नानङिति · कृत इति शेषः । पुन-
र्वृद्धिरिति · स्थानिवद्भावेन हित्वा तत् । अत्र केचित् । एवं सत्यचश्चेति सूत्रस्य भाष्यकैयटविरोधः । तथा हि · यद्यचश्चेति सूत्रमिको गुणवृद्धीति सू-
त्रवदच इत्यस्य षष्ठ्यन्तस्योपस्थापकन्तदोकालोजिजिसूत्रेऽजिति किमर्थमित्याशयेन अथ पूर्वस्मिन्योगेऽज्ग्रहणे सति किम्प्रयोजनमिति भा-
ष्ये उक्तम् । अत्राज्ग्रहणे सतीति मध्यमणिन्यायेनोभाभ्यां सम्बध्यते । एवञ्च सत्यज्ग्रहणे पूर्वस्मिन्योगेऽज्ग्रहणे किम्प्रयोजनमित्यन्वयः । अज्ग्र-
हणं संयोगाच्समुदायनिवृत्त्यर्थम् । अज्ग्रहणं क्रियते संयोगनिवृत्त्यर्थम् । अच्समुदायनिवृत्त्यर्थञ्च । संयोगनिवृत्त्यर्थं तावत्प्रतक्ष्य प्रर-
क्ष्य । ह्रस्वस्य पिति कृति तुङ् मा भूत् । अत्र कैयटः । यथा प्रत्याहारे निर्दिष्टा आकारादयो दीर्घप्लुतसंज्ञा लभन्ते तथा संयोगोपि ह्रस्वसंज्ञः स्यादि-
ति तुक्प्रसङ्गः । अच्समुदायनिवृत्त्यर्थम् । तितउच्छत्रम् । तितउच्छाया । दीर्घात्पदान्ताद्वेति विभाषया तुग्माभूत् । अत्र वैकल्पिके तुकि नद

भावेह्रस्वलक्षणस्तुकस्मान्नभवतीत्याशङ्कायांकैयटः। परत्वाद्दीर्घलक्षणेनतुकिंसतिसकृद्गतौविप्रतिषेधइतिन्यायाद्ध्रस्वलक्षणःपुनर्न
प्रवर्तते। नचैवंविधेद्रविषयेपुनःप्रसङ्गविज्ञानमस्ति। नित्यविरोधात्पूर्वेणपरस्यबाधप्रसङ्गात्। यत्रहिपूर्वोविधिःपरंनबाधतेतत्रपु
नःप्रसङ्गविज्ञानंक्वचिदाश्रीयतइति। यत्रपुनःप्रसङ्गविज्ञानन्यायेनपूर्वप्रवृत्तौपरशास्त्रप्रवृत्तिवैयर्थ्यप्रसङ्गस्तत्रसकृद्गतिन्यायएवेत्यय
त्रपरस्मिन्कृतेपूर्वप्रवृत्तावपिनपरप्रवृत्तिवैयर्थ्यंतत्रपुनःप्रसङ्गन्यायप्रवृत्तिरितिभावः। यथाभिन्धकीत्यत्रपरत्वाड्ढौकृतेऽकच्प्रवृत्ता
वपिनधिभाववैयर्थ्यमितिपुनःप्रसङ्गन्यायेनाकच्भवति एवंच्चभिन्धीत्यत्रपरत्वात्तातङि कृतेयदिपुनःप्रसङ्गविज्ञानन्यायेनधिभाव
स्तदातातङ्प्रवृत्तिवैयर्थ्यमेवेतिमायम्पुनःप्रसङ्गन्यायविषयइत्याहुः। अत्रापरेसमादधिरे· यथाऽकृतकारिखल्वपिशास्त्रमग्निवत्। कृ
तकारिखल्वपिशास्त्रम्पर्जन्यवदितिद्वौन्यायौलक्ष्यानुरोधाद्व्यवस्थितौतथेमावपिन्यायौलक्ष्यानुसारेणविन्याश्रयेनभिन्धीत्यत्रपरस्य
तातङःप्रवृत्तेर्वैयर्थ्यप्रसङ्गेपिपुनःप्रसङ्गन्यायप्रवृत्तिराश्रिता। नचैवमचश्चेतिसूत्रभाष्यविरोधइतिवाच्यम्। ईचद्विवचनइतिसूत्रभाष्य
प्रामाण्येनपरशास्त्रप्रवृत्त्युत्तरम्पूर्वशास्त्रप्रवृत्तौपरशास्त्रवैयर्थ्याभावेपिक्वचित्सकृद्गतिन्यायस्यप्रवृत्तिस्वीकारात्। तत्रयद्ययमपिआश्री
यतेइन्द्रपिङ्लेइत्यत्रपरत्वादीकारादेशेपुनर्नुमःप्रवृत्तावपिनेकारप्रवृत्तिविरोधस्तथापिसकृद्गतिन्यायान्नुमित्युक्तम्भवन्मतेतत्रपुनःप्र
सङ्गन्यायस्यैवविषयतासत्वाद्भाष्यविरोधःस्पष्टएव। तथासासात्प्रभृतीनिचेतिसूत्रेभाष्येउक्तम्। च्व्यन्तस्यप्रतिषेधोवक्तव्यः। लवणीकृ
त्य। नवापूर्वेणकृतत्वात्। नवावक्तव्यम्। किंकारणम्। पूर्वेणकृतत्वात्। असत्वेनविभाषा। पूर्वेणनित्याभविष्यतीति। तत्रकैयटः। लव
णीकृत्येति। अत्रहिपरत्वादनेनविभाषाप्राप्नोति। नित्याचगतिःसञ्ज्ञेष्यते। पूर्वेणेति। पुनःप्रसङ्गविज्ञानादितिभावइत्याह। यदियत्रपुनःप्र

सकृद्गतिन्यायेन पूर्वप्रवृत्तौ परशास्त्रप्रवृत्तिर्वैयर्थ्यप्रसंगः तत्र सकृद्गतिन्याय एवेति नियमस्वीकारस्तदा पूर्वेणानित्यो भविष्यतीति भाष्यवि-
रोधः स्यादत एवेति द्वयोरप्युक्तन्याययोर्लक्ष्यानुसारेण प्रवृत्तिकल्पनमेव वरं न नियम इति दिक्। अष्टाध्यायीपाठकृतपरत्वमेवेति। एतेन
यथोद्देशपक्षे परिभाषयोः पौर्वापर्यं तु कार्यकालतायामिति कैयटोक्तं न युक्तमिति सूचितम् तत्र साधकमाह अत एवेति। कार्यकाल
पक्षेऽप्यष्टाध्यायीपाठकृतपरत्वस्य नियामकत्वादेव ङमो ह्रस्वादित्यादाविति। आदिना ङः सीत्यस्य परिग्रहः। परिभाषयोः। तस्मिन्निति
तस्मादित्यनयोः। संज्ञाविषये त्वाह संज्ञानान्त्विति। विरोधप्रतिसन्धानमिति। यद्देशे विरोधप्रतिसन्धानं तद्देशीयपरत्वस्य नियामक-
त्वादेव। अत्र प्रमाणमाह अत एवेति। यदि संज्ञाविषयेऽप्यष्टाध्यायीपाठकृतपरत्वं नियामकं स्यात्तदा प्रगृह्यसंज्ञाया अयादिभ्यः परत्वे-
क्तिरसङ्गतैव स्यादिति भावः। नन्वियमेव युक्तिः परिभाषाविषयेऽस्त्वित्यत आह परिभाषाणान्त्विति। तत्पक्षे। कार्यकालपक्षे। ननु गुणानान्त्वप-
दार्थत्वादिति न्यायेन विप्रतिषेधे परमिति परिभाषायाः परिभाषाविषये नियामकत्वं कथमित्यभिप्रायेण शङ्कते यद्यपीति। कार्यमात्रग्रह-
णादिति। कार्यमात्रग्रहणस्य मुनित्रयसम्मतत्वादित्यर्थः। प्रसङ्गादाह एवमिति। यथैषा वाक्यभेदेन व्यवस्थापिका तथेत्यर्थः। अन्तरङ्गत्व-
ताने बहिरङ्गत्वेनयोर्विवक्षितत्वेन विरोधप्रतिसन्धाने च परिभाषाप्रवृत्तेः उपसंहरति। एवञ्चेति। उपपादितरीत्या व्यवस्थापकत्वे चेत्यर्थः
नदेतदुपपादयति। त्रियाद्यामिति। सूत्रोक्तरीत्येति। लोपेरत्वस्यैवोद्देश्यतावच्छेदकत्वेनोपादानात्तस्य चालवृत्तित्वादिति भावः। स्थानि-
वद्भावप्रवृत्तिमभ्युपेत्याह स्थानिवत्त्वेनेति। तदप्राप्तेः। उत्वाप्राप्तेरित्यर्थः। एतत्तदोरिति सूत्रे त्यदादीनीत्यनेनैकशेषप्राप्तिमाशंक्याह अ-
नु कार्येति सूत्रे सौत्रत्वादेकशेषाप्रवृत्त्या वपि वृत्तावेतत्तदोर्यः सुलसेत्यत्रैकशेषवारणमेव बोध्यम्। सूत्रे पञ्चम्यभावात्परमिति वक्तुमशक्य-

मित्यभिप्रायेण सूत्रे श्रूयमाणया एतत्तदोरिति षष्ठी तदुपपत्तये। नञ्नरपदस्यैवाध्याहारो न तु पूर्वसमीपादेरपि तदध्याहार इति दर्शयति। एतत्तदोरि-
त्यर्थ इति। अनन्तरस्येत्यस्यानध्याहारे नञ्समासग्रहणस्य वैयर्थ्यापत्तेः पूर्वस्य तस्याभावात्। न चैवं तद्व्यपि त्यज्यतामेतावता लाघवमेवेति वाच्य-
म्। यो विभुर्विश्वमखिलं स्वीकृत्य समदृष्टिमान्। सदा रक्षति रामः स ममास्तु शरणं हरिरिति पद्ये रामः स इत्यत्रापि व्याप्त्यापत्तेः व्याख्यानादिति। उ-
त्तरत्र प्रथमैकवचनस्यैव सम्भवेन पूर्वसूत्रेपि तस्यैव ग्रहणमित्याशयमूलकादित्यर्थः। पूर्वपदार्थप्रधानत्वादिति। असदित्यस्मात्तद्भिन्न इत्या-
कारकबोधस्य नैयायिकसम्मतत्वात्। युक्तं चैतत्। नञो भेदवाचकत्वे नीलो घट इत्यादौ तादात्म्यसम्बन्धेन नीलपदार्थप्रकारकघटविशे-
ष्यकबोधस्य सर्वानुभवसिद्धतया प्रतियोग्यभावान्वयौ तुल्ययोगक्षेमाविति न्यायेन तादात्म्यसम्बन्धावच्छिन्ननीलाभावप्रतीतिरुपपद्यते न-
ञ्समभिव्याहारे। न चैवं न त्वं ब्राह्मणमानयेत्युक्ते लोष्टमानीय कृती भवतीति भाष्योक्तेरभाववद्विशेष्यकस्य बोधस्य स्वीकारे लोष्टाद्यानयना-
पत्तिरनिष्टा प्राप्नोतीति वाच्यम्। घटादिपदानां घटत्वादिना यावद्घटबोधकत्वेपि प्रकरणादिनाऽत्र घटोऽस्तीत्यादौ कस्यचिद्घटस्यैव बोधव-
द्ब्राह्मणादिपदादपि प्रकरणादिना ब्राह्मणभिन्नक्षत्रियस्यैव बोधसम्भवात्। न चासमस्तस्य नञो भेदार्थकत्वे नञर्थभेदस्यैव प्राधान्येन भा-
नापत्तिरिति वाच्यम्। तत्र नञो भेदवति लक्षणास्वीकारात्। न च भेदस्य पदार्थैकदेशतया तत्र प्रतियोगिनो घटादेरन्वयासम्भव इति वाच्य-
म्। चैत्रस्य नप्तेत्यादाविव पदार्थैकदेशेपि ससम्बन्धिकत्वेनान्वयसम्भवात्। न च नञो भेदवाचकत्वेन ब्राह्मणैरेतैरुपद्रुतमित्यादौ प्रतियो-
ग्यनुयोगिवाचकपदयोः सामानाधिकरण्यात्समानविभक्तिकत्वानुपपत्तिरिति वाच्यम्। प्रतियोग्यनुयोगिनोरभेदान्वयबोधोपयोगिकाकां-
क्षायामेव नञो भेदबोधनात्। अन्यथा भूतलेन घट इत्यत्रापि भेदबोधापत्तेः। न च नञो भिन्ने लक्षणाकल्पने तदेकदेशप्रतियोगिनोऽन्वय-

कल्पने गौरवमिति वाच्यम्। पश्यति षु येयजामहे करोति नानुयाजेषु इत्यत्र भिन्नेल क्षणाया आवश्यकतया अन्यत्रापि तस्याः कल्पनात्। अत्र हि य
जति शब्दो यागवचनः। येयजामह इति हकारान्तानुकरणादुच्चारणार्थ कारान्ताद्वितीया। तस्य करणं च तच्छब्दवचनमन्त्रोच्चारणम्। तथा चानुया
जभिन्नेषु यागेषु येयजामह शब्दवन्मन्त्रप्रयोगरूपैकार्थविधाने सत्येकोद्देश्यकैकविधेयकार्थबोधजनकत्वरूपैकवाक्यतानिर्वाहः। यद्यत्र न
ञोत्पन्नाभावार्थकत्वं स्यात्तदा वाक्यभेदः स्यात्। न च मैत्रो मैत्रो भेदशक्तिर्भिन्ने वेत्यत्र विनिगमनाविरह इति वाच्यम्· भेदत्वस्याखण्डोपाधितया तस्य
स्वरूपतः शक्यतावच्छेदकत्वात्। यद्यप्यस्मिन्पक्षे ऽनञ्समासग्रहणम्पूर्वपदार्थप्राधान्येपि उत्तरपदार्थप्राधान्यप्रयुक्तकार्यम्भवतीत्य
र्थे ज्ञापकमित्यसदृत्यादौ सर्वनामकार्यानुपपत्तिः परिहर्त्तुं शक्यते न तथापि गौरवमतः पक्षान्तरमाह· उत्तरपदार्थेति· आरोपितत्वमारोप
विषयत्वरूपमथवारोप्यमात्रम् विषयत्वन्तु संसर्ग इति पक्षे ऽसदृत्यत्र सर्वनामकार्यानुपपत्तिर्नास्ति अनञ्समासग्रहणं चरितार्थम्। पत्तुस
त्येवेत्यवधारणपरतया व्याख्यानन्न सर्वसम्मतमत आह· वृद्धौ व्याख्यातमिति· एतेन तदनुवृत्त्यैव सर्वेष्टसिद्धाववधारणपरतया व्याख्या
नमनर्थकमिति सूचितम्॥ ॰ ॥ इति स्वादिसन्धिः॥ ॰ ॥ इति भैरवमिश्रकल्पितायां पञ्चसन्धिप्रकरणं सम्पूर्णम्॥ श्रीगणेशा
य नमः॥ अथ स्वादिसन्धिनिरूपणानन्तरम्प्रसङ्गसङ्गत्या प्रातिपदिकसञ्ज्ञानिरूपणमिति बोधयितुमाह· स्वादिविधाविति· प्रातिपदि
काधिकारादिति· एतेन प्रातिपदिकत्वस्य स्मरणे प्रसङ्गनिर्वाहके स्वादिनिरूपितत्वम्प्रविधेयतावच्छेदकत्वरूपसम्बन्धस्य नियाम
कत्वं सूचितम्· न च ङ्याप्प्रातिपदिकादिति सूत्रे ङ्यापोः प्रथममुपादानात्तयोरप्यधिकारत्वेन प्रथमं तयोरेव निरूपणमुचितमिति वा

भै॰ ५९

च्यम्॰ ङ्याप्ग्रहणस्यान्यार्थतया यावद्वक्ष्यमाणत्वात्तयोरप्युपपन्नो प्रातिपदिकत्वस्योद्देश्यतावच्छेदकत्वादित्याशयात्॰ अधातुरप्रत्ययइत्येत
त्पदद्वयप्रतिपाद्यार्थविशिष्टस्यार्थवत उद्देश्यत्वेनाश्रयणाद्विशेषणज्ञानस्याप्रामाण्यज्ञानानास्कन्दितस्य सम्भवात्स्यार्थेन तत्पदद्वयं नानवद्या
वहम्॰ अधातुरित्यादिरिति॰ नच धातुपदस्य पुल्लिङ्गत्वात्तेन नञ्समासस्यापि पुंस्त्वात्तदर्थे विवरणवाक्ये नपुंसकत्वानुपपत्तिरिति वाच्य
म्॰ धातुभिन्नमित्यस्य फलितार्थत्वात्॰ आरोपितो धातुरित्येवं तु वाच्योऽर्थः। लाघवादिति॰ असमर्थसमासस्य वाक्यभेदस्य वा कल्पनेन
लाघवादित्यर्थः। यद्यपि सूत्रस्थमप्रत्ययपदमेकमेव तथापि तदावृत्त्या मूले व्याख्यातं तत्राह। आवर्तितइति॰ अप्रत्ययस्य यत्र सञ्ज्ञेति प्र
त्ययोद्देश्यकसञ्ज्ञाविधावित्यर्थः। ज्ञापकस्य सजातीयापेक्षत्वादिति भावः। अत्र सूत्रेऽर्थशब्दोऽभिधेयवाचक उपात्तो न प्रयोजनवाचकः
सर्वस्यापि यत्किञ्चित्प्रयोजनवत्त्वादर्थवद्ग्रहणस्यानर्थक्यप्रसङ्गात् एवञ्च शास्त्रान्यायत्किञ्चिदर्थविशिष्टं यत्तत्प्रातिपदिकसंज्ञं स्यादिति
सूत्रार्थः। न चार्थवद्ग्रहणमत्र वर्णानां प्रत्येकं सञ्ज्ञा माभूदित्येवमर्थं वाच्यम्॰ सत्यान्त्वन्तस्यान्यनं वनमित्यादौ नलोपः प्रातिपदिकान्तस्ये
ति नलोपः प्रसज्येतेति मान्यु उक्तम् नतदेमन्तकर्मणि द्वितीये त्यादिशास्त्रस्य द्व्येकयोरित्यादिशास्त्रस्य चैकवाक्यतया एकत्वादिविशिष्ट
कर्मादिष्वेव स्वादयो भवन्तीत्येवन्नियमेनोपपद्यते संख्याकर्मादेरभावादिति कथन्न लोपप्राप्तिरिति वाच्यम्। प्रकृतार्थापेक्षया प्रत्ययनि
यमेऽप्यपादिभ्य एव प्रतिवर्णम्स्वाद्युत्पत्तिः स्यादित्याशयात्। यदा तु सामान्यापेक्षो नियमस्तदाश्रीयते तदा दशदाडिमानि षडपूपाः। कुण्डम
जाजिनम्पललपिण्डः अधरोरुकमेतत्कुमार्याः स्फैयकृतस्य पिता प्रतिशीन इत्यस्यानर्थकस्य समुदायस्य व्यावृत्त्यर्थमर्थवद्ग्रहणम्। स
मासग्रहणन्त्वर्थवत्समुदायव्यावृत्त्यर्थमिति स्फुटीभविष्यति॰ अधातुरिति किम्। अहन्। अत्र नलोपः स्यात्। न च प्रत्ययलक्षणेन प्रत्य

यान्तपर्युदासः स्यादिति वाच्यम् । प्रत्ययलक्षणेन प्रत्ययान्तपर्युदासाप्रवृत्तेर्नङिसम्बुद्ध्योरिति सूत्रस्थसम्बुद्धिग्रहणस्य ज्ञापकत्वसम्भवा
त् । न च धातोः प्रातिपदिकत्वाभावे सुपो धातुप्रातिपदिकयोरिति सूत्रस्थधातुग्रहणमेव ज्ञापकं भविष्यतीति वाच्यम् । श्येनायतेरित्यादौ
क्यङन्तस्य प्रत्ययान्तपर्युदासेनाप्रातिपदिकत्वात्तस्यावश्यकत्वेन ज्ञापकत्वासम्भवात् । अप्रत्यय इति किम् । काण्डेकुड्ये अत्र हि प्रातिप
दिकत्वे ह्रस्वत्वापत्तिर्दोषः । ननु पर्जन्यवल्लक्षणप्रवृत्तेरिति न्यायेनान्तरङ्गत्वादिमकृत्यनुत्तेः प्रागेव ह्रस्वत्वे कृते ननतः सुवुत्पत्तावेका
देशेपि लक्ष्ये लक्षणस्येति न्यायेन पुनर्ह्रस्वत्वं न भविष्यति विकारकृतेऽलक्ष्यभेदस्तु न लक्ष्ये लक्षणस्येति न्यायप्रवृत्तिप्रतिबन्धकः
उदवोढामित्यादौ वकारस्याकारे तस्यौकारे ढत्वादीनामसिद्धत्वात्पुनरोकारस्याभावाया हलन्तलक्षणवृद्धेरनेन न्यायेन वारणपरभा
ष्यप्रामाण्येन नादृशभेदस्यानाश्रयणादिति चेन्न । यद्धर्मावच्छिन्नस्य पूर्वकालिकप्राप्तिकर्तृकशब्दबोध्यकार्यविधावुद्देश्यता तद्धर्म
मात्राश्रयोद्देश्यकविकारस्यैव भेदानियामकत्वकल्पनात् । यथोदवोढामित्यत्र हलन्तधात्ववयववान्तमुद्देश्यतावच्छेदकन्तद्धर्ममात्रा
वच्छिन्नसम्बन्धित्वमेव पुनः प्राप्तवृद्धेरिति । न चैवमूखतुरित्यत्र पूर्वमभ्यासस्य ह्रस्वत्वेन नएकादेशे कृते । पुनः प्राप्तह्रस्वत्वस्य नाभ्या
समात्रावयवः स्थानीति लक्ष्ये लक्षणस्येति न्यायेन समाधानपरग्रन्थविरोध इति वाच्यम् । अभ्याससञ्ज्ञाविधौ धात्ववयवप्रथमै
काचोऽयुक्हलो न विधीयमानं यद्द्वित्वं तेन तत्पूर्वभागस्योद्देश्यतया ह्रस्वत्वस्य तदवस्थानिकत्वेन तद्धात्ववयवाच्स्थानिकैकादेशस्यापि
तल्लक्ष्यभेदसम्पादकत्वमित्याशयात् । काण्डेकुड्य इत्यत्र तु पूर्वस्य प्रातिपदिकान्तत्वविशिष्टमन्त्वं ह्रस्वत्वविधावुद्देश्यतावच्छेदकन्तदव
च्छिन्नमात्रसम्बन्धित्वमेकादेशस्य किन्तु प्रकृत्यवयवप्रत्ययसम्बन्धित्वमित्येतादृशभेदमादाय लक्ष्यभेदस्याश्रयणात् । अत्र च काण्डेकुड्य

मै
७९

इत्यत्र प्रत्ययान्तपर्युदासप्रयोजनप्रदर्शनपरभाष्यस्यैव साधकत्वमाश्रीपतेः। युक्तञ्चैतत्। अन्यथा अन्नियत्कुलन्नस्म कुड्यस्याम् कुड्याम् प
स्मै कुड्यायेत्यत्र सवर्णदीर्घे कृते ह्रस्वो नपुंसक इति ह्रस्वत्वापत्तिः स्यात्। तथा विवक्षायान्तु कुड्यशब्दान्त्यावयवाच्त्वम्पूर्वकालिकम
स्ति कर्तृह्रस्वत्वोद्देश्यतावच्छेदकतादाश्रयमात्रसम्बन्धित्वन्नोत्तरकालिकविकारस्येति लक्ष्यभेदो भवत्येव नचैवमपि काण्डे कुड्य इत्य
त्रिकादेशो विशिष्टस्य प्रत्ययान्तभिन्नत्वं शास्त्राश्रितम्पूर्वान्तवद्भावेनेति ह्रस्वत्वम्प्राप्नोत्येवेति वाच्यम्। ह्रस्वो नपुंसके यत्तस्येति न्यासेन
सिद्धेः प्रातिपदिकग्रहणन्तत्प्रधानप्रातिपदिकस्यैव ग्रहणमिति स्वीकारात्। अत्र भाष्ये अप्रत्यय इति शक्यमकर्त्तुम्। कस्मान्न भवति
काण्डे कुड्ये इति। कृत्तद्धितग्रहणन्नियमार्थम्भविष्यति कृत्तद्धितस्यैव प्रत्ययान्तस्य प्रातिपदिकसञ्ज्ञा भवति नान्यस्येत्युक्तम्। अत्र कैयटः। य
द्यपि कृत्तद्धितग्रहणमित्युक्तं तथापि तद्धितग्रहणमेव नियमार्थम्। कृद्ग्रहणन्तु प्रतिषिद्धार्थमभिदृक्षिदिति अत्रत्यधातुरिति प्रतिषेधप
प्रसङ्गः। नच प्रत्ययान्तस्य चेत्तद्धितान्तस्यैवेति नियमशरीरम्पर्यवसन्नन्तथा सति कारक इत्यत्र प्रातिपदिकत्वन्न स्यात्। कृद्ग्रहणं हि मध्येऽप
वादन्यायेनाधातुरिति प्रतिषेधस्यैव बाधकम्भविष्यतीति वाच्यम्। बाध्यसामान्यचिन्तायाः एवकारक इत्यादिनिर्देशात् कृतेस्वीकारात् बहुत[illegible]
बम्भाष्यतात्पर्यवर्णने कृत्तद्धितग्रहणमित्युभयोपादानमनर्थकमापद्येतेति धातोः प्रत्ययान्तस्य चेत्कृत्तद्धितान्तस्यैवेति नियमाकारेणात्य
र्थमेवम्वा धातुग्रहणमपि मन्कार्यम्। अर्थवद्ग्रहणन्तु पर्युदासमवत्वात् शार्थवत्त्वलाभो न भवतीता दृग्बोधनार्थं कार्यमेवा। अतएव प्रत्ययपर्युदा
सो भाष्ये नोक्तः। नन्वेवं सति तद्धितग्रहणस्याप्यस्यापत्यमितिरियानित्यादौ प्रत्ययपर्युदासेन प्रातिपदिकत्वाप्राप्त्या तन्न्यायकृतयाचारितार्थ्यान्नियमा
र्थत्वानुपपत्तिरिति शङ्क्यम्। तादृगर्थवत्त्वमेवाह। अर्थवत्सूत्र इत्यादि। एवं सति सूत्र इत्येकरूपस्यैवार्थवत्त्वस्याश्रयणौचित्यमपि। यदि मनोरमा

७९

मोक्तरीत्योत्तरसूत्रेण कार्याभावेन लौकिके प्रयोगे प्रसिद्धत्वस्य प्रमाणत्वादर्थवत्त्वरूपं विवक्षितं न तदा प्रत्ययग्रहणे इति परिभाषायाः प्रयोजनं निरूपण
वसरे देवदत्तो गार्ग्य इत्यस्य कृत्तद्धितेति सूत्रेण यत्र अन्तत्वात्प्रातिपदिकत्वापत्तिरन्यथास्यादित्युक्तं भाष्ये तन्न सङ्गच्छेत तावत्समुदायेन कार्याभाव
विरहात्। ननु देवदत्तो गार्ग्य इत्यस्य समुदायस्य पारिभाषिकार्थवत्त्वमस्ति न वा। आद्ये सिद्धान्तेपि वक्ष्यमाणरीत्या समासग्रहणकृतनियमेनावार
णात् पूर्वसूत्रेण प्रातिपदिकत्वं दुर्वारम्। अन्त्ये उत्तरसूत्रेण तदन्तविध्यर्थमर्थवत्पदानुवृत्तेरावश्यकतयाऽर्थवत्त्वाभावस्य सत्त्वादुत्तरसूत्रस्याप्र
प्राप्तिरिति प्रत्ययग्रहणपरिभाषाप्रयोजनकथनपरं भाष्यमभवन्मतेपि विरुध्येत। किञ्च प्रत्ययग्रहणपरिभाषा यावन्न सिद्धा तावत्कालेऽर्थव
त्सूत्रे प्रत्ययान्तत्वस्याप्रियथा कथंचिद्ग्रहणं स्यादेवञ्च समासार्थो लौकिकवाक्यस्य प्रत्ययान्ततया पूर्वसूत्रस्याप्राप्तेः समासग्रहणमुत्तरसूत्रे वि
ध्यर्थमप्रविष्टमिति नियमकथाच्छेद इति चेन्न। उत्तरसूत्रेऽर्थवत्पदानुवृत्तौ केवलकृत्तद्धिते पारिभाषिकार्थवत्त्वाभावादभेदेन विशेषणविशेष्य
भावानुपपत्तिरिति कृत्तद्धितांशे तदन्तविधौ कृत्तद्धितविशेषणार्थवत्पदांशेपि तदन्तविधौ बाधकाभावेनार्थवदन्तं यत्कृदन्तं तद्धितान्तञ्चेत्यर्थस्वीका
रादर्थवान्यो गार्ग्यशब्दस्तदन्तत्वस्य प्रत्ययग्रहणपरिभाषाभावे तद्धितान्तत्वस्य च देवदत्तो गार्ग्य इति समुदाये सत्त्वेन प्रातिपदिकसंज्ञा प्राप्नोतीति परि
भाषाप्रयोजनकथनपरभाष्यसङ्गतिरित्यभिप्रायात्। परिभाषास्वीकारे तु विशिष्टस्यार्थवदन्तत्वेपि तद्धितान्तत्वाभावान्न दोषः। कन्नो गार्ग्य इत्या
दावर्थवदन्तत्वं व्यपदेशिवद्भावेन बोध्यम्। न चैवमपि पूर्वोक्तरीत्या समासग्रहणस्य नियमार्थवर्णनासङ्गतिरिति वाच्यम्। पूर्वसूत्रं परित्यज्योत्त
रसूत्रे प्रत्ययग्रहणपरिभाषायाः प्रयोजनं भाष्यकृतोक्तमित्यभिप्रायेण समासग्रहणस्य नियमार्थत्ववर्णनात्। तथा हि। प्रथमसूत्रे येषामवयवा अ
र्थवन्तस्तेषां समुदायोप्यर्थवान्। यथैकस्तिलस्तैलदाने समर्थस्तेषां समुदायः खारीशतमपि समर्थं तैलदान इत्यभिप्रायेण दशदाडिमानीत्या

भै
८०

दिसमुदायेपरां शङ्कां कृत्वा समाधानं कृतं तत्र प्रत्ययग्रहणपरिभाषासत्त्वमभिप्रेत्यैवान्यथा दशदाडिमानीत्यादिसमुदायस्य प्रत्ययान्ततया प्रत्य
यान्तपर्युदासेनैव तद्वारणे तैः शङ्कासमाधानयोर्निर्दलत्वापत्तेरेवञ्च पूर्वसूत्रविषये परिभाषयानुगृहीतएव पूर्वसूत्रम्प्रवर्त्तत इत्यभिप्रायः
कल्पनीयः एवञ्च समासार्थो लौकिकविग्रहवाक्यस्य प्रत्ययान्तत्वाभावान्निषेधाप्राप्त्या पूर्वसूत्रेणैव प्रातिपदिकत्वं सिद्धमिति समासग्रहण
न्नियमार्थमेव। किञ्च दैवदत्तो गार्ग्य इत्यत्र तद्धितान्तत्वात्प्रातिपदिकत्वम्प्राप्नोतीति कथनन्नपरिभाषाभावाभिप्रायेण किन्तु तद्धितान्तत्वा
न्प्रातिपदिकसञ्ज्ञायामपि परिभाषाप्रयोजनमिति ध्वनयितुमन्यथा प्रथमोपस्थितत्वाद्देवदत्तः पूजक इति समुदायस्य कृदन्तत्वात्प्राति
पदिकत्वापत्तेरेवाशङ्काविनाश्यात्। एतत्संज्ञेति। फलभूतेति पाठो ननु फलीभूतेति वैसम्भवाभावात् मधुलिडित्यादिसङ्ग्रहाय तत्रार्थद्वयप्र
वेशः। विभक्तीतरानपेक्षत्वञ्च विभक्तीतरविषयकज्ञानासहकारिकारणकज्ञानविषयत्वम् एवञ्च पद्विषयकज्ञानस्य लौकिकार्थबोधज
नकतायामेतत्सञ्ज्ञाफलभूतविभक्तिभिन्नविषयकज्ञानं सहकारिकारणम्भवति तन्त्वरूपमर्थवत्त्वम्प्रातिपदिकसञ्ज्ञोद्देश्यतावच्छेदकम
नच प्रत्ययग्रहणपरिभाषया कृत्तद्धितेतिसूत्रेण देवदत्तो गार्ग्य इत्यस्य प्राप्तसञ्ज्ञाव्यावृत्तावपि अर्थवत्सूत्रेण प्राप्नोति। तस्यार्थबोधजनकतायां
गार्ग्यशब्दप्रकृतिकप्रातिपदिकसञ्ज्ञाप्रयोज्यायाविभक्तिसन्मात्रस्यापेक्षासत्त्वादिति वाच्यम्। एतत्सञ्ज्ञेत्यस्य यद्रूपविशिष्टस्य यासञ्ज्ञा चि
कीर्षिता तत्फलभूतेत्यर्थात्। तच्च रूपं तत्तदानुपूर्वीरूपम्। एवञ्चार्थवत्सूत्रसाध्यसञ्ज्ञाफलभूतविभक्तिभिन्न कृत्तद्धितेतिसूत्रसाध्यप्राति
पदिकसञ्ज्ञाफलभूतविभक्तेरत्रापेक्षासत्त्वान्नातिप्रसङ्गः। अतएवैतत्सञ्ज्ञाफलभूतेति विशेषणमर्थवद्भवति। अत्र केचित् तद्धितञ्च
सामान्यात्प्रकृतिप्रत्यययान्यतररूपमेव गृह्यते। तेन क्वचिदादेशागमादिसापेक्षत्वेपि न क्षतिरादेशापेक्षायथा। अर्वणावितिप्रयोगघटकार्वन्श

भै
८१

पञ्चगवेत्यस्य धनशब्दोत्तरसमुदायघटकसुप्सापेक्षत्वेन तथा पञ्चगवोच्चैरित्यत्र पञ्चगवेत्यस्य सुप्प्रकृत्युच्चैःशब्दापेक्षत्वेन तयानाम्याभिन्नत्वेरा
मन्यारावश्यकत्वमेव। न च पञ्चगवेत्यस्य धनशब्दप्रकृतिकसुप्सापेक्षत्वेऽपि मानाभाव इति वाच्यम्। धनशब्दप्रकृतिकश्रूयमाणसुबन्तेनैकार्थी
भावस्वीकारेण सुपोऽप्यपेक्षायाः सत्वात् उच्चैरित्यस्यैव वचनत्रसुवन्ततया सुपस्तत्र नापेक्षेति प्रकृतिनिवेशसार्थक्यमिति दिक्। कृदादीना
मनर्थकानामिति। न च प्रतिष्ठा निष्ठाशब्दघटकाङ्गप्रत्ययस्याङ्कुटिनमित्यादिशब्दघटकाणप्रत्ययश्चानर्थकः प्रसिद्ध एवेति वाच्यम्। तस्या
पि प्रकृत्यर्थेनार्थवत्वाभ्युपगमात्॥ ननु पर्युदासेनैवार्थवत्वलाभे सिद्धेऽर्थवद्ग्रहणं त्वत्रि वयुक्तन्यायानित्यत्वं वेः स्कन्देरनिष्ठायामिति सू
त्रस्य तिङन्तेऽपि प्रवृत्त्यर्थम्भविष्यतीत्याह नचेत्यादि। भाष्यसम्मतेति। तस्य सूत्रस्य तिङन्तेऽपि प्रवृत्तेर्भाष्यानुक्तत्वात् कृत्स्वेव प्रवृत्तेरित्यादिसि
द्धत्वाच्च। अपि च पर्युदासस्थले सदृशग्रहणमवश्यम्भवतीत्यभिप्रायेण कर्त्तरि चकारकेति सूत्रे भाष्ये कर्त्तरीति कर्तृसदृशस्य कारक
स्य ग्रहणं त्कर्तृग्रहणं कर्त्तव्यमित्युक्तम्। ननु अर्वणस्त्रसावनञ इति सूत्रे साविन्यस्य पर्युदासत्वे तस्य सूत्रस्य सुभिन्नविधावेव प्रवृत्तिः स्या
न्न चेष्टापत्तिः। अर्वन्तमित्यत्र समासेऽप्रवृत्त्यापत्तेः। न चात्रत्रादेशप्रवृत्तौ साधकाभाव इति वाच्यम् अर्वण इति सूत्रस्थस्य धातोर्विहितान्ता
न्मनुपिकृतेनान्ते नार्वच्छब्देन साध्यप्रयोगस्य साधनेन प्रत्याख्यानैकवाक्यतया तत्र प्रवृत्त्यनुमानादित्यत आह। इदन्तरेति। अर्वणस्तृ म
घोनश्च नशिष्यञ्छान्दसं हि तदित्यनेनार्वच्छब्दस्य छान्दसत्वात् उक्तप्रयोगस्य छान्दसत्वेन लुमतेति निषेधानित्यत्वेन तदुपपत्तिसम्भ
वः। छान्दसा अपि क्वचिद्भाषायाम्भवन्तीत्यस्याश्रयणे तु वाहेर लुप्यनसहस्वदगर्वद्रत्येवत्रादेशाभाव एवदा पदिल्वर्वण इति सूत्रे साविन्य
त्रप्रसज्यप्रतिषेध एव तदा तु नानुपपत्तिरिति बोध्यम्। पारिभाषिकार्थवत्वस्वीकारेऽपि धातुपर्युदाससार्थक्यमुपपादयति। अहन काएडर

ति॰ न च तत्केवलस्येति॰ पारिभाषिकार्थवत्त्वं केवलप्रत्ययस्य नास्तीत्यर्थः। नदेतदुपपादयति॰ तदुक्तमित्यादि॰ विशुद्धानामिति प्रत्ययरहिता
नामित्यर्थः। लौकिक इति॰ लोके विदित इत्यर्थः। स च कारकादिविशिष्टः। एतेन केवलस्य धातुसञ्ज्ञाप्रयोजकार्थसद्भावेपि न क्षतिः। कृत्तद्धि
तानामर्थश्च केवलानामिति॰ अत्रा लौकिको र्थो विद्यत इति सम्बन्धः। अत्र प्रसज्यप्रतिषेधार्थकेन नञा समासः। प्रकृत्यर्थनिष्ठप्रकारता
निरूपितविशेष्यताशून्यानामित्यस्यार्थः। प्राग्विभक्तेरिति॰। विभक्त्युत्पत्तेः प्रागित्यर्थः। नदन्तस्य॰ कृत्तद्धितान्तस्य। तथैवार्थो न विद्यत इति॰।
अत्रैवकारस्य नञुत्तरं सम्बन्धः। एवञ्चानुत्पन्नविभक्तिकानां कल्पितार्थसद्भावेपि न लौकिकस्यार्थस्य सद्भाव इति। एतेन सूत्रद्वयेन निरुक्ता
र्थवत्त्वमेव प्रातिपदिकसञ्ज्ञाप्रयोजकमिति स्पष्टमेव लभ्यते। अत्र प्रमाणमाह॰ अत एवेति॰ सूत्रद्वयेपि निरुक्तार्थवत्त्वस्य विवक्षितत्वादेवेत्य
र्थः। ज्ञापकत्व इतिः सन्नीतिशेषः। शास्त्रीयार्थग्रहण इति। आवापोद्वापाभ्यां कल्पित इत्यर्थः। तदर्थस्य॰। प्रशस्तस्येत्यर्थः। स च स्वार्थद्रव्यलिङ्ग
सङ्ख्याकारकरूपः। नत्वत्यासन्नः। तद्विषयकप्रतीत्यव्यवहितप्राक्कालिकप्रतिपत्तिविषयः स च कृत्तद्धितान्तस्यैव न तु केवलकृत्तद्धितस्येति
भावः। लक्ष्यत इति॰। सुपां द्योतकतया सुप्समभिव्याहारे एव स प्रतीयत इति भावः। एवञ्च सुबन्तस्यैव सम्पूर्णलौकिकार्थवत्त्वम् तत्प्रागभागस्य
तु लौकिकार्थप्रत्यासन्नत्वमित्युक्तम्। विवरणकाराद्युक्तिं खण्डयतिः। यत्त्विति॰। अभिव्यक्तेरपीति॰। अभिव्यक्तेरेवेत्यर्थः। यत्र चलितिद्घुगित्या
दौ प्रतीतिरस्ति तत्र न कृदन्तत्वमात्रमपि तु प्रद्वयोर्भाव इत्यर्थः। सामान्यत इति॰। लौकिकालौकिकसाधा
रणार्थवत्त्वमित्यर्थः। अत एवा पारिभाषिकार्थवत्त्वस्याभिप्रेतत्वादेवा तद्धितग्रहणस्येति॰ एतत्प्रागुपपादितम्। पञ्चनावप्रिय इति॰ अत्र श्रू
यमाणसुबन्ते नैवैकार्थीभावाङ्गीकारादेतत्सञ्ज्ञाफलभूतविभक्तिभिन्नस्य सुपो पेक्षासत्त्वान्न प्रातिपदिकत्वम् प्रत्ययस्य प्राप्तिरेवनेति॰। प्रत्य

भै॰
८२

यमात्रस्य चिकीर्षितायां प्रातिपदिकसंज्ञायां तत्फलभूतत्वेनोद्भूतविभक्तिभिन्नस्य प्रकृतिस्वरूपस्यापेक्षासत्त्वात् तादृशत्वं सामान्यतोऽर्थवत्त्वस्या
श्रयणे प्रत्ययान्तव्याप्तिवारणाय तत्पर्युदासे गौरवमिति भावः इदं च एतत्संज्ञाफलभूतेत्यस्य यथाश्रुतार्थकत्वे बोध्यम् पूर्वोक्तरीत्यानि
ष्कर्षे तु हरिषु इत्यादौ सुपः स्वप्रकृतिसापेक्षत्वे सत्युत्तरवृत्तित्वनिरुक्तान्यतरसापेक्षत्वं नास्त्येवेति न क्षतिः व्याप्तिवारणाय स्वप्रकृतेरपि निवेशं कृ
त्वा तादृशप्रत्ययभिन्नं पदेन तत्संज्ञो हि द्वयोत्तरवृत्तिसुप्सुप्प्रकृतिर्यस्य च साचिकीर्षिता तत्प्रकृतिश्च एतदन्यतमत्वं दपेक्षयेति वाच्यम् य
दि तु सङ्ख्याकर्माद्यभावे सामान्यापेक्षनियमेन च सुपो नोत्पत्तेः सिद्धौ सुप्सिपोः सत्यपि प्रातिपदिकत्वेऽपेक्षनिर्णायकी नोच्यते तदा पूर्वोक्तमेव सा
ध्विति दिक्॰ निरर्थकपदसमुदाय इति। निरर्थकश्चासौ पदसमुदायश्चेत्यर्थः। एतेन वक्ष्यमाणे न नियमेनास्य नव्यावृत्तिरिति सूचितम् अधनं
कं विना सुपोऽनुत्पत्तेः स्त्यभावात् न च दश दाडिमानीत्याद्यर्थवद्ग्रहणस्य फलमिति यावन्न सिद्धत्वात् तदुत्तरसूत्रेण तदनुवृत्तेरप्यभावेनोत्तरसू
त्रस्य समासग्रहणस्यासूर्यमित्याद्यसमर्थसमासस्य पर्युदासलभ्यार्थवत्त्वाभावेऽपि प्रातिपदिकसंज्ञाविध्यर्थं ग्रहणमिति नियम एव नास्तीति
वाच्यम् तेषां प्रातिपदिकसंज्ञायाः समासग्रहणाभावेऽपि धर्मिग्राहकमानेनैव सिद्धेः न चार्थवच्छब्दस्वत्वेन मूले व्याख्यातत्वात् अप्रत्यय
प्रत्ययान्तं वर्जयित्वेति तन्नो यथा तेन समानकर्तृकत्वाभावादिति वाच्यम् प्रातिपदिकसंज्ञकत्वविशिष्टभवनेऽर्थवच्छब्दस्वरूपस्य कर्तृत्वे
नात्पर्यात् सुबन्तानां समाससंज्ञाविधानात्तस्य समुदायस्य प्रत्ययान्तत्वशङ्कां व्यावृत्तये आह॰ प्रत्ययग्रहणादिति। साजात्यमिति॰ समासस्य सजा
त्यमित्यर्थः। नत्रपूर्वभागस्य पदत्वसत्त्वात्। साजात्यास्वीकारे समासातिरिक्तसंघातमात्रस्य व्यावृत्तिः स्यादेतत्सूत्रमर्थवतामेकैकवर्णानां सं
ज्ञाविधायकत्वेन चरितार्थमिति भावः॥ ननु यत्तच्छब्दयोर्बुद्धिस्थपरामर्शकतया यदा यो बुद्धिस्थस्तस्यैव बोधो न तत्त्वन्यस्येति यत्र सङ्घात इ

त्पनेनसमासात्मकस्यसङ्ख्यानस्यग्रहणेऽव्यवच्छेद्यवाक्यासङ्ग्रहः।वाक्यस्यैवपत्रेत्यनेनग्रहणेनन्पदेनापितस्यैववोधात्तद्भेदस्यसमासेऽभावा
न्नस्यपद्विसमासस्येत्यसङ्ग्रहमितिखण्डनकृदाहृतन्मतन्दूषयति·एतेनेति·मूलोक्तनियमाकारस्यसाजात्यप्रदर्शनेन।नन्वस्त्वर्थाननुगमः शाब्दा
नुगमस्तुस्याद्वेत्यतआह·शाब्दानुगमस्याप्रयोजकत्वेति·।अयम्भावः।शाब्दानुगमोनामानुगतार्थप्रतिपादनमेवयथाघटादिशब्दानांघटत्वा
दिनाऽनुगतानामेकाकारप्रतीतिविषयीभूतानामर्थानामर्थानाम्प्रति पादकत्वम्।ननुशाब्दानुगमइत्यस्यैकानुपूर्वीकत्वसम्पादनमित्यर्थः।अर्थ
भेदाच्छब्दभेदस्वीकारेऽपिशब्दानुपूर्व्याएकत्वस्यैवसत्त्वात्।एवञ्चप्रकृतेशाब्दानुगमसद्भावेऽपिपूर्वोक्तरीत्यार्थानामननुगतत्पासोऽकिञ्चि।
त्करइति।ननुपदादीनाम्बुद्धिविषयतावच्छेदकत्वोपलक्षितधर्मावच्छिन्नेशक्तिस्वीकाराच्छक्यतावच्छेदकानामननुगमेऽपिशक्यतावच्छेद
कतावच्छेदकैक्यादनुगतत्वव्यवहारोभविष्यतीत्यतआह·व्यवच्छेद्याननुगमेऽपीति·।सङ्ग्रहस्यविवक्षितधर्मवत्त्वेनवोधनीयेसर्वसङ्ग्र
होपस्थितिनिरपेक्षितासाचाननुगमेनसम्भवतीत्यनुगमापेक्षाव्यवच्छेद्याननुगमेऽपितेषांविशेषधर्मसम्बन्धवोधस्यानभिप्रेतत्वात्ते
षामननुगमेऽपिक्षतिविरहादितिभावः।यथोक्तम्भाष्ये।शब्दापशब्दयोरन्यतरोपदेशेनकृतंस्यादिति·मूलोक्तनियमाकारस्यासाध्यत्वा
त्प्रत्ययग्रहणइतिपरिभाषायादेवदत्तोगार्ग्यइत्यत्रातिव्याप्तिवारणार्थमावश्यकत्वप्रदर्शनपरभाष्यालभ्यतइतिकस्यचिच्छङ्कायान्तदर्थमाह·
पदशब्देनेति·यद्यपिपदशब्दोनपदसञ्ज्ञकपरस्तदात्वषएवसुरित्यस्यासङ्ग्रहः।यदिपदसञ्ज्ञायोग्यपरस्तथापिभसञ्ज्ञयापदसञ्ज्ञायाःप्रकृतेवा
धात्तद्योग्यतापिनेतिस्वीकारेसर्वसमाससाजात्याभावएवापदसञ्ज्ञाप्रयोजकप्रत्ययप्रकृतिपरत्वेराज्ञःपुरुषइतिवाक्यघटकस्यपूर्वभागस्यविभक्ता

न्नस्यतादृशप्रकृतित्वाभावादेव। ननुषष्ठीप्रकृतिप्रातिपदिकमादायवाक्यसङ्ग्रहइतिवाक्यानान्नियमेनव्यावृत्तिर्भविष्यतीतिचेत् एवंसति
पदशब्दस्यतत्रशक्त्यभावेनलक्षणायाआवश्यकत्वेजहत्स्वार्थलक्षणापेक्षयाऽजहत्स्वार्थलक्षणैवोचिता किञ्चजन्मवानित्यादौप्रातिप
दिकत्वसिद्धयेऽन्तरस्तुप्रत्ययोनेत्यपिनिवेशनीयमितिगौरवमपिभविष्यतीत्याशयेनाह· स्वातन्त्र्येणेत्यादिस्वातन्त्र्येणाप्रयोगयोग्यत्वेसत्य
र्थवदित्यर्थः। अत्रसाजात्यप्रदर्शकवाक्ये। अत्रपूर्वशब्दोपादानात्परस्यापितादृशस्यैवोपस्थितिरितिस्वातन्त्र्येणाप्रयोगयोग्यताविशिष्टा
र्थवत्त्वविशिष्टपूर्वोत्तरभागकसमुदायलाभाज्जन्मवानित्यादेस्सङ्ग्रहः। पूर्वोत्तरपदयोस्स्वातन्त्र्येणाप्रयोगार्हत्वञ्चतन्नत्वयोगाभावेप्यर्थबो
धनायप्रयुज्यमानत्वम् यत्तुसम्बेरमश्शाकृत्करिः समस्थइत्यादेस्स्वातन्त्र्येणप्रयोगार्हत्वान्नैतद्घटितरूपेणासाजात्यविवक्षणंयुक्त
मिति। तन्न· वेदव्यासइत्यत्रोपपदसमासेविनापिप्रत्ययमितिवचनेनवेदस्यलोपेपिव्यासेत्यस्यप्रयोगवत्सम्बेरमइत्यादावपितथा
सम्भवात्। यदिचभीमसेनइत्यस्ययदुत्तरपदंसेनइतितावन्मात्रस्यपृथक्प्रयोगादर्शनाल्लोपविधायकंवचनंक्वाचित्कमितिनैतेषुपू
र्वोत्तरपदयोरन्यतरलोपेनान्यतरस्यस्वातन्त्र्येणाप्रयोगार्हत्वसम्भव इतिमन्यते। किञ्चनिष्ठोपपदसञ्ज्ञाविधायकशास्त्रविधेयप्रत्यया
न्तघटितसमुदायावयवत्वपूर्वोत्तरभागाभावसमानकालिकार्थबोधजनकतावच्छेदकानुपूर्वीमत्वान्यतररूपमेवस्वातन्त्र्येणाप्रयोगार्ह
त्वमितिविवक्षणीयमेतद्घटकपूर्वोत्तरभागाभावश्चकालिकसम्बन्धेनयत्प्रतियोग्यधिकरणान्निरूपितनिरवच्छिन्नविशेषणतासम्ब
न्धावच्छिन्नवृत्तित्वात्मकसामानाधिकरण्यसम्बन्धेनतत्प्रतियोगिविशिष्टान्योवक्तव्यइतिनविशिष्टाभावोभयाभावमादायदोषः
नचैवंसतिस्वातन्त्र्येणप्रयोगार्हार्थवदित्यत्रपृथगर्थेनिवेशनमफलमितिवाच्यम्· निरुक्तस्यस्वातन्त्र्येणाप्रयोगार्हत्वस्यनिवेशा
स्सूचनायतदुपादानात् उक्तार्थेभाष्यसम्मतिमाह· अतएवेति· उक्तान्यथानुपपत्तिपरिहारार्थमेवार्थवत्समुदायानामिति अर्थवत्समु

दायपदमत्र तन्त्रेणाषष्ठीतत्पुरुषकर्मधारयाभ्यामर्थवान्यस्समुदायस्तद्बोधकं कर्मधारयमात्रविवक्षायामव्युत्पन्नडित्थादेरसङ्ग्रहः। ष
ष्ठीतत्पुरुषमात्रविवक्षायामुत्तरसूत्रेऽनुवर्त्तमानं पदमर्थवत्पदन्तरर्थो लाभस्तत्रत्यानुवर्त्तमानस्यार्थवत्पदस्य निरुक्तार्थकत्वमावश्य
कमन्यथाऽनर्थकोयोऽर्थवतां समुदायोऽश्राद्धभोजी ब्राह्मणोऽलवणभोजी ब्राह्मण इत्यादि तेषाम्पूर्वसूत्रेणाप्राप्ताया सञ्ज्ञा तद्विधाय
कत्वेन समासग्रहणस्य चरितार्थतया नियामकत्वानुपपत्तेः। न चेष्टापत्तिः मूलकेनोपदंशमित्यादिवाक्ये कृदन्तखादतिव्याप्त्यापत्तेः पू
र्वसूत्रस्थनिरुक्तार्थकस्यैवानुवृत्तौ तु पूर्वसूत्रे यथार्थवान्यः शब्दस्तस्यैवार्थवत्पदबोध्यत्वं तथोत्तरसूत्रेऽपि वाच्यमिति कर्मधारयोऽप्याव
श्यकः। अश्राद्धभोजीत्यादीनान्तु सुडनपुंसकस्येति ज्ञापकेन साधुत्वम्बोध्यम्। किञ्च दशदाडिमानीत्यादिरनर्थवद्ग्रहणव्यावर्त्यमु
क्तं तदपि कर्मधारयपक्षे सङ्गच्छते। अन्यथा तस्य समुदायस्य नियमेनैव व्यावृत्तौ तस्यार्थवद्ग्रहणव्यावर्त्यतानुपपत्तिः। अत्र भाष्य
इति वाक्यव्यावृत्तिपरं भाष्यमित्यर्थः। सुबन्तानामित्यनेनेति। अस्य बहुपटवइत्यादिसङ्ग्रहायेत्यादिः। अत्र प्रातिपदिकसञ्ज्ञाभवेऽपि
नक्षतिरितिनु न वाच्यम्। बकाराकारस्य चित इत्यनेनोदात्तत्वापत्तेः। तदुक्तम्भाष्ये। तुल्यजातीयस्य नियमः कश्च तुल्यजातीयः यथाजाती
यकानां समासः कथंजातीयकानां समासः सुबन्तानाम् यद्यर्थवत्समुदायमात्रविषयको नियमः स्यात्तदा बहुपटवइत्यादीनाम्व्यावृ
त्तिरेव स्यात्। अत्र हि द्योत्येनार्थेन बहुजर्थवान् प्रकृतिस्तु वाच्यार्थेनार्थवतीति स्पष्टमेव। ननु सुबन्तत्वे समाससामान्यसाजात्यवत्कृम
शाकमश्वक्रीतीत्यादिषु वृत्तेः प्रागेव गतिकारकोपपदानामित्यनेन समाससञ्ज्ञाप्रवृत्तिबोधनादत आह। भेदसंसर्गद्वारकार्थवत्त्व
इति। समाससञ्ज्ञायोग्यानां शब्दानाम्पृथक्प्रयोगे सतीतरसंसर्गाकाङ्क्षया भेदसंसर्गः सद्वारभूतो यस्य विशिष्टार्थवत्त्वस्य तद्युक्तानाम्
मित्यर्थः। समासेति। वाक्यीयेनैवार्थेन विशिष्टार्थवत्त्वं बहुपटवइत्यादौ तथा नेति भावः। पचत भृज्जता खादत मोदत इत्यादिसमासस्यापि दर्श

बहुवचनमत्रविकारागमानां बहुत्वात्तदभिप्रायेण। महासञ्ज्ञयेति· एतद्बलादेवण्यर्थान्तर्भावलाभः। स्वस्वप्रकृत्यन्यतरार्थेति·। स्वार्थप्र
त्यायकत्वं धातोरितिसूत्रविहितसनिस्पष्टम्· स्वप्रकृत्यर्थप्रत्यायकत्वं स्वार्थिकेऽप्यन्तस्वार्थिके वप्रसिद्धम्। अत्रापि स्वार्थिकस्यप्रकृत्यर्थ
द्योतकत्वमन्यन्तस्वार्थिकस्यानुद्योतकत्वाभावेपि प्रकृतिप्रत्ययोरन्यविषयताविलक्षणविषयत्वाप्रयोजकत्वरूपस्वप्रकृतिसाधारणधर्मस्या
श्रयतया गौणप्रकृत्यर्थप्रत्यायकत्वमितिविशेषः। ननुपदार्थद्योत्यवाच्येवायस्यविधानन्तस्यतदर्थकत्वकल्पनन्नचैतत्प्रकृतेसम्भवति
अर्थविशेषविधानाभावादतआह· स्वप्रकृत्यर्थश्चेति· समुच्चार्येति·। अर्थबोधकशब्दमुच्चार्येत्यर्थः। बाधितत्वमिति·। प्रकृतिशक्यत्वेनवा
धितत्वमित्यर्थः। एवमनर्थकानां विकारागमानामन्वर्थसञ्ज्ञया व्यावृत्तिरुक्त्वा सार्थकानामपि सञ्ज्ञां वारयति· अत एवेति·। अन्वर्थसञ्ज्ञावि
ज्ञानादेवेत्यर्थः। नभवधाद्यादेशानामिति·। नाभिनभश्चाहनश्चवधः। आदिना विरागो विरङ्गश्चेत्यस्य परिग्रहः। स्थान्यर्थेनैवेति·। स्थान्यर्था
भिधानसमर्थस्यैवादेशत्वमितिसिद्धान्तात्· एवकारव्यवच्छेद्यमाह· नत्विति· स्वः स्वीयः। ननु स्वार्थत्वाभावेपि उक्तप्रकृत्यर्थत्वतुल्यमर्थ
वत्वं स्यादत आह· अत एवेति·। स्थान्यर्थेनार्थवत्त्वादेवेत्यर्थः। तदर्थेति· तेषामपृथगर्थेत्यर्थः। अत एव नभ्यशब्देनाभिहितइत्येव बोधान
तुनभ्महितइति· नचैतावतापि उक्तप्रकृत्यर्थत्वव्यावृत्तिः कथमितिवाच्यम्· तत्र प्रकृतिशब्दस्य प्रत्ययविधानावधिपरतया यस्माद्यस्यविधानं
तत्प्रत्ययोरन्यविषयताविलक्षणविषयत्वाप्रयोजकत्वस्य साधारणधर्मस्य तत्राभावेन न प्रकृत्यर्थार्थकत्वस्य व्यवहार इति भावः। आदेश
नामपि श्विनिष्ठनिरूक्तप्रत्ययत्वाश्रयादेशतया स्थानिवद्भावेन प्रत्ययत्वं सुलभम्· अत्रार्थे भाष्यसम्मतिमाह· एतदर्थेति· ननु विग्रहवा
क्यादेतादृशार्थप्रतीतावपि प्रत्ययपदात्कथन्तदर्थप्रतीतिरत आह· भाष्यप्रामाण्यादिति·। प्राचामुक्तिं दूषयति· यत्त्विति· अप्रवृत्त्या

मै·
८७

पत्तेरिति· एषु देशकालाद्यासा या अन्यत एव निवृत्तेः। ननु तृणाह इति निर्देशादकधः कप्रत्ययबाधकतया बहुलग्रहणश्चितः सप्रकृतेर्बह्वकजर्थमिति
भाष्याक्तत्वमवत्वज्ञानमभिविष्यतीत्यत आह· किञ्चेति· विशेषविहितत्वेन निरवकाशत्वे सत्येव बाधप्रयोजकमित्यत आह· परत्वादिति· न च लादे
शप्राप्तियोग्ये विषये सीयुटश्चारितार्थ्याभावेन परत्वात्सीयुडित्यसङ्गतमिति वाच्यम्। लादेशपदस्य लादेशसामान्यबोधकत्वेऽपि लविशेषेयत्व
त्र लादेशस्येदत्वप्रवृत्त्या तत्प्राप्तियोग्ये सीयुटश्चारितार्थ्यस्य सिद्धमेवेत्याशयात्। यद्यपि लादेशानां प्रत्ययत्वं स्थानिवद्भावेन सिद्धं तथाप्य
धिकृतस्य प्रत्ययइत्यस्य तत्रासम्बन्धे मानाभाव इत्याशयः। अथ वा परत्वादित्यस्याद्युदात्तश्चेति सूत्रीयस्यापरत्वादित्यर्थः। लादेशनिमि
त्ताद्युदात्तत्वस्यापात इत्यादिरवकाशः। शयिषीष्टेत्यादौ लसार्वधातुकानुदात्तत्वात्सीयुटः सावकाशः। प्रकृते चोभयप्रसङ्गे· परत्वात्सीयुडित्यर्थः
लावस्थायामनु नस्वरस्यानकत्वात्। न च पूर्वं सीयुटि अनिर्दिश्यमानत्वान्न समुदायस्य व्यवहितत्वान्न निर्दिश्यमानस्येत्यादेशप्रवृत्तिरेव
स्यादिति वाच्यम्· धातोरित्यस्य विहितविशेषणत्वाङ्गीकारेण व्यवहितेऽपि प्रवृत्तेः। अपादानत्वासम्भवादिति गुपादिभ्यः प्रत्ययस्य विश्लेषा
भावात्। तत्र· तस्यासत्याम्। अस्यैव तु दुपपत्तेऽपि इति शेषः। ननु गापोष्टगित्यत्र पञ्चम्यनिर्देशादादेशत्वापत्तिरत आह· गापोष्टेति· अस्य प्रत्यया
धिकारे पाठेन प्रत्ययत्वज्ञाने षष्ठीस्थानेयोगेति सूत्रस्याप्रवृत्तिकल्पने षष्ठ्यर्थाकाङ्क्षायां सत्याम् अनन्तरपदाध्याहारेण तन्निरूपितसम्बन्धार्थ
कत्वमस्य इति भावः। स च सम्बन्धः स्वाधारदेशसम्बन्धिदेशाधिकरणकसम्भावितकर्तृत्वरूपः। व्यवधानेन परत्वापत्तिं वारयति। अत्रेति।
अत्र· तन्नत्प्रत्ययविधायकयोगे। न च यत्र तस्मादिति परिभाषोपस्थितिस्तत्राव्यवधानलाभेऽपि गापोष्टगित्यादावव्यवधानलाभः कथमिति वाच्य
म्। अत्रापि धातोरित्यस्यानुवृत्त्या गापोरनन्तरो धातोरव्यवहित इत्यर्थकल्पनेनादोषात्। उत्तराङ्गेति। उत्तरस्येत्यंशेत्यर्थः। षष्ठ्यंशेति। तदर्थ

८७

स्यासम्भवात्। प्रसमर्थादिति सूत्रोपस्थितेर्नोः सुपि च बहुवचने मत्वर्थादिति सप्तमीनिर्देश एव प्रमाणम्। यदि पूर्वशब्दाध्याहारेण प्रत्ययः पूर्वः स्यात्तदा
सप्तमीनिर्देशोऽनुपपन्न एव स्यात्। ननु विभाषा सुप इति सूत्रे पुरस्ताद्ग्रहणे न बहुजेव पूर्वो नान्य इति नियमेनान्यः प्रत्ययः पूर्वो न भविष्यति।
न च यत्र षष्ठीनिर्देशो गापोष्टगिति तत्र मध्येऽपि प्रत्ययोत्पत्तिः स्यादिति वाच्यं॥ अव्ययसर्वनाम्नामिति सूत्रे प्राक्टेर्ग्रहणे नायमेव मध्ये नान्य
इति नियमेन मध्यदेशस्यापि नियमनात्। एवं सति परिशेषात्पर एव भविष्यतीति किं षष्ठ्यं शबिकलसूत्रोपस्थानेनेति चेन्न। विधेयतयाप्र
धानीभूतयोर्बहुजकचोर्नियामकतयापि पुरस्ताद्ग्रहणस्य प्राक्टेर्ग्रहणस्य च चारितार्थ्यसम्भवेन प्रत्ययान्तरनियामकत्वे व्यापाराभाव
इत्याशयात्। इति सिद्धमिति। परत्वस्य सावधिकतयाऽवध्याकाङ्क्षायां यस्माद्विधानं ततः परो भवत्येवेति फलितमिति। शास्त्रेण च धात्वा
देर्विधानात्केवलस्य पचेत्यादित्यस्य प्रयोगो न भविष्यति। नन्वेवं गवित्ययमाहेत्यस्य प्रयोगो न स्यादत आह। अनुकेति। अभेदविवक्षयेति।
तदा सादृश्याख्यसम्बन्धेनोपस्थितिर्न वृत्त्याख्यसम्बन्धेन प्रकृते च वृत्तिरूपसम्बन्धेनार्थबोधकतया लोकदृष्टस्य ग्रहणमिष्यत इति भा
वः। प्रातिपदिकत्वाभावेनेति। अस्य स्याद्यनुत्पत्तेरिति शेषः। एवञ्च यत्फलितं तदाह। प्रकृतित्वाभावादिति। प्रत्ययविधावित्यस्य यदीति
शेषः। अस्येदृश्यतावच्छेदकीभूतयोगमूलकत्वात्समासः। ननु प्रत्ययः परो भवत्येवेत्यस्य यत्र प्रत्ययस्य लुक् तत्र नियमभङ्ग इत्यतस्तत्परिह
रमाह। अयन्न्याय इति। अन्यतरेति प्रकृतिप्रत्ययान्यतरेत्यर्थः। एतेन यत्र प्रकृतेर्निवृत्तिस्तत्रापि व्याप्तिस्तद्यथा नित्यादौ न नियमाव्याप्तिः।
नन्वपदं न प्रयुञ्जीतेति यथा वाचनिकं तथा न केवला प्रकृतिरिति नियमस्यापि वाचनिकत्वमेवास्त्वित्यत आह। एतदिति। एतन्मूलक
मेव। न केवला प्रकृतिरिति नियममूलकमेवेत्यर्थः॥ ननु परिनिष्ठितपदार्थाप्रसिद्ध्यापरपदार्थाप्रसिद्धिरित्यत आह। अप्रवृत्तेर्नित्यवि

भै॰ ८९

धीति। अप्रवृत्तो यो नित्यविधिस्तस्य पदुद्देश्यतावच्छेदकान्तरनाक्रान्तत्वमिति विवक्षितम्। न च गन्तेत्यादावप्रवृत्तो यो नित्यविधिरार्द्धधा-
तुकेति तस्य पदुद्देश्यतावच्छेदकं वलाद्यार्द्धधातुकपरधातुत्वं तदाक्रान्तमेतदिति परिनिष्ठितमेतत्स्यादिति वाच्यम्। उत्सर्गापवादस्थ-
लेऽपवादस्य विषयम्परित्यज्यैवोत्सर्गप्रवृत्तिस्वीकारादुपदेशकालावच्छिन्नैकाज्झानुदात्तत्वावच्छिन्नप्रतियोगिताकभेदविशिष्टधातुपर-
वलाद्यार्द्धधातुकत्वस्योद्देश्यतावच्छेदकतया तदनाक्रान्तत्वस्य प्रकृते सत्त्वादेवमेवान्यत्रापि बोध्यम्। सेद्धेत्यादावव्याप्तीति। न च नि-
त्यपददानेऽपि कथमस्य परिनिष्ठितत्वम्। पूर्वोक्तविशेषणविशिष्टधातुपरवलाद्यार्द्धधातुकत्वसत्त्वादिति वाच्यम्। स्वरित्यादिभि-
न्नत्वेनापि धातोर्विशेषणीयत्वात्। न त्वस्य निषेधस्य व्यापकतया न केवलेति वचनस्य च प्रकृतिप्रत्ययमात्रैर्विषयकतयैतन्मूलक-
तयेत्यसङ्गतमिति चेत्। केवलप्रत्ययप्रकृतिप्रयोगो ह्यपरिनिष्ठितस्य प्रयोगे प्राप्तेऽनेन नियमेन तस्य निवृत्तावेकदेशानुमत्या व्यापकस्या-
पि तन्मूलकत्वमिति गृहाण। एकवचनोपपत्तये आह- समाहारेति। प्रकृते राक्षेपादिति- परत्वस्य सावधिकत्वात्। न चास्मिन्नस्य शाब्दबो-
धे भानाभावेन कथमेतदिति- वाच्यम्- अवध्याकाङ्क्षायाः प्रकृतेऽनित्यत्वात्प्रकृते रितिशब्दाध्याहारेण विवक्षितवाक्यार्थपर्यवसान-
सम्भवात्॥ ९३॥ नद्वितीयादीति- पच्यम् गोधावतीत्यादौ धावतिपदात्कर्मबोधिका द्वितीयास्यात्। न च पचति भवतीत्यत्र तिङन्तात्प्रथ-
मायाः अव्याप्तिः सम्भवेन प्रथमादीति वक्तव्ये द्वितीयादीत्यनुपपन्नमिति वाच्यम्- अनभिहिताधिकारे कर्मणीति सूत्रस्य प्रथमोपादाना-
त् संख्याभावादित्यर्थः। समकाभावेनौत्सर्गिकैकवचनस्याप्रवृत्तेः। एवं सर्वत्र तिङन्तस्य भवति क्रियाकर्तृत्वसम्भवेन प्रथमाया दुर्वारत्वा-
त्सुबन्तत्वमेव पदत्वसिद्धेस्तिङ्ग्रहणस्यानर्थक्यमपि सम्भाव्येत। न च तिङर्थसङ्ख्यावच्छिन्ने सुबर्थसङ्ख्यायाः प्रकारतया भानं स्या-

८८

इति वाच्यम्। दण्डवान् दण्डवानिति वृद्ध्युद्देश्यतावच्छेदकविधेयतावच्छेदकयोरैक्येन शाब्दबोधासम्भवात्। ननु तस्या एव सङ्ख्यायाः प्रतिपा
दकः सुप् कथमन्नस्यादित्यत आह। तिङेत्युक्तत्वादिति। एतेनैकसङ्ख्याया धात्वर्थे परस्यास्तिङर्थसाधनेऽन्वयाभिप्रायेण तिङन्तात्सुबुत्पत्तिः स्या
दित्यपास्तम्। न च द्योतकविषये उक्तार्थानामिति न्यायाद्धि लक्षणविन्यादौ यथा दृष्टस्तथाऽत्रापि स्यादिति वाच्यम्। द्योतकविषयेऽपि क्वचिन्न्यायप्रवृ
त्तेः स्वीकारात्। अत एव स्त्रीप्रत्ययप्रकरणेऽव्यक्तेणोक्तोपीत्यादि वक्ष्यति। वाक्यात्तर्हि सुबुत्पत्तिः स्यादित्यपि नाशङ्कनीयम्। स्वघटकसुपा तत्रापि
सङ्ख्याया उक्तत्वात्। ननु धातुभ्यस्तर्हि स्यादित्यत आह। धातुभ्य इति। अपवादत्वादिति। विशेषविहितत्वेनेत्यादिः। ननु धातुतिङन्तेभ्यस्तद्धित
व्यावृत्त्यर्थं प्रातिपदिकाधिकार इत्यत आह। तस्येत्यादीति। तिङन्ताद्धेत्वन्तरेणापि तद्धितं वारयति। तमब्विधादिति। न्यायेनेति। अनया युक्त्या सु
बुत्पत्त्यनन्तरमेव तद्धितोत्पत्तिसम्भावनेति भावः। हेत्वन्तरमाह। तस्यापत्यमित्यादेरिति। उपस्थितत्वादिति। पूर्वोक्तहेतुद्वयेनोपस्थितत्वादि
त्यर्थः। एवञ्च प्रातिपदिकाधिकाराभावेऽनुदात्तादेरित्यस्यानुदात्तादेः सुबन्तादित्यर्थोऽपि सम्भाव्येतेति भावः। न चोञ्छादिगणे सर्वशब्दस्य पा
ठमात्रे कर्तव्ये सर्वस्य सुपीत्यन्तं न प्रवर्तत इति कल्प्यते सर्वत्रैव सर्वस्य सुपीत्यस्य प्रवृत्त्यानोदात्तत्वस्य श्रवणाभावात्तत्पाठस्यात्रसिद्धिमात्रफल
कत्वात्। यदि च प्रातिपदिकाधिकाराभावेऽनुदात्तादेः सुबन्तादित्यर्थे च सति सार्व इत्यत्र भवदुक्तरीत्या नोऽप्रवृत्तिस्तर्हि उञ्छादिषु सर्वशब्दपाठ
स्यैव यथेष्टमेवेति वाच्यम्। अस्य ग्रन्थस्यैतत्सूत्रभाष्ये पठितवार्तिकोक्तप्रयोजनसामान्योपलक्षणत्वात्। एवं हि वार्तिके उक्तम्। वृद्धावृद्धावर्ण
स्वरद्व्यज्लक्षणे च प्रत्ययविधौ तत्सम्प्रत्ययार्थम्। वृद्धावृद्धावर्णस्वरद्व्यज्लक्षणे तर्हि प्रत्ययविधौ तत्सम्प्रत्ययार्थं ङ्याप्प्रातिपदिकग्रहणं क्रि
यते। वृद्धात्। अवृद्धात्। अवर्णान्तात्। अनुदात्तादेः। द्व्यचः इति एतानि प्रातिपदिकविशेषणानि यथा स्युरिति। अथ क्रियमाणे प्रातिपदिकग्रहणे

कस्यैतानि विशेषणानि स्युः। समर्थविशेषणानि। तत्र को दोषः। उदीच्यां वृद्धाद्गोत्रात्। इह च प्रसज्येत ज्ञानोत्रास्त्रणानामपत्यम्। एतद्धि सम
र्थम् वृद्धम्। इह न स्यात् त्रयो वर्ग्राह्मणेरपत्यमिति। प्राचामवृद्धात्फिन्बहुलम्। त्रयो वर्ग्राह्मण्योरपत्यमित्यत्र प्रसज्येत एतद्धि समर्थं वृद्ध
म्। इह न स्यात् ज्ञानां त्रास्त्रणानामपत्यमिति। एतद्धि समर्थं वृद्धम्। अत इञ्। इहैव स्यात् दक्षस्यापत्यं दाक्षिरिति। एतद्धि समर्थमकारान्त
म्। इह च न स्यात् दक्षयोरपत्यं दक्षाणामपत्यमिति। एतद्धि समर्थमनवर्णान्तम्। अनुदात्तादेरञ् भवति। इह प्रसज्येत वाचो विकारः स्व
चो विकार इति। इह न स्यात्। सर्वेषां विकारः सार्व इति। ह्यचष्टन्। इह प्रसज्येत वाचा तरति त्वचा तरति। इह न स्यात्। घटेन तरतीति भा
ष्ये उक्तम्। एवं पञ्चानां विकार इति विग्रहे षड्ढ्रिचतुर्भ्यो हलादिरिति विभक्तेरुदात्तत्वेन समर्थस्यानुदात्तादित्वादञ् प्राप्नोति। प्रातिपदि
काधिकारे तु त्र्यःसङ्ख्याया इति पञ्चन् शब्दस्याद्युदात्तत्वादनुदात्तादिना प्रातिपदिकप्रकृतिकसुबन्तस्याभावान्न भवतीति बोध्यम्॥
ननु प्रातिपदिकाधिकारेपि यत्प्रातिपदिकं सर्वं तत्वेन तदनुदात्तादि तत्समर्थम्। यच्च समर्थं सर्वं ङसिनि तत्प्रातिपदिकमित्यत्र न प्रमाणम्।
ति लक्षणया प्रातिपदिकपदस्य तत्प्रकृतिकपरत्वञ्चेत् समर्थपदस्यैव समर्थप्रकृतिके लक्षणास्तु किं प्रातिपदिकाधिकारेणेत्याशङ्क्य ते
न चेति। मानाभावात्। अस्यानुपपत्त्या न कवीजाभावादित्यादि। तत्रापि गर्गादिस्य इत्यत्रापि। न लक्षणेति। प्रकारान्तरेण निर्वाहे अ
न्यवृत्तिकल्पनमन्याय्यमिति भावः। सामान्यग्रहणे तद्विशेषग्रहणे चेति। अनया परिभाषया ङ्याप्ग्रहणेनैव पर्य्यप्रतिपादनपरभाष्या
त्सामान्यग्रहणं कुमारः श्रमणादिभिरित्यस्य ज्ञापकतया विशेषग्रहणञ्चेत्यर्थः। बहुतरोदाहरणेनेति। अपस्कुम्भीत्यादिः। नन्वनया
स्त्रीप्रत्ययविशिष्टस्य प्रातिपदिकग्राहकशब्देन ग्रहणेपि प्रातिपदिकत्वनदृष्याप्यधर्मलाभः कथमत आह स्त्रीप्रत्ययेति। ननु समास

न्तविधौ नेति। ङ्याप्सूत्रभाष्ये उक्तत्वाद्विरोध इत्यत आह। समासान्तेष्विति। अवयवविषय एवेति। यथा मद्राणां राज्ञी मद्रराज्ञीत्यत्र राजाहरिति
टच् चा उपलक्षणमिति। अत्रमा ननु कुत्सित इति सूत्रभाष्ये स्वार्थादिप्रयुक्तकार्यैः संस्कृतस्य बहिर्भूतकुत्सादियोग इति न्यायेनाजिष्टाय
निकः प्रत्ययः स्त्रीप्रत्ययानन्तरमेव भविष्यतीति तद्वीत्योङ्यान्तद्धितोत्पत्तिः स्यात् ङ्याप्ग्रहणस्य वाच्यार्थमात्रतात्पर्यकत्वे तु नेति फलैका
पलक्षणया आवश्यकत्वमिति भावः। सिद्धिरिति। विशिष्टात्तद्धितसिद्धिः। अन्यथा लोहितिकाइत्येवस्यादादिना युवतिकेत्यादिपरिग्रहः
ननु पुंवद्भावाद्ध्रस्वत्वं विप्रतिषेधेनेति वार्तिकव्याख्यानावसरे पुंवद्भावावकाशो दारदिका इति भाष्ये उक्तत्वेन तसिलादिषु कप्प्रत्ययस्या
पि पाठेन युवतिकेत्यत्रोपलक्षणत्वाभावेऽपि न क्षतिरत आह। आतेश्चेति। ननु वयसो नित्यत्वेन नास्य जातिवाचकत्वमत आह। वयो
वाचिनामिति। वैकल्पिकेति। आकृतिग्रहणेत्यादिलक्षणैः नित्यत्वाद्व्यतिविशेषणाभावाद्युवत्यादिकमपि जातिरतः सर्वयुवतिनरेति भ
व्यादात्तेन पुंवत्त्वम्। न चैवं युवजानिरित्यत्र पुंवत्त्वानापत्तिः जातेश्चेति निषेधादिति वाच्यम् अपर आहेत्यादिना प्रादुर्भावविनाश
भ्यां द्रव्यस्य युगपद्ग्रहणे इत्यादिनाऽयावद्द्रव्यभावित्वघटितलक्षणान्तरकरणेन पुंवत्त्वस्यतन्मते जातित्वाभावात्। एवञ्च भिन्नव्या
पिकन्तृकलक्षणद्वयप्रामाण्ये न वयोवाचके जातिकार्यविकल्प इति भावः। वृद्धा वेश्या तपस्विनीत्यादौ पक्षे तर्हि ङीष् प्राप्नोतीत्यत
ता दृश्या नामजादिषु पाठो बोध्यः। एवञ्च मोरादिषु तद्ग्रहणं तु लुनयोः पाठस्तु अपर आहेति मते जातित्वाभावात्। एतच्चेति तद्धितपर इत्येत
त्यर्थः। व्याख्यानादिति। लक्ष्यसिद्धिमूलकव्याख्यानादित्यर्थः॥ एतेन। तद्धितपरस्य समासान्तमिति प्रत्ययातिरिक्तपरत्वेनातद्धितपर
स्य तद्धितसामान्यपरत्वे समासान्तप्रत्यययोरपि तद्धितसञ्ज्ञकत्वेन एतेषामपि स्त्रीप्रत्ययानादेवोत्पत्तिः स्यात्तथा च यूनीति बहुगोम

त्रिकेति स्यादेव तच्चाधुनानेति भावः तद्धितपदस्य समासान्तनिप्रत्ययानतिरिक्तपरत्वे सति यत्फलितं तदाह एवञ्चेति तदन्यपरत्वे चेत्यर्थः
आरभ्येति। एतेन समासान्तानां सङ्ग्रहः। व्याख्यानादिति कुत्सित इति सूत्रभाष्योक्तन्यायेन सार्थकतद्धितानां ड्याबन्तादेवोत्पत्तिर्भविष्य
ति। ड्याबोः स्वार्थविवक्षायामेव प्राप्त्युत्पन्नस्वार्थिकानां तु स्वार्थद्रव्यमात्रापेक्षत्वेन ताभ्यां पूर्वमेव प्राप्तिरिति तन्न्यायाविषयत्वमित्येवं
युक्तिमूलकादित्यर्थः एवं सति यत्सिद्धं तदाह। अत एवेति। अन्यन्तस्वार्थिकानां प्रकृतिप्रयोज्यविषयतावैलक्षण्येऽविषयत्वाप्रयोजक
त्वादेवा सुबुत्पत्तेः पूर्वमुत्पत्तिरिति सुबुत्पत्तेः संख्यापेक्षत्वेन बहिरङ्गत्वादिति भावः। पूर्वोक्तार्थे भाष्यसम्मतिमप्याह। सर्वस्य द्वे इति। प्र
योजनमिति। अस्य द्विर्वचनाभाव इत्यनेनान्वयः। पादार्थस्य पदशब्दार्थस्येत्यर्थः। एकत्वलक्षणेति। द्वित्वसंख्यायुक्तपादार्थस्य व्या
प्तिबोधसमये तदर्थगतैकत्वानुभवात्। परत्वाभावादिति। एतेन द्विर्वचनादेर्हेतुरुक्तः। प्राक् तद्धितोत्पत्तेरिति तद्धितोत्पत्त्यनन्तरं तु न
द्विर्वचनम्। तद्धितान्तेन वीप्साया बोधनात्। तद्धितस्यास्य स्वार्थिक[illegible]त्या सुबुत्पत्तेः प्रागेवोत्पत्तिरिति स्पष्टमनेन लभ्यते सुबुत्पत्तेश्च सं
ख्यापेक्षत्वमेतादृशतद्धितस्य तु नेत्यन्यन्तस्वार्थिकत्वसमाख्यापि साधु सङ्गच्छते। अत्रैव वार्त्तिकभाष्यान्तरमपि साधकमाह। पुंयोगा
दिनीति। अन्तरङ्गत्वादणीति। सुबुत्पत्तेः संख्यापेक्षत्वेन बहिरङ्गत्वमिति भावः। एवञ्चान्यन्तस्वार्थिकानां सुबुत्पत्तेः प्रागुत्पत्तिस्वीकार
वत्स्त्रीप्रत्ययानां लिङ्गबोधकत्वेन बहिरङ्गत्वात् स्त्रीप्रत्ययोत्पत्तेः प्रागित्यपि बोध्यम्। द्रुतमणीति। कूटधातोरिति शेषः। स्वार्थिकत्वेनान्त
रङ्गत्वादिति। विभक्तेर्बहिर्भूतसंख्याकारकापेक्षत्वेन बहिरङ्गत्वादिति शेषः। अत्र स्वार्थिकस्यान्तरङ्गत्वकथनेन सुबुत्पत्तेः प्रागुत्पत्ति
स्पष्टमेव लभ्यते। तस्यापि। अन्यन्तस्वार्थिकाणोऽपि। अपिशब्देन समाससङ्ग्रहः। न च समासस्य पदद्वयसापेक्षत्वमणस्त्विनुणन्तत्वमा

त्रायेक्षतयाऽन्तरङ्गत्वमिति वाच्यम्। अण्प्रत्ययो भवतीत्यर्थे जननीये सौत्राणप्रदादण्प्रत्ययस्वरूपज्ञानस्याप्यपेक्षासत्त्वे न समासाद्बहि
रङ्गत्वमिति भावः। इदमत्र बोध्यम्। समासान्तप्रकरणे प्रातिपदिकादित्यस्याप्यसम्बन्धः तेषाम् लौकिकविग्रहवाक्य एवोत्पत्त्या तस्याम
वस्थायाम प्रातिपदिकत्वादिति। समाहारद्वन्द्व इति। इतरेतरद्वन्द्वे बहुवचनापत्तिः। पृथक्पदत्वेऽप्यन्येकं विभक्तिश्रवणापत्तिरत आह। स
माहारद्वन्द्व इति। ननु लोपफलिकेत्सञ्ज्ञा न युक्ता। उच्चारणसामर्थ्यात्। अन्यथा काम्यचः ककारस्यापि सा कथन्न स्यादत आह। इतर
व्यावृत्त्या चरितार्थानामिति। एतेन काम्यजवयवककारइतोच्चारणसामर्थ्यमिषुनास्तीति भावः। निषेधो ययोगिनामिति। वाच्यत्वासम्ब
न्धेन विभक्तिशब्दावच्छिन्नस्य निमित्तत्वादिति भावः। ननु विभक्तिश्चेति सूत्रमकर्तुं शक्यम्। न विभक्ताविति सूत्रे सुप्तिङ्ग्रहणेनैव
सिद्धेः। अष्टन आ विभक्तावित्यादिसूत्रेषु सुवग्रहणमेवास्तु। त्यदादीनाम इत्यत्रापि सुवग्रहणमेवानुवर्तते। तथा सति प्राग्दिश इत्यत्रापि सुप्ति
त्यधिकारः यत्र तत्रेत्यादौ सुपसञ्ज्ञेके त्रलादावत्वम्भविष्यति। न चैवमेतर्हीत्यत्र सुपि चेति दीर्घापत्तिरिति वाच्यम्। पमीतिकरणेनादे
षात्। यादौ भादौ सुपीति तदर्थः। न च यत्र तत्रेत्यादौ सुपस्त्रलादेर्लोपे इदानीमित्यादावनुदात्तौ सुप्पितावित्यनुदात्तत्वं स्यादिति वाच्यम्
त्रलादिविधानसामर्थ्येन लुगभावसिद्धेः। त्रलोलित्करणेन ज्ञापकेन प्राग्दिशीये प्रत्ययेऽनुदात्तौ सुप्पितावित्यस्याप्रवृत्तेश्चेति चेन्न। त्र
लादीनां विधानसामर्थ्यकल्पने तत्र लोलित्वस्य ज्ञापकत्वाश्रयणे न मनोव्यापारगौरवस्य स्पष्टत्वात्। यभिरित्येतत्पदद्वयकरणेच्चास
र्वदादित्यत्र दादित्यत्र दाप्रत्ययस्य विभक्तिसञ्ज्ञायां प्रत्ययाद्युदात्तत्वेनानोदात्तत्वम्भवति। सुप्सञ्ज्ञायान्तु सौवर्यः समतम्य इति सिद्धा[illegible]दा
दौ विभक्तिनिमित्तकाद्युदात्तत्वेऽपि पुनर्दीन्तस्य सर्वस्य सुपीत्याद्युदात्तत्वापत्तावनुदात्तत्वापत्तेश्चेति समावेशार्थ इति। तेन युष्मद्युपपदे इ

भै· ८९

त्यादिप्रवृत्तिः नत्वन्यतरबाधः। वचनद्वयप्रामाण्यात्तदाह। पर्याय इति· ननु त्रीणि त्रीणीत्यस्यानुवृत्तौ अष्टन आ विभक्ताविति सूत्र
विषये सामर्थ्यान्निर्वाहः पि प्रथमयोरित्यत्र वचनयोरेव ग्रहणं स्यात् अत आह· प्रथमयोरित्यादाविति· वाच्ययोरिति· त्रिकयोरित्यर्थः
विभक्तिप्रदेशेष्विति। निरूपिततत्वकमेनेत्। दीर्घापत्तेरिति। नच तिङ्सञ्ज्ञैवास्त्विति घात्वापत्तेः। अस्मिन्व्याकरण इति· तेनेहेत्यस्यासि
न्प्रकरण इत्यर्थकत्वभ्रमनिरासः। ननु सुपिति सप्तमी बहुवचनस्यैव ग्रहणमस्त्वित्यत आह· प्रत्याहारादिति· अनेकसञ्ज्ञाकरणादि
त्यादि। नन्वादशतः सङ्ख्याशब्दस्य सङ्ख्येयपरतया द्वित्वैकत्वयोरित्यनुपपन्नमत आह· न सङ्ख्येयपराविति· बहुवचनापत्ते
रिति· एवं हि सति द्व्येकेष्विति स्यात्। प्रायः साधुत्वमिति· एतत्फलमाह· क्वचिदित्यादि· नन्वेकशब्दस्यान्याद्यर्थकस्यापि ग्रहणं स्याद
त आह· एकग्रहणमिति· व्यर्थैकवचनेति· अत्रैकशब्दस्यानुपादाने[illegible]सिद्धस्यैकशब्दार्थैकत्वस्याभावेप्येकवचनसिद्धिरिति भावः।
बहुषु बहुवचनमित्यनेन शास्त्रेण बहुत्वे बहुवचनस्य दृष्टत्वे निरूढाविति तात्। तत्र केषां बहुष्वित्याकाङ्क्षायां येषु कर्मादिषु बहुवचनं विधी
यते तेषां बहुष्विति भाष्य उक्तम्। अत्र केषां बहुष्वित्यत्र षष्ठ्युपादानाद्बहुत्वं बहुवचनं बोध्यम् तच्च बहुत्वं न सङ्ख्यानियतविषयप
रिच्छेदहेतुर्हि सङ्ख्या। बहुत्वं तु न तथा। नच बहुत्वस्य सङ्ख्यात्वे सुपां कर्मादयोप्यर्थाः सङ्ख्या चेत्यनेन विरोध इति वाच्यम्। त
त्र सङ्ख्यापदेन बहुत्वस्याप्युपलक्षणात्। त्रिचतुरादिव्यक्तीनां विवक्षायामपि बहव इति प्रयोगात्। अत एव बहुगणेति सूत्रभाष्ये य
दयमसङ्ख्यां सङ्ख्येत्याह सङ्ख्यावदयम्भवतीत्युक्तम्। तच्च बहुत्वं त्र्यादिसङ्ख्याव्यापकमखण्डोपाधिरूपम्। किञ्च लोके

८९

टादृत्युक्ते कतीति तद्व्याप्यसङ्ख्याजिज्ञासा भवति यदि बहुत्वमेव नियतविषयपरिच्छेदसम्भवे तर्हि तादृशजिज्ञासाबोधकव्यवहारो न
स्यात् न च यत्र घटत्रयविषयकं घटा इत्याकारकं ज्ञानं तत्र बहुप्रकारकज्ञानेऽपि त्रित्वप्रकारकनिश्चयाभावात् त्रित्वप्रकारकसंशयप्रति
बन्धो न स्यात् इति वाच्यम् द्वित्वादिबहुत्वस्याप्यपेक्षाबुद्धिजन्यतया यदापेक्षाबुद्धिविशेषजन्यबहुत्वप्रकारकप्रत्यक्षं तदा त्रित्वप्रका
रकप्रत्यक्षसामग्र्या अपि कल्प्यतेन जायमानत्रित्वादिप्रकारकप्रत्यक्षेण प्रतिबन्धात् संशयानुत्पादात् यत्र तु न प्रत्यक्षविशेषसामग्री तत्र
बहुत्वस्यापि न प्रत्यक्षम् । न चैवमपि यत्र घटा इति बहुवचनान्तशब्दप्रयोगस्तत्र त्रित्वत्वस्य बहुवचनार्थतानवच्छेदकतया तदवच्छि
न्नप्रकारताकशाब्दबोधासम्भवेन तादृशसंशयापत्तिरिति वाच्यम् उपापत्तेः यदा त्रय इत्यादिशब्दानन्तरानुत्रित्वादिशब्दधीस्तदैव
संशयनिवृत्त्यभ्युपगमात् । न च बहुत्वस्याखण्डोपाधित्वे भावत्ववदनेकवृत्तितया यत्किञ्चिद्व्यक्तिविवक्षायामपि घटा इति प्रयो
गापत्तिरिति वाच्यम् । त्रित्वादिव्याप्तिविशिष्टपर्याप्तेरेव बहुत्वसम्बन्धत्वोपगमे नैकस्मिंस्तादृशपर्याप्तिसम्बन्धेन तस्यासत्त्वान्न प्रामा
णिकानां तथा व्यवहारः । अत एव दारा इत्यादौ बहुवचनस्यारोपेण साधुत्वस्वीकारः साधुसङ्ग्रहणत इत्याशयादिति दिक् ॥ ननु बहुष्वि
तिसूत्रे बहुशब्दस्य बहुत्वार्थकत्वे बहुवचनासङ्गतिरत आह बहुवचनन्त्वाश्रयेति । नन्वेकव्यक्तावपि दारशब्दस्य बहुवचनान्त
स्य प्रयोगो दृश्यते स च वाच्यार्थे बहुत्वाभावादसङ्गत इत्यत आह दारा इत्यादाविति । कोशादृढव्यवहारेति । कोशो यथा दाराः पुंसि भूम्न्ये
वेति । दृढव्यवहारो यथा गुरवः समागता इत्यादौ । रामदूतीति । रमन्ते योगिनो यस्मिन्निति व्युत्पत्त्या हलश्चेति घञा कृदन्ततया प्रातिपदिकत्वा
त्स्वादयः । कार्यकालपक्षाभिप्रायेणाह एकदेशविकृतन्यायेनेति । रेफान्तसमुदायस्यान्तनिष्ठपदत्वस्यातिदेशः एतेन सकारमात्रस्य रु

भै० ८१

त्वेऽस्यानित्यतया तन्निष्ठसुत्वस्य रूपशब्दे लिङ्गविधित्वादतिदेशो दुर्लभ इत्यपास्तम् । भ्यामीति । भ्यामादावित्यर्थः । एवकारबलेनान्वयितावच्छे-
दकावच्छेदेन विधेयान्वयबलाद्विभक्तित्वावच्छेदेन सारूप्य एवैकशेष इति भावः । पुंवद्भावेनेति । भस्याढे इति सूत्रविहितेनेत्यादिः । नन्वे-
कशेषस्यापरनिमित्तकत्वेनान्तरङ्गतया बहिरङ्गदीर्घादेरसिद्धत्वान्मातृशब्दयोर्वैरूप्यादर्शनादेकशेषो दुर्वार इत्यत आह । लौकिक इ-
ति स च परिनिष्ठित एव तत्र वैरूप्यं दृश्यत एवेति भावः । प्राप्तिरेवेति । एतावतैः । बहुत्वोपचाराद् एकशेष इति व्यवहारः । न च सर्वशब्दस्य स-
म्बाभूतस्य सर्वनामत्वाज्जसि सर्वा इति सर्वनाम्नः सुसर्वे इत्येव वैरूप्यादेकशेषो न प्राप्नोतीति वाच्यम् । विभ-
योगप्रातिपदिकांश एव वैरूप्याभावस्य विवक्षितत्वात् । न चैकविभक्ताविति सैकत्वसङ्ख्यावच्छिन्नविभक्तावित्यर्थो न सम्भवति । य-
त्रैकशेषस्तत्र समुदायादेकविभक्त्यभावे नैकशेषप्राप्तिः स्ववैयर्थ्यापत्तेः । एकजातीयायामित्यर्थे स्वसा च स्वसारौ च माता च मातरौ चेत्यत्रै-
कशेषानापत्तिरिति वाच्यम् । लौकिकप्रयोग इत्यस्यैकशेषप्रवृत्त्युत्तरमुत्पन्नयोग्याया विभक्तेस्तस्यामित्यस्यैकशब्दोपादानेन विवक्षित-
त्वात् । तन्त्रेणैवेति । सकृदुच्चरितस्यैकस्य शब्दस्यानेकार्थप्रतिपादकत्वं तन्त्रम् । कारकस्येति अनेन विभक्त्यन्तं तन्त्रेति सूचितम् । न चात्र त-
न्त्राङ्गीकारेऽपि शास्त्रीयैकशेषेणैव निर्वाह इति वाच्यम् इन्द्र इत्यस्यानुवृत्त्या इदितो नुम् इति लिङ्गे । न च सहविवक्षायामित्यस्यावश्यकत्वा-
त् सा च एकधर्मावच्छिन्नान्वयित्व एव प्रकृते च समभिव्याहृतानेकसाहित्यानवच्छिन्नक्रियायामेवान्वयस्य तात्पर्यविषयतया सा नः ।
शाब्दबोधोऽप्यत्र परबोध्यानां साहित्यानवरुद्धानामनन्तक्रियान्वयिनां समूहालम्बनरूपः । न केवलं बहुवचनद्वारैवैतन्त्रेण निर्देशः कि-
न्त्वेकवचनान्तप्रयोगेऽपि तदाह । एवमस्मदिति । न चात्रैकस्य बह्वर्थकत्वे बहुवचनापत्तिरिति वाच्यम् । विभक्त्यन्तस्य तन्त्रेणानेकार्थकत्वे विव

८२

क्षितत्त्वं च न प्रातिपदिकमिति न दण्डादिभिः। उचितत्वं च तादृशविषये तत्स्वीकारः। अन्यथा साहित्याभावेप्येकशेषस्वीकारे शिष्यमाणैकशब्द
स्यानेकार्थाभिधायकत्वे ह्यानुपूर्व्यवचनपरप्रयोगद्वैकत्रैवान्वयः स्यात् नन्वक्षो भज्यतामित्यत्र न तन्त्रम् किन्तु वक्तुर्यदा श्रूयमाणैकश
ब्दादुपस्थितानामेव बहूनामर्थानामनेकत्रान्वयविवक्षा न तदा तस्य शब्दस्यावृत्त्याऽर्थानां पृथगुपस्थितिरेव स्वीक्रियत इत्यत आह· तन्त्र
मिति· शब्दस्य पर्यायपरिहृतीति· पर्यायस्य पर्यायवाचकस्य परिहृतिः। स्वप्रयोगाभावेपि स्वबोध्यावत्सु वृत्तिः तत्सहत्वं च योग्यत्वमि
तियावत्· अत्र शब्दस्येति षष्ठ्यर्थो निष्ठत्वम्। एवञ्च तादृशशब्दनिष्ठधर्मद्वैविध्येन शब्दोऽपि द्विविधः स्वावच्छिन्नशक्यतावच्छेदकावा
च्छिन्नविषयतासमनियतविषयताकबोधजनकतावच्छेदकत्वभिन्नकं यद्यत्तत्तदभिन्नधर्मवत्त्वं शब्दतन्त्रमिति निष्कर्षः। स्ववाचक
तावच्छेदकानुपूर्वी। सा च घटशब्दनिष्ठा तद्वत्त्वावच्छिन्नशक्यतावच्छेदकावच्छिन्नविषयतासमनियतविषयताकबोधजनकतावच्छे
दकत्वभिन्नकलशेत्यानुपूर्वीकत्वस्य तत्र सत्त्वात् समनैयत्यघटकव्यापकत्वानिवेशे यथा सविशेषविषयकबोधजनकतद्व्यक्तिरिति
शब्दमात्रव्यापकत्वादिवेशे द्रव्यशब्दमात्रायाः सावित्र्यादावसम्भवः स्यादित्युभयोपादानम्। अक्षेत्यादावानुपूर्वी च न तादृशीत्येतादृशेषु
शब्दतन्त्रमेव। एवञ्चैकस्मिन् शब्देऽर्थे वा बहूनां शब्दानामर्थानां वा सम्बन्धसम्भवात् तन्त्रि कुटुम्बधारण इति धात्वर्थानुसारात् तन्त्रव्यवहार उ
भयत्रापि सम्मत एव॥ ❀॥ परन्तु यत्रानेकार्थबोधो जायतामितीच्छया वक्तुः शब्दोच्चारणानुकूलाकृतिस्तत्र तन्त्रेणोच्चारणमिति व्यव
हारो यत्र तु न तादृशीच्छा तत्र न तथा व्यवहाराभावः। इदन्तन्त्रेणोच्चारणमनेकक्रियान्वयविवक्षायामेव सकृदुच्चरितः शब्दः सकृदर्थङ्गम
यतीत्याशयेनाह· अन्वयीति· अन्वयानुयोगिधात्वर्थसम्भेदादित्यर्थः। एकत्व इति· न च क्रियायां सकृत्स्यानन्वयादेकत्व इत्यसङ्गतमिति

भै॰ ६३

वाच्यमसङ्ख्याकृतपरिच्छेद इत्यत्र सूत्र इत्यर्थात् एकस्थितीति· इत्युपस्थापितदर्शने बहुवचनान्तेनाख्यातानिति पदेन तन्त्रेणोपस्थापि
तानां देवतानां पूर्वस्यास्वविभीतकाख्याणमन्वयः। तत्फलन्त्विति· नियमफलन्त्वित्यर्थः। प्रत्यर्थमिति। अर्थमर्थम्प्रतीत्यर्थः। अत्रापिना
अर्थावर्थौ प्रतीतिभाष्योक्तविग्रहोपि सूचितः। तद्विषय इति· सूत्रस्वारस्यात्। अन्य आह। अतएवेति· सहविवक्षाविषयत्वस्वीका
रादेवा प्रकृतसूत्रेणेति व्यपुनर्वस्वोरित्यतो द्वन्द्व इत्यपकर्षणादेतल्लाभः। तस्यापकर्षमकृत्वा तादृशनियमास्वीकारे दोषमाह· किञ्चे
ति· सारलसारव इति· आरवैः सहिताः सारवाः सरव्यांभवाः सारवाः। सारवाश्च ते सारवाश्च ऊर्मयत्लेषु जात इत्यर्थः विभक्त्यन्ततन्त्रेणैवे
सहविवक्षायामपि स्वीक्रियत इत्याह· असहविवक्षेति· व्याख्यानाभ्यामिति तृतीयान्तञ्चतुर्थ्यन्तञ्चापद इति द्वितीयान्तम्प्रथमान्तञ्च
नवमे काव्यप्रकाशे भक्तिप्रह्वविलोकनप्रणयिनी नीलोत्पलस्पर्द्धिनी ध्यानालम्बनतां समाधिनिरतैर्नीते हितप्राप्तये। लावण्यस्य महा
निधी रसिकतां लक्ष्मीदृशोस्तन्वती युष्माकं कुरुतां भवार्तिशमन[illegible]नुर्वा हरेरिति लिङ्गवचनश्लेषोदाहरणम्। तथा विद्वन्मानसहंस
वैरिकमलासङ्कोचदीप्तद्युते दुर्गामार्गणनीललोहित समित्स्वीकारवैश्वानरः। सत्यप्रीतिनिधानदक्षविजयप्राग्भावभीमप्रभो साम्राज्ये
वरवीर वत्सरशतं वैरिञ्चमुच्चैः क्रिया इति दशमोल्लासे उक्तम्। अत्र विरुद्धानामानसाभिन्नमानसाधिकरणकहंसेत्याद्यर्थः। एतेषु सहा
विवक्षाया अभावेपि तुल्यत्वात्मकस्य तन्त्रकारणस्य सत्त्वात्तन्त्रसद्भावो नानुपपन्नः शब्दानां तुल्यरूपत्वमेव तन्त्रकारणम्। तदुक्तम्। अस्मा
रिपुयथाभिन्नाभसिभङ्गिरिविक्रियाः। प्रयोगकालाभेदेपि प्रतिभेदं एकस्थिताः। अक्षाणान्त्रिणान्तन्त्रेऽपायस्तुल्यस्य तेतिभाष्य ६३
कृतसम्मतमेकशेषप्रत्याख्यानमाह· एतच्चेति· नन्वेवं सूत्रप्रत्याख्यानेयदानेकेन नानाप्रतिपादनविवक्षा किन्तु प्रतिव्यक्तिप्रतिपादने भ

च्छान्तदानेकघटग्रहाणां सहप्रयोगः प्राप्नोति न्[illegible]आह• अनेकघटादिपदानामिति• सूत्रारम्भवादिमतापेक्षया प्रत्याख्यानवादिमतस्य प्रा
बल्यात्तान्मतानुपर इति• विभक्त्यन्तानन्वपरः। सूत्रारम्भपक्षे एकग्रहणेऽपि विभक्तित्वव्याप्यरूपेण साजात्यविवक्षया यद्धर्मावच्छिन्नेन सारूप्यं तत्रै
कशेषस्तेन भ्यामादावेकशेषो भवत्येव तेषु सारूप्यसद्भावात् न त्वौजसादिषु तत्र वैरूप्यादिति केचित् तन्मतं दूषयन्नेकग्रहणफलमाह• ए
कविभक्ताविति• एवकारलभ्याभावप्रतियोगिभूतं विरूपत्वं विभक्तित्वावच्छेदेन विवक्षितमिति भावः। यत्तु समाहारविवक्षायामप्येकशेषेण भ
वितव्यं सूत्रारम्भेऽनभिधाने प्रमाणाभावात्तत्रापि सूत्रप्रवृत्तेरेव• अन्यथा घटघटादित्यस्याप्यनभिधानेनैव वारणेन सूत्रस्यैव वैयर्थ्यादिति
कश्चिदाह। नचैवं [illegible] रयोः [illegible]स्य वा प्रतीतिरित्यत्र विनिगमकाभाव इति वाच्यम्• प्रकरणादेरेव निर्णायकत्वा
दन्यथा घटादिरूपादौ कदाचिद्व्यक्तित्रयस्य कदाचिच्चतुर्णां [illegible] त्यत्रापि [illegible] समाहारविवक्षायामप्येकशेषाङ्गीकारादने
कस्मात्सूत्रप्रयोजनस्येत्युपपद्यते। अत एव न ब्राह्मणं हस्त्यादित्यस्याप्युपपत्तिः। न चैवं समूहेऽभावप्रतियोगिहननकर्मत्वप्रतीतावपि ब्राह्मणे
षु कथं न प्रतीतिरिति वाच्यम्• समूहस्यावयवानतिरेकात्• एकत्वान्वयस्तु प्रधानसमूह एवेति। तन्मतं दूषयति अप्राहीरिद्वन्द्वविषये त्विति•
अन्यतरस्यामित्यनेनेति• यद्येकशेषविषयाणां समाहारे वृत्तिः स्यात्तदा समाहारविवक्षायामेकवद्भावस्यान्तरतरभिवक्षायां द्विवचनबहुव
चनयोः सिद्धत्वान्यतरस्यामिति व्यर्थमेव स्यादिति भावः। अत्र केचित् आश्विकश्च आश्विकी च आश्विकन्यनानामानि आश्विकानीत्यत्र बहुप्र
हणं [illegible] सेनेति वार्त्तिकेनैकवद्भावस्य व्यावर्त्तनात् समाहारद्वन्द्वाभावेनैकवद्भावस्याप्राप्तस्य प्रापणार्थं प्रकृतसूत्रे एकवच्चान्यतरस्यामि
त्यावश्[illegible]मन्यस्त भववान्म्विन्यमिति तन्न• एकशेषस्य द्वन्द्वापवादत्वाऽपवादविषयपरिहारेणोत्सर्गस्य प्रवृत्तेरेकस्यैवारणाय प्रवृत्तिस्वीका

भै·
८५

तान्फलुप्तेनेति वार्त्तिकस्य विभिन्नशक्यतावच्छेदकविषयकतयोक्तस्थले वार्त्तिकाप्रवृत्तेरिति· जातिपक्षे त्वेवेति· नच जातेः साक्षात्त्वार्थ
न्वयित्वे संसर्गतया वाक्षेपेण वा च्यः नासाम्बवहुत्वाद्बहुवचनमेवस्यादेकवचनासङ्गतिरिति वाच्यम्· एतत्पक्षे जातेः प्राधान्येन तत्संख्या
एकत्वान्वयानुरोधेनैकवचनोपपत्तेः अत एव· जातिपक्षस्याभिप्रेतत्वादेवः इति दूषणमिति· नच विभक्त्यन्ततन्त्रेणैनाद्देश्यविध
येनिर्देशाश्रयणे न दूषणसङ्गतिरिति वाच्यम्· प्रतिव्यक्ति शास्त्रप्रवृत्त्यापत्तेरिति लाघवेन जातिपक्षस्यैवोचितत्वान्नायत्रैकशेषस्तत्र
श्रूयमाणातिरिक्तनिवृत्तेरशब्दत्वं वारयति· एकशेषशब्दार्थेति· एकैकत्यस्य सरूपाणामित्येतदपेक्षत्वे नासामर्थ्यशङ्कानिरासायाह·
पृथक्पदमिति॥ श्रूयमाणपदवृत्त्येति· लुप्यमानपदार्थेपि श्रूयमाणस्य शक्तियाहकत्वैकशेषविधायकं शास्त्रमेव· ब्राह्मणाविति
त्रिवभवतो भवनीत्यादिष्वपि विभिन्नकर्तृकानेकव्यापारप्रतीतिरेकशेषादेवेति· [illegible]याह· धातुष्विति· निरुक्तभेदानामिति ख्यनो।
द्वित्वादिसङ्ख्यारहितानामित्यर्थः ख्यगतमिति [illegible] यत एवात एव पार्वचनम्। यत्रापि देवदत्तयज्ञदत्तविष्णुदत्तैरास्यतस्तु च्यते।
तत्र वस्तुगत्या कर्तृभेदाद्भेदावगाहि[illegible] नानवगतिरेव· एवमभेदसमानाधिकरणद्वित्वादेश्चानवगतिः नच देवदत्तः पचतिय
ज्ञदत्तस्तु पचति तरामविष्णुदत्तस्तु पापच्यते इत्यादौ पच्यते देवलः पचतीत्यादौ च प्रकर्षयौनः पुन्याभ्यावृत्तिगणनप्रतीत्याभेदप्रतीतिरस्त्ये
वेति वाच्यम्। तेषामाश्रयगतप्रकर्षादिनिबन्धनत्वात् आश्रयगतोयः प्रकर्षः पटुत्वादिलक्षणस्तन्निबन्धनः क्रियायाः प्रकर्षः यौनःपुन्य
म्पुनरुत्पत्तिरभ्यावृत्तिरपि पुनः पुनरुत्पत्तिरेव· तत्पत्तेश्च तदधिकरणसमयध्वंसानधिकरणसमयसम्बन्धरूपतया समयसम्बन्धग।
तयौनःपुन्यादिनिबन्धनमेव क्रियायामयौनःपुन्यादिकमिति वाच्यम्· अत एव भाष्ये· नवकाशत्वेनैकशेषस्य [illegible]पवादत्वोत्पत्त्यनन्त

८४

रन्ति उक्तेष्वेकशेषस्य चारितार्थ्यमाशङ्क्य नानेति उक्तानामेकशेषारम्भप्रयोजनमिति एका हि क्रियेति भाष्ये उक्तम् । न च क्रियासमूहः का
ल इति व्यवहारः क्रियाया एकत्वे नुपपन्न इति वाच्यम् । नहि वयं सर्वापि क्रिया वस्तुत एकैवेति ब्रूमः । किन्तु क्रियाणां नामैवमत्यन्तापरदृष्टापू
र्वापरीभूतावयवेति भाष्यात्तस्याः सतो भेदेपि शब्दशक्तिस्वाभाव्येन धातुवाच्यक्रियायाः कर्त्रादिभेदेन भेदेपि निवृत्तभेदाया एव धातुतः
प्रतीतिरित्यभ्युपगमात् । न चैवमपि कर्तृद्वयविवक्षायां लङ्द्वयापत्तिरिति वाच्यम् । वर्तमाने लडित्यादावेकत्वस्याविवक्षितत्वात् ॥ उभयस्वरि
तस्य देश इति । अन्यतरस्मात्स्वरात् [illegible] स्याप्येश्मोतीति तथापि विनिगमनाविरहादुभयस्वरितकोपि स्यात् । यद्यप्यान्तरतम्य
घटकोदात्तानुदात्तेशब्द्राभ्यां तत्सन्तक [illegible] त्वाभावादुभयस्वरितेनैकत्स्य सङ्गतम् तथापि वैनैव रूपेण
सादृश्यमत्रयास्त्वमित्यत्र विनिगमनाविरहादाद्युदात्तसन्तकः कदाचिद्यनुदात्तसन्तकश्चादेशः प्राप्त इत्याशयः । स्वरभिन्नानामिति स्वरै
भिन्नानामित्यर्थः । उत्तर इति उत्तरसूत्रेण विहित इत्यर्थः । एवञ्चास्य स्यादेव न स्य सूत्रस्य परतया ऽऽद्युदात्तस्यैवैकशेषः । अनभिधानादि
ति तदुक्तं भाष्ये इह कस्मान्न भवति । एकश्च एकश्च द्वौ च द्वौ चेति । सङ्ख्याया अर्थासम्प्रत्ययादन्यपदार्थत्वाच्चानेकशेष इति अत्र कैय
टः सङ्ख्याया अर्थस्यासम्प्रत्ययादित्यर्थः । यत्रैकः शब्दोनेकमर्थमभिधातुं शक्नोति तत्रैकशेषो नान्यत्र प्रयुक्तानामन्वाख्यानात् । एका
वित्युक्तेः सहायादिरर्थो गम्यते न तु द्वावित्यर्थः । अन्यपदार्थत्वादिति । असन्दिग्धे न यदान्तरेणायमर्थः प्रत्याय्यत इत्यर्थः । यथा एकश्च
एकश्चेत्यत्र द्वाविति द्वौ च द्वौ चेत्यत्र चत्वार इति । अत्रेदम्बोध्यम् । एकादिदशशब्दानामनपत्सु एकशेषविधायकशास्त्रादृश्यत्वाभा
वः साधिम । स्वशक्यतावच्छेदकभत्रावच्छिन्नविषयताशालिशाब्दबोधजनकशब्दकं यद्यत्तद्भिन्नत्वस्येति शिष्यमाण

मे० ६४

शब्दजन्य[illegible]बोधीयायास्वप्रयोज्यविषयतानतिरिक्तवृत्तिविषयतानन्वयोजकशब्दान्तरकत्वादिति बाहेतुः स्वमेकशेषवृत्तिपाकालिक
सहवृत्ति[illegible]साविषयः शब्दः न तु गार्ग्यादित्यतः कदाचिद्गर्गगोत्रापत्यद्वयस्य बोधजनने ऽपि गार्ग्यपदस्यापि गार्ग्यश्च गार्ग्यायणश्चेत्येवं स
हवृत्तिसा[illegible]बोधात्स्वशक्यतावच्छेदकमात्रावच्छिन्नविषयताशालिशिष्यमाणशब्दजन्यबोधजनकशब्दकत्वस्य तत्रासत्वेनेनोद्दश
धर्मावच्छि[illegible]भिन्नत्वस्य तत्र सत्वेन प्रथमहेतौ व्यभिचारः तथा विंशतिश्च विंशतिश्च विंशती इत्यत्र द्वितीये शिष्यमाणविंशतिशब्दज
न्यबोधीया[illegible]स्वप्रयोज्यविषयतानतिरिक्तवृत्तिविषयतानन्वयोजकचत्वारिंशच्छब्दकत्वसत्वेन व्यभिचारः एवं घटादिशब्देऽपि पर्या
यकलशादिमादाय व्यभिचार इति चेन्न एवन्तर्हि निमोऽपृथक्परिहारे एकपरिहारोपमासङ्ख्यायामर्थासम्भवत्पदार्थत्वाच्चे
तिभावे ऽत्रैव समाधानात् । एवञ्च सामानाधिकरण्यसम्बन्धेन प[illegible]मविशिष्ट[illegible]रे तत्त्वमित्युक्तम्भवति पार्ग्यादित्यत्र प्रथमस्य
विशेषणस्य सत्वेऽपि[illegible]ष्यमाणत्वेन विंशती[illegible]त्यादौ च विशेषणस्यासत्वेनैतेषु हेतुतावच्छेदकावच्छिन्नाभावसत्वान्न व्यभिचारः
आदिग्रहणानुवृत्तेः फलमाह तेनात आ एशब्दानुवृत्तिकरणेन चामरादावित्ति तथासति चितरन्त्यो सत्तापत्तिः लघावन्नेति किं तु
सूत्रेण आद्युदात्तो विहितः । नेत्वमिति यद्यत्रेत्सञ्ज्ञा स्यात्तदा चिन्तित्स्वरयोः पर्यायः स्यात् । मकारपरित्राणार्थादिति उकारे सति व्यव
सितान्त्यत्वस्य मकारेऽभावात् । अत एव विभक्तित्वादेव नत्या इति एतेनानित्यत्वस्येदानीं व्यतिरिक्तस्थले फ[illegible]ाभावेन तत्र तु प्रकारान्त
रेणैव निर्वाहात्सामान्यतोऽनित्यत्वाश्रयणमनुचित[illegible]मित्यरुचिः सूचिता । इत्सञ्ज्ञा वारितेति सद्यः पर इत्यत्र सकारमकारयोरित्वाभावो
निपातनादेव न चैवमोतस्सकारस्येत्वन्न स्यादिति वाच्यम् ननोऽपृष्टप्रतिवचने शेषेल ड्यदौ । क्रियानियतादित्यादिति निर्देशादुच्चारणार्थ

६५

स्तत्स्थत्वस्वीकारात्। ननु पदलोपे ऽन्यत्वमस्त्येवेत्यत आह· लोपस्यासिद्धत्वाच्चेति· बहिरङ्गत्वेनासिद्धत्वादित्यर्थः। गो वा क्यालङ्कारे। अत एव ब्रः
पुरस्तादपवादन्यायाश्रयणादेव· इज्ग्रहणाभावे ऽप्यज्ग्रहणानुवृत्त्यैव सिद्धेः। तद्वैयर्थ्यमिति· इज्ग्रहणवैयर्थ्य[illegible]मित्यर्थः। नन्वनन्तरानि
न्यस्य प्रतिपक्षस्याव्यवहितेन वक्तव्ये ऽनन्तरानित्ययुक्तमत आह· अनन्तरापेक्षेति· तथा चैवं शब्देन प्रतिपक्षकथनमेवेति भावः। न तदन्तस्य सञ्ज्ञे
ति· न च सञ्ज्ञाविधाविति निषेधः शङ्क्यः। सामन्त्रितमिति[illegible]हासञ्ज्ञाकरणे न प्रत्ययग्रहणे ऽपि तदन्तग्रहणसिद्धेः। योग्यतयेति· अन्यथा
समानविभक्तिकत्वाभावेनैङ्ह्रस्वादिति उभे[illegible]विशेषणं न स्यात्। प्रत्यय इति· अङ्गसञ्ज्ञासूत्रे प्रत्यये इत्यनन्तस्य योगविभागेनैतादृशप
रिभाषाया लाभात्। सम्बुद्धः प्रत्ययतया प्रत्य[illegible]ज्ञा[illegible]स्य प्रकृतिज्ञानं व्याप्य[illegible]पानरूपं प्रकृतिज्ञानमभविष्यतीत्यत आह· अनुमानेति· भावे
ल्युट्। अनुमितौ स्वार्थः फलाभावादिति· न च हे कर्तरित्यत्र हलोलो[illegible]भावस्यैव फलत्वमिति वाच्यम्· तस्य शास्त्रीयप्रत्ययग्रहणपरिभाष
यैव लाभे नानुमानस्य व्याप्त्यादिज्ञानसापेक्षस्य विलम्बिनोपस्थितिकत्वात्। न चानुमीयमानाङ्गस्य सम्बुद्धिसत्त्वमेव फलमिति वाच्यम् तथा
सत्यपि परेन तस्यानुपस्थापनाच्छाब्दबोधाङ्गत्वं न तस्य न स्यादिति भावः। ज्ञान इति· प्रत्ययत्वेन ज्ञाने प्रत्ययाधिकारे यानो विधेयसमर्थकविभ
क्तिनिर्देशश्च साधकः। न तु प्रकृतिज्ञानं तस्य तज्जनकतावच्छेदकधर्मशून्यत्वादिति भावः। अत एव एतादृशे विषये प्रत्ययहलपरिभाषायाए
वोपस्थितेः[illegible]भे· न च सम्बुद्धिसञ्ज्ञकः प्रत्ययो यस्माद्विहितस्तदादेरिति लोपे कृते ऽपि कर्तरित्यस्त्येवेति कथमत्र लोपाभाव इति वाच्यम्· परिभाषायां
प्रत्यय[illegible]कस्य तदादेरित्यंशस्य घटकतया प्रकृते सम्बुद्ध्यानादृशस्यैव तदादेरित्यंशस्योपस्थितिः लोत्रे रेफान्तो न ह्रस्वान्त इत्यदोषात्।। परत्वा
दिति· लो[illegible]पस्येत्याशिषः पूर्वह्रे ऽभिपूर्वरस्य मे ऽनव्यवहारासम्भवादिति· अन्नादिवच्चेति गास्खवला देकस्मिन्नपि यदिव्यवहारदृष्टन्न

भै॰
९६

यापि ह्रस्वस्य सम्बुद्धेश्च पूर्वत्वस्य परत्वस्य चातिदेशे बाधकशास्त्राभावेन तादृशव्यवहारासम्भवादिति भावः। ननु स्थानिवद्भावेन तादृशव्य
वहारो भविष्यतीत्यत आह॥ तादृप्येति॥ तादृप्यस्य वर्णमात्रवृत्तिधर्मघटितस्यानतिदेशेन ह्रस्वान्तात्परा सम्बुद्धिरिति व्यवहारः स्थानिवत्त्वेना
पि दुर्घटः॥ ह्रस्वस्य वर्णवृत्तित्वया विशेषणतया लाश्रयणात्। ननु पूर्वान्तवद्भावेन ह्रस्वाङ्गत्वमेकदेशविकृतन्यायेन तस्य सम्बुद्धिलन्तस्यैव
च व्यपदेशिवद्भावेन तदवयवत्वमिति लोपो भविष्यतीत्यत आह॥ अर्द्धविकार इति॥ हल्ङ्याब्भ्य इत्यत्र माङ्हा एकवचनसम्बुद्धेरिति तनुस्थानिवद्भावेन
तदवयवत्वमिति लोपो भविष्यतीत्यत आह॥ मकारस्येति॥ नन्वेतादृशविषये सम्बुद्धित्वस्यामिति समुदायवृत्तित्वेपि पूर्वरूपेणानुमानिका
देशकल्पनया अइत्यस्य स्थाने अ इति मकारस्याविशिष्टस्य मकार एवादेशः सम्बुद्धिर्भविष्यतीति न कुलेत्यादौ लोपाप्राप्तिरत आह॥ अत एवे
ति॥ अस्यादेशत्वाभावादेव यदि मकारे सम्बुद्धित्वमतिदेशलभ्यं भवेत्तदा सुत्वमपि तुल्यन्यायात्स्यादिति भावः। सिद्धान्तार्थे पि शंकते न चेति॥
मकारमात्रनिष्ठत्वेनेति॥ इदं यथाश्रुत[illegible] सम्बुद्धिरिति न्यासे तु [illegible]तः समुदायस्य सन्निहितत्वेनाश्रयणादयमनल्विधिरेवास्त्री
त्यैव समाधत्ते॥ सुप्सन्निपातो [illegible] इति॥ अनाल्वाधावादाने॥ इटोदीर्घ इवाएतेनेति॥ उक्तरीत्या कुलेत्यस्य शङ्कासमाधानपरतया योजने नाए
ङ्ह्रस्वादिति सूत्रस्थेङ्ग्रहणस्य प्रयोजनमन्यथासिद्धमित्याह॥ हर इत्यादि॥ अङ्गाधिकारस्येति॥ एतेनाधिकार्ये सत्वरूपं वहिरङ्गत्व
वीजं सूचितम्॥ ननु सन्निपातपेक्षात्वस्य वहिरङ्गभावस्यान्यत्र निरास इति चेत्तत्राह॥ परनिमित्तेति॥ परनिमित्तकं वहिरङ्गमिति पूर्वपक्षिणो
मतमिति भावः। सम्बोधनप्रयोगस्येति॥ एवं ङ्यनेनान्तः पादमिति सूत्रस्थेन न चेङः परात्परो रुरसीति [illegible] माष्येण विरोधात्सावीदृश
नाम नभिधाने नएकारग्रहणस्यापि न प्रयोजनमिति सूचितम्। सोपदत्वं स्वस्ताद्विधितियोगविभागेन साधितमेव मूलेनित्यन्वाचेति॥ नच

९६

नित्यादप्यन्तरङ्गः स बलवत्त्वन्न च ह्रस्वान्तत्वप्रयुक्तस्य लोपस्योपपादितत्वेऽवेति वाच्यम् पूर्वनिमित्तकमन्तरङ्गं परनिमित्तकम्बहिरङ्गमि
त्यस्यास्यासाधकत्वेनासम्प्रतिपन्नत्वादिति भावः ननु सम्बुद्धिनिमित्तके गुणे कृते उपजीव्यविरोधस्यान्याय्यत्वम्[illegible]क सन्निपातपरिभाषया
सम्बुद्धिलोपो न स्यादत आह सामर्थ्यादेवेति एङ्ग्रहणसामर्थ्यादित्यर्थः सम्बुद्धिसन्निपाते न गुणे कृते यदि सम्बुद्धिलोपो गुणनिमित्तकः
स्यात्तदा सन्निपातपरिभाषाविरोधः स्पष्ट एवात्रेति लोपविधये। ननु अतोऽमिति सूत्रे मृ इति छेदपक्षे ज्ञानमित्यादौ सुपि चेति दीर्घापत्तिमुक्त्वा
सन्निपातपरिभाषया दीर्घवारणे हेतुत्वेनोक्ते सम्बुद्धिलोपानापत्तिः मृनिमित्तस्य सन्निपातस्य प्रत्ययलोपे न विनाशादित्युक्तम् यदि लोप
विषये सन्निपातपरिभाषा नेति प्रकृताकरग्रन्थो व्याख्यातस्तदा तत्र वक्ष्यमाणग्रन्थविरोध इति चेन्न कुम्भेजन्तसूत्रभाष्ये सन्निपातपरिभाषाया
दोषनिरूपणावसरे नदीह्रस्वत्वं सम्बुद्धिलोपस्यानिमित्तं स्यादित्युक्तम् [illegible]तन्त्राभावेऽपि न सम्बुद्धिनिमित्तककार्ये कृते न तस्य कार्यस्य यत्र सन्निपात
विघातककार्यान्तरनिमित्तत्वप्रसक्तिस्तत्र सन्निपातपरिभाषाया अप्रवृत्तेः कल्प्यते यत्र सम्बुद्धेरेव कार्यं न तत्र सा प्रवर्त्तते एवं व्याख्यानात् साम
र्थ्याच्चेति उभयोपादानसामर्थ्यादिङ् सामान्यमेतत्सूत्रस्य विषयः। इह हे हरे हे विष्णो इत्यत्र यदि सन्निपातपरिभाषया लोपो न स्यात्तदा लोपशा
स्त्रस्यैङ्‌त्वज्ञापकप्रवृत्तिकत्वभङ्गः स्पष्ट एव अत एव सन्निपातपरिभाषाऽप्रवृत्तिस्वीकारादेव एवञ्चैङिति प्रत्याहाराश्रयणं सन्निपा
तपरिभाषाया अनित्यत्वे ज्ञापकमिति तत्त्वम्। असमबलस्थले परत्वन्न नियामकमित्याशयेनाह अभ्युच्चय इति ननु सम्बुद्धिगुणस्य मा
न अकाराभावात्त्वमत्र ओ ह्रस्यादौ लुप्तावपि नेङ्ह्रस्वादित्यस्याप्राप्तौ गुणस्य चारितार्थ्यादित्यत आह नपुंसक इति अस्यापि एङ्ह्रस्वादित्यस्या
पि अन्यत्रेति सुकावाचेऽपि प्रकृतसूत्रोद्देश्यतावच्छेदकसत्त्वेन गुणस्य प्रकृतसूत्राप्राप्तियोग्ये विषये चारितार्थ्येनापवादत्वमस्तमिति

पूर्वग्रहणमित्विति। पूर्वो वर्णः स्थानप्रयत्नाभ्यां यज्जातीयस्स एव यथा स्यादिति। पुंसो विहितस्येति। अत्र विहितत्वानुपादाने अनिमालानित्या
देः पूर्वसवर्णदीर्घे कृते पुंसि यो वर्तते तत्परस्य शसोऽसम्भवः आद्यव्याख्यायां व्यत्ययकल्पनापेक्षया लाघवादाह। नत्वादिष्वमानादिति। ए
नान्तादिति। अत्रैतानित्यस्योपादानं गोशब्दस्य पुंसि विद्यमानत्वसूचनाय। यत्तु तस्मादित्यस्याभावेऽप्येतानुगाः पश्येत्यत्र हलन्तेऽतिप्रसङ्गा
भावाय नुवर्तनीयमेवञ्चादेः परस्येत्यस्योपस्थित्याः कारस्यान्त्यावयवे नुमि पूर्वसवर्णदीर्घे सकारस्य संयोगान्तलोपेन दोषः। शसो नुम् पुं
सीति न्यासात्। अक इति सिद्धमिष्टम्। गा इत्यत्र तु न नुमः प्राप्तिरपवादत्वात्पूर्वं मात्वेऽकः परस्य शसोऽभावादिति तन्न। विशेष्यपदस्याशसाकार
लोपेऽपि पञ्चमीसमासे न शसोऽकः परत्वादकारस्य नुमापत्तेः। न च पञ्चमीसमासः अव्याख्यानरूढिभ्रमिति व्यन्तादावश्यकत्वस्यान्यत्र स
त्त्वान्न। णत्वसिद्धिरिनीति। अत्राड्ग्रहणमध्यव्यवाय इति सूत्रेऽपदशब्द आङ् [illegible] इत्यत्र तात्पर्यग्राहकमिति भावः॥ यदुक्तमड्व्या
यतिरिक्तव्यवायादिति तल्लाभप्रकारमाह। तस्मादिति। प्रतियोगिस्थानसाये... न्यासस्य गुरुत्वे हेतुः। इत्युक्तपारत्यस्य लब्धमिति शेषः। तस्या
इति। समाधानपरं भाष्याक्षरैरित्यर्थः॥ सिद्धान्तमाह। भाष्योक्तेति। अत्राक्षरसमाम्नायिकैरित्येतन्नियमस्य सजातीयापेक्षत्वाल्लब्धम्। अत्रा
क्षरसमाम्नायिकत्वञ्चाक्षरसमाम्नायपठितत्वञ्च। नु अक्षरसमाम्नायपठितग्राह्यमपि। अत एव सरूपाणामिति निर्देशसङ्गतिः। स्वं रूपमिति
शास्त्रस्य शब्दापशब्दप्रकारकैवोपस्थितिः तस्मात्प्रत्ययस्य प्रकारीभूतशब्दबोधकतया तस्यैव प्राप्तिरित्याशयेनाह। णाकार इति। न्यायाना
मिति एकस्यैव विषयभेदाद्बहुत्वारोपेण बहुवचनम्। न्यायाप्रवृत्तिरिति सूचितम्। ननु यस्मात्प्रत्ययविधिरित्यत्र गुणानाञ्च परार्थत्वादि
ति न्यायेन तस्मिन्निति परिभाषाप्रवृत्तिर्न स्यादत आह। गुण इति। कृतार्थेति। गुणः कृतात्मसंस्कारः प्रधानम्प्रतिपद्यते। प्रधानस्योपकाररहितम्

ष्याभूपसि वर्त्तते। पानीयमेलादिसंस्कृतमपुरुषस्य। अनित्यात्येनेत्यर्थः भवतीत्यादौ भूइत्यादेः शब्दनिरूपिताङ्गत्वसिद्धय आह। प्रकृतिमात्र
स्येति। मूले विधिरिति किमास्त्रीयनीति। विधिग्रहणाभावे यस्मात्प्रत्ययः परइत्याश्रयतेस्त्रीशब्दादनुपः परत्वात्तस्मिन्नपि स्त्रीशब्दस्याङ्ग
मुपस्यात्तथा सति स्त्रियाइतीयङापत्तिः। अत्र शङ्कते। नचेति। आभीयत्वादसिद्धत्वेति। असिद्धवदत्राभादित्यनेनासिद्धत्वादित्यर्थः। अत्रा
इयङ्विधौ। एवञ्चाभादिति पञ्चम्यर्थस्य व्यापकत्वसत्त्वेनान्वयपर्यवसायकत्वेन द्योतकइति फलितमाभशब्दश्च लक्षणयाभाधिकारसम्बद्धशा
स्त्रपरः। असिद्धपदञ्च लक्षणयासिद्धकर्त्तृकत्वपरम्। असिद्धमनिष्पन्नमित्यर्थः। तृतीयान्ताच्चवदिति तृतीयार्थः प्रतियोगित्वम्। एवञ्चा
निष्पन्ननिष्ठप्रतियोगित्वस्य निरूपकत्वसम्बन्धेन वत्यर्थसादृश्येऽन्वये नासिद्धकर्त्तृकसत्ताप्रतियोगिकसादृश्यलाभः। सादृश्यञ्च प्रवृत्तिरू
पनिवृत्तिरूपञ्चाभाधिकारसम्बद्धशास्त्रनिष्ठाव्याप्यतानादात्म्यसम्बन्धेनान्वयः सम्बन्धानान्वेष्टो [illegible] तन्नाभावसत्त्वप्रतियोग्यसिद्धकर्त्तृकसत्ता
प्रतियोगिकं सादृश्यमित्युभयार्थः। आभादितिपदञ्चावर्त्तते तदर्थोपि व्यापकत्वपर्यन्तम्पूर्ववत्। शास्त्रे कर्त्तव्य इत्यस्याध्याहारः। एतद्घटक
शास्त्रे चावृत्ताभाच्छब्दार्थव्यापकत्वस्य स्वाश्रयसम्बद्धत्वसम्बन्धेनान्वयः। तादृशव्यापकत्वाश्रयश्चासिद्धवत्पदमेव। अत्रेत्येतद्घटकेन।
च्छब्देनासिद्धवत्पदसम्बद्धशास्त्रीयनिमित्तसमुदायोपस्थितेन विषयत्वं समर्प्यते। स च स्वसजातीयनिमित्तसमुदायरूपः। एवञ्चासिद्धवत्प
दसम्बद्धशास्त्रीयनिमित्तसजातीयनिमित्तकेभाधिकारसम्बद्धशास्त्रव्यापकत्ववत्सम्बद्धशास्त्रे कर्त्तव्ये विद्यमानकर्त्तृकसत्ताप्रतियोगिक।
सादृश्यवती भाधिकारसम्बद्धशास्त्रकर्त्तृकसत्तेति सूत्रार्थः। एतत्सूत्रभाष्येऽसिद्धवचनमुत्सर्गलक्षणभावार्थमादेशलक्षणप्रतिषेधार्थं
चेति सूत्रप्रयोजनमुक्तम्। यथाराधिशाधीत्यत्र परत्वान्नित्यत्वाच्च सोरेढादित्यत्वे कृतेपि तस्यासिद्धत्वाद्धिभावो भवति। एवं शाधीत्यत्र शा

भै.
९८

भावे रूपेऽपि न स्यात्सिद्धत्वमिति। न चोभयमप्यन्यथासिद्धम्। च्छ्वोरिति सूत्रेऽन इत्यनुवर्त्य तत्र वेत्वविधित्वे सत्येव च धात्वपशाहाविति सूत्रेण
शाहाविति न्यासेन श्वासरूदङिति प्राप्तत्वबाधके शादेशे घित्वे सलोपे च श्रणधीत्यस्य च सिद्धेः। अथवा नहाविति न्यासेन त्वनिषेधेऽपि सिद्धेरिति
वाच्यम्। कुर्वित्यत्र कृञ् उ हि इति स्थिते सर्वविधिभ्य इति न्यायेन हेर्लुकि सार्वधातुकपरत्वमसिद्धत्वाद् श्रिन्यात उदिति सूत्रेणोत्वार्थं न स्यादवक्त
कत्वात् यदि चोत्प्रत्ययान्ताङ्गवद्भवकारोऽतेरत उदित्यर्थेन लुकि प्रत्ययलक्षणेनाङ्गसञ्ज्ञया भूतपूर्वगत्या सार्वधातुकपरत्वाश्रयणेन वा
स्याद्यपि सिद्धिरित्युच्यते तदाऽऽसन्नास्यन्नित्यत्र श्वसोरिति सूत्रेण ल्लोपे प्रथमस्य इणो यणिति नियमेन देशेऽनजादित्वात्तन्नमाम्नो नीति सूत्रम
वधूककमिति वदन्ति। न च मयतेरिदन्यतरस्याम् छुङ् लुङि इति संहितापाठे नलकारानन्तरं प्रश्लिष्य ई धातुकयह एणनुदन्त्या वालाव स्यात्
मेवाडागमे नास्यानन्यथासिद्धिरिति वाच्यम्। एवं सत्यैज्यतरस्यामि[illegible]त्यापत्तेः नन्वाडजादीनामिति सूत्रस्याडागमेनैव लक्ष्यसिद्धेरन्तर
ङ्गत्वात् एवमुक्तः। वृद्धिविधावट्श्वेति कर्तव्यम्। न च उपसर्गादृतीति सूत्रानन्तरं स्यादम् आ उपसर्गादृतीति सूत्राद्धातुग्रहणमनुवर्त्य यण
विपरिणामेनाटो धात्ववयवेऽचि वृद्धिः स्यादिति व्याख्यानाद्दखपो हसनीत्यादौ न दोषः। न चास्य योऽहसन्नित्यत्र पूर्वान्तवत्त्वेनाटस्त्वात्पू
र्वरूपं बाधित्वा वृद्धिः स्यादिति वाच्यम्। येन नाप्राप्तिन्यायेन गुणस्येव तद्बाधिका वृद्धिरिति परत्वात्पूर्वरूपस्य सिद्धेः। न चाटीत्यत्र पररूपस्य
न्तिः। अतो गुण इति सूत्रानन्तरमाटश्चेति करणेनाटश्चेति सूत्रस्य चकारस्य पुनर्वृद्धिविधायकतया पररूपस्य बाधनात्। अत एवोक्ते
भाष्ये स्वाङः प्रतिषेध इति वचनप्रत्याख्यानमपि सङ्गच्छते। एवञ्चायन्नित्यत्रान्तरङ्गत्वाद्द्व्यादेशे च सि[illegible]ऽभविष्यति वृद्ध्यै क्तनाया
न्तो यणिति नुः एत्वरिति सूत्रादेरित्यपकर्षणे [illegible]र्णान्तस्य णो यणिति त्वर्थान्नं न च वार्णादाङ्गमिति न्यायेन वृद्धिं बाधित्वाऽनेकाचस्त्वादिव

९८

र्णान्तत्वाद्यणापत्तिरिति वाच्यम्। अजादौ प्रत्यये ऊठो यण्विधाने नोभयोर्युगपत्प्राप्त्यभावात् न च लावस्थायामडागम इति पक्षे अध्यै
यातामिति न सिध्यति। अत्र पूर्वमडागमे इयङ्वृद्ध्योर्युगपत्प्राप्त्यभावेनान्तरङ्गत्वाद्वृद्धौ इयङोऽप्रवृत्तेरिति वा[च्य]म्। आडागमप्रत्याख्यानप
रभाष्यप्रामाण्येन लोके तदनभिधानात् सम्प्रसारणाच्चेति सूत्रभाष्यस्याध्यैयातामिति प्रयोगस्य तु छान्दसत्वमभ्युपेत्य बहुलं छन्दस्य
माङ्योगेऽपीति बहुलग्रहणेन पूर्वमपि हि मतोऽटि वृद्धिरित्युपपत्तेः। आसन्नित्यत्र तु अटि वृद्धावदिति तपरकरणेनाल्लोपाप्रवृत्तेः। एवम
कारिरे हीत्यत्र चिणो लुगिति लुकि न लुमतेति निषेधेन प्रत्ययलक्षणाभावेऽपि लावस्थायामडागमेन तच्छ्लिटो षाभाववत्यपि बोध्यम
मिति चेन्न। आगहि जहीत्यत्रानुनासिकलोपे जादेशे च कृते तो हेरिति लुक्प्राप्नोति स चासिद्धत्वान्नेत्यस्य प्रयोजनत्वात्। नन्वतो हेः प्रत्य
यात् उतश्चासंयोगपूर्वादिति न्यासेनातः प्रत्ययादेव प्रवृत्त्येदमप्यसिद्धमिति चेन्न। यण्वतोर्यङ्लुगन्तात्परस्य लोपानापत्तेः। यदि
यङ्लुकश्छान्दसत्वमिति नृषे तथापि मघशब्दाच्छन्दसी वनिपाविति वनिपि शासि वकारस्य सम्प्रसारणे यस्येति चेत्यल्लोपः मा भो
तित तस्यासिद्धत्वादप्रवृत्तेः फलत्वात्। न च बहिरङ्गपरिभाषया सम्प्रसारणस्यासिद्धत्वमभविष्यतीति वाच्यम्। बहिरङ्गपरिभाषाया अन्त
रङ्गस्याजानन्तर्य इति निमित्तकत्वेऽप्रवृत्तेरिति सीकारात्। किञ्च शुन इत्यत्र वकारस्य सम्प्रसारणे वार्णपरिभाषया पररूपं बाधित्वाऽल्लोपः स्या
त्। सूत्रारम्भे तु सम्प्रसारणस्याल्लोपे कर्तव्येऽसिद्धत्वान्न संयोगादिति सूत्रेण निषेधान्नाल्लोपः। न चेष्टापत्तिः। उदात्तनिवृत्तिस्वरापत्तेः।
किञ्च इध इत्यत्र इरयोरे इति सूत्रेण रेभावेन तस्यासिद्धत्वादातो लोप इत्याल्लोपो भवति स च सूत्राभावे न स्यात्। यद्यप्येतस्य छान्दसत्वे।
न छन्दस्युभयथेति सूत्रेण सार्वधातुकत्वात् सार्वधातुकमपिदिति ङित्त्वेनातो लोप इटि चेति लोपे न सिध्यति। तथापि करिष्यत इत्यत्र

प्रे॰ ९९

श्चिण्वदिठ आभीयत्वेनासिद्धत्वाण्णिलोपस्य सूत्रप्रयोजनत्वात्। यदि तु स्वसिजिति सूत्रे चकारस्यानुक्तसमुच्चयार्थत्वेन णिलोपो बोधि
साध्यते तथाप्यकारितरमित्यत्र चिण्णो लुकि कर्त्तव्ये चिण्लुगसिद्धो भवतीति सूत्राभावे न स्याण्णोर्लोपः स्यात्। तदर्थान्यथैव यदि चिण्णो
लुगिति सूत्रेण न ग्रहणं क्रियते यदि वा चिण्णो लुगिति सूत्रे मण्डूकप्लुत्या एकदेशः स्वरितत्वप्रतिज्ञया गमहनेति सूत्रान्ङिति ग्रहणस्या
नुवृत्तिमाश्रित्य ङिति णेर्लोप इति व्याख्यायते तर्हि णिलोपशास्त्रेण तदपेक्षया सूत्रारम्भ एव ज्यायानित्याशयः। असिद्धवदत्रेत्यसिद्धत्वं शास्त्री
यनिमित्तसजातीयत्वं चान्यूनानतिरिक्तत्वेन। निमित्तमत्र समवायि कारणं निमित्तकारणं च। अत एव समानाश्रय आभीयकर्त्त
व्ये इति व्याख्यानम्। एवं च प्रयोगप्राप्तासिद्धत्वाश्रयशास्त्रीयनिमित्तसमुदायान्यूनानतिरिक्ताश्रयकत्वम्। अत्रान्यूनत्वनिवे
शान्त्यपुषः तस्थुषः इत्यत्र च सम्प्रसारणे कृते आतो लोपे कर्त्तव्ये सिद्धत्वाभावः सिद्ध्यति। सम्प्रसारणनिमित्तं भत्वं निमित्तं शसाघनवे
क्षत्वात्। एवं सप्रक्षमप्यगतः। अनतमप्यन्तरेत्यत्र मितां ह्रस्व इत्यस्य णेर्यादेशे कर्त्तव्ये नासिद्धत्वम्। असिद्धत्वाश्रयनिमित्तसमुदाया
धिकनिमित्तकत्वमत्रायादेशस्य। एवं चास्वाययिता चास्वायि तु मित्यत्रोत्वे कृते आत्वस्यासिद्धत्वाद्यस्य हल इति लोपः प्राप्नोति। न
स्याधिकनिमित्तकत्वादसिद्धत्वाभावः न च जहीत्यत्र हन्तेर्जादेशः तो हेरिति हेर्लुक् प्राप्नोपि हिनिमित्तकजादेशस्यासिद्धत्वान्नेति
भाष्ये उक्तं तन्न सिद्ध्यतेः तो हेरिति सूत्रप्रवृत्तिनिमित्तातिरिक्तस्य जादेशस्यानिनो हन्तेर्जादेशनिमित्तत्वेन समानाश्रयत्वाभावा
दिति वाच्यम्। एतद्भाष्यप्रामाण्येन विकारकृतभेदस्य समानाश्रयत्वविघातकत्वानङ्गीकारात्। न चैवं यापि चिण्णो लुकि कर्त्तव्ये ९९
चिण्णो लुगसिद्ध इत्यपाचि तरामित्यत्र तरपो न लुगित्युक्तं तन्न सिद्ध्यते। उत्तरकालप्राप्तिक लुक् सम्बन्धिनां तरपः पूर्वकालजातलु

कृस्थानितश्वाऽभिन्नतयासमानाश्रयत्वाभावादिति वाच्यम् अन्यूनानतिरिक्ताश्रयकत्वघटकातिरिक्तस्य येन रूपेण सिद्धत्वा
श्रयपदार्थत्वनिमित्ततानतद्धर्मावच्छिन्नप्रतियोगिताकभेदवद्रूपतया प्रकृते विशेषणः परत्वमात्रस्यैवोद्देश्यतावच्छेदकत्वेन तादृशध
र्मावच्छिन्नप्रतियोगिताकभेदस्य चोत्तरकालप्राप्तस्य चिणो लुकः परत्वस्य सम्बन्धिन्यसत्वात्समानाश्रयत्वमव्याहतमेवेत्याशा
यात् स्थानिनो विनिमित्तमध्यप्रवेशस्वीकारात् ह्विधिग्रहणस्याङ्गसंज्ञासूत्रघटकस्य प्रयोजननिरूपणावसरे स्त्रीदृश्यतीत्यत्रेय
ङादेशे दृश्यच्छब्दनिमित्तके कर्तव्ये ङसञ्ज्ञानेत्युक्तं सङ्गच्छते। स्थानिनो निमित्तत्वेनाश्रयणाभावे यस्येति चेति लोपस्यास्त्रिया
दृतीयङादेशस्य च यच्छब्दनिमित्तकत्वेन समानाश्रयतया इयङादेशे कर्तव्ये यस्येति लोपस्यासिद्धत्वस्यानुा स्थानिनस्तथात्वे तु
व्याश्रयतयाऽसिद्धत्वाभावः स्पष्ट एव। अत्रेदन्तत्त्वम्। अत्र भाष्ये आरभ्यमाणेऽप्येतस्मिन्योगे सिद्धं वसुसम्प्रसारणमज्विधावित्युक्तम्
व्याश्रयत्वात्सिद्धत्ववचनमप्रत्याख्यातमिति लभ्यते परन्त्वारम्भमाणेऽप्येतस्मिन्निति वाक्ये विशेषोपादानसामर्थ्याद्भाष्यकारस्या
सिद्धवत्सूत्रानारम्भ एवाभिमत इति कल्प्यते। अत एवात्र कैयटः। अनेकपरिहाराश्रयेण प्रतिपत्तिगौरवं माभूदित्येवमर्थमार
भ्यमाणमित्यर्थ इत्याह। नन्वेवमिरित्सञ्ज्ञावक्तव्येति वार्तिकप्रत्याख्यानावसरे गोः पादान्त इति सूत्रादन्तपदसम्बन्धेनेरिदन्तस्ये।
ति व्याख्याने नुम्विधायकसूत्रस्य धातुग्रहणस्याङ्गसंज्ञायोग्यार्थकत्वं कल्पयित्वा उपदेशावस्थायामेव नुम्प्रवृत्तिः प्रयोजनम्
तेन कुण्डाकुण्डेत्यादौ गुरोश्च हल इति सूत्रेणाकारप्रत्ययः सिध्यतीत्येतादृशासिद्धान्तेनाऽसन्तोऽभवितेत्यादौ नुम्प्राप्तावित्याशंक्य
तास एव वक्तुं शक्यत्वादित्युक्तम्। एवं सति हन्तारावित्यादौ टिलोपे कृते निदितामिति नलोपः प्राप्नोति। सूत्रसत्त्वे त्वाभीयत्वेन टिलो

मै॰
१००

पस्यासिद्धत्वे ननलोपप्राप्तिरिति वाच्यम्। हनः सिजिति कित्त्वविधानेनाहन्मेत्यादौ नलोपसाधके न विकरणोपधात्वमादाय नलोपा
भावज्ञापनेनादोषात्। अनएषामंसेत्यत्र नलोपो नः न च लावस्थायामडागममाश्रित्य सूत्रप्रत्याख्यानेऽकरोदित्यादावुप्रत्ययस्या
गुणान्नलेऽदेः नुदान्नलोपत्तिरिति वाच्यम्। अन्यत्र विकरणेभ्य इति पर्युदासात्। न च तथाप्यग्रहीष्टमित्यादावेकाचो ग्रहेर्विहितत्वा
द्दीर्घो न स्यादिति वाच्यम्। अन्तरङ्गे दीर्घे कर्त्तव्ये वहिरङ्गस्याटोऽसिद्धत्वात् सम्परिभ्यां करोतावितिसूत्रे पञ्चमीनिर्देशेन सम्परिभ्या
म्परत्वयोग्यस्य करोतेरित्यर्थकरणेन समस्कुर्वन्नित्यादौ नानुपपत्तिः। न चास्मिन्पक्षेऽवियन्नित्यत्राटमाश्रित्येरनेकाच इति यणा
पत्तिः। सूत्रसत्त्वे त्वटोऽसिद्धत्वादियङ्प्रसिद्धिरिति वाच्यम्। एरनेकाच इति योगं विभज्येणो यणित्यनुवर्त्य योगविभागस्येष्टार्थत्वे
नाडागमसहितानेकाच एवचश्चेद्घुणा नहि इण एवेति नियमेन सिद्धत्वात्। आडागमसाहित्यस्यानेकाज्ग्रहणानुवृत्त्यालभ्य
त इति दिक्। विकरणस्य गुणार्थमिति। भवानिभविष्यामीत्यत्र मूलोक्तोदाहरणे तु विधिग्रहणाभावेप्यनोदीर्घोपधानेतिसूत्रारम्भ
सामर्थ्याद्दीर्घो भविष्यतीति भावः। वव्रश्चेत्यसिद्धिरिति। उरदत्वस्य प्रत्ययपरत्वलाभानापत्तेः परनिमित्तत्वाभावेनाचः परस्मिन्नित्य
स्याप्राप्त्याऽत्वस्य सम्प्रसारणत्वाभावेन न सम्प्रसारणेति सूत्रस्याप्राप्तेर्वकारस्य ग्रहिज्येति सम्प्रसारणापत्तेर्वव्रश्चेत्यस्यासिद्धिरित्यर्थः
दूषणान्तरमाह। किञ्चेति। प्रत्ययान्तस्याङ्गसंज्ञायां लुमतेयः प्रत्ययलक्षणराजन्शब्दादिविधानं न तच्छब्दे न[illegible] अन्नित्यस्य ग्रहणे प्रत्यये
निमित्तमिति लुमत्प्रत्ययनिमित्तत्वं राजन्शब्दादेः सुबन्तस्यास्तीति निषेधापत्तिरिति भावः। देवदत्त ओदन[illegible]यासीदित्यादौ प्रत्यासत्त्या
दोषवारणमशक्यमित्याह। अङ्गसंज्ञायामिति। [illegible]षष्ठ्या इति। इत्यधिकृत्य न घटक षष्ठ्या इत्यर्थः। अङ्गस्येति षष्ठ्या विपरिणामे गौरवा

१००

स्यसान्तरमाह· अकारान्त्यरेफामिति· ननु त्रासल्लोप्यसन्नलुमतेत्यनेन निषेधात्स्यङ्ङ्‌त्वन्दुर्लभमत आह· युवोरनाकाविति· तत्र पञ्चमिः
कोष्टृभिः कीनम्यन्व कोष्टृ इत्युक्तम्। अङ्ग स्य कोष्टुस्तृज्वदङ्ग· सञ्ज्ञा च भवति प्रत्ययलक्षणेन न लुमतेति निषेधः लुना। लुमत प्रत्यय
निमित्ताङ्ग· सञ्ज्ञाविशिष्टोद्देश्यक कार्यान्तरे प्रतिषेधो न तु तस्याप्यपीति भावः। नन्वर्थवत्परिभाषया प्रत्ययाप्रत्ययपरिभाषया वा वा
रणमाविष्यनीत्यत आह· अर्थवदिति· किञ्चाभिसः प्रत्ययस्यैव ग्रहणमित्यत्र साधकाभावः। प्रत्ययाप्रत्यययोः प्रत्ययस्यैव ग्रहणमिति
परिभाषाया लक्ष्यसाधकत्वेनान्यत्रानाश्रयणात्। प्रत्ययस्यैव ग्रहणमिति नियमासिद्धेर्भिस्साश्व्यवयवानर्थकस्यापि ग्रहणसम्भा
वनयाऽर्थवत्परिभाषया अप्रवृत्तेरिति भावः। व्याख्यानादिति· न धातुलोप आर्धधातुक इत्यत्र सप्तम्येकवचनेपादेशादर्शनमू
लकादित्यर्थः। यो विधिरिति· कर्मणि प्रत्ययः। तद्धि घातस्येत्यत्र कर्मण्यण। आसिद्धं बहिरङ्गमिति परिभाषायामन्तरङ्ग· इति सप्तम्या
न्तस्यान्यसाकाङ्‌· स्तत्पाचुङ्किस्थस्स नीन्यस्याध्याहारोपि सम्भवतीन्याशयेन शङ्कते नन्वेति प्रकृति प्रत्ययोभयस्य यादेशोदीर्घं च ययघ्य
पेक्षात्तथापि प्रत्ययविशेषणत्स्य यञ्चादित्वस्य तादृशासमुदायबहिर्भूतदीर्घापेक्षासत्त्वाद्बहिरङ्ग· मिति भावः। तद्धि घातस्य जायमानत्वे
नेति· एतेनोपजीव्यविरोधोऽस्येवेति सूचितम्। अस्याम्परिभाषायामन्तरङ्ग· इत्यस्य कर्त्तव्य इत्यनेनेदाकाङ्‌· क्षायाः पूरणस्य भाष्या
दिसर्वग्रन्थसम्मतत्वादित्याशयेनाह। किञ्चेति· तत्र कृते· अन्तरङ्गे· कृते तदप्रवृत्ताविति· सन्निपातपरिभाषायाः प्रवृत्ताविन्यर्थः॥ अ
नित्याभिपरभाष्येति· नदीह्रस्वत्वं सम्बुद्धिलोपस्येति भाष्यस्येत्यर्थः। असिद्धत्वमपि कृत्यमिति· बहिरङ्गासिद्धत्वस्य शास्त्रत्वान्न
अत एव पुग्घ्रस्वत्वस्य। अशीद्यदिति भाष्यङ्गतिः यदि भवदुक्त रीत्याऽत्र तिदेशिक सन्निपाताभावः सन्निपातपरिभाषाया अप्रवृत्तौ हेतुर्भ

वेत्त दामकृतेपि पुक् प्राप्तस्यान्तरङ्गत्वाद्बहिरङ्गत्वात्परिभाषया अप्रवृत्तौ भाष्यासङ्गतिः स्पष्टैवापत्तु सन्निपातः संश्ले
षः। उपात्तयोर्यत्कार्यस्य निमित्तं तत्कार्यं तादृशसंश्लेषविघातकस्य त्वनिमित्तम्। ङ्यपि इत्येतत्सूत्रेणोभयोरनुपादानान्नायं सन्निपा
तपरिभाषाविषय इति रामायेत्यत्र सुपि चेति दीर्घः सन्निपातपरिभाषाविरोधान्न प्रवर्तत इत्यसङ्गतमिति कश्चिदाह तन्मतन्दूषयि
तुमुपक्रमते। कार्यस्य निमित्तमित्यादिना। नाग्रह इति। हल्ङ्याब्भ्य इति सूत्रभाष्ये कुञ् अकारेभ्य इत्यत्रानया परिभाषया व्यपसन्नत्वा वा हल्ला
परभाष्यविरोध एवं सति स्यादिति भावः। अत्रैवार्थे भाष्यान्तरसम्वादमाह। अत एवेति। तादृशनियमाभावादेवेत्यर्थः। ननु सुपि चेति दीर्घो
पेक्षया अङ्कृदित्यस्य परत्वात्तेनैव दीर्घो वक्तुं योग्य इत्यत आह। विरोधाभावादिति। एककार्यसाधकत्वेन विरोधाभावादिति भावः। पू
र्वदासन्यायेनाह। अकारिमीति। अन्य इति मुख्या इत्यर्थः। अत एवोरुपाधृष्णुपेत्यादौ न दीर्घः। रुलुग्रहणाभावेपि रामाणामित्यादि
सिद्धये आह। उतो वृद्धीति। रुलग्रहणमेतद्विषये विलक्षणार्थज्ञापकमित्याह रुलग्रहणमिति। एतेन। एत्वे सन्निपातपरिभाषया अ
प्रवृत्तिस्वीकारेण। रामस्येति। अत्र स्यादेशे अदन्तसन्निपातस्योपजीव्यत्वेन सन्निपातपरिभाषयैवेत्वव्यावृत्तौ बहुवचनग्रहणस्यात्राति
व्याप्तिवारकत्वसूचनमसङ्गतं स्यात्। क्वचित्तु रामः रामस्येति पाठः। तत्र राम इत्यत्र न बहुवचनग्रहणप्रयोजनम्। प्रत्यय इत्यादिनिर्दे
शेः क्वचित्क्रियाधामसिद्धत्वेनेति कल्प्यते अन्यथा रुत्वस्यासिद्धत्वाद्रेफान्तपदत्वाभावाद्विसर्गो न स्यात्। एवं रामस इत्यवस्थायामेभ
त्वरुत्वयोः प्राप्तौ परत्वादेत्वे सकृद्गतिन्यायेनेत्वव्यावृत्तिः स्यादित्यरुचेराह। रामस्येति। यत्र सन्निपातपरिभाषयाऽतिप्रसङ्गवारणं न भ
वति तादृशमन्युदाहरणमाह। रामाभ्यामित्यपीति। मात्रालाघवानुरोधात्त्वे न चिदुक्तं न दूषयति। बहुवचन इति। ज्ञानयोरिति।

ज्ञानप्राद्वस्य ओमि परे रूपमागमे कृते आद्गुण इति गुणस्यैकोचीति नुमश्च प्राप्तौ वार्णादाङ्गं स्य कार्यस्य बलवत्त्वाद्गुणात्पूर्वं नुमि सति रू-
पासिद्धिः। न च बहुवचने क्लीबे इति न्यासोक्तेः। एवञ्च ज्ञानयोरित्यत्र न नुमः प्राप्तिः विभक्तौ परतः अङ्गत्वस्य गन्तत्वाभावादिति वाच्यम्· बहुव-
चने क्लीबे इति सप्तम्या अचारितार्थ्येन कृलादौ बहुवचने सुप्यत इत्यर्थापत्त्या च निष्ठापत्तेः। यदि च यत्तदेतेभ्य इति निर्देशेन सप्तमीनिर्दि-
ष्टपदानां षष्ठ्यन्तत्वमनन्तस्य च षष्ठ्यन्तस्य पञ्चम्यन्तत्वकल्पनं सप्तमीनिर्देशश्च यस्मिन्विधिरिति परिभाषाप्रवृत्तिसम्पादकत्वेन च-
रितार्थ इत्युच्यते तदाऽधिके ज्ञानगौरवं स्पष्टमेवा किञ्चेदम्शब्दाभ्यामित्यत्र त्यदाद्यत्वे पररूपत्वे च कृते हलि लोपस्येडागमस्य च प्राप्तौ नित्य-
त्वादिडागमे एवञ्च हलादिपरत्वाभावाद्धलोपानापत्तिः। लोपविधानं तु हि बहुवचने चरितार्थमिति दिक्॥ इति शेषइति· यत्त्वेवं शेषपूर्वणे-
न प्रकृतत्वग्रन्थसङ्गमनेपि रत्नमुडित्यादावान्तरतम्यात् षकारस्य चर्त्वे न षकार एव प्राप्नोति। न टकारोऽल्पप्राणतया प्रयत्नभेदादन्तरतमदा
दिशे वेदकारस्य स्थाने कृतत्वकारित्वल्वपि शास्त्रमग्निवदिति न्यायेन फलाभावेन जश्त्वाप्रवृत्तौ नन्वत्र चर्त्वस्य चारितार्थ्यादपवादत्वमेवेति
रामादित्यादावुभयोः प्राप्त्यभावसिद्धत्वाच्चर्त्वात्प्राग् जश्त्वमिति तन्न· फलाभावेपि पर्जन्यवल्लक्षणप्रवृत्तिन्यायेन शास्त्रप्रवृत्तेर्बहुषु दृष्टत्वेन येन
नाप्राप्तिन्यायेन चर्त्वस्य जश्त्वापवादतया सिद्धत्वस्याभावेन रत्नमुडित्यस्य सिद्धिस्तु जश्त्वमित्यादयः षडिति न्यासेन षकारस्य स्थाने जश्त्वात्पूर्वं
चर्त्वे शास्त्राप्रवृत्तिकल्पनेन भविष्यति॥ चर्त्वेनान्तरं द्वित्वमिति· यत्तु द्वित्वे परसवर्णत्वं सिद्धं वक्तव्यमिति वार्तिकाद्वर्णद्वित्वे एतद्प्रवृत्तिरिति
तन्न· वाक्कृ वागिति भाष्योदाहरणे न वर्णद्वित्वेपि तस्य वृत्तेः स्वीकारात् द्वित्वे परसवर्णत्वमिति वार्तिकं तु पूर्वत्रासिद्धीयमिति वचनस्यै-
वावयुत्यानुवाद इति बोध्यम्। मूले सस्य द्वित्वेति· अनचि चेत्यनेन वैकल्पिकद्वित्व इत्यर्थः। अत्र सकारस्य स्थाने खरि चेत्यनेन स्थानतः

मै
१०२

प्रयत्नेन श्च तुल्यस्य सकारः प्राप्नोतीति भ्रान्तस्य शंकायामाह॰ आन्तरतम्यादिति॰ स्थानेऽन्तरतमसूत्रेण मवग्रहणेन सदृशेनैवादेशेन भा
व्यमित्युभयोरन्तरतमः सकार एव स्यात् तदेतदुपपादयति। अन्यथेति॰ अन्यथा॰ उभाभ्यामान्तरतम्यानाश्रयणे। इदम्॰ सस्यार्द्धधातुक इ
त्येतत् न तु सस्यार्द्धधातुक इति न्यासारम्भेन तस्य तीत्यादौ च यो द्वितीया इत्यनेन पक्षे थकारो भवति। खरि चेति सूत्रेण तकारे त्वस्याऽसि
द्धत्वाद्द्वितीयादेशस्य प्राप्त्या थकारघटितरूपासिद्धिरिति कथमियमाशङ्का। यत्तु तत्वस्यार्द्धधातुकस्य शब्दापेक्षत्वेन्द्वितीयादेशस्य तु स
कारमात्रापेक्षत्वमित्यन्तरङ्ग॰ त्वाद्द्वितीयादेशे कर्तव्ये सस्यार्द्धधातुक इत्यस्यापि वहिरङ्ग॰ परिभाषयाऽसिद्धत्वाद्द्वितीयादेशेन
भवन्त्येवेति तन्न॰ अवात्सीदित्यत्र शास्त्रद्वयस्यापि समाननिमित्तकत्वात् आर्द्धधातुकसंज्ञाया अधिकाया अपेक्षणात्तत्वम्बहिरङ्ग।
मिति न वाच्यम्। संज्ञाकृतन वहिरङ्गत्वानाश्रयणात्। त्रैपादिकेऽन्तरङ्गे॰ वहिरङ्गपरिभाषाभावस्यान्यत्रोपपादितत्वादिति चेन्न। अ
स्य ग्रन्थस्य प्राचीनमतानभिप्रायकत्वात्तन्मते संज्ञाकृतान्तरङ्ग॰ वहिरङ्ग॰ भावस्य त्रिपाद्याम्प्रवृत्तेश्चस्वीकारात्। नमुन इति सूत्रे नेति यो
गविभागेन क्वचिदसिद्धत्वन्नेत्यर्थकल्पनेन खरि चेत्यनेन तकारादेशेऽप्यसिद्धत्वन्न भविष्यतीति कल्पनायाः सम्भवाच्चेति॰ षष्ठ्या वि
परिणम्यत इति॰ न घ्याप इति पञ्चम्यन्तस्य सत्वात्॰ आमीति सप्तमी तु त्रेस्त्रय इत्यत्र चरितार्था। साधकमप्याह॰ नामीति लिङ्गादिति
स्पष्टम्भाष्य इति॰ तत्र हि वहव आमशब्दाः पठ्यन्ते कास्प्रत्ययादाममन्त्रे लिटि। ङस ओसाम्। किमेत्तिङ॰ त्यत्रा। [illegible]राम्। नद्याबित्यत्राकस्ये
दंग्रहणम्। षष्ठीवहुवचनस्य ग्रहणम्। कास्प्रत्ययेति सूत्रपठितस्य तु सानुवन्धकत्वान्नग्रहणम्। स चानुवन्ध इत्संज्ञापरित्राणार्थः
कर्तव्यः। अलि चेत्संज्ञायाः फलमन्यादृक्च परोपण्यास्यादिति प्रत्ययान्तादयं विधीयते तत्र नास्ति विशेषः। मेदृचो न्यास्यरत्वेन प्रम्

१०२

यपरत्वेन वा। परत्वं हि न प्रत्ययान्तादिजादेरिति। अत्राप्याख्यासोरामवचनं ज्ञापकं न्यायमन्यात्परोऽभवतीति। किमेदित्तिसूत्रविहि
तस्यापि न ग्रहणम्। सानुबन्धकत्वान्नाडेराम्। निरनुबन्धकत्वेऽपि तत्र याडाप इत्याडाड्भिः परत्वाद्धेः सकृद्गतिन्यायात्पुनस्तदप्रवृ
त्तेः। षष्ठीबहुवचनस्यैव ग्रहणमित्युक्तम्। दण्डिसम्मतसमर्थं खण्डयति। यस्त्विति। हूहूशब्दादिभ्योऽतिप्रसङ्गं वारयति। न चाप इति
लिहान्दुहामित्यादावतिप्रसङ्गं वारयति। हल्लन्ताच्चेदिति। विपरीतनियमापत्त्यातत्तं दूषयति न चाप इति। एवं सति हाहा हूहू शब्दे
तिप्रसङ्गः स्यादेव। ह्रस्वेऽपीति। मन्यतिमालारो। ननु नैकमित्यसङ्गतम्। तिसृणामित्यत्र चारितार्थ्यादत आह। तिसृणामिति। अन्य
त्रापि चारितार्थ्यं वारयति। चतसृणामिति। गौणेऽप्रवृत्तौ भाष्यविरोधमप्याह नैकमिति। अस्य गौणेऽप्रवृत्तिसाधकमुपायान्तरं खण्ड
यति। समाहारेत्यादि। अस्थिदधीति सूत्रेति सूभ्य इत्यत्र च बहुवचननिर्देशेऽपि गौणे प्रवृत्तेः सामासिकतया व्यभिचारादित्यर्थः। गौ
णेऽप्रवृत्तिर्भाष्यानारम्भादेन परेणोक्तेति पत्तं दूषयितुमुपक्रमते। न चेति। पञ्चस्येति। पञ्चस्यन्तेनेत्यर्थः। स्वकल्पितेऽर्थे भाष्या
नारम्भमपि साधकमाह षड्भ्य इत्यत्रापीति न दोष इति। अस्याविहितविशेषणत्वेऽपीत्यादि। ननु ष्णान्तेति सूत्रेऽनुवर्तमानसङ्ख्यापद
रेन लोके गणनायामप्रसिद्धानामेव ग्रहणेन षट्प्रधानत्वेऽपि कथं लुगित्यत आह। ष्णान्तेत्यत्रेति। प्रकृतेऽपीति। षट्चतुर्भ्य इत्यत्राविश
क्तं भाष्येति। नत्वेकमिति भाष्येत्यर्थः। अङ्गस्येत्यस्यैवमन्वयोऽन्यत्र भाष्ये दृष्ट इत्यत आह अतो भिस इति। अत एव। विहितविशेष्य।
णेनाश्रयणदेवा सर्वादिसूत्रस्थमभाष्यं योजयति। यद्यपीति॥ एकदेशिन इति। विरुद्धविभक्तित्वेऽप्यन्वयस्योपपादितत्वादिति भावः।
अनयोरेवेति। एवञ्च तद्भाष्यबलेन षट्चतुर्भ्य इत्यस्यान्यथाव्याख्यानमनुचितमिति भाव। कैयटोक्तिं खण्डयति। षड्भ्य इत्यादि।

मै
९३

आमीतिन्यासे कृते दीर्घे पदि भूतपूर्वगत्या ह्रस्वान्तत्वमादाय नुट् न दापदान्न्नामित्यत्रापि नुट् प्राप्नोतीति शङ्कां हरदत्तीयां निराकृ
रोति। नचेति। मात्राकालिकत्वाश्च इति नुड्विधायकसूत्रस्य ह्रस्वग्रहणस्यैतावन्मात्रे लोपप्रवृत्तेः तिन उत्तरार्थत्वेना तत्फलमाह। चर्म
णामिति। अत्रणत्वस्यासिद्धत्वान्नान्तत्वाद्दीर्घप्राप्तिः। दिगिति। दिगर्थस्तु ह्रस्वग्रहणसामर्थ्याद्भूतपूर्वह्रस्वान्तान्नुडिति स्वीकारे पदाद
न्तासिन्यादावतिप्रसङ्ग शङ्कापदादीनामादेशत्वपक्षे पदानुपदादीनां प्रकृत्यन्तरत्वपक्षस्तु दापदान्न्नामित्यत्रातिप्रसङ्गः शङ्क्यं वेना। किं
ञ्चादेशत्वपक्षेपि शसप्रभृतिष्विव स्वविषयसप्तमीलेन हलन्तादेवामुविधानेनामुत्पत्तिः कालिकह्रस्वान्तान्नुडित्यर्थो ह्रस्वग्रहण
सामर्थ्यात्कल्प्यते। तावतापि पदामित्यादावतिप्रसङ्गो वारयितुं शक्य एवेति। ननु सुपि चेति दीर्घे कर्तव्ये पूर्वसन्निपातपरिभाषाप्रवृत्ते
नेतयानामीति दीर्घविधावपि साकुतो न प्रवर्तत इति शङ्कायामाह। सर्वत्रेति। सुपि चेति दीर्घे कर्तव्ये सन्निपातपरिभाषाप्रवृत्तिस्तु आन्न
लोप इति सूत्रे भाष्ये ध्वनिता। तत्र हि श्रमः शाकारविशिष्टस्य ग्रहणमभावेनान्नलोप इतिन्यासेयज्ञानां यत्वानामित्यत्रापि न लोपः प्राप्नोती
ति दूषणेभिहिते दीर्घे जाते नास्ति लोपप्राप्तिरितिपूर्वपक्षिणा शङ्किते परत्वान्न दीर्घस्याधित्वान्नलोपः प्राप्नोतीति सिद्धान्तिनोक्तम्। अत्र पर
त्वादिति कथनेन नामीतिसूत्रस्य प्रवृत्तिरभिहिता। न तु सुपि चेत्यस्याः न लोपशास्त्रापेक्षया सुपि चेतिशास्त्रस्यैव परत्वात्। न च सुपि चेति दी
र्घ एव सति न लोपात्प्राकृस्यादिति वाच्यम्। तस्य सन्निपातपरिभाषया प्रवृत्तेः। नामीति दीर्घे तु आरम्भसामर्थ्यात्परिभाषाबाध इति भावः।
यद्यपि सुपि चेति दीर्घेपि कष्टाय क्रमण इति निर्देशात्सन्निपातपरिभाषा न प्रवर्तत इति प्रागभिहितं तथापि नामि परे सुपि चेति दीर्घे कर्त
व्ये तदप्रवृत्तौ मानाभावः। अत एव सन्निपातपरिभाषाया दूषणनिरूपणावसरे यादेशः सुपि चेति दीर्घत्वस्येत्येवाभिहितम्। यदि कष्टायेति

९३

निर्देशेन सामान्यतो दीर्घे कर्तव्ये सन्निपातपरिभाषया अप्रवृत्तिङ्क ल्यपि ल्वा सुपि चेति दीर्घ इत्येव वक्तुमुचितमित्युच्यते तदाप्याहहना
कृतेति· कृते कृत्य प्रसङ्गं त्वसुपपादयति· नचेत्यादिना· आयादय इति सूत्रभाष्य इति· तत्र ह्यविशेषेणायादिविधिमुक्त्वा सार्वधातुके नित्यमि
ति न्यासपक्षे स्यादिवलीयस्त्वं विप्रतिषेधेन तुल्यनिमित्तत्वादिति वार्तिककृतोक्तम् तत्त्वरुणनाय वार्तिकन्तु वा स्यादिविधानस्यानवकाशत्वा
दित्यादिग्रन्थः। एतेन गोपायेत्यत्र चारितार्थ्यादनवकाशत्वसङ्गतमित्यपास्तम् अभ्यस्येति· षट्त्रिचतुर्भ्यो हलादिरिति स्वरप्रयोजकत्वात्
त्वे स्थानिवत्त्वेनाशीतिभावः। कतेर्नामीति न्यासे लाघवमप्याह· एवञ्चेति· नुटीति नुनोत्तमिति· मात्रालाघवसत्त्वेऽपि वहूनामर्थानाङ्गुल्यप्र
त्वेन त्राणेन गौरवापत्तेः नुट्प्रयोजनाङ्गस्य दीर्घ इत्यर्थः न श्च इत्यादौ दीर्घापत्तेः। न च नुटि परे अङ्गत्वादस्य दीर्घ इत्यर्थेनापन्नो दोषः। नुटि परे पाक्षिकन्नि
न्निमित्तकाङ्गस्य ग्रहणे तत्रैवानित्वात्सेः। अङ्ग संज्ञाप्रयोजके नुटीति तु वक्तुमशक्यम् आनुगमात्रस्याङ्ग संज्ञाप्रयोजकत्वासम्भवात् नुटीत्य
स्य नुडादौ लक्षणया तुल्यलक्षणे वदोषः। एवं सन्नच्युत इत्यत्र ङमो ह्रस्वादचीति सूत्रेण नुटि दीर्घापत्तिः। सन्निपातपरिभाषया संयोगान्तलो
पस्यासिद्धत्वात्तद्वारणे कल्पनेऽपि त्राणेन गौरवं स्फुटमाकिञ्चाक्षएवन्न इत्यत्र छन्दस्यपि दृश्यत इत्यनेन रूपमन्नन्नाम्य स्वमतुपो नुडित्यर्थके
नानो नुडिति सूत्रेण नुटि कृते दीर्घापत्तिः। यदि तु नोपधाया इति दीर्घे कर्तव्ये नो नुडित्यस्यासिद्धत्वम् पूर्वत्रासिद्धमिति कल्प्यते तदा सिद्धत्वक
ल्पनैव दोषः। एवं सन्नच्युत इत्यत्र ङमो ह्रस्वादचीति सूत्रेण नुटि दीर्घापत्तिः। सन्निपातपरिभाषया तद्वारणकल्पनेऽपि त्राणेन गौरवं स्फुटमेव। यदि
त्वनश्च इत्यादौ दीर्घापत्तिवारणाय तस्य नुगचीति न्यासेन लुप्तनकारस्य नस्य नुगागमः क्रियते तेन तदानन्तोपः प्रातिपदिकान्तस्येति नलोपः ओमो
ति। नुड्विधानसामर्थ्याल्लोपाभावकल्पने तु कल्पनागौरवं स्फुटमेव। वहूत्यसिद्ध इति· लाघवार्थमित्यादिः नन्विणः षीध्वमिति सूत्रे ढग्र

मै
१०४

हलन्तमस्त्विन्यत आह· एताभ्यामित्यत्रेति· एवञ्चेति· पदद्वयस्याधिकारत्वे चेत्यर्थः। इणकोरित्यत्र समाहारद्वन्द्वः सौत्रम्पुंस्त्वम् अस्त्वित्याद्यर्थमिति
आदिना गवाङ्क्षित्यस्य संग्रहः। तदवयव इति· लक्षणप्रत्ययावयवपर इत्यर्थः। व्याख्यानादिति· आत्मनेपदेष्वित्यादिनिर्देश मूलस्थानत
त्रलिङ्गमप्याह· सान्तेरिति· वाह्याभ्यन्तरं योर्द्वयोरप्यान्तरतम्यपरीक्षोपयोगित्वं सवर्णसंज्ञायां त्वाभ्यन्तरप्रयत्नस्यैव तुल्यास्यप्रयत्नमित्य
त्र प्रशब्दबलादुपयोग इत्याशयेनाह· विकृतत्वरूपेत्यादि· ननु टाङसीति सूत्रे सकारोच्चारणसामर्थ्यादेव बलवारणं भविष्यतीत्यत आह·
टाङसीति सूत्र इति· तेन· तादृशा बहुव्रीहिणा· तत्र वैयर्थ्यात्तदङ्गेष्विति न्यायेनाह· तत्र वैयर्थ्यादिति· निपातनस्य बाधकत्वात् क्वापि तथैव प्र
योग इति बोध्यम्। तदेतदुपपादयति। नाप्राप्त इति· शब्दस्य रूपं विशेष्यमादाय तदन्तविधिः सन्ते वगमक इत्याशयेन ज्ञापकमाह· मूले द्वन्द्वे चेती
ति· तदेतदुपपादयति। प्रथमार्थ इति· एवञ्च द्वन्द्वात्मकसमुदाये सर्वनामसंज्ञाप्राप्तिस्तदन्तविधिं विना नेति ज्ञापकत्वन्निषेधस्य। तदन्तविधौ
शंकते। नन्विति· विरुद्धेनेति· सत्यपि विहितविशेषणे ऽगति सर्वशब्दे संज्ञाप्राप्तिरस्त्येवेति भावः। इत एवारुचेरिति· कृतेप्युपसर्जनप्रतिषेधे ऽति
सर्वशब्दे दोषतादवस्थ्यमतः प्रतिषेधो न युक्त इत्यरुचेरेवेत्यर्थः। पक्षान्तरेति· अथ वा महतीयं संज्ञेति पक्षान्तराश्रयणरूपेत्यर्थः। ननु वा
र्त्तिकस्य भाष्योक्तत्वेन प्रामाणिकत्वात्तत्रारुचिरनुपपन्नेत्याशङ्क्य समाधत्ते· न चेत्यादिना तदसिद्धिरिति· अकजाद्यसिद्धिः। एतेनेति। सर्वनामप्र
कृति कसुवन्तादित्यर्थकरणेन। उत्तरार्थमिति· सर्वे इत्यत्र तु ह्रस्वादेशेपि गुणेन सिद्धेः। आदन्नाविति· अङ्गस्येत्यस्यात्र न्नावित्यर्थः। यना। विहित
त्वाशनिवेशेन। इत्यत्रेनेति· उभयत्र समुदायस्य प्रथमार्थसम्बन्धपदघटितेन तृतीयासमासे द्वन्द्वे चेत्यनेन सर्वनामसंज्ञानिषेधात्। अत ए
वः सर्वनाम्नो विहितस्येत्यर्थकरणादेवा। अन्यथानेन समुदायस्य सर्वनामव्यवसितान्यस्येतत्संज्ञाविधानाद्वाक्यार्थज्ञाने सति प्रत्ययत्वेन परि

१०४

च्छिन्नान्त्ययोर्नकारणकारयोरित्त्वज्ञाने नानुबन्धेत्यस्य प्रवृत्तिरिति विकल्पो दुर्वार इति वाच्यम् असूत्रान्त्यत्वेन तस्य ज्ञायाः प्रागपि सम्भवात् ॥
जातनिवृत्त्ययोगादिति। कृविषये जातस्याणो निवृत्त्ययोगादित्यर्थः। तज्ज्ञान इति। अनुबन्धज्ञान इत्यर्थः तन्निवृत्तिः। अणो निवृत्तिरित्यर्थः
अत्रापि। जसः शी इत्यत्रापि। तत्त्वज्ञाने। अन्त्यत्वज्ञाने। निवृत्त्यापत्तिरिति। नानुबन्धकृतमनेकाल्त्वमित्यस्य प्रवृत्त्या सर्वादेशत्वस्यापि नि
वृत्त्यापत्तिरित्यर्थः। ध्वनितञ्चेदमिति। तत्र लुटः प्रथमस्येति सूत्रभाष्ये डाविकारस्य शित्करणं सर्वादेशार्थम्। डाविकारः शित्कर्तव्यः। किं प्रयो
जनम्। सर्वादेशार्थम्। शित्सर्वस्येति सर्वादेशो यथा स्यात्। अक्रियमाणे हि शकारे अलोऽन्त्यस्य विधयो भवन्तीत्यन्त्यस्य प्रसज्येत इत्युक्तम्। अ
त्र कैयटः। डाविकार इति। डादेश इत्यर्थः। नानुबन्धकृतमनेकाल्त्वमित्यन्त्यस्य स्यादिति डाशित्त्वं कर्तव्यमित्याह। तदग्रे भाष्ये सिद्धमलोऽन्त्यविकारा
त्सिद्धमेतत् कथमलोऽन्त्यविकारात्। अस्त्ययमलोऽन्त्यस्य का रूपसिद्धिः। कर्ता। डिति टेर्लोपः। डिति टेर्लोपेन लोपो भविष्यति। अभावान्न
प्राप्नोति। डित्करणसामर्थ्याद्भविष्यतीति। एतद्भाष्येऽन्त्यादेशत्वमभ्युपेत्य टिलोपेन समाहितम्। पूर्वपक्षिणा च डादेशस्य शित्त्वङ्कर्तव्य
मित्युक्तमेतेन ध्वनितम्। यद्यनुबन्धपदस्यानुबन्धत्वयोग्ये लक्षणा न स्यात्तदा आदेशप्रवृत्तिकालेऽप्युक्तरीत्यानुबन्धत्वाभावेन नानुबन्धे
त्यस्याप्राप्त्याऽनेकाल्त्वेनैव सर्वादेशत्वसिद्धेः पूर्वपक्षसमाधानयोर्निर्दलत्वापत्तिः। ततोऽग्रे भाष्ये अनित्यत्वाद्वा। अथवाऽनित्यत्वादेतत्सिद्धम्। अ
नित्यत्वञ्चालोऽन्त्यस्यायम्भवन्नप्रत्ययः स्यादित्यादिनोपपादितमानुपूर्व्या। इदम्भाष्यमनुबन्धपदस्य लक्षणाया अभावे नानुबन्धेति वचनस्या
त्राप्रवृत्तिस्वीकारेऽप्यानुपूर्व्यादनेकाल्त्वेनैव सर्वादेशत्वम्भविष्यतीत्यभिप्रायेण। ततः प्रश्लिष्टनिर्देशाद्वा। अथवा प्रश्लिष्टदेशीयम्। डा
आ डा इत्युक्तम्भाष्ये। एतेनाकारस्य प्रश्लेषाभावे डकारस्यानुबन्धयोग्यत्वान्नानुबन्धेत्यस्य प्रवृत्त्या सर्वादेशत्वं दुर्लभं स्यादित्युक्तप्रायम्

मै॰ यत्तु मध्यपठितस्यानित्वादित्यसैव सिद्धान्त्युक्तित्वम्पूर्वोक्तरयोस्त्वेकदेश्युक्तित्वमिति कस्य नन्त्रप्राचीनमतमेव श्रद्धाजाड्येनेति दिक्‌। स

१०५ न्ज्ञाभावपक्षेप्यवयवस्य सर्वनामतया ततः परत्वाच्छीभावस्य दुर्वारतया विकल्पविधानं व्यर्थं स्यादिति भावः। नन्वङ्ग स्याद्‌ इत्यभावे

पि सर्वनाम्नोऽदन्ताद्विहितस्याङ्गसञ्ज्ञानिमित्तस्येत्यर्थः कुतो नेत्यत आह· अङ्गसञ्ज्ञानिमित्तस्येति· अदन्ताद्विहितस्येत्यर्थः इदन्तत्वा

स्योद्देश्यतावच्छेदकत्वस्यात् एवं सति तत्कर्मविच्छिन्नस्य विधानकाले सिद्धिम्विना न सुट्प्राप्तिरिति भावः। ननु विभक्तिविषये भक्त्योस

तः प्रागेवात्वं भविष्यतीति नायन्दोष इत्यत आह· अत्वविधाविति· प्रत्ययादित्वज्ञानाभावादिति· यदि तत्तः परस्यांगसञ्ज्ञानिमित्तस्य सर्व

नाम्नो विहितस्येति व्याख्यायते तदा तु नानुपपत्तिरित्यवधेयम्। समुदायादेशे हि रत्यानि वश्रादेन समुदायस्य प्रत्ययत्वज्ञानं ततः प्र

त्ययादित्वज्ञाने सति चुट्‌ इत्यस्य प्राप्तिस्ततोऽनुबन्धत्वज्ञानमिति भावः। सिद्धान्तार्थमाह। परेत्विति· अत एव अनुबन्धपदस्योद्देश्यार्थक

त्वादेवा अन्यथा· अनुबन्धपदस्य वाचकतासम्बन्धेनेत्यदविशिष्टार्थकत्वे विकल्पो दुर्वार इति· विधानकालेनानुबन्धकृतमसारूप्य

मिति वचनस्याप्रवृत्तौ वासरूपसूत्रप्रवृत्त्येति भावः। वचनन्तु लम्बशङ्कातोरिन्नित्येतद्विषये लण्व्यावर्त्तकत्वेन चरितार्थमिति वोध्यम

न च हलन्त्यमिति सूत्रेण। ननु तृतीयासमासे इत्यनेनापि समुदायस्य सर्वनामसञ्ज्ञानिषेधादवयवस्य सर्वनामत्वात्मासपूर्वायेत्यत्रा

सीभावो दुर्वार इत्यत आह· सर्वनाम्नो विहितस्येत्यर्थ इति· विभक्तित्वयोग्येति· विभक्तित्वव्यवहारविषयत्वयोग्येत्यर्थः सौत्रं विभक्ति १०५

पदं तत्र लाक्षणिकमिति भावः। अत्र साधकमाह· अत एवेति· विभक्तिपदस्य तादृशार्थे लाक्षणिकत्वादेवानुग्रहणं चरितार्थमिति· सर्वस्मि

न्नित्यादौ नकारस्येत्सञ्ज्ञाव्यावर्त्तकत्वेनैव तु ग्रहणं चरितार्थं स्यात्तच्च लक्षणं विना न सम्भवतीति भावः। न च प्राग्दिशीये चारितार्थ्यमेते थप्र

वृत्तेरिष्टत्वात् । नाप्यनुपजनिष्यमाणनिमित्तोऽपवाद उपजातनिमित्तमप्युत्सर्गं बाधत इति न्यायेनास्मिन्नादेशप्रतिपत्तिकाले प्राप्तसंज्ञाया बा
धणोऽसिद्धे विभक्तिपदस्य लक्षणकल्पनमनुचितमिति । तन्न । उत्सर्गापवादयोरेकवाक्यतया एव विकल्पवारणाय सम्प्रदायसिद्धतया हल
न्त्यमिति सूत्रघटकहल्पदस्य यद्यपि विभक्तिस्थतवर्गादिभिन्नहल्त्वावच्छिन्नबोधकत्वं वाच्यं तथापि स्मिन्नादेशस्य प्रवृत्तिसमये विभक्ति
त्वाभावादनुपपत्तिस्तदवस्थैवेति लक्षणाया भवतापि वाच्यतया न्यायानुपयोगात् । तेन । परिगणनेन । अन्यथाऽन्वर्थसञ्ज्ञया कृत्स्नादिशब्दा
नामपि स्यादिति भावः । समुदायेषु शक्तावितिः । यथा सर्वोऽयं धान्यराशिश्चैत्रस्येत्यादौ । यदा तद्राश्यवयवावयवकृतबुद्धिस्थास्तदा तदभिप्रायेणायं प्रयो
गः । मैत्रीयगोधूमराशेरपि यदा कदाचिच्चैत्रीयबुद्धिस्थावयवारब्धत्वविवक्षायां सर्वोऽयं राशिर्मैत्रस्येति प्रयोगो न तु तदा चैत्रस्येत्यतो बुद्धिस्थत्वं वि
शेषणम् । तादृशसमुदायद्वयादौति । बुद्धिस्थानेकसङ्ख्याकावयवारब्धसमुदायद्वयविवक्षायां द्विवचनम् । तादृशसमुदायत्रयादिविवक्षा
यां बहुवचनम् । नन्वेवं सर्वोऽप्यात्मा नित्य इति प्रयोगानुपपत्तिः । अद्वैतसिद्धान्तेऽन्तःकरणाद्युपाधिभेदादात्मनो भेदेऽपि बुद्धिस्थानेकसङ्ख्याका
वयवारब्धसमुदायरूपत्वानुपपादनात् । एवमात्मनां सर्वेषामेकत्वमित्यादिप्रयोगानुपपत्तिः । न चात्राशेषत्वावच्छिन्नः सर्वशब्दार्थः अशे
षत्वञ्च विधेयशून्याद्युद्देश्यतावच्छेदकवत्त्वम् । प्रकृते विधेयस्य नित्यस्य यत्तादात्म्यसम्बन्धावच्छिन्नाभावस्तद्वान्नित्यः अपञ्चस्तन्नि
रूपितसमवायसम्बन्धावच्छिन्नवृत्तित्वाभाववदात्मत्ववत्त्वमात्मनि प्रतीयत इति नानुपपत्तिरिति वाच्यम् । सर्वे घटाः प्रमेयत्ववन्त इत्यत्रागत्या
पत्तेः । विधेयस्य विधेयतावच्छेदकस्वरूपसम्बन्धावच्छिन्नाभावाप्रसिद्धेः । किञ्च सर्वे घटा रूपवन्त इत्यादौ शाब्दाद्घटत्वावच्छिन्ने तादात्म्यस
म्बन्धेन रूपाभाववद्वृत्तिघटत्वावच्छिन्नस्य विधेयांशेऽधिकावगाहित्वेन शाब्दबोधसम्भवेऽपि वारद्वयं घटत्वविषयत्वावगात्यनुभवस्य

सार्वजनीनस्याभावादनुपपत्तिः नचोद्देश्यतावच्छेदकव्यापकविधेयत्वमेव सर्वशब्दार्थः न तदवच्छिन्नेन तस्य विधेयतया भानानुपगमा
त्। नच सर्वशब्दार्थो व्यापकत्वमेव तस्य विधेयान्वयानुपपत्तिरिति वाच्यम्। नामार्थयोर्भेदसम्बन्धेनान्वयानुपगमात्। नाप्यभेदेन विधे
यान्वयी व्यापकः सर्वपदार्थः। एवं सति विधेयबोधकपदसामानाधिकरण्येन सर्वशब्दस्य तल्लिङ्गत्वापत्त्या सर्वेविदाः प्रमाणमित्यत्रान्वा
यिप्रमाणशब्दवत्सर्वशब्दस्य नपुंसकत्वापत्तिः। एकवचनापत्तिश्चेति चेन्न· उद्देश्यतावच्छेदकव्यापकविधेयव्याप्यपर्याप्तिको धर्मः स
र्वशब्दप्रवृत्तिनिमित्तम्। स च धर्मः सर्वे घटा रूपवन्त इत्यादौ घटनिष्ठयावत्त्वम्, तदवच्छिन्नस्य चोद्देश्येऽभेदेनान्वयोपगमान्न पूर्वोक्तानुप
पत्तिः। यावत्त्वपर्याप्तावुद्देश्यतावच्छेदकव्यापकत्वञ्चोद्देश्यतावच्छेदकसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकत्वम्, नच
विधेयव्याप्यत्वञ्च विधेयतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकविधेयाभाववदवृत्तित्वम्, एवञ्च सर्वे घटाः प्रमेयत्ववन्त इत्यादौ
स्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकप्रमेयत्वाभावाप्रसिद्ध्याऽनुपपत्तिरिति वाच्यम्। व्यभिचारित्वसम्बन्धावच्छिन्नप्रतियोगिताकवि
धेयतावच्छेदकावच्छिन्नाभाववत्त्वस्यैव व्याप्यत्वरूपत्वात्। व्यधिकरणसम्बन्धावच्छिन्नाभावश्च सर्वमतप्रसिद्ध एव। अयं सर्वशब्दार्थ
श्च यत्र सर्वशब्दस्योद्देश्यबोधकपदसामानाधिकरब्दोऽवधारणार्थे इति सूचितम्। तेन सजातीयवचनान्तरस्यैव व्यवच्छेदो न तु दोषः॥ अ
न्तोदात्तत्वस्यैवेति· चित इति सूत्रे सप्रकृतेरित्युक्तत्वात्। ननु प्रत्ययविधौ यदुद्देश्यतावच्छेदकं तदवच्छिन्नस्यैव प्रकृतित्वमिति विशेषोऽस्ये
त्याशयेन शङ्कते। नचेति· प्रातिपदिकस्यैव प्रकृतित्वादिति· यदुद्देश्यत्वेनोपात्तन्तत्प्रकृत्यन्तत्रा। यत्र तु विधेयबोधकपदसामानाधिक
रण्यन्तत्र तु विधेयतावच्छेदकव्यापकोद्देश्यतावच्छेदकावच्छिन्नसम्बन्धव्यापर्याप्तिक यावत्त्वं प्रवृत्तिनिमित्तम्। पृथिवी सर्वगन्धवती

स्यादेरपथा। पूर्वादिशब्दानां सर्वनामसञ्ज्ञाया अष्टाध्यायीस्थसूत्रेणाऽसाधारं षष्ठीभावी रव्यं कार्यन्तत्र सिद्धेर्गणसूत्रार्थमाह· व्यव
स्थेति· ननु नित्यद्विवचनान्तत्वानुपपन्नं यत्र टापूत्तरोभस्य द्विवचनान्तत्वासम्भवादत आह· द्विवचनान्त एवेत्यर्थ इति· एतेन नित्यं
द्विवचनान्तत्वमनित्यशब्दन्यायात्· स्वार्थे परिपूर्णस्यैतेन राका उ· छात्वमित्येवं हृस्यानाव चनादिति· ओकारसकारभकारादावितिवक्ष्यमाण
वचनादित्यर्थः केनु नेति· कान्तस्य शब्दान्तरत्वान्न मन्तव्यान्तरत्वेन व्याख्यानादिति· प्रत्ययविधायकसूत्रेषु महाविभाषासम्बन्धस्य बहु।
शो दर्शनादित्यर्थे दृढीकर्तुमस्योपादानम्। वृत्तिविषय इति· अयम्भावः। उभयोऽन्यत्रेति वार्त्तिकस्यारस्ये नोभो साभ्यासस्येति सौत्रप्रयोगेण
चपश्च द्विवचनस्याश्रवणान्नोभवति। तत्रैवापचः साधुत्वन्तेन वृत्तिविषय इति लब्धमिति। अयपञ्च· अयच् प्रत्ययश्च। ननु वृत्तिविषय इ
त्येतावन्मात्रेणालमुभयोर्वा सरूत्यन्त्रायच् दुर्वार इत्यत आह· उभशब्दस्येति· ननूभशब्दस्य द्विवचनपरत्वाभावो वृत्तिविषये पूर्वमयच्यदिस्यात्तदा
ऽस्त्वेवेत्यत आह· उभयशब्दस्येति· यद्यत्रायच् स्यात्तदा प्रकृतेर्विभक्तेरलुकि कृते उभयशब्दस्य द्विवचनपरत्वं स्यादेवेति पूर्वमप्ययच् न प्रवर्त्ते
त इति भावः· ननु द्विवचनपरत्वाभावेनेत्यसङ्गतम् नित्यमिति सूत्रेण विधीयमानस्यापचोऽन्तरङ्गत्वात्समासतद्धिताद्युत्पत्तेः सुबुत्पत्तेश्च पूर्व
मेवोत्पत्तिसम्भवात्तदा सर्वत्रैव द्विवचनपरत्वाभावोऽस्त्येवेत्यत आह· तत्परत्वविषयाभाव इति· भावप्रधान निर्देशेन द्विवचनपरत्वविष
यत्वाभाव इत्यर्थः। न च कप्रत्ययेनेष्टसिद्धिरिति यस्य शङ्का तन्मते उभशब्दस्य सर्वादिषु पाठाभावेन तत्र तसिलादिविवक्षायाः कर्तुमशक्य
त्वेन द्विवचनपरत्वविषयताया एव सर्वत्र सम्भवेन द्विवचनपरत्वविषयत्वाभावस्यासम्भवेनोभयत उभयत्रेति दृष्टान्तेन कप्रत्यये सत्यपि अयच्
स्यादित्यसङ्गतमिति वाच्यम्· द्विवचनविषयत्वाभावसम्भावनेति व्याख्यानेनैव समाधानात् [illegible] वञ्च तन्मते उभशब्दस्य पाठाभावेऽप्युभय

भै
९२

शब्दस्य सर्वादौ पाठस्य सत्त्वादत्राप्यकच्स्यान्न दात्रन्तसिलादिस्यान्न तस्य द्विवचनस्यालुक् स्यादेवं रीत्या द्विवचनपरत्वविषयत्वाभावसम्भावना
सत्त्वान्नानुपपत्तिः। न नूभयो मणिरित्यत्र तयपः स्थाने अयजादेशो यत्र तत्र स्वार्थिकः पुनरपच् स्यादत आह· उभयो मणिरित्यादाविति· रूपवा
यन्तरेति· उभरूप्यमित्यादौ। वृत्तिविषय इत्येतद्व्याकविज्ञाप्यार्थस्य तत्राप्यसत्त्वात्। अत्रादिना बहुभशब्दसंग्रहः। ननु कृत्साद्यर्थविव
क्षायामेव वृत्तिविषयता तत्राप्यचि कृते उभयशब्दस्य सर्वादौ पाठस्य सत्त्वमतसिद्धतयाऽकजेव स्यात् न तथा सति द्विवचनपरत्वविषयतास
त्वेन कथमयचः प्रसङ्ग इत्यत आह। अयच्यकचूलिति· उपजीव्यत्वेनेति· यद्यत्र कप्रत्ययः स्यात्तदा द्विवचनपरत्वविषयत्वाभावमाश्रि
त्यायचः प्राप्तिरिति कप्रत्ययस्य भाविनीया उत्पत्तिः सा उपजीव्या यदि तु कप्रत्ययस्य बाधकोऽकच् प्रवृत्ते स्यात्तर्हि उपजीव्यविरोधः स्पष्ट
एवेति भावः। नन्वयपवादविषये कथं बाध्यप्रवृत्तिरत आह। अपवादस्थलन्यत्रेति· युष्मदस्मच्छब्दविषये तस्येह पाठसूभकावित्यकजर्थी
इति मूले उक्तं सिद्धान्तत्राह। अत्रेदं चिन्त्यमिति· नन्वकज्विधावेवोभशब्दपाठे सञ्ज्ञाभूतोभशब्दादप्यकच् स्यात्सर्वादौ पाठे तु सर्वनाम
सञ्ज्ञायास्तत्राभावेन नाकच्प्राप्तिरिति विशेषो स्त्येवेत्यत आह· अनभिव्यक्तेति। अत एव सर्वनामसाहचर्यादिवा। एते नाभिव्यक्तेति न्या
यस्य पदकार्ये प्रवृत्तेः सिद्धान्तितत्वेन कथमत्रसंचार इति निरस्तम्। न्यायस्य प्रवृत्तावेव निर्भरस्याभावात्। अथोभयशब्दविषये विशेषमा
ह· उभयोऽन्यत्रेति नित्यपसमानार्थक इति· एतेन वक्ष्यमाणः प्रत्ययान्तरत्वपक्ष एव मुख्य इति सूचितम्। तदुपक्रमेण· स्वार्थिकोपक्रमेण
एतन्मूलक्रमेवेति· उक्तभाष्यमूलक्रमेवेत्यर्थः। प्रागुक्तभाष्येति· उदाहरणप्रदर्शनपरभाष्येत्यर्थः। यदि द्विवचनमपि स्यात्तदा तदुदा
हरणप्रदर्शनेन न्यूनतापत्तिः स्यादिति भावः। सिद्धान्तमाह· भाष्यमिति· उभयोऽन्यत्रेति वार्तिकव्याख्यावसरे यो द्विवचनशब्द उक्तः स न

९७

कृत्रिमस्यैव बोधकः किन्तु यौगिकत्वाशयेनाह द्वित्वसङ्ख्येति· अतएव· द्विवचनशब्दस्य यौगिकत्वादेव· पूर्वोक्तार्थे भाष्यसम्मतिमाह·
तदुक्तमिति· भाष्यस्य ग्रहणशब्दः करणल्युडन्तत्वाशयेनाह। ग्राहकेत्येति· उभयत्र उभयत्रेति प्रयोगासङ्गतिम्परिहरन्नाह· तत्र तसिलावि
ति· शक्तिप्रधानाविति· अपादानत्वाधिकरणत्वशक्त्योरित्यर्थः· इदं शक्तेर्विभक्त्यर्थत्वमेवेति मते। कारकस्य विभक्तिवाच्यत्वेपि सङ्ख्यायाः प्रकृ
त्यर्थविशेषणतया भानेन सङ्ख्याप्रकारकप्रकृत्यर्थविशेष्यकबोधो यद्यपि भवति। तथापि न विभक्तिवाच्यार्थे सङ्ख्यायाः प्रकारकत्व
मिति निरुक्तद्विवचनत्वाभावः स्पष्टः॥ उभयशब्दाद्द्विवचनोपपत्तये आह· अवयवद्वयेति· अतएव· अर्थस्योभयत्र निमित्तत्वादेवा नविक
ल्प इति· अन्तरङ्गत्वादित्यादिः स्वसिद्धान्तरीत्याह· अर्थकृतेति· अर्वाचाम् प्रक्रियाकारादीनाम्। अभावबोधकतयेति· इदन्निषेधार्थेति
वचनप्रवृत्तौ नियामकम्। यदुक्तमन्तरङ्गत्वादिति तन्निखण्डयति· किञ्चेति· अतएव· प्रातिपदिकसञ्ज्ञासमकालं सर्वनामसञ्ज्ञाप्रवृत्तिस्त्वौक
रादेवा॥ ननु प्रातिपदिकसञ्ज्ञासमकालमेव चेत्सर्वनामसञ्ज्ञा तदा पूर्वपरेत्यष्टाध्यायीस्थसूत्रवैयर्थ्यमत आह· पूर्वपरेत्यादीति· ज्ञाप
कसिद्धपरिभाषाया अपि न प्रवृत्तिरित्याह· असिद्धमिति· अन्तरङ्गे कर्तव्ये जातस्य बहिरङ्गस्यानेनासिद्धत्वप्रतिपादनात्। एतादृशार्थसाध
कमाह· बहुशइति· पचावेदमित्यादौ। तदुत्तरमिति· नित्यसञ्ज्ञोत्तरमित्यर्थः। एतत्प्रवृत्त्येति· प्रथमचरमेत्यस्य प्रवृत्त्येत्यर्थः· ननु जसीति सप्त
म्याविषयसप्तमीत्वात्पूर्वविकल्पप्राप्तिः स्यादत आह॥ जसीति· विषयेति· तदुत्तरमेव न द्विषयानात्। प्रातिपदिकसञ्ज्ञोत्तरमेव जसो विषयत्व
सत्वसत्वात्। नित्यसञ्ज्ञायास्तु प्रातिपदिकसञ्ज्ञाप्राप्तिसमानकालप्राप्तिकतया विकल्पेन बाधो न सम्भवतीति भावः। एतेनान्तरङ्ग· त्वादि
त्युक्तिर्निरस्ता। स्थानिवद्भावेन या विकल्पप्राप्तिस्तस्याः परत्वोक्तमन्तरङ्गत्वाद्बाधमभ्युपेत्यापि प्रकारान्तरेण तन्मतन्निरस्यति। स्यामियदति

मै· १०८

देशेति· अत्र निरवकाशत्वोत्तपान्तरङ्गस्यापि निरवकाशत्वाधकत्वासम्भवः सूचितः॥ नन्वन्तरङ्गपरिभाषया स्थानिवद्भावस्यैव बाधोऽस्त्वत आ
ह· प्रत्ययस्येति· ननु कार्यकालपक्षे द्वयोस्सञ्ज्ञयोर्युगपत्प्राप्तिः स्यादत आह· सर्वनामसञ्ज्ञायामिति· उक्तयुक्त्येति· उभयत्रेत्यत्र सर्वनाम्नो
विहितत्वसिद्ध्यर्थं यथोद्देशत्वमेव स्वीकर्तव्यम् अन्यथा शीभावो न स्यादिति रीत्येत्यर्थः· उक्तार्थे भाष्यसम्मतिमाह· अत एवेति· अन्तरङ्गप
रिभाषया प्रकृते ऽनिर्वाहादेवा प्रत्ययान्तरत्वेपक्षे शीवसिद्धिम्परिहरति· उभयीत्यत्रेति· अतिप्रसङ्गम्परिहरति। अत इत्यनुवृत्त्येति· नन्वे
वं सति मात्रजग्रहणेनैव सिद्धे टिड्ढाणञिति सूत्रे तयब्ग्रहणवैयर्थ्यापत्तिरत आह· तयब्ग्रहणन्त्विति· अवयुत्येति ल्यबन्तम्। पृथक्कृत्येत्यर्थक
म्। अवयुति शब्दप्रकृतिकतृतीयान्तं वा। समुदायादेकदेशस्य पृथक्करणेनानुवाद इत्यर्थः। ननु द्वित्रिशब्दादवयवे वर्तमानादवयवविनि
यदा तयप् न तदा तस्य स्थाने ऽयजादेशे स्थानिवद्भावेन तयप्प्रत्ययान्ततया प्रथमचरमेति जसि विकल्पो भवति अयचः प्रत्ययान्तरत्वे तु न विक
ल्पप्राप्तिरत आह· द्वित्रिशब्द इति· जसः शीविषय इति न्यूनमन्यत्रापि प्रयोगाभावादत आह· पुंस्येवेति· तदाशय इति· तयादेशे उभयप्रतिषे
ध इति वार्त्तिकप्रत्याख्यानपरभाष्याशय इत्यर्थः। न च तस्य पामिति वक्तव्ये तस्य स्थमियामिति गुरुनिर्देशात्समुदायानुबन्धस्यावयवानु
बन्धत्वाभावो ज्ञापित इति यदि मात्रजिति प्रत्याहारस्तदा ऽयचश्चित्त्वन्न स्यादिति वाच्यम्· ज्ञापकसिद्धन्न सर्वत्रेति परिभाषया क्वचित्स
मुदायानुबन्धस्याप्यवयवानुबन्धत्वस्वीकारात्। यत्तु द्वित्रिभ्यामिति सूत्रे तयग्रहणस्याकरणे श्रौढ्येदम्। वस्तुतस्तु उभयशब्दप्रकृतिका
यच एव प्रत्ययान्तरत्वम्। अत एव कर्तृकर्मणोः कृतीति सूत्रे धातोर्द्वये प्रत्ययाः लिङ्कृतश्चेति प्रयोगः सङ्गच्छते। व्यर्थां द्वयेषामिति माघप्र
योगश्च द्वयमिच्छन्तीति रीत्या यद्यप्युपपद्यते तथाप्युक्तप्रयोगस्यान्यथोपपादनासम्भवादिति तत्त्वम्· अयच्च प्रत्ययान्तरमिति प्रकृतिविशे

१०८

यानुपादानेन प्रत्ययान्तरत्वोक्तया द्वये मत्यपा इति प्रयोगाच्च द्वयशब्दोऽव्युत्पन्नम्प्रातिपदिकं तस्य च प्रथमचरमेति सूत्रस्थचकारेण स
ङ्ग्रहात्सर्वनामसञ्ज्ञासिद्धिरित्याशयात् उभया अमित्रा इति प्रयोगश्च छान्दसत्वेन साध्य इति दिक्। फलाभावमुपपादयति॰ अदन्ताङ्ग
त्यस्येति॰ पूः शब्दस्येति॰ तदर्थस्येत्यर्थः। अत एवान्तरायान्नगर्यामिति प्रयोगस्याप्युपपत्तिः। एकशब्दस्य यावन्तोऽर्था एकोऽन्यार्थेत्यादिनोक्ता
स्तेषु केषाञ्चिदर्थानां सप्रमाणत्वम्। कस्यचित्तु नेति विशेषं दर्शयितुमाह॰ तत्रेति॰ द्यान्तापडिति सूत्रे सङ्ख्यावाची एको द्वौ बहव इत्यत्र
प्रसिद्धः। अन्यार्थको पि तत्रैव सधमादोद्युम्न एकास्ता इत्यत्रोक्तः। असहायवाच्यपि तत्रैव एकाग्नयः एकहलानीत्यत्रोक्तः। एको
गोत्र इति श्रेषइति॰ तत्र हि एका प्रकृतिः प्रत्ययमुत्पादयतीत्युक्तम्। तत्रात्यैनैकशब्दस्य परमप्रकृतिपरत्वे कथिते सिद्धा
न्तिनोक्तम्। न हीदं लोकाद्भिद्यते लोके हि सङ्ख्यां प्रवर्तमानानामुपचरन्ति। एक इति वा प्रथम इति वा। यावद्भूयान्प्रथमो गो
त्रप्रत्ययमुत्पादयति तावदेको गोत्र इतीति। अत्र कैयटः। लोके योऽर्थ एकशब्दस्य दृश्यते। एकोऽल्पप्राणा इति। प्रथमेऽ
ल्पप्राणा इति गम्यते। उपचरन्तीति॰ व्यवहरन्तीत्यर्थः। साधारणार्थकस्त्वेनैकदिगित्यत्र दृष्टः। समानार्थकस्तु चैत्रमैत्र
योरेका मातेत्यत्र। एतयोरेकत्वसङ्ख्याप्रकारकबोधासम्भवादर्थतद्इति। सार्वविभक्तिकस्तसिः। अर्थवशात् दिशो
मानुष्ठैकत्वं विना साधारणत्वसमानत्वयोरनुपपत्तिः। अल्पार्थकस्त्वनेकधान्यवपनयोग्यक्षेत्रेपि धान्याल्पत्वाद्यदैक
जातीयस्यैव धान्यस्य वपनं कृत्वा क्षेत्रे मयैकस्यैव धान्यस्य वापः कृत इति कृषीवलो न्यम्प्रति प्रयुङ्क्ते तदीयवाक्ये प्रसिद्धः
तदर्थकाभावो ध्वनित इति॰ पूर्वोक्त प्रयोगघटकैकशब्दे तु एकजातीयत्वार्थकत्वकल्पनेनाप्युपपत्तिरिति भावः। नद्द

भै·
१०५

मानमिति· यदात्वसहायत्वंस्वस्यदुरदृष्टसत्वप्रयोज्यमेकाकिभिः क्षुद्रकैर्जितमित्यादौयथातदाप्रधानत्वप्रतीत्यभा
वेपिवहुषुराजसुवीरेषुसत्स्वपिप्राधान्यादयमेकवीरइतियदाप्रयोगस्तदाप्राधान्यप्रतीतिर्यद्यपिसम्भवतितथापि
मदृढमानस्वनिष्ठगुणसजातीयगुणवत्वकृतसाजात्यवदन्यामांवप्रयोज्यासहायत्वस्यापिपर्यवसानेनवाक्यार्थेनि।
ष्पत्तिसम्भवादितिभावः।स्वाभिधेयापेक्षोऽवधिनियमोव्यवस्थेतिक्वचित्पाठस्सचायुक्तः।कर्मघञन्तस्यापेक्षशब्दस्याव
धिसापेक्षत्वेननियमेनयोगासम्भवादतआह।समस्तःपाठइति· एवञ्चस्वाभिधेयापेक्षशब्दस्यावधिशब्देनसमासेकृ।
त्वानियमशब्देनसमासेकृतेस्वाभिधेयेनापेक्ष्यमाणस्यावधेर्नियमोव्यवस्थेतिवाक्यार्थःसिद्धः।एवञ्चयत्फलितन्तदा
ह· नियमेनेतिनियमेनावधिसापेक्षत्वावधिवोधकशब्दप्रयोगनिवर्तनीयोत्थिताकाङ्क्षाजनकज्ञानविषयत्वमुत
त्वपूर्वादिशब्दार्थेप्रसिद्धमेवेतिभावः·व्यवस्थायामितिसप्तमीतुविषयत्वार्थिकैव।आग्रहेत्विति·एवमभिधानेनात्रद
क्षिणशब्दस्यावधिसापेक्षार्थवृत्तित्वाभावःसूचितः।उत्तरेप्रत्युत्तरइति·।अत्रोत्तरःशब्दःप्रतिवाद्युच्चारितवाक्यपरः।
प्रत्युत्तरशब्दस्तुपूर्ववाद्युच्चारितोत्तरनिराकरणसमर्थवाक्यपरः।उत्तराःकुरवइतिवाक्यघटकोत्तरशब्दार्थेव्यवस्था
विषयत्वमुपपादयति·।सुमेर्ववधिकेति· अनेनसुमेरुशब्दाकाङ्क्षानिवर्तकत्वंसूचितम्।मंध्यान्हेति· अस्यनत्सुरु
धीयेत्यादिः एवमेवसर्वेषामेववर्षाणामेरुरुत्तरःस्थितइतिवाक्यस्याप्युपपत्तिः।दिग्वाचकानाम्पूर्वादिशब्दानाम्प्रवृत्ति
निमित्तमुक्त्वादेशवृत्तीनामप्याह·देशवृत्तीनामपि· अत्रकेचित्।असंज्ञायामित्यस्योत्तराःकुरवइतिप्रत्युदाहरणमस

राम
१०५

ङ्ग·नम।देशविशेषेउत्तरशब्दस्यनिरूढत्वादवधेर्नियमेनापेक्षायाअभावेनव्यवस्थायाअभावात् किञ्चदिग्वाचकपूर्वा
दिशब्दानामपिसर्वनामसञ्ज्ञादिक्षुतेषांरूढत्वान्नप्राप्नोति।किञ्चदिङ्नामान्यन्तरालइतिसूत्रभाष्येदिक्समाससहयो
गयोश्चाशिष्योवहुव्रीहिः।किंकारणमन्तरालप्रधानाभिधानात् दिक्समासेसहयोगेचअन्तरालम्प्रधानञ्चाभिधीयते
।तत्रान्यपदार्थइत्येवसिद्धमसिद्धम्।यद्येवंदक्षिणपूर्वादिक्समानाधिकरणलक्षणः पुम्वद्भावोनप्राप्नोति।अद्यपुन
रियंसैवपूर्वेतिकृत्वासमानाधिकरणलक्षणःपुम्वद्भावःसिद्धोभवति।नसिध्यति·भाषितपुंस्कस्यपुम्वद्भावः।नचैतौ
भाषितपुंस्कौ।ननुचभोःदक्षिणशब्दःपूर्वशब्दश्चपुंसिभाव्येतासमानायामाकृतौयद्भाषितपुंस्कम्।आकृत्यन्तरेचैतौ
भाषितपुंस्कौ·दक्षिणापूर्वेतिदिक्शब्दोदक्षिणःपूर्वेतिव्यवस्थाशब्दौ।एवन्तर्हिसर्वनाम्नोवृत्तिमात्रेपुम्वद्भावइतिव
क्तव्यम्।दक्षिणोत्तरपूर्वाणामित्येवमर्थमितिभाष्येउक्तम्।अत्रकैयटः।दक्षिणस्याःपूर्वस्याश्चदिशोयदन्तरालंदिक्सा द
क्षिणपूर्वेत्युच्यतेतत्रान्तरालस्यान्यपदार्थत्वात्पूर्वेणैवसिद्धःसमासः।अद्यपुनरिति·सूत्रारम्भकालेसूत्रमेवंव्याख्याय
तेअन्तरालेयानिदिङ्नामानिवर्तन्तेतानिसमस्यन्ते।दक्षिणादीनांसामीप्यादन्तरालवृत्तित्वन्तनश्चदक्षिणाचासौपूर्वा
चेतिसमानाधिकरणलक्षणःपुम्वद्भावःसिद्धोभवति।सूत्रारम्भेत्वन्यपदार्थसम्पादनायदक्षिणापूर्वेतिशब्दयोःस्वार्थए
ववृत्तिरभ्युपेयाततोवैयधिकरण्यम्।ततोनसिध्यतीतिप्रतीकमुपादायप्रवृत्तिनिमित्तभेदएवोपपादितः।दिक्शब्दा
विति·विनाप्रवृत्तिनिमित्तेनदिग्विशेषेरूढत्वात्प्रवृत्ताविन्यर्थः।देशकालयोश्चव्यवस्थापेक्षाप्रवृत्तिनिमित्तता।एतेनप्रधद्द

भै·
११०

केनदिग्वाचकपूर्वादिशब्दानांव्यवस्थाविषयत्वाभावात्सर्वनामसञ्ज्ञानप्राप्नोतीत्यभिहितम्।अपिचदक्षिणागायका
इत्यत्राप्युत्कर्षस्यावधिसापेक्षत्वेनव्यवस्थायाःसत्वात्कथन्नसर्वनामसञ्ज्ञेति।नन्वसञ्ज्ञाशब्दत्वञ्चरूढ्याबोधक
शब्दमात्रप्रवृत्तिनिमित्तकशब्दत्वम्।अतएवसञ्ज्ञायांसमजेतिसूत्रेणसमूहार्थकसमज्याशब्दस्यसूत्रकृतासाधुत्व
मुक्तम्।अतएवपशुनामत्वेनगवादयोव्यवह्रियन्ते।नत्वेषुपदप्रवृत्तिनिमित्तकत्वम्।इन्द्रशक्रादीनामभिन्नप्रवृत्ति
निमित्तकत्वापत्त्यापर्यायत्वानापत्तेः।सञ्ज्ञोपसर्जनीभूतादन्यत्रत्वाधुनिकसञ्ज्ञाविषयएवगृह्यते।दिक्षुत्वैश्वरःस
ङ्केतः।कुरुषुत्वाधुनिकइत्यत्रव्याख्यातृवचनमेवप्रमाणम् एवन्देवगणविशेषविश्वशब्दस्याप्यैश्वरएवसङ्केतइति
विश्वेषान्देवानामितिसिद्धम्।उत्तराःकुरवइतिप्रत्युदाहरणस्याप्युपपत्तिरुक्तैव।यच्चोक्तन्दिग्वाचकानांव्यवस्थाविषय
त्वादिति।तदपिन।यदिपुनर्दिक्शब्दाअपिव्यवस्थाशब्दास्स्युरितिभाष्येणैवसमाधानात्।अस्यभाष्यस्यस्यात्तर्हिभाषित
पुंस्कत्वमितिशेषः।दिग्वाचकानांसर्वनामत्वमेवेष्टव्यमितितात्पर्येणचेदंभाष्यम्प्रवृत्तम्।अत्रापिव्यवस्थाशब्दाःस्युरि
त्यस्यव्यवस्थाविषयप्रवृत्तिनिमित्तकाइतिपूर्ववद्व्याख्येयम्।दिग्वाचकपूर्वादीनाम्पृथ्वीमध्यभागावधिकोदयाचला
दिपर्यन्तदेशरूपोपाधिविशिष्टदिशिप्रवृत्तिरिति।तथाचव्यवस्थास्फुटैव।अयम्भावः।आकाशवदेकस्यैवदिक्पदार्थ
स्यौपाधिकोभेदः।उपाधिश्चपृथिवीमध्यन्तन्मानस्थाश्चत्वारःपर्वताश्चतत्राप्युदयाचलसन्निहितत्वादिकमेवप्रवृ
त्तिनिमित्तम्।अवधिस्तुपृथिवीमध्यमेकमेव।नचैवम्पुम्वद्भावेसिद्धेसर्वनाम्नइत्यनेनतत्साधनम्व्यर्थमितिवाच्यम्।

राम
११०

दिग्वाचकानांरूढ्याशब्दस्वरूपम्प्रवृत्तिनिमित्तीकृत्यप्रवृत्तिरितिसमानायामाकृतौभाषितपुंस्कत्वन्नास्तीत्यभिप्रा
येणतथाभिधानात् वस्तुतस्तूपपादितरीत्याव्यवस्थाविषयत्वमस्त्येव।पृथ्वीमध्यसावधित्वञ्चरामायणेकिष्किन्धा
काण्डेवानरान्प्रतिमध्यभागावधिकस्यैवदिग्विभागस्योक्तेः कल्प्यते।पृथ्वीमध्यञ्चमध्यान्हसूर्यसंयोगिदेशः।न
चपूर्वादिष्वपरशब्दस्यपाठोव्यर्थः।परशब्दस्यनञ्समासेनतदन्तविधिनाऽपरशब्देपिसर्वनामकार्यसिद्धेरितिवाच्यम्
।एवन्तर्हिपरापरशब्दयोःसमानार्थकत्वव्यवहाराभावप्रसङ्गात्।किन्तुपरशब्दवदपरशब्दस्यापिदिक्कालयोस्तदवच्छि
न्नेचरूढिः अपरशब्देननञ्समासत्वेपिजहत्स्वार्थवृत्त्यापरशब्दार्थस्यैवाभिधानम्।तस्मिन्रूढिसञ्ज्ञावाञ्जहत्स्वार्थ
वृत्तिस्वीकारोनविरुध्यते।अपरेत्त्वत्रपरशब्दस्यानर्थकत्वपास्तीयसर्वार्थवाचकपरशब्दान्तत्वाभावेनैतदुपादानमाव।
श्यकमेवेत्यवधेयम्। अन्तरशब्दस्यार्थानाह·अन्तरमवकाशेत्यादिना·अवकाशेराजकार्यसाधनेनियुक्तम्प्रतिअन्येन
मदीयमिदंकार्यान्तरंकर्त्तव्यमित्युक्तेसवदति।सत्यन्तरेभवदीयकार्यान्तरंकरिष्यामीति।अवधौ।दिनान्तरेमासान्तरे।प
रिधाने·अन्तरेशाटकाः।अन्तर्द्धौ·मेघान्तरेसूर्यः।भेदेरामायणेरावणम्प्रतिसीतावाक्ये।यदन्तरंवायसवैनतेययोर्यदन्
तरम्मकुमयोरपीति।तादर्थ्ये·भवदन्तरेमयासाधनमर्जितमिति।छिद्रेविवरन्तत्र।अन्तरेशास्त्रम्प्रहर्त्तव्यमिति।आत्मीयेयथा
।अयममात्यन्तमन्तरः।विनार्थे·अन्तरेणपौरुषमिदन्नसाध्यमित्यत्र।बहिरर्थे·अन्तरेअन्तरावाचण्डालादिगृहाः।अवस
रेममसेवकोन्तरंजानाति।मध्ये·आवयोरन्तरेविष्णुः।अन्तरात्मनिअन्योन्तरात्माआनन्दमयः।इदमुपलक्षणम्।तेनसा

दृश्यस्यापिसङ्ग्रहः।यथास्थानेऽन्तरतमइत्यत्रानत्वनिषेधकमिति·सर्वनामसञ्ज्ञानिषेधकमित्यर्थः सिद्धेरिति·एवञ्चा
ध्याहारंविनासूत्रेवैपर्थ्यापत्त्याचिकीर्षितइत्यध्याहारः।नन्वकृतव्यूहपरिभाषयाऽलौकिकप्रक्रियावाक्येप्यकत्त्रभविष्य
तीत्यतआह· अकृतव्यूहेति· एतत्तत्वमन्यत्रोक्तम्।स्वरःस्वाङ्गशिटामितिविहितः।प्रत्यङ्गम्।प्रत्यवयवम् ३१ ध्वनित
मिति·एवंहिभाष्यउक्तम्।थिन्विकृण्व्योरचेतिक्वायमकारःश्रूयते।नक्वचिच्छ्रूयतेलोपोस्यभवति·अतोलोपआर्द्धधा
तुकइति।यदिनक्वचितच्छ्रूयतेकिमर्थमयमुच्यतेतेनलोपएवोच्येत।नैवंशक्यम्।लोपेसतिगुणःप्रसज्येत अत्वेपुनः
सति अकारलोपस्यस्थानिवद्भावाद्गुणोनभवष्यति।ननुचलोपेपिसतिनधातुलोपआर्द्धधातुकइतिप्रतिषेधोभवि
ष्यति।आर्द्धधातुकनिमित्तेलोपेप्रतिषेधः।नचैषआर्द्धधातुकनिमित्तोलोपः।अपिचप्रत्याख्यायतेसलोपः नसिन्वप्र
त्याख्यातेगुणःस्यादेवेत्युक्तम्।अनेनसूत्रमतात्प्रत्याख्यानवादिमतम्प्रवलमितिप्रत्याख्यानवादिसम्मतलक्ष्यमेव
सूत्रमतेपिसाध्यमितिध्वनितमित्यर्थः।एवञ्चप्रत्याख्यानविरुद्धफलकसूत्राशयकल्पनंवृत्तिकाराणामनुचितमि
तिसूचितम्।तदाह।एवञ्चेति·नन्वेवंसूत्रेसप्तमीनिर्देशोविरुध्यतेऽतआह·सूत्रेइति·अतएवसप्तम्याःप्रथमार्थत्वादे
वातदनुगुणत्वंविशदयति· प्राधान्येति·ननुसर्वार्थवाचकत्वंसर्वविश्वयोरेवनत्वन्येषामतआह·प्रसिद्धत्वीयेति·अ
त्रसामानाधिकरण्यंस्वरूपसम्बन्धेनतादृशवाचकत्ववत्तदात्मत्वरूपम्।आवश्यकत्वेनेति· उद्देश्यतावच्छेदका
वच्छेदेनविधेयान्वयस्यौत्सर्गिकतयायदिसञ्ज्ञोपसर्जनीभूतानामप्यनुकरणस्यात्तदातत्साधारणसर्वादित्वावच्छे

देनत्रिधेयान्वयोवाच्यः।सचाश्रानोवाधान्नसम्भवतीत्यतउद्देश्यतावच्छेदकस्यतद्याव्रत्तत्वसिद्धयेनेषामनुकरण
मेवनेतिभावः।नामपदस्वारस्येनेति·अन्यथासर्वार्थेतिवदेत्।स्वीयसर्वार्थेति·तत्पदवाच्यसर्वेत्यर्थः।अभिव्य
क्तेतिन्यायमूलमिति·उष्ट्रमुखवत्समासः। बहुवचनेनप्राधान्यलाभः।अव्ययनामपदेन
प्रसिद्धलाभइतिबोध्यम्· यन्मूलंशीघ्रोपस्थितिकत्वंतदेवैतस्यापिमूलम् अयम्भावः।सञ्ज्ञोपसर्जनप्रतिषेधइति
वार्तिकात्तन्मतेप्रसिद्धस्यसञ्ज्ञानभवतीतिसिद्धौ।अथवामहतीयंसञ्ज्ञाक्रियतेइत्यादिनावार्तिकप्रत्याख्यानंभाष्य
कारनयेवार्तिकैकवाक्यतपाऽप्रसिद्धव्याव्रत्तेरवश्यमेवस्वीकार्यासाचस्वीयस्यप्रसिद्धस्यैवार्थस्यग्रहणेनभवतीति
।यत्तुप्रातिपदिककार्येऽप्यभिव्यक्तेतिन्यायस्यप्रवृत्त्याप्रसिद्धेतिलब्धम्गौणमुख्यन्यायादस्यन्यायस्यभेदेनोपादानात्त
स्यपदकार्यविषयत्वेऽप्यस्यन्यायस्यप्रातिपदिककार्यविषयत्वमपि।अतएवसञ्ज्ञाभूतत्रिशब्दस्यापित्रयादेशोनेतित
न्न·अभियुक्तोक्तश्लोकस्यापूर्वत्वाभावसिद्धान्तात्।अतएवात्वंत्वंसम्पद्यते।महान्महान्भूतस्त्वङ्भवतीतिभाष्योक्तवाक्ये
त्वादेशादीर्घयोरप्युपपत्तिः।नापिसञ्ज्ञाभूतत्रिशब्दस्यापिपरैस्त्रयादेशस्यापत्तिः।सञ्ज्ञायाएकद्रव्योपनिवेशिनीयत्वा
त्ततआमःसम्भवस्यैवाभावात्।नचनादृशत्रिशब्दानामेकशेषेणतत्सम्भवइतिवाच्यम्·त्रेस्त्रयइतिसूत्रघटकत्रि
शब्दमात्रोच्चारणेनयस्यार्थस्यशीघ्रोपस्थितिस्तदर्थेनत्रित्वसङ्ख्याविशिष्टसङ्ख्येयात्मकेनविशिष्टस्यत्रिशब्दस्य
ग्रहणादन्यथातादृशत्रिशब्दाद्यवयवत्रिशब्दस्याप्यादेशप्रसङ्गःस्यात्तन्नतादृशःसञ्ज्ञाभूतस्त्रिशब्दोऽस्तीति।नचैवमपिसञ्ज्ञा

भै· ११२

भूतयुष्मदस्मदोस्त्वाहाद्यादेशापत्तिरितिवाच्यम्· उक्तरीत्यानेषामपि परिहारसम्भवात्।अन्यथात्वाद्यादेशानांस्वरूप
मात्राश्रयत्वेनयुष्मद्युपपदइत्यादिसोत्रप्रयोगानुपपत्तिरितिदिक्।सर्वादीनितदन्तानिचेतियेनविधिरितिसूत्रभाष्यप
ठितप्रयोजनम् सर्वनामाव्ययसञ्ज्ञायामितिवार्तिकरीत्येदम्।एतेन·महासञ्ज्ञयोपस्थापितयोर्योगार्थरूढ्यर्थयोर्वि
शिष्टवैशिष्ट्यावगाहिवाक्यार्थबोधपरतयासूत्रार्थवर्णनेन।एकपदोपस्थापितयोरपिविशेषणविशेष्यभावेनशाब्द
बोधस्य।ख्याख्यातोपस्थितसङ्ख्याकारकयोरिवोत्पत्तौबाधकाभावात्।अनुत्पन्नत्वादिति· उद्देश्यतावच्छेदक
रूपेणोद्देश्यस्यज्ञानरूपसिद्धिम्विनाविधेयत्वेनाभिमतस्यतत्त्वेनान्वयासम्भवात्।सिद्धं धर्मिणमुद्दिश्यसाध्योविधे
यइतिन्यायस्यक्लृप्तत्वादितिभावः।नन्वेकपदोपस्थापितयोःकृतीष्टसाधनत्वयोः।परमते धात्वोः फलव्यापारयोःपृथ
क्शक्तिवादिमते उद्देश्यविधेयभावेनान्वयापत्तिवारणायफलावच्छिन्नव्यापारेशक्तेःस्वीकारात्स्वमतेहिक्लृप्तत्वात्पृ
थगुपस्थितयोस्तथान्वयइष्टएवेत्यतआह·रूढ्यर्थयोगार्थयोरिति·यः शब्दः केवलयौगिकस्तत्रपृथगुपस्थितयोरुद्दे
श्यत्वविधेयत्वाख्यप्रकारताविशेष्यताविलक्षणविषयताशालिबोधःस्वीक्रियतेनतुयोगरूढस्थलेऽन्यत्रतथा
दर्शनादितिभावः।अन्यतरवियोगेनेति· अत्रनसम्बन्धाभावोवियोगः।अन्वर्थसञ्ज्ञोपस्थितसर्वार्थवाचकस्यविशे
ष्यतापास्तेनापिस्वीकारात्तयोरसम्बन्धस्यवक्तुमशक्यत्वात् किन्तुयोगरूढस्थलेयोगार्थरूढ्यर्थयोर्यत्रोपस्थितिस्त
त्रान्यतरस्ययत्रोद्देश्यत्वन्तत्रापरस्योद्देश्यतावच्छेदकत्वंयत्रवातदन्यतरस्यविधेयत्वन्तत्रापरस्यविधेयतावच्छे

राम ११२

दकत्वमितिनियमः क्लृप्तस्तस्यभवन्कल्पितेवाक्यार्थबोधेत्यागइतिभावः। एतेन· उक्तनियमप्रसङ्गेन। आक्षेप
कमपिनास्तीत्यतआह· नहिनेति· मानाभावाच्चेति· पदवृत्त्युपस्थापितार्थस्यैव शाब्देऽन्वयप्रतियोगित्वमिति
नियमात्। अतएवप्रविशपिण्डीमित्यादौवाक्यार्थेवाक्यैकदेशस्य शक्तिर्भाष्यसिद्धान्तानुसारिभिः स्वीक्रियते
तदनुमानादिति· सर्वार्थवाचकानुकरणानुमानादित्यर्थः। सर्वादिगणपठितानिसर्वार्थवाचकानुकरणानि
महासञ्ज्ञोद्देश्यबोधकत्वेनपाणिन्यभिप्रेतत्वात् इतिव्यतिरेक्यनुमानस्यसम्भवादितिभावः। एतेनतदनुगुणानां
सन्निवेशेनात्वादिव्यापारस्यहेतुत्वन्नतुमहासञ्ज्ञाकरणस्येतीदमसङ्गतमित्यपास्तम्। अत्रोपेति सञ्ज्ञोपसर्ज
नप्रतिषेधइतिवार्तिके। ननुलौकिकोपसर्जनस्यवार्तिके ग्रहणेतदोः सः सावितिसूत्रस्थभाष्यविरोधः तत्रहिकि
मर्थमनन्त्ययोरित्युच्यते। अन्त्ययोर्माभूत्। नैतदस्तिप्रयोजनम्। अत्वमन्त्ययोर्बाधकम्भविष्यति। अनवकाशाहिविध
योबाधकाभवन्तिसावकाशञ्चात्वम्। कोवकाशोहिशब्दः। उदाहरणमात्रमेतत्। अन्यत्रसोः सर्वएवत्यदादयोऽवका
शाः। सत्वमपिसावकाशम्। कोवकाशः। अनन्त्यम्। एवमुभयोःसावकाशयोः परत्वात्सत्वम्प्राप्नोतिकिञ्चस्यात्। हे
सइति· एङ्ह्रस्वात्सम्बुद्धेरितिसम्बुद्धिलोपोनस्यात् नचानन्त्ययोरित्युक्तेपित्यदाद्यत्वेसन्निपातपरिभाषयालोपोनस्या
त्। परिभाषायाअनित्यत्वात् इहचपासाद्रूप्यत्रसत्वेटाप्नस्यात्। नयासयोरितिलिङ्गे आश्रीयमाणेअनेकोऽर्थःकल्प्यः
स्यात् तस्मादनन्त्ययोरितिवक्तव्यन्नवक्तव्यम् एवंवक्ष्यामि। तदोः सः सौ। ततोऽदसः। अदसश्चदकारस्यसोभवति।

इदमिदानीङ्किमर्थेन्नियमार्थम्। अदस एव दकारस्य नान्यस्य दकारस्येति। यदि नियमः क्रियते द्वीयतेरप्रत्ययः। इदूइति प्राप्नोति। स्वइतिचेष्यते। यथालक्षणमप्रयुक्त इति। अत्र त्यदाद्यत्वकरणे न शास्त्रीयस्योपसर्जनस्य ग्रहणम्· लौकिकस्य तस्य वार्तिके ग्रहणे तु भाष्यासङ्गतिः स्पष्टैवेति चेन्नः नञ्सूत्रभाष्येनञ्समासस्य पूर्वपदार्थप्राधान्ये ऽसदूत्यादावत्वसत्वयोरनापत्तिरुक्ता। शास्त्रीयस्य तस्य ग्रहणे तु पूर्वपदार्थप्राधान्यपक्ष इवोत्तरपदार्थप्राधान्यपक्षेप्यत्वसत्वयोरनापत्त्या तद्भाष्यासङ्गतिः स्फुटैव।३५। तस्मान्न्यायसिद्धानेकभाष्यविरोधान्न दोषः सः साविति भाष्यस्यैकदेशयुक्तित्वात्तदेतदाह· तदोः सइतीति· फलाभावइति· विहितविशेषणाश्रयणेनैव दोषाभावस्योपपादनात्। विशेषणान्वयाभावादिति· एकार्थीभाववशात्· प्रत्ययेन केन। अत एव· अवयवनिषेधे फलाभावादेव·। पूर्वमेवकुत्सा विवक्षा यत्र तत्र तत्सूचकः प्रत्ययः स्यादेवेत्याह· कृताकचासमासो भवत्येवेति। तत्र· साकच्कघटितसमासे। यदुक्तन्त्वच्छ।
व्दस्य नान्तस्य सद्भावे तत्र काकचो विशेष इति तद्दूषयति। त्वदर्धरेति· समुदायस्यैव निषेध इत्यर्थस्यावश्यकत्वमाह·
।जसाधारेत्यादिने न हि निषेधस्य विकल्पः शीभावे कर्तव्ये क्रियते। यद्यवयवस्य जसाधारे शीभावे कर्तव्ये तेन न निषेध विकल्पः स्यात्तदा लुग्विषये शीभावाप्रसक्त्या तद्वैयर्थ्यं स्पष्टमेव। एवञ्च तस्मिन्सूत्रे द्वन्द्वपदस्य समुदायपरत्वे ऽर्थाधिकारानुरोधात्पूर्वसूत्रेपि द्वन्द्वपदं समुदायपरमिति भावः। पर्यवसितार्थमाह· उद्भूतावयवेति· न बहुव्रीहाविति निवृत्तिरिति·। अनुवादकमिति शेषः। इतरेतरयोगद्वन्द्वेपि समुदायस्य विशेष्यतायां साधकमाह· अत एवेति· समुदायस्य विशेष्यत्वादे

वेत्यर्थः सूत्रइति· तत्सूत्रभाष्यइत्यर्थः। केचित्तु परमसर्वादाविवावयवद्वारकसर्वार्थवाचकत्वस्यद्वन्द्वेप्युक्तमित्या
दिनाभाष्यकृताप्रत्याख्यानादेकदेश्युक्तिरतएव। विभाषादिक्‌समासइतिसूत्रेबहुव्रीहावितिकिमर्थंद्वन्द्वेमाभूत्।
दक्षिणोत्तरपूर्वाणामिति। नैतदस्ति। द्वन्द्वेनेतिप्रतिषेधोभविष्यतीतिभाष्येउक्तम्। एवञ्चबहुव्रीहावितिवद्द्वन्द्वेचेत्य
त्रापिचिकीर्षितइत्यध्याहारेणप्राग्वृत्तेर्निषेधेनाकजूनप्रवर्त्तनइति। एकद्विकाइत्यस्यसिद्धिः। अथवाचिकीर्षितइ
त्यध्याहाराभावेपीतरेतरयोगेऽवयवस्यप्राधान्यात्प्राप्तसञ्ज्ञायाविद्यमानानीत्यध्याहारेणनिषेधोभविष्यतीत्यक्त
तव्यूहपरिभाषयापूर्वमप्यकजप्रवृत्तिरित्याहुः। अत्रेदंचिन्त्यते· अवयवद्वारकसर्वार्थवाधकत्वादुपसर्ज· नत्वाभाव
इत्यसङ्गतम्। उपसर्जनत्वाभावविशेषणत्वाभावस्यैकविभक्तिकत्वाभावस्यवाप्रयोजकतानत्वेतस्य। तादृश्यभाव
इयञ्चप्रकृतेनास्तिविशेषणत्वात नञ्सूत्रस्थप्रागुपपादितरीत्यासमूहस्यप्राधान्यात्। किञ्चद्वन्द्वेनेतिवार्तिकम्प्रत्या
ख्यातमितियत्तदपिभावानवबोधमूलकम्. द्वन्द्वेप्युक्तमितिग्रन्थेनान्यथासिद्धेरेवोद्भावनात्। एवंहिभाष्येउक्तम्। द्वन्द्वे
प्युक्तम्। किमुक्तम्। परवल्लिङ्गमितिशब्दशब्दार्थावितिं। तत्रोपदेशिकस्यह्रस्वत्वमातिदेशिकस्यश्रवणम्भविष्यति
। एवमेवकुक्कुटमयूर्यावित्यत्रपरवल्लिङ्ग·मितिसूत्रभाष्येपिह्रस्वत्वमाशङ्क्यसमाहितम्। तत्रकैयटः। शब्दशब्दार्थौ।
विति· लिङ्गशब्देनलिङ्गाभिधायीप्रत्ययोऽर्थश्चतन्त्रेणैकशेषेणवोच्यतइत्यर्थः। आतिदेशिकस्यश्रवणमिति· तस्यानु
पसर्जनत्वात्तदन्तस्यचाप्रातिपदिकत्वाद्ध्रस्वाभावादिति। एवंवदताकैयटेनापीतरेतरयोगद्वन्द्वेसमूहस्यप्राधान्यंसूचि

तमेव। भाष्यकृतापि द्वन्द्वे चेति वार्तिकस्य संगोस्त्रियोरिति सूत्रस्थस्य पुनरुक्त्या नावश्यकत्वं सूचितं तन्न तु तत्र समाहारस्य वि
शेषणत्वप्रदर्शनेन। अकृतव्यूहपरिभाषयेत्यसङ्गतम्। तस्याः परिभाषापा अभावस्यान्यत्र प्रपञ्चितत्वादिति दिक्॥
असम्भवादिति· निषेधस्य प्राप्तिपूर्वकत्वात्प्रथमादिषु प्राप्तेरेवाभावात्। यद्यपि नेम शब्दे सम्भवोस्ति तथापि बहूना
मनुरोधो न्याय्य इति न्यायेन नेति न सम्बध्यत इत्युक्तम्· हेतुरुक्त इति· केवलस्य सञ्ज्ञायाः प्रयोजनाभाव इत्येवं रूपः
।तीयस्य ङि· त्स्वरूपसङ्ख्यानमिति वार्तिकस्य द्वितीयतृतीयशब्दयोः प्रवृत्तिसूचनायाह· द्वितीयतृतीयाविति· न्यून
तां परिहरति। प्रतिपक्षोक्तेति॰ नन्वर्द्धमात्रालाघवानुरोधेनासुङादेश एव कुतो न कृत इत्यत आह· प्रतिपत्तीति· अ
सुङितिन्यासे आदेशत्वेनाभिप्रेतस्य स्वरूपस्य ज्ञाने हलन्त्यमुपदेशे जिति सूत्रद्वयस्यापेक्षासत्वाद्गौरवमिति भावः
।किञ्च जराशब्दाच्चक्षाणणिजन्तात्क्विप्यजादौ विभक्तौ स्थानिवद्भावेन जराशब्दत्वादसुङादेशे जसौ जस इति रू
पापत्तिरपि बोध्या। न च णिलोपस्य स्थानिवत्त्वम्। क्वौ लुप्तमिति निषेधात्। परन्त्वस्य वचनस्यासार्वत्रिकत्वानुरो
धेन प्रतिपत्तिलाघवायेत्येवाभिहितमित्यवधेयम्· उत्तरपदाधिकारः केवलपदाधिकारश्चेति· उत्तरपदाधिकारे
प्रयोजनमिष्टकेषीकामालानामिति दृष्टकचितम्। पक्वेष्टकचितमित्यादि केवलपदाधिकारे। वसुस्रसुध्वंस्वनु
डुहां दः। परमानडुद्भ्यामित्यादि। अङ्गाधिकारे महान्परममहानित्यादि। षष्ठीस्थानेयोगेति सूत्रे षष्ठीपदं षष्ठ्यन्तपर
म्। उच्चार्यमाणमित्यध्याहारः। एतेन यत्फलितं तदाह· षष्ठ्यन्तमित्यादि· ननु स्थानिवद्भावेन तत्त्ववृद्धावपि कथ

न्निर्दिश्यमानत्वमत आह· अनेनेति· तस्मिन्सूत्रे आदेशग्रहणेनानुमानिकादेशस्यापि तत्र ग्रहणात्तत्र निर्दिश्यमानप
रिभाषाप्रवृत्तौ न द्वैयर्थ्यं स्पष्टमेवेति। एकदेशविकृतन्यायस्य लौकिकत्वाल्लोके चाक्षपरिमाणार्थवाचकस्य न्यूनाधि
कयोरप्रवृत्तेरतिदेशशास्त्रेण तत्त्वमेवातिदिश्यते। दृष्टान्तस्यापि पुरुषारम्भो निवर्त्तक इति भाष्योक्तेः नच जराशब्देन
तदन्तोपस्थितावपि न कृत्स्नत्वबुद्धिरिति वाच्यम् सञ्ज्ञाशब्दानामेव स्वभावो यद्यादृशाकृत्यवच्छिन्नस्य सञ्ज्ञाकृ
ता तादृशाकृत्यवच्छिन्नोपस्थापकत्वमेवेत्याशयात्। नच सञ्ज्ञाशब्दविषयेपि चेन्निर्दिश्यमानपरिभाषाप्रवृत्तिस्त
दाऽस्यच्चाविति सूत्रस्य माली भवतीत्यादौ प्रवृत्तिर्न स्यात् अणुदित्सूत्रेणाकारस्य सञ्ज्ञात्वबोधनाद्दीर्घस्यानिर्दिश्यमा
नत्वादिति वाच्यम्· नभूसुधियोरिति ज्ञापकेन ग्रहणकशास्त्रगृहीतानामपि निर्दिश्यमानकार्यबोधनात्॥ वैचि
त्र्यायेति· इदमेव वैचित्र्यम् यस्य शास्त्रस्य यत्रोपयोगस्तस्य तत्रैव लख इति नियमाभाव इति सिद्धान्तमाह· इदमि
ति· परत्वाज्जरसि इति कथनम्। अत एव· पूर्वविप्रतिषेधस्येष्टत्वादेव· कैयटस्याप्यत्र सम्मतिमाह· अत एवेति· उक्तए
वास्यार्थः। तत्र हि भाष्यकृता तादृशो। दादेशश्चास्त्विति लाघवमभिप्रेत्योक्तम्। कैयटश्च तद्भाष्यव्याख्यायामाह· अ
न्ये त्वतिजरसिनातिजरसादिति सिद्धयेदून आद्यविहितावित्याहुः सन्निपातपरिभाषाया अनित्यत्वाज्जरसादेशव
दन्तं भाष्यकारस्तु सन्निपातपरिभाषामाश्रित्य जरसादेशमनभ्युपयन्नतिजरेणातिजरादिति भाव्यमिति मत्वा गौर
वमुद्भावितवानिति· गौरवमिति· इकारदीर्घोच्चारणरूपमित्यादिः जरसः सवृत्तिकृद्वृत्तिकारसम्मतिमाह· वृत्तिकार

इति· अत्रकेचिदित्युक्तपास्वस्यतत्रायरितोषोध्वन्यते· तमेवस्पष्टयति। यथात्तुभाष्यमिति· यथाप्रथमैकवचनेऽन्ति
नरंवर्त्तेनइत्यत्र। मानाभावादितित्तादृशविशेषविषतायास्मानाभावादित्यर्थः। स्वोक्तार्थेकैयटस्यापिसम्मतिमा
ह·टाङसीति· अत्रैवभाष्यसम्मतिमाह· ध्वनितञ्चेदमिति अत्रतत्रहीत्यस्योक्तइत्यत्रान्वयः। इतिभवितव्यमिति·
। एतेनविभक्त्यादेशोत्तरंसन्निपातपरिभाषयाजरसादेशाभावइतिध्वनितम्। तिषाम्परत्वादिति· याडापइत्यादीनामि
त्यर्थः विभक्त्यादेशविषयेपूर्वविप्रतिषेधाश्रयणेप्याकारप्रश्लेषस्यनवैयर्थ्यमित्याशयेनाह· अतोति· परमसिद्धा
न्तमाह· परेत्विति· विभक्तिसम्बन्धिकार्यमात्रमिति। अत्रसम्बन्धीत्युपादानादादेशएवपूर्वविप्रतिषेधइत्यतत्ने
तिबोधितम्· अतएवेति· विभक्तिसम्बन्धिकार्यमात्रस्यपूर्वविप्रतिषेधेनप्रवृत्तेःपूर्वमिष्टत्वादेव· दीर्घइतिवदिति·।
अत्रवैयर्थ्येदृष्टान्तः। अयंयथाऽऽरब्धस्तथाजरसादेशस्यस्थानिवत्त्वप्रतिषेधोनारब्धइत्यर्थः। तदभिमानइति· इका
रोच्चारणंजरसादेशेकृतेपीकारश्रवणार्थम्। नचसन्निपातपरिभाषायाअनित्यतास्वीकारंविनावक्तुमशक्यमितित
द्भावः। भाष्यान्तरमाह· इष्टमेवैतदिति· एतेनैस्करणम्परिभाषायाअनित्यत्वेज्ञापकमितियत्केनचिदुक्तन्तन्निरस्त
म्। नह्येरित्युत्तरार्थंतत्सत्वाच्चाप्राचीनैः पदन्नइतिसूत्रस्यादेशविधायकत्वेनव्याख्यानइ· तत्तदनुरोधेनव्याचष्टे
।आदेशैरिति· स्वानुरूपाः। स्वसदृशाः। सादृश्यञ्चात्रवर्णतोऽर्थतश्चविवक्षितम् वर्णतइत्युक्तेचरणशब्दस्यनपदा
देशः। नचपदादेशस्यवैकल्पिकतयायदाचरणेनेतिरूपद्वयमिष्टमेवेतिवर्णतइत्युक्तिर्विफलेतिवाच्यम्· त्वचांप्राङ्

करादित्यधिकारपठितेनस्वाङ्गानामकुर्वादीनामितिसूत्रेणकवर्गरेफवकारादीन्वर्जयित्वान्येषांस्वाङ्गानांद्वितीयमु
दात्तमित्यर्थकेनचरणशब्दस्यमध्योदात्ततयाशेषनिघातेनानुदात्तादित्वस्यानुदात्तत्वस्यचसत्वेनविनिगमना
विरहात्तत्तद्धर्मकृतसादृश्यस्यापिपरिग्रहात्कदाचित्यदेत्यादिशब्दघटकेपच्छब्देअनुदात्तादित्वानुदात्तत्वस्यापि
प्राप्त्याऽनुदात्तादेःपदेतिप्रयोगस्यापत्तिरित्याशयात् अर्थतइत्युक्तेः श्लोकपादवाचकस्यादेशाभावइति।अतएव
अन्यतरस्यामित्यनुवृत्तेरेव।उपपन्नोभवतीति।आदर्शानान्निन्यत्वेतुआस्येनेत्यादिप्रयोगाणामनुपपत्तिरितिभा
वः।नन्वनुदात्तस्येतिसूत्रस्थान्यतरस्यामितिशब्दस्यचेत्स्वरितत्वेनानुवृत्तिस्तदायेचतद्धितइतिसूत्रेपितत्सम्बन्धःस्या
देवंसतितत्सूत्रस्थवार्तिकस्यापिवैकल्पिकत्वंसिद्धमेवेतिवाकेशेष्वित्यत्रवाग्रहणंवैयर्थ्यापत्तिरतआह।येचेति।
तत्रसूत्रे।येचेतिसूत्रे।वाग्रहणासम्बन्धेति।वार्थार्थकान्यतरस्यामित्यस्यासम्बन्धेत्यर्थः।निश्।निशायोरिति।श
ब्दस्वरूपपरत्वाद्द्विरूपत्वेपिसमानार्थत्वाभावादेकशेषाभावः।वृत्त्यनुसारिणइति।एतन्मतेयद्दन्नइतिसूत्रवद्येच
तद्धितइतिसूत्रस्याप्यादेशविधायकतयात्तत्रैवात्रापिप्रकृतिविशेषाक्षेपेणैवसिद्धेशिरःशब्दस्यग्रहणमकार्यमिति
लाघवम्।नसामस्तानामित्यादौनुडादेस्तुआआवितिप्रश्लेषेणनप्राप्तिरितिवदन्तः।भाष्यानुसारिमतमाह।परेत्विति।
अतएव।अन्यतरस्यामित्यस्यास्वरितत्वादेव।इत्युक्तमिति।यदित्वादेशविकल्पोऽन्यतरस्यामित्येतत्सम्बन्धेनस्यात्तदा
शीर्षन्नादेशाभावेशिरसशब्दस्यप्रयोगःसिद्धएवेतिशिरसोग्रहणंकर्तव्यमितिवार्तिकानुत्थानमेवस्यात्शिरोमेशीर्यते

शे·
११६

मुखम्। इदन्ते शिरोभिनन्नि। तदा अथर्वणः शिर इति· शिरसो ग्रहणं कर्त्तव्यमिति। तदुक्तम्भाष्ये। ये च तद्धित इत्यत्र शिरसो ग्रहणं कर्त्तव्यम्। किम्प्रयोजनम् आदेशार्थम्। आदेशो यथा विज्ञापे॰ गत। प्रकृत्यन्तरम्मा विज्ञायि किञ्च स्यात् यकारादौ तद्धिते ऽस्कारान्तस्य श्रवणम्प्रसज्येत। शीर्षण्यो हि मुख्यो भवति। शीर्षण्यः स्वर इति। ननु शीर्षश्छन्दसीति सूत्रस्थं शीर्षन्निति प्रकृत्यन्तरमादेशो माविज्ञायीति वार्त्तिकमनुपपन्नं स्थानिनिर्देशाभावेनादेशाप्रसक्तेरिति चेदत्र कैयटः। यद्यपि शिरस इति साक्षान्न निर्दिष्टस्तथापि समानार्थत्वादादेशमाक्षिप्येत। यद्यपि पूर्वसूत्रादन्यतरस्यांग्रहणानुवृत्त्या इष्टसिद्धिर्भवति तथाप्युत्तरत्रानुवृत्तिराशङ्क्येतेति तत्परित्यागेन प्रकृत्यन्तरपक्षो निर्दोष आश्रित इति। एतेन पद्दन्नादिसूत्रेपि प्रकृत्यन्तरत्वमेवद्रष्टव्यम्। अत एव भाष्ये पादादीनामिति वक्तव्यमिति नोक्तम्। उत्तरत्र· ये च तद्धित इत्यत्र। निर्दोष इति· छन्दसि सर्वविधीनां वैकल्पिकत्वमिति त्वगतिकगतिरिति भावः। केशेषु वाच्येष्वसकारान्तस्यापि प्रयोग इष्ट इत्यभिप्रायेणाह· वा केशेष्विति चेति· अत एव· प्रकृत्यन्तरत्वाभावादेव अत एव· तद्विषये प्रकृत्यन्तरस्येष्टत्वादेव· सुड नपुंसकस्येति· सुडिति नागमग्रहणम्· सर्वनामस्थाने चासम्बुद्धाविति सूत्रे ऽसम्बुद्धाविति विशेषणात्। आगमग्रहणे तु तदर्थं स्यात्· टाटकारेण प्रत्याहार इत्यपि न। औटष्टित्वसामर्थ्यादित्याशयेनाह· व्याख्यानादिति· लघुत्वाच्चेति· वाक्यभेदाभावेन लघुत्वात्। अत एव ज्ञापकादिति· अनपुंसकस्येति निर्देशारूपादित्यर्थः। केषाञ्चिदिति· अश्राद्धभोजी ब्राह्मणः अलवणभोजी ब्राह्मण इत्यादेः। स्वादिष्विति सूत्रे स्वादिष्विति पदेन न सप्तमी बहुवचनादेर्ग्रहणम्। असर्वनामस्थानग्रहण

राम
११६

दित्याशयेनाह· सुपत्रेति· अत्रसूत्रेसुपीत्यनेनापिसुब्मात्रग्रहणेसिद्धेआदिग्रहणमप्यर्थंस्यादित्यादिग्रहणसामर्थ्यादन्ये
षांप्रत्ययानामपिग्रहणम्। तेचप्रत्ययाधिकारपठिताः। तेष्वविशेषादुपात्तस्यकप्रत्ययस्यैवावधित्वमित्याशयेनाह· व्या
ख्यानादिति· कप्रत्ययस्यावधित्वेननिर्देशेसनियमफलितन्तदाह· तदन्तेष्वित्यर्थइति· तेन· यचिभमितिसूत्रे। सूत्रऽसर्वनाम
स्थानपदसम्बन्धेन· अशास्त्रीयेपीति· भपदसञ्ज्ञयोराकडारीयत्वपायेननाप्राप्तिन्यायेनयचिभमितिशास्त्रस्यस्वादिष्विति
सूत्रवाधकत्वेसिद्धेवाध्यस्यवाधकशास्त्रविषयाविषयकत्वंकल्प्यते। एतेनाशास्त्रीयस्यापिफलस्यसिद्धिः। भाष्यप्रामा
ण्यादिति· तत्रहिवेतस्वानित्यत्रकुमुदनडवेतसेभ्यड्मतुबितिड्मतुपिटिलोपेतसौमत्वर्थइतिसूत्रविहिताभसञ्ज्ञासान्तनिष्ट
पदत्वप्रतिवन्धद्वाराऽरुत्वाभावार्थाभवतीत्युक्तम्· वक्तुंयुक्तमिति· अस्यग्रन्थस्यपरत्नुनोक्तमाचार्यादिस्तुच्यमानेपद्य
पिमात्रालाघवमस्तितथापिपदगौरवंस्यात्। मात्रालाघवेनेतिपरिभाषाप्रायःपदगौरवविषयेनाश्रीयतइतिज्ञापयि
तुमितिशेषः। सङ्ख्यावाचकशब्दोपादानादिति· अर्थान्तरबोधस्यानुपयोगादितिभावः· अवधारणंसम्पद्यतइति·
सञ्ज्ञाद्वयंपदिस्यात्तदाप्येकत्वस्यप्रत्येकवृत्तितयैकासञ्ज्ञाजातैवेतितदुपादानसामर्थ्यादवधारणलाभः। द्वयोःसा
वकाशयोःपरेति· यथाधनुषाविध्यतीत्यत्रपरत्वाद्यादानसञ्ज्ञावाधिकाकरणसञ्ज्ञानिरवकाशत्वेसैवाऽयथाश्र
साढौयचिभमित्यनेनपदसञ्ज्ञावाधिकाभसञ्ज्ञा। क्वचित्त्वेवमेवभसञ्ज्ञावाधिकापदसञ्ज्ञायथाभवदीयइत्यत्र।
भवतष्ठक्छसावितिछसिसितिचेतिपदत्वम्। एतेनसञ्ज्ञानामपिवाध्यवाधकभावेऽन्यत्रवाधकत्वेप्रसिद्धेयद्धि

निमित्तत्वंदेवनिमित्तमाकडारीयसञ्ज्ञाविषयेथा श्रीयतइतिदर्शितम्।शास्त्रप्रामाण्यात्·अदर्शनेनेति·यथातत्र
न्नक्षत्रज्ञानत्वेननक्षत्रनाम्नः प्राणावपिदेवदत्तादिसञ्ज्ञाक्रियते।अपादानमितिकर्मपदम्।कारकाणीतिकर्तृप
दम्।विरोधाभावेनसञ्ज्ञानांस्वरूपतोविरोधाभावेन।तेनफलद्वाराविरोधसद्भावेपिनक्षतिः विरोधादीत्यादिनाबा
ध्यबाधकभावप्रयोजकान्तरस्यसामान्यविशेषभावस्यपरिग्रहः नत्र·परत्वेन।अन्तरङ्गत्वादिति·पूर्वोपस्थितनिमि
त्तकत्वरूपेत्यादिः।बाध्यसामान्यचिन्तेति· राजन्यबहुवचनद्वन्द्वइतिसौत्रनिर्देशस्यात्रमानम्।नन्वाकडारीयस।
ञ्ज्ञाविषयेपरत्वेनव्यवस्थाइतियत्तत्रकार्यकालपक्षेघटते।उभयोरपिकार्यरूपैकदेशस्यत्वादतआह·आकडा
रस्थेति नन्वेवमेवाङ्गसञ्ज्ञायाअपिसमावेशोनस्यादतआह· भपदसञ्ज्ञाविधाविति·इत्यर्थेनेति·एतेनाङ्गाधिकारे।
भस्येत्यस्यपाठेनाङ्ग·सञ्ज्ञयाभपदसञ्ज्ञयोः पर्यायोभवत्वित्ययास्तम्।अन्यत्रापिसमावेशमुपपादयति।पुरुषस
ञ्ज्ञेत्यादिना·उभे·घिनदीसञ्ज्ञेनतुपुरुषसञ्ज्ञापरस्मैपदसञ्ज्ञाएतयोर्णलुत्तमोवेतिज्ञापकेनसमावेशोपपादनेपिपु
रुषसञ्ज्ञात्मनेपदसञ्ज्ञयोः समावेशोनोपपद्यते।नचतङानावात्मनेपदमितिसूत्रेणतङ·आत्मनेपदसञ्ज्ञाविधान
सामर्थ्यात्समावेशोभविष्यतीतिवाच्यम्· पर्यायत्वसम्पादनेनापिचरितार्थ्यसम्भवादितिचेन्न· प्रथममध्यमोत्त।
मसञ्ज्ञायामात्मनेपदग्रहणम्।प्रथममध्यमोत्तमसञ्ज्ञायामात्मनेपदग्रहणङ्कर्तव्यमितिवार्त्तिकेनसमाधानात्।ए
तेनापूर्वात्मनेपदग्रहणेनोभयोःसमावेशउपपादनीयइत्युक्तम्।नचात्मनेपदग्रहणेआत्मनेपदस्यैवपुरुषसञ्ज्ञास्या

न परस्मैपदानामिति वाच्यम्‌· आत्मनेपदग्रहणं पृथक्कर्त्तव्यमित्यभिप्रायात्‌। एवं सति वाक्यभेदो भविष्यति। पूर्वसूत्रं परस्मैपदविषयकमेव। अथवा णलुत्तमो वेति सूत्रमेव सामान्यापेक्षज्ञापकमाश्रीयते। प्रथमादिसञ्ज्ञा एतत्प्रकरणस्थसञ्ज्ञान्तराणां बाधिका न भवन्तीति। ज्ञापकस्य विशेषापेक्षत्वे उत्तमसञ्ज्ञायां समावेशोपपादनेपि प्रथममध्यमसञ्ज्ञाभ्यां समावेशो न स्यात्‌। एकदेशविकृतन्यायेनेति· स्थानिवद्भावेनेत्यर्थः। ननु लौकिकस्यैकदेशविकृतन्यायस्यात्र प्रवृत्तिरद्धौ धिकविकारात्‌। आवद्यैति· अत्रावृत्तिर्न समुदायस्य किन्तु पूर्वविधावित्यस्य। अचः परस्मिन्नित्यस्य पूर्ववाक्यस्थस्यतत्रानुवृत्त्यैव वाक्यार्थपर्यवसानसम्भवात्‌। प्रत्यैषिषन्निति· वीगतीत्यत्र प्रश्लिष्टस्यैकारात्मकधातोः सन्नन्तस्य रूपम्‌। अत्र श्यैकादेशस्य स्थानिवत्त्वान्नजुस्‌। अत एव· पञ्चमीसमासाश्रयणादेवः इत्युक्तमिति· सिद्धान्तिनेत्यादिः। तिनः उभेग्रहणेन। इत्यर्थेपि· इत्यर्थे स्वीकृतेपि। नत्सिद्धौ· ऐत्संन्नित्यस्य सिद्धौ अनित्यत्वं सूचितमिति· निष्ठायां सेटीति सूत्रे सेङ्ग्रहणात्‌। तद्धि कारितमित्यादौ विटि कृते एव णिलोपो न तु ततः प्रागित्यर्थम्‌। अन्यथा एतेनाद निष्ठाया असम्भवेन निटि णिलोपो माभूदित्येतत्तात्पर्यकत्वेन तस्य वैयर्थ्यापत्तेः इटि कृते एवेत्यवधारणफलं तु पदीदः प्राङ्‌· णिलोपः स्यात्तदा तु दात्तोदेकाचः कृतः परत्वादिटो निषेधः स्यात्स माभूदिति। अयञ्च पञ्चमीसमासस्यानित्यत्वाभावे जातेपि णिलोपे पञ्चमीसमासेन वारयितुं शक्यत इति कालावधारणं वैयर्थ्यस्य स्पष्टमेवानवज्ञये· सनीवन्तेतीड्विकल्पात्तनो निष्ठायां यस्य विभाषेति सूत्रेण णिषेधास्त्रिसम्भवइति वाच्यम्‌। दरिद्रितइस्येतत्सिद्धयेयस्य विभाषेति सूत्रे एकाच इत्यनुवर्तेः। अनि

त्यन्विज्ञापकान्तरमाह प्रविगण्य्येतीति· अत्रादन्ताच्चुरादेर्गणधातोः क्त्वाप्रत्ययेसमासेल्यपिलघुपूर्वादितिणेरयादेशप
ञ्चमीसमासस्यानित्यत्वेनस्यात्।अपिनापूर्वोक्तज्ञापकसमुच्चयः।अतएव·अनित्यत्वादेव।नमाननमिति·वाच्यञ्ज्यानादृश्य
र्थीलाभात्।यत्तुप्रविगण्य्येतिभाष्योदाहरणेलघुपूर्वत्वंव्यपदेशिवद्भावेनणेर्जातस्यलोपस्यस्थानिवद्भावेसतितस्याका
रस्यैवेतिततःपरत्वाल्ल्यावादेशोभविष्यत्यतो॰नित्यत्वफलंचिन्त्यमितितन्नः प्रदिधिषप्येत्यत्ररिधिपूशब्दादाख्यानणि
जन्तात्क्त्वाप्रत्यये प्रशब्देनसमासेपञ्चमीसमासानित्यत्वपक्षेलघुपूर्वषकारात्परत्वाद्भवति।यस्यस्थानिवद्भावस्तस्यै
वव्यपदेशिवद्भावेनलघुपूर्वत्वम्प्रकृतेनवकुमप्यकामूकारस्यदीर्घत्वादित्याशयात्।मूलेऽड्व्यवायइत्येवेति·अव्यवधा
नाभावेनरषाभ्यामितिसूत्रेणनकिन्तुरषाभ्यामित्यनुवर्त्तमानेऽट्कुप्वितिसूत्रेणनचरषाभ्यामितिसूत्रेषग्रहणस्यैवंस
तिवैयर्थ्यमितिशङ्क्यम्।पुष्णातीत्यत्रचारितार्थ्यात्।यत्तुनसदोषडइतिवचनमपिनमुनेडइतिसूत्रेक्तृप्तयोगविभागा।
ल्लभ्यमितितन्नेतिदूषयतिनमुनेडुतीति· अतएव·योगविभागस्यभाष्यासम्मतत्वादेव·सिद्धकाण्डम्।सिज्लोपएका
दशाइत्यादि· वैयर्थ्यायत्तेरिति।शाकादीनामपिशब्दात्वात्।नचसुप्त्विनसादृश्यवादिमतेपिनलुमतेतिनिषेधानित्यत्वे
नमांसस्यचनीत्यादौखलुच्छोकइत्यादेरपिसिद्धिर्भविष्यतीतिवार्शिकित्यादिव्यर्थमितिवाच्यम्· त्रानित्यस्यापिवचनस
पत्रसाधकत्वात्राप्रवृत्तिरित्यभिप्रायेणवाशोकेत्यादिवचनाचारितार्थ्यात्।अन्यत्र·शास्त्रभृतिभिन्नेतेनपदङ्घ्रिरितीति·
अत्रपादशब्दस्यपदादेशः।तत्रशङ्कते।नचकोशस्थेति·भाष्यरीत्याअनादेशत्वात्।अस्यकिन्तुप्रकृत्यन्तरत्वमेषामितिशि

षः। तत्त्वेपि· अनादेशत्वेपि। अत एव पादहृदयशब्दयोः पद्हृच्छब्दरूपादेशे सुनिमित्तके कृते सन्निपातपरिभाषया
सुलोपो न स्यादिति पदङ्घ्रिश्चरणाद् इति स्वान्तं हृन्मानसमित्यसङ्गतमिति पूर्वपक्षस्यानवसरः। केचित्तु शब्दत्वेनैव सा
दृश्यम्। ननु मतेति निषेधस्यानित्यत्वादप्रवृत्तिकल्पनापेक्षया सादृश्यप्रयोजकव्यापकधर्मकल्पनायां गौरवाभा
वात्· एवं सति पदादीनामादेशत्वमेव। हृदयस्य हृदिति सूत्रन्तु नित्यार्थम्। वाशोकष्यञ्ञिति तु नियमार्थमेवेवो
भयोः स्थान्यादेशयोः प्रयोगोऽन्यत्र स्थानिन एवेति। एवं नासिकाया नसित्यपि नित्यार्थमेव तेन नासिकाक्षुद्र इति न
। न च पद्दन्न इति सूत्रे सुप्रभृतिष्विति स्येवास्त्विति वाच्यम्। असृक्पद्हृच्छकृच्छब्देभ्यः। सोरन्तरङ्गानपीति न्यायेन लु
क्कृते स्वादिपरत्वाभावेनादेशाप्रवृत्तेरित्याहुः। अत्रेदञ्चिन्त्यम्· शासः सुपञ्ज्ञायाः शास्त्रीयतया तेन रूपेण सादृश्यक
ल्पनापेक्षयाऽशास्त्रीयेन शब्दत्वेन सादृश्यकल्पनेऽक्लृप्तकल्पनाप्रयुक्तं गौरवं स्फुटमेव किञ्च वाशोकेत्यस्य नियमा
र्थत्वकल्पनापेक्षया विधायकत्वे लाघवमेव एवञ्च भाष्यरीत्या प्रकृत्यन्तरत्वकल्पनमेव समुचितमिति· ननु कोश
पठितानां शब्दानां लोकप्रसिद्धशब्दानुकरणत्वेन तेष्वादेशस्य प्रवृत्तिर्नोचिता। एवञ्च पदङ्घ्रिरित्याद्युपपन्नये
सादृश्यप्रयोजकधर्मचिन्तनमयुक्तमत आह· कोशे शब्दा इति अर्थपराः। अर्थविशिष्टशब्दपराः। नत्वनुकर
णानीति शेषः। ननु तत्तदर्थनिरूपितशक्तिग्रहस्य कोशाधीनत्वं सुप्रसिद्धन्तच्च नोपपद्यते। अर्थानां शक्तिग्रहा
भावादनुपस्थितेरत आह· शक्तिग्रहस्त्विति· यदा विष्णुर्नारायण इत्यादिशब्दघटितकोशजन्यबोधविचारस्त

दानद्वदकमेकं विष्णुपदं पक्षीकृत्यानुमितिः कल्पनीयाद्दं विष्णुपदम्। अर्थवाचकम्। साधुपदत्वात्। गोपदव
दित्येवं रीत्या साध्यकल्पनयाऽनुमित्या सामान्यतः सामान्यधर्मावच्छिन्नविधेयताकत्वा॥ अयमभावः। अर्थवाच
कत्वे साधुपदत्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वावगाहिव्याप्तिज्ञानेनार्थवाचकत्वत्वेन्यापकताव
च्छेदकत्वावगाही साधुपदत्वत्वे व्याप्यतावच्छेदकत्वावगाही परामर्शो जन्यते। ततो विष्णुपदमर्थवाचकमित्या
कारानुमितिः। ततोऽर्थो विष्णुपदवाच्य इत्याकारकमानसंज्ञानम्। ततस्तादृशः संस्कारः। ततोऽर्थविशेष्यकविष्णु
पदवाच्यत्वप्रकारिकास्मृतिर्विष्णुपदोच्चारणे सति तादृशोद्बोधकवशाज्जन्यते। एवमेव नारायणपदादपि ततः समा
नविभक्तिकत्वरूपाकाङ्क्षाप्रकारकपदविशेष्यकज्ञाने सत्वे प्रतिबन्धकाभावे विष्णुपदवाच्याभिन्नो नारायणपद
वाच्य इत्याकारकः शाब्दबोधस्तदाह· एवञ्चेत्यादिना· ननु पर्यायशब्दरूपप्रतिपादनपरे रुक्तनिर्विशेषिययापदा
नां स्वरूपपरत्वं तथा कीशिष्यंपेक्षितमत आह· अध्येदेवीति· तदसङ्गतिः। प्रत्युदाहरणासङ्गतिः। एतेन पर्यायशब्द
स्वरूपप्रदर्शकवाक्यघटकशब्दानामर्थपरत्वे भाष्यसम्मतिरुद्भाविता। एकशेषस्तर्हि विरूपाणामित्यनेन स्यादत
आह· एकशेषस्त्विति· पूर्वोक्तार्थे सूत्रसम्मतिमाह· अत एवेति· तादृशतात्पर्यादेव। एवञ्चायत्तदेतेभ्य इति निर्दे।
शो विरूपाणामपीत्यस्यानित्यत्वे ज्ञापक इति द्रष्टव्यम्। तथा चोक्तममरसिंहेन। भेदाख्यानाय न द्वन्द्वो नैकशेषो न स।
ङ्करः कृतोत्र भिन्नलिङ्गानामनुक्तानां क्रमादृते इति। भेदस्य लिङ्गभेदस्य लिङ्गविशेषस्याख्यानाय द्वन्द्व एकशेषश्च न

कृतः। यथाह्लादिनी वज्रमस्त्री स्यात्कुलिशम्भिदुरम्पविरिति। तथा स्वरूपभेदप्रतिपादनाय समानलिङ्गानामपि तैर्न
कृतो। यथा विष्णुर्नारायण इत्यत्र। तथा सम्बन्ध्यर्थविशेषभेदेन भिन्नानां भेदाख्यानाय सङ्करेण कृतः। स्वसम्ब
न्धिनाम् भूमिसम्बन्धिनाञ्च स्वरादिवर्ग इति रीत्या पृथङ्निर्देश एव कृत इति। एतदपवादमाह· क्रमादृते इतियत्र॥
स्त्रीपुन्नपुंसकानां क्रम एव विवक्षितस्तत्र सङ्करो भिन्नलिङ्गानाम्मिश्रणारूपः कृत एव· यथा स्तवः स्तोत्रं स्तुतिर्नुति
रिति। प्राचाम्मतं खण्डयति। एतेनेति· पूर्वोक्तव्याख्यानेन। अत एव· शब्दपरत्वेन भिन्नार्थत्वादेव। अभियुक्तोक्तं प्राक्
ग्राहकत्वमुपपादयति·। एतदिति· प्रकारार्थत्वाभावेपीति· यद्यत्र श्रूयमाणपदादीनां शास्त्रनिष्पाद्यत्वं स्यात्तदा प्र
कारार्थकतां विना निर्वाहो न स्यात्तदेवतु न किन्त्वनुकरणत्वन्तथा चात्रो भादुदात्त इतिवच्छास्त्रस्य न प्रवृत्तिरिति
भावः। षष्ठ्यन्तत्वलाभायेति· एवञ्च सङ्ख्यादिपूर्वस्योत्तरपदस्याहन शब्दस्येत्यर्थः सम्पद्यते। ननु विज्रुपेश
छन्दसीति सूत्रे छन्दसीत्युपादानाद्धि च छन्दस्येवेति कथं विश्वपाशब्दस्य लोके साधुत्वमत आह· सन्त्वेति· न
हि कीलालपआगतमिति वाक्यं छन्द इति भावः। क्विविषये विशेषमाह· क्विपस्त्विति· अत एव· अन्यत्रानभिधा
नादेव। अत एव· संस्थेत्यादिषु क्विपोऽभावादेव। केचिदिति· इत्वमनकारादायिति वार्तिकविद्वेषिणः आहुरिति·
इत्वमवकारादावित्यनेनावंवारयितुं शक्यमिति भावः। यद्यपि वकारादि प्रत्यये परे मास्थेति त्वं वचनेन चेन्निवा
र्यते तदा वार्तिककारमते प्रत्ययलक्षणसूत्रस्य विध्यर्थत्वेपि पृथ्व्यामिति प्रत्ययव्यावृत्त्या पदस्याक्विपापि साधनं

भै॰
१२०

सम्भवति। तथापि विवृतः प्रथमोपस्थितत्वात्स एवोक्तः। ननु प्रथमयोरिति सूत्रानन्तरं लाघवाद्दीर्घाच्छसीति सू
त्रमस्त्वित्यत आह॰ दीर्घाच्छस्येवेतीति॰। विपरीतनियमापत्तेरिति॰ अत्रेष्टापत्तिः कर्तुमशक्या। तस्मादिति सूत्रए
वभाष्यकृत्कृतभ्रुक्तं सान्यश्यकुण्डिनान्यश्येति प्रयोगासङ्गत्यापत्तेः। विश्वपाशब्दाद्विचिविधिशास्त्रस्य सिद्धा
न्तरीत्याप्राप्तिमुद्भावयति। प्रत्याहारेष्विति॰। व्याप्यत्वादिति॰ लक्ष्यस्योद्देश्यतावच्छेदकाक्रान्ततया निषेधाश्चेति
न्यायेन दीर्घादिति सूत्रप्रवृत्तेर्व्याप्यत्वादित्यर्थः। सातिति प्रत्युदाहरणमिति॰ हाहाशब्दस्तु हाहइत्येवंरूपम्।
लोपइष्ट एवेति॰ वार्तिकैकवाक्यत्वात्। आवन्तनिवृत्त्यर्थमेवेति॰ रमाः पश्येत्यादौ। नन्वेवमावन्तादाचारक्विबन्ता
त्कर्तरि क्विपि धातुत्वात्सूत्ररीत्यालोपः प्राप्नोति। वार्तिककारमते तु नेति फलभेदोऽस्त्येवेत्यत आह॰ आवन्तेति॥
अत एव॰ यदभावकल्पनेनानुपपत्तिपरिहारस्तदभावकल्पनादेव अधात्ववपवाकारान्तानामिति॰ हाहाशब्दा
दीनाम्। एतेन॰ स्वारसिकपूर्वोक्तप्रयोगविरोधेन। इतिघवर्त्तनइति॰ नच पूपदं तत्रत्यन्दीर्घवोधकमिति ह्रस्वपदा
र्थेनानन्वयइति वाच्यम्॰ अनुवृत्तस्य पूपदस्य षष्ठ्यन्ततया विपरिणामेन य्वोर्यौ ह्रस्वौ तदन्तमित्यर्थात्। गुणः कृतात्म
संस्कारइति न्यायात्॰। नन्वेकसञ्ज्ञाधिकारादित्यनुपपन्नम्। आकडारादिति सूत्रस्य सञ्ज्ञाप्रवृत्तिव्यवस्थापकत्वा
दित्यत आह॰ कडाराइति॰ एवञ्चाधिकारपदस्य बुद्धिस्थपरम्। एकासञ्ज्ञेत्यस्य बुद्धिस्थत्वादित्यर्थः। पद्यप्यसखीति प
र्युदासबलेन शब्दस्वरूपस्य विशेष्यस्य लाभो भवति। तथापि पर्युदासलभ्यस्य विलम्बितोपस्थितिकतया रूढितिवि

राम
१२०

शेष्यत्वाभावार्थमिति फलितन्तदाह॰ स्पष्टतपेति॰ यन्तु मत्यै इत्यत्रानवकाशत्वान्नदीसञ्ज्ञैव भविष्यतीत्युक्तम्।तच्चा
युक्तम्।असखीति पर्युदासात्सखिशब्दे समासाघटके गवां पत्यै स्त्रिपे इत्यत्र पतिशब्दे पतिः समास एवेति नि
यमाद्घिसञ्ज्ञाया अप्राप्त्या नदीसञ्ज्ञायास्तत्र चारितार्थ्यादिति तन्न॰ इकारांशे चारितार्थ्येप्युकारांशे चारितार्थ्याभा
वान्ङिति ह्रस्वश्चेति सूत्रेणोकारस्य स्त्रियां वर्तमानस्य नदीसञ्ज्ञा भविष्यतीति घिसञ्ज्ञासूत्रे उकारस्यानदीसञ्ज्ञा
कस्यैव ग्रहणन्तत्साहचर्यादिकारस्यापि तादृशस्यैव ग्रहणं भविष्यतीति शेषग्रहणम्व्यर्थमित्याशयात्।परन्तु
साहचर्यं गौणतादृशार्थकल्पने क्लेश इति स्पष्टप्रतिपत्तये शेषग्रहणम्।मात्रे इतीति॰ ननु यूग्रहणानुवृत्त्या वृका
रान्तमात्रस्य घिसञ्ज्ञायां घेर्ङितीति गुणे सिद्धे ऋतो ङीति सूत्रेण ङौ गुणविधानं घिसञ्ज्ञकस्य ङिति गुणो नेत्यर्थज्ञा
पकम्भविष्यतीति मात्रे इति रूपमन्यथासिद्धं किन्तु।पित्रा इत्यत्र नाभावापादनमेव कर्तुमुचितमिति चेन्न॰ ङौ गुण
विधाने नैवं ज्ञाप्यवचनकल्पनायां घेर्ङितीति शास्त्रस्य बाधकल्पनास्यान्तदपेक्षया तेन घिसञ्ज्ञासूत्रे पूग्रहणमनुव
र्ततेइत्येवं ज्ञापनीयं लाघवादेवञ्च मात्रे इत्यत्र गुणाभावस्य पित्रेत्यत्र नाभावस्य च सिद्धिर्भविष्यतीत्याशयादाह॰।
ऋतो ङीतीति॰ पदलाघवाभिप्रायेण शङ्कते।पुंसीति त्विति॰ ननु नमुन इति सूत्रे नकाराकारउच्चारणार्थः।नकार
मात्रे विधायकतायाः नुम्विषये पर्यवसानेपि साक्षान्नथानुच्चारणादतो नकारपदस्य नकारघटिते लक्षणा भविष्य
तीति नापन्दोष इत्यत आह॰ नमुन इति निषेधस्त्विति॰ वार्त्तिकविरोधादिति॰ टायाङ्मादेशस्थायामादेशादेश इति च

तदर्थेइनिवार्तिकप्रदर्शनपरभाष्यविरोधापत्तेरित्यर्थः।नुमिकर्त्तव्येमुन्त्वस्यनिषेधोनेत्यत्रसूत्रसम्मतिमप्याह·
अतएवेति· तन्नात्यर्थकत्वेलाघवान्नीत्येववक्ष्यतीतिवहूदेत्।नीत्यस्यनकारसम्बन्धिनीत्यर्थसम्भवात्।नारतिनि
र्देशेप्युभयत्राभइतिचेन्नत्राह· आगन्तुनेति· एकस्यैवनेशब्दस्यसूत्रस्थस्यतादृशशब्दद्वयोपस्थापकत्वतात्पर्येण
निर्देशकल्पनातनस्तादृशशब्दद्वयोपस्थितिकल्पना।तयोर्मध्येएकत्रागन्तुकाकारकल्पनाततोनकारमात्रोपस्थि
तिरेकत्रा अत्रनाइतिशब्दस्येतिरीत्याज्ञानगौरवमित्यर्थः नत्वस्यङस्येत्वमिति· नचशब्दार्थयोस्तादात्म्यादाङ्शब्द
स्यऔङ्शब्दस्यचप्रत्ययमात्रबोधकतयाव्यवसितान्यत्वान्ङकारस्येत्सञ्ज्ञाप्राप्नोतीतिवाच्यम· धातुप्रत्ययेत्यत्रप्रत्य
यपदस्यप्रत्ययाधिकारपठितप्रत्ययसमानानुपूर्वीकशब्दपरत्वात्।यद्यत्रेत्सञ्ज्ञाप्रवृत्तिःस्यात्तदासामर्थ्यात्तदुपस्था
प्येइत्वप्रयुक्तकार्यंस्यात्तदाह·अतएवेति·इत्वाभावादेवेत्यर्थः।नगुणाइतिः घेर्ङितीतिसूत्रस्यङितिगुणाइत्यर्थकत्व
मितिवादिमतरीत्यागुणप्राप्तिर्बोध्या अतएवः औङोपिङकारस्येत्वाभावादेव।नन्नुरमेस्यत्रावश्यंयादिप्राप्तेशीभावः
आरभ्यतेऽतोऽपवादेशीभावेकृतेनयाटःप्राप्तिरित्यतआह· वार्तिकमतेपीति असम्भवेएयापदत्वमितिहितन्मतंसम्वा
सम्भवः।प्रकृतेनास्तीतिभावः।घेर्ङितीति· एतत्सूत्रभाष्योक्तरीत्याऽनुवर्तमानस्यङीत्येतद्विशेषणमस्तु।यस्मिन्विधिरि
तिपरिभाषयाङकारादावित्यर्थोस्तु।एवञ्चाङइत्यत्रौङइत्यत्रचङकारस्येत्सञ्ज्ञास्वीकारेपिनक्षतिः।इदंसूत्रञ्चघे
र्ङीत्येवास्तु।आङयाजितिवार्तिकेचङाइत्येवास्तु।तेनप्रवाहवाइत्यत्रगुणस्यसिद्धिः।नचमस्यामित्यादौङेरामादेशेआ

णनद्याइत्याणनस्यान्नङादित्वाभावात्। आत्रापिङीत्यस्यानुवृत्त्याङ्कारादित्वस्याल्विधित्वात्। नचेष्टापत्तिः। ह्रस्वनद्याप
इतिनुडापत्तेः सिद्धान्तेतु येननाप्राप्तिन्यायेन नुड्बाधके आमि कृते परिशेषात्तत्र षष्ठीबहुवचनस्य ग्रहणमिति
सिध्यति। नचङेराम् इति सूत्रे पिङ्ङीमित्येवास्तु एवञ्चैतस्य स्वतोङादित्वान्न स्थानिवद्भावोपयोग इति वाच्यम्।
ङ्ङीमाटे शे कृते लशक्वितीत्संज्ञाया आङागमस्य च प्राप्तौ वार्णपरिभाषयेत्संज्ञाम्बाधित्वा आट् स्यात्। ततश्च प्रत्य
यादित्वाभावान्ङकारस्येत्त्वानापत्तेः। अतएवान्तरङ्गत्वान्ङकारस्येत्संज्ञालोपाभ्यां माटः पूर्वम्प्रवृत्तिर्भविष्यतीत्य।
पिनिरस्तम्। वार्णपरिभाषया अन्तरङ्गपरिभाषाया बाधत्वादित्यादिकन्दिगित्यनेन सूचितम्। अस्वरितत्वादिति। यथा
सङ्ख्यसूत्रे स्वरितेनेत्यस्य सम्बन्ध इति भावः। स्पष्टार्थमिति। यथासङ्ख्यसूत्रे शब्दतः सङ्ख्यासाम्यन्नार्थत इत्येतस्य
स्पष्टतयाज्ञापनार्थमिति केचित्। तन्न। यथासङ्ख्यसूत्रभाष्ये किमुदाहरणमिकोयणचीति कथितन्नद्विरोधात्। इदुद्भ्या
मिति किमिति। अनुवृत्तिप्रयोजनप्रश्नः। ङेरित्यस्य षष्ठ्यन्तत्वात्तत्साहचर्याद्धेरित्यस्य षष्ठ्यन्तत्वसम्भावनया आङ्ङिप्र
कृतेरिति। तत्वप्रतिज्ञयेति। मुखसुखार्थम्प्रतिज्ञयेत्यर्थः। अतएव तकारस्येत्संज्ञासत्त्वादेव। प्राचीनोक्तं खण्डयति।
यदित्विति। स्वभाववादस्येति। परार्थत्ववादस्येत्यर्थः। उभयत्र मुखसुखार्थं इत्संज्ञके च। समत्वादिति। यथोच्चारणार्थो
नामितरोच्चारणे साहायकत्वन्नत्वेत्संज्ञकानामपि स्वसम्बन्धिनः परिनिष्ठितरूपसाधने सहायकत्वमित्यर्थः। नचैवमि।
ति। अस्य परेणावाच्यमित्यनेनान्वयः। एवम्। उच्चारणार्थकानामपि लोपफल [illegible] कारो। नप्रवृत्तिः। तित्स्वरितमित्यस्य प्रवृत्तिः

भै॰
१२२

ध्वनितइति· तत्रहिश्रान्तलोपइत्यत्रभ्रमः शकाराभावेनान्तलोपइत्येवास्तुइतिपूर्वपक्षेनन्दितेत्यत्रप्रसक्तातिव्याप्तेः।
ङ्किःतीत्यनुवृत्त्याचारणेनन्दमानइत्यत्रातिव्याप्तिरित्युक्ताएवन्तर्हिनशब्दएवङ्कितीत्यनेनविशेष्यते। ङ्कितोनशब्दा
दितिविभक्तिविपरिणामेनोक्तम्। यदीयम्परिभाषास्यात्तदाऽनयैवनन्दमानइत्यत्रदोषाभावेसिद्धेविपरिणाभक्लेशो।
व्यर्थः स्यादितिरीत्यापरिभाषाभावोध्वनितइत्यर्थः। प्रत्ययपदस्यविधानकालिकप्रत्ययत्ववतिलक्षणयाबीजमा
ह· अतएवेति· तादृशार्थेप्रत्ययपदलक्षणासत्वादेव। सावितिसप्तमीबहुवचनस्यग्रहणमितिशङ्कांव्युदासायाह· सा
विती ति· अन्यस्यालोऽवधित्वादलत्वेनरूपेणतत्सजातीयोऽवधिमान्गृह्यतइत्याह· अवध्येति· अतएव· अलएवावधि
मत्वादेव। सञ्ज्ञाविधानमदृष्टार्थमिति· नचवर्णग्रहणेचसर्वत्रेतिहल्ग्रहणस्यसुतिसीत्येतद्विशेषणतयाहलन्तानाम्।
स्वादीनाङ्ग्रहणेहन्यादित्यत्रलोपापत्तिस्तद्वारणायाभेदेनलोपनीयविशेषणार्थंनपृक्तग्रहणमस्त्वितिवाच्यम्। अपृक्त
सञ्ज्ञाविधानाभावेपिसिद्धन्तुविशेषणविशेष्ययोर्यथेष्टत्वादित्युक्तत्वेनलाघवात्स्वादीनांविशेषणत्वेनैवातिप्रसङ्गवा
रणेतेषांविशेष्यत्वंस्वीकृत्यअधिकोपादानमयुक्तमित्याशयात्। विशेष्यत्वेनेति· हल्ग्रहणस्यतद्विशेषणत्वेनेतिशेषः
द्विधातदुपस्थित्या· परिभाषोपस्थित्या। अतएवपरमस्वद्वाइत्यादौसुलोपसिद्धिः· तदन्तविधिद्वयाभावेसुतिसीनांयतोवि
धानन्तदादेरावन्तादित्यर्थस्यन्यायप्राप्ततयाऽत्रसुलोपोनस्यादितिभावः। इत्यारभ्येति· अस्यउक्तइतिशेषः। अन्यथाउत्तरका
लिकक्रियान्वयाभावाल्ल्यपोऽसाधुत्वापत्तेः। तस्यैव· नान्तलक्षणदीर्घस्यैव। खिरखीतितीशब्दप्रकृतिकः। तदवयवेकार।

राम
१२२

स्थानिकः। अत्रपक्षे· वर्णस्यसञ्ज्ञापक्षे। सिद्धान्तार्थमाह· यस्येतिचेतिसूत्रेत्ति· पिण्डग्रहइत्यादिसिध्यर्थमिति·
अन्यथापिण्डग्रहइतिसमुदायस्यधातुभिन्नत्वाद्दीर्घःस्यादितिभावः इतश्चप्रत्ययादितिवदिति· एतेनगुणाःकृतात्म
संस्कारइतिन्यायसञ्चारःसूचितः। यदुक्तंयस्येतिचेतिसूत्रभाष्यात्वितितद्दर्शयति· तत्रहीति· अस्यइत्युक्तमित्यत्रान्व
यः। अत्रार्थेभाष्यान्तरमपिसाधकमित्याशयेनाह· ख्यत्यात्सूत्रइति· ननुविकृतनिर्देशाभावेप्यतिसखेरित्यत्रलाक्ष
णिकत्वात्सखिशब्दस्यनोत्वनिमित्तत्वसम्भवइत्यतआह· विहितवीति एतेनलक्षणप्रतिपदोक्तपरिभाषयायथा
सखीतिनिषेधोनप्रवर्त्ततेतथासखिपतिभ्यामित्युच्यमानेनातिसखइत्यत्रातिप्रसङ्गइतियस्येतिसूत्रभाष्यख्यत्या
त्सूत्रस्थभाष्यविरुद्धमितिविरोधोद्भावनन्निरस्तम्। अलमिति· अनेनान्यदपिसूचितम्। तथाहि· लोपाभावेप्यतिसखे
रित्यत्रपूर्वान्तवद्भावेनसखिशब्दत्वेपिस्वाश्रयसख्यवयवभिन्नत्वमाश्रित्यघिसञ्ज्ञेतितुनयुक्तम्। अतिदिश्यमा
नधर्मविरुद्धस्वाश्रयधर्मप्रयुक्तकार्याभावस्यातिदेशस्वभावसिद्धत्वात् किञ्चपूर्वान्तवद्भावेनविशिष्टसखिशब्दत्वा
तिदेशेतदवयवेकारेसखिशब्दावयवत्वमर्थसमाजग्रस्तमितिसञ्ज्ञानस्यात्। किञ्चलिङ्गविशिष्टपरिभाषायाःप्र
कृतेनप्रवृत्तिः। विभक्तौलिङ्गविशिष्टाग्रहणमितिपरिभाषयानिषेधात्। एवञ्चातिसखिशब्देघित्वन्नभवत्येवेति
अत्रप्राचीनानुयायिनः। यद्विसख्यवयवभिन्नयोरिदुतोस्तदन्तस्यवाघिसञ्ज्ञातदाख्यत्यादितिसूत्रस्थभाष्यविरोधः
तत्रहि। अतिसखेरित्यत्रमाभूदितिविकृतनिर्देशप्रयोजनकथनावसरेऽतिसखेरितिगुणघटितप्रयोगोदृश्यतेस॥

भवन्मतेनोपपद्यते।ननुतदपिङ्यन्तप्रतिक्रमसखीतिपर्युदासस्तुनप्रवर्ततेलाक्षणिकत्वादितिचेत् एवंसतिसखि
पतिभ्याममितिनिर्देशेप्यतिव्याप्तिर्वारयितुंशक्यते।तेनोत्त्वेकर्त्तव्येलक्षणप्रतिपदोक्तपरिभाषानप्रवर्त्ततइतिवक्तुमशा-
क्यम्।एकस्मिन्नेवप्रयोगेतस्यैवपरिभाषायाःप्रवृत्त्यप्रवृत्त्योर्विरुद्धत्वात्।किंचसखिशब्दस्यसख्यमवयवेलक्षणा-
कल्पनेगौरवम्।भाष्योक्तंयस्येतिचेतिसूत्रस्थंत्वेकदेश्युक्तिः।तत्रहिःइवर्णस्यईतिकिमुदाहरणम्।हेदाक्षि।दाक्ष्यादाक्षे
यः।आद्येदाक्षिईसुइतिस्थितेशब्दपरविप्रतिषेधेनदीर्घात्पूर्वंह्रस्वत्वंनतोदीर्घेसतितस्यैवश्रवणप्रसङ्गः।नचान्तरङ्गंदी-
र्घत्वम्।वार्णकार्यस्याबलवत्त्वेनह्रस्वत्वस्यैवप्राप्तेः।द्वितीयेदाक्षिईआइतिस्थितेशब्दपरविप्रतिषेधेनयणादेशेपरस्यकृ-
तेपूर्वस्येकारस्यश्रवणप्रसङ्गः।सवर्णदीर्घेकर्त्तव्येयणादेशस्यस्थानिवत्त्वंवक्तुमशक्यम्।पूर्वपरविधित्वात्।न
चपणिकर्त्तव्येस्थानिवत्त्वम्।वरईतीकारप्रश्लेषेणोकारनिमित्तकविधिम्प्रतिनस्थानिवदितिनिषेधादितितस्याश-
यः।नत्वयंसिद्धान्तःफलाभावात्पञ्चम्याम्व्येत्यचःपरस्मिन्नितिसूत्रस्थभाष्योदाहरणसङ्गत्यापत्तेश्च।तृतीयेदाक्षि
ईइतिस्थितेस्त्रीभ्योढगितिढकिपरस्यलोपेपूर्वस्यश्रवणप्रसङ्गः।तद्धितनिमित्तकः।पूर्वस्यलोपस्तुवक्तुमशक्यः।पर
लोपस्यस्थानिवत्त्वात्।एवंसिद्धान्त्येकदेशिनीक्तेपूर्ववाद्याह नैतानिसन्तिप्रयोजनानि।सवर्णदीर्घत्वेनाप्येतानिसि-
द्धानि।अत्रकैयटः।पश्चाङ्गवार्णयोर्युगपत्प्रसङ्गस्तत्रवार्णपरिभाषाप्रसङ्गः।अन्तरङ्गम्बलीयइत्येतदपवादत्वात्।
यद्यपिहेदाक्षीत्यत्रपदस्यविभज्यान्वाख्यानेऽस्तियुगपत्प्राप्तिस्तथाप्यत्रक्रमेणान्वाख्यानमेवकल्प्यतइत्याशयः।

यणाढकौत्वाङ्गावेवनभवतः। ततः पुनः सिद्धान्त्येकदेशिनोक्तम्। अतिसखेरागच्छति। अतिसखेः स्वमिति। अस्याप्ये
कदेश्युक्तित्वंप्रागुपपादितमेवेत्याहुः। अत्रेदमवधेयम्। यदिसखिशब्दस्यतद्वपवेलक्षणायाम्भाष्यान्तरविरोधः
स्यात्तदाऽस्यभाष्यस्यैकदेश्युक्तित्वन्नथातुनदृश्यते। किञ्चभाष्यकारस्यैवर्णस्येतिपरेल्लोपइत्यस्येदमुख्यमेवोदाहरणं
मित्यभिप्रेतमितिप्रतीयते। यथाहेदाक्षि। दाक्ष्या। दाक्षेयइतिप्रयोजनत्रयंव्युत्पाद्यनैतानिसन्तिप्रयोजनानीत्युक्तन्त
याऽतिसखेरागच्छति। अतिसखेः स्वमितिप्रयोजनकथनोत्तरमेतदपिनप्रयोजनमितिनोपन्यस्तम्। किन्तुइदन्तर्हि
प्रयोजनमितिप्रदर्शितम्। तेनास्यसिद्धान्त्युक्तित्वमेवप्रयोजनान्तरन्त्वनोपन्यस्तम्। ख्यत्यात्परस्येतिसूत्रेप्येवमेवप्र
योगः कृतस्तन्द्धनप्रकृतिकएवायम्। उक्तभाष्यदृष्टप्रयोजनाद्यविहितविशेषणानाश्रयणाल्लक्षणप्रतिपदोक्त
परिभाषायाश्चाप्रवृत्तिरपितात्पर्यविषयैव। अतएवख्यत्यात्परस्येतिसूत्रेसखिपतिभ्यामित्युच्यमानेइहनस्यात्। स
खीयतेः क्यप्रत्ययः। सख्युः पत्युरिति। व्याख्यातञ्चकैयटेन। विद्यमानंस्वमस्यसस्वः तमिच्छत्यात्मनइतिक्यच्। क्य
चिचेतीत्वम्। यदिलक्षणप्रतिपदोक्तपरिभाषाप्रवृत्तिर्विवक्षितास्यात्तदात्राव्याप्तिः। स्फुटैव। नचयस्येतिसूत्रेणाई
तिपरेयदीवर्णलोपोनस्यात्तदाङ्घन्स्यसखीशब्दस्यसखीसख्याविति प्रयोगोदृश्येतेनतयोरुपपत्तिर्नस्यात्। सख्यशि
श्वीतिङीषिसवर्णदीर्घएकादेशेपूर्वान्तवद्भावेनानङ्णिट्वद्भावयोः प्रवृत्तिप्रसङ्गादितितस्याकथनेनन्यूनतेतिवाच्य
म्। प्रकृतभाष्यस्योपलक्षणत्वादिति। इष्टतोऽवधारणार्थइति। एवकाराभावेपतिशब्दएवसमासेघिसञ्ज्ञइत्यपिनिय
माकारः स्यात्तथाचातिसखेरागच्छति। अतिसखेः स्वमितिप्रयोगविरोधः स्पष्टएववेति समासएवेतिनियमेसीनायाः

पतयेनमः नष्टेमृतेप्रव्रजितेक्लीबेचपतितेपताविस्यादिस्मृतिपुराणीयप्रयोगविरोधम्परिहरति। स्मृतिपुराणेष्विस्यादिना
पतिरित्याख्यातः। पतिरित्येवंरीत्याप्युपपत्तिरन्यत्रस्फुटा धात्वादेरितिनिर्देशाद्विपरीतनियमोनेत्याश्रयणेतुप्रतिपत्तिगौ
रवम्। वहुच्पूर्वेऽतिप्रसङ्गस्तस्यालक्ष्यत्वेसम्भवतितत्रैवकिम्मानमतआह· अतएवेति· तस्यालक्ष्यत्वादेव। प्पतिशब्दस्यप
त्यवयवेकारलाक्षणिकत्वेमानमाह· एतेनेति· सुपतिनासुसख्याइत्यादौष्टेनिशेषोघ्यसखिपतीतिन्यासेसुपतिनेत्यस्यसा
सिद्धिः। पत्तिसखीसमासस्येतिनियमेसुसख्येत्यस्यासिद्धिर्वोध्या। कतिशब्दस्यनित्यवहुवचनान्तत्वोपपत्तिमाह· किमःस
ङ्ख्येत्यादि· भाष्येस्पष्टत्वादिति· तत्रहिकिमेतत्परिप्रश्नेवर्तते। परिप्रश्नश्चानिर्ज्ञाते। अनिर्ज्ञातञ्चवहुष्वेवभवति। द्व्येक
योःपुनर्निर्ज्ञातमेवेत्युक्तम्। एवञ्चवहुत्वावच्छिन्नस्यात्रनियमेनोपस्थित्यावहुवचनान्तत्वन्न्याय्यमेवेतिभावः। नत्र
वृत्तिरिति· उभयगतिरिहभवतीतिपरिभाषासत्वात्। अतएव· तादृशपरिभाषासत्वादेव· एवञ्चशदन्नपर्युदासएवत
स्याम्परिभाषायांज्ञापकः। अतएवलोकप्रसिद्धार्थकस्यग्रहणादेव· एतन्न्यायइति· कृत्रिमाकृत्रिमन्यायेत्यर्थः। ननुव
हुगणशब्दस्यापिसंख्याप्रदेशेएकादिशब्दानामिवग्रहणेसिद्धेसूत्रेऽनयोरुपादानंव्यर्थमतआह· सूत्रेवहुगणग्रहण
न्विति· एतत्तत्वंपूर्वत्रावेदितम्। नियतविषयपरिच्छेदइति· नियतोयोविषयपरिच्छेदस्तद्धेतुत्वादित्यर्थः। परिच्छेदे
नियतत्वञ्चेतरव्यावृत्तिविषयकत्वम्। परिच्छेदोज्ञानविशेषः। वहुगणयोर्नसाक्षात्तथात्वमितिभावः। त्र्यादिसङ्ख्या
व्यापकः। त्र्यादिसङ्ख्याव्याप्यायस्यसः। अतएव· वहुत्वादीनामसङ्ख्यात्वादेव। एवंसतियद्भाष्येउक्तमेकादिकयाचा
पिसङ्ख्यायतइतितद्विरोधः। अत्रापिशब्दस्वारस्येनयथावह्वादिकयासङ्ख्यायतेतथाएकादिकयाप्यतोऽनयोर

पिग्रहणमित्यत आह· यत्तु भाष्य इति·। एवञ्च सङ्ख्यानकरणत्वं यथा कथञ्चिद्विवक्षितन्न साक्षादिति न विरोधः। प्रा
चीनो क्तञ्च यति· एतेनेति· उक्तभाष्यविरोधेनेत्यर्थः वहुत्ववाचिन इति· वहुवाचिन इत्यर्थः। लाघवान्नियमश्शरीरा
न्तरमाह· यद्वेति· ननु यदीदं सूत्रन्नियमार्थन्तदा सङ्घवेपुत्स्य वाचकयोरपि ग्रहणम्प्राप्नोतीत्यत आह· सङ्घवेपु
पुत्स्येति· सङ्ख्यानकरणत्वम्परस्यापि न इति मात्रस्य अपि तु तदन्तस्येति सञ्ज्ञाविधावपि तदन्तविधिरित्याशयेना
ह· उत्पन्नेतीति· अतएव· तदन्तस्य सञ्ज्ञासञ्ज्ञासत्वादेवाकरणादावृत्त्येति· अन्यथा समानकालकानेकसञ्ज्ञाक
रणस्याप्रामाणिकत्वमिति न्यायविरोधः स्यात्· माभूदिति· प्रत्ययपदम्प्रत्ययत्वपर्याप्त्यधिकरणपरमिति भावः
। इदमेव प्रत्ययपदम्प्रत्ययावयवेपि प्रत्ययत्वव्यवहारस्य गमकमिति युक्तमेव। एतत्फलमाह· एवञ्चेति· तेन सुद
षत्प्रासाद इत्यत्र दीर्घाभावः। न च गवेदिनमित्यादाववच्त्वावच्छिन्ननिमित्तकेऽवादेशेऽल्विधित्वात्स्थानिवद्भा
वाभावेपि विध्यर्थमिति शङ्क्यम्·। अत्त्वस्यापि प्रत्ययोसाधारणत्वाभावात्। प्रत्ययनिमित्तकमेवेति· लक्षणशब्द
स्य निमित्तपरत्वात्। इत्येके इति· प्राञ्चः। अपर इति· सिद्धान्तिनः ननु प्रत्ययनिमित्तकं कार्यं स्यादिति व्याख्याने प्रत्य
यलोपसूत्रेणैव कार्यप्राप्तिर्वाच्या। एवं सति परिवीरित्यत्र व्येञ्· क्विपि सम्प्रसारणे कृते क्विपो लोपे प्रत्ययलोप
शास्त्रेण तु ग्दीर्घत्वयोः प्राप्तौ पर्यायस्तयोः स्यादेकदेशस्थत्वादत आह· इहापीति· प्रतिपादितमिति शेषः। अन्यथा
तद्देशस्थत्वानङ्गीकारे। सूत्रस्य सिद्धान्तार्थमाह· लुप्तेत्यादि· लब्धाङ्गसञ्ज्ञकेति· लुप्तप्रत्ययनिरूपितेत्यादिः। ते

न· लुप्तप्रत्ययपरतोपः पूर्वस्तदुद्देश्यकत्वनिवेशेन। भसञ्ज्ञानेति· पदसञ्ज्ञायां यथा समुदायोद्देश्यता न तथा भस
सञ्ज्ञा न समुदायोद्देश्यिका किन्तु लुप्तप्रत्ययपरतो यः पूर्वस्तदुद्देश्यकत्वाङ्गसञ्ज्ञायां प्रत्ययलक्षणप्रतिषेध इति भ
सञ्ज्ञानेत्यर्थः। अङ्गसञ्ज्ञा यथा लुप्तेपि प्रत्यये भवति तथोपपादयति। अङ्गसञ्ज्ञा त्विति· एवञ्चाङ्गसञ्ज्ञाया न लुम
तेति निषेधाभावादङ्गसञ्ज्ञायां लब्धाङ्गसञ्ज्ञकोद्देश्यकभत्वे प्रत्ययलक्षणप्रतिषेधाङ्गत्वेकर्त्तव्ये निषेधः प्र
वर्त्तते कैयट इति·। तत्र हि युवुशब्दान्तस्यानाकौ भवत इत्यर्थे नन्दनप्रियः। कारकप्रिय इत्यत्र वाक्यस्य विभ
ज्यान्वाख्याने नन्दनशब्दात्कारकशब्दाच्च या विभक्तिस्तस्याः सुपो धात्विति लुकि कृते ऽनाकौ न प्राप्नुत इति पूर्व
पक्षे माभूतां या सौ सामासिको विभक्तिस्तस्यां या सौ समासाद्विभक्तिस्तस्यां भविष्यत इति समाधाने कृते। यत्र तर्हि
समासाद्विभक्तिं र्नास्ति। नन्दनद् धिकारकदधि इति पुनः शङ्कायामेव तर्हि न वा परन्निमित्तं सञ्ज्ञा च प्रत्ययलक्षणे
न। न वेह परन्निमित्तमाश्रीयते अस्मिन्परतः युवोरनाकौ भवत इति। किन्तर्हि अङ्गस्य युवोरनाकौ भवतः। अ
ङ्गसञ्ज्ञा भवति प्रत्ययलक्षणेनेति भाष्य उक्तम्·। अत्र कैयटः। नहीह विभक्तिः प्रत्ययानन्तरं वा निमित्तत्वेनोपात्त
मिति प्रत्ययलक्षणत्वमनाकयोर्नास्तीति न लुमताङ्गस्येति प्रत्ययलक्षणप्रतिषेधस्यायमविषयः। केवलम
ङ्गस्य युवोरनाकौ भवत इत्युच्यते अस्ति च प्रत्ययलक्षणेनाङ्गसञ्ज्ञा। न हि तस्यां विधीयमानायां न लुमताङ्गस्येति
प्रतिषेधः प्रवर्त्तते। लब्धाङ्गसञ्ज्ञकस्य कार्यान्तरे विधातव्ये स प्रतिषेधप्रवर्त्तते। न चाङ्गसञ्ज्ञा ऽङ्गस्य कार्यमिति प्रति

षेधाभावइति·अत्रकैयटइत्यनेनारुचिःसूचितानलुमतातस्मिन्नितिवार्त्तिकरीत्याऽङ्गपदंपूर्वत्वोपलक्षणमित्यङ्ग·
सञ्ज्ञायामपिप्रतिषेधःप्राप्नोतितस्मान्नलुमतेतिनिषेधानित्यत्वेनाङ्गसञ्ज्ञाभवतीतिभाष्याशयः।अतएव·
नलुमतेतिनिषेधानित्यत्वादेव·ननुतृज्वत्सूत्रभाष्योक्तरीत्यायत्राङ्गस्येत्यस्योपस्थितिस्तस्यपरनिमित्तकत्व
न्नस्यात्।एवञ्चोरदत्वस्यपरनिमित्तकत्वाभावात्स्थानिवद्भावस्यावश्यम्परनिमित्तकत्वमाश्रयणीयमिति
पञ्चक्रोष्टृइत्यस्यासिद्धिरित्याशयेनशङ्कते।नचेति·अङ्गसञ्ज्ञाद्वारेति·अङ्गस्येत्यनेनसहतस्यसूत्रस्यैकवाक्यत
याङ्गत्वज्ञानस्यवाक्यार्थज्ञानेकारणतयाङ्गत्वज्ञानस्यपरप्रत्ययज्ञानप्रयोज्यतयोरदत्वस्यापिपरप्रयोज्यत्वेना
स्थानिवद्भावप्रवृत्तिरित्येवभाष्यप्रामाण्यात्कल्प्यतेनतूत्तरपदत्वस्यपरनिमित्तकत्वंसाक्षादितिभाष्ययोरविरो
धइतिभावः।एतन्मतेचलुप्तप्रत्ययेपरतोयःपूर्वोलब्धाङ्गसञ्ज्ञकइत्यर्थोनकिन्तुतादृशप्रत्ययपूर्वस्ययत्का
र्यमाङ्गमनाङ्गंवातस्मिन्कार्येनिषेधइत्येवविवक्षितम्।अतएव।अनित्यत्वेननलुमतेतिनिषेधाप्रवृत्त्याङ्गस
ञ्ज्ञत्वादिवा।यथाकथञ्चिदिति·शब्दाध्याहारेणोपपादनंक्लेशः।अत्रकार्यकालपक्षमाश्रित्यव्रश्चेत्यस्यसिद्धिः
कैयटेनोक्तासानोचितेत्याशयेनाह·आकडाराधीति·कार्यकालत्वमभ्युपेत्याह·वस्तुतस्त्विति·एतेनपदैकवाक्य
तयाऽन्वयासम्भवेन।आवृत्त्या·अङ्गस्येत्यस्यावृत्त्या।प्रकृतेःयुवोरनाकौतृज्वत्क्रोष्टुरित्यत्रच।लक्ष्यानुरोधात्।न
न्दनदधि।कारकदधि।पञ्चक्रोष्टृइत्यादिलक्ष्यानुरोधादित्यर्थः।तदाशयः।युवोरित्यादिसूत्रस्थभाष्याशयः।ननु

क्करीत्योरदत्वस्य परनिमित्तकत्वे चर्करीतीत्यादावत्वं कथमत आह· चर्करीत्यत्रेति· चर्करीति अजघोड्त्यस्य
सिध्यर्थमन्यकल्पितमर्थन्निरस्यति। अङ्गाक्षिप्तेति· पदैकवाक्यतान्वयो न सम्भवतीत्याशयेनाह·। अपास्तमि
ति· किंच्चाङ्गसञ्ज्ञाहारकपरम्परयोरदित्यस्य परनिमित्तकत्वाभाष्योक्तप्रयोजननिर्वाहाङ्गाष्यानुवृत्तिक
ल्पनङ्गौरवग्रस्तमित्यपि बोध्यम्। युष्मदादीनान्त्रिषु सारूप्यमात्रमुक्तन्न त्वलिङ्गत्वम्। अत एवालिङ्गाव्यय
सिन्निधान एवैषान्निरूपणान्न कृतमित्याशयेनाह· ङे प्रथमयोरमिति सूत्रइत्यादि· साम आकमिति सूत्रस्थ
भाष्यविरोधम्परिहरति। साम आकमितीति· शङ्कावारणायेति· नच निजांत्रयाणामिति निर्देशात्सकारान्त
शङ्कापाइवास्या अप्याशङ्काया वारणम्भविष्यतीति वाच्यम्। अस्य ग्रन्थस्य दोषोपलक्षणत्वात् तेन परमत्रिश
ब्दाख्यानार्थे णिचि टिलोपे ततः क्वौ णिलोपे टिलोपे च कृते क्वौ लुप्तमिति स्थानिवत्त्वनिषेधे निर्दिश्यमानावयव
त्वशब्दस्य त्रयादेशे परमत्रयाणामित्यत्रान्त्यादेशत्वापत्तिर्दोषो बोध्यः· केचिदितीति प्रासादपदस्यार्थः। तेषामेवश
ङ्कान्तरन्निरस्यति। नचेति· अत एव· गौणमुख्यपरिभाषायानादृतस्यैव गौणत्वस्य गौणपदार्थत्वादेव। तदे
वोपपादयति। इतरेति· एतच्च गौणमुख्यपरिभाषाप्रवृत्तिसम्भवमभ्युपेत्य वस्तुतस्तु तस्याः सम्भव एव नेत्याह·।
पदकार्य एवेति· अत एव· निस्सन्दिग्धवचनानन्त्वादेव· अत्र नित्यपदोपादानेन द्विशब्दप्रकृतिकसुपो द्विशब्दा
र्थे द्वित्वानुवादकत्वमेवेति नियमो बोध्यते। तच्च द्वित्वमप्रधानम्प्रधानं वेत्यन्यदेतत्·। अभ्युच्चयायेति· सम्मा॥

वितदोषाणान्नानारूपत्वसूचनाय। तेनभवानित्यस्यद्विपर्यन्तानामितिनियमास्वीकारेपिव्यक्तिपक्षेऽत्वसन्नेतिसूत्रेभ
वच्छब्दोपस्थितिसामार्थ्यात्सोत्यदाद्यत्वाप्रवृत्तिकल्पनेनसिद्धिसम्भवेपिनग्रन्थासङ्गतिः। अतएवास्वरसादाहा भव
न्ताविति॰ भाष्यप्रामाण्येनेति॰ तत्रापिसरसीयदीस्यनेनकथनेन। ईद्दशेभ्यः। आदन्तेभ्यः क्विपोऽनभिधानमिति॰। अ
यम्भावः जनसनखनामितिसूत्रेधियौधियः पियौपियइत्यादावियङादेशेकर्त्तव्येईत्वस्यासिद्धत्वम्प्राप्नोतीत्याश
ङ्क्यनैतदीत्वङ्क्विन्नर्हिध्याप्योः सम्प्रसारणमेतदित्युक्तम्। अभ्युपेत्यापीत्वंव्याश्रयत्वादसिद्धत्वन्नभविष्यतीतितु
त्रोक्तम् घुमास्थेतिसूत्रेचघृतपावानः वसपावानइत्यत्रपाधातोः क्वनिपिसतीत्वम्प्राप्तमितितद्व्यावृत्त्यर्थमीत्वे
वकारप्रतिषेधोवक्तव्यइत्युक्त्वायदीत्वेवकारप्रतिषेधइत्युच्यतेकथंधीवरीपीवरीत्याशङ्क्यनैतदीत्वंकिन्तर्हि
ध्याप्योः सम्प्रसारणमेतदित्युक्तम्। एतस्मिन्वार्त्तिकेयदीत्वेवकारप्रतिषेधइत्तिएतस्यप्रत्याख्यानस्यतत्प्रयो
जनस्यघृतपावानइत्यादेर्वनिपासाधनरूपस्यभाष्यस्यचफलैक्यायानभिधानङ्कल्पनीयम्। ईत्वेवकारप्रति
षेधइतिसामान्यतएवोक्तन्तत्सत्वेवकारादिप्रत्ययसामान्येप्रतिषेधेक्विप्यपिप्रतिषेधः प्राप्नोति। वनिपा
तत्साध्यप्रयोजनसाधनरूपप्रत्याख्यातपक्षेक्विपीत्वम्प्राप्नोतीतिफलभेदः स्यादिति। नन्वेवंरीत्याधीवर्या
दीनामप्यनभिधानम्प्राप्नोतीत्यतआह॰ धीवरीपीवरीत्यादीति॰ आदिनाधीरित्यादिसङ्ग्रहः। अतएवक्विप्त्वा
क्वनिपत्वनेतिसङ्गच्छते। पर्यालोचनयासिद्धाद्वार्तिकात्सिद्धमिति। अत्रपर्यालोचनयासिद्धादित्यनेनैतादृश

नुपूर्वीकानुपलम्भेपिनक्षतिः।जनसनेतिसूत्रेधियोधिपइत्यत्रेयङादेशोकर्त्तेधाधातोः क्विपिपदीत्वन्नस्यासि
द्धत्वम्प्राप्नोतीत्याशङ्क्यनैतदीत्वङ्क्वि· न्नहिंध्याप्योः सम्प्रसारणमेतदित्युक्तम्।एवंघुमास्थेतिसूत्रेपावानइत्यत्रेत्वव्या
वृत्त्यर्थमवकाशदावितिवार्त्तिकस्वीकारेकथंधीवरीपीवरीतिप्रश्नेनैतदीत्वमित्युक्त्वाध्याप्योः सम्प्रसारणमेतदित्यु
क्तम्।सूत्रभाष्यइत्यस्यसूत्रयोर्भाष्यइत्यर्थः।वार्त्तिकादिति· ध्याप्योः सम्प्रसारणञ्चेत्यतः।ननुधीध्यायतेर्दधातेरिति
भाष्यविरोधइत्यतआह· धीर्ध्यायतेरित्यादि· ननुसंस्थाशब्देस्थः कचेतिसूत्रस्थचकारेणक्विपिकृतेईत्वमव
काशदाविर्तिकप्रत्याख्यानपक्षेइत्वापत्तिरित्यतआह· संस्थाइत्यत्रेति· एवञ्चतत्रसंक्षिप्यदंक्विविवाचरतीतिक्वि
प्।विजित्यर्थकमियदिवातप्रमीशब्दोपिप्रामाणिकस्तर्हिसोऽन्यथासाधनीयइतिमनसिनिधायाह· मीङ्·मानइति·
व्याख्यानादिति· किम्पुनरिदन्दीर्घयोर्ग्रहणमाहोस्विद्ध्रस्वयोरितिविकल्प्यदीर्घग्रहणपक्षेयूइत्यत्रपूर्वसवर्णदीर्घस्य
ङि·तिह्रस्वश्चेतिसूत्रेसामानाधिकरण्यस्यचानुपपत्तिमुद्भाव्यह्रस्वग्रहणेशाकरिवन्धुरित्यत्रनदीवन्धुनीतिपूर्वप
दान्तोदात्तस्यवहुशाकदिरित्यत्रनप्लुतश्चेतिकपः प्राप्तिञ्चोक्त्वादीर्घयोर्ग्रहणमितिसिद्धान्तितम्।पूर्वसवर्णदीर्घस्तु
दीर्घोज्जसिचेत्यत्रवाच्छन्दसीत्यनुवृत्त्यासाधितः।ङि·तिह्रस्वश्चेतिसूत्रेतुय्वोर्योर्ह्रस्वाविस्येवंवेयधिकरण्यान्वयेन
साधितइत्येवंरूपादित्यर्थः।मात्रइति· जननीवाचकोयम्।कर्मण्यणशङ्कावारणायाह·।मूलविभुजादित्वात्वाल
इति· तन्व्यादिघटकेकारादेरवाचकत्वाज्ज्ञोर्यादिघटकस्यापिद्योतकतयातस्याप्यवाचकतयावर्णसञ्ज्ञापक्षोनयुक्त

इत्यपि बोध्यम्। तदन्तसञ्ज्ञायामाच्छीनद्योरित्यत्र भाष्यन्तामनुपपत्तिम्परिहरन्ति। आच्छीनद्योरित्यादावितिः ग्राम।
णादिर्वृत्तिरिति· एतत्प्रवृत्तिनिमित्तस्य ग्रामकर्मकनयनकर्तृत्वस्य पुंसाधारणत्वेन लिङ्गान्तरविशिष्टार्थानभि
धायकत्वाभावात्। प्रवृत्तिनिमित्तैक्ये सतीति· इदञ्च लिङ्गान्तरविशिष्टार्थानभिधायकत्वपदार्थकुक्षिप्रवृत्तिप्रति
योगिविशेषणम्। तथा च लिङ्गान्तरविशिष्टार्थे येन रूपेणाभिधायकत्वं तेनैव रूपेणास्त्र्यभिधायको यस्तस्य न नित्य
स्त्रीलिङ्गत्वव्यवहारः। स्वजन्यबोधीयलिङ्गान्तरविशिष्टार्थनिष्ठविशेष्यतावच्छेदकावच्छिन्नस्त्रीनिष्ठविशेष्यता
शालिशाब्दबोधजनकं यत्तद्भिन्नशब्दत्वन्नित्यस्त्रीलिङ्गत्वमिति फलितम्। क्वचिन्निर्देशेनेति यदा केनचित्पुरुषे
ण स्त्रीमात्रविषयकबोधेच्छया खलपूशब्दः प्रयुक्तस्तेन च सामग्रीविशेषात्तन्मात्रविषयक एव बोधो जनितस्त
स्य च लिङ्गान्तरविशिष्टार्थानभिधायकत्वान्नदीत्ववारणाय लिङ्गान्तरविशिष्टार्थाभिधायकतावच्छेदकधर्म
शून्यत्वं वक्तव्यम्। एवञ्च ड्यन्तकुमार्यादीनां क्यजन्तसमानानुपूर्वीकत्वान्नदीत्वन्न स्यादतः प्रवृत्तिनिमित्तैक्य इत्यु
पात्तमिति भावः। नन्वेवमिति· एतस्य लिङ्गान्तरविशिष्टानभिधायकत्वाभावात्। तस्य· श्रेयसीशब्दस्याप्यथोदेश
इति· भविष्यति किञ्चिदनेन प्रयोजनमित्यभिसन्धिमात्रे सञ्ज्ञाप्रवृत्तेस्तस्मिन्पक्षे स्वीकारात्। कुमारीत्यादौ कुमारी
मिच्छन्कुमारीवाचरन्निति स्वं सिद्धकुमारीशब्दे। अवयवस्त्रीविषयत्वादिति। अत्रावयवशब्दो वृत्तिप्रकृतिशब्दपरः
। तेन क्यजन्तेन दोषः। केचित्तु एवं सत्यग्न्यादिशब्दानामाचारक्विप्प्रकृतिकर्तृक्विबन्तानां स्त्रियां वृत्तौ तस्माच्छसो न

भै
१२८

इतिनत्वापत्तिस्तथाशाकध्यादिस्त्रीलिङ्ग·शब्दानामुक्तरीत्यापुंवत्त्वाबाङोनाभावस्याऽस्त्रियामितिनिषेधादनाप
त्तिरितिचिंत्यमेतदित्याहुः।तन्न·तस्माच्छसइतिसूत्रस्यपुमर्थप्रतिपादकशब्दस्यशस्प्रकृतित्वेशसोनस्यपूर्वसव
र्णदीर्घोत्सरस्यनत्वमित्यर्थादत्रनाभावप्राप्तेरभावात् एवमाङोनेत्यस्यापि·आङोयतोविधानत्तदादेरस्त्रियांविध
मानात्परस्यनाभावइत्यर्थः।स्यात्तथाचोक्तरीत्याशकटीशब्दस्यपुंवत्त्वेनाभावोपीष्टएवेतिदिक्।यदुक्तंकार्यकाल
पक्षेपीतितद्दूषयति आकडारस्थसञ्ज्ञानामिति·कथंबाध्यबाधकभावइति· तत्पक्षेविधिप्रदेशरूपैकदेशगत
त्वेनसञ्ज्ञानाम्योर्वायर्योभावेनबाध्यबाधकभावोनस्यादितिभावः।केचिदिति·अत्रारुचिबीजन्तुनतेनग्रन्थेनन
दीसञ्ज्ञाविधायकशास्त्रस्यतत्तत्कार्यविधायकशास्त्रैकवाक्यताभिप्रेताकिन्तुनदीत्वप्रयुक्तकार्यप्रवृत्तिश्चिकी
र्षितातस्मिन्कालेनदीसञ्ज्ञांकृत्वांसाकल्पनीयानतुभविष्यतिकिञ्चिदितिन्यायेनपूर्वंनदीत्वप्रवृत्तिरेवनायिनद्य
न्तकार्यस्यप्रवृत्तिर्भविष्यतीतिनानुपपत्तिरिति।यत्तुकेचिदितिप्रतीकमुपादायसञ्ज्ञयोःकार्यार्थमन्यदेशगमने
पिनस्वदेशीयत्वत्यागोव्यवहारार्थन्तत्तद्देशगतानांव्यवहर्तॄणामिवेत्यस्वरसइति।तन्न·अधिकारोनामत्रिप्रका
रः।कश्चिदेकदेशस्थः सर्वंशास्त्रमभिज्वलयतीतिभाष्यफक्किकाव्याख्यावसरेकश्चित्परिभाषारूपइतिकैय
टव्याख्यानेनपरिभाषाविषयएवस्वदेशत्यागेनकार्यसम्पादनमितिकल्पना।सञ्ज्ञाविषयेतुकार्यकालपक्षेऽ
याद्भ्यः परैवप्रगृह्यसञ्ज्ञेतिप्रगृह्यसञ्ज्ञायाः परत्वस्यादसोमादितिसूत्रभाष्येउक्तत्वेनसञ्ज्ञाविषयेदेशस्या

एम
१२८

गेनव्यवस्थायाभाष्यसम्मतत्वात्।यत्तुबहुश्रेयसीत्यत्रह्रस्वेगुणः स्यादितिकश्चिदाह।तद्दूषयति।ह्रस्वेकृतइति·ह्र
स्वविधानसामर्थ्यादिति· एवञ्चह्रस्वपदंश्रूयमाणपरम्भविष्यतीतिभावः।भाष्येस्पष्टमिति· एकदेशस्यापिक्वचिद
नुवृत्तिर्भवतीतिभाष्येस्पष्टम्।यथादामहायनान्ताच्चेतिसूत्रेसङ्ख्यादेरित्यनुवर्तते।अव्ययादेरितिनिवृत्तमित्युक्त
म्।ननुमातृवाचकस्याप्यनःशब्दस्यनपुंसकलिङ्गत्वात्स्वमोर्लुकालुप्तत्वेननगुणापत्तिरित्यतआह· नपुंसकत्वेपी
ति· ननुह्रस्वपदस्यश्रूयमाणह्रस्वपरत्वेपर्जन्यवल्लक्षणन्यायेनमातृशब्देपितस्यप्रवृत्तिःस्यात्।तथाचहेमातरित्य
त्रगुणानापत्तिरतआह· अयमिति·अन्येतुनलुमतेतिनिषेधस्यानित्यत्वेप्यनित्यवचनस्यौत्सर्गिकीप्रवृत्तिर्लक्ष्या
नुसारादप्रवृत्तिरित्येवंव्यवस्थासर्वजनसम्मतासाचलक्ष्यस्यसम्प्रतिपन्नत्वेभवति।प्रकृतेतुगुणादर्शनेनानित्य
स्याप्यप्रवृत्तौनमानमितिचिन्त्यमेतत्।एवङ्गुणश्रुत्येक्परिभाषाप्रवृत्तिरित्यपिचिन्त्यम्।अम्बार्थनद्योःक्रमात्सा
म्भवव्यभिचारयोरभावेनेक्परिभाषयाइहानुपस्थानादित्याहुः।अत्रेदंवक्तव्यम्·पक्षेगुणःस्यादेवेतियत्तदनित्य
स्यसामान्यतःप्रवृत्तिमभ्युपेत्य।वस्तुतस्तुगुणइत्यनुक्त्वाह्रस्वपदोपादानमिक्परिभाषानुपस्थित्यर्थमेव। यत्तूक्त
मम्बार्थनद्योःसम्भवव्यभिचाराभावइतितच्चिन्त्यम्।हेदेवीत्यत्राम्बार्थकेसम्भवस्यहेअम्बेत्यत्रव्यभिचारस्यसम्भ
वात्।एवंसत्यम्बेतिनसिध्यतीत्यत्रैवदूषणनिर्भरः।नन्विक्परिभाषोपस्थित्याम्बार्थकस्यगन्तस्यैवचेद्गुणःस्यात्त
र्हिनदीपदोपादानमनर्थकंस्यादितिवाच्यम्।अम्बार्थभिन्ननद्यन्तस्यगुणविधायकत्वेनचारितार्थ्यात्।यदपिनदीसाह

चर्योस्त्रीलिङ्गस्यैवास्वार्थस्यग्रहणेनानःशब्देक्लीवेनदोषइतितदपिन·साहचर्यपरिभाषाप्रवृत्तिस्वीकारेइगन्तत्वेन
पिनदोसाहचर्यसम्भवान्मान्तशब्दस्यस्वार्थकेएवस्यान्तत्वम्वित्यादावित्ति।साहचर्यपरिभाषायाअनित्यत्वात्स्त्रकृतेऽप्रव
त्तिरित्येवाभिमतमितिदिक्।गुणोभवत्येवेति·इदन्त्वह्रस्वविधानस्यसामान्यापेक्षज्ञापकत्वाभिप्रायेणयदितुसम्बु
द्धिनिमित्तकगुणस्यैवाप्रवृत्तिकल्पनन्तदातुनदोषइतिदिगित्यनेनसूचितम्।अस्वपोहसन्नित्यत्रेति·स्वपेर्लङ्सि
प।अङ्गाग्येगालवयोरित्युट्।शबलुक्।सस्यरुत्वम्।हशिचेत्युत्वम्।अत्राद्गुणंवाधित्वाटश्चेतिवृद्धिःप्राप्नोति।नचा
न्तरङ्गायांवृद्धौवहिरङ्गस्योत्वस्यासिद्धत्वंशङ्क्यम्।नाजानन्तर्यपरिभाषयानिषेधात्।पररूपमिति·।अतोगुणइत्य
नेन·नचाड्विधानसामर्थ्यान्नपररूपमितिवाच्यम्।डे·राभिकृतेनुड्वाधकतपाऽऽटश्चरितार्थत्वात्।यत्तुह्रस्वनद्याप
इतिसूत्रानन्तरंडे·र्नैत्येवंवदेदितिचिन्त्यमेतदिति।तदेवचिन्त्यम्।एवंसतिषड्भ्युभ्यइत्यत्रापिनकारेसम्बन्धापत्तौ
विधिनिषेधोभयसामर्थ्याद्विकल्पापत्तेः।विधिप्रकरणानन्तरंतथापाठेश्रीग्रामण्योरित्यस्यापिनिषेधसम्भावनास्य
त।व्याख्यानादिति·व्यवस्थायामित्यादितिर्देशमूलकात्।नद्यामआडपवादत्वेनतस्मिन्कृतेकथमाडितिकस्यचि
च्छङ्कायांव्यवस्थार्थमाह·यद्यपीत्यादि·सर्वथानकाशत्वादिति·आटिकृतेनिर्दिश्यमानस्याटाव्यवधानादितिभा
वः।आगमादेशयोरपिवाध्यवाधकभावेदृष्टान्तमाह·अपवादइति·अतएव·येननाप्राप्तिन्यायेनवाधस्थलीय।
व्यवस्थाविलक्षणव्यवस्थास्वीकारादेव·गुणोयङ्लुकोरितिसूत्रभाष्यइति·।तत्रहिडोढौकतेनोत्रौक्यतेइत्यत्र

भ्यासह्रस्वत्वस्य दीर्घोऽकित इति दीर्घत्वस्य च प्राप्तौ परत्वाद्दीर्घत्वं स्यादिति शङ्कायामभ्यासविकारेष्वपवादा उत्स
र्गान्न बाधन्त इति परिभाषा उक्ता। यया वित्यत्र ह्रस्वत्वस्यावकाशः। दीर्घत्वस्य तु कृते ह्रस्वत्वेऽवकाशं पूर्वपक्षी मन्य
ते। तस्याः परिभाषायाः प्रयोजननिरूपणावसरे गणेरीत्वं हलादिः शेषस्य। गणेरीत्वमपवादत्वाद्धलादिः शेषन्न बा
धत इत्युक्तम्। ततोऽग्रे भाष्ये न गणेरीत्वमपवादत्वाद्धलादिः शेषम्बाधते किन्तर्ह्यनवकाशत्वादित्युक्तम्। अत्र गण
रूपाभ्यासान्त्यस्येत्वमित्यर्थे हलादिः शेषे कृते तादृशाभ्यासाभावेनेत्वन्न स्यादिति तदनवकाशमित्यभिप्रायः दी
र्घोऽकित इति सूत्रस्थाकिद्ग्रहणेनाभ्यासविकारेषु बाधका न बाधन्त इत्येव परिभाषा ज्ञापिता। तया अजीगणदित्य
त्र हलादिः शेषेण णकारनिवृत्तौ पश्चादकारस्येत्वम्। अनवकाशत्वेन बाधस्थले बाधकत्वेनाभिमतस्य पूर्वम्प्र
वृत्तिरित्येव तत्र कृते यद्युत्सर्गस्य प्राप्तिस्तर्हि भवत्येव। येन नाप्राप्तन्यायेन बाधस्थले तु यत्रोत्सर्गे प्रवृत्त्युत्तरमप्य
वादस्य प्राप्तिस्तत्रापवादत्वादिमतस्य प्रवृत्तावुत्सर्गस्य प्राप्तिसत्त्वेऽपि न प्रवृत्तिरित्येव व्यवस्था यथा सर्वेभ्यो ब्राह्म
णेभ्यो दधि दीयतान्तक्रङ्कौण्डिन्यायेत्यत्र दधिदानोत्तरं तक्रदानस्य प्राप्तिसत्त्वेऽपि तक्रदानेन दधिदानस्य बाध एव। अ
नवकाशस्थले तु यथा सर्वे ब्राह्मणा भोज्यन्तां माठरकौण्डिन्यौ परिविविषातामित्यत्र भोजनपरिवेषणयोर्विरोधे पि परिवे
षणानन्तरम्माठरकौण्डिन्ययोर्भोजनम्भवत्येवेति। यत्तु द्व्यवरद्वे सूत्रभाष्ये न्यायोपन्यासानन्तरन्त्विदानीन्नो भुञ्जातेइ
त्युक्तन्न तु। कालविशेषेण विरोधप्रतिपादनपरमिति न तद्विरोधः। शाब्दान्तरप्राप्त्योऽनित्ययोरिति। शाब्दान्तरप्राप्त्या

ऽऽटोऽनित्यत्वमाश्रिते ऽमादेशस्य तु निर्दिश्यमानपरिभाषयाऽप्राप्तिरित्यर्थः। एकदेशयुक्तिरिति॰ आमो निरवका
शत्वेनाबाधकतयाऽतुल्यबलत्वेन परत्वादित्यनुचितमिति सा एकदेशयुक्तिः। ननूङ्गमादीनामिति निष्पन्नस्यक्वि
वन्तभ्रूशब्दस्य धातुत्वादेव सिद्धेभ्रूशब्दोपादानमनर्थकमत आह॰ भ्रूशब्द इति॰ समानाधिकरणमिति॰ वैयधि
करण्ये क्षियतीत्यादौ जातेपीयङि लोपो व्योरिति लोपेनयद्यपि सिध्यति तथापि तुल्यन्यायादुत्तरसूत्रेपि तथात्वापत्तौ
दिदिवतुरित्यत्रयणाप्राप्तिः। इयङो ङित्वस्यवैयर्थ्यञ्च स्यादिति भावः। इत्यन्यस्येति॰ आङ्गत्वात्तदन्तविधिर्न्याय्यः। भ्रू
शब्दे तदन्तविधेर्ग्रहणवतेत्यनेन निषेधः स्यादिति तु न शङ्क्यम्॰। तस्याः परिभाषायाः प्रत्ययविधिविषयत्वात्। अत्र
प्रकरण इति॰। क्षियो दीर्घादिति निर्देशो न सामान्यापेक्षज्ञापकमाश्रीयत इति भावः। पर्युदासपरतया व्याख्याने फलमा
ह॰ उदियाविस्यादाविति॰ ईङ्कृताविति धातोः क्विवन्तस्य रूपम्॰ नचैवं लिङि पाविस्यादौ दोषएवेति वाच्यम्। प्रत्यास
त्यायद्वात्वन्तस्य कार्यिनातद्धात्ववयवपूर्वत्वस्य विवक्षितत्वात्। स्पष्टार्थमिति॰ पूर्वोक्तप्रत्यासत्तेः स्पष्टप्रतिपत्त्यर्थमि
त्यर्थः। अत्र धातुग्रहणन्त्वचिश्नुविति सूत्रादेकदेशे स्वरितत्वादनुवर्त्तते। ननु सूत्रे पूर्वशब्दसत्वे धात्ववयवसंयोगपू
र्वत्वावच्छिन्नप्रतियोगिताकभेदस्य लाभेन सुश्रियावित्यादावविकारेतादृशभेदाभावादतिप्रसङ्गो वारयितुं शक्यते।
धात्ववयवसंयोगभिन्नादित्यर्थे तु रफे संयोगभेदसत्वेन ततः परत्वाद्यणादेशो दुर्वार इति पूर्वग्रहणस्यावश्यकतया
पूर्वग्रहणस्य स्पष्टार्थत्वकथनासङ्गतिरिति चेन्न॰ असंयोगादित्येतदुपादानसामर्थ्यात्संयोगपदस्य संयोगघटका

विषयकप्रतीत्यविषयपरतयातत्वस्यसंयोगावयवसंयोगोभयसाधारणत्वात्।यथास्यादिति॰ श्रुतत्वात्तस्यैवविशे
षणंयथास्यादित्यर्थः।ननुलूधात्ववयवोकारेऽतिप्रसङ्गवारणायरूरित्युपात्तमितिकुतोनोक्तमित्यतआह॰ लुलुवतु
रित्यादाविति॰ नियमादिति॰ उवर्णान्तस्यचेत्सुप्येवेतिनियमादित्यर्थः।सुपिचेदुवर्णान्तस्यैवेतिनियमवारणायाह॰
विपरीतेति॰ नदीत्वम्॰ अवयवस्यधीशब्दस्येतिशेषः प्रवृत्तइति॰ एतेनप्रकृष्टंध्यायतीत्यर्थेनित्यस्त्रीत्वाभावात्प्र
ध्येइत्यनुपपन्नमितिनिरस्तम्।दुर्ध्यायतीति॰ अत्रदुरित्यस्यगतित्वम्।द्वितीयेदुरित्यस्यसत्वभूतार्थविशेषणत्व
शङ्काव्युदासायाह॰ धीर्ध्यानमिति॰ एतेनदुरितिधात्वर्थस्यैवविशेषणमितिसूचितम्।तद्वाचकमिति॰ तच्छब्दस्य
तद्वाचकेलक्षणा।एतज्ज्ञापदेवाहयस्यधातोरिति॰ एवञ्चयक्रियेत्यत्रषष्ठीतत्पुरुषः।ननुभीत्रेतिसूत्रंषष्ठीबाधनार्थं
मेवास्त्वित्यतआह॰ भीत्रार्थेति॰ अन्योक्तिंखण्डयति।विभक्तिप्रकरणइति॰ भीत्रार्थानामितिसूत्रस्यवृद्धिकृतापा
यमाश्रित्यप्रत्याख्यातृभाष्यकारमतेनवृश्चिकभियइत्यत्रसमाधानमभिधायसूत्ररीत्यासमाधानमाह॰ किञ्चेति॰
इत्यपिबोध्यम् एवञ्चप्रकृतेएवमेवविवक्षितमितिभावः।सुध्युपास्यइत्यत्रापियणनिषेधमाशङ्क्याह॰ अनन्तर
स्येतीति॰ प्रकारान्तरमाह॰ सुपीतिवेति॰ अनित्यत्वादिति॰ एतेननाजानन्तर्यपरिभाषाविषयेऽनित्यत्वमेवस्वीकार्यं
सापरिभाषाचनकर्त्तव्यापरिभाषासत्वेयत्रतयाऽन्तरङ्गेऽजानन्तर्यसत्वेऽसिद्धत्वनिषेधस्तत्रानित्यत्वाद्बहिरङ्गप
रिभाषाया अप्रवृत्तिरितिभावः गौणमुख्यन्यायेनैवतदपिगतार्थम्॰ व्याख्यानादिति॰ यद्यपिनिमित्तादिभेदेनातिदे

शास्यषड्विधत्वम्प्रसिद्धन्तथापिप्रकृतेरूपातिदेशस्यैवसर्वकार्यसाधकतानिमित्तातिदेशोव्यपदेशातिदेशोवात्वजन्त
त्वप्रयुक्तकार्यलाभेपिऋदन्तत्वप्रयुक्तंकार्यन्नस्यात्।अर्थातिदेशस्यतुसम्भवएवन।उभयोरप्येकार्थत्वात्।ता।
दात्म्यातिदेशस्तूभयोः सहप्रयोगएवयथापरशुनावृश्चनित्यत्रसहप्रयोगेसुवामन्त्रितइतिवर्त्तेतेनतथाप्रकृतेस
म्भवस्त्येकार्थत्वादेवसहप्रयोगस्यासम्भवात्।शास्त्रातिदेशेकार्यातिदेशेवातुन्नन्तस्यरेफात्मकयणादेशलाभेपित।
स्योदात्तस्थानिकत्वाभावादुदात्तयणोहल्पूर्वादितिस्वरोनस्यादितिपरिशेषाद्रूपातिदेशएवोचितइत्येवंरूपादित्यर्थः
प्राधान्यादिति· प्राधान्यञ्चात्रसर्वेष्टसाधकत्वरूपम् यस्यकस्यचिद्रूपस्यनातिदेशइत्याह· यत्क्रादेरिति· प्रयोगनि
यमार्थमिति· असम्बुद्धौसर्वनामस्थानेस्त्रियाञ्चतृजन्तस्यैवप्रयोगइत्येवंरूपप्रयोगनियमइत्यर्थः।व्युत्पत्तिपक्षइति
उणादिनाव्युत्पन्नानांसञ्ज्ञाशब्दानाञ्चेदंतेषामेवएतेनयत्फलितन्तदाह· अन्येषामिति· तेषामिति· नेष्ट्रादीनामि
त्यर्थः।अप्रामाणिकमितीति· एवञ्चनायंन्नियमव्यावर्त्यइतिभावः।ननूज्ञातृशब्दस्यरूढत्वमस्तिउणादिभिन्नकृद्व्यु
त्पन्नानान्तुयौगिकत्वमनुभवसिद्धमितिकथमेतदित्यतआह· पङ्कजादिवदिति· प्राचीनसम्मतरीत्याव्याख्यायभा
ष्यरीत्याह· एवुलत्चावितीति।तृइत्येवेति· अप्तृन्निितिसूत्रेपितृइत्येववक्तव्यमितिभावः।इत्युक्तमिति· एवञ्चाय।
न्नियमोयोनिसम्बन्धवाचिविषयकइत्युज्ञातृशब्देदीर्घःस्वतएवसुलभइतिभाष्यप्रयोगाद्दीर्घइतिकथनन्निष्फलमे
वा।भाष्यान्तरमप्याह· नेष्टत्वस्टइति· भाष्यवार्तिकयोरिति· तृन्विधौऋत्विक्षुचानुपसर्गस्या।ऋत्विक्षुचानुपसर्गस्येति

वक्तव्यम्। होतापोता। अनुमसर्गस्येतिकिमर्थम्। प्रशास्ता। प्रतिहर्त्ता। एतस्य प्रत्युदाहरणपरतया प्रदर्शनेन तृ॰स्तृचौ शा
स्तिसदादिभ्यः सञ्ज्ञायां चानिटावित्यनेन तृजिति कल्प्यम्। नयतेः षुक् च। चात्तृन्। नेष्टा। त्विषेर्देवतायामकारश्चोपधाया
अनिट्त्वं च। चात्तृन्निति हि तत्राभिहितम्। नियमफलं चिन्त्यमिति। मूले यन्नियमव्यावर्त्यत्वेनोक्तं तेन नपितृमातृप्रभृतीना
न्नेति तदन्यथासिद्धम्। तेषां निरनुबन्धकतृप्रत्ययान्ततया तृजन्तत्वाभावेन दीर्घप्राप्तेरिति भावः। प्रथमोपस्थितत्वात्
। अष्टाध्याय्यां प्रथमोपस्थितत्वात्। तल्लेखः। अष्टन्नित्यस्योल्लेखः। विशेषविहितत्वात् तृन्तृचोः साक्षादुपादानेन प्रति
पदोक्तत्वात्। स एव। अष्टन्नित्येव। तृतीयादावचेवोभयमिति। एवञ्च सामानाधिकरण्यसम्बन्धेन तृतीयादित्वविशिष्ट
यदजादित्वं तदवच्छिन्नस्योभयोः प्रयोगे निमित्तता। तयोर्मध्ये तु तृन्नन्तस्य प्रयोगः प्राप्त एव तृजन्तस्य प्रयोगः शास्त्रबोध्य
इति तत्रैव विशिष्टधर्मावच्छिन्नस्य प्रयोजकत्वम्। यत्र तु तादृशधर्मावच्छिन्नाभावस्तत्र तृजन्तप्रयोगाभावः। शासितृती
यादित्वाभावाभ्यामादावजादित्वाभावात् क्रोष्टुपुत्र इत्यत्र तु विशेषाभावादेव विशिष्टाभावः सुलभः। प्रयोगनियमार्थमि
ति। तृज्वदेव सर्वनामस्थाने स्त्रियाञ्च न तु तृन्नन्त इत्येवं विधोऽस्यत्र नियमः। फलतीति। विधेयत्वेन प्रधानीभूतस्य तृज्व
द्भावसंकोचकल्पनापेक्षया निमित्तत्वेनाभिमतस्य सर्वनामस्थानतृन्नन्तनिरूपितपरत्वं यथा न भवति तथा कल्पनमुचि
तमिति भावः। एतेन। सर्वनामस्थाने स्त्रियाञ्च क्रोष्टृशब्द एवेति नियमेन। अपास्तमिति। उक्तनियमे तृतीयादावचत्युभयोः
प्रयोगस्य सिद्धत्वादेतदपि नियमार्थमेवेति नियमस्य वर्णितत्वादिति भावः। एवमपि। विभाषेत्यस्यापि नियामकत्वेन। अ

भै॰
१३२

न्यत्रातृजन्तस्यैवेतिनियमफलकल्पनेनक्रोष्टूनित्यसङ्क्तमितिभावः।योगविभागेति॰ तृतीयावच्चैवोभयमन्यत्रत
जन्तस्येत्येवङ्क्ल्पनायांसर्वनामस्थानेतृजन्तप्रयोगसिध्यात्तृज्वत्क्रोष्टुस्त्रियामित्येववदेत्।एवञ्चान्यत्रतुन्नन्त
मेवेतिसिद्धमः। तत्रशङ्कते।नचेति॰ मृगवाचीति॰ मृगशब्दोऽत्रपशुजातीयपरः।एतेनअत्रैवादाविदंसूत्रत्रयनुश्रृ
गालवाचिक्रोष्टुशब्दयोर्व्यवस्थार्थमित्युक्तमिहतुमृगवाचीत्युक्तमितिपूर्वापरविरोधइत्यपास्तम्।तथाचोक्तंविश्व
कोशे।मृगःपशौकुरङ्गेपिकरिनक्षत्रभेदयोः।याञ्चायाम्मृगयाणञ्चमृगीतुवनितान्तरेइति।तेन॰ भाव्यमानस्यापिद्ध
चिन्तसवर्णग्राहकत्वज्ञापनेन।कौस्तुभोक्तिङ्खण्डयति।यत्त्विति॰ तपरत्वेनप्रयोगेश्रूपमाणैकमात्रिकएवादेशः।
स्यादित्यर्थेकल्पनेनेतिभावः।रादेवसंयोगान्तस्यसस्यलोपइत्याकारकन्नियममन्निरस्यति।विपरीतेति॰ क्रियाविशेष
णत्वादिति॰ लुनात्यर्थेफलांशविशेषणत्वादित्यर्थः।द्वारादिषुस्वशब्दपाठेनतदादिग्रहणस्यतत्रचोदितत्वात्।स्वादेरि
नीतिज्ञापकेनवातदादेरैवेजागमस्येष्टत्वात्स्वार्थिकइत्यनुप।पन्नमतआह॰ द्वारादिष्विति॰ अग्रहणइति॰ इतिपक्षइ
तिशेषः।नन्वनुकार्यानुकरणयोरभेदइतिपक्षेऽर्थवत्वाभावात्कथंविभक्तिरतआह।अनुकार्येत्त्वेतिनन्वनुकरणेकि
ञ्चिद्धिकारेकथमर्थोपस्थितिरतआह।ईषदिति॰ वाचकेति॰ अनुकरणेत्यर्थः।अर्थः।अनुकार्यम्।तत्रदृष्टान्तमाहः।
किरइति॰ ननुसूत्रएवविभक्त्यभावस्यैवरीत्याकल्पनेगविन्ययमाहेत्यत्रपदान्तत्वाल्लोपःस्यादतआह॰गवित्ययमाहेती
ति॰ आहुरिति॰ सिद्धान्तानुसारिणः।अतएवः। ऋतइतितपरत्वादेव।अतएव॰ उत्वाप्रवृत्तेरेव।उक्तोत्तरत्वात्।ह्रस्वऋ

१३२

कारद्वयैकादेशे प्रथमस्य ऋकारऌकारस्थानिकैकादेशे द्वितीयस्य साधुत्वमिति प्रतिपादितत्वात्। केचित्तु लृणसू
त्रस्थभाष्यप्रामाण्येन ऌकारस्य यणादेशो दुर्लभ इति गम्लेत्यसङ्गतमिति यत्तद्दूषयितुन्तन्मतमाहायत्त्विति· भाष्येति·।
इत्थंहि तत्र भाष्यम्। उरणित्यत्राणंशे सन्देहः। अण्प्रत्याहारः पूर्वेणाणाकारेण परेण वा। असन्दिग्धं पूर्वेणान परेण। कु
त एतत्। पराभावात्। नस्युः स्थाने परेणाः सन्ति। ननु चापमस्ति कर्त्रर्थम्। हर्त्रर्थम्। हर्त्रर्थमिति· यदि परेण स्यात्तर्हि यणो
रपरत्वापत्तौ रेफद्वयश्रवणप्रसङ्गः। रोरीति लोपेन सिद्धम्। एवन्तर्हि सामर्थ्यात्पूर्वेणान परेण। यदि परेण स्यादण्ग्रहण
मनर्थकं स्यादुरजित्येव ब्रूयादिति·। तत्र· गम्लादौ। ऋकारस्याणि रपरत्वे यद्यपि लोपेन सिद्धिस्तथाप्यत्र लपरत्वे लद्वयं श्रू
येतेति सामर्थ्यवर्णनमयुक्तमिति भावः। फलाभावेनाप्रवृत्त्या। उरण्रपरेत्यस्याप्रवृत्त्याशयादिति· भाष्यकारस्येत्यादिः
आशय इत्यनेन सूचितामरुचिं सूचयन्नाह· वस्तुत इति· ईदृशानाम्। ऌकारस्थानिकलादेशघटितानामनार्षप्रयोगाणा
म्। चिन्त्यमिति· यत्तु सूत्रकारमते ऋकारऌकारयोः। सवर्णसञ्ज्ञासत्वादुःस्थाने जातस्य लकारस्य लपरत्वार्थम्परेणण
कारेण प्रत्याहारो भविष्यतीत्यपि न। नाज्झलाविति सूत्रे परश्शातानीत्यत्र दोषवारणायाज्झलोः प्रतिषेधे शकारप्रतिषे
धोऽज्झल्त्वादिति वार्त्तिकारम्भेण तन्मते लोपस्य रोरीति हलोपमामिति सूत्रविहितस्य वानित्यतया गम्लेत्यत्र लकारस्य
लपरत्वेऽपि लेपि न विशेषाभावादिति। तन्न· भाष्यकारैर्लोपस्य शरो वीति ज्ञापकेन वैकल्पिकत्वस्य वर्णनात्तन्मते प्रकृ
ते परेणणाकारेणाण्ग्रहणे लद्वयं श्रूयेतान्ग्रहणे तु नेति वैषम्यस्य दुरपन्हवतया णग्रहणस्य ज्ञापकत्ववर्णनासङ्गतिरि

तियथोत्तरम्मुनीनाम्प्रामाण्यादीदृशानामनभिधानस्यावश्यकत्वादिति दिक् नन्वेवमन्तरङ्गत्वादाद्गुणेततः सादेशोऽद
न्तरूपापत्तिरतआह॰ सादेशान्पूर्वमिति॰ भाष्येणविरोधादिति॰ तत्सूत्रभाष्येकस्यायम्प्रतिषेधइतिशङ्कायां सर्वप्रतिषे
धइतिसमाधानेकृतेयद्येवमन्वग्निरूषसामग्यमरुम्मदित्यत्रयणादेशस्यप्रतिषेधः प्राप्नोतीत्युक्त्वाएङ॰ प्रकरणात्सि
द्धम्।एङः।अतीतिवर्त्तते।यद्येवम्मध्यपठितेऽतोरोरप्लुतादप्लुतइत्यत्राप्येङ्ग्रहणसम्बन्धः स्यात्तथाचाग्नेरत्रवा।
योरत्रेत्यत्रैङः परस्योत्वम्प्राप्नोतीत्याशङ्क्यपदान्ताभिसम्बद्धमेङ्ग्रहणमनुवर्त्ततेनचैङः पदान्तात्परोरुरस्तीतितत्रो
क्तन्तेनविरोधादित्यर्थः।योगविभागसिद्धस्यःउत्तरपदत्वेचापदादिविधाविति वार्तिकप्रत्याख्यानसमयेस्वादिष्विति
सूत्रेस्वादिषुपूर्वस्यपदत्वंयोगविभागेनसाधितन्तस्य॰ ननूत्तरपदस्योक्तरीत्यानिषेधेपिपूर्वपदस्यपदत्वात्पूर्वान्तवद्भा
वेनसेइत्यस्यपदत्वंस्यादितिपूर्वरूपन्दुर्वारमित्यतआह॰ आतिदेशिकस्यापीति॰ यदितुप्रत्याख्यानप्रकारस्यगुरुतया।
लाघवार्थमुत्तरपदत्वेचापदादिविधाविति वचनमारभ्यते।तदाप्याह॰ उत्तरपदत्वइति॰ तद्घटितइति॰ उत्तरपदघटि
तइत्यर्थः।णित्कार्यस्यासम्भवादिति॰ प्राधान्यात्कार्यातिदेशइतिभावः।ननुशसस्तद्धितस्यापिसम्भवादेत्साहचर्या।
त्सुवेवेत्यनुपपन्नमतआह॰ अचीत्यधिकारादिति॰ यदुक्तमपवादत्वादात्वेनवृद्धिबाधइतितस्योपपत्तिमाह॰।सूत्रेनपर
करणेनेतिचित्रगुशब्देतिप्रसङ्गनिवारणायकृतम्।तपरसूत्रेचाणग्रहणानुवृत्त्यासमुदायस्यानणत्वात्तपरसूत्राप्रवृत्ते
स्तपरत्वंव्यर्थमितितद्गकारस्याविवक्षायान्तात्स्यर्थग्राहकमितिभावः।मूलोक्तन्दूषयन्सिद्धान्तमाह॰ परेत्त्विति॰ नन्वेवंचि

त्रगुरित्यादौ दोष इत्यत आह॰ चित्रगुरित्यादाविति॰ अत्र स्थानिवद्भावेन णित्वस्य प्रतिषेधः। अत्रैव॰ गोतो णिदिति सूत्र

एव॰ नन्वेवङ्कारस्याविवक्षितत्वे द्योशब्दे दोष एवेत्यत आह॰ द्योः सर्वनामिति॰ तत्र हि अभ्युपसङ्ख्यानम्। गां पश्या

किम्पुनः कारणान्न सिध्यति। वृद्धर्वलीयस्त्वात् परत्वाद् वृद्धिः प्राप्नोति। न वानवकाशत्वात्। अनवकाशमात्वम्वृद्धिम्बा

धिष्यते। सावकाशः। कोऽवकाशः। द्यां गच्छ। द्योश्च सर्वनामस्थाने वृद्धिर्विधेया। किम्प्रयोजनम्। यद्यावदिन्द्रते शतंश

तं भूमीरुत स्युः। पावता चेदानीं द्योरपि सर्वनामस्थाने वृद्धिरुच्यते। अनवकाशमात्वम्वृद्धिम्बाधिष्यत इत्युक्तम्। यद्य

पि स्थानिवत्सूत्रभाष्ये गोः पूर्वणित्वात्वस्वरेषु स्थानिवद्भावप्रतिषेध इति वचनस्य णित्वग्रहणन्तपरकरणात्सिद्धमि

त्यनेन प्रत्याख्यातम्। तदनुरोधेनैवौतोम्शसोरिति सूत्रे द्योश्च वृद्धिर्वक्तव्येति वार्तिकव्याख्यानावसरे कैयटेन ओतो णि

दिति सूत्रे पठितव्यम् गोतइत्योकारान्तोपलक्षणार्थं वा व्याख्येयम्। वर्णनिर्देशे हि तपरत्वम्प्रसिद्धमिति व्याख्यानम्।

तथापि गोतो णिदिति सूत्र भाष्ये तपरकरणं किमर्थमिह मा भूत् चित्रगुः शवलगुरिति। नैतदस्ति। ह्रस्वे कृते न भविष्य

ति। स्थानिवद्भावान्प्राप्नोति। अत उत्तरम्पठति। तपरकरणमनर्थकम्॰ स्थानिवत्वप्रतिषेधात्। प्रतिषिध्यते स्थानिवद्भावः

। गोः पूर्वणित्वात्वस्वरेषु स्थानिवद्भावो न भवतीति स चावश्यं प्रतिषेध आश्रयितव्यः। इतरथा हि सम्बुद्धिजसोः प्रतिषेधः

यो हि मन्यते तपरकरणसामर्थ्यादत्र न भविष्यतीति सम्बुद्धिजसोस्तेन प्रतिषेधो वक्तव्यः स्यात्। हे चित्रगो हे चित्रगव इति।

अथेदानीं सत्यपि स्थानिवद्भावप्रतिषेधे गुणे कृते कस्मादेवात्र न भवति। लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति। न

भै· १३४

नुचेदानींसत्यपिस्थानिवद्भावप्रतिषेधे एतयापरिभाषयाशक्यमुपस्थातुम्।नित्याह।नहीदानींक्वचिदपिस्थानिवत्स्या
दित्युक्तम्।एतद्भाष्ये यत्तत्परकरणप्रयोजनमुक्तंश्चित्रगुरितितव्याख्यानावसरेतपरस्तत्कालस्येत्यत्राणितिनानुवर्त्त
तइत्यनणोपितत्कालस्यग्रहणम्।इतरथाहीति· यदिस्थानिवत्त्वनिषेधोनाश्रीयतेतदासत्यपितपरकरणेसम्बुद्धौज
सिगुणेकृतेस्थानिवत्त्वात्तत्कालत्वाच्चणित्वंस्यात्।प्रतिषिद्धेतुस्थानिवत्त्वेगुणेकृतेगोरूपस्यलाक्षणिकणित्वाप्रसङ्गःर
त्युक्तङ्कैयटेन।एतेनस्थानिवत्त्वप्रतिषेधएवभाष्यकारस्यनिर्भरइतिकैयटस्यापिसम्मतम्।ओकारोपलक्षणत्वेनव्या
ख्यानन्त्वेकदेश्युक्तित्वसूचनायेतिविभावनीयम्।उदाहृतइति· आङ्गत्वात्तदन्तेपिप्रवृत्तिः।सिद्धान्तेपिगोतइतित
परकरणादोकारमात्रंविवक्षितमितिमतेहेभानोइत्यत्रप्रसक्तामतिव्याप्तिंवारयितुंयद्धिहितविशेषणात्पाव्याख्यान
न्तत्प्रतिपदोक्तपरिभाषयापिसिद्धमित्याह· यदित्विति· अत्रयदीतिनपाक्षिकत्वसूचनायकिन्तुशास्त्राणिचेत्प्रमा।
णानीतिवदसन्दिग्धेसन्दिग्धवचनम्।विधेयस्यार्थस्यदार्ढ्यसूचकमेव।वर्णग्रहणेऽप्रवृत्तिसूचकंयदादेशचउपदे
शेऽशितीतिसूत्रस्थसुपदेशइतिपदन्तदनित्यत्वएवज्ञापकमितिभावः।उरिति· शम्भुरित्यर्थः।केचित्तुस्वतोऽशब्दस्वि
कारेतृतीयैकवचनादावप्यस्यप्रयोगःस्यात्तथाचस्वरितोवेतिसूत्रस्थभाष्यविरोधःस्यादतोऽस्यानभिधानमेवयुक्त
मित्याहुस्तन्मतंखण्डयितुमाह· यत्विति·।स्वरितोवेतिसूत्रस्थभाष्यविरोधइति।एवंहितत्रत्यभाष्यम्।एकादेशस्वरोऽ
न्तरङ्गः।एकादेशस्वरोऽन्तरङ्गःसिद्धोवक्तव्यः।किम्प्रयोजनम्।अयवायावेकादेशशान्तस्वरैकाननुदात्तसर्वानुदात्तार्थम्।

राम १३४

अपभ्भावः। उदात्तानुदात्तयोर्यआदेशस्तस्योभयान्तर्यात्स्वरितत्वेप्राप्ते एकादेशउदात्तेनोदात्तइत्यनेनोदातत्वंविधी
यते। अपञ्चोदात्तएचोऽयवायावइत्येतद्दृष्ट्याऽसिद्धइत्यादेशस्यानिस्वरेणस्वरितबुद्ध्याऽऽन्तरतम्यात्स्वरितः स्यादिति।
अय। वृक्षइदम्। प्लक्षइदम्। अबादेशोनास्ति। आप्। कुमार्याइदम्। अत्रकुमारीशब्दउदात्तनिवृत्तिस्वरेणान्तोदात्तः।
ततएकारस्यानुदात्तस्याडागमेयणादेशेचोदात्तयणोहल्पूर्वादित्याटउदात्तत्वेआंडेकारयोरुदात्तानुदात्तयोर्वृद्धिरेका
देशउदात्तस्तस्यायादेशः। आववृक्षाविदम्। उदात्तानुदात्तयोरेकादेशस्तस्यएकादेशउदात्तेनोदात्तइत्येतद्भवतितस्यसिद्ध
त्वंवक्तव्यम्। उदात्तआवादेशोयथास्यात्। एकादेशस्वरः। गाङ्गेऽनूपइति। अत्रगाङ्गशब्दोऽणन्तत्वादन्तोदात्तस्ततस्सप्तम्येकव
चनस्यानुदात्तस्यपूर्वेवत्स्वरितेप्राप्तेएकादेशउदात्तेनेतिसूत्रेणोदात्तस्यजातस्यसिद्धत्वेसतिपुनरनूपशब्दाकारेणसहैका
देशस्योदात्तत्वमभवति। असिद्धत्वेसतितुस्वरितानुदात्तयोरेकादेशआन्तरतम्यात्स्वरितएवस्यात्। शतृस्वरः। तुदती। अत्र
तास्यनुदात्तेदितिशतुरनुदात्तः। शप्रत्ययउदात्तस्तयोरेकादेशस्योकारीन्योदात्तस्यसिद्धत्वेसतिशतुरनुमइत्यनेननद्याउदा
त्तत्वम्। अत्रसान्तोदात्तादितिवर्ज्जने। एकानुदात्तः। तुदन्तिलिखन्ति। अत्रत्येकानुदात्तशब्देनानुदात्तम्पदमेकवर्जमित्येष
स्वरोभिधीयतेअत्रविकरणउदात्तः। लसार्वधातुकानुदात्तत्वन्नतएकादेशस्वरस्यानिनविधीयमानस्यानुदात्तम्पदमि।
त्येतद्दृष्ट्याऽसिद्धत्वेधातोरनुदात्तत्वन्नस्यात्। सर्वानुदात्तः। ब्राह्मणास्तुदन्तिब्राह्मणालिखन्ति। अत्रविकरणैकादेशेकृते
तिङ्तिङइतिनिघातेकर्त्तव्येएकादेशउदात्तेनेत्यस्यासिद्धत्वादान्तरतम्यात्प्राप्तस्वरितम्बाधित्वातिङ्ङःतिङइत्यनुदात्तेकृ

तेपश्चादेकादेशउदात्तेनेत्यस्यप्रवृत्तावुदात्तश्रवणप्रसङ्गः।त्रिपाद्यामेतत्सूत्रपाठफलन्तुप्रपचतीतिसोमसुतपचतीति।आ
द्येनिपातत्वादाद्युदात्तेतिशब्दस्ययइकारस्तेनसहेतिशब्दस्यैकारस्यैकादेशेकृतेपूर्वान्तवद्भावेनइकारस्यतिङन्तावय
वत्वेनपद्येकादेशउदात्तेनेत्यस्यासिद्धत्वन्नस्यात्तदोदात्तवत्तिङन्तपरत्वाद्गतिनिघातप्रसङ्गः।द्वितीयेतिङः तिङइतिनिघा
तइकारस्यनभवतीतिसामान्यतोऽस्यशब्दस्यानभिधानमित्याहुस्तन्मतन्निरस्यति।पञ्चिति· तृतीयादिष्विति· पत्राद्यादे
शप्रसङ्गस्तस्यानभिधानकल्पनेनभाष्यस्योपपन्नत्वादितिभावः।उपलक्षणतयाघोश्चेत्योकारान्तसामान्यस्योपलक्ष
णमित्येतत्परतया।वस्तुतस्सामान्यतएवपूर्वोक्तभाष्यद्वयसम्भवादनभिधानमुचितमित्याशयेनाह· परेत्वीदृशानामि
तीति· इत्याहुरिति· भाष्यस्वारस्यविदइत्यादिः।इस्सजन्ताः पुल्लिङ्गाः।रमेतीति· ग्रन्थमध्येमङ्गलार्थमस्यादावुल्लेखः।द्व्याप्ग्र
हणास्यान्यार्थत्ववर्णनादाह· एकादेशस्येति· वाचेत्यादाविति· इदंमूलरीत्या।एतेनव्यापकतयालिङ्गविशिष्टपरिभाषयासर्वे
त्रनिर्वाहइतिसूचितम्।अभत्वात्सर्वनामस्थानत्वेनाभत्वादित्यर्थः।ननुसन्निपातपरिभाषयालोपोनस्यादतआह· स
न्निपातेति· तृतीयासमासइतिसप्तम्याः प्रथमार्थत्वेनावपवस्यसर्वनामतयास्याट्स्यादतआह· सर्वनाम्नोविहितस्येति·
उद्देश्यत्वासम्भवादिति· उद्देश्यस्यषष्ठ्यन्तपदबोध्यत्वस्यदर्शनेनप्रकृतेस्याटः षष्ठ्यन्तपदबोध्यत्वाभावादावृत्त्यातथाकल्पने
गौरवादितिभावः।व्याख्यानादिति· आगमापेक्षपाडितः षष्ठ्याऽवयवावयविभावार्थकत्वङ्कल्पनीयम्।एवञ्चस्थानपद
र्थनिरूपितसम्बन्धार्थकत्वस्यादर्शनमूलकादितिभावः।आपश्चेतीति· वाक्यभेदस्यावश्यकतयापञ्चम्यन्तस्यापि

षष्ठ्यन्तत्वं वाक्यान्तरे कल्प्यत इति भावः। न चैवमप्यावन्तत्वाभाव इति· यद्यपि सुड्विधावावन्तत्वस्य न निवेशस्तथापि त
द्विधौ यथा पूर्वान्तवद्भावेन सर्वनामत्वन्न तथा तुल्यन्यायात्स्याडागमविधावपि वाच्यमेवञ्च पूर्वान्तवद्भावाश्रयणे आवन्त
त्वालाभ इति भावः· अत एव· एकादेशनिष्पन्नस्याड्याभावादेव· सिद्धान्तिसम्मतत्वाभावादिति· एवञ्च पूर्वान्तवद्भावेन सर्वना
मत्वन्न दवयवस्यैवाकारस्य श्रूयमाणस्य परादिवद्भावेनाप्त्वमिति समुदायस्यावन्तसर्वनामत्वमर्थसमाजग्रस्तमिति भा
वः। प्रकारान्तरेणाप्युपपत्तिमाह· परेत्विति· सुड्नेति· एतेन ह्रस्वनद्याप इति सूत्रे परिशेषेणाषष्ठीवहुवचनस्यैव ग्रहण
मित्यस्य सिद्धिः। तत्वम्। प्रतिपदोक्तत्वम्। उत्तरपदस्य गुणवाचकत्वादिति· उत्तरात्वप्रकारकज्ञानविशेष्यस्य लक्षणाय
तद्बोध्यत्वेन गुणस्योत्तरात्वप्रकारकज्ञानविशेष्यकत्वरूपस्य वोध्यतावच्छेदकतया तदवच्छिन्नवोधकत्वादित्यर्थः
न च वाक्यादुद्देश्यविधेयभावस्य प्रतीतावपि समासात्तस्यावोधेन कथमस्य विग्रहस्य समाससमानार्थकत्वमिति वा
च्यम्· समासादपि तादृशवोधस्य लोहितोष्णीषा इत्यादौ दर्शनात्· नन्वपुरीति वक्तव्यमित्यस्यान्तरायाम्पुरीति पूःश
ब्दसामानाधिकरण्य एव निषेधवोधकत्वमिति प्रतीयते एवञ्चान्तरायै नगर्यै इत्यत्र कथन्निषेध इत्यत आह· पूः
शब्दार्थस्येति· सामान्यतोपि वार्तिकमिति· तत्र हि डलकवतीनाम्प्रतिषेधः। डलकवतीम्प्रतिषेधो वक्तव्य इत्युक्तम्।
अम्वाले· अम्वके· अत्र वार्तिके अर्थगतेन स्त्रीत्वेनाम्वार्थाः शब्दा निर्दिष्टाः। इदञ्च वार्तिकमम्वार्थेत्यक्षरं यदीत्यनेन प्र
त्याख्यातम्। अत्राक्षरपदमनुपरम्· प्रत्याख्यानपक्षे हे अक्क हे अल्लेत्यत्र द्व्यच्कत्वसत्वाद्ध्रस्वत्वं भविष्यति· डलकव।

भै·
१३६

तीनामित्यस्यारम्भे तु नेति फलभेदपरिहाराय डलकवतीनामित्यस्यासंयुक्त उकारादिवद्भिन्नविषयकत्वमिति
भावः। अम्बार्थद्व्यक्षरमित्यत्र यद्द्व्यक्षरमिति तच्छ्रुतत्वादम्बार्थस्यैव विशेषणं न त्वङ्गस्येत्याह· द्व्यक्षराम्बार्थके
ति· मूलोक्तं यद्यपीति शङ्कायास्तात्पर्यमाह· एवञ्चेति· जरसादेशे कृते स्थानिवद्भावेनैत्वादीनां प्राप्तौ चेत्यर्थः। नि
त्यत्वादिति· उक्तरीत्या एत्वादीनामकृताकृतप्रसङ्गित्वादित्यर्थः। क्वचिदजादित्वाभावादिति· जुङ्भ्यारोः। क्वचित्सन्निपा
तेति· एत्वस्य सन्निपातलक्षणत्वेपि सन्निपातविघातकस्य जरसोऽनापत्तिरेवञ्चैतदर्थेन प्रश्लेष इति भावः। एवं जर
सादेशविषयेऽन्यत्रापि न प्रश्लेषफलमित्यभिप्रायेण शङ्कते· यद्यपीति· एवमेत्वेपीति· परत्वात्कृते सकृद्गतिन्याया
न्न जरसादेशस्य प्रसङ्ग इति शेषः। अत्र यद्वक्तव्यमिति· विभक्त्यादेशस्यैव जरसादेशात्पूर्वं प्रवृत्तिरित्यादि· अतिखट्वा
येत्यत्र दीर्घस्य स्थानिभूते ह्रस्वाकारे चेदात्वं तदा तदादेशे दीर्घे तद्बुद्धिः स्थानिवद्भावेन स्यात्· न च ह्रस्वेपि स्थानिवद्भा
वेनैतद्बुद्धिः कार्येति वाच्यम्· ङ्याब्ग्रहणेऽदीर्घ इति वार्तिकेन निषेधात्· अदीर्घो दीर्घभिन्न आदेशो न स्थानिवदित्यर्थः
अत्र ङ्याब्ग्रहणे ह्रस्वादेशो न स्थानिवदित्येव तु नोक्तम्· श्रविष्ठासु जातः श्रविष्ठ इत्यत्र जातार्थप्रत्ययस्य श्रविष्ठाफल्गुनी
ति सूत्रेण लुकि लुक्तद्धितलुकीति टापो लुकि स्थानिवद्भावेन श्रविष्ठ इत्यस्यावन्तत्वापत्तौ हल्ङ्यादिलोपापत्तेः· अदीर्घ इत्यत्र दी
र्घपदेन सवर्णदीर्घस्यैव ग्रहणमा आवित्याकारप्रश्लेषेण वार्तिकप्रत्याख्यानपरभाष्यप्रामाण्यम्· तेन गङ्गीयतेः क्विपि गङ्गीः अ
त्र वार्तिकारम्भपक्षे दीर्घभिन्नस्येकारस्य स्थानिवद्भावेनापूर्त्वान्न दादेशात्परत्वाद्धल्ङ्यादिलोपो न· भाष्यनये इति· एतन्मते

राम
१३६

स्थानिवद्भावेन ह्रस्व आत्वमस्त्येव । तद्बुद्धिस्थपुनर्दीर्घस्थानिवत्त्वेन स्यादिति भावः । अत्र यत्र इति । अतिखट्वस्य अः अति
खट्वाः अत्र वार्तिकमतेन हल्ङ्यादिलोपप्राप्तिः । सूत्रकारभाष्यकारमते तु प्राप्तिरिति फलभेदः । आदिना गङ्गीरित्यस्य परिग्र
हः । अत्र सूत्ररीत्या प्राप्तिः । वार्तिकभाष्यकारमते तु नेति फलभेदः प्राप्नोतीत्यर्थः । वक्ष्यमाणरीत्या परेत्विति मते वक्ष्यमा
णया स्थानिवद्भावस्य दीर्घात्पूर्वं फलाभावादप्रवृत्तिरित्येवमाकरादियुक्तिस्तद्रीत्या । अङ्गस्य विशेषणत्वादिति विशेष
णविशेष्यभावस्यासिद्धत्वं तु विशेषणविशेष्ययोर्यथेष्टत्वादिति ग्रन्थेन फलानुसारित्वस्योक्तत्वादिति भावः एतेन आवन्ता
ङ्गाभावेन अस तदादिविधेः मूलन्दूषयति पर्येत्विति अतिखट्वायेत्याकारस्य ओदित्यादाविति अदोभवदित्यादौ क्षेपवा
रणायैषा तत्र सञ्चारिता न चेहेति खट्वे स्तत्र औ चित्स्यादिति अत्र विशेषणविशेष्यभावानुग्राहकं वचनमस्ति तत्र तद
नुसारी विशेषणविशेष्यभाव एवोचितः । अत एव लाक्षणिकत्वेनैव निर्वाहादेव स्पष्टमेव आवन्ताङ्गाभावेन दोषस्यैवाप्रा
प्तिः । आवन्तं यदङ्गमित्यर्थे लक्ष्यासिद्धिमप्याह किञ्च खट्वापा अर्द्ध इति इदमेकदेशिसमासारम्भवादिमतेन एतत्प्रत्या
ख्यात् भाष्यकारमते त्वेकदेशिसमासविषये कर्मधारयस्यैव स्वीकारादत्र स्त्रीप्रत्ययस्यानुपसर्जनत्वादेव दोषाभावः ।
मूले कृतान्द्वितीयशङ्कामयुक्तत्वेन निराचष्टे किञ्चेति लाक्षणिकत्वेन समाधाने भाष्यानुसम्वादमाह पाद्यप इति सू
त्रभाष्येपीति भाष्याभ्यामिति प्रथमे सूत्रद्वयोदाहरणविषये शङ्कासमाधानकरणात् । सुधीभिर्विचार्यमिति अनभिधानक
ल्पने भाष्यानुराग्रहचिन्तनमुपलक्षणत्वे तु सर्वत्रैकोक्त्यैव निर्वाहस्तूपलक्षणत्वं युक्तमिति केचित् । अत्रेति । व्रश्चेति सूत्रे

इत्यर्थः। आहुरिति· भाष्यानुग्रहाभावोऽत्रारुचिः। यत्तु पदस्य विशेष्यत्वेन तदन्तलाभ इति तन्नयुक्तमित्याशयेनाह· य
दस्येति· ङ्यग्रहणप्रयोजनमाह· च्छ्वोः शूडित्यत्रेति· अत्रापि· व्रश्चेतिसूत्रेपि· तत्र· झलामितिसूत्रे· तदप्राप्तौ· जश्त्वाप्राप्तौ· सू
त्रनिर्देशमात्रेण शास्त्राप्राप्तिकल्पनाम्प्रतिबन्दीमाह· उपदेश इति· अत्रमते· केषाञ्चिन्मते· कारणानावच्छेदकावच्छिन्नाभा
वस्यैव कार्याभावप्रयोजकता दृष्टेति· स्त्रीत्वादित्ययुक्तमत आह· पुंस्त्वाभावेति· अत एव· पर्युदासप्रतियोगिसूचनाभि
प्रायादेव· अत एव· आद्यवाक्ये स्त्र्याख्यपदस्य नित्यस्त्रीलिङ्गावित्यर्थकत्वादेव· कूटप्रुवदिति·। अस्य लिङ्गान्तरविशिष्टा
र्थाभिधायकत्वं स्पष्टमेव· सिद्धान्तमाह· परे त्विति· अत्र· ङि· ति ह्रस्वश्चेतिसूत्रे· एकदेशे स्वरितत्वाकल्पनलाघवानुरोधे
नाह· यद्वेति· अत्र· ङिति ह्रस्वश्चेतिसूत्र एवञ्च वाक्यद्वयेपि स्त्र्याख्यपदं स्त्रीवाचकावित्येतन्मात्रार्थकमेव· एवञ्च ङि
त्यग्रेपदद्वयं स्त्रीबोधकं तद्वाचकं नदीसंज्ञकमित्यर्थः पर्यवसन्नः। अत एव· एवंविधवाक्यार्थे निष्पन्नेरेव· अप्रवृत्तस्त्वा
ख्यायकेति· अस्य इति वार्तिक इत्यत्रान्वयः। प्रवृत्तौ: अर्थान्तरोपसङ्क्रान्तौ· श्रियमतिक्रान्तायै अतिश्रियै· शकटीमति
क्रान्तायै अतिशकट्यै· श्रियै· श्रीरिवाचरति· एषु नित्यस्त्रीत्वाभावाद्यूस्त्र्याख्याविति सूत्रस्याप्राप्तौ प्रथमलिङ्गग्र
हणञ्चेत्यस्याप्राप्तिः साऽनेन वार्तिकेन निराक्रियते· ङिति ह्रस्वश्चेत्यनेन तु विकल्पो भवति· दीर्घघटितवाक्ये चेत्ति
त्यस्त्रियांवर्तमानावित्यर्थकस्त्र्याख्यपदस्य सम्बन्धः स्यात्तदाप्रकृतसूत्रस्याप्यप्रवृत्तौ रूपासिद्धिः स्फुटैव निषेधविक
ल्पकत्वमसम्भवीति निषेधस्य प्राप्तिपूर्वकत्वात्प्रकृते च प्राप्तेरभावादिति भावः। एतच्च· अप्राप्तविभाषात्वञ्च· अत एव·

१३२

निषेधविकल्पत्वासम्भवादेव· नन्वेवमुपक्रमे निषेधविकल्पपरतयाकृतं व्याख्यानं विरुध्येतेत्यत आह· उप
क्रम इति· ह्रस्वयोर्ग्रहणमिति पक्षोपपादनमिति· तत्र हि किम्पुनरिदन्दीर्घयोर्ग्रहणमाहोस्विद्ध्रस्वयोः किञ्चा
तः। यदि दीर्घयोः पूर्वं इति निर्देशो नोपपद्यते· अथ ह्रस्वयोः। हे शकरे। अत्रापि प्रसज्येत· नैष दोषः। अवश्यमत्र वि
भाषा नदीसञ्ज्ञैषितव्या उभयं हीष्यते हे शकटी हे शकटे इति च· इह तर्हि शकटिबन्धुरिति नदीबन्धुनीत्येष स्वरः
प्राप्नोति· एवञ्च पूर्वपदान्तोदात्तत्वं स्यात्· सिद्धान्ते तु शकटिशकट्योरिति फिट्सूत्रेणात्रयाणाम्पर्यायेणोदात्तत्वा
त्पूर्वपदप्रकृतिस्वरेणात्रयोप्यच उदात्ता भवन्ति। इह च बहुशकटिरिति नद्यृतश्चेति कप् प्रसज्येतेत्याशङ्क्य यूस्त्र्या।
ख्यौ नदी· नेयङुवङ्स्थानावस्त्री वामि· ततो ङिति ङिति चेयङुवङ्स्थानौ वा नेति निवृत्तमित्युक्तम्· इदञ्च नि
यमार्थम्· ङित्येव ह्रस्वौ यू नदीसञ्ज्ञाविस्येवन्नियम इत्यभिप्रायः। एतेन तस्य पक्षस्योपपादनम्भवति। न च यूस्त्र्या
ख्याविति सूत्रस्यैवं सति ङिद्भिन्ने प्रवृत्तिर्न स्यादिति वाच्यम्। तत्राणुदित्सूत्रसहायेन दीर्घग्रहणसम्भवेन यूग्रहण
चारितार्थ्यसम्भवात्· यद्यप्यूकालोऽजिति सूत्रे उक्तमशब्दसञ्ज्ञेत्यनुवर्तमानाच्छब्दस्य सञ्ज्ञायां सवर्णग्रहणान्ने
ति ततश्चात्र दीर्घग्रहणासम्भवः। प्राप्नोति· तथापि नेयङुवङ्स्थानाविति ज्ञापकादस्त्रीति पर्युदासाच्च सवर्णग्र
हणसम्भवः। न चास्मिन्पक्षे नित्यनदीसञ्ज्ञया घिसञ्ज्ञाबाधनाद्धे शकटे इत्यत्र गुणो न स्यादिति वाच्यम्· शेषो घ्य
सखीति सूत्रे शेषग्रहणन्न करिष्यते· घिइ नियोगो विभज्यते· स्त्र्याख्यौ यू ह्रस्वौ ङितीत्यनुवर्तते तेन नात्र दोषाभावात्

अथवानदीसञ्ज्ञायाः परत्वात् घिसञ्ज्ञापुन्नपुंसकयोश्चरितार्थावाधिकाभविष्यति· परन्तु योगविभागनियमकल्प
नायांगौरवमितियूस्त्र्याख्याविस्यत्रदीर्घयोर्ग्रहणमितिशिष्टैर्व्याख्यातम्। भाष्यात्तद्लाभादिति· भाष्येहि· प्रवृत्तौच
प्राक्प्रवृत्तेः स्त्रीवचनावेवेत्येतावदुक्तेनित्यस्त्रीलिङ्गावित्यनुक्तेश्चतद्लाभः। ननुनेयङुवङ्स्थानावितिसूत्रेप्येव
मेवसम्बन्धः स्यादितितद्भ्राभङ्गस्यतआह· नेयङ्वङीतिअत्रार्थेभाष्यसम्मतिमाह· यस्याङ्स्येत्ति· एतादृशव्याख्या
नफलमाह· अतएवेति· तादृशव्याख्यानादेव· सिद्धान्तेशङ्कते· नन्विति· ननुलुवन्तस्यत्रिलिङ्गत्वेपुंस्त्वप्रयुक्तन्नत्व
त्वञ्चवाब्राह्मणान्पश्येत्यत्रापिस्यादतआह· चञ्चाब्राह्मणानिति· स्वलिङ्गप्रयुक्तकार्याभावस्येति· अनिदिश्यमानधर्मा
विरुद्धस्वाश्रयधर्मप्रयुक्तकार्याभावस्यातिदेशस्वभावसिद्धत्वात्तादृशकार्याभावस्याप्यतिदेशस्वीकारः। तादृशातिदे
शस्वभावेनैवसिद्धौस्वलिङ्गप्रयुक्तकार्याभावातिदेशेगौरवादाह· यद्वेति· कार्यप्रवृत्तिरिति· अस्यस्वभावसिद्धैवेतिशे
षः। युक्तवद्भावादीति· आदिनालुव्योगसङ्ग्रहः। पुंस्त्वेवाच्यइति· सूत्रेपुंसीतिधर्मपरमितिभावः। सूत्रेणैवेति· पूस्त्रा
ख्याविति सूत्रेणैवेत्यर्थः। एवञ्चप्रथमलिङ्गग्रहणादितिभाष्यमसङ्गतस्यादितिभावः। स्त्रीत्वविशिष्टमेवयद्इति· पूर्वो
क्तभाष्यदर्शनादयमर्थःकल्प्यते। स्त्रीत्वविशिष्टमेवेतिनियमासम्भवमाशङ्कते· यद्यपीति· तत्सत्वे· लिङ्गान्तरसत्वे· त
त्सत्तेति· पुंस्त्वसत्तेत्यर्थः। एवञ्चखरकुट्यैब्राह्मणायेत्यत्रनसूत्रेणसिद्धिरितिभावः। एवं· खरकुट्येइतिवत्· अत्रसूत्रइति·
वाक्यद्वयेपीतिशेषः। कैयटमतेऽयमपिदोषइत्यर्थः। तदनायत्तिः। विकल्पाभावापत्तिः। य्वोर्ह्रस्वावितिवाचकत्वमत्रषष्ठ्यर्थः

मादीनामिति व्युत्पादितस्य क्रियाशब्दत्वाज्जातिवाचकत्वाभावेनोङ् संभवति· अव्युत्पन्नस्य डुङ्प्रत्ययान्तस्य वा भ्रु
ड्रूढस्य प्राण्यङ्गवाचकस्य तु जातिवाचकत्वादुङ् भवति· तथा च धातुत्वाभावादुवङ्भावे सवर्णदीर्घे भ्रूरिति भ्रू
ग्रहणेन तु नोवङ्· तत्र धातुसाहचर्येणास्यापि धातुसंज्ञकस्यैव ग्रहणात्· अत एव कैयटेन प्रत्याख्यातं कपत्तुनेसमा
सान्नविधेरनित्यत्वात्· किं च न प्राण्यङ्गयोगरूढिः स्वीकारदमने भ्रूर्वो स्त्रियामिति प्राण्यङ्गकवद्भ्रुपपन्नः नत्राथुङ्
तु न अजातिपर्युदासेन शुद्धरूढेभ्य एव तदुत्पत्तेरिति· इत्यजन्ताः स्त्रीलिङ्गाः अस्य· वर्याभूशब्दस्य· अमरात्स्त्रीप्रत्ययो
ऽस्याइवनीनिन्नाने पियादवकोशोपपत्त्यर्थम्वान्हादित्वकल्पनमिति भावः। अमरसम्मत्याह· अन्ये त्विति· गौरादिपा
ठादिति· तस्याकृतिगणत्वकल्पनया। यादवकोशोपपत्तिमाह· भेकामिति· द्रुतिवदिति· तत्रैवात्रापि स्त्रीप्रत्ययप्र
कृतिमात्रप्रतिपादने कोशतात्पर्यं कल्प्यत इति भावः। मूलासङ्गतिं परिहरन् तात्पर्यमाह· गौरादित्वादिति· तदनुसा
रेण· माधवमतानुसारेण· अनन्तरस्येति न्यायेन ङीप एव निषेधः स्यादत आह· स्त्रियां यत्प्राप्नोतीति· केचिदिति· त्वनेन
सूचितामरुचिम्प्रकाशयन्नाह· स्वस्रादिष्विति· भाष्यस्वरस इति· तत्र हि सन्निपातपरिभाषायाः प्रयोजननिरूपणाव
सरे तिसृचतसृत्वं ङीब्विधेः। तिसृचतसृत्वं ङीब्विधेरनिमित्तम्· तिस्रस्तिष्ठन्ति· चतस्रस्तिष्ठन्ति· तिसृचतसृभावे कृते तत्र
न्नेभ्यो ङीबिति ङीप् प्राप्नोति· सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति न दोषो भवतीत्युक्त्वा नास्त्येतत्प्रयोजनम्·
आचार्यप्रवृत्तिर्ज्ञापयति न तिसृचतसृभावे ङीब्भवति· यदयं न तिसृचतसृ इति नामि दीर्घत्वस्य प्रतिषेधं शास्तीत्युक्तम्·

यदि स्वस्रादिष्वनयोः पाठः स्यात्तदा तेनैव निषेधे सिद्धे ज्ञापकानुसरणक्लेशो व्यर्थः स्यादिति भावः । इत्यजन्ताः स्त्रीलि
ङ्गा येन नाप्राप्ते इति न्यायादिति · उत्सर्गप्राप्तियोग्ये विषये ऽचारितार्थ्ये स्येतन्न्यायप्रवृत्तौ बीजं तत्तु प्रकृते ऽप्यस्त्येव · ए
तेनामभावे सन्निपातपरिभाषया लुगभावस्य सत्वेपि नापवादत्वानुपपत्तिः । यत्तु लाघवादतो ऽमित्यत्र अम् इत्येव च्छे
दः द्वितीयैकवचने आदेः परस्येत्यकारस्य मकारे द्वितीयमकारस्य संयोगान्तलोपेन सिद्धम् यद्यपि संयोगान्तलोपे पराः
प्रतिषेध इति वार्तिकारम्भपक्षे संयोगान्तलोपः प्राप्नोति · हल्ग्रहणापकर्षपक्षे तु नेति फलभेद आपतति । तथापि सं
योगान्तलोपसूत्रे हल्ग्रहणस्य वाक्यभेदेन सम्बन्धं कल्पयित्वा फलभेदः परिहरणीय इत्येतद्दूषयति · अमिति च्छेद
इति · ननु म इति च्छेद उक्त इति · यदि म इति च्छेदो ऽभिमतः स्यात्तदाङ्गाक्षेपमात्रं कर्त्तव्यम् · येन पदाक्षिप्तं तत्तस्य विशेषण
मिति न्यायेन तादृशाङ्गात्परा या सम्बुद्धिरित्येव लाघवाद्वदेत् · वैयधिकरण्येनान्वयो हल्पदानुवृत्तिश्च न कार्येति भावः । कि
ञ्चित्तु सन्निपातपरिभाषया ज्ञानमित्यत्र दीर्घवारणमयुक्तम् । तथा एङ्ह्रस्वात्सम्बुद्धेरिति सूत्रे हल्ग्रहणानुवृत्त्यभावे
कुण्डशब्दात्सम्बुद्धौ अमादेशे आदेः परस्येत्यकारलोपे सुपि चेति दीर्घे हे कुंडमिति प्राप्नोतीति सन्निपातपरिभाषाया
अनित्यत्वाभिप्रायेणोक्तं तथेह म इति च्छेदपक्षेपि दीर्घे कर्त्तव्ये सन्निपातपरिभाषाया अप्रवृत्तिर्भविष्यतीत्याहुः । अ
त्रेदमवधेयम् · अमिति च्छेदपक्षे ऽदन्तसन्निपातनिमित्तकस्यामादेशस्य न साक्षात्तत्सन्निपातविघातकदीर्घं प्रतिनि
मित्ततेति सन्निपातपरिभाषाया अप्रवृत्तिस्तस्मिन् पक्षे सम्भवति · म इति च्छेदपक्षे तु सन्निपातलक्षणविधेर्मकारादे

शास्यसन्निपातविघातकदीर्घनिमित्तत्वंसमुचितमेवेति॰ ननुयस्येतिचेतिसूत्रेणापकारमात्रस्यैवलोपविधानम।
स्त्विस्यतआह॰ व्याख्यानादिति॰ स्वरूपकथनमिति॰ अस्यनतुव्यावर्त्तकमितिशेषः सर्वैइत्यत्रातिप्रसङ्गस्तर्हिस्यादत
आह॰ सर्वैइति॰ व्याख्यानादितिजसस्साहचर्यमूलकान्॰ अतएवतानीतिसूत्रेएकशाइतिप्रयोगसङ्गतिः।वलवत्वात
प्रकरणाद्योपस्थितिस्तदपेक्षयाश्रुतार्थस्यशीघ्रोपस्थितिकत्वात्॰ अतएवःश्रुतानुमितयोरितिपरिभाषासत्वादेवःभा
वेघन्निप्रस्तुतार्थासङ्गतेराह॰ कर्मणीति॰ प्रायोवादइति॰ लिङ्गानुशासनस्यलौकिकत्वात्॰ अतएवसम्वन्धमनुवर्त्तिष्य
तइतिभाष्यस्यसम्वध्यनइतिसम्वन्धइतिव्याख्याकैयटेनकृता॰स्वरूपभङ्गभियानकृतइति॰।एवञ्चनित्यस्यापिशास्त्र
स्यसूत्रेषुछन्दोवत्सूत्राणीतिवचनेनछन्दस्त्वातिदेशेनाप्रवृत्तिरितिभावः।विधानस्यसर्वैथेति॰ उत्तराद्यर्थेगतसङ्॰ख्या
भिधायिनइत्यर्थेविधानक्रियायाअनन्तर्भावात्।अङ्ग॰न्तथेति॰ अर्थद्वारकविभक्तिविशेषणमित्यर्थः।व्याख्यानादिति॰
लक्ष्यानुसारिव्याख्यानायोगसाधनायप्रक्रियामाह॰ परत्वादितीति॰ नुमप्यनित्यइति अपिनाजरसदेशग्रहणम्॰ जस
नुमागमेकृतेनुमःसमुदायभक्ततयातदवयवजराशब्दस्यनुमागमेनव्यवधानादनित्यत्व॰मितिवोध्यम्॰ अत्रयद्वक्त
व्यमिति॰ शीभावात्परत्वाज्जरसित्यसङ्गतम्।विभक्त्यादेशानामेवपूर्वविप्रतिषेधेनेष्टत्वादित्याद्युक्तम्।असम्भवादिति॰
सान्तसंयोगावयवनकारस्यान्याल्वाभावेनतन्निरूपितोपधात्वस्यासम्भवात्॰ अतएवसर्वनाम्नइत्यस्यसान्तसंयो
गविशेषणत्वादेव॰ अङ्गविशेषणत्वेहंसशब्दावयवाकारस्यापिस्यादितिभावः।तस्याङ्गांशेउत्थिताकाङ्॰क्षत्वेप्याह॰य

ति· नचान्यविकारइतिपरिभाषायाः प्रवृत्तेऽतिप्रसङ्गनिवारकतयास्वीकारेसमहतइत्येवसूत्रंकर्त्तव्यम्· नोपधा
याइतिवर्त्तते· अङ्गस्येतिप्रकृतम्· तच्चविशेष्यम्· समहतइत्यस्यविशेषणतयासान्तम्महच्छब्दान्तञ्चयदङ्गन्त
द्वयवयोर्योनकारस्ततःपूर्वस्याचोदीर्घइत्यर्थस्वीकारेणासर्वेष्टसिद्धौसंयोगग्रहणमनत्ग्रहणञ्चव्यर्थमितिवाच्यम्·
अनेतीत्यनत् त्सरतीतित्सर्। अनच्चत्सर्चअनत्सरौतावाचष्टेअनत्सरयतिततःक्विपिअनत्सइतिप्रातिपदिकन्ततःसुपि
प्रतिनासमासेप्रत्यनत्सशब्दात्सुपिदीर्घार्थम् संयोगग्रहणस्यावश्यकत्वात्· एतदर्थमेवबहूनांसमुदायेबहूनांसं
योगसञ्ज्ञोक्तिर्भाष्यीयासङ्गच्छते·णिलोपस्यस्थानिवत्त्वन्तुन·क्वौलुप्तत्वात्।सूत्रेसंयोगग्रहणाभावेप्रकृतोदाहरणे
ऽन्त्यवर्णनद्धर्णयोरितराव्यवधानाभावेनानन्त्यविकारइतिपरिभाषायाअप्राप्त्याऽतिप्रसङ्गश्च।तद्धर्णविशेषणाभि
न्नत्वस्यनिवेशेऽपिभेदत्रयविशिष्टेनसकारेणाव्यवधानात्· यदित्वन्त्यवर्णतद्धर्णभिन्नयोऽचूत्वपर्याप्त्यधिकरणा
विषयकप्रतीत्यविषयस्तद्व्यवधानाभावोनिवेश्यते।तदानायन्दोषइत्यवधेयम्· मांसस्यपचियुड्घञोरित्यप्ये
तदिति·युड्घञोःप्रकृतिभूतोयःपचधातुस्तस्मिन्मांसस्यान्तंलुंपेदितितदर्थः।प्रकृतिग्रहणस्यप्रकारार्थत्वेनत।
योरपिपदन्नइतिसूत्रेणैवादेशोभविष्यतीतिभावः।अभिमानइति।एतद्बीजम्प्रागभिहितम्· मूलेपद्दन्नइतिसूत्रेछ
न्दसीत्यनुवर्त्तनन्नावित्युक्तन्त्सूचितामरुचिंसूचयन्नाह· भाष्यस्वरसइति· पदादीनाम्प्रकृत्यन्तरत्वस्यनत्सिद्धान्त
सिद्धत्वात्· क्लीववदर्थइति· नचनपुंसकशब्दस्यसूत्रोपात्तस्यगुणवाचकतयाक्लीववदर्थइत्यनुपपन्नमितिवा

च्यम्· नपुंसकशब्दस्याप्रीआद्यजन्नत्वात्· नचविभक्त्यर्थस्यसंसर्गतयाभानाभ्युपगमात्प्रकृत्यर्थनिष्ठप्रकारतानि
रूपितविशेष्यतायास्तत्रस्वीकारेवाधकाभावात्· शब्देनप्रतिपादितेर्थेविशेष्यत्वस्वीकारः सर्वसम्मतः। संसर्गताख्य
विषयतायाः प्रकारत्वविशेष्यत्वविरुद्धत्वेसाधकाभावः। अतएववन्हिनीलोत्यत्रनञर्थेवन्हिपदार्थस्यवन्हित्वावच्छिन्न
प्रतियोगिकत्वसम्बन्धेनान्वयेवन्हित्वमवच्छिन्नत्वम्प्रतियोगित्वञ्चेतित्रितयमेवविशेषणविशेष्यभावापन्नंसंसर्गइत्यु
क्तम्परैः। नकेवलसप्तम्यन्तस्थलएवविभक्त्यर्थप्राधान्यम् किन्तुप्रथमाद्यन्तेपीतिसूचयन्नाह· प्रथमायाअपीति· नतुश्री
यंज्ञानवदित्यनुपपन्नं श्रीपाणिस्यत्रैवविशेषसद्भावात् अतआह· दीर्घोन्तत्वप्रयुक्तइति· माधवमिति· यद्यत्रनुमूल्या
न्तदाटिलोपःस्यात्· अनित्यस्यवचनस्यपाक्षिकप्रवृत्तौभाष्यसम्मतिमाह· अतएवेति· पीलुशब्देतिप्रसङ्गइति· अर्थभेदे
पिशब्दैक्यमितिमतेनेदम्· नचयेनशब्देनपुमान्भाषितइत्यस्यवाचकतासम्बन्धेनपुमर्थविशिष्टस्यपुंवद्भावइत्यर्थोवा
च्यस्तचनसम्भवति। पुमर्थविशिष्टस्यनपुंसकवृत्तित्वासम्भवादितिवाच्यम्· असम्भवपरिहारायातद्गुणसंविज्ञानबहुव्री
हिसमासाश्रयणेनपुमर्थोपलक्षितस्यपुम्वद्भावइत्यर्थोवाच्यस्तथासत्यप्ययमतिप्रसङ्गइतिभावः यस्मिन्प्रवृत्तिनिमि
त्तइति· सत्सप्तम्याश्रयणेनयस्मिन् प्रवृत्तिनिमित्तेसतीत्यस्ययत्प्रवृत्तिनिमित्तप्रकारकायमर्थविशिष्यिकाप्रतीतिर्भवति
तत्प्रवृत्तिनिमित्तमन्यपदार्थः। नतोऽर्थाद्यत्वासमानप्रवृत्तिनिमित्तकत्वंलभ्यते· एवमपियदिशब्दस्यार्थभेदेप्यैक्यन्तदा
तिप्रसङ्गः पीलुशब्देतदवस्थइतिविशेष्यार्थभेदाच्छब्दभेदः स्वीकार्यस्तथासतियेनशब्देनयस्मिन् प्रवृत्तिनिमित्तेसतिपु

मान् भाषितो भवति तत्प्रवृत्तिनिमित्तवत्त्वन्तत्प्रवृत्तिनिमित्तस्यैकत्वेन पुंसकवृत्तेः सम्भवतीत्याशयेनाह· भाषणक्रि
ययेति· विनिगमनाविरहादाह· समानानुपूर्वीकत्वोपादानम्प्रद्युशब्दैः तिप्रसङ्गवारणाय· समानार्थइत्यत्रार्थः प्रवृ
त्तिनिमित्तरूपः। अतिदेशफलमाह· अयञ्चेति· तत्प्रयुक्तेति· क्लीवत्वविशिष्टार्थवृत्तित्वप्रयुक्तेत्यर्थः। नन्वेवन्नद्विष
यस्येति विहितस्वरस्याप्यतिदेशापत्तिः भिन्नकर्तृकत्वात्। ननु पद्युदात्तादिशब्दैरनुपात्तस्याविवक्षा ज्ञाप्यते· तदा चतस्रः
पश्येत्यत्र चतुरः शसीत्यस्याप्रवृत्तिसिध्यर्थन्तसप्योद्युदात्तनिपातनं करिष्यते· स निपातनस्वरश्चतुरः शसीत्यस्य बाध
को भविष्यतीत्युक्तं भाष्ये तन्न सङ्गच्छेत। प्रकृतेप्यविवक्षा स्यादत आह· त्रिचतुरोरिति· एवञ्चैतादृशे विषये विवक्षार्थ
मिवासंतियत्तइत्युक्तम्· अन्यत्रापि तत्फलमाह· वर्धादेशेपीति· अन्तोदात्तेऽनुदात्ते वोच्चारणीय इति· हन्तेर्धोनुस्वरेणान्तो
दात्तत्वात्· अनुनासिकलोपार्थमनुदात्तत्वप्रतिज्ञानादुपदेशेऽनुदात्त उच्चारत्वप्रतिज्ञानादुपदेशेऽनुदात्तत्वाच्चेति भावः
नन्वेवन्नपुंविषयस्येति सूत्रेणास्थिशब्दस्याद्युदात्ततयातस्यैकारस्यानुदात्ततयानदनुरूपेऽनुदात्ते उच्चारणीये उदात्तोच्चा
रणेनैव विवक्षासिद्धौ उदात्तशब्दोच्चारणम्व्यर्थमित्यत आह· परमास्थिशब्देति· अत्र प्रथमादिशब्देन केवलास्थिशब्दस्य
द्वितीयेनानुदात्तस्य सङ्ग्रहः। उदात्तनिवृत्तिस्वरेणः अनुदात्तस्य च यत्रोदात्तस्य च यत्रोदात्तलोप इति सूत्रविहितेन। लोपाभा
वे आह· दधनीत्यादाविति· तत्स्वरकेति· उदात्तस्वरकेत्यर्थः· अत्रापि· अस्थिदधीति सूत्रेपि· तच्च· नपुंसकपदञ्च· पुन्नपुं
सकयोः सत्त्वादिति· मकरन्दस्य मद्यस्य माक्षिकस्य च वाचकः। अर्द्धर्चादिगणपाठात्पुन्नपुंसकयो मधुइत्यभियुक्तोक्तेः। नित्य

नपुंसकेति· पूर्वोक्तभाषितपुंस्कत्वाभावात्· ननुपदिमकरन्दादिवाचकस्योभयलिङ्गत्वन्तदा मधोस्तृनाइत्यस्यविना
पिव्यत्ययमुपपन्नौ लिङ्गव्यत्ययोदाहरणपरभाष्यविरोधइत्यत आह· भाष्यइति· क्षीरवाचीति· पुंसिप्रवृत्तौयन्निमि
त्तम्मकरन्दत्वादि तस्य नपुंसके प्रवृत्तौ निमित्तत्वन्नास्तीति भावः। नित्यत्वादेवेति· तृज्वद्भावेकृते। कृतेचनुमः प्राप्तेर्नु
म नित्यः। तृज्वद्भावस्यापि नित्यतयोभयोः समत्वात्। तदेवोपपादयति· नदन्ते नुमिकृतेपीति· नुम्विशिष्टस्येति·
अङ्गस्येति शेषः। तद्ग्रहणेन· क्रोष्टृग्रहणेन· ननु निर्दिश्यमानस्य विभक्तिपरत्वाभावात्कथम्प्राप्तिस्तृज्वद्भावस्येत्यत
आह· सूत्रे षष्ठीनिर्देशाभावादिति· निर्दिश्यमानपरिभाषायाः षष्ठीस्थानेयोगेतिसूत्रसिद्धत्वात्· प्रकृते तु तृज्वत्क्रो
ष्टुरिति प्रथमानिर्देशस्य सत्वेन परिभाषाया अयमविषयइति भावः। नन्वेवन्नुमागमोत्तरं पुनस्तृज्वत्वम्प्राप्नोती
त्यत आह· सकृद्गतीति· सकृद्गतिन्यायानङ्गीकारे पूर्वविप्रतिषेधारम्भो व्यर्थ एव स्यात्· अयम्· पूर्वविप्रतिषेधः।
संकोचत्वे विभाषा तृतीयादिष्वचीति सूत्रमात्रविषयकत्वे निर्धारणस्यानेकविषये सम्भवाद्बहुवचनापत्तेराह· सौ
त्रमेकवचनमिति· समप्रविभागपक्षाभिप्रायेणाह· एचाम्पूर्वभागइति· प्रत्याहारनिर्देशे जातिपक्षस्यैवसिद्धान्ति
तत्वाद्यथासङ्ख्यं प्राप्नोतीत्यत आह॰ यथाप्राप्तमेवेति· ननु सुजाने अश्वसूक्त इत्यत्रैकमात्रिकस्यैकारस्य प्रसिद्ध
त्वात्स एव ह्रस्वप्राप्ताविकारस्य स्यादत आह· ह्रस्व एच तु नास्त्येवेति· पूर्वोक्तोदाहरणे प्रसिद्धस्तु सात्यमुग्रिराणायभी
विशिष्यविहितः। स नच्छाखामात्रविषयइति भावः। एचोश्चोत्तरभूपस्त्वादिति· प्रत्याख्यानवार्तिकानुसारेणाशङ्कतेन

भै·
१४२

ति· प्लुतावैच इदुताविति सूत्र इति· तत्र द्विमात्राऽवर्णस्य मात्राऽइवर्णोवर्णयोरिति तत्रोभयोः प्लुतविधाने उभयोर्वृ
द्धिः प्राप्नोति तद्व्यावृत्त्यर्थमिदुतोः प्लुतवचनमिति रीत्या प्रयोजनमादावुक्तम्· अयञ्च दोषो यथा गर्भो विवर्द्धमानः क्रि
यांगपरिपूर्णो विवर्द्धते· तथेहाप्यैचः शास्त्रान्तरेण प्लुत उच्यमान उभयावयवविवृद्धिरूपः प्राप्नोतीति मत्वा कृतः। त
न्वावयवस्य प्लुते सत्येकैकावयवश्चतुर्मात्रः स्यात्। ततः सिद्धं न्विदुतोर्दीर्घवचनात्· सिद्धमेतत्कथमिदुतोर्दीर्घो भ
वतीति वक्तव्यम्· तदेतत्कथं कृत्वा सिद्धं भवति। यदि समः प्रविभागः। मात्राऽवर्णस्य मात्राऽइवर्णोवर्णयोः एतेन भाष्य
कृता ऐचोश्चोत्तरभूयस्त्वादिति यद्वार्तिककृतोक्तं तन्न युक्तं पूर्वापरविरोधादित्याशयेन पर्यनुयोगः कृतः। तदेवोपपा
दयति· अथ हि। अर्द्धमात्राऽवर्णस्य· अध्यर्द्धमात्राऽइवर्णोवर्णयोः। अर्द्धतृतीयमात्रः प्राप्नोति· अथ हि· अध्यर्द्धमात्रा
ऽवर्णस्य· अर्द्धमात्राऽइवर्णोवर्णयोः· अर्द्धचतुर्मात्रः प्राप्नोति· सूत्रञ्च भिद्यते· यथान्यासमेवास्तु· ननु चोक्तं तत्र· यथे
ष्टप्रसङ्ग इति· तत्र सौर्यभगवतोक्तम्·। अनिष्टिज्ञो हि वाडवः पठति इष्यत एव चतुर्मात्रः प्लुतः। अत्र भाष्ये पूर्वोत्तरपक्षयो
र्विरुद्धयोः कथनेन विषयविभागो विनिगमकाभावान्न युक्तः। किन्तु समप्रविभाग एवेति दृढीकृतम्। सौर्य्यभगवते
ति· सौर्य्यं नाम नगरं तत्रत्येनाचार्य्येणेदमुक्तम्। किं वाडवः पठतीति· इष्यत एवेति· इदं च चतुर्मात्रकत्वं समप्रविभा
गपक्ष एवोपपद्यत इति बोध्यम्। प्रागेवात्वमिति· न ह्येषा शङ्का प्रमाणमिति रूपसाधनाभिप्रायेण· किन्तु त्रुटघटितं रू
पमसङ्गतमित्यभिप्रायेण· मानाभावादिति· एवञ्च पूर्वमात्वाप्रवृत्तौ त्रुटि सति सन्निपातपरिभाषया पुनरात्वप्रतिबन्धे

राम
१४२

दीर्घो युक्त एवेति· विषयसप्तमीत्वम्प्रकृते नव क्त मशक्यमित्याह· आत्वे कृत इति· निमित्तस्य सन्निपातस्य ह्रस्वसन्निपातस्य।त
द्विषये· तुग्विषये· सन्निपातपरिभाषाविषय इति अत्र विषयशब्दो भावप्रधाननिर्देशेन विषयत्वपरः। नन्वेवमदन्तेष्ठीवद्बहुव
चने परे दीर्घसाधनाय नामीति सूत्रस्य प्रवृत्तिकल्पनमसङ्गतम· सुपि चेत्येव तस्य सिद्धत्वादित्यत आह· नामीति दीर्घस्त्विति·
माधवाशयमाहुरिति· अत्रारुचिवीजन्तु कष्टायेति निर्देशेनानित्यायाः परिभाषाया दीर्घे कर्त्तव्ये ऽप्रवृत्तिकल्पनेपि रायो हलीति सू
त्रविहितात्कारे कर्त्तव्ये ऽप्रवृत्तौ साधकाभाव इति· नपुंसकविशेषे प्रसक्तातिप्रसङ्गं वारयति· ग्रामणीति· समुदितप्रातिपदिकेति· स
म्प्रति प्रातिपदिकसञ्ज्ञा कृदन्तस्येति ह्रस्वत्वम्बहिरङ्गम्। तुक् ह्रस्वक्विपावेव निमित्तत्वेनापेक्षत इत्यन्तरङ्गमिति भावः। न च यि
त्कृतः प्रत्ययत्वान्नेन यस्माद्विहितस्तदादेरित्यस्योपस्थितौ सौत्रह्रस्वग्रहणास्य तद्विशेषणतया यित्कृद्यस्माद्विधीयते तदादेर्ह्रस्वा
न्तस्यपि तिकृति तु गित्यर्थे तुगागमोपि समुदायापेक्ष इतिवाच्यम्· कृन्मेजन्त सूत्रभाष्ये सन्निपातपरिभाषायाः प्रयोजननिरूप
णावसरे ह्रस्वत्वन्तुग्विधेर्ग्रामणिकुलमित्युक्तम्· अत्रौत्तरपदिके ह्रस्वत्वे कृते यदि ह्रस्वस्य तुक्स्यात्तदोत्तरपदसन्निपातवि
घातः स्पष्ट एव व्याख्यातञ्चोपाध्यायैर्यदा वर्णमात्रस्य तुगागमोऽवयवावयवश्च समुदायावयवो न भवति तदेदम्प्रयोजनमिति·
तद्भाष्यप्रामाण्येन प्रकृतेपि कृत्प्रत्ययेनाक्षिप्तस्यापि तदाद्यंशस्य विशेषणात्वमेव कार्यित्वन्तु वर्णमात्रस्याशयात्· वस्तुतोऽत्रान
रङ्ग परिभाषा न प्रवर्त्तते ज्ञापकादित्याशयेनाह· येत्विति· स एवार्थ इति· उभयेर्भेदमभिप्रेत्येदम्। वस्तुतस्तूभयोरैक्यमेवेत्या
ह· किञ्च नस्याअपीति· अत एव· उभयोरप्येकत्वादेव· अनिमित्तस्यादिति· दाक्षिः प्लाक्षिरित्यत्र यथा· यद्युपजीव्यविरो[illegible]न्या
य्यस्त्वमिति परिभाषान्तरं स्यात्तदाऽनित्यत्वेन सन्निपातपरिभाषाया अप्रवृत्तिं स्वीकृत्य दोषाभावे साधितेपि द्वितीययावर्णावि

चालेचनस्यादितिदोषस्तदवस्थएवस्यात।नत्रप्राङ्गते·नचेति·प्रत्ययः इत्प्रत्ययः।सन्निपातलक्षणेन·अकारान्तप्रकृतेर्विधीयमा
नःप्रयोजनमप्रकृतिप्रत्ययसन्निपातलक्षणाःअङ्गसञ्ज्ञानर्हीति·अकारान्तप्राकृतीत्प्रत्ययसन्निपातनिमित्ताङ्गसञ्ज्ञा।तापिनिमि
त्तन्नस्यादित्यग्रिमभाष्यनात्पर्यार्थः।यद्युपजीव्यविरोधस्यान्याय्यत्वमितिपरिभाषैकवाक्यतापन्नासन्निपातपरिभाषानदायत्रोप
जीव्यविरोधप्रसङ्गस्तत्रैवसन्निपातपरिभाषाप्रवृत्तिर्वाच्या।अङ्गसञ्ज्ञाविषयेचोपजीव्यविरोधाभावेनतत्रसन्निपातपरिभाषास
त्वारेभाष्यविरोधइतिभावः।तस्यैकेति·अङ्गसञ्ज्ञानर्हीत्यस्यअन्यथा·एकदेश्युक्तित्वानङ्गीकारे·सा·अङ्गसञ्ज्ञा·नन्वेवंकृन्मेजन्त
इतिसूत्रस्थभाष्येतुविषयेवहिरङ्गपरिभाषोपन्यासविरोधइत्यत आह·ग्रामणिपुत्रइति·अत्रषष्ठीतत्पुरुषः।पूर्वोत्तरपदनिमित्ते·
एतेनह्रस्वत्वस्यवहिरङ्गत्वंसूचितम्·एकदेशिनइति·तत्वञ्चपूर्वोक्तज्ञापकवलेनकल्प्यते·इत्यजन्तानपुंसकलिङ्गाः·हलीनिय
योपश्लेषिकाधारेसप्तमीपदान्तइत्यपितयास्यादितिभ्रमवारणायाह·पदान्तेविद्यमानस्येति·अत्रान्तशब्दस्यचरमावयववाचकतया
हस्तदन्तेत्वंव्यपदेशिवद्भावेनवोध्यम्·पदस्यचरमावयवस्यह्रस्वेतितुफलितम्।प्रक्रियालाघवमात्रेणाक्तांकस्यचिच्छङ्कांनिर
स्यति·डस्त्विति·असिद्धेरिति·रूषनत्वाभावात्।व्याख्यानादिति·एतच्चाग्रेस्पष्टम्।एतच्च·दादिपदस्योपदेशिकपदादित्ववतिवर्त्त
नञ्च·ध्वननंवुत्पादयति·तत्रहीति·अदादेरितीति·एवञ्चधुगित्यत्रढत्वस्याप्राप्तिरेवनेतिनिवृत्तमिति·समासघटिकंनञ्पदम
त्रविवक्षितम्।अत्रभाष्येनेतिनिवृत्तमित्युक्तन्नत्वेतीतिनिषेधार्थकोऽशब्दोनास्तीतिलभ्यते·ननुयद्यदादिरित्युच्यते तदावादुहेत्य
तिनघत्वाभावेढत्वन्नस्यादत आह·दुहेस्त्विति·तत्रसमुच्चयार्थोवाशब्दइतिभावः।फलान्तरेति·लक्षणाप्रयोज्यशाब्दवोधफलान्तरि
तफलान्तरेत्यर्थः।दादियदाभावेपिधातुसामान्यप्राप्तघत्वस्यादादिधातौविधीयमानढत्वेनवाधेपरिशेषाद्दादेरेवघत्वम्भविष्य

तीतिभावः सामर्थ्यादिति· अनुवृत्तिसामर्थ्यादित्यर्थः। अत एवः दादिपदस्यौपदेशिकदादित्ववल्लक्षकत्वादेवः प्रत्यक्षमाख्यान
मुपदेश इति लक्षणालक्षितोपदेशविषयताविशिष्टदादित्ववद्भेदस्य दाम्लिडित्यत्र सत्त्वेन ढत्वस्य घत्वाभावस्य च सिद्धिरित्यर्थः इ
त्यर्थः। तदेकवाक्यतया· उत्तरपक्षैकवाक्यतया· अत्रैकवाक्यत्वं समानफलकमेव· न चोद्देशोपदेशयोः शङ्करेणाव्यवहारो लोके
दृश्यत इति वाच्यम्· उत्तरत्र दादिपरानुवृत्तिसामर्थ्येनात्र तयोर्भेदाङ्गीकारात्· एवञ्चोभयोः पक्षयोर्व्याख्यानाविसंवादस्तथैव व्याख्या
नमुचितम् न चैवमेवाधोगित्यत्राडागमे कृते दादित्वाभावेऽप्युपदेशे दादित्वस्य सत्त्वाद्धत्वं सिद्धमेवेत्युत्तरभाष्यासङ्गतिरत आ
ह· तदनन्तरमिति· अजानत इत्यस्य शङ्कायामित्यत्रान्वयः। एकाच इति सूत्रार्थमिति· दादेरिति सूत्रे वैयधिकरण्येनान्वयस्य स्प
ष्टत्वात् इह दैवैकाच इति सूत्रेऽपि भवतीति भावः। इहानावश्यकमिति· दादिपदलक्षणायाः सूचितत्वात्· यत्तु सीरदेवादयः। औ
पदेशिकप्रायोगिकयोरौपदेशिकस्यग्रहणमिति परिभाषायाः प्रकृते उपदेशे दादेरित्यर्थलाभ इत्याहुस्तेषाम्मतन्दूषयति· औ
पदेशिकेत्यादि· इति वक्तुं युक्तमिति· यथासंख्यन्तु न अस्वरितत्वात् ननु स्थ्वोर्ग्रहणमितरफलव्यावृत्त्यर्थं भविष्यतीत्यत आ
ह· स्थ्वोर्ग्रहणस्येत्यरेति· यथा दध धातोर्यङ्लुकि हौ दादड्ढि· अत्र हेर्ध्यादेशे कृते भष्भावः प्राप्नोति तद्व्यावृत्त्यर्थम्· तद्दाडित्या
दीति· तद्दहतीति तद्दात्· ननु धातुत्वं शरीरघटकक्रियायाः प्रधानीभूतायाग्रहणस्योचितत्वेन कथमत्र धातुत्वमत आह· अत्वस
न्तस्यापीति· अत्र धुगित्यादौ· प्रत्ययनिमित्तत्वाभावादिति· दाण्डिनायनेति सूत्रेण भ्रौणहत्येत्यत्र तत्त्वनिपातनेनं स्येषा परिभा
षाज्ञापिता एवञ्च ज्ञापकस्य प्रत्ययनिमित्तकहनस्तइत्येव सिद्धे तत्त्वनिपातनं व्यर्थमित्येवोपपादनार्हतया प्रत्ययनिमित्त[illegible]स्थ
लएव प्रवृत्तिरिति भावः। एतदंशे ज्ञापकमप्याह· अत एवेति· तस्याः परिभाषायाः प्रत्ययनिमित्तककार्यस्थलएव प्रवृत्ति स्वीकारा

भै·
१४४

दिवनचपरसञ्ज्ञायाः प्रत्ययनिमित्तकतया प्रत्ययनिमित्तकत्वं भष्भावस्यास्त्येवेति वाच्यम्· ज्ञापकसाजात्यात्साक्षात्प्रत्यय
निमित्तककार्यस्थल एव प्रवृत्तेः। अत एव प्रणड्भ्यामित्यत्र कुत्वम्। सुधियावित्यादावियङ्। प्रध्यावित्यादौ यणनभूसुधियो
रिति निषेधेन परिभाषाया अनित्यतया साधनीयः। यत्तु धातोरुच्यमानमित्यस्य धातुविशेषानुपूर्वीपुरस्कारेणोक्तत्वं तु धातुश
ब्देनोच्यमानं तदप्यत एवाचिश्नुधात्वेरनेकाचइत्येतद्विषयेन प्रवृत्तिरिति· तन्न· एवं सति प्रसङ्ख्भिरित्यत्रानुदात्तस्य चर्दुपधेत्यने
नागमापत्तेः। भाष्योक्तायास्तदवस्थत्वापत्तेः। नन्वेवमिति· यणस्थाने प्रयुज्यमानइति व्याख्याने· भाष्यविरोधादिति· यद्यदुहितरा
मित्यत्र यथासङ्ख्येन सम्बन्धमाश्रित्य दोषो वार्यते· तदा ऋकारे शाभावे यथासङ्ख्यस्य वक्तुमशक्यतयाल्कारोपदेशस्य प्र
योजनपाङ्क्ता समाधानयोर्निर्दलतया तद्विरोधायत्तेरित्यर्थः। तद्भाविततिः· तन्त्रन्यायेनेत्यादिवाक्यस्य सञ्ज्ञेतिपक्ष इति· वर्णसञ्ज्ञा
पक्षे प्रसक्तान्योन्याश्रयपरिहाराय यणः स्थाने इक् भवतीत्येवंरूपवाक्यस्य सञ्ज्ञापक्ष इत्यर्थः। इत्युक्ततयेति· अनुवादप्रदेशे वा
क्यस्य कार्यासम्भवेन लक्षणाया आवश्यकत्वात्· युभ्यामित्यादावपीति· एतेन प्रकृते यथासङ्ख्यसम्बन्धाश्रयणेऽनेकलक्ष्या
सिद्धिः सूचिता· अत एव· सम्प्रसारणाजानस्थानुवादप्रदेशग्रहणादेव· ननु सम्प्रसारणपूर्वत्वे समानाङ्गग्रहणमिति वार्त्तिकेना
क्षद्यरुणाइत्यत्र न दोष इत्यत आह· समानाङ्गग्रहणान्त्विति· एकआदिश्यत इति· सम्प्रसारणाच्चेत्यनेनेत्यादिः। स्थानिवद्भावेन
तु न सम्प्रसारणात्वमल्विधित्वात्· वचनप्रामाण्यादिति· हलइति सूत्रारम्भसामर्थ्यादेतस्मिन्कर्तव्ये नल्विधाविति निषेधस्याप्र
वृत्तिः कल्प्यत इति भावः। तुल्यन्यायादाह· न सम्प्रसारणाइति· अन्तरङ्गत्वादिति· पूर्वोपस्थितनिमित्तकत्वरूपान्तरङ्गत्वाश्रयत्वा
दित्यर्थः। अनित्यत्वादिति· नाजानन्तर्यपरिभाषाज्ञापकस्यानित्यत्व एव ज्ञापकत्वादित्यर्थः। इहाप्रवृत्तेः। एवञ्च परत्वान्पूर्वरूपे

राम
१४४

यकारस्यनसम्प्रसारणादित्यनेननिषेधः।सवर्णदीर्घस्यनित्यत्वन्तुशब्दान्तरप्राप्त्यापरिहरणीयम्· नचैवमिति· पूर्वरूप
न्नरे सवर्णदीर्घफलाभावात्प्रकृते पूर्वरूपनिष्पन्नेस्थानिवद्भावाभावेनतदादेशेसम्प्रसारणत्वाप्राप्तेरितिभावः।नस
म्प्रसारणइतिसूत्रन्तुविध्याधेयादौचरितार्थम्· स्थानिवत्त्वादिति· एवञ्चपूर्वरूपनिष्पन्नस्याचःपरस्मिन्नितिस्थानि
वद्भावेननसम्प्रसारणइतिनिषेधः।नचाचःपरस्मिन्नितिपूर्वरूपस्यस्थानिवद्भावेपिपकारस्यसम्प्रसारणनिषेधउका
रेणाव्यवधानान्नप्राप्नोतीतिवाच्यम्· यूनस्तिरितिनिर्देशेनयुवन्शब्दविषयकत्वंनिषेधशास्त्रस्यविशिष्यकल्प्यतेतेनास
मर्थ्यान्निर्दिष्टपरिभाषायाअप्रवृत्तेः।एवमेवाक्षद्युकुलमित्यत्रसम्प्रसारणाजातत्वाभावाद्धलइतिदीर्घोन· तेनालोन्त्यस्येति
ति· वाहइतिषष्ठीनिर्देशात्प्राप्तावप्यलोन्त्यपरिभाषासम्प्रसारणग्रहणस्योड्विशेषणत्वेनतन्नाव्यावर्त्यते· लाघवमूलकां
शङ्कान्निरस्यति· ह्रस्वइति· ऋूडिन्यत्रापीति· इतएवञ्चरत्वरेत्यत्रोठ्ग्रहणानुवृत्तेः।अक्षद्यूरित्यत्रहलइतिदीर्घोभविष्यती
तिशङ्कांवारयति· अनङ्गाविनेति· मूलेणिजन्ताद्दिजित्युक्तमेतेनसावसारूप्यमस्येतिप्रतीयते· परन्त्वेतन्नेतिसूचयति· अने
नेति· अङ्गभसञ्ज्ञेति· अङ्गसहितभसञ्ज्ञेत्यर्थः।एतेनकेवलभसञ्ज्ञायाव्रूषएवस्वश्वयोरित्यनेनप्रातिपदिकेपिपरेदर्श
नेनव्यभिचारात्प्रत्ययाक्षेपकत्वाभावेपिनग्रन्थासङ्गतिःनाहिशप्रत्ययाक्षेपेसतिअङ्गभसञ्ज्ञानिमित्तप्रत्ययपरोयोवाह
शब्दस्तदन्तंयदङ्गंतदवयवस्यनिर्दिश्यमानावयवस्यसम्प्रसारणमूठ्स्यादितिवाक्यार्थःसम्पन्नः।एतेनोठाऽपरनिमित्त[illegible]
त्वेनणिलोपस्यस्थानिवद्भावेपिनक्षतिरित्यपास्तम्।ननुक्विपिसतिसम्प्रसारणापत्तिरतआह· वच्यादिभ्यइति· णि[illegible]स्यस्था
निवद्भावेनापिसम्प्रसारणंवारयितुंशक्यम्।कौविधिम्प्रतीत्यस्यतुनात्रविषयतेत्याशयेनाह· प्रतिपदोक्तत्वेनेति· सम्प्रसारणा

मै॰
१४५

नुकिति विधीयतेनतुक्विशब्दमुच्चार्यविहितमितितस्मिन्नानेनस्थानिवत्वनिषेधः। तेन॰ क्विशब्दमुच्चार्यविधीयमानकार्यं
विधायशास्त्रेकर्तव्यमित्यर्थेकरणेन॰ काम्यच्सूत्रोक्तइति॰ नत्रद्वियनः सुवन्तादयंविहितोनः फलाभावात्ककारस्य त्व ... े
व्युत्पाद्यइदंतर्हिप्रयोजनमुपयइकाम्यति॰ किनीतिसम्प्रसारणंयथास्यात्॰ एतदपिनास्तिप्रयोजनम्॰ अथापिकथंचि ... ला
यं स्यादेवमपिनदोषः। क्रियतेनन्यासएव॰ सुपआत्मनः क्यच्काम्यचेति॰ एवञ्चप्रत्ययादिश्चकारस्तस्यचुटूइत्यनेनेत्संज्ञा॰ अ
थापीति॰ अजादिभिः किन्नविशेष्यंतेकार्यित्वेनैवयजादयोनिर्दिश्यन्तइतिभावः। यद्यपिवाकाम्यतीत्यादौद्वितीयपक्षेसम्प्रसारणा
म्याप्नोति॰ तथापिधातोः कार्यमुच्यमानन्तत्प्रत्ययइतिपरिभाषयासमाधेयम्॰ नफलभेदइति॰ यदिक्विशब्दमुच्चार्येत्यर्थोनस्यात्त
दाप्रकृतेक्विनिमित्तकसम्प्रसारणेकर्तव्येस्थानिवद्भावनिषेधात्सम्प्रसारणन्द्वितीयपक्षेप्राप्नोति॰ प्रथमपक्षेतुनेतिफलभेदः स्य
एवञ्चवसुनस्तुकृन्दसिसहः वहश्चेतियोगविभागकरणाद्वहश्चेतिसूत्रेछन्दसीतिनसम्बध्यते॰ नचयोगविभागः कथ्येतिसूत्रेव
हमात्रसम्बन्धार्थइतिवाच्यम्॰ एकयोगनिर्दिष्टानामेकदेशोप्यनुवर्ततइतिपरिभाषयातावन्मात्रस्याप्यनुवृत्तिसम्भवात्॰ किन्त
स्मिन्पक्षेसएइकल्नुत्याछन्दसीत्यस्यकथ्येतिसूत्रेसम्बन्धोवाच्यः। अस्याम्माननुपृष्ठौहेत्यादिभाष्यप्रयोगएवेत्याशयेनाह॰ वसु
तइति॰ अनडुहशब्दस्यान्याचः परदेशएवामोनुमश्चोत्पत्तिर्वाच्यासाचविरोधान्नसम्भवतीतिविशेषविहितेनतुमावाधाआ
मः स्यादतआह॰ मूलेविशेषविहितेनेति॰ नुमउपजीवकत्वेनेति॰ आदित्यधिकारादामोऽमश्चसद्भावएवनुमः प्राप्त्यानानेनत
योर्वाधः वैयर्थ्याभावादिति॰ यंविधिम्प्रतीतिन्यायात्॰ विषयभेदेपीति॰ तदप्राप्तियोग्यविषयेत्वचारितार्थ्यमपवादत्वेवीज
नत्त्राप्यस्तीतिभावः। ध्वनितञ्चेदमिति॰ नत्रस्वाद्यप्रत्ययशब्दस्यप्रयोजनमुक्तसनिप्रत्ययेयत्प्राप्नोतितत्प्रत्ययलक्षणेनपृथ

राम
१४५

स्यात्तल्लोपोऽन्तरंगत्वात्प्राप्नोति तन्प्रत्ययलक्षणेन माभूदिति· किम्प्रयोजनम्· ग्रामणिकुलम्· सेनानिकुलम्· औत्तरपदिके ह्रस्वत्वे कृ
ते ह्रस्वस्य पिति कृति तुगिति तुङ्मा भूदिति· आद्यप्रत्ययलक्षणसत्त्वे यथेनाद्दृष्टार्थलाभस्तथोक्तं कैयटेन प्रत्ययशब्दोऽत्र लुप्तस
प्तमीकां निर्दिश्यते· तेन प्रत्यये सति यत्कार्यं दृष्टं तल्लोपेऽपि भवतीति· न च ग्रामणीरित्यत्र क्विपि सति तुग् दृष्टो ह्रस्वाभावात्· कृते क्वि
पो लोपे ह्रस्वत्वे च तु ग्प्राप्तिः· ततो भगवता यदि तर्हि यस्मिन् प्रत्यये प्राप्नोति तत्प्रत्ययलक्षणेन लोपोऽन्तरङ्गत्वात्प्राप्नोति तन्न भवति· ज
गत्· जनगत्· इत्यत्र तुक् प्राप्नोति· लोपोऽन्तरङ्गत्वात्तु न भवति इत्युक्तम्। अत्र विलोपात्पूर्वमपि गमः क्वाविति प्राप्तिसत्त्वादनुनासिक
लोपे क्विपि सति लुकः प्राप्तिरिति चेदत्र कैयटः। युनिगमिजुहोतीनां दूर्वेति गमेः क्विप्· अन्तरङ्गत्वात्पूर्वं विलोपः। गमः क्वावित्ययं
लोपोऽङ्गविशेषापेक्षत्वाद्बहिरङ्गः विलोपस्यापरनिमित्तकत्वेनान्तरङ्गत्वमिति भावः· भिन्नविषयत्वाद्येन नाप्राप्तिन्यायेन भवति
सति त्वस्मिन्न्यायेनैव विलोपः स्यादिति। एतच्चासम्भव एवापवादत्वमिति वार्त्तिकरीत्या· वस्तुतस्त्वचिरादेशस्यानुउपवादत्वमाश्र
ङ्गननिमित्तनिज्ञापकेन भाष्यकृतानुदूसाधितस्तद्रीत्या विषयभेदेऽपि गमः क्वावित्यस्यापवादत्वं स्यात्। एवञ्च पूर्वमनुनासिक
लोपे लुकः प्राप्तिसत्त्वेन तुगभावप्रतिपादनपरभाष्यमसङ्गतं स्यादिति तेन लोपेनानुत्पन्ने स्वान्वाख्यानेन प्रत्ययलोपस्य भावरूप
स्य पूर्वकालत्वसिद्धतया अनुनासिकलोपस्यापवादत्वन्नेत्याशयः· कल्पनेनेदन्ध्वनितमित्यर्थः। एवमेव शास्त्रेणानुत्पत्त्यन्वाख्यान
स्थले प्रत्ययलोपव्यवहारादेव· तत्सूत्रोदाहरणत्वम्· प्रत्ययलोपे प्रत्ययलक्षणमिति सूत्रोदाहरणत्वमित्यर्थः। अनुवादस्थलत्व
व विधेयविषयेऽपि इत्सञ्ज्ञाविनेवोच्चारणार्थानामित्तन्निवादिमनमसङ्गतमिति सूचयितुमशंकते· नन्विति· विधेयविषय इति·
एतेनानुवादस्थले लक्षणया निर्वाहेऽपि न विधीयत इति शब्दार्थे इति न्यायेन विधेयविषये लक्षणाया असम्भवः सूचितः। न[illegible]वारण

र्थत्वमुक्तस्वर्णपूर्ववर्णोच्चारणोसहायकत्वरूपमन्यत्रहयवरडित्यादौदृष्टन्नतुपूर्ववर्णस्यतथान्यत्रदृष्टमित्यस्वरनादाह
किञ्चेति· द्वितीयवर्णोइति·सचप्रकृतेओकारः।पूर्वोक्तार्थेभाष्यान्तरसम्वादमथाह· अतएवेति· उच्चारणार्थानामित्सञ्ज्ञां
विनानिवृत्त्यभावादेव· विधेयबोधकशब्दघटकतयोच्चारितहल्विषयेव्यवस्थामुक्त्वाऽज्विषयेप्याह· तथाविधेति।अनु।
नासिकपरस्येति· अनुनासिकःपरोऽवयवोयस्येत्यर्थः· नादृशश्चञ्चिवादिरेवतेष्विकारस्योच्चारणार्थमुच्चारितस्यानुनासिक
त्वादुपदेशेऽजित्यनेनेत्सञ्ज्ञयानिवृत्तिरित्युक्तम्भवति· अतएव· उच्चारणार्थानामित्सञ्ज्ञासत्वादेव·सजादेशकरणेनेति·।
अमंस्तेत्यत्रानिदितामितिनलोपापत्तिस्तुहनःसिजितिनलोपार्थम्।किन्त्वव्यवधानेनज्ञापकेनवारयितुंशक्या·ननुभुज्युः
शंयुरित्यादौयुवोरनाकावित्यस्यातिप्रसङ्गमाशङ्क्यानुनासिकपरस्यस्थानित्वेननिर्देशःस्वीकृतः।एवञ्चल्युडादावपितादृ।
शस्यैवानुवादआवश्यकस्तथासतितदादेशस्यस्थानिवद्भावेनोगित्त्वादुगित्कार्यम्प्राप्नोतिइत्याशङ्क्याह· ल्युडादावुकारस्ये
ति· नन्वेषूकारस्यानुनासिकत्वाभावेकथमतिप्रसङ्गवारणमितिचेन्न·युवोर्यवाशब्दइवानुनासिकत्वंस्वीकृत्यतादृशानामेव।
स्थानित्वेनाश्रयणात्।अतएव·अनुनासिकत्वाभावादेव·टाबन्तप्रयोगइति· उगित्वेतुङीप्स्यात्।अमरस्यप्रमादइतिन्यदितुरायन्तप्र
कृतिकपुजन्तमेतदित्युच्यतेतदातुनदोषः।परन्तुतदर्थपरत्वसम्पाठनेक्लेशः।यदुक्तम्पूर्वत्रविधेयेतितत्फलमाह अनुवादविषये
त्विति·यथाआतोधातोरित्यादौव्यवसितानन्यत्वाभावेन·धातुप्रातिपदिकप्रत्ययनिपातागमादेशानामेवव्यवसितपदार्थत्वेनभाष्ये
उक्तत्वात्·नचातइतिविभक्तिदर्शनेनप्रकृतिभागस्यप्रातिपदिकत्वमस्त्येवेतिवाच्यम्·धात्वादिसाहचर्येणस्वस्वरूपातिरिक्तार्थबोधका
नामेवतत्रप्रातिपदिकपदेनग्रहणात्· नचतमोवरिवसितिसूत्रपठितचित्रङ्शब्दस्यस्वरूपबोधकतयाप्रातिपदिकपदेनतदसङ्ग्रहःस्या।

दितिवाच्यम्‌ सर्वस्यापि शब्दस्य स्वस्वरूपबोधकतया स्वस्वरूपातिरिक्तलौकिकार्थस्य विवक्षिततया चित्रङ् शब्दस्य तथात्वात्‌ श
ब्दार्थयोर्भेदाभेदौ स्वमतसिद्धावेवेति नाप्रसिद्धिः विभक्त्युत्पत्तिप्रयोजकप्रातिपदिकमभ्युपेत्याह फलाभावेन चेति यद्यप्यातङ् इति तका
रस्य फलं लाक्षणिकस्याप्याकारस्य ग्रहणं वर्णग्रहणे पि लक्षणाप्रतिपदोक्तपरिभाषाप्रवृत्तेः सिद्धान्तसम्मततयापि । तच्छुद्ध्येव तका
रस्य न तु इत्संज्ञकस्य तकारस्येति नोक्तसंज्ञायाः फलाभावोस्त्येव सुद्विथोरित्यादाविकारादेरुच्चारणातिरिक्तफलाभावो रूपेव नद्ध हिते ल
क्षणेति उच्चारणार्थवर्णघटितसमुदाये स्वं रूपमिति सूत्रबलाच्छक्तत्वेन क्लृप्तस्य तादृशवर्णादिते लक्षणाल्लक्षणाप्रयोजकसम्बन्ध
श्च स्वघटकसाजात्यम् सा लक्षणा न विधौ विनि विधौ विधेयबोधकपदे परः शक्यादन्यो लक्ष्यार्थः स्वबोधकत्वसम्बन्धेन नास्तीत्यर्थ
एवञ्चोदादिपदे विधेयत्वेन विवक्षिते तकारादेरित्संज्ञयैव निवृत्तिः । न चैवं प्रातिपदिकानाम्प्रतिषेधोक्तत्वद्धितान्नामिती संज्ञाप्र
तिषेधः स्यादिति वाच्यम् । चितङ् इत्याद्यनुवादसामर्थ्येन निषेधाप्रवृत्तेः । ननु यदीकानिर्देशस्तदागमहनेति सूत्रेणोपधालोपः स्यादत आ
ह गमेरिडिति वदिति अनेन निर्देशेन कः कित्पदेनाग्रहणाम् । कल्प्यत इति भावः । अत एव इकः कृत्त्वेन तदन्तस्य प्रातिपदिकत्वादेव सना
द्यन्तायात्तु करणेतु प्रकृतिवदित्यतिदेशान्नित्यत्वेन प्रातिपदिकत्वं सुलभम् । अत एवेत्यारभ्य केचिदित्यन्तेनान्यमतानुवादः अत्रारुचि
बीजं तु प्रकृतिवदित्यतिदेशानित्यत्वेनैव प्राकल्पप्रयोगसिद्धिः कार्या । अन्यथा भुवोवुगित्यादावुपपत्तिर्न स्यादिति । नन्वित्ति शङ्कायाः पर्य
वसानमाह एवञ्चेति स्वरितापत्तिः । द्योरित्यत्रौकारस्य स्वरितापत्तिः स्वरितत्वं प्रकारान्तरेणाप्राप्तमभ्युपेत्य समाधत्ते दिवइति स्वं सन
धर्मिणः । अनुदात्तधर्मवतः । फलाभावादिति तित्स्वरितमिति सूत्रप्रवृत्तिफलाभावात्‌ प्रकारान्तरेणापि तदप्रवृत्तिं साधयति तिति
प्रत्यये इति नन्वेवम्पृथिवी उत द्यौरित्यत्र पद्यमानमनोदात्तत्वन्नोपपद्येतेत्यत आह अनोदात्तमिति सुद्यौरित्यत्र स्थानिवद्भावेन

हलुङ्याद्रिलोपोयथानभवतितथोपपादयति· अनलविधवित्यत्रेति·पदादित्यनुवृत्तस्य·एङः पदान्तादितिसूत्रात् अन्तो
दात्तोनिपात्यतेइति· अन्त्यस्यदिवशब्दान्तस्यवकारस्यस्थानेप्राप्नुवन्नुदात्तोनिपात्यतेइत्यर्थः।तत्फलमाह·तेनद्युभिरितिअ
त्रदिवशब्देकारस्योदात्ततयास्त्रंसनधर्मवकारस्यस्थानेजायमानउकारोऽनुदात्तःस्यात्ततश्चेकारस्ययण्युदात्तस्वरितइत्यनेनो
कारःस्वरितःस्यादित्युकारस्योदात्तत्वनिपातनमुदात्तस्यश्रवणार्थम्।नचानेननिपातनस्वरेणऊडिदमितिसूत्रेणप्राप्तविभ
क्तिस्वरस्यापिवाधोभविष्यतीतिदिवोझलितितन्निषेधोव्यर्थइतिवाच्यम्· अहर्विमलद्युइत्यत्रपूर्वपदप्रकृति स्वरवाधनेनदिव
उत्सूत्रस्थनिपातनस्वरस्यचरितार्थतयाद्युभिरित्यत्रविभक्तिस्वरस्यपरत्वात्प्राप्तस्यनिषेधार्थन्दिवोझलितिसूत्रस्यावश्यकत्वा
त्।तथोक्तमिति·सम्प्रसारणाजातत्वाभावात्कैयटाद्युक्तिस्वरसइयति।यत्त्विति·एतेनप्रागुक्तरीत्याप्रकारान्तरेणैवदीर्घाभावस्य
सिद्धत्वेन·वव्हपेक्षस्यवहिरङ्ग·त्वम्प्राचीनमतसिद्धन्तद्रीत्यादूषणान्तरमाह·दीर्घस्यवहिरङ्ग·तयेति·अतएव·दीर्घस्यवहिरङ्ग
त्वादेव·तस्यदीर्घस्यजुगूर्षतीत्यादिखकाश·स्यात्·अतएव·वहिरङ्गत्वादेव·अत्रदीर्घस्यपरनिमित्तत्वेनापिवहिरङ्ग·त्वम्।
ष्णान्ताःषडितिसूत्रेरेफप्रश्लेषरीरौविष्टसिद्धावत्रचतुर्ग्रहणान्तकार्यमित्यभिप्रायेणाकृतामाशङ्कान्निरस्यति·रेफान्तस्यापीति·।
तिस्त्रश्चतस्त्रइत्यत्रप्राप्तातिप्रसङ्गस्यसन्निपातपरिभाषयावारणोपिचतुरशब्देऽतिप्रसङ्गमाह·चत्वारइत्यत्रेति·तत्रषड्भ्यइ
तिसूत्रे·पदलाघवाभावइति·नचषट्त्रिचतुर्भ्योहलादिरितिसूत्रेप्येवंसतिचतुर्ग्रहणान्तकार्यमितिलाघवमस्त्येवेतिवाच्यम्·ए
वमपिपदलाघवाभावस्यतदवस्थत्वात्·नचचतसृणामित्यत्रणत्वमादेशेकृतेनास्ति·स्थानिवद्भावस्तुवर्णमाश्रयोऽल्विधि
त्वादितिकथंषडित्यनेनविभक्त्युदात्तत्वमितिवाच्यम्·लक्ष्यानुरोधात्मकृतेयथोद्देशपक्षस्यैवाश्रयणेनादेशात्पूर्वंजातषट्त्व

स्यनद्यादेशेस्थानिवद्भावेनसौलभ्यात्·प्राचीनोक्तिंखण्डयति·केचित्त्विति·अर्थेपरमिति·द्विर्वचनेननिर्देशोकर्त्तव्येवहुवचननि
र्देशसामर्थ्यात्।शब्दद्वारकमिति·स्वशब्दवाचकशब्दात्परत्वमेवार्थात्परत्वम्।नन्वर्थात्परत्वाश्रयणेपिप्रियपञ्चनशब्दात्सर
स्यामः शब्दात्परमस्त्येवेत्यत आह·स्वार्थःप्रधानएवेति·तामुक्तिंखण्डयति·तन्नेति·अयम्भावः।प्रत्ययानाम्प्रकृत्यर्थान्वितस्वा
र्थबोधकत्वंव्युत्पत्तिसिद्धमिति·यद्यत्रषष्ठ्याद्यर्थप्रकृत्यर्थःस्यात्तदातेषुप्रत्ययार्थान्वयोवाच्यः सचनसंभवतीतिलाघवादाह·
परत्वस्येति·अवधित्वसम्बन्धेनेत्यादिः।एवञ्च·आरोपेसतिच·प्रथमपक्षाभिप्रायेणाह·तत्रसम्बन्धइति·द्वितीयपक्षाभिप्रा
येणाह·तन्निरूपितेति·आरोपितपरत्वनिरूपितेऽवधित्वरूपसम्बन्धेत्यर्थः।क्रियाकारकयोस्सम्बन्धस्यविभक्तिवाचिकेतिसि
द्धान्तात्।ननुप्रत्ययार्थस्यावधित्वस्यस्वाश्रयवाच्यत्वसम्बन्धेनषष्ठ्यर्थेऽन्वयोभविष्यतीत्यतआह·परम्परासम्बन्धेनेति·सा
क्षात्सम्बन्धेन·यत्रैकस्मिन्नेवपदार्थात्मकसम्बन्धेनद्वयोः सम्बन्धिनोःप्रतियोगित्वानुयोगित्वयोः सम्भवः साक्षात्सम्बन्धइ
त्युच्यते।नचतयोरेकस्मिन्परम्परासम्बन्धघटकसम्भवः ननुतथात्वाभावेपिप्रकृतेतथास्त्वित्यत आह·अतएवेति·प्रकृतिप्रत्य
यार्थयोःपरम्परासम्बन्धेनान्वयाभावादेव·गौणाधारएदाविति·गङ्गायांगावः।कूपेगर्गकुलमित्यादौ·स्वरितत्वप्रतिज्ञानादिति·
स्वरितेनाधिकारः·अधिकंकार्यमित्यर्थात्·गङ्गायांमत्स्यइत्यादौमुख्येआधारेचरितार्थासप्तमीगौणेपिभवति·यदिपरम्परास।
म्बन्धेनप्रकृत्यर्थप्रत्ययार्थयोरन्वयोपिव्युत्पन्नःस्यात्तदागङ्गायांघोषइत्यादौमुख्येआधारेसप्तमीम्विधायतत्रप्रकृत्यर्थस्यपरम्परास
म्बन्धेनान्वयोपपत्तौस्वरितत्वकल्पनाक्लेशोव्यर्थःस्यादितिभावः।अतएव·साक्षात्सम्बन्धस्यविभक्तिवाच्यत्वादेव·अतएव·उक्तरीत्या
परत्वस्यासम्भवादेव·अर्थग्रहणमिति·पक्षइति·तत्रहिस्त्रीग्रहणंस्त्रीप्रत्ययग्रहणमुतस्त्रीशब्दग्रहणमाहोस्विदर्थग्रहणमिति

भै·
१५८

पक्षत्रयसम्भावनाकृता।तेषुप्रथमपक्षेस्त्रीप्रत्ययस्यप्रतिषेधोविज्ञायेत।एवंसतिश्येनभार्यः।एनभार्य्यइत्यत्रार्थस्यानिवृत्त
त्वान्नकारश्रवणप्रसङ्गः स्थानिवद्भावप्रसङ्गे·नपटुभार्यइत्यत्रयणादेशइत्यर्थेकअगारकानामशकुनयः।तेषांकालिकास्त्रि।
यःकालिकावृन्दारिका।अङ्गारकवृन्दारिकाप्राप्नुवन्ति·हंसस्यवरटाकच्छपस्यडुली।तत्रवरटावृन्दारिकाहंसवृन्दारिकाः।डुली
वृन्दारिकाः।कच्छपवृन्दारिकाःप्राप्नुवन्तीतिदोषउक्तः।अर्थग्रहणमितितृतीयपक्षेपि।अङ्गारवृन्दारिकाइत्यादिदोषमभिधा
यशङ्कितम्।भाषितपुंस्कादित्युच्यतेतेनैनेषुनभविष्यतीति·ततएवाभिहितम्·भाषितपुंस्कानुपपत्तिश्च·तस्यार्थेनपौर्वापर्य
मस्तीति·ततःसिद्धान्तितम्·तस्माद्वस्तुमध्यमःपक्षइति·व्याख्यातञ्चोपाध्यायैः।शब्दग्रहणपक्षेसाक्षादुत्तरपदेनपौर्वापर्यस
म्भवादिति·अधिकन्त्वत्रैवस्पष्टम्·केचित्तुशब्दावधिकपरत्वस्यार्थावधिकत्वेनबाधकम्·शब्दार्थयोस्तादात्म्यात्·तस्यार्थेने
तिभाष्यन्तुतयोरौपाधिकभेदाभ्युपगमेनेतिवदन्ति।अत्रेदंवक्तव्यम्।शब्दार्थयोस्तादात्म्यमितियद्यपिसिद्धान्तिसम्मतम्।तथा
पिप्रक्रियादशायांभेदेनैवसर्वाकल्पना·अतएवस्वंरूपंशब्दस्येतिसूत्रभाष्येतत्सूत्रप्रयोजनकथनावसरेशब्देनोच्चारितेना
र्थोगम्यते·अर्थेकार्यस्यासम्भवादिहचव्याकरणेअर्थेकार्यस्यासम्भवः।अग्नेर्ढगितिनशक्यतेअङ्गारादिभ्यःपरोढक्कर्तुमिति
णोक्तम्·यदितादात्म्याभिप्रायेणव्याक्रियांभाष्यसम्मतास्यात्तर्ह्येवमुक्तिर्विरुद्ध्येत·नन्वेवंदिग्शब्दयोगेपञ्चमीतिव्यवहा
रानुपपत्तिः।तत्राप्यर्थगतसम्बन्धमादायैवशब्दसम्बन्धस्यवक्तव्यत्वादतआह·दिक्शब्दयोगइति·पूर्वत्रासिद्धमितिवचनस्य
द्वित्वविषयेपूर्वत्रासिद्धत्वन्नेत्यर्थेनद्वित्वमपिपूर्वत्वंद्रष्टव्यःसिद्धन्नेत्यर्थोपिसम्भाव्यतेतदभिप्रायेणाशङ्कते·नन्विति·णत्वा
त्पूर्वमेवद्वित्वमिति·परत्वादितिशेषः।ननुपदद्वित्वएवतस्यवचनस्यप्रवृत्तिरेह·वाक्वाक्इति·तत्प्रवृत्तेरिति·पूर्वत्रासिद्धेइति

राम
१५८

वचनप्रवृत्तेरित्यर्थः। भाष्यीयोदाहरणे वावसाने इति चर्त्वम्। अन्यथा तद्वचनप्रवृत्त्यभावे गस्यैव द्वित्वमिति। न च वावसा
ने इति चर्त्वस्य जश्त्वापवादतया चर्त्वाभावपक्षे एव गकार इति कथमेतदिति वाच्यम्। स्मान्ताः षड् इति। निर्देशेन क्वचिदपवा
दात्पूर्वमप्युत्सर्गप्रवृत्तेरित्याशयात्। अत्रार्थे भाष्यीयोदाहरणमपि मानम्। अन्त्यस्य चर्त्वे वावसाने इत्यनेन। ननु खरि चेति
पूर्वं गकारस्यापि चर्त्वं भविष्यतीत्यत आह। अवसाने इति। वर्णद्वित्वविषये परिभाषाप्रवृत्तावपि शङ्कते। न चेति। अत्रावसा
ने जायमानचर्त्वशास्त्रस्यासिद्धत्वे तेन निष्पन्नकार्यस्याप्रवृत्तिवृद्धौ ककार एव गकारवृद्धिः। गकारे। गकारवृद्धौ। उक्तरी
त्या। अवसानचर्त्वासिद्धत्वेन। गश्रवणम्। झलां जश् झशीति विहितगश्रवणापत्तिः। इत्यर्थ इति। एवं सति झलां जशीति जश्त्वे
चर्त्वं नासिद्धमिति भावः। एतेन। वक्ष्यमाणप्रकारेण। तमेव प्रकारमाह। सर्वत्रैवेति। सामान्यतो द्वित्वविषये प्राप्तस्यासिद्ध
त्वाभावस्यैकदेशानुवादरूपत्वं द्वित्व इति वचनस्येत्यर्थः। पूर्वपक्षं खण्डयति। पूर्वत्रेति। पूर्वत्रासिद्धीयमित्यस्य पूर्वत्रासिद्ध
मित्यस्याद्वित्वे इत्यस्य चोपस्थितौ रषाभ्यां परस्य नो णो भवति अपवृत्त्वे द्वित्वभिन्ने पूर्वत्रासिद्धो भवतीत्यर्थः। एतेन यत्फलितन्त
दाह। पूर्वत्रासिद्धीयमद्विपमद्वित्वे इति। रोः सुपीति सूत्रे सुपीत्यनेन प्रत्याहारग्रहणं कुतो नेत्याशङ्का निवारणायाह अत्र खरी
ति। यदि विसर्गस्तर्हि सुप्येवेति नियमो भवत्वित्यत आह। विपरीतेनेति। ननु चतुर्ष्वित्यादौ सत्यपि द्वित्वे सति विरहः। इन्द्रो हरी
ति। लोपेन रूपसिद्धेरत आह। रो रीतीति। प्रधानन्यायेनेति। प्रधानाप्रधानयोः प्रधाने कार्यसम्प्रत्यय इति न्यायेनेत्यर्थः। ननु
पञ्चब्राह्मणा इत्यादावपि पञ्चत्वसङ्ख्याया आश्रयांशे विशेषणतया प्राधान्याभावेन तन्न्यायविषयता प्रकृते न सम्भवतीत्यु
भयसत्त्वे हि स न्याय इत्यत आह। सङ्ख्यापदेनेति। प्राधान्याश्रयणेनापि गौणत्वावृत्तिमाह। अन्वर्थेति। षड्ब्राह्मणा इत्यत्रय

याषट्शब्देप्रयुक्तेऽन्यव्यवच्छेदोभवतिसङ्ख्येयस्यप्राधान्येनप्रतीतिर्भवति तथाप्रकृतेपिषडिवाचकत्वाऽन्यर्थेनविवक्षित
मितिभावः। अस्याः। षट्सञ्ज्ञायाः। डुसञ्ज्ञयेति। नहितदानिरुक्तार्थकत्वमस्यभवतीतिभावः। ननुडुसञ्ज्ञापक्षेताद्दृशार्थकत्वाभा
वेपिषट्सञ्ज्ञापक्षेतुसम्भवोऽस्त्येवेत्यतआह। सर्वनामेत्यादि। मुख्यंसमाधानमाह। सर्वनामसञ्ज्ञासूत्रस्थेनेति। अङ्गाधिकारेय
दुच्यतेगृह्यमाणविभक्तेस्तद्भवतीतिभाष्येणेत्यर्थः। तस्मान्नैरिपद्वसत्वेनुड्व्याघ्रन्निरेवसम्पादनीयेतितत्वम्। नन्वयमस्तिक
तृहन्नेइतिभाष्यादिति। आदौनपदान्ताःपरेऽणाइतिसामान्यतोऽभिहितन्ततोऽनन्वयमस्तीत्यनेनपरोऽणाअत्रूपएवदर्शितन्ननु
हलरूपइतिपरस्याणोऽनुनासिकत्वयोग्यस्याद्रूपस्यस्वीकारःसम्भवतिनतुहलः। अत्रानुनासिकत्वयोग्येत्यभिधानात्। स्वरअन्त
रप्रातरित्यसलिहइत्यस्यचसत्वेपिनक्षतिः। तेषामनुनासिकत्वयोग्यत्वासम्भवात्। अमोनुनासिकानह्राविसुक्तेः। कमलित्य।
त्रलकारस्यताद्दृशस्यसम्भवेपिनन्वयमस्तीत्यनेनाचएवप्रदर्शनेनतस्याप्यनभिधानम्। ननुएयन्तकतिपयपयाहिसम्भवोस्त्ये
वेत्यतआह। क्विपीति। नचप्राग्दीव्यतोणित्यत्रयथादीव्यतिशब्दैकदेशदीव्यच्छब्दानुकरणान्तथाकतिपयशब्दैकदेशयान्तानु
करणेयान्तसम्भवोऽस्त्येवेतिवाच्यम्। पूर्वोक्तभाष्यस्वारस्येनानुकार्येस्वरूपभङ्गभियाचतत्रानुनासिकत्वयोग्यतायाःसम्भ
वेप्यनभिधानकल्प्यतइतिभावः ननुप्रशामशब्दस्यस्वरादौपाठिनाव्ययत्वमितिप्रशामाविस्याद्यनुपपन्नमतआह। अयमिति
अव्ययमितिमहासञ्ज्ञाबलेनासत्ववाचिनोग्रहणे। नास्यनत्रपाठश्चरितार्थः। स्वरादीनान्तुपाठसामर्थ्यात्सत्वार्थकत्वेप्यव्य
यत्वम्। मूलेकिमःकस्यादिति। अत्रकिम्शब्दोजिज्ञासितेशक्तः। अत्रेदमवधेयम्। उद्देश्यवाचकस्याकिंशब्दस्यविधेयवाच
कशब्दसमभिहारेतत्पदोपस्थाप्यतावच्छेदकधर्मावच्छिन्नविधेयतानिरूपितोद्देश्यतावच्छेदकत्वोपलक्षितोयोवक्तुर्जि

ज्ञासितो धर्मस्तद्धर्मावच्छिन्नबोधकतावाच्या· सच धर्मः कोब्राह्मणः कः पण्डित इत्यादौ चैत्रत्वादिरूप एव· ननु जिज्ञासावि
षयतावच्छेदकांशे तस्यानुगमकस्य शक्यैक्यसम्पादकस्य धर्मस्य विशेषणत्वम्। तेन रूपेण जिज्ञासाविषयतावच्छेदकध
र्मस्य शाब्दबोधे भानाभावात् एवञ्च कोब्राह्मण इत्यतो ब्राह्मणत्वावच्छिन्नविधेयतानिरूपितोद्देश्यतावच्छेदकत्वेन जिज्ञा
सितो यो धर्मस्तद्वान् ब्राह्मण इत्याकारकोऽन्वयबोधः श्रोतुर्वक्तुश्च किञ्चिद्धर्मावच्छिन्नोद्देश्यतानिरूपितब्राह्मणत्वावच्छि
न्नविधेयताशालिज्ञानम्मे जायतामित्याकारिका जिज्ञासा प्रथमम्भवति सा च वक्तृवाक्यजन्यसमभिव्याहृतब्राह्मणादिप
दार्थतावच्छेदकावच्छिन्नविधेयतानिरूपितकिञ्चिद्धर्मावच्छिन्नोद्देश्यताकबोधेन निवर्त्तते। न चैवम्प्रमेयो ब्राह्मण इति
वाक्यादपि तादृशजिज्ञासानिवृत्तिः स्यात्। एतद्वाक्यस्य किञ्चित्प्रमेयत्वादिरूपधर्मावच्छिन्नोद्देश्यकबोधजनकत्वादिति वाच्य
म्· पूर्वोक्तानुगमकधर्मोपलक्षितधर्मस्य विधेयन्यूनवृत्तित्वेनापि विशेषणीयत्वात् विधेयबोधककिम्पदस्य तु समभिव्याहृत
पदार्थतावच्छेदकत्वोपलक्षितधर्मावच्छिन्नोद्देश्यतानिरूपितविधेयतावच्छेदकतया जिज्ञासितो यो धर्मस्तदवच्छिन्ने श
क्तिः। यथा द्रव्यं किमस्तीत्यादौ। यत्र सर्वनामसञ्ज्ञकः किंशब्दः प्रयुज्यते तत्र पूर्वोक्तादृशबोधः कल्पनीयः वितर्कबोधककिं
शब्दस्य त्वव्ययसञ्ज्ञकस्य प्रयोक्तृसमवेतसम्भावनात्मकज्ञानबोधकता। यथा किमिन्दुः किम्पद्मं किमु मुकुरबिम्बं किमु मु
खमित्यादौ तादृशज्ञाने च प्रकारितासम्बन्धेनेन्द्वादिपदार्थस्यान्वयः। तादृशज्ञानस्य तु विशेष्यतया प्रथमान्तार्थेऽन्वय इति·
यत्र नु कति घटाः सन्तीति प्रयुज्यते तत्रापि जिज्ञासित एव किम्पदार्थः डतिप्रत्ययार्थः सङ्ख्यात्वावच्छिन्नः एवञ्च सङ्ख्या
त्वन्यूनवृत्तिदशत्वाद्यवच्छिन्नोद्देश्यतावच्छेदकताकज्ञानं जायतामित्याकारकजिज्ञासाविषयाभिन्नसङ्ख्याविशिष्टाः सन्तीति बो

भै·
१५०

धः।दृश्यघटाःसन्तीतिवाक्यान्तराआकाङ्क्षानिवर्त्तनीया।यत्रकस्यराजापुरुषइत्यादावुद्देश्यतावच्छेदकीभूतषष्ठ्यर्थेकिंश
ब्दार्थान्वयस्तद्वायादृशधर्मविशिष्टसम्बन्धेयेनसम्बन्धेनजिज्ञासितान्वयस्तत्रतेनैवसम्बन्धेनविशेषधर्मावच्छिन्नान्वित
तादृशसम्बन्धधर्मितावच्छेदकबोधः।एवंसर्वत्रोहनीयम्।नन्वव्ययसर्वनाम्नामितिसूत्रेणकिंशब्दादकचिकृतेशब्दान्तरत्व
दादेशोनस्यादतआह·तन्मध्येति· ननुस्वार्थेपरिपूर्णस्यकुत्साद्यर्थसम्बन्धइत्यन्तरङ्गत्वात्पूर्वंकादेशेऽकचिकृतेकइतिस्यादत।
आह·अङ्गानपेक्षत्वेनेति·अङ्गसंज्ञापेक्षप्रत्ययानपेक्षत्वमर्थः।यद्यपिप्रियकुत्सनादियोगःसुबन्तस्यास्ति।तथापिसुपःश
ब्दतोनिमित्तत्वेनानुपादानादन्तरङ्गत्वमकचः।कादेशेतुविभक्तेःशब्दतोनि[illegible]त्वेनाश्रयणाद्बहिरङ्गत्वमितिभावः।अतए
व·तन्मध्यपतितन्यायविषयेपिनिर्दिश्यमानपरिभाषाप्रवृत्तिस्वीकारादेव·अन्तरङ्गत्वादिति·अकचः·कुत्साविषयतिङ·
न्ताद्विधानेनबहिरङ्गत्वन्त्यादेशस्यतुतदन्तर्गतहिरङ्गापेक्षत्वेनान्तरङ्गत्वमितिभावः।कैयटइति·एतेनारुचिःसूचिता।अयमा
स्थानिवद्भावविषयेस्थानिबुद्ध्यैवकार्यप्रवृत्तेस्तद्विषयेपिनिर्दिश्यमानपरिभाषायाअप्रवृत्तिकल्पनेनैवसाकच्कस्यादेशास
द्भावावृत्त्याश्रयणमभ्यर्थमिति·एतेननिर्दिश्यमानपरिभाषायाव्याख्यानावसरेपरिभाषेन्दुशेखरेऽकज्विषयेनिर्दिश्यमान
परिभाषायाअप्रवृत्तिरुक्ताइहतुसाकच्कस्यकार्यप्राप्तौनिर्दिश्यमानपरिभाषाप्रवृत्तिंस्वीकृत्यसमाधानंकृतमितिविशे
षइतिनदेतेनप्रत्युक्तम्० इदमोमः।यद्यपिइदमस्तुसन्निकृष्टंसमीपतरवर्तिचैतदोरूपम्।अदसस्तुविप्रकृष्टंतदितिपरोक्षेवि
जानीयादित्यभियुक्तोक्तवचनेनसन्निकृष्टसामान्येशक्तिरिदम्शब्दस्येतिलभ्यते· सन्निकर्षश्चपरमाण्वादिसाधारणोऽस्त्य
यम्परमाणुरित्यादिव्यवहारापत्तिः।तथापिसन्निकर्षप्रयोज्यायालौकिकविषयतातच्छालिनीयावद्वृत्तिस्तद्विषयेइदम्शब्दस्य

राम
१५०

तादृशबुद्धिविषये समीपपर्य्यैचैतदः शक्तिः मात्रालाघवानुरोधेनाह हल्यश्चिनीति शित्वात्सर्वादेशोऽयम् गोणोऽनादेशाप्र
वृत्यर्थमन्यदादीनामिति केचिदनुवर्त्तयन्ति तदयुक्तमिति सूचयन्नाह अकइति पर्युदासादिति संयोगवद्धिप्रयोगस्य विशेषा
वगतिहेतुत्वादवत्साधेनुरानीयतामित्यत्र सम्भवद्वत्ससम्ब[illegible]नीया गौः सैवानीयतेनतथेहाप्यकइत्यनेन ककारयोग्यतावा
न्व्यावर्त्तनइति भावः।नानर्थकइति परिभाषाया अभावेपि हलि लोपइत्यत्र यथा दोषाभावस्तथाह प्रत्याख्यानइति आद्यन्त
शब्दयोरवयवबोधकतयाऽवयवस्य चावयविनम्प्रति नित्यसाकाङ्क्षत्वेनाह विशिष्टशक्तयेति आदिशब्दस्य स्वाव्यवहितो
त्तरत्वसम्बन्धावच्छिन्नप्रतियोगिताकस्वघटितसमुदायघटकवर्णाभावविशिष्टयत्तादृशसमुदायघटकवर्णस्य स्वपूर्वत्वस
म्बन्धेन वैशिष्ट्यन्तद्विशिष्टे शक्तिः।अन्तशब्दस्य तु स्वपूर्वत्वसम्बन्धावच्छिन्नतादृशसमुदायघटकवर्णस्य योऽभावस्तादृशस
म्बन्धेन तादृशसमुदायघटकवर्णविशिष्टस्तत्र शक्तिः।उभयत्र वैशिष्ट्यं स[illegible]धिकरण्यसम्बन्धेन असद्भावेनैस्सुरिति
सर्वत्र विशिष्टाभावसत्वात्।उपमेयइति एकस्मिन्निति सप्तमीदर्शनादित्यर्थः।मथुरावत्पाटलिपुत्रे प्राकारइति वाक्यात्पा
टलिपुत्राधिकरणकप्राकारतोल्यप्रतीतेरेवानुभवसिद्धत्वादिति भावः।इतिस्थितइति अस्य पदाद्यत्वेकृतइति शेषः ननु सै
आदेशे कृतेपि अनादेशस्य प्राप्त्याऽनादेशस्यापि स्मैभावन्तु[illegible]सत्पानित्यत्वान्ङेः स्मैइत्यनुपपन्नमत आह स्मैआदेशेति अ
कोरित्यनयोरिति अनाप्यकइत्यस्य नेदमदसोरकोरित्यस्य चेत्यर्थः।उभयत्रापीति सावकाचइति सूत्रे पकर्षेणानोदात्तादि
त्यस्योडिदमिति सूत्रे चानुवृत्याऽनोदात्तादित्यस्य सम्बन्धादित्यर्थः।सर्वानुदात्तमिति प्रकृतिरनेन प्रत्ययस्त्वनुदात्तोसुप्पिता
वित्यनेनानुदात्तइति भावः।अत्रार्थे साधकमाह एभिरयइति यथास्यसाकच्कार्थत्वन्तदाह शित्वादिति उत्तरसूत्रेति तत्र

हित्वात्तसो निमित्तत्वेनोपात्तौ तयोश्च सञ्ज्ञोपसर्जनयोरसम्भवात् सर्वनामसञ्ज्ञाकस्यैवस्थानित्वमिति सुत्रस्सूत्रेणाजायमा
नादेशस्य सञ्ज्ञोपसर्जनभिन्नस्यैव बोध्यत्वमित्यर्थः। अधिकारानुरोधान्पूर्वसूत्रस्थमशग्रहणमपि सञ्ज्ञोपसर्जनभिन्नस्यैव बो
धकमिति भावः· अन्यार्थत्वापत्तेरिति· अन्यस्य त्यदाद्यत्वेन सिद्धाववेनाकारादेशविधानमनन्यार्थं स्यात्तथा चानन्यवि
कार इति परिभाषया त्यदाद्यत्वोत्तरमनेन दकारस्यात्तदर्थम्भोराज्ञोतिवद्धिकारमात्रबाधनार्थं वा एतत्स्यादित्यर्थः· यष्टि
श्चेदम्भाष्य इति· तत्र हि अन्वादेशश्च कथितानुकथनमात्रन्द्रष्टव्यम्। तद्धेश्यं विजानीयादिदमाकश्चिन्निर्दिश्यते यदानु
कथ्यत इति तदाचार्यः। सुहृद्भूत्वान्वाचष्टे। अन्वादेशश्च कथितानुकथनमात्रमिति· मूलेन लोपङ्गतः आत्तनस्य लोपो नेत्य
र्थोपि सम्भाव्यत इत्यनोव्याचष्टे· नकारलोपइति· कार्यकालपक्षाभिप्रायेण शङ्कते· नचात्रेति· प्रत्ययलक्षणसम्भ
प्रतिषेधः स्यात्तदा प्रकल्प्यापवादन्यायेन पूर्वम्प्राप्तिपदिकसञ्ज्ञायाअप्रवृत्तिसम्भावनास्यादिति भावः। ध्वनितञ्चेदमिति
तत्र हि कार्यकालपक्षाभिप्रायेणाग्नीइत्यत्राप्रगृह्यस्येत्यनुनासिकाभावेतन्निषेधक्रियमाणे प्लुतस्यासिद्धत्वाद्द्विमात्रत्वाभावात्प्र
गृह्यसञ्ज्ञाईदूदेदिति विधीयमाना न प्राप्नोतीत्याशयेन। एवमपि यत्सिद्धे प्रगृह्यकार्ये न न प्लुतस्य न प्राप्नोतीत्याशङ्कयन्तर्यादे
शपक्षमाश्रित्येदं समाहितम्। यथोद्देशेपि शङ्क्यते। नचेति· निषेधाप्रवृत्त्येति· अप्रत्ययइति निषेधाप्रवृत्त्येत्यर्थः। यदुक्तं छन्द
सीति तदुपपादयति। राजनीत्याशाविति· अत एव अनभिधानादेव· नलुमतेति निषेधानित्यत्वे लाघवमप्याह· एतदनित्यत्वे
पि· अल्पप्राणत्वादीति· अत्रादिना निरनुनासिकत्वपरिग्रहः· लुक एवोचितस्यादिति· एवञ्च पूर्वोक्तरीत्या नलुमतेति निषेधानित्य
त्वकल्पनमेव वरम्। एतद्वलल्लभ्यमेवेति· ङौ निषेधस्योत्तरपदे· छन्दसि यत्र सुपामिति ङे· र्लुकं तत्र वा सम्भवस्तयोर्मध्ये

उत्तरपदेप्रतिषेधान्यरिशेषाच्छंद[illegible]वोदाहरणम्। वाहऊडित्यत्रत्वापिनत्वेनेति· इदमन्यत्रनिरूपितम्· ननु[illegible]
कारकंवचनम्सुनित्रयानुक्रमित्य[illegible]माएयशङ्क्यायामाह· ज[illegible]रोर्इइति· शिक्षादाविति· त्रिषष्टिश्चतुष्षष्टिर्वावर्णाःसम्भवतोमन
इतितत्रोक्तेः। अतएव· वर्णान्तराभावादेव· स[illegible]विभक्त्यन्ते[illegible]अत्रसर्वशब्दोयथासम्भवमनेकार्थकः। तत्राप्येकस्मादनेकवि
भक्त्यसम्भवादनेकविभक्त्यर्थान्त[illegible]र्भावायषष्ठीकृत्वासमासः[illegible]र्यइतिभावः। भावसाधनमिति· अत्रभावोधात्वर्थः। तस्मि
न्बुद्धिस्थेसतिविधिशब्दः क्रियतेऽनोभावसाधनइत्युक्तम्। धात्व[illegible]र्थस्यप्रथमसुपस्थितत्वात्तदनुसा[illegible]णाह· तत्रस्वरादीनिय
द्यपिसूत्रेसुपशब्दः प्रथममुच्चारितस्तथापिभावसाधनस्यप्रथमोक्तत्वात्तदनुसारेणादौस्वरादीत्युक्तम्। स्वरोदाहर[illegible]
ापञ्चामेम· अत्रनलोपस्यासिद्धत्वेसत्यमेचावर्णाद्यच्यजिनिस्वरान[illegible]र्मसाधनः। विधीयमानइत्यर्थः। सुविधीयथा· रा
जभिरित्यादि· अत्रैसभावोनासुविधिशब्देऽनेकविभक्त्यर्थान्तर्भावाद्राजभ्यांराजस्वित्यादिसिद्धम्। अत्रतुकुशब्दस्य[illegible]
मित्तत्वेनवृत्रहेच्छत्रमभ्रूणह[illegible]येत्यत्रतुङ्[illegible]स्यानित्येदृ[illegible]नित्तुगिति· नचैवंवृत्र[illegible]स्युपादानंसफलमि[illegible]तसामर्थ्यात्तुकएव[illegible]
विशेषणमित्युक्तसङ्गतिरितिवाच्यम्· सामर्थ्यादित्यस्यस्वार्थान्वययोग्यतावच्छेदकधर्म्मवत्त्वादित्य[illegible]· अन्यनिवृत्तिफ
लकइति· एवमभिधानेनान्यनिवृत्तेरशब्दत्वंसूचितम्· [illegible]द्धविषयक[illegible]ति· सिद्धः शास्त्रान्तरसिद्धोविषयोयस्येत्यर्थः। अ[illegible]व·
नियमस्थलेऽन्यनिवृत्तेः फलितत्वादेव· भक्ष्यनियमइति· अ[illegible]नियमपदोपादानेनपरिसङ्ख्यापिनियमएवेतिभगव[illegible]ध्व
नितम्· तदाह· तदेवसूचयन्नाह· अवच्छिन्नोद्देश्यकत्वमिति· अत्रोद्देश्यत्वंस्थानित्वनिमित्तत्वान्यतरत्वरूपम्· निमित्तत्वञ्च
यद्बुद्धिर्यत्कार्यप्रयोजिकातत्त्वम्· अतएवदण्डिष्वित्यत्रविधायकत्वशङ्कासङ्गच्छते· तत्रादेशविधायकत्वादेशप्रत्यययोरि

भै॰
१५२

त्यस्य प्रवृत्तौ प्रत्ययत्वावच्छिन्नस्य बुद्धिर्निमित्तमस्य यत्वन्त्वनैतादृशमितिभावः। इदमिति॰ सुविधिपदमित्यर्थः। नच भि
स्त्वस्य सुप्त्वव्याप्यत्वाभावेन तदवच्छिन्नोद्देश्यकैसादेशोपि नियमत्वानुपपत्तिरिति वाच्यम्॰ केवलभिस्त्वस्य सुप्त्वव्याप्य
त्वाभावेपि निमित्तनावच्छेदकस्याङ्गसञ्ज्ञाप्रयोजकत्वविशिष्टभिस्त्वस्य सुप्त्वव्याप्यतया तदवच्छिन्नोद्देश्यकादेशस्यासि
द्धत्वादापो निषेधरूपम्प्रयोजनम्मूलेएवस्फुटम्॰ तथापि तत्र षट्सञ्ज्ञांविना लुको प्राप्त्यानलोपस्यैवाप्राप्तिः स्यादतः षष्ठ्यन्त
षट्सञ्ज्ञाप्रवृत्तिर्वाच्यातामादाय यथोद्देशपक्षाश्रयणेन तत्प्रयोजनमन्यथासिद्धम्॰ नच पञ्चभिः सप्तभिरित्यत्र नलोपासिद्ध
त्वेन षट्त्वेरुत्युपोत्तममिति सूत्रप्रवृत्तिः प्रयोजनमिति वाच्यम्॰ स्वरविधावित्यैव सिद्धेरत आह॰। सञ्ज्ञाविधावित्यादि॰
दण्डिदत्तौ॰ दत्तदण्डिनाविति॰ एवरूपोदाहरणपि शक्ये भाष्ये अत्रैव सञ्ज्ञाविधावित्यस्य प्रयोजनकथनादृष्टाविति विधी
यते॰ अत एवोक्तमिष्यते त्वनियम इति॰ पूर्वनिपातेन लोप इति॰ परनिपाते तूत्तरपदत्वेचापदादिविधाविति निषेधः। पदस
ञ्ज्ञायाः सत्वादितिभावः। इति सूत्रार्थात्॰ एतादृशार्थे प्रकृतोदाहरणे प्रयोजनकथनपरम्भाष्यमेवमानम्। कृतितुग्विधा
विति॰ अत्र गमकत्वाद्वृत्तिः। अस्मादेवेति॰ कृतितुग्ग्रहणादित्यर्थः। यदि सञ्ज्ञाकृतं वहिरङ्गत्वमप्याश्रीयते तदा न लोपे तुको
कर्त्तव्ये पदसञ्ज्ञासापेक्षनलोपस्यासिद्धत्वात्तुगभावे सिद्धे कृतितुक्ग्रहणम्व्यर्थं स्यात्॰ नन्वत्र लोपे सन्नन्तरङ्गस्त्वेवञ्च पदसंवहिर
ङ्गमित्याश्रित्य सञ्ज्ञाया अधिकाराद्वा आश्रयणाद्वहिरङ्गत्वमितिनवदामः। किन्तु वहिर्भूतमिस्तनिमित्तकपदत्वनिमित्तकत्वे
न नलोपस्य वहिरङ्गत्वं वदाम इति चेन्न त्राह॰ वहिर्भूतनिमित्तकेति॰ सन्निपातपरिभाषयेति॰ अवयवावयवस्य समुदायाव
यवतयात्त्रहभिरित्यत्र तु किंसनोभिसः सन्निपातविघातः स्पष्टएव॰ ननु यत्रानुवर्त्तितविभक्त्याश्रितो न लोपस्तत्रैव वक्त्र

एम
१५८

हृधनमित्यादौतुकम्व्यावर्त्तेयितुन्त [illegible] स्त्वित्यनउ [illegible] सन्निपा [illegible] निमित्तकेति· तदभावे· तुग्ग्रहणाभावे· सन्निपातपरिभाषया
छ्निमित्तकतुकोपिव्यावृत्तिः स्या [illegible] तिनियमार्थं [illegible] तितुग्ग्रह [illegible] मस्त्वित्यभिप्रायेणाशंकते। नचसन्निपातेति· केचित्तुद्वन्द्वे
घीतिसूत्रस्थविशब्दस्यपूर्वोक्तान [illegible] पाश्रयपरिहारायभाविवि [illegible] श्रयेलक्षणामाश्रित्यानि [illegible] मस्यदण्डिदन्तौदन्तदण्डिनावित्य
त्रसिद्ध्यर्थेप्रकृतसूत्रेसञ्ज्ञाग्रहण [illegible] करणापक्षया [illegible] सञ्ज्ञाप्रवृत्ति [illegible] नेयस्यघिल्वन्तत्पूर्वम्प्रयोज्य [illegible] प्रकृतेद्वन्द्व
सञ्ज्ञाप्रवृत्तिकालेनलोपस्यासि [illegible] गनयमः [illegible] एवंतेप्रकृतसूत्रेसञ्ज्ञा [illegible] कृत्ते [illegible] [illegible] नुशब्दस्यपू [illegible] पद
घीतिसूत्रस्थविपदस्यभाविवित्वाश्रये [illegible] श्रीयनेतदाभानु [illegible] [illegible] नियमः [illegible] यमः सिध्यती
लेतुकाभवितव्यमितिभाविवित्वस्या [illegible] सञ्ज्ञाप्रवृत्ति [illegible] कघिल्वस्या [illegible] निपातप्रयोज [illegible] माश्रित्यप्रकृते
त्याहुः। तत्रेदंचिन्त्यम्· द्वन्द्वस [illegible] कालिकं [illegible] पूर्वनिप [illegible] योजकमा [illegible] श्रित्यपूर्वोक्तानियम [illegible] सा [illegible] नद
सूत्रस्यसञ्ज्ञाग्रहणाकरणोपपादनमशक्यम्· [illegible] देवदत्तौ। वि [illegible] तप्रभित्यषाविसपादौपूर्वनिपातौ [illegible] एवं [illegible] प
इकोह्रस्वोङ्यागालवस्येतिसूत्रेणाह्रस्वत्वेकृते [illegible] सञ्ज्ञास्यान्ततश्चगन्त [illegible] वपूर्वेनिपातइत्येवंनियमः सि [illegible]
ह्रस्वभाविवित्वाश्रयेलक्षणायाआवश्यकत्वेदण्डिदन्तौदन्तदण्डिनावि [illegible] यमासिध्यर्थम्प्रकृतसू [illegible] सञ्ज्ञाग्रह [illegible]
वश्यकत्वात्· अतएवप्रकृतसूत्रभाष्येसञ्ज्ञा [illegible] स्पदम्प्रयो [illegible] दस्य भाविवित्वाश्रये [illegible] वल्लक्षणातदा
ङ्घीतिसूत्रस्यहरिहरावित्यत्रहरिशब्दस्यपूर्वनिपा [illegible] प्रये [illegible] चकृतहरिशब्दस्य [illegible] सञ्ज्ञायाम्पूर्वनि
पातस्याप्रयोजकत्वादितिवा [illegible] द्वन्द्वे घीतिसूत्रस्य [illegible] विपदस्यतन्त्रेणाशक्यलक्ष्योभयपवोधकत्वात्। यदितु लक्षणाहेतोरिनि

मि·
५३

सूत्रेहेतुशब्दस्यपरनिपातकरणेनपूर्वनिपातप्रकरणमनित्यमितिभाव्यते तदादशिङ्दंनीदतदशिङ्नाविस्मापयन[illegible]यासननिर्वह
नीतिप्रकृतसूत्रस्थसञ्ज्ञाग्रहणमकर्तुंशक्यमाइदमिति·तुग्ग्रहण[illegible]यश्[illegible]भावे·[illegible]ग्रहणाभावे·व्यधिकरणमिति·तेनपद्म
वयवस्यैकइत्यर्थःपर्यवसन्नः।तेनेति·सर्वनामस्[illegible]ग्रहणसम्बन्धे[illegible]न·यादेना[illegible]नामस्थानग्रहणसम्बन्धःस्यान्नदासर्व
नामस्थानेपरस्यदिदीर्घइनादीनान्नदाशावेवेतिनियमःस्यान्नदादेत्रहणीस्[illegible]स्यादिति।ननुनियमशास्त्राणांविधि[illegible]पे
णाप्रवृत्तेःसिद्धान्तित्वादितिनिषेधेप्राप्तइत्यनुपपन्न[illegible]मत[illegible]आह·एतन्क[illegible]भूतइति·नियमस्येतरनिवृत्तिफ[illegible]न·य
पिशिश्वोरितिन्यासेनमात्रालाघवन्तथापिपदल[illegible]नप्रायसाक[illegible]नामाशङ्कान्निरा[illegible]वेष्टशिश्वोरितिव[illegible]न्तत्र्य
इति·अत्वसन्तस्येतिसूत्रार्थः।त[illegible]धे·ननुयेन[illegible]धानन्य[illegible]शीनमसत्तम्·एत्नहयतीत्यादौव[illegible]वधानाभावेपि
णातिप्राप्तिसत्वादित्यतआह·इदमिति·[illegible]धानेस[illegible]वादिति·[illegible]रपरेकुत्वा[illegible]धानसामर्थ्या[illegible]तावद्[illegible]धानस्य[illegible]नाभि
नत्वमाश्रीयतइतिभावः।णत्ववारणा[illegible]मातंचतिप्राप्तणत्ववारणाये[illegible]ोपपुन[illegible]त्रातिव्या।ननुवार
कम्·कुमतिचेत्यस्यचेति·तेनवर्[illegible]घ्नः[illegible]णाति[illegible]ष्ड्ः।णद्युपि[illegible]म्पयाजनंसा[illegible]विभा[illegible]ग[illegible]र्थ[illegible]तथापिचनाघ
नःप्राघानीत्यर्थेमुपायान्तरस्याव[illegible]यकनेनमे[illegible]हादेशेकुब्य[illegible]इतिवार्तिकमनपूर्वग्रहण[illegible]स्योपप[illegible]स[illegible]लेनवगतार्थ
मृतथापिचनाघनःप्राघानीत्यर्थे[illegible]यथा।नरस्यावश्यकत्वेनसेत्र[illegible]ा।हादेशेकुब्यवायइतिवार्तिकमनपूर्वग्रहणस्योपलक्ष
णत्वेनैवगतार्थमितिकेषाञ्चिन्मतमनुसारेणाह·इदमनपूर्वस्य[illegible]णामिति·अनपूर्वस्यैवेतियथाश्रुतनियमेतुवहुव्रीहाणीत्य।
त्राव्याप्तिःस्यादितिभावः।वहिरङ्गदी[illegible]घइत्वाद[illegible]त्ययस[illegible]सत्वेनदीर्घस्यवहिरङ्गत्वम्·यथोद्देशएवेतिएवञ्चानरङ्ग

राम
१५३

स्यणत्वस्यासिद्धत्वयाव हिरङ्गपरिभा[illegible]षयाअप्रवृ[illegible]रितिभावः तत्पक्षेपिःकार्यकालपक्षेपि इत्यत्रदोषाच्चेति· एवञ्चात्रसू
त्रमनेणत्वम्प्राप्नोति·वार्तिकमतेतुने[illegible]फलभेदः।[illegible]तिमत्परि[illegible]।यात्पूर्वग्रहणस्योक्तार्थोपलक्षकत्वाश्रयणमावश्यकम्·
वस्तुतस्तुयोगविभागकरणमन्पूर्वग्र[illegible]हणस्योपलक्षणत्वञ्चाश्रय[illegible]त्तदपेक्षयावार्तिकारम्भएवोचितइति·।कुव्यवायेहादे
शेष्विति·अत्रकुव्यवायपदङ्कुव्यवध[illegible]नमिति[illegible]णत्वविधिलाक्ष[illegible]म्·घटकपदबोध्यत्वंसप्तम्यर्थः।हादेशेष्वित्यस्यतेषु
सत्स्वित्यर्थः।एवञ्चतद्विधिघटक[illegible]पदस्यहादे[illegible]प्रतिषे[illegible]हुवचनम[illegible]लक्ष[illegible]तः[illegible]
श्रुधातोरिति·नव्वजन्तस्येतिशेषः।व्य[illegible]यानादिति·प्रत्ययइत्या[illegible]पलक्ष[illegible]व[illegible]नेनतादृशविस[illegible]
णार्थेबोधकतयाऽचामितिचरितार्थमि[illegible]नियामकत्वकथनाम्[illegible]तिरितवाचम्·अचाम[illegible]यम्[illegible]र्थत्वम्भा[illegible]एव
प्रतिपादितमितितन्माभाष्येनहिविधोन[illegible]वृत्ता[illegible]नीयः[illegible]मूलएवो[illegible]अत्रत्वतेश्चेन्नत[illegible]
भिप्रेतः।अत्रमानमचामितितन्[illegible]नहिविधो[illegible]आवृत्त[illegible]पनीयः एकश्च मूलएवोक्तः।अत्रत्व[illegible]
द्वितीयोप्यभिप्रेतः।अत्रमानमचामितिनिर्देशएव[illegible]दिति·नपुं[illegible]स्येतिसूत्रा[illegible]ग्रहणस्यकर्षेणा[illegible]
येणावेतिव्याख्यानादित्यर्थः।भाष्येस्पष्टमिति·तत्रहियुवोरनाकाविति·चे[illegible]धः।युत्वा।युतवान्।एत[illegible]कङ्कायाम[illegible]
सिकपरयोर्युवोर्ग्रहणमितिसमाहितम्।अनुना[illegible]कपरावयवयोरित्यर्थः[illegible]अनुना[illegible]सिकपरयोर्ग्रह[illegible]न्तदेतत्स[illegible]
म्प्राप्नोतीत्याशङ्क्यतत्रकोदोषः।नुमागमप्रसङ्गः[illegible]धेवक्तव्य[illegible]थान[illegible]कारकइत्यत्रनुम्प्राप्नोति·नुम्विधौक
लग्रहण[illegible]म्·कलनस्योगिनइष्यतेइत्युक्तम्।मूलेनिपातनादितिभ्रेहेः कौन[illegible]यः हस[illegible]घः।अवुगागमश्चेत्येतन्निपातनेन।

हृधनमित्यादौतुकम्व्यावर्त्तैयितुन्त [illegible] स्त्वित्यतआ [illegible] सन्निपा [illegible] निमित्तकेति· तदभावे· तुग्ग्रहणाभावे· सन्निपातपरिभाषया
ष्ठुनिमित्तकतुकोपिव्यावृत्तिः स्यादि [illegible] तिनियमार्थं द्वु·तितुग्रह [illegible] मस्त्वित्यभिप्रायेणाशंकते। नचसन्निपातेति· केचित्तुद्वन्द्वे
घीतिसूत्रस्थविशब्दस्यपूर्वोक्तान् [illegible] पाश्रयप [illegible] हारायभाविधि [illegible] श्रयेलक्षणामाश्रित्यानि [illegible] मस्यदण्डिदत्तौदत्तदण्डिनावित्य
त्रसिद्ध्यर्थंप्रकृतसूत्रेसन्ज्ञाग्रहण [illegible] पक्षेप [illegible] सन्ज्ञाप्रवृत्ति [illegible] लेयस्येघिल्वन्तस्पूर्वम्प्रयोज्य [illegible] र्थोस्त्र प्रकृतेद्वन्द्व
सन्ज्ञाप्रवृत्तिकालेनलोपस्या [illegible] नयमः [illegible] एवान्तेप्रकृतसूत्रेसन्ज्ञा [illegible] कन्त [illegible] ध्वयद्वन्द्व
घीतिसूत्रस्थविपदस्यभाविवित्वाश्रये [illegible] श्रीयनेतदाभानु चक्रे। [illegible] ग्रिय [illegible] नानुशब्दस्यपू [illegible] पद
लेतुकाभवितव्यमितिभाविघित्वस्या [illegible] सन्ज्ञाप्रवृत्ति [illegible] कघिलस्या [illegible] निपातप्रयो [illegible] स्त्वेतु [illegible] यमः सि [illegible] ध्यती
त्याहुः। तत्रेदञ्चिन्त्यम्· द्वन्द्वसन्ज्ञा [illegible] कालिकं [illegible] पूर्वनिप [illegible] प्रयोजकमा। श्रेत्यपूर्वोक्तानियम [illegible] साद्धमा। श्रेत्यप्रकृ [illegible]
सूत्रस्यसन्ज्ञाग्रहणाकरणोपपादनमशक्यम्· [illegible] देवदत्तौ। [illegible] मिरुषाविसपादौपूर्वनिपातौ [illegible] सा [illegible] दा
इकोह्रस्वोऽङ्योगालवस्येतिसूत्रेणह्रस्वत्वकृते [illegible] सन्ज्ञा [illegible] तश्चगन्ता [illegible] मेवपूर्वनिपातइत्येवान्नियमः सि [illegible] एवञ्च [illegible]
दस्यभाविघित्वाश्रयेलक्षणायाआवश्यकत्वेदण्डिदत्तौदत्तदण्डिनावि [illegible] यमासिध्यर्थंप्रकृतसूत्रे सन्ज्ञाग्रह [illegible] स्य
वश्यकत्वात्· अतएवप्रकृतसूत्रभाष्येसन्ज्ञा [illegible] सिद्धम्प्रयो [illegible] नम् नचा [illegible] दस्यभाविघित्वाश्रये वल्लक्षणातद्
द्वन्द्वीनिसूत्रस्यहरिहरावित्यत्रहरिशब्दस्यपूर्वनिपा [illegible] द्विः प्रये [illegible] कृतहरिशब्दस्य [illegible] सन्ज्ञापाम्पूर्वनि
पातस्याप्रयोजकत्वादितिवाच्यम्· द्वन्द्वेघीतिसूत्रस्थविपदस्यतन्त्रेणाशक्यलक्ष्योभयबोधकत्वात्। यदितुलक्षणाहेतोरिनि

हिविश्रः प्रश्न इत्यत्रतु कोऽश्रवणाय॥ अनुवृत्त्यैवेष्टे [illegible]· हः सम्प्रसारणमित्यतोऽनुवृत्तेत्यर्थः। तन्मात्रनिषेध इति· अनन्तरस्येति [illegible]
याप्रवृत्तिकल्पनेनेत्यर्थः। स्थानिवत्त्वेन सम्प्रसारणत्वेपीति· च[illegible]त इति सूत्रारम्भसामर्थ्यादनल्विधाविति निषेधाप्रवृत्तौ पूर्वरूप
निष्पन्नस्य सम्प्रसारणत्वात्· यग्रहणेनैव सिद्धेति· एतेन नद[illegible]कृत सूत्रे सम्प्रसारणग्रहणं न कार्यमिति सूचितम्· एतन्निषे
धकतयेति· वव्रश्चेत्यत्र सम्प्रसा[illegible]णा[illegible] [illegible]नुयान सम्प्रस[illegible]णा इत्यंश सार्थकेपि सम्प्रसारणग्रहणस्य पुवन् शब्देयका
रस्य सम्प्रसारणाभावसाधकतयेत्यर्थः। तथा च प्रकृते निर्दिष्टाङ्ग· विकल नस्यिति [illegible] परिभाषाप्रवृत्ति[illegible]राश्रीयत इति [illegible]भावः। अ
त्र चेदमयोति· निषेधसूत्रमपीत्यर्थः। अपिना भस्येत्युपस्थितिन मित[illegible]तीय[illegible]। भिन्नादिभा[illegible]स[illegible]: लक्ष्यभेदादिति [illegible]स्य भेम
दृश्यतावच्छेदकम्बुद्धिस्थङ्ग· त्वाय[illegible]श्चय सङ्ग· तत्त[illegible]भावच्छिन्न निमित्तकत्वेन कार्येनासंज्ञा[illegible]स्य पुनर्नप्रवर्त्तन[illegible]ति लक्ष्
लक्षणं सकृदेवेत्यस्यार्थः एवञ्च [illegible]ते पुवन् शब्दावयवसम्बुद्धिस्थङ्ग· त्वा सम्प्रसारणे कृते पुनर्य[illegible]निमित्तता सम्प्र
सारणप्राप्नोत्येव· एतेन कार्याश्रयवर्णभेदेन लक्ष्यभेदाश्रयणे ऊढवोढामित्यत्र पहिवहोरोदिति सूत्रे [illegible]कारे कृते पुनर्लक्ष्
लक्षणस्येति न्यायेन वृद्धिवारणपरम्भाष्यं विरुध्येत। अत्रापि पूर्व[illegible]कारस्य पश्चादोकारस्येति वर्णभे[illegible]त्तिनिरस्तम्
हलन्त धात्ववयवात्त्वस्य प्राथमिक वृद्धिप्रवृत्तिनिमित्ततावच्छेदकत्तया तद्धर्मावच्छिन्ननिमित्तिकावृद्धिर्नत्यस्य स्मृदचत्वा
त्· उचित इति· लाघवात्। अवेन्नम्पदमित्यादौ तद्धिते प्रवृत्तये आह· प्रत्य[illegible]त्वेनेति· वहुव्रीहिरिति· न विद्यते नञ्यस्य सोऽधात्र
अव्यवहितोत्तरत्व सम्बन्धावच्छिन्नप्रतियोगिता कनञ भाववानित्यर्थः। अत्र ग[illegible]दि[illegible]· न चैतद्वाक्य घ[illegible]काद्वाजमिति पदान्त
रभि[illegible]न्यपरत्वमस्त्येव निर्वाच्यम्· पदविभागेन पाठ[illegible]लेऽवन्त्वित्यत्र न स्यादित्याश[illegible]· प्रथमैकवचनमि[illegible]· अनुनासिकोकार

स्या[illegible]रतम्याद्ज्ञानस्यपाठात्। ननुमूलोक्तमनन्त्रि[illegible]पस्यानर्वेतिप्रत्युदाहरणमसङ्गतं[illegible]परत्वादतआह· [illegible]नन्त्रित्यस्येति· यत्र
शब्दसदृशाइति· एतेनयदागमपरिभाषयानुद्धिशिष्टस्यार्वन्ग्रहणेन[illegible]ग्रहणेनग्र[illegible]हणंभवतीतिबोधि[illegible]म्· नचैवमपीहागम
विशिष्टस्यैवार्थवत्वमित्यर्थवत्परिभाषयाकेवलस्यग्रहणङ्कथमितिवा[illegible]म्· अर्थवतोऽवयवस्यनि[illegible]र्दिश्यमानस्येत्यर्थ[illegible]न[illegible]ति
ज्ञापयतीत्यत्रषत्ववत्त्रादेशःस्यादित्याशयात्इहपथिमथ्यृभुक्षेनिसूत्रे· नन्वा[illegible]दितिप्रश्लेषेणवि[illegible]धानेऽनेकाल्त्वात्सर्वा
देशत्वापत्तिरतआह· विशेष्यविशेषणाभावेनेति· एवञ्चप्रकृतसूत्रेस्थानिवदादेशइतिसूत्रादादेशपद[illegible]सम्बध्यमान
मादेशत्वपर्याप्त्यधिकरणयत्प्रकृतेचादेशत्वपर्याप्तिरेकमि[illegible]न्नेवाकारेऽप[illegible]त्रत्वाकारेआदेशता[illegible]दकत्वमितिभाव
ननुनकारस्यान्तरतम्यादनुनासिक[illegible]वस्यात्प्रश्लेषेतत्सर्वाकार[illegible]प्रश्लेषफलङ्किं·नस्यान्तरतआह[illegible]सि[illegible]ति·तदु
क्तमष्टनआविभक्ताविति सूत्रे· अष्ट[illegible]नादिपथिमथ्यात्वेष्वान[illegible]रतम्यादनुनासिकःप्राप्नोति। अ[illegible]भि· अष्टाभ्य· [illegible]तःजा[illegible]
नूपन्थाः।मन्थाः सिद्धमनणत्वात्। [illegible]णसर्वर्णानग्रहणानीत्युच्या[illegible]वाका[illegible]उच्चारणसामर्थ्याद्वा· अथवाशुद्धोच्चारण
सामर्थ्याद्भविष्यतीति। ततस्तपरस्तत्कालस्येतिप्राप्नोतीतिशङ्कायामप्युच्चारणसामर्थ्यादित्येवोक्तम्· इदंसर्वमिति[illegible] पूर्वपक्ष
समाधानरूपम्· तत्वाणस्य· पक्षद्वयप्राप्तस्य[illegible]एव· गुणानामभेदकत्वमितिपक्षाभिप्रायकत्वादेव। तपरस्तत्कालस्येति
ननुगुणाभेदकत्वेत्युक्तम् नन्व[illegible]त्ययइतित्वणुदित्सूत्रप्राप्त[illegible]निषेधकमतआह· अप्रत्ययइतिचेति अतएव· अणग्रहण
स्यतत्रासम्बन्धादेव· तत्परिभाषेति· भाव्यमानेनेतिपरिभ[illegible]त्यर्थः। तस्याव्यापकत्वमिति· अप्रत्ययग्रहणस्याव्यापकत्वमि
त्यर्थः। मदुक्तरीत्येति· प्रत्ययसञ्ज्ञा[illegible]परत्वेनव्याख्यानमित्य[illegible]र्थः। तेनः भाव्यमानेनेतिवचनेन· समानजातीयोभिन्नधर्मेति· सूत्रे

च्चरितशब्दबोध्यतावच्छेदकसामान्यधर्मस्यव्याप्योपलक्ष्य किंत्वान्यधर्मवान् स उच्यत इत्यर्थः।सूत्रोच्चारितशब्दबोध्यताव
च्छेदकत्वं विशेषणाङ्गत्वस्य सामान्यधर्मगुणत्वव्याप्यत्वे [illegible]नस्ति।एतेन·वक्ष्यमाणदूषणेन न तदेवाह अत्र शुद्धार्थमिति भा
ष्येति ·शुद्धोच्चारणासामर्थ्यादिति ·पूर्वलिखितभाष्येत्यर्थः।[illegible]मनभिधानाभिप्रायेणैव शङ्कते ·न चेति ·ज्ञानगौरवेति ·परस्
पापत्तिशङ्कायाः क्लेशेन वारणेऽज्ञानगौरवेत्यर्थः।ननु ह्रस्वाकारान्तत्वे दीर्घस्तदा आङ्ग्रहणानुवृत्त्यैव सिद्धे द्विधानमन्यर्थमत आ
ह·आदित्यनुवृत्त्यैवेति· अन्यथा तपरकरणस्य फलान्तरसाधकत्वे।भस्य टेः केचित्तु भाड्डुदित्येव सूत्रमस्तु भसञ्ज्ञकान्त्येरेपः
प्रत्ययस्तस्य डित्वातिदेशे टेरित्येव सिद्धमित्याहुः अत्रेदमूहनीयम् [illegible]योग्यस्य प्रत्ययस्येहानुपस्थितेरतिदेशासम्भ
वात्।भसञ्ज्ञयातस्याक्षेपङ्क्त्यपित्वाभाक्षिप्तस्य शब्दबोधे भानं स्वीकृत्यैवङ्कल्पने टेरिति सूत्रान्तरानुसन्धाने गौरवमिति·सङ्
ख्येत्याकृष्यत इति· तच्च पूर्वत्र यद्यपि शब्दपरम्।नलोपस्यासिद्धत्वादिति·नान्तस्य सुखव्याप्यत्वात्तत्रासिद्धत्वस्य नियमनावृ
त्तेः।पकाराकारस्य दीर्घवारणायेति· ननु पकाराकारस्य दीर्घव्यावृत्तिरनन्यविकार इति परिभाषयैव भविष्यतीत्युपधाग्र
हणम्व्यर्थमिति चेन्न· अह्नन्निति सूत्रार्थमिन्हन्निति सूत्रार्थञ्च तदावश्यकत्वात्· आद्ये उपधापदासम्बन्धे [illegible]दीर्घविधिना नाप्रा
प्तिन्यायेन तृजन्ते ऋतो ङीति गुणस्य बाधकः स्यात्तथा च कर्त्तारौ नप्तारावित्यादिरूपासिद्धिप्रसङ्गात्।द्वितीये उपधापदास
म्बन्धे स नियम उपधादीर्घस्यैवेति नियमेन स्यात्तथा च वृत्रहायत इत्यादावकृत्सार्वधातुकयोरिति दीर्घोपि न स्यादिति बो
ध्यम्·ननु पञ्चानामित्यत्र नान्तसन्निपाततुटि कृते न दादिनिमित्तकपदत्वसन्निपातपरिभाषया नलोपो न स्यादत आह·व्रु
कः पञ्चानामिति· ग्रहणकशास्त्राविषयत्वं सूचयन्नाह· अनणत्वादिति·न स इति· अनुनासिक इत्यर्थः।प[illegible]श्चमस्य भुसामित्य

त्रैवात्रननिर्वाहइत्याह॰।प्रश्लेषेणापीति॰वाच्यवत्या॰वाच्यनिष्ठयावत्या।शङ्क्येतेयावत्॰अष्टाभ्यऔशित्यत्राष्टभ्यइडि
त्येवास्तुङि॰त्वादन्यादेशेऽकारोकारयोरेकादेशेवृद्धिरेचीतिरूढावष्टाविनिभविष्यतीतिकस्यचित्शङ्कान्निरस्यति॰उडि
तितुनोक्तमिति॰।इतिन्यायेनेति॰अयजेइन्द्रम्।ग्रामेऽइह।सर्वेइत्थमित्यत्रयथापूर्वोपस्थितनिमित्तकत्वरूपान्तरङ्गत्व
मादायसवर्णदीर्घम्बाधित्वागुणःप्रवर्त्ततेतथात्रापिअकारोकारयोःप्राप्तगुणम्बाधित्वाऽन्तरङ्गत्वात्सवर्णदीर्घपश्रा
त्गुणेरूपासिध्यापत्तेः।यदिचायजइइन्द्रमित्यादिस्थितौसवर्णदीर्घस्यपदान्तरसम्बन्धिवर्णापेक्षत्वे[illegible]हिरङ्गत्वङ्गुणा
स्यतुतन्यदसम्बन्धिवर्णापेक्षत्वेनान्तरङ्गत्वमितियुक्तन्तत्रगुणोनदीर्घवाधःप्रकृतेतुजश्शसोरकारसकारस्थानिकोका
स्ययएकादेशस्सप्रत्ययमात्रसम्बन्धिवर्णापेक्षअन्तरङ्गःप्रत्ययावयवप्रकृत्यवयवसम्बन्ध्येकादेशा[illegible]नुवद्धिरङ्गः
तोणङिशीतिन्यायवैषम्यमितिविभाव्यंतेतदाउडि॰तिन्यासेयद्यपिमात्रालाघवन्तथापिप्रक्रियागौरवन्दृष्[illegible]मसि।
न्यासेवोध्यम्॰तस्य॰लक्षणसम्पन्नाकारस्य॰अष्टाभ्यइतिनिर्देश[illegible]स्य[illegible]र्वार्थकल्पकत्वेहल्येवतथाकल्पनापत्तिर
तआह॰अयम्भावइति॰इदमःसन्निकृष्टार्थवोधकतयाज्ञापकसिद्धस्यैवैकल्पिकत्वम्प्रतीयतेनतुचानुपयुक्तमतआह॰
आत्वमात्रमिति॰आत्ववैकल्पिकत्वेज्ञापकमिति॰आत्वस्यनित्यत्वेहिहस्वस्यैवाभावात्तदसार्थमितिभावः।सावकाशस्ये
ति॰अनान्तत्वेषड्त्वाभावात्॰रुत्वुपो[illegible]समितितुपञ्चभिरित्यत्रचरितार्थम्॰ननुस्थानिवद्भावेननानात्वमस्तीत्यतआह॰
अल्विधित्वेनेति॰पुनःप्रसङ्गविज्ञानेति॰नस्यन्यायस्यप्रवृत्तिप्रवृत्तिवोधनद्वारेत्यर्थः।सकृद्गतिन्यायपक्षेप्याह॰यथोद्देशे
ति॰अयम्भावःभविष्यतिकिञ्चित्प्रयोजनमित्यभिसन्धिरत्रविभक्तुत्पत्तेःप्रागेवान्तरङ्गत्वात्षट्सञ्ज्ञायांविभक्तौना

न्नसङ्ख्यावाचकत्वसमानाधिकरणधर्मविशेषरूपषट्त्वस्य स्थानिवद्भावेनातिदेशोऽष्टाभिरित्यत्रापि रुत्सुपोऽन्तमभि
त्वस्यप्राप्तिरित्यष्टन्त्वंरो निरवकाशतया रुत्सुपोऽन्तमभिन्नस्यबाधकस्तथाचाष्टाभिरित्यत्रेवाष्टभिरित्यत्रापि स्यादित्येतद्भाव
त्यर्थं क्रियमाणं ज्ञापकमिति· सन्निपातपरिभाषयेति· नान्तसन्निपातेन जायमानस्य नुटस्तद्विघातकत्वनिमित्तत्वन्नेत्य
र्थः। ननु पदिन्त्वन्तस्य ष्टनोदीर्घादित्यस्याप्राप्तेर्विभक्त्युदात्तत्वन्नस्यादत आह· अनोदात्तत्वमिति· नलोपस्यासिद्धत्वादि
ति· नलोपः प्रातिपदिकान्तस्येति सूत्रे सम्बध्यमानं यत्पूर्वत्रेति तत्पूर्वसम्बन्धिकार्यमित्यर्थः। पूर्वशास्त्रञ्चात्र नुड्विधायकम
पि तत्सम्बन्धिकार्यं नुट् तत्सम्बन्धिनान्तसन्निपातोऽपीति परम्परया पूर्वसम्बन्धिसन्निपातस्तस्मिन् कर्तव्ये नलोपस्यासिद्ध
त्वात् नच सन्निपातस्य नलोपः सुप्स्वरेत्यत्रापाठात्कथन्तत्रासिद्धत्वमिति वाच्यम्· नुटः सुत्वव्याप्यधर्मावच्छिन्नसम्बन्धितया
परम्परया तत्सम्बन्धिसन्निपातस्यापि सुत्वव्याप्यधर्मावच्छिन्नसम्बन्धित्वादित्यभिमानः। तमभिमानन्निराचष्टे· पूर्वत्रेति·
तत्र। नुटि। अभ्युपेत्याह· सन्निपातस्येति· शास्त्रासिद्धत्वस्य सिद्धान्तिसम्मततया शास्त्रीयकार्य एवासिद्धत्वमुचितमिति भावः
तस्याः। सन्निपातपरिभाषायाः। अतएव· वास्तविकसन्निपातविघातमादाय सन्निपातपरिभाषायाः प्रवृत्तिस्वीकारादिव·
परिभाषानित्यत्वेन· सन्निपातपरिभाषाया अनित्यत्वेन। तस्यासिद्धत्वात्। नलोपस्यासिद्धत्वात्। सन्निपातविघातमभ्युपेत्य
दोषम्परिहृत्य वस्तुतः सन्निपातविघात एव नास्तीत्यभिप्रायेणाह· किञ्चेति· कृतनाविपीति· अपिना नलोपसङ्ग्रहः। नन्वेवंकृ
तात्वेपि चेत्षट्त्वमाश्रीयते तदा हलीत्यपकर्षो व्यर्थ इत्यत आह· कार्यकालपक्ष इति· प्रतिपत्तिगौरवम्। हलीत्यस्यापकर्षे
गाव्याख्यानापेक्षपेत्यादिः। प्राचामनुरोधेन· निपात्यासर्वथा बहिरङ्गपरिभाषाया अप्रवृत्तेः आदेशेति· औशादेशेत्यर्थः।

विशिष्टः। आनुपूर्वीप्रकारकनिश्चयविषयः। अस्मिन्पक्षे यथालक्षणमित्यस्य कार्यैकर्त्तव्यमिति शेषपूरणेन पदार्थेन नित्यं त्वन्नो
समासङ्कृत्वा लक्षणमनतिक्रम्य कार्यङ्कर्त्तव्यमित्यर्थः कार्यः। द्वितीयपक्षे तु नञ्समासेन लक्षणाभावप्रतिपादकस्यालक्षण
शब्दस्यायोग्यतार्थकयथाशब्देनसमासः। एवं सति यत्र लक्षणाभावस्यायोग्यतातत्र शास्त्राविषयतयाऽनभिधानमेवलभ्यते
तथाचास्यासाधुत्वम्॰ प्रथमपक्षे चात्वाभावयुक्तस्य साधुत्वमित्येवं विरुद्धार्थप्रतिपादनन्नयुक्तमित्याह॰ किञ्चेति॰ अन्य।
व्याख्यानस्य युक्तत्वादेव॰ कैयटेनेति॰ एवञ्च कैयटस्याप्यनभिधान एव तात्पर्यमिति भावः। अत एव॰ एतादृशानभिधाना
देवाकेचित्तु वस्तुतस्तु सर्वविभक्तिपरस्य प्रियाष्टन् शब्दस्यानानभिधानङ्किन्त्वजादिविभक्तिपरस्येत्या[illegible] तन्न॰ एवमप्यष्ट
नइत्येव ब्रूयादिति ग्रन्थस्वारस्यभङ्गापत्तेः। यत्तु मूले निरूपपदादित्युक्तन्तल्लाभप्रकारमाह॰ नुमोऽसमास एवेति॰ असमास ए
व क्विन्प्रत्ययस्यान्यस्य प्रवृत्तेः फलमिति निरुपपदादेवानेन क्विनो विधानमिति भावः उच्चारणार्थैकारस्यापीति॰ उच्चारणा
र्थमुच्चारितानां विधेयविषये इत्सञ्ज्ञां विनानिवृत्त्यभावस्य पूर्वमुपपादितत्वात्। क्विन्प्रत्ययस्येत्यत्रेति॰ एवञ्च नकारोच्चा
रणस्य चरितार्थत्वान्नकारोच्चारणसामर्थ्यात्स्त्रगित्यत्रामागमस्यागमानुदात्तत्वं बाधित्वा आद्युदात्तत्वमित्येवं सामर्थ्यवर्णन
मसङ्गतमिति सूचितम्। इदन्नकारोच्चारणफलन्तदनुबन्धकग्रहणे नानतदनुबन्धकस्येति परिभाषामनाश्रित्य। तदाश्रयणे
तु क्विप्रत्ययपक्षे तु क्तावप्यदोष इत्यवधेयम्॰ रुदिवेति॰ अत्र प्राप्तस्य रुदादिभ्य इतीटः प्रतिषेधः स्यादिति भावः। क्वचित्तु रुरु दि
वेति पाठः न चात्र नेड्वशीति प्राप्तस्यापि प्रतिषेधस्य क्रादिनियमेन निवृत्त्या रूपसिद्धिर्निर्बाधैव नित्यवाच्यम्॰ क्रादिनियमो हिम
ध्येऽपवादन्यायेनैकाच उपदेश इति प्रयुक्तः किन्तु नि सूत्रेभावाभावात्तस्य प्रतिषेधस्य निवर्त्तको न तु नेड्वशीति सूत्रे प्राप्तस्येत्स।

शयात्।परत्वेवंसतिवभूविवेतिरूपस्यपुरःस्फूर्तिकत्वात्तत्यागस्यनिर्वीजस्यापत्तेः।अशोकवनिकान्यायेनयोजनन्तुक्लिष्टम्।
ननुतिङः कृत्सञ्ज्ञाभावे कृत्सार्वधातुकेनिसूत्रेसार्वधातुकग्रहणमेवज्ञापकं।नहिचिनुपादित्यादौदीर्घोभावायपदितिङः
कृत्सञ्ज्ञास्यात्तदाकृत्यपुंदासेनेवदीर्घोभावेसिद्धेतद्वैयर्थ्यंस्पष्टमेव· किञ्चतिङःकृत्सञ्ज्ञायाङ्कृदन्तत्वात्प्रातिपदिकस
ञ्ज्ञायामतिशायनइतिसूत्रेशेवातिशायनिकप्रत्ययस्यसिद्धौतिङश्चेतिसूत्रमपिव्यर्थंसत्तस्मिन्नर्थेज्ञापकम्भविष्यतीत्य
तआह· ज्ञापकेनेति· वरङ्करणमिति· तादृशार्थबोधकशब्दोपादानेशब्दात्तदर्थोपस्थितिः।व्याख्यानेनकल्पनेविवक्षि।
तार्थस्यानुमितिर्वाच्याः अनुमितिसामग्रीचगुरुतरव्याप्तिज्ञानादिघटितेति।वस्यैवकुत्वापत्तिरिति· नचवस्यकुत्वलोपयोः
प्राप्तौकुत्वस्यपूर्वत्रासिद्धत्वाद्वलोपस्यैवप्राप्तिरितिवाच्यम्· एवंसतिसूत्रारम्भसामर्थ्यात्क्वित्रन्तस्यैतत्सर्थोपिसम्भाव्येतत्स
चानिष्टइत्याशयात्· सूत्रारम्भसामर्थ्येनपूर्वत्रासिद्धत्वबाधेप्याह· तथासतीति· नचघोषस्यात्समाणस्यचवकारस्यतादृशो
गकारएववक्तुमुचितइतिवाच्यम्· वर्गाणान्तृतीयचतुर्थाअन्तस्थाहकारानुस्वारौयमौचतृतीयचतुर्थौसम्वृत्तकण्ठानादा
नुप्रदानाअघोषाइतिशिक्षायांघकारवकारयोःसमानधर्मत्वप्रतिपादनेनास्यग्रन्थस्यतच्छिक्षानुसारित्वात्मूलोक्तरीत्या
तुक्विनोगइत्येवोचितम्· उत्तरार्थत्वमपिनकुग्रहणस्येत्याह· नशेर्वेत्यत्रेति· ननुनिरुपपदाद्युजेरितिपूर्वमुक्तत्वेनात्रक्विनो
ऽभावात्कथन्तस्यप्राप्तिरतआह· अतद्गुणेति· धातुपाठेतीति· तस्यप्रथमोपस्थितत्वात्।व्याख्यानादिति· शीघ्रोपस्थितिमू
लकाद्व्याख्यानादित्यर्थः।इतिमतइति· एतेनइदन्नापूर्वेङ्कि· नुअन्येभ्योपिदृश्यतइतिसूत्रस्थदृशिग्रहणस्यैवेदम्फलमितिसि
द्धान्तःसूचितः।व्याख्यानादिति· परिव्राजाविव्यादिलक्ष्यदर्शनमूलकाद्व्याख्यानात्· सञ्ज्ञापदानुकर्षणादिति· एवञ्चयत्रप्र।

वौत्तरपदघटितासञ्ज्ञानत्वेवदीर्घकोशघटकपदानितुप्रत्येकंसञ्ज्ञारूपबोधकानिनतूभयघटितासञ्ज्ञातत्रोपात्तेमिभावः
स्कोरितिसूत्रस्यमूलोक्तयथाश्रुतार्थेपृथक्स्यात्तेस्यादावतिप्रसङ्गःप्राप्नोतितत्परिहारायाह रुलोत्यनुवर्त्तमानमिति॰
सडोतिवार्त्तिकाच्चेति॰ढ्रद्दस्त्वेनापूर्ववार्त्तिकङ्क्षिःलुपरेस्त्रघाङ्क्योरितिसूत्रभाष्येसडिःलत्वसलोपसंयोगादिलोपकुत्वदीर्घ
त्वानिवर्त्तव्यानि।गिरौ।गेरइत्यत्रलत्वम्।पयोधावत्यत्रधिचेतिसलोपः काष्ठशक्स्थानेत्यत्रस्कोरितिकलोपः क्रुञ्चेत्य
त्रचोःकुरितिकुत्वम्।धुर्येइत्यत्रहलिचेतिदीर्घत्वंचैतद्भाष्यवत्येनत्रोक्तम्।तदेशोयम्।केचित्त्विति॰वार्त्तिकप्रत्याख्यानवादिम
तमेतदितिस्पष्टमेव।स्वमतमाह॰प्रत्याख्यानमेवेति॰पृथक्स्यात।।पयःस्थितिरित्यादिप्रयोगाणांलोकप्रसिद्धत्वादनभि
धानकल्पनायाम्मानाभावादितिभावः।तदोःसःसौ॰अत्रानुवर्त्तमानस्यदादीनामित्यस्यावयवार्थकषष्ठ्यासदाद्यवयवत्ता।
कारदकारयोरित्यर्थः।स्यदतच्छब्दयोर्बुद्धिविषयचैत्रत्वाद्यवच्छिन्नेशक्तिः।नचात्रबुद्धिविषयत्वस्यैवचैत्रत्वस्यतदाश्रय
स्यवाविशेषणत्वंवाच्यमेवंसतिबुद्धिविषयत्वस्योक्तविशेष्यांशेप्रकारतयाशाब्दबोधेभानापत्तिरितिवाच्यम्॰चैत्रत्वमैत्रत्व
वच्छिन्नेत्यदादीनांशक्तिस्वीकारेशक्यतावच्छेदकानान्नानात्वाच्छक्त्यानन्त्यस्यायदाचैत्रत्वावच्छिन्नविषयकबोधस्तदा
मैत्रत्वावच्छिन्नविषयकबोधस्यचापत्तिरितिविषयतावच्छेदकत्वसम्बन्धेनबुद्धिविशेषोपलक्षितेधर्मावच्छिन्नेशक्तिः
स्वीक्रियते।बुद्धिविशेषश्चोपलक्षणीभूयशक्यतावच्छेदकतयाअनुगमकइतिननतेनरूपेणशक्यतावच्छेदकस्यशाब्दबोधे
मानापत्तिः।अनुगतधर्मावच्छिन्नाशक्यतावच्छेदकताचैकेतिननानार्थत्वापत्तिश्च।तच्छब्दस्यक्वचित्प्रक्रम्यमाणपरामर्शकः
।सदेवदत्तोयस्तत्रस्थितइत्यादौएतस्यैवतत्पदस्ययत्पदेनार्थप्रत्यायनेनियमेनापेक्षा।तत्पदसमभिव्याहारज्ञानंविनायत्पदस्य

पिताद्दृग्यानुगमकधर्मग्रहाभावेनप्राप्तिग्रहासम्भवाच्चशाब्दबोधाजनकत्वस्योपपत्तेः।अतएववर्तमानययद्दालीत्तिवा
क्यस्यवत्तुवृद्धिस्थघटकमर्कानयनबोधकत्वम्।अत्रैवयत्तदोर्नित्यसम्बन्धइतिव्यवहारः।यत्रतुप्रक्रान्तपरामर्शकस्त
त्रयत्पदाभावेप्यर्थेबोधोभवत्येव· यथासमृद्धपुरोराजास्तीत्यादिकथनानन्तरन्तमभिगच्छेत्युच्यतेतत्रयत्पदाभावेप्य
र्थबोधोभवतिएवंयच्छब्दस्यतत्पदप्रतिपाद्यतेयावत्तुबुद्धिविषयतावच्छेदकत्वोपलक्षितोयोधर्मस्तदवच्छिन्नेश
क्तिः।अतएवनियमेनतत्पदापेक्षा लाघवायकस्यचिच्छङ्कान्निरस्यतिः तोरिति त्विति· स्पष्टञ्चेदन्तस्मान्नुडचीतिसूत्रे
भाष्ये·तत्रहि·तस्मादित्यस्याभावेनम्रएवनुटः प्राप्तिमाशङ्क्य एवन्तर्हिपूर्वान्तःकरिष्यते। तत्रायमप्यर्थः। तदोः सः सावि
तिसूत्रेतदोर्ग्रहणान्नकर्त्तव्यम्भवति· तवर्गनिर्देशेइहप्राप्नोति अनेषःकरोति।नचात्रनिर्दिश्यमानपरिभाषयाभविष्य
तीतिवाच्यम्· अर्थवत्परिभाषैकवाक्यतयानिर्दिश्यमानपरिभाषायाःप्रवृत्तौनकारस्यापितस्मादितिनादृशरूपदर्श
नपरभाष्यप्रामाण्येनद्वयोरपिपरिभाषयोस्त्यागात्· यावतापूर्वान्तः एषदोषोनभवति·।ततःपूर्वान्तत्वेऽनेषइत्यत्रन
लोपमाशङ्क्यनुम्विधानसामर्थ्येनतं वारपित्वाड्·मुटः प्राप्तिमुद्भाव्यपरादित्वपक्षएवस्थापितः।नचाजादिपदसन्नि
पातेनजातस्यनुकःकथन्तद्विघातकड·मुटम्प्रतिनिमित्तत्वमितिनायन्दोषइतिवाच्यम्· नन्नोऽकचिचित्वादन्तोदात्तत्वे
चक्रुतेर्ग्मेशब्देननकशब्दस्यसमासेऽनकर्ममित्यत्रार्मेचावर्णाद्यचत्र्यच्·इतिपूर्वमाद्युदात्तत्वाभावापत्तेरतः परादि
त्वस्यावश्यकत्वात्।अत्रकैयटः।परादावपिनुटितस्यासिद्धत्वात्तोः सः सावित्यपिक्रियमाणोसत्वन्नभविष्यतीतिचि
न्त्यमतदितिदूषयितुमुपक्रमतेः नचेतिःअस्यैव·सत्वस्यैव।नुटोयद्यपिपूर्वान्तरपदसापेक्षत्वन्तथाप्यङ्गसञ्ज्ञानिमि

न्नवहिर्भूतसुवनपेक्षत्वेनान्तरङ्गत्वं सुत्वस्य तु तदपेक्षत्वाद्बहिरङ्गत्वमिति भावः। यत्त्वन्तर्भूतसुबपेक्षत्वेन सत्वमन्तरङ्ग-
मिति तन्नः अन्तर्भूतसुपः प्रत्ययलक्षणेनापेक्षा वाच्या सा च न सम्भवति। न लुमताङ्गस्येति प्रतिषेधात्. वस्तुतस्तूत्तर-
पदाधिकारस्य बहिरङ्गपरिभाषाया अनित्यत्वान्नासिद्धत्वमित्यवश्यं वाच्यम्. अत एवात्मानं श्रियम्मन्यत इति यत्तत्कुले।
श्रिमन्यमित्यत्र स्वपि ह्रस्वसङ्कोचस्त्वमि स्वमोर्नपुंसकादिति लुक्सिद्धिः। श्रीशब्दस्य नपुंसकत्वज्ञिन्त्वं प्रशस्तादीनां स्त्रुयोग।
स्त्रियामिव श्रीशब्दपरित्यक्तस्य लिङ्गस्य स्त्रीत्वं प्रतीते। अत एव ह्रस्वत्वमिद्धिः। युष्मच्छब्दस्य स्वसम्बोध्यतावच्छेदकत्वो-
पलक्षितचैत्रत्वाद्यवच्छिन्ने शक्तिः। स्वं युष्मच्छब्दोच्चारयिता। सम्बोध्यत्वञ्चोच्चारितशब्दजन्यबोधाश्रयत्वेनेच्छाविष-
यत्वम्। इच्छापि प्रत्यासत्त्या स्वसम्बन्धिनी विवक्षिता। एवञ्चोच्चारणकर्तृसम्बन्धिनी योच्चारितवाक्यजन्यशाब्दबोधाश्र-
यत्वप्रकारिकेच्छा तद्विशेष्यतावच्छेदकत्वोपलक्षितधर्मावच्छिन्ने युष्मच्छब्दस्य शक्तिः। अस्मच्छब्दस्य तु स्वोच्चारणा-
कर्तृतावच्छेदकत्वोपलक्षितधर्मावच्छिन्ने शक्तिः। अत्र स्वपदमस्मच्छब्दपरम्। न चैवं देवमुवाच। गर्ज गर्ज क्षणं मूढ मधु
यावत्पिबाम्यहम्। मया त्वयि हतेऽत्रैव गर्जिष्यन्त्याशु देवता इति वाक्यस्य युष्मदस्मच्छब्दाभ्यां देवीमहिषासुरयोर्बोधाप-
त्तिः देव्या एतद्वाक्योच्चारणकर्तृत्वाभावादिति वाच्यम्. अस्मिन्वाक्ये देव्युच्चारितत्वस्य महिषासुरे च सम्बोध्यत्वस्य भ्रमात्।
च्छ्रोतुर्देव्यादिप्रतीतिर्न तु तत्र तद्वाक्यघटकास्मच्छब्दस्य शक्तिरित्यभ्युपगमात्. यद्वा नादृशानुपूर्वीज्ञानरूपसामान्यलक्षण-
या देवीवाक्यस्यापि ज्ञाने तस्मिन्देव्युच्चरितत्वम्मानसज्ञानेन गृह्यते. एवमस्मच्छब्दार्थघटकोच्चारणांशे स्वातन्त्र्यविशेष-
णादाने नानुकरणादिस्थले नानुवादकादिबोधः। स्वातन्त्र्यञ्च स्वार्थतात्पर्यकान्यदीयोच्चारणानधीनत्वमिति दिक्. एय

कपदमिति· लुप्तषष्ठीकम्।अतएव· पृथक्पदत्वादेवड· प्रथमयोरित्यस्यैकपदत्वे प्रथमयोरितिद्विवचनस्याङ्गत्वेनो
पपत्तिसम्भवात्कयोः प्रथमयोरितिशङ्कायाअसङ्गतिः स्फुटैव।लिङ्गादितिभाष्यमिति· तत्रहिङे प्रथमयोरिति प्राप्तस्य
निषेधोयम्।नत्वनुद्वितीयायाश्चेत्यात्वे पूर्वसवर्णदीर्घेत्तस्माच्छसइत्येवसिद्धमित्याशङ्क्यतम्।नकारादेशविधायक
त्वेहिनइत्येववदेदितितद्भावः।युष्मानब्राह्मणानित्याद्यर्थंनत्वविधानमितित्वन्यत्. यद्वाविभक्त्योर्ग्रहणामित्यर्थेद्वितीया
याञ्चेतिसूत्रज्ञापकम्।यदिप्रत्ययसोर्ग्रहणंस्यात्तदाद्वितीयायाञ्चेत्यस्योभावेप्यात्वंयुष्मदस्मदोरित्यनेनानादेशत्वासि
द्धमेवेतितद्यर्थमेव· नचयोचीत्येतद्वाधनार्थमस्त्वितिवाच्यम्· योचीतिसूत्रेनमोटोरितिकरणेनैनेनुपत्वेप्रतिषिद्धेआ
त्वस्यभावात्।युष्मानस्मानित्यत्रापिशसोनेत्यनेनादेनकारादेशेशेषेलोपेसुपिचेतिदीर्घत्वेसंयोगान्तलोपेनसिद्धमः।अ
तित्वमित्यर्थमिति· अत्रयुष्मदएकार्थेवोधकत्वाभावेनत्वादेशाप्राप्तिरितिभावः।अतएवः अन्त्यलोपस्वीकारादेव।निर्दे
शः सङ्गच्छतइति अन्त्यलोपेहिसुटः प्राप्तिरितिशेषः।वृत्त्याद्यनुसारेणेति· वक्ष्यमाणोभिप्रायः।तमेवाह· त्यदादीनामिति·
ननुहलन्तत्वेपित्वाद्यवयवाकारस्योच्चारणार्थकस्येत्सञ्ज्ञालोपाभ्यामिष्टसिद्धिर्वोच्येतिनात्रपक्षेलाघवमतआह· यद्यप्युच्चार
णार्थानामिति· ननुहलन्तादन्तपक्षयोर्णिजन्तेनैकरूपसाधकत्वमतआह· णिजन्तादिति· नद्यावितिस्त्रियामित्यस्यप्रकृति
विशेषणतायाःक्लृप्तत्वादितिभावः।इदम्· अन्त्यस्यलोपइत्येतत्।उपलक्षणमिति· तेनदृष्टइत्यध्याहारेणसूत्रार्थः·कार्य
इतिभावः।उपलक्षणत्वेमानाभावइतिचेत्· शेषग्रहणमेवेत्यवेहि· अन्यथाटिग्रहणमेवकुर्यात्।आदेशविधौपरयोप
योगस्तदितरभागएवशेषपदार्थः।ननुयत्रनमपर्यन्तस्यादेशस्तत्रकागतिरितिचेत् त्वाद्यादेशादेवयुष्मदस्मतादेव

दिकाया आनुपूर्व्या तदवच्छिन्नत्वस्य विवक्षितत्वात्। वार्णादाङ्गमिति परिभाषाप्रवृत्तिमुपपादयति· अकारस्येति· परोक्त
ङ्· स्वराडयति। शेष इत्यस्येति· तदप्रवृत्तिरिति· वार्णादाङ्गमिति न्यायाप्रवृत्तिरित्यर्थः। नन्वेवं टिलोपान्त्यलोपयोरन्यतरप
क्षस्यैवाश्रयेणैतो युष्मभ्यमित्यादौ टिलोपपक्षे हलन्तस्यैव श्रवणापत्तिरत आह· अत्र वदन्तीति· उदात्तनिवृत्तिस्वर इति· न
दि कृत्प्रत्ययान्तत्वेनान्तोदात्तत्वात्। स्वसिद्धान्तमाह· वस्तुतस्त्विति· ननु लिङ्गाभावादित्यनुपपन्नं लिङ्गयोगस्य सत्वादत आह
अत्र लिङ्गाभावादीति· ननु त्यदाद्यकारस्टाप्प्रविधेर्यासेत्यनेन टापि कर्तव्ये यथा सन्निपातपरिभाषायाः प्रवृत्तौ भाष्यं विशिष्य
साधकं तथा न प्रकृते साधकमत आह· अत एवेति· टापि कर्तव्ये कश्चित्सन्निपातपरिभाषायाः प्रवृत्तिस्वीकारादेवेत्यर्थः। न
न्वेवं भ्यसोभ्यमित्यत्र स्थपक्षद्वयाभ्युपगमसूचकभाष्यविरोध इत्यत आह· अभ्यमित्यत्रेति· न्याय्य इत्येतदेवोपपादयति· अ
त एवेति· अभ्यमिति छेदादेव· व्याख्यानादिति· वचनशब्दोपादानमूलकाद्व्याख्यानादित्यर्थः। अन्यथा द्विव इत्येव वदेत्। न
न्वेवमपि द्विवचन इत्यस्य संबन्धिकतया कस्य विशेषणमित्यत आह· तत्र समर्थयोरित्यर्थः। गृह्यमाणयुष्मदस्मदोरेवे
ति· ननु तथाप्यङ्गाधिकारपठितेषु अङ्गस्येत्यस्य यथाधिकारवशाल्लाभस्तथा युष्मदस्मदोरित्यस्याप्यनुवृत्त्यैव लाभ इत्यनयो
को विशेष इति चेत्· आवान्तरवाक्यार्थपूर्वको महावाक्यार्थबोध इति सुप्रसिद्धम्· प्रकृते चैतत्युष्मदस्मदोरित्यारभ्यावान्तरवा
क्यार्थबोधो युष्मदस्मदोरित्येतत्पदार्थोपस्थितिजन्यः क्लृप्त इति युवावित्येतत्सूत्रघटकपदाभ्यां नियताकाङ्क्षया युष्मदस्म
दोरित्येतच्छब्दोपस्थितिकयाऽपेक्षते· अङ्गस्येत्यस्य तु पश्चादपेक्षेत्यभिप्रायेण गृह्यमाणयुष्मदस्मदोरित्युक्तमिति गृह्य
ण· यत्पदार्थं विनाऽवान्तरवाक्यार्थबोधो निराकाङ्क्षो न भवति तस्मिन् पदार्थे गृह्यमाणत्वव्यवहारः। अधिकारस्य मप

कारस्थपिनस्यादितिताद्दशरूपदर्शनपरभाष्यप्रामाण्येनद्वयोरपिपरिभाषयोस्त्यागात् यावतापूर्वान्तः एषदोषो न
[illegible]ततः पूर्वान्तत्वे। नेषइत्यत्रनलोपमाशङ्क्यनुम्विधानसामर्थ्येनतंवारयित्वाङ्मुटः प्राप्तिमुद्भाव्यपरादित्वपक्षएव
स्थापितः। नचाजादिपदसन्निपातेनजातस्यनुकः कथन्तद्विघातकङ्मुटम्प्रतिनिमित्तत्वमितिनायन्दोषइतिवाच्यम् न
चोः कश्चिचित्वादन्तोदात्तत्वेचकृते मेशब्देननकशब्दस्यसमासे न कर्ममित्यत्रा मे चावर्णद्यच्त्र्यच्इति पूर्वमाद्युदात्त
भावापत्तेरतः परादित्वस्यावश्यकत्वात्। अत्रकैयटः। परादावपिनुटितस्यासिद्धत्वात्तोः सः सावित्यपिक्रियमाणेसत्व
[illegible]नविष्यतीतिचिन्त्यमतदितिदूषयितुमुपक्रमते नचेति अस्यैव तत्वस्यैव। नुटोयद्यपिपूर्वोत्तरपदसापेक्षत्वन्तथा
प्यङ्गसञ्ज्ञानिमित्तवहिर्भूतसुवनपेक्षत्वेनान्तरङ्गत्वंसत्वस्यतुतदपेक्षत्वाद्वहिरङ्गत्वमितिभावः। यत्त्वन्तर्भूतसुंबपेक्ष
त्वेनसत्वमन्तरङ्गमितितन्न अन्तर्भूतसुपः प्रत्ययलक्षणेनापेक्षावाच्यासाचनसम्भवति। नलुमताङ्गस्येतिप्रतिषेधात्
वस्तुतस्तूत्तरपदाधिकारस्यवहिरंगपरिभाषायांअनित्यत्वान्नासिद्धत्वमित्यवश्यंवाच्यम्॥ अतएवात्मानंश्रियम्भ
न्यते यत्तुकुलंश्रिमन्यमित्यत्रखशिइचसकाचइत्यभिस्वमोर्नपुंसकादितिलुक्सिद्धिः। श्रीशब्दस्यनपुंसकवृत्तित्वंप्र
शस्तादीनाम्बुयोगात्स्त्रियामिवश्रीशब्दपरित्यक्तस्यलिङ्गस्यस्वीक्रियते। अतएवह्रस्वत्वमिद्धिः। युष्मच्छब्दस्यस्वसम्बो
ध्यतावच्छेदकत्वोपलक्षितचैत्रत्वाद्यवच्छिन्नेशक्तिः। स्वंयुष्मच्छब्दोच्चारयिता॥ सम्बोध्यत्वञ्चोच्चारितशब्दजन्यबो
धाश्रयत्वेनेच्छाविषयत्वम्। इच्छापिप्रत्यासत्यास्वसम्बन्धिनीविवक्षिता। एवञ्चोच्चारणकर्तृसम्बन्धिनीयोच्चारित

वाक्यजन्यशाब्दबोधाश्रयत्वप्रकारिकेच्छातद्विशेष्यतावच्छेदकत्वोपलक्षितधर्मावच्छिन्ने युष्मच्छब्दस्य शक्तिः॥ अ
स्मच्छब्दस्य तु स्वोच्चारणकर्तृतावच्छेदकत्वोपलक्षितधर्मावच्छिन्ने शक्तिः। अत्र स्वपदमस्मच्छपरम्। नचैवं देव्युवाच। गर्ज
गर्ज क्षणं मूढ मधु यावत्पिबाम्यहम्। मया त्वयि हते ऽत्रैव गर्जिष्यन्त्याशु देवता इति वाक्यस्य युष्मदस्मच्छब्दाभ्यां देवीमहि
ष्यासुरयोर्बोधापत्तिः देव्या एतद्वाक्योच्चारणकर्तृत्वाभावादिति वाच्यम्। अस्मिन्वाक्ये देव्युच्चारितत्वस्य महिषासुरे च सम्बो
ध्यत्वस्य भ्रमाच्छ्रोतुर्देव्यादिप्रतीतिर्न तु तत्रैतद्वाक्यघटकास्मच्छब्दस्य शक्तिरित्यभ्युपगमात्· यद्वा तादृशानुपूर्वीज्ञान
रूपसामान्यलक्षणया देवीवाक्यस्यापि ज्ञाने तस्मिन्देव्युच्चरितत्वम्मानसज्ञानेन गृह्यते· एवमस्मच्छब्दार्थघटकोच्चार
णांशे स्वातन्त्र्यविशेषणदानेनानुकरणादिस्थलेनानुवादकादिबोधः। स्वातन्त्र्यञ्च स्वार्थतात्पर्यकान्यदीयोच्चारणानधी
नत्वमिति दिक्· पृथक्पदमिति· लुप्तषष्ठीकम्। अतएव· प्रथक् पदत्वादेव ङ· प्रथमयोरित्यस्यैकपदत्वे प्रथमयोरिति द्वि
वचनस्यानुपपत्तिसम्भवात्कयोः प्रथमयोरिति शङ्काया असङ्गतिः स्फुटैव। ङिङादिति भाष्यामिति· तत्र हि ङे· प्रथ
मयोरिति प्राप्तस्य निषेधोयम्। नन्वेवन्तु द्वितीयायाञ्चेत्यात्वे पूर्वसवर्णदीर्घे तस्माच्छस इत्येव सिद्धमित्याशङ्कितम्। नकारा
देशविधायकत्वाद्धि न इत्येव वदेदिति तद्भावः। युष्मान्ब्राह्मणीत्याद्यर्थन्नत्वविधानमिति त्वन्यत् यद्वा विभक्त्योर्ग्रहणमित्यर्थे
द्वितीयायाञ्चेति सूत्रं ज्ञापकम्। यदि प्रत्यययोर्ग्रहणं स्यात्तदा द्वितीयायाञ्चेत्यस्योभावेप्यात्वं युष्मदस्मदोरित्यनेनानादे
शत्वात्सिद्धमेवेति तद्व्यर्थमेत· नचयोचीत्येतद्बाधनार्थमस्त्विति वाच्यम्। योचीति सूत्रे ऽनमौटोरिति करणेनैतेषु यत्वे प्रति

षिद्धे आत्वस्याभावात्। युष्मानस्मानित्यत्रापि शसोनेत्यनेनादेर्नकारादेशे शेषे लोपे सुपि चेति दीर्घत्वे संयोगान्तलोपेन सिद्धम्। मुः
अतित्वमित्यर्थमिति। अत्र युष्मदस्मदाकार्यबोधकत्वाभावेन त्वादेशाप्राप्तिरिति भावः। अत एव अन्त्यलोपस्वीकारादेव। निर्दे
शः सङ्गच्छत इति अन्त्यलोपे हि सुटः प्राप्तिरिति शेषः। इत्याद्यनुसारेणेति। वक्ष्यमाणोऽभिप्रायः। तमेवाह। यद्यादीनामिति
ननु हलन्तत्वे पित्वाद्यवयवाकारस्योच्चारणार्थकस्येत्संज्ञालोपाभ्यां निवृत्तिर्वाच्येति नात्र पक्षे लाघवमत आह यद्यप्युच्चारणा
र्थानामिति। ननु हलन्तादन्तपक्षयोर्णिजन्ते नैकरूपसाधकत्वमत आह। णिजन्तादिति। नटाविति स्त्रियामित्यस्य प्रकृतिविशे
षणतायाः क्लृप्तत्वादिति भावः। इदम् अन्त्यस्य लोप इत्येतत्। उपलक्षणमिति। तेन दृष्ट इत्यध्याहारेण सूत्रार्थः कार्य इति भा
वः। उपलक्षणत्वे मानाभाव इति चेत्। शेषग्रहणमेवेत्यवेहि। अन्यथा टिग्रहणमेव कुर्यात्। आदेशविधेयस्योपयोगस्तदित र
भागस्य शेषपदार्थः। न त्वत्रेनमपर्यन्तस्यादेशस्तत्र कागतिरिति चेत्॥ त्वाद्यादेशविधावुद्देश्यतावच्छेदिका या आनुपूर्वी
तदवच्छिन्नत्वस्य विवक्षितत्वात्। वाणादाङ्गमिति परिभाषाप्रवृत्तिमुपपादयति। अकारस्येति। परोक्तं दूषयति। शेष इ
त्यस्येति। तदप्रवृत्तिरिति। वाणादाङ्गमिति न्यायाप्रवृत्तिरित्यर्थः। नन्वेवं टिलोपान्त्यलोपयोरन्यतरपक्षस्यैवाश्रयेण युष्म
भ्यमित्यादौ टिलोपपक्षे हलन्तस्यैव श्रवणापत्तिरत आह। अत्र वदन्तीति। उदात्तनिवृत्तिस्वर इति। न दिक्प्रत्ययान्तत्वे नान्तो
दात्तत्वात्। स्वसिद्धान्तमाह। वस्तुतस्त्विति। ननु लिङ्गाभावादित्यनुपपन्नं लिङ्गयोगस्य सत्त्वादत आह। अत्र लिङ्गाभावा
दीति। ननु त्यदाद्यकारस्याप्रविधेयासेत्यनेन सापिकर्तव्येयथा सन्निपातपरिभाषायाः प्रवृत्तौ भाष्यं विशिष्य साधकं तथा

नप्रकृतेसाधकमतआह· अतएवेति· टापिकर्त्तव्येकचित्सन्निपातपरिभाषायाः प्रवृत्तिस्वीकारादेवेत्यर्थः। नन्वेवंभ्यसोभ्य
मिसूत्रस्थपक्षद्वयाभ्युपगमसूचकभाष्यविरोधइत्यतआह· अभ्यम्सूत्रइति· न्याय्यइत्येतदेवोपपादयति· अतएवे
ति· अभ्यमितिछेदादेव· व्याख्यानादिति· वचनशब्दोपादानमूलकाद्व्याख्यानादित्यर्थः। अन्यथाद्विलइत्येववदेत्· नन्वे
वमपिद्विवचनइत्यस्यससम्बंधिकतयाकस्यविशेषणमित्यतआह·। तत्रसमर्थयोरित्यर्थः॥ ॐ॥ गृह्यमाणयुष्मदस्म
दोरेवेति· ननुतथाप्यङ्गाधिकारपठितेषु अङ्गस्येत्यस्ययथाधिकारवशाल्लाभस्तथायुष्मदस्मदोरित्यस्याप्यनुवृत्त्यैवला
भइत्यनयाः कोविशेषइतिचेत्· आवान्तरवाक्यार्थपूर्वकोमहावाक्यार्थबोधइतिसुप्रसिद्धम् प्रकृतेच्चयुष्मदस्मदोरित्या
रभ्यावान्तरवाक्यार्थबोधोयुष्मदस्मदोरित्येतत्पदार्थोपस्थितिजन्यः कृत्तइतियुवावित्येतत्त्त्रघटकपदाभ्यान्निपताक
ङ्क्ष्यायुष्मदस्मदोरित्येतच्छीघ्रोपस्थितिकतयाऽपेक्षते· अङ्गस्येत्यस्यतुपश्चादपेक्षेत्यभिप्रायेणगृह्यमाणयुष्मदस्मदो
रित्युक्तमितिगृहाण · यत्पदार्थविनाऽवान्तरवाक्यार्थबोधोनिराकाङ्क्षोनभवतितस्मिन्पदार्थेगृह्यमाणत्वव्यवहारः।
अधिकारस्यमपर्यन्तस्येत्यस्याभावेपियुवकाभ्यामावकाभ्यामित्यस्यसिद्धिरितिशङ्कते· नन्विति। त्वयकेत्यादिसिद्धि
यइति· अनुपदोक्तव्यवस्थायाअभावेत्वकयेत्यादिप्रकृतेस्यादितिभावः। मपर्यन्तस्येत्यस्याभावेसमुदायस्यत्वामादे
शेपिअच्येइतिन्यासेनाकारस्यैकारादेशेऽयादेशेऽयादेशेत्वयामयेत्यस्यसिद्धिरित्याह· नन्वत्रेति युवकाभ्यामितीति।
अत्रभकारादिविभक्तिपरत्वेनपूर्वमेवाकचिमपर्यन्तस्येत्यस्याभावेसमुदायस्ययुवादेशेऽकचःश्रवणानापत्तिरितिभावः।

दे शिवङ्ग्राविनयन्प्रातिपदिकान्यन्तस्य माभूत् ।तेनन्त्रः सङ्ख्याया इत्यत्र तदभावसिद्धिरत आह नः सङ्ख्याया इत्यत्रेति कुत्स
नेच सुपीति सगतिरपि तिङिति अनुवर्तते कुत्सने च सुप्यगोत्रादौ सुबन्ते परे सगतिरपि तिङन्तमनुदात्तमित्यर्थः ।पचति पूति प्रपच
ति पूति ।अतः प्रागिति अत्रापि पदादित्यधिकारश्चेद्दर्क्वत्तः पचति पूती स्यत्रैव निघातः स्यान्न तु पचतिपूतीत्यादावित्यतः प्रागि
त्युक्तम् ।तज्ञाभेति सर्वानुदात्तलाभेत्यर्थः ।नन्वादेः परस्येत्यादि निरुक्तमर्थमेव सर्वग्रहणाङ्कुनोनेत्यत आह आदेरिति स्थानषष्ठ
भावादिति स्थानषष्ठीनिर्दिष्टस्य लोन्यपरिभाषायास्तदपवादभूताया आदेः परस्येत्यस्याश्च प्रवृत्तिः छन्दोहीनवाक्यस्यापीति अत्र
मानमाह ग्रामेकंवल इति ननु नौ चानुदात्ताविस्यनेनैव विहितादेशानुदात्तत्वविधानमिति प्रतीयते तेनच्चायुक्तम् ।वाक्यभेदाप
त्तेरत आह गुणविशिष्टयोरिति अनुदात्ताभिन्नौ वान्नावौ भवत इत्यादिक्रमेणार्थात् ।युष्मदस्मदेः ।नच पदस्येत्येव विशिष्टस्या
देशासिद्धिः ग्रामिकेवलस्यापि पदत्वेन तन्मात्रस्यापत्तिः वृक्षप्रचलन्यायेन तत्रापि समुदायादेशस्यैवौचित्यात् षष्ठ्यादिविशिष्ट
स्यैवादेशत्वेन तत्साहचर्य्यगाम्यमिविशिष्टादेशस्य कर्तुमुचितत्वाच्च नच पदावयवस्येति व्यधिकरणं स्यादिति वाच्यम् अन्तग्रह
णेनाग्रहणएव व्यधिकरणाज्ञापकात् पादसमाप्ताविव पदस्येति वक्तव्ये ऽत्रकरणादत्र व्यधिकरणाभावाच्च किंच स्थानमानय
इत्यस्मादस्त्वविशिष्टानयनवत् षष्ठ्यादिविशिष्टपदस्यैवोदाहरणालाभे पदग्रहणेनैवासिद्धेसर्वग्रहणंमास्त्विति केयटः ।परन्त्वि
दं चिन्त्यम् भूतलमानयेत्यत्र विशिष्टानयनस्याभावात् एवं तु षष्ठी चतुर्थी द्वितीयास्थयोरिति विग्रहः तेन श्रूयमाणे एवादेशः न
त्रैव नेषां स्थितिसत्वात् प्रकृतिकल्पषष्ठ्यर्थः तेन युष्मदस्मद्प्रकृतिस्थादित्वे स्वेदमितिनाति युष्मदशब्दे ।ति प्रसङ्गः अन्य
थासिद्धान्ते ऽत्रवारणाय षष्ठीत्यादि प्रत्ययग्रहणेन नदादेरित्युपस्थिवानदादियुष्मकृव्दाभावइतिक्लेशेन वारणीयं स्यात् ए

भै॰
१६३

वंयुदस्मद्घटितलक्षणा॰ एवञ्चयत्नप्रकृतिकाएतस्मान्नद्घटितपदस्येत्युक्तेविशेष्टस्यैवलाभेतद्ग्रहणंमास्तु॰ किञ्चात्रशब्देना
ग्नैनसवाच्यार्थाभावात्॰ समर्येतिष्टसुश्रीवइत्यत्रस्थितिरेववाच्यार्थः अपरित्यागस्तुटश्चादार्थिकः एवञ्चस्थशब्दस्यस्थित्स
र्थत्वेषष्ठ्यादिषुस्थितयुष्मदस्मदोरादेशाइत्यर्थः षष्ठ्यादिषुस्थितिश्चसमवायसंबन्धेनावयविनोप्यवयवसमवायेनसत्वा
त्॰ एवञ्चायमर्थविशिष्टपदविशिष्टस्यैवदेशलाभति॰ नचप्रत्ययलक्षणेनतन्स्थितिः षष्ठ्यायुष्मदस्मदोरितिसूत्रेप्रथममुपाद
नेपिप्रसिद्धक्रमणादायोदाहरणमाह॰ श्रीशइत्यादि॰ उभयतआश्रयणइति॰ पदान्तरत्वस्यसिद्ध्यर्थम्पूर्वानवद्भावस्यषष्ठ्यादिवि
शिष्टत्वसिध्यर्थम्परादिवद्भावस्याश्रयणादितिभावः। आदेशेसतीति॰ सन्धेः पूर्वन्नवाक्षरत्वेनापादादित्वात्॰ पूर्वपक्षिणउक्तिङ्
खण्डयति॰ उभयतआश्रयणेपीति॰ उक्तरीत्येति॰ सर्वस्यपदस्येत्यधिकारात्॥ श्रूयमाणविभक्तिकस्येत्यस्यलाभोयथानदाह॰।
अहानौस्थशब्दइति॰ त्वमयोरप्राप्तयआह॰ युवयोरिति॰ त्वत्ताविन्युक्तस्यफलमाह॰ विग्रहेत्विति॰ सङ्ख्याविशेषभानादि
ति॰ तत्रवहुत्वव्याप्यतावच्छेदकधर्मावच्छिन्नवाचकतन्त्रच्छब्दसत्वादितिशेषः अयम्भावः। उच्चारितःशब्दःप्रत्यायकइत्या
दिरीत्यायत्रविशेषधर्मावच्छिन्नवाचकविभक्तिश्रवणन्तत्रतद्धर्मावच्छिन्नविषयकःशाब्दबोधोभवति। यथासरसिजमित्या
दौ। यदितुतादृशेषुरूढिस्वीकारादितइघटकस्य पदादिशक्यार्थभानञ्चेत्तदातद्विभक्त्यर्थसङ्ख्याभानेपीष्टापत्तिः। पदान्तरा
र्थस्याभानञ्चेदनुभवसिद्धन्तदाविभक्त्यर्थस्याप्यभानम्भविष्यतीतिमन्यते तदास्तोकान्मुक्तइत्यादौतस्यभानम्बोध्यम्॰ यत्रतन्तु।
विभक्तिश्रवणं तत्रनसङ्ख्याविशेषभानम्। किन्त्वभेदैकत्वसङ्ख्यायाभानम्। अजहत्स्वार्थावृत्तिरितिपक्षेपूर्वपदस्यसङ्
ख्याविशेषबोधकत्वेयत्रगमकसद्भावस्तत्रतस्याअपिमतीतिः। यथाद्विपुत्रोमीन्द्रिकोमासजातस्रावकीनइत्यादौचतुर्थेतवका

राम
१६३

देशाकरणादिकत्वावगतिः। युष्मन्नुत्र इत्यत्र तु तादृशागमकाभावान्नद्वित्वस्य नाप्येकत्वस्य भानमिति। नच विग्रहवाक्यजन्यशाब्द
बोधे यदि सङ्ख्याविशेषभानन्तादृशविग्रहसम्बन्धिवृत्तौ च तदभानन्तदा वृत्तिविग्रहयोः समानार्थत्वभङ्ग इति वाच्यम्। विग्रहवा
क्यजन्यशाब्दबोधीयाया विभक्त्यर्थसङ्ख्यावृत्तिविषयताभिन्नाप्रकारतातदवच्छेदकधर्मावच्छिन्नप्रकारतानिरूपिताया तादृशवि
शेष्यतावच्छेदकावच्छिन्नविशेष्यताशालिशाब्दबोधजनकत्वमेव वृत्तिविग्रहयोः समानार्थत्वमिति स्वीकारादिति अत एव विग्र
हवाक्यजन्यशाब्दबोधे सङ्ख्याविशेषभानादेव प्रथमन्यायबीजमाह वचनद्वयेति वहुव्रीहिरिति एकतिङ्‌ यस्मिन्नित्यर्थः।
नन्वेकपदस्य स्वसजातीयद्वितीयरहितार्थकतया पश्य मृगो धावतीत्यस्यैकवाक्यत्वन्न स्यादत आह इदं स्वशास्त्रेति लौकिकेति
लोकविदितमेकवाक्यत्वमित्यर्थः। अत एव अस्यैवैकतिङित्यस्य स्वशास्त्रोपयोगित्वादेव निरर्थकशब्दसमुदायेति दशदाडिमा
नीत्यादिः। सुप्तिङन्तञ्चेति अत्र सुप्पदं सुबन्तपरम्। सुप्तिङन्तयोश्चय इति समासः। द्वन्द्वान्ते श्रूयमाणस्य चयशब्दस्य प्रत्येकं स
म्बन्धात्सुबन्तचयतिङन्तचयलाभः। सुबन्ततिङन्तचयलाभायाह सुविशिष्टमिति कारकान्वितेति अस्य विशेषणोत्यादिः त्तिनी
त्वमुत्पत्त्यपेक्षस्य सङ्ग्रहः। एवञ्च साक्षात्परम्परया वा कारकनिष्ठविषयतानिरूपिता या क्रियानिष्ठाविषयता तच्छालिशा
ब्दबोधजनकतत्तत्समुदायत्वं तत्र तत्रैकवाक्यत्वमिति। यदुक्तं समानवाक्य इत्यत्र स्वशास्त्रमात्रोपयोग्येकवाक्यत्वेति तेन पत्सिद्धन्त
दाह ओदनम्पचेत्यादीति। अत्र तवेत्यस्य नादेशः। समानवाक्यस्थत्वाभावात्। ननु समर्थपरिभाषोपस्थित्या पत्रनादेशं सामर्थ्यं तत्रै
वादेशेन भाव्यमिति शङ्कावारणायाह समर्थपरिभाषात्वत्रेति ननु पदस्य पदादिष्वधिकारसत्त्वेन पदत्वेनोद्देश्यतासत्त्वात्समर्थप
रिभाषोपस्थितिः स्यादेवेति चेन्न एवमपि साक्षात्तन्त्रद्विध्युद्देश्यपोरुद्देश्यविधेययोर्वा सामर्थ्यस्य परिभाषायामाश्रयणोप्यन्येन

भै. १६४

सामर्थ्यस्य तत्राश्रयणे प्रमाणाभावात् । न च पूर्वोक्तैकवाक्यत्वस्वीकारे ऽस्वदन्ते नश्यितव्यमित्यस्याप्येकवाक्यत्वं लभ्यते। आख्या
तं साव्ययकारकविशेषणं वाक्यमित्यनेन न तु नेति विरोध इति वाच्यम् । तत्राख्यातपदस्य धातुपरत्वात्- कारकान्वितक्रियाबोधत्व
मात्रोक्तौ पचतीत्येतन्मात्रस्य वाक्यत्वापत्तिरतस्तादृशसमुदायनिवेशः। इदञ्च सपूर्वायाइत्यत्रेति· तत्र हि युष्मदस्मदोरन्यतरस्या
मन्वादेश इति वक्तव्यम् ग्रामे कम्बलस्ते वस्वम् ग्रामे कम्बलस्ते स्वम्। ग्रामे कम्बलो मे स्वम्। ग्रामे कम्बलो मम स्वम्। एतदुदाहरण
दर्शनेन न ते मयावेकवचनस्येत्यस्यैव वैकल्पिकत्वमिति प्राप्ते अपर आह· सर्व एव वान्नावादय अनन्वादेशे वा वक्तव्याः। न तर्हीदा
नीमिदं वक्तव्यम् सपूर्वाया विभाषेति वक्तव्यञ्च। किम्प्रयोजनम्। अन्वादेशार्थम्। अन्वादेशे विभाषा यथा स्यादित्युक्तम्। एतेन प्र
घट्टकेनान्वादेशे युष्मदस्मदोरित्यारभ्य ये आदेशा विहितास्तेषां नित्यत्वं लभ्यते तदेतदत्रोक्तमन्वादेशे नित्यमिति· न चवाहाहैव।
एतत्सूत्रोपात्तैः सर्वैर्योगे एकस्मिन् प्रयोगे ऽर्थद्वारकोऽनसम्भवतीति तेषामन्यतमेनेति। चादीनामवाचकत्वादाह· समुच्चयादि
द्योतकत्व इति· साक्षाद्योगश्च हरिस्त्वां मां च रक्षत्वित्यत्र सुप्रसिद्ध एव· अत्र चकारद्योत्यसमुच्चये युष्मदस्मदर्थयोरन्वयात् । हरो ह
रिश्च मे स्वामीत्यत्र तु स्वार्थोऽश्रयहरिहरान्वितस्वामिपदार्थान्वयित्वं युष्मदर्थस्य न तु साक्षात्तदन्वयित्वमतो न निषेधः। पश्यार्थैरिति सूत्रे
अनालोचने इति पर्युदासेन वहिरिन्द्रियजन्यज्ञानार्थकधातुयोगस्यैव स्यादत आह· अनालोचन इति· इन्द्रियांशे वहिष्टम्पर्युदासेन न
विवक्षितमिति भावः। स्वान्वितान्वयित्वेति· भक्तस्त्वरूपं ध्यायतीत्यत्र इन्द्रियजन्यं यन्मानसं ज्ञानं धात्वर्थस्तेन युक्तस्य स्वरूपपदार्थस्य
युष्मदर्थेऽन्वयः। उक्तार्थे प्रमाणमप्याह· तदुक्तमिति· अत एव· तत्तच्छब्दयोगे विधीयमानकार्यस्य साक्षाद्योग एव प्रवृत्तेरेव· भक्तस्त्वा
मिति वाक्ये यच्छब्दोपादानाभावात्कथं निराकाङ्क्षाप्रतिपत्तिरत आह· प्रक्रान्तार्थत्वादिति· तेनेति· मध्यमपुन्यायेन त्रायत इत्य

राम १६४

स्योभयत्रान्वयस्वीकारेणेत्यर्थः। आमन्त्रणमामन्त्रितमिति· अत्रामन्त्रणशब्दः करणसाधनः तदन्तविधिरिति· अस्य अन्यथा
सञ्ज्ञाविधित्वन्नस्यादिति शेषः। अत एव· तदन्तविधिस्वीकारादेव· सञ्ज्ञेति· आमन्त्रितसञ्ज्ञेत्यर्थः। हैहेभो इत्यादीनामपीति·
आदिपदेन नपुंसकवापोदिशब्दसङ्ग्रहः। अन्यथेति· तदन्तविध्यभावे। अन्तरङ्गानपीति न्यायेनेति· अत्रान्तरङ्गत्वं सञ्ज्ञायाः प्र
तिसम्बन्ध्यन्तरानपेक्षत्वेन। लुकस्तु नपुंसकस्वव्ययत्वप्रातिपदिकापेक्षत्वेन वहिरङ्गत्वम्· नचनिमित्तनिमित्तिनोर्विभेदस्या
न्यत्र दृष्टत्वेन प्रकृते सञ्ज्ञासञ्ज्ञिनोर्भेदाभावेन कथमस्य सञ्ज्ञा इति वाच्यम्· ज्ञातात्पस्य भेदाभेदरूपतया तद्घटकभेदमादा
यान्तरङ्गपदार्थस्य सम्भवात्। वस्तुतस्तु नात्रान्तरङ्गन्यायस्सञ्चार उचितः। अन्तरङ्गनिमित्तविनाशकलुक एवानेन विधानात् ततः
प्रकृते तु निघातविधायकामन्त्रितस्येति त्रायकेन तदन्तविधिसम्भवेन लुक्यपि प्रत्ययलक्षणेनामन्त्रितसञ्ज्ञाया प्राप्तिरस्त्येवात
द्विपदात्परस्यामन्त्रितस्य निघातस्य निघातविधायकम्। यदि विभक्तिमात्रस्य सञ्ज्ञास्यात्तदा पदात्परस्य सञ्ज्ञायोग्यस्याभावेन तद्वैयर्थ्य
स्पष्टमेव· ननु परमगोदुहौ यरमगोदुह इत्यादौ सम्भवः। अत्रस्तु त्तरपदस्य कापित्वाभावेनान्तर्वर्तिविभक्त्योत्तरपदस्य पदत्वादिति चे
न्न· अनुदात्तौ सुप्पितावित्येव सिद्धेः। सम्बोधने शक्तेरिति· एवञ्च रामशब्दात्सम्बोधने यथा प्रथमा प्रातिपदिकार्थेत्यनेन तथा
प्रकृतेपि प्रथमेत्यन्तु हस्यैव सिद्धेः सेतियदं सम्बोधनविषयेया प्रथमा तदन्तस्य सञ्ज्ञासिध्यर्थम् सम्बोधने शक्तेरिति· कोश
प्रामाण्यात्तथाकल्प्यत इति भावः। स्वसिद्धान्तमाह· अन्ये त्विति· अन्यत्र· राम इत्यादौ। उत्र हैहे इत्यादौ। उक्तार्थानामिति न्याय
स्यनात्र विषयतेत्याशयेनाह· प्रातिपदिकोक्तत्वेति· नन्वेवं सेतिव्यर्थमत आह· सेति त्विति· निघातनिषेध इति· भोशब्दस्याम
न्त्रितस्येत्यनेन निघाते कर्त्तव्ये विद्यमानवत्त्वेप्यामशब्दात्परत्वेन प्राप्तस्येत्यादिः। नच भोशब्दस्याविद्यमानवत्त्वेपि स्वाश्रय

सत्त्वमादायततःपरत्वादेवनिघातःप्राप्नोतीतिवाच्यम्· एवंसतिराजन्नवराज्यमित्यादौ।तवेत्यस्यतेमयेत्यनेनतेआदेशः स्या
दिति।अविद्यमानवद्भावविधानस्यैववैयर्थ्यंस्यात्।तस्माद्यदामन्त्रितात्तद्व्यवधानेनकार्यम्प्राप्नोतितत्कार्यमविद्यमानवद्भावे
नप्रतिबध्यते।एतावताराजन्नवेत्यादिसिद्धिर्येन्तुव्यवधानेनामन्त्रितात्परस्यप्राप्नोतितद्भवत्येवेत्यभिप्रायान्न·।आमन्त्रितम्पू
र्वमितिसूत्रेपूर्वशब्दोपादानेनपूर्वम्परस्यकार्येऽविद्यमानवन्नतुस्वापेक्षयायत्पूर्वन्ततोव्यवहितपरस्येतिभावः।अविद्य
मानवद्भावप्रयोजनमाह· अग्नेतवेत्यादि· आदिनाविद्यावलंदेववल्लन्नदेवलक्ष्मीपतेतेङ्घ्रियुगमित्यस्यपरिग्रहः।नन्वे
वन्नृसिंहाश्रमतेख्यातिरित्यत्रोक्तप्रकारासम्भवात्ते आदेशोनस्यादतआह· नृसिंहेति· विनीतौवामित्यादाविवेति· अत्र
वामित्यस्यप्रथमान्ततयाविभक्तप्रतिरूपकत्वस्वीकारम्विनाकथमपिसाधुत्वासम्भवः।वक्ष्यमाणरीत्याप्राप्तायामूला
सङ्गतेःपरिहारायाह· अस्येति· नन्वग्नेतेजस्विन्नित्यत्राग्नइत्यस्यपादादिस्थत्वेनापादादावितिनिषेधोभविष्यतीतिमूला
सङ्गतिरतआह· अत्रुदात्तमित्यादि· सम्बन्धानर्हत्वेनेति· अस्यसूत्रस्याविद्यमानवद्भावनिषेधकत्वदनुदात्तपदस्यासम्बन्धः।न
चानुदात्तत्वविधानार्थमेवतस्यसम्बन्धोऽस्त्विति वाच्यम्· वाक्यभेदापत्तेश्चकारस्यतदर्थमनुपादानाच्च· सर्वमितिसुव्यर्थत्वान्नस
म्बध्यतेइतिभावः।देवकरोषीति· अत्रदेवेत्यस्याविद्यमानवद्भावनिषेधेकरोषीत्यस्यनिघातःस्यान्।नचभावप्रधानमाख्यातमि
तिसिद्धित्वादत्रकरोषीत्यस्यक्रियाविशेष्यकवोधजनकतयानदेवेत्यनेनसमानविशेष्यवोधजनकमितिसामानाधिकरण्याभा
वादेवनिषेधाप्राप्तिरितिवाच्यम्· प्रकृतिप्रत्ययौसहार्थम्ब्रूतस्तयोःप्रत्ययार्थःप्रधानमित्यौत्सर्गिकनियमाभिप्रायेणास्योपादा
नात्· यद्वादेवाक्षिकमाम्याहीतिवाक्यार्थम्प्रत्यादकंयद्दिव्यत्यस्यैभवानितिवाक्यन्नदेकदेशस्यदेवदीव्यतीत्यस्योपलक्षणमिदम्

तत्रगुणप्रधानभावविपर्ययः स्पष्टएव। यथायेष्विति· नन्वत्रप्रवृत्तिनिमित्तभेदाभावात्कथंसामानाधिकरण्यमतआह सा
भेति· ननुऋत्विगादिसूत्रेउपपदानुपादानादत्रैःसुपीत्यनुपपन्नमतआह निपातसाहचर्याद्दिति· उष्णिकूप्राब्दसाहचर्यादि
त्यर्थः।अतएवसुपीतिप्रकरणावाधः।नन्वनदितामित्यत्रयदिनञ्समासस्तर्हि त्वाबहुव्रीहिस्तदानन्द्यादित्यत्रनलोपापत्ति
रतआह इत्सञ्ज्ञकाइति· एवञ्चबहुव्रीहिगर्भोनञ्तत्पुरुषः कार्यइतिभावः।नप्रवृत्तिरिति· भसञ्ज्ञाक्षिप्तप्रत्ययस्याञ्चति
विशेषणात्वमितिभावः नन्वचइतिप्रत्याहारग्रहणमेवास्त्वित्यतआह· व्याख्यानादिति· आतोधातोरितिलोपविधानसाम
र्थ्यान्नप्रत्याहारस्य· मिदचोऽन्त्यादितिनिर्देशान्नतादृशशब्दसामान्यस्य· वचोऽशब्देतिनिर्देशान्नतादृशानुपूर्वीकानर्थकश
ब्दग्रहणमित्येवंरूपादित्यर्थः।प्रत्यञ्चाविति· यद्यप्यत्रनुम् तथापिपूर्वकालिकस्यनस्यलोपोऽस्त्येवेतिलुप्तनकारत्वस्या
विघातः।नेदम्वर्गग्रहणमिति· चवर्गग्रहणमित्यर्थः।व्याख्यानादिति· अजादौगुणवचनादेवेतिनिर्देशमूलकादित्यर्थः
।ननुचाविति सूत्रेऽणइत्यस्यसम्बन्धेकर्तृचरइत्यादिरूपासिद्धिरतआह· कर्त्रेइत्यादीनामिति· तदुक्तंहलइतिसूत्रेइहक
स्मान्नभवतित्वतीयः अणप्रकरणात्इकारस्याप्राप्तिः।अणइतिवर्तते।कप्रकृतेर्मा।द्रलोपेपूर्वस्यदीर्घोऽणइति।तदेइकः
काणेऽस्त्यनेनेग्ग्रहणेनव्यवच्छित्तन्नशक्यमनुवर्तयितुम्।इग्ग्रहणस्यचाण्विशेषणत्वात्।अण्विशेषणमिग्ग्रहण
म्।अणइकइति।यदितर्हिअणविशेषणमिग्ग्रहणञ्चौदीर्घोभवतीतीहनप्राप्नोति।अवाचा।अवाचे।नैषदोषः अणग्र
हणमनुवर्ततेइग्ग्रहणन्निवृत्तम्।एवमपिकर्तृचः कर्तृचा अत्रनप्राप्नोति यथालक्षणमप्रयुक्ते।माभूद्दीर्घत्वमितिके
परः।अथवोभयन्निवृत्तम्।कस्मान्नभवतित्वतीयइति।नियातनात्।द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्यामिति· प्रत्य

भै. १६६

ङ्गस्येति । अन्तरङ्गस्येत्यर्थः । सर्वनाम्न इत्यादि ष्यत इति । अदसोऽद्रेरिति वार्तिकमत एव सङ्गच्छते । उपसर्जनत्वेप्यस्य यथा
प्रवृत्तिस्तदाह साथमथ्यौ द्रिति । अवयवषष्ठीति । तेनादसो दात्परस्य तदवयवस्योकारो दश्च म इति सूत्रार्थ इति भावः । उप
लक्षणमिति । अदोनुपदेश इति निर्देशात् । द्वन्द्वमिति । समाहारद्वन्द्व इति प्रत्याख्यानमित्यर्थः । नित्यत्वादिति । कृताकृतप्रसङ्गि
त्वात् । ननु ह्रस्वत्वमपि शब्दान्तरस्येति न्यायेनानित्यमत आह । अपरनिमित्तकत्वेनेति । यथाश्रुतमूलग्रन्थादन्यथा धइस्ये
व परिभाषायाः स्वरूपमिति प्रतीयते तच्च ष्यङ इति सूत्रविरुद्धमत आह । ष्यङः सम्प्रसारणमिति सूत्र इति । अनन्यविका
र इति । अनन्यस्य विकारो येन शास्त्रेण तत्रान्यसदेशस्येसुपतिष्ठत इति परिभाषार्थः स्यात एव च [illegible] णोनः धात्वादेः षः स इ
ति सूत्रयोरन्यसदेशस्येत्यस्योपस्थितौ णो न इति सूत्रेण नकारादेशो नेति सादिष्वेव स्यात् तथा धात्वादेरिति सत्वं सोतेत्यादा
वेव स्यान्नतु नमति सिञ्चतीत्यादौ । न चेष्टापत्तिः । नेर्गदनदेति सूत्रे नदेत्यस्योपसर्गात्सुनोतीति सूत्रे सोतीति सेधत्यादि नि
र्देशस्यानुपपत्तिप्रसङ्गादतोऽन्यसदेशानन्यसदेशयोरित्येतत्पूरणेन व्याचष्टे । अन्यसदेशानन्यसदेशयोरिति । एतस्याः
परिभाषाया आवश्यकत्वमाह । अतल्लोपो न इति । पाक्षिको नान्यथासिद्धिरुद्धा विनापि कार्यकालपक्षे न तु यथोद्देशे आक
डारीय भयदसञ्ज्ञाविषये तु यथोद्देशपक्ष एव न तु कार्यकालपक्ष इत्याशयेनाह । किन्त्विति । अल्लोपैकवाक्यतापन्नेत्यर्थः ।
नन्वेवम्भाष्यविरोध इत्यत आह । ष्यङः सम्प्रसारणमितीति । एवञ्च परिभाषैव भाष्यकाराभिप्रेता न प्रत्याख्यानमित्याश
येनाह । अत एवेति । अस्याः परिभाषाया न्याप्यत्वादेवेत्यर्थः । केचित्तु यदत्रोक्तं कार्यकालपक्षे नल्लोपैकवाक्यतापन्नपद
त्वस्य भत्वेन बाधो न स्यादिति तन्नयुक्तम् । आकडारादित्येव सिद्धे सञ्ज्ञापदोपादानेन सम्यक् ज्ञापमानेत्यर्थेन कार्यार्थे

राम १६६

म्प्रधानदेशेगमनेप्युपदेशदेशीयत्वव्यवहारन्नत्यजतीत्यर्थोविवक्षितः।तथाचभसञ्ज्ञयापदसञ्ज्ञाबाधः सुघटएवेवदन्ति·न
त्र·उपदेशदेशीयत्वव्यवहारात्यागेपिसमानकालप्राप्तिकयोर्भत्वपदत्वयोर्बाध्यबाधकभावोयुक्तः।यत्रादौभसञ्ज्ञायान्नस्प्रयु
क्तकार्येचकृतेयश्चासदसञ्ज्ञाप्राप्तासापूर्वजातभसञ्ज्ञायाबाधयितुन्नशक्यते।भसञ्ज्ञायाः पूर्वजातत्वात्·एवञ्चप्रकृतेनलो
पापादनंयुक्तमेव·किञ्चसञ्ज्ञाःयाकार्यार्थैतयायत्रनभसञ्ज्ञयास्वीयङ्किञ्चिच्छास्त्रीयकार्यंसाधनीयमस्तितत्रतप्याःप्रवृत्ति।
र्नस्यात्तथाचपदसञ्ज्ञायाः स्वादिष्वितिविधीयमानायाः प्रवृत्तिः स्यादेव·एवंसतिश्वलिहागोदुहावाचत्यादौढत्वघत्वकुत्वादि
कार्याणामापत्तिः स्यादेवेतिदिक्।परिभाषार्थंविवृणोति·अन्यसदेशस्येति·तत्त्वञ्च·अन्यसदेशत्वञ्च·नद्वणोति·अन्यसमा
नदेशत्वेनाभिमतवर्णेत्यर्थः।इतराव्यवधाननिवेशादेव।अनया·अनन्त्यविकारइतिपरिभाषयाः अतएव·तदुदाहरणस्थानया
सिद्धेरेव·परिभाषास्वीकारेभाष्यविरोधम्परिहरति·नैतस्याइति·अःसेरित्यत्राकारसजातीयवर्णपरमकारग्रहणम्।नन्वेवंस
दाद्यत्वविषयेस्यनुपपन्नमतआह·त्यदादीनामिति·ननुसकृदुच्चारितादःसेरितिपदात्कथमर्थद्वयलाभइत्यतआह·अत्रनत्रे
णेति·वार्तिकोक्तमतत्रयान्यतमस्यपक्षस्ययुक्तत्वन्नदाह·अत्रादमुपङिति·अत्र·अदड्ड्·शब्दे·लत्वेउत्तरीत्येति·चलीकृपत
इत्यत्रान्तवर्णतद्वर्णयोरितरव्यवधानसत्त्वात् अत्र·अदड्ड्·शब्दे·न्याययुक्तत्वमुपपादयति·अतएवेति·नान्त्येरिति·ओका
रपरेफान्तभिन्नस्यादसइतितस्यार्थः।अःसेरितिपक्षमिति·तृतीयपक्षमित्यर्थः।नन्वेतावतान्याययुक्तत्वङ्कथमतआह·अ
त्रेति·प्राप्नोतीति·अत्र·भाष्ये·इतिभवितव्यमिति·एतेनन्याययुक्तत्वंस्पष्टमेवोक्तम्·परन्तुतदग्रेइदमेवेष्यतइत्येवनोक्तङ्किन्तुभवि
तव्यमित्येवोक्तम्।तेनसम्भवभावप्रयुक्तोऽप्रयुक्तत्वलाभः।ननुविष्वग्देवयोरित्यस्याभावेपिचकारसमुच्चयसर्वनाम्नउपस्थि

तत्वात्कथमश्वाचीत्यत्रातिप्रसङ्ग·उक्तोऽतआह· चस्याप्युपलक्षमिति· तथाचोत्तरपदेनपूर्वपदस्याक्षेपेऽप्रत्ययान्तेऽञ्चतौप
रेयत्पूर्वपदन्तस्यादेशइत्यर्थोपस्याऽतिप्रसङ्गःस्यादितिभावः।अत्रज्ञाप्यांशेधातुग्रहणेतदादिविधिरित्येव·एतद्वचनफलम
न्यत्रेत्यभिप्रायेणमूलेऽन्यत्रेत्युक्तम्· प्रकृतसूत्रेतुनफलमप्रत्ययग्रहणसत्वात्· अन्यथा· ज्ञाप्यस्यवचनस्याभावे·परिभाषा
ज्ञानेति·नचसमःसमिरितिन्यासेप्यनेकाल्त्विपरिभाषायाज्ञानस्यापेक्षास्त्येवेतिसाम्यमितिवाच्यम्·भवन्मतेइत्संज्ञायाः।
ङि·त्येत्यस्यचापेक्षा·मन्मतेत्वनेकाल्त्वस्यैवेतिलाघवम्·इगितिन्यासेचाद्यन्तावित्यस्यापेक्षेतिगौरवमितिभावः।नन्ववयस
वेनाम्नांसमोऽकचिकृतेसमादेशापक्षेककाराश्रवणंसमिरिसमुदायरूपादेशस्यफलमितिभाष्येनोक्तमित्यूनतापरिहारायय
त्रकुत्साविवक्षातत्रापिप्रथममुत्तरपदेतिमित्तकादेशस्ततोऽकजितिस्वीकारात्।अथवोत्तरपदार्थेसमशब्दसमभिव्याहारेणप्र
कृष्यमतीत्येतादृशेविषयेकुत्सादिविवक्षैवनेति·यदुक्तमनुप्राकारेऽञ्चावितितल्लाभप्रकारमाह·अलोपइत्यत्रेति·नलोपोप
स्येतिव्याख्यानेऽवयवार्थकपस्येत्यस्यपदावयवस्येत्यर्थकरणेगतौनलोपविषयेतिर्यादेशाभावापत्तेरतएवम्व्याख्यातम्·
मूलोक्तसामानाधिकरण्येनव्याख्यानवक्ष्यमाणानुपपत्तिरतआह· पूजारूपार्थस्येति· पूजागम्यतइति·कर्तुरित्यादिः।ननुप्राच
इतिप्रयोगोयत्रतत्रचेत्पूजाविवक्षितातदानलोपोनस्यादितुनपूजाविवक्षातदाऽल्लोपस्याचिप्रवृत्तिःस्यात्तथाचोदात्तनिवृत्ति
स्वरस्यापत्तिरतआह· प्राचइत्यादीति·अत्रहिप्रकर्षेणाञ्चतीतिशब्दसाधुत्वायव्युत्पत्तिमात्रंनत्वर्थोऽवयवयोर्विवक्षितः।प्रा
चामवृद्धादित्यादिनिर्देशादेतादृशेष्वल्लोपोनापदितुनस्यात्तदाकदुत्तरपदप्रकृतिस्वरेणान्तोदात्तस्यप्राक्शब्दस्यावपवोलु
प्यतइत्युदात्तनिवृत्तिस्वरःस्यात्।एतेनप्रागुक्तस्याञ्चितङ्गच्छतीत्यस्यप्राचइत्यादिरूपाणाम्बासाधनेन·प्रत्युक्तुङि·त्यत्रनलो

पाभावोऽपि निपात्यत इति यथाश्रुतमूलोक्तम्परेश्च घाङ्कैरिति सूत्रभाष्यविरुद्धमत आह· ओपपधत्वेति· सूत्रे भाष्य इति· तत्र
हि सञ्ज्ञीति वचनस्य कुञ्चा इत्यत्र चोः कुः ऋत्वीति कुत्वाभावः फलमित्युक्ता निपातनादेतत्सिद्धम्। किन्निपातयन्नत्र ऋत्वि
कृदधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां चेत्युक्तम्· यद्ययं स्वतो नकारोपधः स्यात्तदा कुत्वस्याप्राप्तेर्भाष्यमसङ्गतमेव स्या
त्। अत एव क्रुङ् आदित्यत्र नलोपो न। यदुक्तम्मूलेन लोपाभ। ओपीति तत्रापिशब्दार्थमाह· अपिनेति· सञ्ज्ञीति वचनस्य प्रत्या।
ख्यानपक्ष इदम्· कुत्वाभाव इति ञस्य त्यादिः। तदारम्भपक्षेऽप्याह· सञ्ज्ञीति· ननु षत्वं स्कोरिति सलोपक्रमेणाभिधानमयुक्तं
सलोपे षत्वस्यासिद्धत्वादत आह· सलोप इति· एवञ्च मूलकारस्यापि तादृशः क्रमो न विवक्षित इति किन्तु लक्षणयोः प्राग्निमा
त्रमिति भावः। ननु नात्र सकार इति कथं सलोप इत्यभिधानमत आह· व्रश्चेः क्विपीति· ननु यदि शतृवद्भावस्तदा शतुरनुम इ
ति सूत्रेऽबृहन्महत इति वार्तिकम्व्यर्थमत आह· शतुरनुम इतीति· शतृवदित्यत्र तृतीयान्ताद्वतिर्न तु सप्तम्यन्तात्तेन महतीत्तरे
त्यत्रोगितश्चेति ह्रस्वविकल्पः सिध्यति। अत एव· अधातोरित्यस्य तु पदार्थविशेषणत्वाभावादेव· नन्वतुशब्दस्य पृथक्प
दत्वेऽपि तस्याङ्ग विशेषणत्वेन यथा त्वन्तस्येत्यर्थलाभस्तथा सन्तस्येत्यस्यापि लाभे सौत्रमन्तग्रहणम्व्यर्थमत आह· अङ्गवि
विशेषणत्वेति· अत्रेदमवधेयम्· सूत्रेऽत्विति भवतुक्तवतु वतुमतुप्वतुप अवतु डमतुयामवयवानां सामान्येनानुकर
णम्। अत एव भवान्कृतवान्घरवान्तावान्कुमुद्वानित्यादि सिद्धिः। नन्वत्वन्तत्वमङ्ग विशेषणमुत प्रत्ययस्य विशेषण
म्। नाद्यः। दीर्घप्रवृत्तिसमये तस्यात्वन्तत्वाभावात्। भवानित्यत्रापि सर्वादिपठितभवतुशब्दावयवोकारस्योपदेशेऽजन्तुनासि
केति सूत्रेणोकारस्येत्सञ्ज्ञायान्तस्य लोपेऽनुबन्धरहितस्यैव सत्वात्· सर्वेष्वेव सानुबन्धकनिर्देशेष्वरूपमाश्रीयते रूपनि

ग्रहणञ्च शब्दनान्तरेणा लौकिकम्प्रयोगन्तस्मिंश्च सानुबन्धकानाम्प्रयोगो नास्तीति कृत्वा द्वितीयः प्रयोग उपास्यते कोसावुपदे
शोनामेतिघसञ्ज्ञासूत्रीयभाष्योक्तरीत्योपदेशे योत्वन्तस्तस्य ग्रहणमिति विज्ञास्यत इति चेत्· एवं सति सर्वादिपठिता व्युत्प
न्नभवतुशब्दस्य भवानिति यद्यपि सिध्यति तथापि भाविडैवतुरिति व्युत्पन्नस्योपदेशाभावाद्दीर्घो न स्यात्· व्युत्पत्तिपक्षेऽवयवावि
यवस्य समुदायावयवत्वेनात्र सिध्यत्येवेति चेत्· एवमपि मतुपमतुवन्तेन सिध्यति अत एव न द्वितीयः। प्रत्ययस्याप्रकृते
न्तस्य दीर्घत्वेपि तउपसङ्ख्यानमिति· नन्नर्हि उउपसङ्ख्यानङ्कर्त्तव्यन्न कर्त्तव्यम् यकारलोपे कृतेनातुवन्तमेव· अत्व
न्तमेव· यथैवन्तर्हि पकारलोपे कृतेनातुवन्तमेवमुकारलोपे कृतेनात्वन्तम्। सूत्रेऽत्वन्तस्योपादानाद्भूतपूर्वगतिः। अतुवन्त
स्यत्वनुपादानान्न भूतपूर्वगतिरन्यदंशइति भावः। तत उक्तयुक्त्या भूतपूर्वगतिर्व्यवस्थापिता· तदनुबन्धकग्रहणेइति परिभा
षयात्त्ववत्वन्तादीनाङ्ग्रहणम्प्राप्नोतीति नाशङ्कनीयम् उकारपकारयोः समुदायानुबन्धत्वेन तस्याः परिभाषायाइहविष
याभावात्। एतेन प्रकृतसूत्रे सत्यन्तग्रहणेऽत्नोरन्नोऽत्वन्तइति समासङ्कृत्वा तस्यात्वन्तशब्दस्याङ्गविशेषणत्वेनात्वन्तं यद
ङ्गमित्यर्थे स्यावश्यकतयामतुवन्तेमुख्यस्य तस्य सत्वेन भवतुशब्दे च व्यपदेशिवद्भावेन तस्य सत्वमुपपाद्य सोत्रान्तशब्द
स्य सार्थक्योपपादनम्परास्तम्· ननु परमित्यसङ्गतम्दीर्घस्यनुमोऽप्राप्तिविषये चारितार्थ्याभावादत आह· वचतसामर्थ्या
दिति· वस्तुत एवम्प्रकारेण चारितार्थ्यमयोग्यमित्याशयेनाह· अभिमानइति· सत्यपि सम्भवे वाधनम्भवतीति भाष्यका
रमताभिप्रायेणाह· अभ्युच्चयइति उक्तमेवार्थमाशङ्कासमाधानाभ्यामाह· नचेत्यादिना· उपसंहरति· तस्मादिति· अनुना

सिकोकारविशिष्टइति· अनुनासिकोकारोपलक्षितइत्यर्थः।नलोपिनोऽञ्चतेरेवेति· तेनप्राङ्·सुमुखीत्यादौपूजायामुगिता।
श्चेतिङीप्नेतिबोध्यम् तेन·उक्तनियमाश्रयणेन·उक्तनियमलाभेबीजमाह·न्यायेनि· अञ्चतेश्चेन्नलोपिनएवेति·एताद्दृ।
शानियमफलम्पूर्वोक्तमेव· अत्र·गोमन्तमिच्छतीत्यर्थेकेगोमानित्यत्र·धातुत्वात्कथन्नुमिति· सनाद्यन्तत्वेनधातुत्वात्औ
पदेशिकधातुविषयकइति·ज्ञापकसाजात्यात्· इदुङ्सनुबन्धस्यैवेति· यद्यप्येकाचइतिसूत्रेइङ्इतिविधेयसमर्पकन्तथापि
तस्यत्यागः।पूर्वोभ्यासइतिकृप्तइत्यत्रानुवाधसमपेकत्वेवाधकाभावइतिभावः द्वित्वविशिष्टार्थकमिति· उभेग्रहणसा
मर्थ्यात्प्रकृतेद्वित्वस्यपर्याप्तिसम्बन्धेनाभ्यस्तसञ्ज्ञोद्देश्यतावच्छेदकत्वंविवक्षितमन्यथाआश्रयतयातस्योद्देश्यकत्वं
स्यात· एकाचोद्वेइतिसूत्रेद्वित्वाश्रयस्यद्वितीयोच्चारणविषयस्यविधेयत्ववत् अशाब्दार्थत्वादिति·लक्ष्यानुसारिगणेद
राड्नन्यायेनैवपर्याप्तिसम्बन्धस्योद्देश्यतावच्छेदकत्वलाभेतदर्थमधिकोपादानञ्जेरवग्रस्तमिति।एतच्चभाष्येऽसति
प्रयोजनइत्येवमभिधानेनसूचित·विभावयन्निति·यथावार्तिककृदुक्तंसहस्वग्रहणम्प्रत्याख्यातन्नथापराभिप्रेतंसह
स्वग्रहणमपिप्रत्याख्यातमेव·ऐर्त्सन्नित्यत्राभ्यासलोपेञ्जुसभावार्थन्नथाईर्त्स न्नित्यत्रनाभ्यस्तादिति·नुम्निषेधश्चस्यादि
तितदभावार्थञ्चोभेग्रहणमितिकस्यचिन्मतन्तन्निराकरणायाह·तत्रेति· ननुशयासहैकादेशेष्वुभयतआश्रयणेननञ्ज
स्प्राप्तिरत्आह· एकादेशात्पूर्वमिति·सनकारशवकारयोरित्यर्थः।अन्तादेशइति·ततएकादेशइतिशेषः।नप्रकृतेस्थानिक
ल्पावोपयोगइत्याशयेनाह·किञ्चेति·यदुक्तन्नञ्जुसितितत्रहेतुंसूचयति·यथोद्देशइत्यादिना· अस्मदुक्तप्रकारएवावशर्के
इतिदर्शयति· अतएवेतिपञ्चमीसमासाश्रयणादेव·सामर्थ्यादिति सूत्रारम्भसामर्थ्यानानत्वनन्तरम्यास्थिदधौत्रित्र

स्थसानङ्इतिप्रोषः तस्यात्राप्राप्तेः।ज्ञानमात्रमिति· ननुपश्यार्थैरितिसूत्रइवचाक्षुषंज्ञानविवक्षितंसाधकाभावादितिभा
वः।ननुषत्वापवादत्वादित्यसङ्गतम्·कुत्वस्यषत्वाप्राप्तिविषयेचारितार्थ्यादिति।तथावक्तॄणामाशयमाह·क्विन्यतइत्यादि
जश्त्वापवादोपीति·कुत्वविषयेजश्त्वस्यावश्यम्प्राप्तेः।इदञ्चिन्त्यमिति·जश्त्वापवादत्वकथनमित्यर्थः भाष्यकृतोक्तेरिति
एवंक्विन्प्रत्ययेतिसूत्रेभाष्येउक्तम्·प्रत्ययग्रहणाङ्किमर्थम्नक्विनः कुरित्येवोच्येत·क्विनः कुरितीयत्युच्यमानेवकारस्यैवकु
त्वम्प्रसज्येत·ननुवलोपेकृतेनभविष्यति· अनवकाशङ्कुत्वंलोपम्बाधेत·सावकाशङ्कुत्वम्।कोऽवकाशः।अनन्त्यः।अनन्त्य
इति·क्विन्प्रत्ययापेक्षयाऽनन्त्यः पदस्यत्वन्त्यइतिकैयटः।कथम्पुनः सत्यन्त्येऽनन्त्यस्यकुत्वंस्यात्।सत्यपिसम्भवेबाधनम्भ
वतीतिन्यायेनलोपंबाधित्वाकुत्वंस्यादितिभावः।आचार्यप्रवृत्तिर्ज्ञापयतिनान्त्यस्यकुत्वम्भवति·यदयङ्क्विनः कुरितिकव
र्गेनिर्देशङ्करोति इतरथाहितद्गुणमेवायन्निर्दिशेत् तद्गुणाम्।वकारगुणाम्।इदन्तर्हिप्रयोजनम् येभ्यः क्विन्प्रत्ययोविधीय
तेतेषामन्यप्रत्ययान्तानामपिकुत्वंयथास्यात्।मानोअस्त्राक्।मानोआर्द्रीकइति·सृजिदृशिभ्याम्माङि·लुङ्·तिप्·सिप्
वहुलञ्छन्दसीतीउभावः।हल्ङ्यादिलोपः।सृजिदृशोरित्यमागमः।व्रश्चेतिसिद्धिः·वहुलञ्छन्दस्यमाङित्यत्रवहुलग्रह
णादडागमः।संयोगान्तलोपः।व्रश्चेतिषत्वेप्राप्तेकुत्वंजस्यगः।सस्यखः।वावसानइतिचर्त्वम्।अत्रसृजेर्विशेषविहिते
नषत्वेनपदान्तेरज्जुसृड्भ्यामित्यत्रेवप्राप्तङ्कुत्वम्बाध्येतेतिकैयटेनोक्तम्।पूर्वत्रासिद्धमित्यसिद्धत्वंकुत्वस्यनास्तिप्रत्य
यग्रहणसामर्थ्यात्नषत्वापद्यपवादत्वात्कुत्वस्येति·अत्रापवादत्वंवीप्सागर्भवहुव्रीह्याश्रयणेनोपपादनीयम्·तच्चभा
ष्योक्तप्रयोगदर्शनमात्रेणानयुक्तम्·प्रयोगद्वयस्यापिछान्दसतयाछन्दसिसर्वेविधीनांवैकल्पिकतयाऽसिद्धत्वस्याप्यभा।

वकल्पनेनप्रयोगद्वयस्याप्युपपत्तेरितिभावः उदकस्यपोइतिकर्मण्यण्।पूर्वत्रासिद्धेनन्निषेधादिति·नचनपदान्तसूत्रस्थ
भाष्येवेतस्यानित्यत्ररुत्वस्यप्राप्तिनिरूपणावसरेपदचर्मावयवविधायकातिरिक्तस्यत्रैयादिकस्यग्रहणमितिव्यवस्थापि
तमितिरुत्वस्यपदचमावयवतयास्मिन्कर्तव्येकथंनिषेधप्रवृत्तिरितिवाच्यम्· प्रत्यासत्त्यालोपनिमित्तकपदत्ववत्त्वस्या
वयवविधायकातिरिक्तस्यत्रैपादिकस्यग्रहणमित्यर्थकल्पनेनापितस्यभाष्योपपत्तेः इदम्·नुमविसर्जनीयेसूत्रम्·अन
एव·[illegible]त्वादेव·एवश्चैतदेकवाक्यतयाऽऽदेशविधायकमादेशप्रत्यययोरितिसूत्रमेवतस्सत्वत्रनप्राप्तिर्धातुस
कारस्यादेशप्रत्ययावयवभिन्नत्वादितिभावः।[illegible]इति·हन्द्वानेश्रूयमाणत्वात्·[illegible]नादिति·अत्रैवसूत्रे
तिसैः प्रतिषेधोवक्तव्यइत्येतद्वार्तिकप्रत्याख्यानपरभाष्येनिस्सेनिस्स्वेस्यत्रषत्वम्प्रत्ययसकारस्यप्राप्तनद्वारणायव्यवा
यशब्दस्यप्रत्येकंसम्बन्धः उक्तः।तन्मूलकादित्यर्थः।[illegible]मिति·।नुमोयोनुस्वारइतिव्याख्यानेनशर्ग्रहणेनग
तार्थत्वाभावस्तत्रोक्तः।विविडित्यत्रशास्त्राणांयथाप्राप्तिस्तथाहष्टान्तपरतयाशिष्यबुद्धिवैशद्यायप्रक्रियामाह·[illegible]
प्तइत्यादि·।त[illegible]किविति·एतेनण्यन्तेकलोपाप्राप्तावपिनक्षतिरितिसूचितम्।नन्वपरश्चेतिसूत्रभाष्यरीत्याएभ्यः।
क्विवचनास्तीतिकथमेतदितिवाच्यम्·तस्यभाष्यस्यविशेषविषयत्वात्·ते[illegible]नीति·एवञ्चाण्यन्तएवतदभावो
नतुण्यन्तइतिभावः।[illegible]इति·यथास्वरितोवेतिसूत्रेकैयटेनोक्तम्मधुश्चुतमाचष्टेमधुगितीष्यतइति।एतच्चसंयो
गादितिलोपएवसङ्गच्छते·अत्रहिपूर्वत्रासिद्धेनस्थानिवदित्यस्यतस्यदोषइतिवचनेननिवारणेपिणिलोपस्यस्थानिवत्वात्सं।
योगादिलोपोदुर्लभः।सकारोच्चारणानुसंयोगान्तलोपेपिसकारस्यरुत्वविसर्गयोश्श्रवितार्थम्।यत्तुकौमुदमितिवचनसत्वे

भै·
१२०

तेनस्थानिवत्त्वनिषेधेसतिसिध्यति·एतदभिप्रायेणोक्तंकौस्तुभमितितुनसार्वत्रिकम्।ननुनट्चनमेवनास्तीति।अधि
कमन्यत्रस्पष्टम्।नद्भावइति·ककाराभावइत्यर्थः वसुसादेशइति·नचैवमपिवसुस्तम्भइतिधातोरेवैकानुबन्धकत्वाद्ग्र
हणंस्यादितिवाच्यम्·सामान्यग्रहणार्थेनवसुसादेशस्यसकारेणैववामदेवाड्ड्यड्ड्याविति सूत्रज्ञापितपरिभाषायइहाप्रवृ
त्तेः।किञ्चशत्रादेशवसोःस्थानिवद्भावेनैवैकानुबन्धत्वलाभेवस्वादेशे उकारोच्चारणान्तदनुबन्धकपरिभाषायाअप्रवृत्त्यर्थ
मितिक्वसोर्ग्रहणस्यसिद्धिः।धातोरपितर्हिग्रहणंस्यादितिचेत्·वसुसारेशेसकारोच्चारणेनद्व्यनुबन्धयोर्ग्रहणमित्याशया
त्·पदान्तपदाद्योरेकादेशस्येति·तदुक्तम्भाष्ये·शकहूषुवृक्षेछत्रम् अपचेच्छत्रमित्यादावसिद्धत्वमाशंक्यसम्प्रसारणाङीप्सु
सिद्धएकादेशः·कुतःपदान्तपदाद्योरेकादेशस्यासिद्धत्ववचनात्।अत्रकैयटः।पदस्येतिवर्त्तते।अन्तादिग्रहणञ्चपूर्वसूत्रा
दनुवर्त्तते·तेनयदिपदान्तयोरेकादेशोअसिद्धोभवतीत्यर्थोलभ्यतइति·अत्रधात्वादेरित्यतआदिग्रहणम्पदान्ताद्वेत्यतोऽन्त
ग्रहणमनुवर्त्ततइतिबोध्यम्।वस्वेकाजादितीडिति·नियमशास्त्राणांविधिमुखेनप्रवृत्तिरितिसिद्धान्ताभिप्रायेणेदम्।मूल
न्दूषयन्स्वसिद्धान्तमाह·परेतुपदावधिकेऽन्वाख्यानइति·पदसञ्ज्ञाप्रयोजकविभक्तिपर्यन्तविभागेनप्रकृतिप्रत्ययोःस्थाप
नङ्कृत्वाऽन्वाख्यानइत्यर्थः प्रतिपदविधित्वेनेति·नचवस्वेकेतिसूत्रेवसोरित्यस्योच्चारणात्प्रतिपदविधित्वंसमानमितिवाच्य
म्।वस्वेकेतिसूत्रजन्यवाक्यार्थबोधस्यैकाजाद्यर्थापेक्षत्वेनतदपेक्षयावसोरितिसूत्रजन्यवाक्यार्थबोधस्यपूर्वसम्भवात्।
वस्तुतस्तुप्रतिपदेत्यत्रपदशब्दोनशक्तपरः किन्तुपदसञ्ज्ञायोग्यपरः।एवञ्चपदसञ्ज्ञाप्रयोजकविभक्तिप्रकृतिबोधकश
ब्दविशेषमुच्चार्यविहितत्वम्प्रतिपदविधित्वम्।यथास्वाम्यीस्यत्रतिस्वात्स्वरादपिनुमःप्राक्प्रतिपदोक्तत्वेनाद्भत्रिनिर्दिष्टो

राम
१२०

भवति· न च सेदुषः पपुष इत्यादौ विभक्तौ न प्रकृतिभागस्य पदसंज्ञा भसंज्ञया बाधादिति वाच्यम्·तदभावेऽपि प्रकृतेः पदत्वयोग्यताक्षते
व· योग्यताप्रयोजकत्वस्यैव विवक्षितत्वात्· एवञ्च वस्वेकाजादिति सूत्रस्य वसोः परस्य वलाद्यार्धधातुकस्येड्विधायकत्वं न तु विभक्ति
प्रकृतिबोधकशब्दविशेषोद्देश्यकविधित्वमिति तेन तस्यैतादृशप्रतिपदविधित्वम्। वसोरिति सूत्रस्थवसुशब्दस्तु आम्नातस्य संज्ञे
तिनादृशप्रकृतिबोधकत्वमस्त्येवेति· प्रतिपदविधित्वेन सम्प्रसारणस्य पूर्वं प्रवृत्तिर्युक्तैव· न च पूर्वं सम्प्रसारणेऽपि जातस्य सम्प्र।
सारणस्यासिद्धत्वादिट्स्यादिति वाच्यम्· तस्याः परिभाषाया अनित्यतया लक्ष्यानुरोधेनाप्रवृत्तिस्वीकारेऽपि लक्ष्यसिद्धिसम्भवा
त्· निष्फलेति· ननु कृतव्यूहपरिभाषया न कृतो व्यूहो निमित्तविनाशेऽपि कार्ये स्थितिरूपायैरित्यर्थिकाया अस्वीकारे तस्या विषया
दौ पूर्वप्रवृत्तषत्वस्यानिवृत्तौ रूपासिद्धिरिति चेन्न· स्तौति स्तोभतीत्यादिनिर्देशेन सपादसप्ताध्यायीस्थकार्यप्रवृत्तियोग्यविष
ये त्रैपादिकस्य पूर्वमप्रवृत्तिध्वननात्· ननु पदाधिकेऽन्वाख्याने यद्यपि परिभाषां विनापि सिध्यति तथापि क्रमेणान्वाख्यानप
क्षेऽकृतेति परिभाषा स्वीकार्यैवेत्यत आह· लक्ष्यानुरोधादिति· औपदेशिके ति· महत इत्यादि· भिन्नसान्तसंयोग इति· औपदेशि।
कधातुभिन्नस्य सम्बन्धी यः सान्तसंयोग इत्यर्थः। विवक्षित इत्यस्य यथालाभं तत्प्रकारं दर्शयति· भाष्यति· स्वरसिद्ध्यर्थमिति· प
रमपुमानित्यत्र परत्वादेवं सति पूर्वमसुङि कृते समासान्तोदात्तत्वं भवद् असुङ एव यथा स्यादित्येवमर्थमित्यर्थः। यदि सर्वनाम।
स्थान इति विषयसप्तमी न स्यात्तदाऽन्तरङ्गत्वादादौ पुंशब्दोकारस्योदात्तत्वे सकारस्य संसनधर्मेणो हलः स्थाने जायमानस्यादेशा।
स्यान्तरतम्यादनुदात्तत्वं प्रसज्येत· तच्चासुङि कृते उकारस्यानलङ्कृतमित्यसुङः पुनः स्वरः स्यादिति वाच्यम् अन्तरङ्गे स्वरे कर्त्त
व्येव हि रङ्गस्यासुङोऽसिद्धत्वात्· इति भाव इति· यदुपदेशिवद्भावेन साध्यं तद्विषयसप्तम्यापि साधयितव्यमिति भावः। वचनमे

भै·
७१

वः असुङ्मुपदेशिवद्वचनमितिवचनमित्यर्थः। ततः पूर्वम्· विभक्तिवृद्धिनिमित्तत्वेनबहिरङ्गासुङः पूर्वमित्यर्थः। स्वरप्रवृत्तौ· समासा
न्तोदात्तप्रवृत्तौ· दोषात्· परमपुमानित्यत्रपूर्वसमासान्तोदात्तत्वप्रवृत्तौ मकारमकारस्योदात्तस्यश्रवणप्रसङ्गात्· स्त्रियामितिसूत्र
भाष्येत्विति· एतेनाऽसुन्प्रत्ययेनास्यसाधनम्भाष्यविरुद्धमितिसूचितम्· निष्फलेति· उच्चारणार्थत्वस्वीकारेपिलाघवाभावात्·
ननुसुवद्दस्यत्रमूलेयथोक्तन्धातुभिन्नस्यासन्नस्येतितथाव्याख्यानेधातुभिन्नस्यसमुदायस्यासन्नत्वाद्दीर्घः स्यादेवेत्यतआह· अथा
न्तोरित्यस्येति· एवंसत्यधातोरित्यत्रधातुपदन्धात्ववयवेलाक्षणिकन्नचतत्रासमस्तमसोविशेषणमन्नपदेनचासमार्थ्यसमासः
सौत्रत्वाद्दिवद्द्रष्टव्यः। षष्ठीति· एवञ्चालोन्त्यपरिभाषयोपस्थितस्येदंविशेषणमित्यदसोऽवयवस्यान्त्यस्यौकारः स्यात्सुलोपश्चे
तिसूत्रार्थः। एवंसतियेननाप्राप्तिन्यायेनेदन्त्यदादीनामइत्यस्यबाधकन्नदाह· औत्वन्त्यदाद्यत्वापवादइतिनन्वदसइतिपञ्चम्ये
वास्तु· तदोः सइतिसूत्रादनुवर्त्तमानस्यसावित्यस्यादसइतिषष्ठ्यन्तत्वकल्पनयासोरेवडौआदेशोविधेयः। विभक्तिविपरिणामक्ले
शपरिहारानुरोधेनसोर्डैस्येवास्त्वित्युक्तमित्याशयेनशङ्कते· ननुसोरिति· टिलोपइति· नित्यत्वादित्यादिः। डित्वसामर्थ्यादित्यप्यस्या
दिः नित्यत्वात्सत्वम्बाधित्वेति· नचत्यदादीनामितिसङ्ग्राहकशब्दाददसइत्यस्यपार्थक्येनकल्पनायामदसोदः सइत्यंशोनचरिता
र्थइतिनत्सामर्थ्यादिदमेववाक्यन्त्यदाद्यत्वस्यबाधकम्भविष्यतीतिवाच्यम्· साकच्कोऽस्यचारिथ्यात्· ननुडौआदेशः सत्यपि
सम्भवेबाधनम्भवतीतिन्यायेनत्यदाद्यत्वापवादइतिप्रथमरडौआदेशेकृतेपरत्वाच्छब्दान्तरप्राप्त्याऽनित्यष्टिलोपम्बाधित्वा
सत्वेपुनः प्रसङ्गविज्ञानन्यायेनटिलोपेऽसावितिसिद्धम्। नचसकृद्गतिन्यायाङ्गीकारेकृताकृतप्रसङ्गित्वमात्रेणनित्यत्वाट्टिलो
पप्रवृत्तेः स्वीकारेपिवादोषएवेतिवाच्यम्· प्रकृतसूत्रेऽदसइतियोगंविभज्यतदोः सइत्यनुवर्त्यादसएवदकारस्यसत्वन्नान्यस्य

राम
१७१

दकारस्यतिनियमेनान्तग्रहणप्रत्याख्यानरीत्याऽधुनापिविभक्तस्यादसइत्यस्यारम्भसामर्थ्यान्न्यदाद्यत्वबाधकतयोष्टसिद्धे
रितिचेन्न· अनन्त्यग्रहणप्रत्याख्यानरीत्यादोषाभावेपियोगविभागादिक्लेशेनप्रत्याख्यानेगौरवमित्यनन्त्यग्रहणमन्त्य।
व्यावर्त्तकमावश्यकमितिसूत्रकारमतन्तन्मतेटिलोपेपूर्वोक्तरीत्यापूर्वम्प्रवृत्तेऽन्यत्वात्सत्वाप्राप्तौरूपासिद्धिप्रसङ्गः इत्याशयात्
एतदीदितिसूत्रेबहुवचनइत्यस्यबहुवचनेपरेइत्यर्थकरणेपूर्वपरयोरेकादेशेदासरेकारस्यबहुवचनपरत्वासम्भवादसङ्गतिः
स्यादतआह· बहुवचनशब्दइति· एवञ्चमूलेविभक्तिकार्यम्प्रागित्यस्यसमध्यमणिन्यायेनपूर्वपरान्वयित्वन्द्रष्टव्यम्·।एकवच
नोपपन्नयेआह· सुइतिसमाहारइति· रोस्सनेति· किन्तुबहुवचनेरूल्येदित्येत्वेरातईदितीकारइतिशेषः इतिहलन्ताःपुंल्लि।
ङ्गाः पदान्तेविद्यमानस्येति· नचहस्यैवपदान्तत्वन्नतुतस्यपदान्तेविद्यमानत्वमितिवाच्यम्·पदञ्चरमावयवस्यैवव्यपदे।
शिवद्भावेनपदान्तेविद्यमानत्वसम्भवात् पदादिरितिपक्षइति· एवञ्चयन्मूलकृताषत्वांशेनिपातनमाश्रितन्तत्सिद्धान्त
रीत्या· कैयटादिमतइति· यथावीप्सागर्भेबहुव्रीस्याश्रयणात्कुत्वंषत्वस्यबाधकन्तथाठत्वस्यापिबाधकमितिभावः।व्या।
ख्यानादिति· अङ्गिःसंस्कृतमितिनिर्देशस्यदर्शनमूलकादित्यर्थः।यथाऽशौण्डाचइत्सत्राणइत्युपातनाद्दृशश्वशब्दःप्रयोगेना
स्तीतिद्वितीयस्यौपदेशिकस्यग्रहणन्तथासानुबन्धकस्यग्रहणाच्चेत्प्रकृतेपिविवक्षितंस्यात्तदानिर्गतानुबन्धकस्यपकारोपल
क्षिताकारस्योद्देश्यतास्यादङ्गिरितिसूत्रनिर्देशोनोपपद्यतेतिप्रकृतेयकारविशिष्टस्यलौकिकप्रयोगेषूपलम्भादित्तिनप्रत्ययग्र
हणम्· सजूरिति· षत्वस्यासिद्धत्वाद्रुत्वम्।र्वोरितिदीर्घः मूलमेवेति· इदन्तभिस्यैवकिन्तुपदविभक्तौपुंस्येत्वंतस्यांसर्वत्र· इति
हलन्ताःस्त्रीलिङ्गाः विमलद्युदिवीसत्रोत्वशङ्काव्यावृत्तयेआह· अनन्तर्वर्तिनीमित्यादि· अतएव· पूर्वपदस्यपदत्वादेव·दधिसेचा

विति॰ निरुपपदात्सिचेर्विचि सुबुत्पनन्तरं समास इति पक्ष इदम्॰ भषभाव इति॰ तस्य वस्तुतः पदादेः कार्यविधायकत्वेपि पदा।
दिशब्दानुवादेन विधायकत्वाभाव इति भाः। नन्वेवं शुक्लकर्णः शङ्कुकर्ण इत्यादौ कर्णो वर्णलक्षणादित्यनेन वर्णलक्षणावाच
कात्परो यः कर्णशब्द उत्तरपदभूतस्स आद्युदात्तो भवतीत्यर्थकेनाद्युदात्तत्वन्न प्राप्नोतीत्यत आह॰ उत्तरपदादिति॰॥ ॥वहूर्जेश
ब्दमात्रेति॰ वहूर्जि नुम्प्रतिषेध इति वार्त्तिकानन्तरमस्य पाठादिति॰ अल्लोपस्येति॰ यङोऽकारलोपस्येत्यर्थः।जायन्त इति॰ अस्य नव
सा विस्पादौ प्रत्येकं सम्बन्धः द्वन्द्वान्ते श्रूयमाणस्येति॰ ननु द्वन्द्वान्ते श्रूयमाणाद्द्वन्द्वघटितसमासघटकस्य प्रत्येकं सम्बन्धोऽन्यत्र
दृष्टः। इदन्तु न तथेति कथमेतदिति चेन्न॰ नेदं द्वन्द्वान्त इत्यपूर्वम्वचनं किन्तु साहित्यविशिष्टानां द्वन्द्वविधानात्साहित्यस्य चैक
धर्मावच्छिन्नान्वयित्वरूपतयाऽन्वयितावच्छेदकावच्छिन्नस्य च समासाघटकपदोपस्थापितस्यापि धवखदिरौ छिन्धीत्या
दिवाक्यजन्यशाब्दबोधे भानन्तद्वदत्र विभक्तिव्यवधानेपि नवपदार्थेऽन्वयो भविष्यतीति भावः। प्रत्येकमेवेति॰ प्रत्येकान्वितन
वपदसाहचर्यात्॰ सोर्लुका लुप्तत्वान्नुम्नेति॰ यत्तु अनपुंसकस्येति पर्युदासान्नपुंसके स्वमोः सर्वनामस्थानसञ्ज्ञाभवान्नुमः।
प्राप्तिरेवाभावाच्चिन्त्यमेतदिति॰ अत्राहुः। यथा पुंसि हलङ्याब्भ्य इत्यादिलोपेपि प्रत्ययलक्षणेन नुमा न मो भवति तथात्रापि कुतो नेत्याशङ्कावारणायाह॰ लुका लुप्तेति॰ एतेन लुका लोपो न पुंसके भवतीति पक्षम्पन्नेनास्य नपुंसकत्वादिति सारितन्नतु लुका
लोप एव नुमभावे हेतुत्वेनोपात्तः। एवञ्च नपुंसकत्वान्नपुंसके च सर्वनामस्थानत्वाभावादिति शेषो वोध्य इति॰ अपरे तु गवा
कुशब्दस्येति पद्यस्थगवाकुशब्दस्य शब्दसामानाधिकरण्येन पुंल्लिङ्गतया तत्रैव प्रत्ययलक्षणेन नुमाशङ्कायामेवमुक्तम्प्रत्य
यलक्षणान्निवृत्त्यर्थमिति सञ्जगदिरे॰ अन्ये तु गवाकुशब्दौ द्वौ॰ एकः सुवन्ते गोशब्दे उपपदे अञ्चतेः क्विन्नन्तः। अपरो निरुपप

दाश्चेः किं निकृते तदन्तात्सुबुत्पत्त्यनन्तरं सुवन्तस्याचशब्दस्य गोशब्देन सह समासेन निष्पन्नः तयोर्मध्ये प्रथमस्य नपुंसकत्वे
पि द्वितीयगवाकृशब्दे उत्तरपदस्य पुंल्लिङ्गत्वात्तत उत्पन्नलोपः सुप्समाससञ्ज्ञाप्रयोजकः प्रत्ययलक्षणेन तमाश्रित्य नुमा
शङ्कानिवारणायोक्तमत्र लुकालुप्तत्वादिति वदन्ति वस्तुतस्तु कारणाभावस्य कार्याभावप्रयोजकता सुप्रसिद्धैव कारणाभा
वश्च न कारणाप्रतियोगिकाभावः किन्तु कारणतावच्छेदकावच्छिन्नप्रतियोगिताकाभाव एव अन्यथा करणाधिकरणेपि
कारणगगनोभयाभावसत्वात्कार्याभावस्यापत्तेः। प्रकृते च न प्रत्ययमात्रस्य नुमागमकारणत्वं किन्तु सर्वनामस्थानसञ्ज्ञाप
रत्वोभयविशिष्टस्यैव। अन्यतरविशेषणाभावे च विशेषणाभावप्रयुक्तस्य विशिष्टाभावस्य सम्भव इति परत्वात्मकविशेष
णाभावप्रयुक्तोपः कारणतावच्छेदकावच्छिन्नाभावः। सोत्र लुकालुप्त इत्यनेन दर्शितः। सर्वनामस्थानसञ्ज्ञाभावश्च न
दर्शितः। सञ्ज्ञिसत्वे हि सञ्ज्ञया भवितव्यम्। सञ्ज्ञी च लुकालुप्तत्वान्नास्तीति न काचिदेव मुक्तौ क्षतिरिति चिन्त्यमेव चिन्त्यम्
वा नपुंसकेति सूत्रे नाभ्यस्तादिति सूत्राच्छतुरित्यनुवर्त्तते तस्याभ्यस्तात्परत्वं न्दन्निदती त्यत्र सम्भवति अतो मूले व्याख्यातं
शताइति तदर्थमाह शतृप्रत्यय इत्यर्थ इति वेति वर्त्तत इति न चेह वाग्रहणानुवृत्तिर्मास्तु यद्यपन्नित्यस्यान्तदाऽनेनैव।
सिद्धे शश्यनोरिति सूत्रमव्यर्थमेव स्यादित्युत्तरसूत्राद्दस्य वैकल्पिकत्वमुत्तरसूत्रस्य च नित्यत्वमिति व्यवस्था सम्भवादुत्तरसूत्रे
नित्यग्रहणाच्च न कार्यमिति वाच्यम्। वैपरीत्यस्याप्यापत्तेः एवन्तर्ह्युत्तरसूत्रे नित्यग्रहणमस्तु तद्धदिसोत्तरसूत्रसामर्थ्याङ्कल्प
यामइति चेत् सामर्थ्यकल्पनापेक्षया कृतस्यैव वाशब्दस्यानुवृत्तौ लाघवमित्याशयः नुम्ग्रहणात्तु स्पष्टार्थमिति इदितोनुं।
मिति सूत्रान्नुम्ग्रहणानुवृत्त्यैव सिद्धेः। न चानुवर्त्तमानन्नुम्ग्रहणं वाशब्दम्वा नपुंसकेति सूत्रइतीह नित्यार्थम्पुनर्नुम्ग्रहण

मितिवाच्यम्॰उत्तरसूत्रेनित्यग्रहणादिहवाशब्दानुवृत्तेरिष्टत्वात्।उत्तरसूत्रेतुनित्यग्रहणसत्त्वाद्वाच्यार्थविरोधेनकेवलनु
म्शब्दस्यैवसम्बन्धोभविष्यतीतीहनुम्ग्रहणान्निष्प्रयोजनमेव।यद्यस्मिन्नपिसूत्रेवाशब्दःसम्बध्यतेतदाऽनुवर्त्तमानन्नु
म्शब्दस्यैककार्यनियुक्तानांसहैवप्रवृत्तिरितिन्यायेनकेवलनुम्शब्दस्यशप्श्यनोरितिसूत्रेसम्बन्धोनस्यादितिचेदेककार्य
नियुक्तानांक्वचिदेकदेशोप्यनुवर्त्ततइतिन्यायेनकेवलस्यनुमःसम्बन्धोभविष्यतीत्यस्तु।एतादृशार्थस्ययद्यपिलाभस्तथा
पिस्पष्टार्थन्नुम्ग्रहणमितिभावः।उभयतआश्रयणाइतिवचनस्यस्वमतेऽभावादाह॰तेनव्यपवर्गोलाभेनेति॰व्यपवर्गोव्य
पवृक्तम्भेदइतियावत्।अन्यथा॰आदित्यस्यानुक्तौ।अत्रक्वचिद्वान्नीतिपाठःसतुयुक्तः।भावाभावयोर्मध्येभावानुष्ठानस्ययु
क्तत्वात्॰अङ्गकार्यइति॰तस्मिन्सूत्रेऽङ्गग्रहणात्।ननुपचन्तीत्यत्रशीनदीपरत्वाभावात्कथन्नुमित्यतआह॰पचन्तीत्यादी
ति॰इदमिति॰निरवकाशत्वम्प्रतिपदोक्तत्वमित्येतत्।छदिरुपधीति॰अत्रोगवादिभ्यइतिसूत्रेइतिवक्तुंयुक्तम्।अथवाछदि
रुपधिवलेर्ढञितिसूत्रइत्यत्रवहुव्रीहिसमासेनछदिरुपधीतिसूत्रंयत्सूत्रव्याख्यानात्रसरेव्याख्यातन्तत्सूत्रइत्यर्थः।त
त्रहियञ्ञ्यावञः पूर्वविप्रतिषिद्धम्।सनङ्गुपानहोप्रयोजनम्।यञ्ञौभवतोऽञः पूर्वविप्रतिषेधेन।किम्प्रयोजनंसनङ्गुपा
नहौप्रयोजनमपञोऽवकाशः।शाङ्कव्यन्दारुपिचव्यःकार्पासः।अञोवकाशः।वाध्रेम्।वारत्रम्।अत्रनघ्रीवध्रीशब्दाभ्यांवर
त्रापर्यायाभ्यामञ्।सनङ्गु॰नामचर्मविकारस्तस्मादुभयम्प्राप्नोति।औपानह्यञ्चर्म।ढञ्चाढञ्चभवत्यञःपूर्वविप्रतिषेधेनढ
ञोऽवकाशः।छादिषेयन्तृणम्।अञःसएव।छदिर्नामचर्मविकारः।तस्मादुभयम्प्राप्नोति।छादिषेयञ्चर्म।ढञ्भवतिपूर्वविप्र
तिषेधेनेति।छदिर्नामेति॰छादनञ्छदिः।तच्चचर्मविकारोपिसम्भवति।छादनमित्यत्रकरणेल्युट्।तच्चतृणविकारः।क्वचिच्च

र्मेविकारोपि। अत्रकैयटः। अत्राहुः कृदिरूपानह्योः प्रतिपदम्प्रत्ययविधानादयुक्तो विप्रतिषेधः। तथाचोक्तम्। परनित्यान्तर
ङ्गप्रतिपदविधयो विरोधिसन्निपाते तेषाम्मिथः प्रसङ्गे परबलीयस्त्वमिति चिन्त्यमेतदिति। अत्राहुरित्यस्वरसबीजन्तु निर।
वकाशत्वे सत्येव प्रतिपदविधित्वम्बाधकत्वे प्रयोजकन्नान्यथेति। एतादृशाकल्पनापामत्रत्यं विप्रतिषेधपरम्भाष्यमेव
मानम्। शेषादिति। तत्र हि शेषग्रहणमनर्थकमप्ये प्रतिपदम्विधीयन्ते ते बाधका भविष्यन्तीत्याशङ्क्यानवकाशा हि।
विधयो बाधका भवन्ति समानत्वश्चकवभावे सावकाशाइत्युक्तम्। स्वसिद्धान्तमाह। परेत्त्विति। सकृद्गतिन्यायादिति। वस्तुत
स्त्वेतन्न्यायस्य प्रकृतेऽनुपयोग एव। एकस्मिन्नुमिकृते द्वितीयस्यनुमो वाच्यार्थविरोधात् प्रवृत्तेर्नेनुमद्वयप्रसङ्गः किन्त्व
नयोर्येस्मरत्तदेव पूर्वम्प्रवर्त्ततेइत्याशयेनाह। किञ्चान्यादचइति। अपरोक्तमभ्युपेत्याह। किन्त्वसत्यपीति। रूलग्रहणान
ति। अयोगवाहानां शर्षूपदेशात् इति हलन्तान पुंसकलिङ्गाः। निपातसञ्ज्ञैवेति। प्राग्रीश्वरान्निपाताइतिसूत्रानन्तरंस्व
रादिनीत्यादि अव्ययीभावश्चेत्यनन्तम्पठित्वा चादयइति पठनीयमित्यभिप्रायः। यत्राव्यग्रहणन्तत्र निपातग्रहणमेवा।
स्तु। इत्यापत्तेरिति। ननु तत्रापि चादय आद्युदात्ताइति पठनीयमिति चेन्न। येषाङ्क्त्वादियोगे निपातसञ्ज्ञा तेषान्तद्योगाभा
वेप्याद्युदात्तत्वापत्तेः। एतेना इष्टव्यवस्थायाअलाभेनः अन्यत्र। उद्योतादौ। अनुकरणोति। प्रयोगस्थानामित्यादिः। यद्य
पिन्यङ्स्वराविति फिट्सूत्रेणाविशिष्यस्वरितत्वविधानेन निपाताआद्युदात्ताइत्यस्य बाधो वक्तुमशक्यस्तथापि स्वरादिप
दग्राह्ये प्रातरादावयमतिप्रसङ्गो बोध्यः। सर्वेषामिति। अपादानत्वाधिकरणत्वकर्मत्वशक्तिप्रधानानाम्। अधिकरण
शक्तिप्रधानानीति अतएव वृत्त्यघटकानामेषां क्रियायामेवान्वयः। ननु क्रियाप्रधानमाख्यातमिति वत्तद्धि रूगित्यस्यसा

र्थेक्रियाविशेष्यकवोधजनकत्वन्दृष्टमतआह·क्रियाप्राधान्यमिति·भाष्यप्रामाण्यादिति·तत्रहिस्यतेर्घञन्तस्यतेर्घञ
न्तस्यप्रत्ययसन्नियोगेनमान्तत्वंसूत्रेनिपात्यतएवञ्चिरशव्दोपिकालविप्रकर्षाभिधायीचिरेणातवागमनमहम्प
श्यामित्यञ्चिरात्तस्माद्देशादागतोसीत्यादावकारान्तोदृश्यतेतस्यापिमान्तत्वप्रत्ययसन्नियोगेनिपात्यतेइत्यर्थकवाक्या
न्युक्तानि।इदन्त्वत्रवोध्यम्·सायंशव्दस्यघञन्तस्यसङ्ख्याविसायपूर्वस्येतिनिर्देशाद्कारान्तस्यप्रामाणिकत्वेपिमा
न्तोऽव्ययसञ्ज्ञकोप्ययमस्तिअतएवप्रातःसन्ध्यासनसत्रासायंसन्ध्यासभास्करेतिप्रयोगस्योपपत्तिः।चिरशव्दस्त्वन
व्ययमेवसत्त्वशव्दशक्तिस्वभावादिकवचनान्तएवतस्यतावदेवचिरम्।यावन्नविमोक्ष्ये।चिरम्भुंक्तइत्यादौपरिदृश्यमा
नस्तुक्रियाविशेषणम् यत्रतुक्रियावाचकम्पदन्नश्रूयतेतत्रतदन्वययोग्यक्रियावाचकशव्दाध्याहारोवोध्यइति·इति
विहितइति·विनिगमनाविरहात्सर्वेषांग्रहणम्।ननुयदुद्धतोनिवतइत्यादिप्रयोगविरोधइत्यतआह·उपसर्गेति·वद्ग्र
हणाद्व्यर्थमिति·अतएवपरिगणनसमयेतसिवतीतिवत्प्रत्ययोपिपठितः।निपातत्वोक्तेरिति·तत्रहिपरस्परसाहचर्येण
निपातयोरेवग्रहणमित्युक्तम्।नन्वस्तीत्यस्यविभक्तिप्रतिरूपकत्वादव्ययत्वेरिसिद्धेपृथक्पाठोव्यर्थइत्यतआह·धनवा
नित्यर्थकमिति·सत्ववचनस्येति·एतेनविभक्तिप्रतिरूपकत्वाभावोध्वनितः।नसिद्धिरिति·अस्तिनास्तिदिष्टमितिसूत्रनि
र्दिष्टस्यतेनाव्ययत्वसिद्धावपिधनवाचिनोनसिद्धिरित्यर्थः।स्वसिद्धान्तमाह·तेनैवेति·यथाऽधिकरणशक्तिप्रधानस्यापि
प्रातरादेर्वृत्तिविषयेशक्तिमत्प्रधानत्वन्तथाऽस्यापिअस्तिमानित्यादिवृत्तिविषयेसत्ववाचित्वकल्पनेनसत्ताकर्त्तृवोध
कत्वन्नविरुध्यते·धनवोधादिति·ननुसत्ताकर्त्तृसामान्याभिधायकत्वंशव्दशक्तिस्वभावात्।कथञ्चिदिति·विशेषार्थो

भिधायकत्वे नियतस्यकस्यचित्तात्पर्यग्राहकस्यकल्पनेन। सत्ववाचकत्वे बोध्यइति॰ असत्ववाचकस्यैवाव्ययतित्वमि
तिभावः नचस्वरादिषुसत्ववाचकानामपिदर्शनेनेदमसङ्गतमितिवाच्यम॰ प्रयोगदर्शनवशादन्यत्रतथाकल्पनेप्यसस
त्ववचनस्याव्ययत्वेप्रमाणाभावइतिभावः। अतएवविधेमचास्मैनमसास्वहत्वपेतिप्रयोगस्याप्युपपत्तिः। केचित्तुएतादृशा
नांविभक्तिप्रतिरूपकत्वमिच्छन्तितिवहुषुस्थलेषुक्लेशसहनेनमान्याः। ननुप्रपूर्वकात्तमधातोः क्विपिसतिप्रतामृशब्दावय
वस्यधातुत्वान्नत्वापत्तिरतआह॰ प्रतानितीति॰ अपदान्तत्वादिति॰ तादृशानाम्प्रयोगस्थानामिदमनुकरणमितिभावः। अस्य
प्रतामादेः। भाष्यस्वरसोप्येवमिति॰ नचतस्मिन्नेवभाष्येयदयम्प्रशानृशब्दंस्वरादिषुपठतीत्युक्तन्तद्विरोधइतिवाच्यम्। तस्यभाष्य
स्यान्यथैवोपपत्तेः। तथाहि। क्रुदन्तंयन्मकारान्तमितिपाठेप्रतामौप्रतामइत्यत्रातिप्रसङ्गःमाशङ्क्याचार्यप्रवृत्तिर्ज्ञापयतिनप्रत्यय
लक्षणेनाव्ययसञ्ज्ञाभवति। पदयम्प्रशानृशब्दंस्वरादिषुपठतीत्युक्तम्। अत्रप्रशामौप्रशामइतिशान्तिमद्वाचकस्यगणेतुशा
न्त्यर्थकस्यलिङ्गाद्यनन्वय्यर्थकस्यपाठः। तत्रस्वरादीनाम्प्रयोगएवविसर्गोनतुगणेतथाऽस्यापिप्रयोगएवनत्वम्। अत्रयद्यपिके
यटेनमोनोधातोरितिनत्वस्यासिद्धत्वात्सिद्धमव्ययत्वमितिव्याख्यातम्। तथापिस्वरादिसंवादेनगणेविकाराभावकल्पनेऽक्लृप्तक
ल्पनानेति। अप्रामाणिकःपाठइति॰ निपातत्वादेवसिद्धेः। नन्वव्ययेनञ्कुनिपातानामित्यत्रपृथक्पाठवैयर्थ्यमस्यनिपातत्वेस्या
दतआह॰ अव्ययेनञिति॰ अकरणिरिति॰ अत्रसमासएवस्वरवाधकाव्ययपूर्वपदप्रकृतिस्वरएवभवति। अयंस्वाक्रोशेनञ्यनि
रित्यनिप्रत्ययान्तःप्रक्षिप्तपाठइति॰ चादिगणेपाठेनाव्ययत्वसिद्धेः। नचैवमसत्वार्थकस्यैवाव्ययत्वंस्यान्नतुसत्वार्थकस्येतिस
त्वार्थकस्यलक्ष्मीवाचकतयातस्यङ्कारेत्सञ्ज्ञकत्वाभावात्। निरनुबन्धकोनिषेधार्थकमाशब्दोऽसत्वार्थेत्तुपठितएव। माङि

भै
१७५

लुङिति सूत्रे ङकारोच्चारणान्तस्मिन्नुपपदे लुङन्तस्यैव साधुत्वम्। एतेन मास्म भवि[illegible]त्यादि प्रयोगगणाम वैदिकानामसाधुत्वम्बोध्यम्। मा निषाद प्रतिष्ठान्त्वगमः शाश्वतीः समाः इति रामायणस्थ पद्ये माङो न प्रयोगः किन्तु निरनुबन्धकस्य। अत एवाटो निषेधाभावः अव्युत्पन्नाविति। वतुवन्तयोः सत्वार्थकतया निपातसंज्ञायां विप्रशब्दावयव प्रशब्दस्याप्यपत्वं स्यात्। अर्थत एव सादृश्यस्य ग्रहणे वाशब्दसमानार्थकस्य विकल्पशब्दस्यापि स्यात्। न च विकल्पशब्दस्य सत्वार्थकतया न वाशब्दसमानार्थकत्वमिति वाच्यम्। आराच्छब्दसमानार्थकस्य समीपशब्दस्याव्ययत्ववारणाय शब्दतः साम्यस्यावश्यकत्वात्। विनीतो वामिति। अयन्न युष्मदस्मदोरिति सूत्रेणाव्युत्पन्नः। षष्ठ्यन्तत्वाभावात्। न च समानार्थत्वाभावः। सम्बोध्यार्थबोधकतयाऽर्थतः साम्यमस्ति शब्दतस्त्वस्यैव। यत्र यत्र सदृशग्रहणन्तत्र किञ्चिन्न्यूनत्वमस्त्येव। अन्यथा तत्त्वमेव स्यात्। एतेन अर्थतः सादृश्यस्य विवक्षणेन। अत एवः। नदिन्यस्याव्ययत्वादेव। नचिनो योगः इति। जीवेशौ विशुद्धा चित्तथा जीवेशयोर्भिदा अविद्या तच्चितोर्योगः षडस्माकमनादयः इसन्तदित्यव्ययमन्यथास्य न च्छब्दस्य चिच्छब्देन द्वन्द्वो न स्यादित्यर्थः। नचिनोरित्यत्र न च्छब्द चिच्छब्दौ षष्ठ्यन्त समानार्थकौ प्रथमान्तौ नयोः समासः। क्रियायोगे पीति। अस्योपसर्गत्वाभावस्त्वत्रान्वयः नादेशाभाव इति। यद्युपसर्गत्वं स्यात्तदा चउपसर्गान्तः इति नादेशः स्यात्। न चोपसर्गसंज्ञाभावकल्पनामेक्षयात्वाभावकल्पनमेव किन्न स्यादिति वाच्यम्। गुणप्रधानसन्निधौ प्रधानवाधापेक्षया प्रधानवाधस्यौचित्यात्। शिवादीति। सत्वरजस्तमः क्रमेण शिवादीत्यत्रापि सत्वादि प्रधानमायोपाधिकम्ब्रह्मैव विवक्षितं तेन विष्ण्वादीनि वक्तव्ये शिवादीत्युक्तिरकारो वासुदेवः स्यादित्यभियुक्तोक्ति विरुद्धेति शङ्कायाः अनवकाशः। व्याख्यानादिति। लक्षणिकत्वाविशेषमूलकादित्यर्थः। अन्ये अवतेष्टिलोपश्चेत्यनेनावतेर्मन्प्रत्ययो भवति प्रत्ययस्य टेश्च लोपो भवतीत्यर्थके नौणादिकेन

राम
१७५

सिद्धेः नियमादप्राप्तेरिति· अयञ्च नियमो यद्यपि कौमुद्यामुणादौ च्विरव्ययमित्यत्र ञैरित्यस्यानुवृत्तिं कृत्वा सूत्रव्याख्याने सति ञौ प्र
त्ययान्तस्य चेदव्ययसञ्ज्ञा तर्हि च्व्यन्तस्यैव न तु तद्धितस्येति लभ्यते तथापि तादृशनियमेन रातेर्डैः। गमोर्डोरिति सूत्राभ्यां सिद्धयो
रैगोशब्दयोरव्ययसञ्ज्ञाया व्यावृत्तिर्न प्राप्नोतीत्यतः सामान्यत उणादिप्रत्ययान्तानां च्व्यन्तानामेवेत्याकारकः उक्तः। परन्त्वेव
न्नियमे उच्चैर्नीचैरित्यनयोर्डैसिप्रत्ययान्तयोरव्ययसञ्ज्ञा न प्राप्नोति। अनयोः स्वरादिषु पाठो व्यर्थो भवेदिति चेत्सामर्थ्यकल्पनयाऽ
व्ययसञ्ज्ञास्वीकारापेक्षया नियमसङ्कोच एवोचित इत्याशयेनाह· उणादीत्यादि· ननु च्विरव्ययमिति सूत्रस्य नियमार्थत्वमनुपप
न्नमदो भवदित्यत्रैव च्व्यन्तानामपि गौणत्वेनाग्रहणासम्भवात्तस्य विधायकत्वमेव समुचितमत आह· स्वरादिनिपातमित्यत्रेति· अ
निरस्तत्वादिति· अस्यार्थवद्ग्रहणपरिभाषामूलकत्वादर्थवद्ग्रहणपरिभाषायाश्चेणःषीध्वमिति सूत्रस्याङ्गग्रहणेनानित्यत्वस्य ज्ञाप
नात्तदनित्यत्वेनैवेयमप्यनित्येति भावः। साधीय इत्यपीति· अत्रेदमव्ययम्बोध्यमानत्वे तदीयसुन्नन्तमापदीयानितिवत्प्रकर्षे स्यत्तत्राप्र
तीतेः। अत एव कस्तत्र साधीय इति प्रयोगः सङ्गच्छते· तद्धितश्चेति सूत्रे सर्वशब्दो न प्रकारकार्त्स्न्ये सर्वान्नीनो भिक्षुरितिवद्वृत्ते। अव्य
येभ्यः सप्तानामपि विभक्तीनामेकवचनान्युत्पद्यन्ते इति पक्षे सूत्रस्यासम्भवदुक्तिकतापत्तेः। किन्तु सर्वा पटो दग्ध इत्यत्रेवावयवकार्त्स्न्ये
वर्त्तते तेन यत्फलितं तदाह· वचनत्रयात्मिकेति· अवयवकार्त्स्न्यार्थकशब्दस्वीकारेऽपि नोपपत्तिरित्याशङ्क्ते· नन्विति· सुपां विधान
मिति· स्वौजसेति सूत्रेणेति शेषः। ननु सर्वासां सामान्यसूत्रेण जाता नाङ्कर्मणि द्वितीयेत्यादिसूत्रेण नियमः क्रियत इति पक्षेऽस्य सूत्र
स्योपपत्तिर्भविष्यतीत्यत आह· किञ्च विहितानामिति· नन्वेकस्मात्प्रातिपदिकात्सर्वेषां विधानमेवानुपपन्नम्प्रत्ययविधौ निर्दिष्टप
रिभाषया प्रातिपदिकाव्यवधानेनैवोत्पत्तिर्भवति। अव्यवधानञ्चैकत्रैव सम्भवति न सर्वत्रेति चेन्नः प्रकृतिभेदकल्पनेन तत्प्रकृतिप

त्वस्यतत्रतत्रप्रत्ययेसम्भवादित्याह·प्रधानप्रत्ययानुरोधेनेत्यादि·तत्र·तेषुनियमेषु।अर्थनियममुपपादयति।कर्माद्यर्थयोग्ये
ति·कर्मणिद्वितीयैवेतिनियमेनहियत्रकर्मादिसम्भवस्तत्रैवान्यासान्निवृत्तिःसम्पाद्यतइतिप्रत्यासत्त्याकर्माद्यर्थयोग्यस्यला।
भः।आदिपदादेकत्वाद्यर्थयोग्यप्रातिपदिकाच्चेदेकत्वादौविभक्तिस्तदेकवचनाद्येवेत्येवंरूपः·अनियतत्वादिति·अव्ययानाङ्कर्मा
द्यर्थयोग्यत्वाभावेनतत्तदर्थेविभक्त्यन्तरव्यवच्छेदेननियतानान्तन्नद्विभक्तीनामनियमादित्यर्थः।प्रातिपदिकार्थेतिसूत्रस्यापि
नियामकतयातद्विषयेयथानियमसम्भवस्तमाह·कर्मादिरहितइत्यादि·मात्रपदव्यवच्छेद्यार्थकथनमेतत्।अत्रपक्षे·एवंविधा
र्थेनियमपक्षे।अथप्रत्ययनियममाह·कर्माद्यर्थयोग्येति·अत्रापिपक्षे·प्रकृतार्थापेक्षप्रत्ययनियमपक्षे।अव्ययेभ्योलभ्यन्तइति·
कर्मादौविहितानान्द्वितीयादीनाङ्·स्यादावेवव्यावृत्तेः।सामान्यापेक्षप्रत्ययनियममाह·।अथेति·पूर्वोक्तज्ञापकादेवेति·अव्य
यादापसुपइतिज्ञापकादेवेत्यर्थः।वक्तुमशक्यमिति·एकस्मिन्नर्थेनियततायाविभक्तेरर्थद्वयबोधकतायावक्तुमशक्यत्वा
त्।ननुतदभावे·कर्मत्वाद्यभावइत्यर्थः।सुप्तिङ्·साधारण्येनास्यप्रवृत्तिम्बोधयितुंसामान्येनार्थमाह·विभक्तिविधावुद्दे
श्यतावच्छेदकेति।इतरे।द्विवचनवहुवचने।एवञ्च·सामान्यसूत्रसिद्धौच·नन्वेकस्यवचनमेकवचनमितिव्युत्पत्त्याए
कवचनमितिसूत्रेणैकवचनमव्ययेभ्योनप्राप्नोतीत्यतआह·द्विवहुग्रहणसामर्थ्यादिति·अयम्भावः।यद्यप्येतामहासं
ज्ञाइत्यासामन्वर्थत्वंसम्भाव्यतेतथापिसूत्रेद्विवहुग्रहणसामर्थ्यादन्वर्थत्वन्नपज्यते।अधुनास्यसूत्रस्यौत्सर्गिकत्वमु
पपादयति·द्वित्ववहुत्वयोरिति·नन्वेतावतापिप्रथमोपस्थितःसुरेवैतादृशेविषयेस्यादतआह·विनिगमनाविरहेति·ननु
प्रथमोपस्थितत्वमेवविनिगमकन्तत्राह·अतएव·सर्वविभक्त्येकवचनस्वीकारादेवाचरितार्थीमति·सोरेवास्यनैतस्यैवनि

वृत्तिः स्यादितिप्रत्याहारनिर्देशोव्यर्थः स्यात्।नन्वव्ययार्थैकर्मत्वाद्यभावा॰द्वितीयैकवचनादीनामप्राप्तावपिप्रथमातु
स्यादितिकथमेतदप्राप्तप्रापणार्थमित्युक्तमतः प्रथमायाअप्राप्तिमुपपादयति।प्रथमापीति·नानेन·एकवचनमित्युत्स
र्गसूत्रेण।कर्तृत्वकर्मत्वसत्त्वेन।एतेनकर्तरिकर्मणियायाविभक्तयोविहितास्तासामुत्पत्तिरुक्ता।तद्यथा।पचतिकल्पम्भव
ति।पचतिकल्पस्यभवनम्।पचतिकल्पेनस्थीयते।पचतिकल्पम्पश्य।पचतिकल्पस्यदर्शनम्।पचतिकल्पायगच्छती
ति स्वतएकत्वेन।एकांक्रियेतिभाष्यान्निवृत्तभेदायाः क्रियायास्तिङन्तेभ्यः प्राधान्येनप्रतीयमानायाएकत्वात्तदनुरोधे।
नतत्रकल्पप्रत्ययान्तादेकवचनस्यैवोत्पादेन।नचास्याप्राप्तप्रापणार्थत्वेऽव्ययेभ्यस्तिङामप्येकवचनापत्तिरितिवाच्यम्
।सुप्विधायकशास्त्रैकवाक्यतयास्यविधायकत्वात् अनेकनियमेति·कर्मणिद्वितीयेत्यादिनियमेत्यर्थः।यदिद्वितीया
दीनामप्येकवचनंस्यात्तदाद्वितीयाकर्मण्येवेत्यादिसामान्यायेक्षनियमबाधः स्पष्टएव।ननुनियमस्यविधिमूलकत्वाद्वि
धेरुपजीव्यत्वेनाभ्यर्हितत्वात्तत्रत्यमेवप्राथम्यग्रहीष्यतइत्यतआह·निजामिति·अत्रत्यबहुवचनेनबहुत्वस्योपस्थितौन
स्यबहुत्वस्यस्वव्याप्यसङ्ख्याद्वारैवसङ्ख्येयपरिच्छेदकतयाप्रथमोपस्थितत्वेनत्रित्वस्यविषयपरिच्छेदकत्वंस्यात्तथा
चत्रयाणांलाभः सिद्धएवेतित्रयाणामिति अर्थेस्यादितिभावः।अत्रःअव्ययविषये।इत्यादिपक्षान्तराणि।अत्रादिनासप्ताना
मपिविभक्तीनामेकवचनानीत्यस्यसङ्ग्रहः।असङ्ख्यातानीतिबहुवचनंसमुदायापेक्षयाबोध्यम्।तेनसर्वविभक्त्येकवचनमि
तिपूर्वोक्तिविरोधोन।नन्वेकत्वेएकवचनमितियदुच्यतेतदाघटइत्यादिशब्दोच्चारणेसतितत्रएकत्वप्रकारकनिश्चयस्सम्भ
वतीतिनैवैकत्वसंशयप्रतिबन्धोनिर्वहति।एकस्मिन्नित्यस्याभावेतुकथमेकत्वनिश्चयप्रशङ्क्तिग्राहकाभावादतआह·घटइस

क्तइति·सङ्ख्यावदर्थत्वेनेति· एतेनसत्त्वभूतत्वात्मकस्यविशेष्यस्यलाभः।तथाचघटः।एकत्ववान्।द्वित्वाद्यभावविशि
ष्टत्वेसतिसत्त्वादित्याकारकोन्वयोबोधितः।अत्रचाक्षुषविषयः घटएवदृष्टान्तः।यद्वासत्त्वरूपत्वेनाखिलसङ्ख्योपस्थितौ
द्वित्वाद्यभावनिश्चयेसतिस्मृतैकत्वप्रकारकोपनीतभानम्भवतीत्याशयेनाह· प्रकरणाच्चेति· यथासम्पन्नोव्रीहिरित्यत्रजा
तावेकत्वान्वयः।पशुनायजेतेत्यत्रव्यक्तौतदन्वयःप्रकरणात्तथेतिभावः।यत्रतुस्वराद्यर्थेकर्मत्वाद्यन्वययोग्यतातत्रद्विती
याद्येकवचनम्भवत्येव।द्वितीयादीनान्तेषुनियतत्वात्।अव्ययीभावात्तुनाव्ययीभावादित्युक्तेः सर्वविभक्त्येकवचनम्।नचैते
भ्योद्वितीयादीनान्द्विवचनबहुवचनेतेनज्ञापकेनकथन्नस्यातामितिवाच्यम्।असर्वविभक्त्यव्ययमितिन्यासपक्षेसर्वत्राने
नाव्ययसञ्ज्ञासिद्धौपञ्चसूत्रीनकार्येतिभाष्येणद्विवचनाद्यनुपपत्तिबोधनात्।भाष्योक्तपक्षादिति· अव्ययेभ्यः सप्तानामपिविभ
क्तीनांत्रीण्येपिवचनानीत्यादयः।तत्र· आसुस्यालाविस्सत्रपठितोयआसुतेनेणआसिरितिसूत्रविहितआसिरित्येतेइतिशेषः
नानुवर्त्तितइति· वहिहाधाभ्यश्छन्दसीत्यतइत्यादिः।अत्रच· छन्दसीत्यननुवृत्तौचाछन्दसत्वेतुकृदन्तविशेषणत्वाभावेन।
कृत्एजन्तत्वेनेति· स्थानिवद्भावेनकृतम्।राजन्तत्वन्तुव्यपदेशिवद्भावेन।यथाचात्रानल्पिधावितिनिषेधाप्रवृत्तिस्तथान्य
त्रप्रतिपादितम्।यथोद्देशपक्षाभिप्रायेणाह· नचवहिरङ्गत्वमिति· लुग्विधायकसूत्रैकवाक्यतयासञ्ज्ञाशास्त्रस्यकार्यकालपक्षे
प्रवृत्त्यङ्गीकारात्समत्वमित्याशयेनाह· सञ्ज्ञायाःकार्यार्थत्वादिति· सञ्ज्ञाकार्यस्यलुकः।तत्वेनःसुप्सम्बन्धित्वेन।तत्वात्· वहि
रङ्गत्वात्।ननुमहासञ्ज्ञाकरणेनलिङ्गाद्यनन्वयिनएवैषाव्ययसञ्ज्ञाप्रवर्त्तनइत्याशयइत्यस्यकथमव्ययसञ्ज्ञाप्राप्तिरतआ।
ह· लिङ्गसङ्ख्येतिवारणादिति· अव्ययसञ्ज्ञायाइत्यादिः।मानाभावादिति· सञ्ज्ञामात्रेणासन्निपातविघाताभावात्।एज्वि

।ष्यंयेति॰ एज्विषयसन्निपातनिमित्तकंयदाब्वनदीयोयःसन्निपातएज्विषयत्वरूपस्तद्विघातकश्चक्ङिति चेतिनिषेधस्त
स्यनिवृत्तावपीत्यर्थः।क्ङितिचेतिनिषेधस्तत्रस्ययत्रप्रवृत्तिस्तत्रैचःप्रवृत्तिरित्येज्विषयत्वनिषेधविषयत्वयोःपरस्परं
विरोधइत्यतोनिषेधशास्त्रम्परम्परयासन्निपातलक्षणात्वसम्बन्धिसन्निपातविघातकत्वस्यनिवृत्तिरस्त्विति समुदायार्थः
ननुकिदितिकार्यातिदेशः अतिदिश्यमानञ्चकार्यन्निषेधरूपमेवतस्यसन्निपातपरिभाषानिवृत्तौतत्सन्नियोगशिष्टत्वमपि
नभविष्यतीत्यतआह॰ तत्रहीति॰ व्यपदेशातिदेशः।व्यवहारातिदेशःकार्यातिदेशंवारपतिःइत्वप्रवृत्तिकालइति॰ यदीत्व
भवनसमानकालिकभवनकर्तृकित्कार्येङ्कि॰ त्विमप्रसिद्धंस्यात्तदास्यात्कार्यातिदेशस्तथात्रनास्तीतिभावः।तस्मात्॰ अनन्यगति
कत्वात्।अनया॰ सन्निपातपरिभाषया॰ अतिदेशसञ्ज्ञानामपीति॰ अत्रबहुवचनंलक्ष्यभेदाभिप्रायेण।साक्षात्परम्परे
ति॰ साक्षाद्यथा॰ ग्रामणिकुलमित्यत्रोत्तरपदासन्निपातनिमित्तकहृस्वत्वन्नादेशसन्निपातविघातकस्यनुकोऽनिमित्तम्।अ
तिदेशविषयेपरम्परायायथा॰ उपादास्तेत्यत्रैज्विषयसन्निपातनिमित्तमात्वंस्वप्रवृत्तेः प्राक्स्वनिमित्तभूतोयएज्विषयसन्नि
पातस्तद्विरोधित्वेनविघातकः।कित्त्वयदेशस्तन्निमित्तकप्रवृत्तिकोयोनिषेधस्तस्यानिमित्तंयथाभवतितथातिदेशव्यपदेश
स्याप्यनिमित्तम्।सञ्ज्ञाविषयेपरम्परायायथा॰ आधये चिकीर्षवेकुम्भकारेभ्यइत्यत्रविभक्तिसन्निपातनिमित्तकंपदत्वेणत्वरूप
ङ्कार्यन्तत्स्वप्रवृत्तेःप्राक्स्वनिनिमित्तभूतोयःसन्निपातस्तद्विघातकलुक्प्रयोजकाव्ययसञ्ज्ञायाअप्यनिमित्तम्॰ एतेन॰ पूर्वो
क्तकल्पनेन।अव्ययसञ्ज्ञायाअप्रवृत्तौसमाधानान्तरमाह॰ अकजादेकेति नन्वेवमेवलुगेकवाक्यतापन्नायाअव्ययसञ्ज्ञा
यावारणासिद्धौसन्निपातपरिभाषयावारणापरभाष्यविरोधः प्राप्तेरेवाभावादित्यतआह॰ लुगेकेति॰ शब्दतः।शब्दरूपस्य।

भै.
१७९

भिन्नस्य सत्वेन· न च निमित्तपदेन सन्निम्पाद्यन्तमेव निमित्तं स्थाने लुकि तु सुपः स्थानित्वेनाश्रयणान्न सन्निम्यन्तपदोपात्तत्वेनेति
वाच्यम्· अव्ययादाप्सुप इति सूत्रे सुपः स्थानित्वेनाश्रयणेपि प्रत्ययग्रहणे चापञ्चम्या इति परिभाषासत्त्वेन सुपः प्रत्ययत
या प्रत्ययग्रहणपरिभाषैकदेशस्य सुप् यस्माद्विधीयते तदादेरित्यस्योपस्थितौ कृन्मेजन्त सूत्रैकवाक्यतया सुबभिन्ने प्रत्यये
परे पदव्यवहितपूर्वं कृदन्तं मेजन्तं नान्तः परस्य सुपो लुगित्यर्थादेकनिमित्तकत्वं गौत्वलुका मस्त्वेवेत्याशयात्। वस्तुतस्तु
आधय इत्यादावप्यसिद्धत्वेन निर्वाहः सम्भवति साक्षात्सुपः षष्ठ्यन्तशब्दोपात्तत्वान्निमित्तत्वेनाग्रहणान्न लुगेकवाक्यताप
न्नसञ्ज्ञाया अन्तरङ्गत्वात्। भाष्यकृता तूपायस्योपायान्तरादूषकत्वादिति न्यायेन प्रयोजनान्तरफलकपरिभाषयापि लक्ष्यसि
द्धिर्भवतीत्याशयेन परिभाषयैव दोषवारकतयोपन्यस्ता· नन्वस्तु चैसावित्यादौ लुग्व्यावृत्तये विहितविशेषणत्वमवश्य
म्वक्तव्यम्। तथा चाधय इत्यादावपि लुङ्न भविष्यतीत्यतिप्रसङ्गमाशङ्क्य सन्निपातपरिभाषया समाधानपरं भाष्यमनुप
पन्नमत आह· अङ्गसञ्ज्ञायामिति· अङ्गसञ्ज्ञाविधायकसूत्र इत्यर्थः। यद्यपि लुग्विधायकसूत्रमङ्गाधिकारीयं न भवति त
थापि सुपः प्रत्ययत्वात्प्रत्ययग्रहणपरिभाषया सुपो यस्माद्विधानं तदादेरव्ययात्परस्येति सूत्रार्थो भविष्यति एवञ्चास्तु चै
सावित्यादौ यस्मात्सुपो विधानं तदादेर्नाव्ययत्वम्। आधय इत्यादौ तु विधानकालेयद्यपि नाव्ययत्वं तथापि यस्माद्विधानं त
दादेरुत्तरकालिकाव्ययत्वमाश्रित्य प्राप्तस्य लुकः सन्निपातपरिभाषया वारणमुचितमेवेति भावः· ननु स्वरादीनां यद्यपि स्वरूप
श्चैसादौ कर्मार्थकत्वसम्भवेन द्वितीयैकवचनान्तत्वं सम्भवति तथाप्यधिकरणशक्तिप्रधानाव्ययस्य न कर्मार्थकत्वसम्भ
व इत्यस्तु चैसावित्यादौ समासानुपपत्तिरत आह· अधिकरणेति· अव्ययत्वमिति· तदन्तविधिना प्राप्तमपीति शेषः। अभिमा

राम
१७९

नइति·वक्ष्यमाणोऽभिप्रायः वाचनिकइति·विशेष्यस्याप्रक्रान्तत्वेपि प्रयोजनंसर्वनामाव्ययसञ्ज्ञायामितिवचनबलाच्छब्दस्वरू
पस्यविशेष्यत्वेपितदन्तविधिर्भवतीतिभावः तादृशार्थानामिति·लिङ्गाद्यनन्वय्यर्थानामित्यर्थः।आवश्यकइति·यदिसर्वस्याप्य
नुकरणमेनत्स्यात्तदासर्वेषुविवेचितार्थभेदस्यविरहाच्छब्दस्यविपर्यासरूपभ्रमिजनकत्वंस्यात्तच्चानुचितमितिभावः।यदु
क्तमभिमानइतितत्सूचयितुङ्कथयन्स्वसिद्धान्तमाह·वस्तुतइति·अत्रार्थस्य·महासञ्ज्ञाबललभ्यस्य।ननुप्रधानाप्रधानयोरर्थ
निर्देशविषयः।यथापुमान्स्त्रियेत्यत्रपुमर्थशब्दस्यस्त्र्यर्थकस्यचनिर्देशे।अत्रहिब्राह्मणवत्साचब्राह्मणीवत्सश्चेत्येवंसहो
क्तौप्रधानाप्रधानन्यायेनप्रधानस्त्रीपुंसभिन्नाप्रधानस्त्रीपुंसकृतस्यापिविशेषस्यसत्वादेकशेषोनभवतिप्रकृतेतुस्वरादिनिपा
तेतिशब्दपरत्वस्वर्थेपरमितिनप्रधानाप्रधानन्यायावसरइत्यतआह·सर्वनामसञ्ज्ञासाहचर्येणेति·साहचर्यमत्रसादृश्यंतित
त्रयथासर्वनामेमहासञ्ज्ञाकरणेनविलक्षणोऽर्थःक्लृप्तस्तथात्राप्यव्ययमितिमहासञ्ज्ञाकरणेनैतादृशार्थःकल्प्यतइतिभावः
प्रसिद्धान्तरङ्गेति·प्रसिद्धञ्चतदान्तरङ्गञ्चेतिसमासङ्कृत्वाप्रसिद्धमित्यादिःस्वव्याख्यानभूतयत्पदान्तरानपेक्षमनुपसर्जनीभू
तमितितेनकर्मधारयःसमासअत्राप्रसिद्धमित्यनेनसञ्ज्ञाशब्दव्यावृत्तिः।सञ्ज्ञाशब्दोहियदासञ्ज्ञिबोधनायप्रयुज्यतेतदाचैत्र
नामकोयमित्येवरीत्याप्रयोगोभवतितथात्रापिस्वरनामकइत्येवप्रयोगइतिपदान्तरसापेक्षतास्फुटैव·अन्तरङ्गमित्यस्यव्याख्या
नमनुपसर्जनीभूतमिति·उच्चैःशब्देहिकेवलःप्रयुक्तऊर्द्ध्वदेशनिष्ठाधिकरणनाम्न[illegible]पादयतितत्स्यस्वार्थमात्रप्रतिपादकतयान्तर
ङ्गत्वम्।अस्तुच्चैसाविस्वादौतुयथावृत्तिघटकस्यराजपुरुषइतिसमासावयवस्यैकार्थीभावबलाद्राजशब्दस्यराजसम्बन्धिपुरु
षप्रतिपादकतापुरुषशब्दस्यराजसम्बन्धिपुरुषप्रतिपादकतातथोच्चैःशब्दस्याप्यूर्द्ध्वदेशाभिन्नाधिकरणकर्मकातिक्रमणकर्तृ

प्रतिपादकतयाबहिरङ्ग·त्वमितिभावः।एतेनप्रसिद्धानुपसर्जनीभूतेत्येवसिद्धेःधिकं विशेषणाद्युपादानमनर्थकमितिशङ्का
यानिरासः।अव्ययात्परयोराप्सुपोरित्यर्थः उच्चैरुच्चैराभ्यामित्यत्रातिप्रसङ्ग·शङ्कायामाह· उच्चैरावित्यादि· अततेउँप्रत्ययेटिलोपे
प्रथमेअशब्दस्यद्विवचनेनसहैकादेशेपरादिवद्भावात्सुप्त्वेनतस्याद्वितीयेनादशादशब्दाद्वापितथैवआप्त्वाल्लुक्प्राप्नोति।अथ
वाप्रथमेवासुदेववाचकादशब्दात्द्विवचनोद्वितीयेइदम्शब्दस्याभ्यांम्ब्राह्मणीभ्यामित्यस्यैकदेशेआभ्यामित्यस्मिन्नतिप्रसङ्ग
शङ्का।अतएव·मानाभावादेव·नन्विदमिति·।अलिङ्गत्वमित्यर्थः।अत्रोपसंहारइति· अव्ययउपसंहारइत्यर्थः।प्रत्ययपरत्वेविभ
क्तिसञ्ज्ञाकप्रत्ययपरत्वोकारकशब्दश्चकारकशक्तिपरः।यद्वाकारकस्यतादात्म्येनाभावोऽत्रविवक्षितः।अन्यतरेति·विभक्तिवच
नशब्दयोरन्यतरेत्यर्थः नद्विषयइति· लिङ्ग·विषयइत्यर्थः।स्वरादीनामत्रलिङ्गाभाववत्त्वेनसादृश्ये।क्तिर्नसर्वत्रादिपदवोध्येकि
न्त्वव्ययीभावातिरिक्तेतत्रनपुंसकत्वस्यविशिष्यविधानादित्याह·लिङ्गभावेनेत्यादि·तदभावादित्यादृश्यादिति·तदभावादिकृतसा
दृश्यादित्यर्थः।यद्विविधंरूपमिति·अस्यलिङ्गसम्बन्धकृतमित्यादि·।प्रसङ्गादिति· अव्ययनिरूपणस्यप्रकान्तत्वान्नेषुअवाप्योः
प्रवेशादेतयोःस्मरणेसतिनिरूपणमेतयोरावश्यकमितिस्मृतसोपानहत्वरूपप्रसङ्ग·निर्वाहः·चिन्त्यइति·केचित्तुछान्दसावपिक
विज्ञाषायाम्भवनीत्याश्रित्यसमादधुः।ननुकथंवाचेत्यादिप्रयोगाणांसिद्धिरतआह·निशदिशोरिति·अतएव·एतद्वचनसाध्यसद्ब
लन्नप्रकृतिकयवन्तप्रयोगस्याभावादेव·अस्यभाष्योक्तमित्यत्रान्वयः।अंत्ये।देवविशामित्यत्र।एवंविषयइति·तत्रैवभाष्येपस्तर्ध्ये
नकारान्तात्क्रुञ्चा उष्णिहादेवविशेतितत्रहलन्ताद्वापिकृतेसुबुत्पत्तिरावग्रहणेप्रयोजनमित्युक्त्वा।अत्राप्यकारान्तानाम्प्रवृत्तिर्लक्ष्य
ते।क्रुञ्चानालभेति·उष्णिहककुभौदेवविशश्चमनुष्यविशश्चेति।ततःशङ्कि·तन्नास्तिविशेषः।अकारान्तादमउत्पत्तौसत्यांव्यञ्ज

नान्तद्वे तिस्वरे विशेषः। यदिक्विवन्तो यत्तदा कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तात्परविभक्तेरनुदात्तत्वम्भवति। यदा तु मूलविभुजा
दित्वात्कान्तत्वन्तदाथाःथादिस्वरेणान्तोदात्तात्परविभक्त्यासहैकादेशे पदमन्तोदात्तमिति। तस्मात्क एष एवंविषयः। तस्मादिति·
पूर्वोक्तानामन्यथासिद्धत्वात्॥ इत्यव्ययप्रकरणम्। ॐ नमः॥ नमस्कुर्वे जगद्वन्द्यं सीतापतिमजं विभुम्। यन्ध्यात्वा सिद्धिमखिल
म्प्राप्नुवन्ति महर्षयः १ स्त्रियाम्॥ एतत्सूत्रम्व्याख्यातुम्भाष्ये शङ्कितम्। स्त्रियामित्युच्यते कास्त्री नामेति। अयमभिप्रायः। अयं श
ब्दो न कञ्चिदर्थविशेषं शास्त्रे सङ्केतितो ऽतः पारिभाषिकमर्थमभिधातुन्नालम्। नाप्यपञ्जोति शब्दस्मामानुषीखट्वागवादि
साधारण्येन प्रयोगदर्शनात्सर्वसाधारणस्यानुगतसंस्थानस्याभावेन तद्व्यञ्ज्यत्वस्यात्रासम्भवात्। नापि लोके यत्प्रसिद्धं शेफस
वयवे समवेतत्वे सति प्राणित्वम्। योनिसमवेतत्वे सति प्राणित्वम्। तदुभयासमवेतत्वे सति प्राणित्वञ्च क्रमेण पुंस्त्वं स्त्रीत्वन्नपुंसक
त्वमिति। घटखट्वाज्ञानादिसाधारणस्य पुंस्त्वादिव्यवहारस्यानुपपत्तेः। अत आह· अचेतनखट्वावृक्षादिसाधारणमिति·। सत्वादीना
मिति· सत्वरजस्तमसां गुणानामुपचयः पुंस्त्वं तेषामपचयः स्त्रीत्वम्। साम्यञ्च क्लीवत्वमित्यर्थः। साम्यमेव च स्थितिपदेनो
च्यते। तदुक्तम्भाष्ये· तटे सर्वलिङ्गानि दृष्ट्वा को ऽध्यवसास्यति। अयम्पुमान्। इयं स्त्री। इदन्नपुंसकमिति। तस्मान्नवैयाकरणैः शक्यं
लौकिकं लिङ्गमास्थातुम्। अवश्यङ्कश्चित्स्वकृतान्त आस्थेयः। को ऽसौ स्वकृतान्तः। संस्त्यानप्रसवौ लिङ्गमास्थेयौ। किमिदं संस्त्यान
प्रसवाविति। संस्त्याने स्त्यायतेर्ड्रट् स्त्री सूतेः सप्प्रसवे पुमानिति। अत्र साङ्ख्यमतावष्टम्भेन स्वकृतान्त इत्युक्त्या साङ्ख्यमशास्त्रा
नुसारित्वं व्याकरणस्येति सूचितवान्। अत्र संस्त्यानप्रसवशब्दाभ्यान्तृतीयावस्थापि लक्ष्यते। संस्त्यानन्तिरोभावः। एतदेवाप
चयशब्देनोच्यते। यद्यपि संस्त्याने सङ्घः स्त्यामते शुक्रशोणिते यस्यामिति व्युत्पत्त्या लोके पि स्त्रीशब्दो ड्रट्प्रत्ययान्त एतस्यैव

र्थस्यप्रतिपादकःतथापिस्त्रीत्वस्यखट्वादिसाधारण्योपपत्तयेतिरोभावपरत्वमेवतस्यस्वीकृतम्।एवंसूतेःसवित्यनेनसूङः
धातोरौणादिकोमसुन्प्रत्ययःसस्यपूइत्यादेशोह्रस्वश्चेत्येवंरीत्यापुमस्शब्दोव्युत्पादितः।सूसूतेऽपत्यञ्जनयतीत्यर्थेनयद्यपिप्राणि
निपुरुषएवपुमस्शब्दस्यशक्तिर्लभ्यतेतथापितस्यवृक्षासादिधारण्योपपत्तयेप्रवृत्तिराविर्भावरूपापुमानित्यनेनोच्यतेऽ
एवंयदातिरोभावोनवाप्रवृत्तिःकिन्तुसाम्यावस्थासैवस्थितिःसानपुंसकशब्देनोच्यते।ततःपुनःशङ्कितम्।कस्यपुनःसंस्त्यानं
स्त्रीप्रवृत्तिर्वापुमानिति।गुणानाम्।केषाम्।शब्दस्पर्शरूपरसगन्धानाम्।सत्त्वंरजस्तमांसिगुणाः।तेषाम्परिणामरूपाएवतेभ्यो
ऽभिन्नाःशब्दादयःपञ्चगुणाःसर्वाःपुनर्मूर्त्तयएवमात्मिकाःगुणसमुदायोद्रव्यम्।सर्वस्यजगतःसुखदुःखमोहरूपतयात
त्कारणत्वेनसत्त्वादिरूपत्वङ्कल्प्यते।ततःसर्वपदार्थव्यापित्वम्पुंस्त्वादीनान्दर्शितम्।प्रवृत्तिःखल्वपिनित्या।अत्रप्रवृत्तिरित्य
निनलिङ्गसामान्यलक्षणन्निदर्शितम्।नित्याःसार्वदिकत्वान्सार्वत्रिकत्वाच्च।सत्त्वादीनामाविर्भावादिरूपःप्रवृत्तिशब्दवाच्यो
नित्यःपरिणामइतिकैयटः।यद्यपिपुरुषआत्मपदव्यवहार्योनित्योऽपरिणामीतथापिभोक्तृत्वात्प्रकृतिधर्मोपन्नइवभवति।अत
एवपुरुषश्चितिश्चैतन्यमितिलिङ्गत्रयप्रयोगः।भोक्तृत्वावस्थायाम्भोग्यशबलितमेवचैतन्यम्प्रतीयते तदेवचशब्दगोचरम्।यथा
गच्छतिपुरुषइतिक्रियायोगस्तद्धेतु नहीहकश्चिदपिस्वस्मिन्नात्मनिमुहूर्त्तमप्यवतिष्ठते।वर्द्धतेवायावदनेनवर्द्धितव्यम्।अपाये
नवयुज्यते।तच्चोभयंसर्वत्र।यद्युभयङ्गतोव्यवस्थाविवक्षातःसंस्त्यानविवक्षायांस्त्री।प्रसवविवक्षायाम्पुमान्।उभयोरविवक्षाया
न्नपुंसकमिति।एतेनप्रघट्टकेनशास्त्रीयलिङ्गस्यकेवलान्वयित्वन्निदर्शितम्भवति।अर्थेनिष्ठमिति·अतएवस्वमोर्नपुंसकादि
तिसूत्रभाष्येनपुंसकादित्यनेनासन्दिग्धेनार्थग्रहणेनभवितव्यम्।नहिनपुंसकन्नामशब्दोस्तीत्युक्तम्।अर्थनिष्ठत्वञ्चनाद्य

त्म्येन। यद्यपि शब्दार्थयोरपि तादात्म्येन तदभिन्नस्येति न्यायेन शब्दनिष्ठत्वमपि सम्भाव्यते। तथापि तादात्म्यस्य भेदाभेदरूपतया।
र्थो। भेदेन प्रतीयमानत्वमेवोक्तम्भाष्यात् कल्प्यते· पुल्लिङ्गः शब्द इत्यादिव्यवहारस्तु वाच्यवाचकयोर्भेदाध्यवसायात्। अथवा
मनुप्रत्ययङ्कत्वा गुणवचनेभ्य इति लुक्। केवलान्वयीति· अत्र केवलान्वयित्वमन्योन्याभावप्रतियोगितानवच्छेदकत्वम्। त
द्वोपपादयन्ति। इयमित्यादिना· ननु त्रयाणामपि लिङ्गानाङ्केवलान्वयित्वे दारशब्देन स्त्रीत्वस्यापशब्देन पुंस्त्वस्य ज्ञानशब्देन
स्त्रीत्वस्यापि प्रतिपादनाय निरत आह· केनचिच्छब्देनेति· तत्सम्भवेत्विति· यथा पुरुषुनापजेतेस्यत्र लौकिकपुंस्त्वविशिष्टस्य
स्त्रीयलिङ्गस्य शब्दसंस्कारकत्वमिति न स्त्रियायागाङ्गत्वम्। पशुशब्दो हि स्त्रीलिङ्गोपि। पश्वानतामुमिति वेदे दर्शनात्। नन्वजा
दिशब्दवाच्यार्थस्य यादृशविशेषणविशिष्टस्य तच्छब्दजन्योपस्थितिविषयता तादृशविशेषणावच्छिन्नतद्विषयता विशि
ष्टं यत्स्त्रीत्वमिति विवक्षितम्। शब्दादुपस्थितिश्चार्थस्य शब्दप्रकारिकार्थविशेष्यिका जायते। अश्वशब्दजन्योपस्थितिविषय
ता विशिष्टं यत्स्त्रीत्वन्तदश्वशब्दसामानाधिकरण्येन भासते न तु तुरगशब्दसामानाधिकरण्येन तथा तत्तच्छब्दसामानाधि
करण्येन भासमानियतत्तच्छब्दवाच्यस्त्रीत्वन्तस्मिन् द्योत्ये तत्तच्छब्दादाविति फलितम्। अग्रे मूले। तस्य। स्त्रीत्वस्य। विशेष्यत्वापत्तिरि
ति· प्रकृतिप्रत्यययोः सहार्थं ब्रूतस्तयोः प्रत्ययार्थः प्रधानमिति न्यायात् द्योत्यत्वे तु न विशेष्यत्वापत्तिः अत एव· स्त्रीत्वस्य द्योत्यत्वादेव
। ननु द्योत्यविषयेप्युक्तार्थानामिति न्यायसञ्चारः कुतो नेत्यत आह· व्यक्तिलुनीत इति· स्त्र्यादिशब्दा धर्मपरा धर्मिपरा अपि। अ
तः स्त्रियामित्यधिकारेपि स्त्रीत्वे द्योत्य इत्युक्तिर्न विरुध्यते। तदुक्तम्भाष्ये· स्त्रियामिति स्त्र्यर्थाभिधाने टावादयो भवन्ति द्विवचन
बहुवचनयोरनुपपत्तिः। कुमार्यौ कुमार्यः किङ्कारणमेकत्वात् स्त्रीत्वस्य। यद्यपि तत्तदर्थभेदेन तत्तत्सम्बन्धविशिष्टं स्त्रीत्वमपि

भै·
१८१

भिद्यते तथापि शब्दभेद एव स्त्रीत्वस्य भेदक इत्यभिप्रायेणेदम्। अनेकप्रत्ययानुत्पत्तिश्च। गार्ग्यायणी कारीषगन्ध्या इत्यादौ॥
एकोऽयमर्थः स्त्रीत्वन्नाम तस्यैकेन प्रत्ययेनोक्तत्वात्। द्वितीयस्य प्रयोगेण न भवितव्यमुक्तार्थानामप्रयोग इति ततः सिद्धानि
तमू स्त्रियाः प्रातिपदिकविशेषणत्वात्स्वार्थे टावादय इति। ननु येनित्यं टावन्ता एव प्रयुज्यन्ते तेषामप्यनेनैव साधुत्वमन्वाख्येयम्
तत्र चेदकारान्तस्य क्वचिच्छक्तिनिर्णयः स्यात्तदा टापू समभिव्याहारेऽधिकस्य स्त्रीत्वस्याभिव्यक्त्या टापो द्योतकत्वनिर्णयो भवे
त्। न तथा खट्वामालिष्ववधारयितुं शक्यते। न चातिखट्व अतिमाल इत्यत्र तथा दृश्यत एवेति वाच्यम्। तत्राप्याकारान्तस्यैव ह्रस्व
त्वन्न तु स्वतोऽदन्तत्वस्येति चिन्त्यम्· सर्वेषां स्वरवर्णानुपूर्वीज्ञानार्थ उपदेशः कर्त्तव्यः शशः षष इति माभूत् पलाशः पलाष इति
माभूत्। मञ्चको मञ्जक इति माभूत् तस्मात्सिद्धमेतद्भवतीति भाष्येण क्वचिद्गुणविशेष्ये खट्वमालयोः पाठकल्पनेन समाधा
नात्। सर्वनामधातुजमाह निरुक्ते व्याकरणे शकटस्य तोकमिति भाष्यान्तरेण समाधानाच्च। एवम्पञ्चभिः खट्वाभिः क्रीतः
परः पञ्चखट्व इत्यादौ टापो लुक्यदन्ततापादर्शनाच्च नन्वजादीनामुक्तिर्ङीपो ङीषश्च बाधनायेत्युक्तं तच्चायुक्तमजादिशब्दोपा
दानेन विधीयमानस्य टापो ङीषि कृतेऽपि चारितार्थ्यादत आह· येननेति· ननु वक्ष्यमाणज्ञापकेन तदन्तविधावजादिभ्यस्तद
न्तेभ्यश्च टाप् स्त्रीत्वे द्योत्य इत्यर्थः स्यात्तथा च पञ्चाजीत्यत्र दोषः स्यादत आह· व्याख्यानादिति· एवञ्च सूत्रेऽजादीति लुप्तषष्ठ्य
न्तम्पृथक्पदम्व्याख्यानादित्यस्य लक्ष्यदर्शनमूलकादित्यादिः। एवञ्च प्रकृतसूत्रे स्त्रियामित्येतदजादीत्यस्यैव विशेषणम्
अन्यत्र· वनो र चेत्यादौ· व्याख्यानादिति· वक्ष्यमाणज्ञापकमूलकादित्यादिः। एवञ्चेति· पञ्चसु त्वरीति· सुयजोर्ङ्वनिप् वनो
र चेति सूत्रेण विहितयोर्ङीब्रो विकल्पेन विधायकम्बहुव्रीहेर्वेति वार्त्तिकमिति केषाञ्चिन्मतेनेदम्। वस्तुतो वक्ष्यमाणरीत्यात्रा

राम
१८१

नुपधालोपित्वान्नतेनङीप्। एवञ्च बहुधीवरीत्यस्योपलक्षणमिदम्। नन्वजादीत्यस्य पञ्चम्यन्तत्वेपि पञ्चाजीत्यत्र टाप्प्रा
प्नोति समासप्रत्ययविधिग्रहणवर्जितेति परिभाषया वा तदन्तविधिनिषेधादत आह· अजादिभ्य इती तिवनोरश्चेत्यत्रैवेति· अत ए
वानिधीवरीसिध्यति। अजादीनामेवेति· एवं सति स्त्रियां यदजादी तस्मात्तदन्ताद् इत्यर्थेपि नात्र टाप्प्राप्तिरिति भावः। अनुपसर्ज
नाधिकारेणेति· तद्धि बहुकुरुचरेत्यत्र ङीपोऽनुत्पत्तये क्रियते। नोयदि स्त्रियामित्युपात्तस्यैव विशेषणं स्यात्तदा टितस्तत्र स्त्रियां
वृत्त्यभावात्सोऽर्थकः स्यादिति भावः। सामर्थ्येनेति· अजादिशब्दवाच्यम्। यत्स्त्रीत्वमिति व्याख्यानसामर्थ्येनेत्यर्थः तदुक्तम्भा
ष्ये तदन्तविधिज्ञापनानन्तरं यद्येतज्ज्ञाप्यते पञ्चाजी दशाजी अन्यत्रापि प्राप्नोति। नैष दोषः। अजादिभिरत्र स्त्रियं विशेषयि
ष्यामः। अजादीनां या स्त्रीति· अत्र कैयटः। अजादिप्रातिपदिकाभिधेयसमवेतस्त्रीत्वमिह गृह्यत इति। ये तु अनुपसर्जनाधिका
रेये उपात्तास्तेषामेव विशेषणं स्त्रियामिति। एवं सति बहुकुरुचरेत्यत्र प्राप्तेरेवाभावेनानुपसर्जनाधिकार्यः। एवमजाद्यत इ
ति सूत्रे स्त्रियामित्यस्याजादीत्यस्य पञ्चम्यन्तत्वेप्येतद्विशेष्यणत्वमिति पञ्चाजीत्यत्र न प्राप्तिः। वनोरश्चेत्यत्र तु तदन्तविशेषण
त्वमपीति वदन्ति। तेषामर्द्धजरतीयत्वस्वीकारः स्पष्ट एव। शूद्राचामहत्पूर्वेत्यत्र महच्छब्दस्यानुकरणत्वाल्लौकिकानभि
धायकतयाऽऽत्वन्न· जातिश्चेदिति· स्वप्रवृत्तिनिमित्तभूता जातिश्चेदित्यर्थः। एतत्फलमाह· पञ्च शूद्रीतीति· जातिवाचकत्वा
भावादिति· पञ्च व्यक्तिविवक्षायामेव समासविधानात्। एवञ्च यत्र शूद्रत्वं नाति प्रवृत्तिनिमित्तीकृत्य शूद्रशब्दस्य वाच्यार्थे प्र
वृत्तिस्तत्रैव टाप्। पुंयोगे त्विति· आरोपितशूद्रत्वपुरस्कारेण स्त्रियां बोधेपि न शूद्रत्वजातेर्मुख्यस्सम्बन्धोऽत्र विवक्षित इति।
भावः। न चात्र गौणत्वमिति· न च पदकार्ये ष्वयं न्याय इत्यस्योत्सूत्रे सिद्धान्तितमिति कथमियमाशङ्केति वाच्यम्। यत्र प्रातिपदिकाव

स्थायामेव गौणत्वप्रतीतिस्तत्र प्रातिपदिककार्ये ष्वपि तत्रान्यपदशब्दस्य गौणत्वं तन्त्राश्रयत्वोपलक्षणत्वेन गौणमुख्यन्या
यप्रवृत्तिरिति भावः। सिद्धान्तार्थमाश्रित्य दूषयति· सदृशेति· परिभा॰ नास्थ पदशब्दः पदसञ्ज्ञकपर एवेति भावः। अमहत्पूर्वा
शब्दे ऽसमर्थसमासे ऽसूर्यम्पश्येतिवन्निनयत्स्फलितं तदाह· महत्पूर्वा न टापमिति· महाशूद्रशब्दस्समुदाय एवाभीरजातिवच
नः। गौरखरेन्द्रगोपादिशब्दवत्। तत्र समुदायव्युत्पादनायावयवार्थे स्त्रीत्वमविवक्षितत्वेन समासः क्रियते ततः समुदाया
र्थे स्त्रीत्वविवक्षायां समुदायस्य जात्यन्तरबाधकत्वादनेन टापो निषेधे जातेरिति ङीष्। अनेन यदा समुदायस्य जातिप्रवृत्तिनिमि
त्तकत्वविवक्षा तदा प्रतिषेधः। यदा तु महत्त्वविशिष्टा शूद्रा न त्वन्यजातीयेति विवक्षा तदा महाशूद्रा इत्येव· ननु जातेरित्यस्याभा
वेपि नायन्दोषः। अन्तरङ्गत्वात्सुबुत्पत्तेः प्रागू टापि ततः समासे जातस्य निवृत्त्ययोगात्प्रतिषेधो जातावेव पर्यवस्यतीत्यतो दोषमु
पादयति· तत्फलमिति· जातिमात्रेति· अत्र मात्रपदेन स्त्रीत्वव्यवच्छेदः जातिपरत्वे दृष्टान्तो मृगक्षीरकुक्कुटाण्डवदिति। एते
न यथा कुक्कुटादीनामण्डादिष्विति वचनस्य कुक्कुटस्याण्डमिति विवक्षया समासङ्कृत्वा प्रत्याख्यानङ्कृतं तथात्रापि समास इति।
निदर्शितम्। ततः स्त्रीत्वविवक्षेति· एतेन पूर्वं टाबुत्पत्तिशङ्का व्युदासः। जातिरित्यस्यासम्बन्ध इति· अमहत्पूर्वेत्यनेन टापो निषे
धे सतीति शेषः। ननु समुदायस्य जातिवाचकत्वाभावात्कथं ङीषः प्राप्तिरत आह· अनुपसर्जनाधिकारेणोत्पादि· एवञ्च जाति
वाचकात्तदन्तादिति तत्राप्यर्थः स्यादिति भावः। जातिरित्यस्योभयत्र सम्बन्धश्च भाष्यकारीयं व्याख्यानेन लभ्यते। तत्र हि· शूद्रा चा
महत्पूर्वा। शूद्रा चामहत्पूर्वेति वक्तव्यम्। शूद्रा। अमहत्पूर्वेति किमर्थम्। महाशूद्री। जाति॰ जातिरिति वक्तव्यम्। या हि महती शूद्रा
महाशूद्रा सा हि भवतीति। महाशूद्रेति समुदायस्य जातिवाचकत्वम्व्युत्पादयति। आभीरीत्विति·। आभीरी तु महाशूद्री जातिपुंयो

षयपरिच्छेदकत्वंस्यात्तथाचत्रयाणांलाभः सिद्धएवेतित्रयाणामितिव्यर्थंस्यादितितिभावः।अत्र॰ अव्ययविषये।इत्यादि
पक्षान्तराणि।अत्रादिनासप्तानामपिविभक्तीनामेकवचनानीत्यस्यसङ्ग्रहः।असङ्गतानीतिवहुवचनंसमुदायापेक्ष
याबोध्यम्।तेनसर्वविभक्त्येकवचनमितिपूर्वोक्तिविरोधोन।नन्वेकत्वेएकवचनमितियदुच्यतेतदाघटइत्यादिशब्दो
च्चारणेसतिततएकत्वप्रकारकनिश्चयस्सम्भवतितिनैवैकत्वसंशयप्रतिबंधोनिर्वहति।एकस्मिन्नित्यस्याभावेतुकथ
मेकत्वनिश्चयश्शक्तिग्राहकाभावादतआह॰ घटइत्युक्तइति॰ सङ्ख्यावदर्थत्वेनेति॰ एतेनसत्वभूतत्वात्मकस्यविशे
ष्यस्यलाभः।तथाचघटः।एकत्ववान्।द्वित्वाद्यभावविशिष्टत्वेसतिसत्वादित्याकारकोन्यायोबोधितः।अत्रचास्मुषवि
षयः घटएवदृष्टान्तः।यद्वासत्वस्वरूपत्वेनाखिलसङ्ख्योपस्थितौद्वित्वाद्यभावनिश्चयेसतिस्मृतैकत्वप्रकारकोपनीतः
भानम्भवतीत्याशयेनाह॰ प्रकरणाच्चेति॰ यथासम्पन्नोव्रीहिरित्यत्रजातावेकत्वान्वयः।पशुनायजेतेत्यत्रव्यक्तौतदन्व
यः प्रकरणात्तथेतिभावः।यत्रतुस्वराद्यर्थैकमेत्वाद्यन्वययोग्यतातत्रद्वितीयाद्येकवचनम्भवत्येव।द्वितीयादीनान्तेषु
नियतत्वात्।अव्ययीभावात्तुनाव्ययीभावादित्युक्तेः सर्वविभक्त्येकवचनम्।नचतेभ्योद्वितीयादीनान्द्विवचनः वहु
वचनेतेनज्ञापकेनकथन्नस्यातामितिवाच्यम्।असर्वविभक्त्यव्ययमितिन्यासपक्षेसर्वत्रानेनाव्ययसञ्ज्ञोस्तिद्वौपन्न्व
सूत्रीनकार्येनिभाष्येणद्विवचनानुपपत्तिबोधनात्।॥ॐ॥ भाष्योक्तपक्षाइति॥ अव्ययेभ्यःसप्तानामपिविभक्तीनांत्री
ण्यपिवचनानीत्यादयः।तत्र॰ आसस्त्यालावित्यत्रपठितोयआस्तेनेणआसिरितिसूत्रविहितआसिर्गृह्यतेइतिशेषः।

नानुवर्त्तितइति· वहिहाधाभ्यश्छन्दसीत्यतइत्यादिः। अत्रच· छन्दसीत्यननुवृत्तौच। छन्दसत्वेतुकृदन्तविशेषणत्वाभावेन
॥ ॐ ॥ कृतएजन्तत्वेनेति। स्थानिवद्भावेनकृतम्। एजन्तत्वन्तुव्यपदेशिवद्भावेन। यथाचात्रानल्विधाविति निषेधाप्रवृ=
त्तिस्तथान्यत्रप्रतिपादितम्। यथोद्देशपक्षाभिप्रायेणाह· नचबहिरङ्गत्वमिति· लुग्विधायकसूत्रैकवाक्यतयासञ्ज्ञाशा
स्त्रस्यकार्यकालपक्षेप्रवृत्त्यङ्गीकारात्समत्वमित्याशयेनाह· सञ्ज्ञायाःकार्यार्थत्वादिति· सञ्ज्ञाकार्यस्यालुकः। तत्वे
न· सुप्सम्बन्धित्वेन। तत्वात· बहिरङ्गत्वात्। ननुमहासंज्ञाकरणेनलिङ्गाघन। न्वपिनएवैषाव्ययसञ्ज्ञाप्रवर्त्ततइ=
धयइत्यस्यकथमव्ययसञ्ज्ञाप्राप्तिरतआह। लिङ्गसङ्ख्येति· वारणादिति· अव्ययसञ्ज्ञायाइत्यादिः। मानाभावादि
ति· सञ्ज्ञामात्रेणसन्निपातविघाताभावात्। एज्विषयेति· एज्विषयसन्निपातनिमित्तकंयदात्वन्तदीयोयःसन्निपातए
ज्विषयत्वरूपएवतद्विघातकश्चकृङ्क्तिचेतिनिषेधस्तस्यनिवृत्तावपीत्यर्थः। क्ङितिचेतिनिषेधसूत्रस्ययत्रप्रवृत्तिस्तत्र
नैचः प्रवृत्तिरित्यैज्विषयत्वयोःपरस्परंविरोधंइत्यतोनिषेधशास्त्रंपरम्परयासन्निपातलक्षणात्वसम्बन्धिसन्निपातः=
विघातकन्तस्यनिवृत्तिरस्त्वितिसमुदायार्थः॥ ॐ ॥ ननुकिमितिकार्यातिदेशः। अतिदेश्यमानञ्चकार्यन्निषेधरूपमेवत
स्यसन्निपातपरिभाषानिवृत्तौतत्सन्नियोगशिष्टत्वमपिनभविष्यतीत्यतआह· तत्रहीति· व्यपदेशातिदेशः। व्यवहारातिदेशःकार्यातिदेशंवारयति· इत्वप्रवृत्तिकालइति· पदीत्वभवनसमानकालिकभवनकर्त्तृकित्कार्येङ्क्ङित्वप्रसिद्धंस्यात्तदा
स्यात्कार्यातिदेशस्तथात्रनास्तीतिभावः। तस्मात· अनन्यगतिकत्वात्। अनया· सन्निपातपरिभाषया· अतिदेशसञ्ज्ञानामः

पीति॰ अत्रबहुवचनंलस्यभेदाभिप्रायेण। साक्षात्परम्परयेति॰ साक्षाद्यथा॰ ग्रामणिकुलमित्यत्रोत्तरपद। सन्निपातनिमित्त
कह्रस्वत्वन्ताद्देशसन्निपातविघातकस्यतुकोऽनिमित्तम्। अतिदेशविषयेपरम्परयायथा॰ उपादास्तेत्यत्रैज्विषयसन्निपात
निमित्तमात्वंस्वप्रवृत्तेः प्राक्स्वनिमित्तभूतोयएज्विषयसन्निपातस्तद्विरोधित्वेनविघातकः। किञ्चयद्देशस्तन्निमित्तकप्रवृत्ति
कोयोनिषेधस्तस्यानिमित्तंयथाभवतियथातादृशव्यपदेशस्याप्यनिमित्तम्। सञ्ज्ञाविषयेपरम्परयायथा॰ आधयेचिकीर्षे
वेकुम्भकारेभ्यइत्यत्रविभक्तिसन्निपातनिमित्तकंयद्गुणेत्वरूपङ्कार्यन्तत्स्वप्रवृत्तेः प्राक्स्वनिनिमित्तभूतोयःसन्निपातस्तद्वि
घातकलुक्प्रयोजकाव्ययसञ्ज्ञाया अप्यनिमित्तम्। एतेन॰ पूर्वोक्तकल्पनेन। अव्ययसञ्ज्ञाया अप्रवृत्तौसमाधानान्तरमाह॰ अ
कजाद्येकेति। नन्वेवमेवलुगेक[illegible]क्य[illegible]ापन्नायाअव्ययसञ्ज्ञायावारणसिद्धौसन्निपातपरिभाषयावारणपरभाष्यविरोधःत्रा
प्तेरेवाभावादित्यतआह॥ ॐ॥ लुगेकेति॰ शब्दतः। शब्दरूपस्यनिमित्तस्यसत्त्वेन॰ नचनिमित्तपदेनसप्तम्याद्यन्तमेवनिमित्त
ङ्गृह्यते लुकितुसुपःस्थानित्वेनाश्रयणन्नसप्तम्यन्तपदोपात्तत्वेनेतिवाच्यम्॰ अव्ययादाप्सुपइतिसूत्रेसुपःस्थानित्वेना
श्रयणेपिप्रत्ययग्रहणेचापञ्चस्याइतिपरिभाषासत्त्वेनसुपःप्रत्ययतयाप्रत्ययग्रहणपरिभाषैकदेशस्यसुप्यस्माद्विधीय
तेतदादेरित्यस्योपस्थितौकृन्मेजन्तसूत्रैकवाक्यतयासुवभिन्नेप्रत्ययेपरेपदव्यवहितपूर्वंकृदन्तम्मेजन्तन्ततःपरस्यसुपो
लुगित्यर्थादेकनिमित्तकत्वङ्गुणैत्वलुकामस्त्येवेत्याशयात्। वस्तुतस्तुआधयइत्यादावप्यसिद्धत्वेननिर्वाहःसम्भवति सा
क्षात्सुपः षष्ठ्यन्तशब्दोपात्तत्वान्निमित्तत्वेनाग्रहणान्नलुगेकवाक्यतापन्नसञ्ज्ञाया अन्तरङ्गत्वात्। भाष्यकृतातूपायस्यो

पायान्तरादूषकत्वादितिन्यायेनप्रयोजनान्तरफलकपरिभाषयापिलक्ष्यसिद्धिर्भवतीत्याशयेनपरिभाषयैवदोषवारकतयो
पन्यस्ता॰ नन्वत्युच्चैसावित्यादौलुग्व्यावृत्तयेविहितविशेषणत्वमवश्यम्वक्तव्यम्। तथाचाधयइत्यादावपिलुङ्भविष्यती
त्यतिप्रसङ्गमाशङ्क्यसन्निपातपरिभाषयासमाधानपरम्भाष्यमनुपपन्नमतआह॰ अङ्गसञ्ज्ञायामिति॰ अङ्गसञ्ज्ञावि
धायकसूत्रेइत्यर्थः। यद्यपिलुग्विधायकसूत्रमङ्गाधिकारीयन्नभवतितथापिसुपःप्रत्ययत्वात्प्रत्ययग्रहणपरिभाषया
सुपोयस्माद्विधानन्तदादेरव्ययात्परस्येतिसूत्रार्थोभविष्यतिएवञ्चात्युच्चैसावित्यादौयस्मात्सुपोविधानन्तदादेर्नाव्ययत्व
म्। आधयइत्यादौतु विधानकालेयद्यपिनाव्ययत्वन्तथापियस्माद्विधानन्तदादेरुत्तरकालिकाव्ययत्वमाश्रित्यप्राप्तस्यलु
कः सन्निपातपरिभाषयावारणमुचितमेवेतिभावः। ननुस्वरादीनापद्यपिस्वःपश्येत्यादौकर्मार्थकत्वसम्भवेनद्वितीयेकव
चनान्तत्वंसम्भवति तथाप्य[illegible]शक्तिप्रधानाव्ययस्यनकर्मार्थकत्वसम्भवइत्यत्युच्चैसावित्यादौसमासानुपपत्तिर
तआह॰ अधिकरणेति॰ अव्ययत्वमिति॰ तदन्तविधिनाप्राप्तमपीतिशेषः। अभिमानइति। वक्ष्यमाणोऽभिप्रायःवाचनिकइ
ति॰ विशेष्यस्याप्रक्रान्तत्वेपिप्रयोजनंसर्वनामाव्ययसञ्ज्ञायामितिवचनबलाच्छब्दस्वरूपस्यविशेष्यत्वेपितदन्तविधि
र्भवतीतिभावः। तादृशार्थानामिति॰ लिङ्गाद्यनन्वय्यर्थानामित्यर्थः। आवश्यकइति॰ यदिसर्वस्याप्यनुकरणमेतत्स्यात्त
दासर्वेषुविवेचितार्थाभेदस्यविरहाच्छब्दस्यविपर्यासरूपप्रमितिजनकत्वंस्यात्तच्चानुचितमितिभावः। यदुक्तमभिमा
नइतितत्सूचयितुङ्कथयन्स्वसिद्धान्तमाह॰ वस्तुतइति॰ अत्रार्थस्यमहासञ्ज्ञाबललब्धस्य। ननुप्रधानाप्रधानयोर्द्वयर्थः

वत्येतदर्थमनुपसर्जनाधिकारेऽनकार्येइत्यभिप्रायात्। यत्तु मनोरमायां यदनोवहुव्रीहेरित्यस्यानन्तरमुपधालोपिनेवेतिसूत्रम
स्त्विन्युक्तम्। तत्र त्यइत्यस्यानन्तरमिनीति प्रतीकमुपादायोक्तं मनो वहुव्रीहेर्ङीवुभाभ्याम्। अनुपसर्जनात्। उपधालोपिनो
वेत्तिपाठ्यमितिशब्दरत्ने। यथाश्रुतेऽनुपसर्जनादित्यस्यसम्बन्धोदुर्घटः। अतएववहुदामानिपुराण्यतिक्रान्तानगरीन्त्य
त्रङीम्निन्युक्तन्तेनास्यविरोधइति तन्न। मनोरमाव्याख्यानपरशब्दरत्नग्रन्थस्यस्त्रियामितिप्रातिपदिकविशेषणमितिपक्षे
नुपसर्जनादित्यस्यारम्भइतिपक्षाभिप्रायकत्वात्। विध्यर्थमिदमिदमिति। अनउपधेतिसूत्रमित्यर्थः। नन्वत्रापिविधानसा
मर्थ्यान्ङीम्निषेधडापोःपर्यायसिद्धेरन्यतरस्यामितिव्यर्थमत आह। अन्यतरस्यांग्रहणान्विति। केचित्तुडाबुभाभ्यामन्यतरस्या
म्। अनुपसर्जनात्। उपधालोपि[illegible]ङीडाप्सूत्रे च योगविभागेनोक्तरीत्याऽनोवहुव्रीहेरित्यनुवर्तमानत्वाद्वहुव्रीहेर्डापूर्वा। एते
नङीपासहविकल्पसिद्धिः। अनउपधालोपिनइतिसूत्रन्तूक्तरीत्यानियमार्थम्। एतत्फलार्थमेवतत्रवेति। अनुपसर्जनस्ये
त्यस्यप्रयोजनन्तूक्तमेव। वहुराज्ञीत्यादौकृत्तेभ्यइत्येवङीप्। अतएववहुधीवरीत्यस्यसिद्धिः। एवञ्चवहुव्रीहौवेतिनकार्यमि
त्याहुः। अनेन। कारप्रत्ययग्रहणेन। पदिकेतिसमुदायोविवक्षितः स्यात्तदाऽकच्चिनस्यात्। आपीत्यककारविशेषणत्वंसाक्षा
दुद्देश्यविशेषणत्वंवा। उभयथाऽनुपपत्तिरित्याशयेनशङ्कते। नचेति। ननुपरेणाकारेणौकादेशेपराद्विवद्भावेनभविष्यती
त्यत आह। एकादेशोऽप्यचः परेति। साक्षादुद्देश्यविशेषणत्वकल्पेऽप्याह। आपिपरतइति। ननुसूत्रारम्भसामर्थ्याद्व्यवधानेऽपिप्र
वृत्तिरितिचेन्न। स्थकरूपादावतिप्रसङ्गात्समाधत्ते। आनन्तर्यापीशइति। अकारव्यवधानेपीति। अनेनापीतिककारविशेष
णमितिसूचितम्। ननुकेनिसङ्घातग्रहणमितिपक्षेपिनयासयोरितिज्ञापकेनसौत्रमकारवैशिष्ट्यमादायेत्वप्रवृत्तिर्भवि।

ध्यनीत्यत आह· नयासयोरिति· प्रत्ययस्थत्वाशे ति· एतिके त्यत्र लक्ष्येके तिसङ्घातस्य प्रत्ययस्थत्वांशानुपपादनादित्यर्थः
। प्रत्ययसञ्ज्ञासूत्रोच्चारितशब्दबोध्यस्यन तु बोधकस्येत्सञ्ज्ञोत्तरकालमेव प्रत्ययसञ्ज्ञाप्रवृत्तेः । वर्णग्रहणेपि येन नाव्यव
धानन्यायेन सर्विके स्यादावेवस्यान्नत्वेके स्यादाविति शङ्कते । न चेति· अपहारेणेति· स्थानिवद्भावप्रवृत्तिकाले स्थितस्यायम्प
रनिमित्तोजादेशाइ निवृद्धिः सा तु न सम्भवति तस्यटापासहैकादेशेनापहारादिति भावः अत एव· पूर्वोक्तरीत्या एकस्यैव स्थानि
वद्भावप्रवृत्तिकाले स्थितस्यायम्पर निमित्तोजादेशाइ निवृद्धिः सा तु न सम्भवति तस्यटापासहैकादेशेनापहारादिति भावः अत
एव· पूर्वोक्तरीत्या एकस्यैव स्थानिवद्भावस्य प्रवृत्तेरेव· स्यग्रहणन्तु स्पष्टार्थमिति· प्रत्ययेकीत्येव सिद्धेरिति भावः । न च कान्तात्प्र
त्यया दित्यर्थोपपन्ना वक्तव्येवस्या[illegible]वाच्यम्· क्षिपकादीनाञ्चेति निषेधवैयर्थ्यापत्तेः । देविकाशिंशपेत्तिनिर्देशासङ्गतेश्चे
ति· ननु तथापि कादौ प्रत्ययइत्येव[illegible]किन्न स्यादिति वाच्यम्· क्षिपकादीनाञ्चेति निषेधवैयर्थ्यापत्तेः देविकाशिंशपेतिनिर्दे
शासङ्गतेश्चेति· ननु तथापि का[illegible]यइत्येव किन्न स्यादिति वाच्यम्· नयासयोरिति सूत्रे वैयर्थ्यापत्तेः । बहुव्रीहिणेति·
नसुपूयस्येति बहुव्रीहिणेत्यर्थः । प्रसज्यप्रतिषेधेनेति· स आप्सुपः परो नेति रीत्या । पर्युदासेन व्याख्याने सुब्भिन्नात्सुबन्त
भिन्नादित्यर्थो वास्यात्तदाह· पर्युदासे हीति· उत्तरस्याकारस्येति· पूर्वशब्दाभावे कादिति पञ्चम्युपपत्तये दिग्वाचकशब्दाध्या
हारप्रसाङ्गे परशब्दाध्याहारेणाकट्टकेत्यत्रोत्तरस्याकारस्यस्यादिति भावः न च सर्विका पूर्विकेत्यर्थसिद्धिरेवकृतो नोङ्गावितेति
वाच्यम्· तेषु कदाचित्पूर्वशब्दाध्याहारे यद्यपि सिध्यति तथापि तत्र पाक्षिको दोषः । कट्टकेत्यत्र तु सर्वथेत्वमनिष्टमेवेति
तदेव निदर्शितम् । यदि चोदीचामिति सूत्रे ऽनुवर्त्तमानङ्कादिति ककारनिष्टपूर्वत्वनिरूपितावधित्ववाचकमन्यथा तत्रस

पक्वेत्यत्रयोयकारस्तत्पूर्वस्यकात्परत्वासम्भवःस्यात्किञ्चयःककारस्तदुपादानम्व्यर्थंस्यात्।ककारपूर्वस्यकात्परत्वान
पायात्।नित्यङ्क्रीडाजीविकयोरितिनिर्देशाच्चेतिकादितिपञ्चम्यन्तन्नपरत्वनिरूपितावधित्वविशिष्टवाचकमितिविभा
व्यतेतदापूर्वस्येतिस्पष्टार्थम्।प्रादिवृद्धिरिति।केवलमामिकेतिसूत्रविहितोञेपत्तुनात्रास्ययौगिकत्वात्।तस्यसञ्ज्ञाछन्दसो
प्रवृत्तेः।तद्विरोधादिति।सन्निपातपरिभाषाविरोधात्।विभक्तिसन्निपातनिमित्तकस्यात्वस्यतादृशसन्निपातविघातकय
न्निमित्तत्वन्नस्यात्।इत्वभूतेति।इत्वम्प्राप्नोयोनिर्देशः।इत्वघटितइतियावत्।ज्ञापकेनेति।तकारादेःप्रत्ययस्यावयवोयःकका
रस्तस्मात्परस्यचेदस्यैवेतिनियमेनेत्यर्थः।ननुयत्रटापोलुक्तत्रेत्वस्यश्रवणार्थमिकारनिर्देशः।स्वितिकथमेतन्नियामक
मित्याशङ्कानिवारणायाह।पञ्च[illegible]इति।तदाशयःभाष्यकाराशयः।नचाचःपरस्मिन्नितिस्थानिवत्त्वेनपञ्चम्।त्तिकेत्वस्य
श्रवणंसुवचम्।लुकालुप्तेन्नस्था[नि]वदितिनिषेधात्।नचान्तरङ्गइत्वेवहिर्भूततद्धितलुङ्निमित्तत्वेनटावल्लुकोवहिरङ्ग
स्यासिद्धत्वेनेत्वम्भविष्यतीतिवा[च्य]म्।अन्तरङ्गानपीतिपरिभाषायावहिरङ्गपरिभाषायवादत्वात्।अत्रमृदस्तिकन्नितिवदु
पाधिभ्यान्त्यकन्नितिसूत्रेत्यिकनिकन्नैव्येऽकारोच्चारणादित्वन्नभविष्यतीतिप्राचोक्तन्दूषयति।अत्रन्त्यिकनीति।उभयोःप्र
त्ययलक्षणस्थानिवद्भावयोः।अतएवप्रत्ययलोपसूत्रस्यनियमार्थत्वपरभाष्यसङ्गतिरन्यथैतादृशेविषयेनलुमतेतिनिषे
धात्प्रत्ययलक्षणाप्रवृत्तावपिस्थानिवद्भावेनतत्प्रयोज्यकार्यस्यादितिनियमार्थत्ववर्णनमसङ्गतंस्यात्।अतएव।उभयनि
षेधादेव।वार्त्तिकमतेपीति।तन्मतेनलुमतेतिसूत्रेणप्रत्ययलोपइतिसूत्रस्यविधायकस्यनिषेधेपिस्थानिवत्त्वेनगुणःस्या
देवेतिभावः।नगुणइति।एवञ्चनियामकत्वस्वीकर्तृभाष्यकारवचनप्रामाण्याल्लुमताशब्देनलोपेसतिकथमपिप्राप्तन्नानि

भै·
१८६

मित्त्वकार्यन्नभवतीतिकल्प्यतइतिभावः देवकेत्यस्यसाधुत्वमुपपादयति दिवदत्तशब्दादिति· मतभेदेनेत्वविकल्पः शाकुना
वेवेत्यतआह· अत्रापीति· अन्यत्र· शाकुनिभिन्ने।ननुवृन्दारकादेवता[illegible]ीतिकोशाद्वृन्दारकशब्दोनित्यपुल्लिङ्गइत्यतआह· मु
ख्यवाचीति· अतएवभाष्येवृन्दारकावृन्दारिकेत्युदाहृतम्।मुख्यवाचकस्यत्रिलिङ्गत्वेनुत्रिषूत्तरइत्युपक्रम्यवृन्दारकौरू
पिमुख्याविस्यमरसिंहोक्तिःप्रमाणम्।उदीचामातःस्थाने।अत्रार्थगतंस्त्रीत्वमाकारे अत्रार्थगतस्त्रीत्वमाकारेआरोप्यय
कपूर्वायाइतिस्त्रीलिङ्गनिर्देशः।यकपूर्वेत्यस्ययकौपूर्वौयस्याइत्यर्थः निर्दिष्टपरिभाषेति· तस्मादितिपरिभाषेत्यर्थः।इ
यञ्चाव्यवधानांशमात्रप्रापिका उत्तरस्येत्यंशरहितोपतिष्ठते।पञ्चमीनिर्देशश्चयकौपूर्वौयस्याइतिविग्रहेद्रष्टव्यः।तत्र
पूर्वशब्दसत्त्वान्नविरोधादुत्त[illegible]स्यनोपस्थितिः।एतत्फलमाह· तेनकृशाराशब्देति· नेत्येनुवृत्ताचपीति· अनुवृत्तेःफल
मित्त्वविधायकपूर्वसूत्रेणास[illegible]निमि[illegible]त्तकत्वलाभः।अन्यथापूर्वसूत्रस्यसम्पूर्णस्यानुवृत्तिर्निङ्क्त्वाव्याख्यानस्यावश्यकत्त
पागौरवापत्तेः।स्त्रीबोधकारका[illegible]स्येति· स्त्रीबोधकश्चासावाकारश्चेत्यर्थः।अवयवषष्ठीति· स्त्रीबोधकस्याकारस्येत्यत्रा
वयवषष्ठीवस्यादित्यर्थः।अत्रवहुलक्ष्यसंस्कारश्चसांकाश्यिकेत्यस्यसिद्धिरूपः।तदनुपपादानादि· साक्षादुच्चारितत्वन्त
त्तच्छब्दानुवादेनविहितत्वंवाप्रतिपदोक्तत्वन्तदुभयमप्यत्रनास्तीतिभावः।ननुस्त्रीप्रत्ययशब्दस्यमूलेऽभावात्स्त्रीप्रत्ययः
किमितिमूलोक्तमयुक्तमतस्तद्योजयति।यकपूर्वेति· पूर्वोक्ताभिप्रायेणाह· अयमपीति· भस्त्रैषेतियोगइत्यर्थः।यत्वनत्पू
र्वाणामपीतिज्ञापकादिहेत्वविधौनदत्तविधिर्नेतितद्दूषयितुमाह· येनविधीति· भस्त्रादिग्रहणमिति· एतेनप्रकृतेतद
त्तविधिर्भाष्यसम्मतएवेतिध्वनितम्।उपसर्जनस्यचारितार्थ्येनेति· निर्भस्त्रिकेत्यादौगोस्त्रियोरितिह्रस्वत्वेपुनष्टापि।

राम
१८६

क्तेनैः स्यायो भाषितपुंस्काद्विधानेनाभाषितपुंस्केन्यस्याप्राप्तिरिति भावः। अकचित्कृत इति· अवयवगतकुत्साविवक्षायामिदम्
। समुदायगतकुत्साविवक्षायामाह· अकृतेवेति· ततोऽकचीति· समुदायार्थगतकुत्साविवक्षायामित्यादिः। समासादिति· प्रत्य।
यलक्षणेनेत्यादिः। तत्र तत्पुरुषस्योत्तरपदार्थप्रधानतया सर्वनामत्वं तद्विषये प्रक्रियामुक्त्वा बहुव्रीहौ विशेषं वक्तुमाह· बहुव्रीहा
विति· प्रियैतकेति· न बहुव्रीहाविति सूत्रारम्भवादिमतेन· प्रत्याख्यानरीत्याह· प्रियैतकस्कावेति· द्वाएषाइत्येतद्विषयेऽसम्भव
मुपपादयति· एषाहेतीति· अप्राप्तिरिति भाव इति· बह्वानुपसर्जन एवानेन भवितव्यं तत्राकचि कृते आतः स्थानिकत्वासम्भव इ
ति सूचितम्। ननु सञ्ज्ञाभूतस्यैतस्योदाहरणत्वकथनमयुक्तम्। उत्तरसूत्रे एतत्रेत्वसिद्धेरत आह· सञ्ज्ञापूरण्योरिति· पुरुषसा
धारणाम्प्रवृत्तिनिमित्तमुपपादयति· आनेयीत्यत्र पुरस्कार इति· कान्तेपीति· तेषाम्प्रातिपदिकत्वमात्रापेक्षत्वेन स्त्रीप्रत्ययादपि प्रा
गुत्पत्तेः पदलाघवमूलिकामाशङ्कान्निराकरोति· स्त्रीविषयादिति· मूलोक्तम्बहुव्रीहेरित्युपलक्षणान्निः स्विकेतिनत्पुरुषेपि नि।
त्यमेवेत्वमिति बोध्यम्· ननु मूलोक्तमनुपसर्जनादिति सूत्रमेव स्त्रीप्रत्ययेषु तदन्तविधिं ज्ञापयतीति तद्युक्तमन्यत्रापि प्रयोजन
सम्भवादिति तद्दूषयितुमुपक्रमते। आचारेति· कर्तृक्विबन्तानामिति· इदमनडुच्छब्दो गौरादिषु पठ्यते तस्मादाचारक्विबन्त प्रकृति
कक्तृक्विबन्तेऽनुपसर्जनाधिकारचारितार्थ्यशङ्का यान्द्रष्टव्यम्। एतेनादन्तत्वाभावान्क्विबन्ते कथम्प्राप्तिरित्ययास्तम्। यद्यपि ह्रस्व
नद्याप इति सूत्रस्थभाष्यप्रामाण्येन हलन्तेभ्य आचारे क्विब्नास्तीति। आचारक्विबन्तेऽनुपसर्जनाधिकारचारितार्थ्यशङ्कैवायुक्ता। तथा
पि हलन्तात्क्विपस्ताद्दृशस्यसत्वमभ्युपेत्य समाधानमाह· एतज्ज्ञाप्येति· उक्तार्थे ज्ञापकतापरेत्यर्थः। स्त्रीगोव्यक्तयइति· इदमुत्तरका।
ले स्त्रीत्वसत्वात्स्त्रीप्रत्ययापादनाय· गृह्यमाणेति· स्त्रियामणयोऽकारस्तदन्तादित्यर्थस्य सम्मतत्वेन गृह्यमाणाणविशेषणत्वात्·

अत्र स्त्रियामणन्तो ऽकारइत्यनेन परेण णान्तात्स्त्रियां प्रत्ययविधानं तस्याणोपस्त्रीत्वविशिष्टे उत्पत्तिस्तदैव स्त्रीत्वं प्रत्यासत्त्याविव
क्षितम्। अत एव निरुक्तस्त्रीत्वस्याविवक्षितत्वादेव· कौशाकुत्स्निनेति· अ[illegible]काशाकृत्स्निना प्रोक्ता मीमांसा इत्यर्थे काशकृत्स्निशब्दादणि
कृते तदन्तात्स्त्रियां ङीङीपि पुनरध्येत्र्यामणि तस्याणो लिङ्गविशिष्टपरिभाषया प्रोक्तार्थकप्रत्ययान्तं यन्ङीप्रतन्नन्तः परत्वेन लुकि लुक
तद्धितेतिङीपोलुकि श्रूयमाणस्याणा अध्येत्र्यामवर्त्तनादित्यर्थः। अणन्तसमुदायस्य तु पः शिष्यत इतिन्यायेनाध्येत्र्यां तत्रैष्टापू भवत्येवे
तिभावः। तद्व्यावर्त्यमिति· अनुपसर्जनाधिकारव्यावर्त्यमित्यर्थः। प्रातिपदिकाधिकारसत्वेनाणमात्रस्याप्रातिपदिकत्वादणन्ता
दित्यर्थे सम्भवेपि। अणणन्तानादित्यर्थो न स्यात्। एवं सति बहुकुरुचरेति समुदायस्य न टिदन्तत्वमतो नास्यान्ङीयः प्राप्तिरिति भावः
प्राधान्यात्। विशेष्यत्वात्। एतेन तत्पुपाधेरुपाधिर्भवति विशेषणस्य वा विशेषणमिति न्यायावसरः सूचितः। एतदारम्भात् अनुप
सर्जनादिति सूत्रारम्भात्। ङीप्प्रकृति[illegible]प्रातिपदिकमित्यर्थः। अत एव स्त्रियामित्यस्य प्रातिपदिकविशेषणत्वादेव· एवञ्च· अनुपस
र्जनादितिसूत्रेकृते च। अनुपसर्जन[illegible]दित्यस्यापि प्रातिपदिकविशेषणत्वे भक्षितेपि लशुने न शान्तो व्याधिरिति न्यायेनाधिकारसूत्रवैय
र्थ्यमेव स्यादतस्तस्य गृह्यमाणविशेषणत्वमेव· गुणाः कृतात्मसंस्कारइतिन्यायादिति भावः। प्रत्ययविधौ प्रतिषेधादिति· ननु येन
विधिरिति सूत्रव्याख्यानावसरे समासप्रत्ययविधाविति प्रतिषेधवाक्यमुपक्रम्योगिद्वर्णग्रहणेति निषेधवाक्यैकवाक्यतया ऽयन्नि
षेधः प्रत्ययांशे गृह्यमाणप्रातिपदिकविषये। प्रत्ययविधिविषयेण गृह्यमाणप्रातिपदिकेन तदन्तविधिर्नास्तीत्यनेनैकवाक्यत्व
लाभात्। उगिद्वर्णेति त्वेकदेशानुवादः। अत एव वनो रचेत्यादौ प्रत्ययग्रहणे तदन्तग्रहणमित्यस्यनायन्निषेधइत्युक्तं तेनास्य ग्रन्थस्य वि
रोधः। टिड्ढेति सूत्रे विशेषरूपेण प्रातिपदिकग्रहणाभावादिति चेन्न· अस्य ग्रन्थस्यानुपसर्जनादिति सूत्रस्थभाष्यीयोपक्रमानुसारित्व

न्त।तथाहि।अनुपसर्जनादितिकिमर्थम्।बहुकुरुचरा।बहवःकुरुचरायस्यामितिबहुव्रीहिः।कुरुचरशब्दउपसर्जनमितिङीन्नभव
ति।नैतदस्तिप्रयोजनम्।कुरुचरशब्दात्प्रत्ययोविधीयतेतत्रकःप्रसङ्गोयद्बहुकुरुचरशब्दात्स्यान्नैवप्राप्नोतीतिनार्थःप्रतिषेधेन।त
दन्तविधिनाप्राप्नोति।नित्यन्नग्रन्थेनबहुकुरुचरेत्येतदनुपसर्जनादित्यस्यप्रयोजनमुक्तम्।अत्रटिदन्तश्चरशब्दोनतुकुरुचरशब्दइति।
कुरुचरशब्दादित्यनुपपन्नमित्याशङ्कानिवारणायाहकैयटः।टिड्ढाणञित्यत्रटित्प्रातिपदिकंगृह्यते।तच्चकिञ्चित्साक्षाद्भवतियथा
नदट्चोरडिति।किञ्चित्त्ववयवटित्वद्वारेण।अवयवेहियत्रटित्वंकिञ्चित्कल्पंतत्रसमुदायार्थंतद्विज्ञायते।सचावयवःक्वचिद्धातुष्ठि
ष्ठावतियथास्तनन्धयीति।क्वचित्तुल्युट्सुलादिस्तद्धितः।क्वचित्कृत्लुडादिः।तत्रायंसमुदायंयोवयुर्वानव्यभिचरतितदर्थमवयवस्य
टित्वमित्यभिप्रायेणोक्तंकुरुचरशब्दादिति।अत्रायंसमुदायमित्यनेनटप्रत्ययस्यटित्वेनकुरुचरशब्दस्यटित्त्वंनतुबहुकुरुचरशब्दइ
तिदर्शितंभवति।अतएवोत्तरत्रपठति।प्रातिपदिकेनतदन्तविधिप्रतिषेधात्।ग्रहणवताप्रातिपदिकेनतदन्तग्रहणंप्रतिषिध्यतेसमास
प्रत्ययविधौप्रतिषेधइत्यनेन।ग्रहणवतेत्यपिवर्णग्रहणवर्जमित्येतदन्तार्थोऽनुवादएवेतिभावः।ज्ञापकंतुपूर्वत्रतदन्तप्रतिषेधस्य।
एवमुक्तेततःकिमेतस्यज्ञापनेप्रयोजनमितिप्रश्नेबहुधीवरीबहुपीवरीअतिधीवरीअतिपीवरीतिप्रयोजनमुक्तम्।अत्रकैयटः।
वनोरचेत्यत्रवन्नन्तस्यप्रातिपदिकस्यग्रहणात्तदन्तविधिर्नस्यादितिभावः।ननुप्रातिपदिकस्यविशेषरूपेणाप्रकृतसूत्रेग्रहणाभा
वाद्ग्रहणवत्येनेनतदन्तविधिप्रतिषेधकथनमयुक्तमेवेतिचेन्न।ग्रहणवतेत्यस्यप्रातिपदिकत्वव्याप्यधर्मविशिष्टस्यत्रोपादीयतेतेनत
दन्तस्यग्रहणंनेत्यर्थस्यविवक्षितत्वात्।अस्तिचटित्यदस्प्रातिपदिकत्वव्याप्यधर्मविशिष्टबोधकमितिस्यादत्रनिषेधइत्याशया
त्।तथाहि।टिदितिनप्रत्ययग्रहणपरिभाषयातदन्तपरम्।टित्त्वस्यनदट्देवट्चोरडितिसमुदायेदर्शनेनतस्यप्रत्ययाप्रत्ययस्य

भै·
१८९

धारणात्वयाप्रत्ययमात्रग्रहणाभावात्। न च टिड्ढोऽकारस्तदन्तादित्यर्थोऽस्त्विति वाच्यम्· नदट्दिवी चोरी स्तनन्धयीति रूपाणामसि-
द्धापत्तेः। एतेषु हि समुदायस्य टित्त्वन्नतु अकारस्येति। न चाधिकारप्राप्तप्रातिपदिकादित्यस्य टिदित्यदं विशेषणमिति येन विधिरित्यने
न तदन्तग्रहणमस्तु नदट्दिवीत्यादौ व्यपदेशिवद्भावेन सिद्धम् मुख्यव्यवहारस्य चिरन्तनीत्यत्र सत्त्वादिति वाच्यम्· स्तनन्धयीत्य
स्यासिद्ध्यापत्तेः। अत्र हि धातोः खित्त्वं न च ते न तन्दन्तमतोऽत्रादित्यदम्पारिभाषिकम्। इत्थकारविषयता प्रयोज्यायाः प्रातिपदिकत्वसमा
नाधिकरणटित्त्वव्यवहारस्य विषयतानदाश्रयत्वञ्च प्रवृत्तिनिमित्तम्। प्रयोज्यप्रयोजकभावस्वरूपसम्बन्धरूपः साक्षात्परम्परा
साधारणः साक्षादिदकारविषयता प्रयोज्यता टिद्व्यवहारे नदीत्यादौ। स्तनन्धयी चिरन्तनीत्यादिसमुदायेपरम्परया। तदेकदेशत्वा
दितन्त्रैयत्यग्रन्थसम्वादे टिड्ढाणञित्यत्रेत्यादिना। एवञ्चेदकारविषयताप्रयोज्यप्रातिपदिकत्वसामानाधिकरण्यविशिष्टविषयता
श्रयत्वम्प्रातिपदिकव्याप्यो धर्मस्तद्धि शिष्टबोधकस्य टिदित्यदस्य सूत्रे उपादानात् क्रियमाणप्रातिपदिकविषयता सत्त्वात्तदन्तविधिनि
षेधात् दृह्कुरुचरेत्यत्र न प्राप्नोतीत्यनुपसर्जनाधिकारज्ञापकता सङ्गच्छते। कुरुचरीत्यत्र तु टित्वाद्दित्व ङीप्। तदुक्तम्भाष्ये· कुरुचर
शब्दात्प्रत्ययो विधीयते तत्र कः प्रसङ्गो पद्दुकुरुचरशब्दात्स्यादिति· पूर्वोक्तभाष्ये यदुक्तम्पूर्वं तत्र तदन्तप्रतिषेधस्येति तदनुपस
र्जनादिति तदन्तविध्यभावसिद्धार्थानुवादइत्याशयेन·। अपरे तु क्रियमाणप्रातिपदिकविषयइत्यस्य यदानुपूर्व्यवच्छिन्नस्य प्राति
पदिकसन्त्वात्तदानुपूर्वीरूपेणायत्रोपादानन्तत्रेत्यर्थः। एवञ्च टिड्ढेति सूत्रे तादृशरूपेणोपादानाभावान्न तदन्तविधिनिषेधप्राप्तिरिति ना
नुपसर्जनादित्यस्य टिड्ढेति सूत्रे फलम्। किन्तु कौरव्यमण्डकाभ्याञ्चेत्यादिसूत्रेण विधीयमानः स्त्रीप्रत्ययः प्रियकौरव्या प्रियमाण्डूकेत्या
दावुपसर्जनेन भवतीति बोध्यम्। गोपकुरुचरेत्यादिभाष्यन्तूपलक्षणमित्याहुः। तत्फलमिति· तदन्तविधिफलमित्यर्थः। अन्यथा तद

एम
१८९

न्तविध्यभावे। इत्याप्नुवीत। इत्यथापद्येत। प्रत्ययग्रहणपरिभाषया कुम्भकारशब्दस्यानण्णन्त्वेनावयवात्कारशब्दात्स्त्रीप्रत्यये ऽव
यवात्कारीशब्दाद्धि किं तन्निरूपिताङ्गत्वस्य विशिष्टे ऽभावेन ककारोकारस्य वृद्धिर्न स्यात्। ङीपि· अवयवाङ्ङीपि· कुम्भविशिष्टस्य
कुम्भकारीशब्दार्थस्य· तदेतदुपपादयति· कदाचिदिति· एतेन यद्वा समुदायादुत्पन्नस्तदा कौम्भकार्य्यसिद्धिः सूचिता। निष्कृ
ष्य· अर्थद्वारक शब्दान्तर सम्बन्धाभावं सम्पाद्य। एकार्थीभावः ननु कृद्ग्रहणपरिभाषया वहुकुरुचरेत्यादौ समुदायान्न प्राप्नोतीत्य
त आह· कृद्ग्रहणपरिभाषेति· ननु कुम्भकारीयनिरूत्यर्थञ्चेत्तदन्तविधिः स्त्री क्रियते तेन तदाज्ञापितेपि तस्य दुर्वारितया ज्ञापनमयुक्त
मित्याशयेन शङ्कते· न चेति· व्यपदेशिवद्भावेनेति· लौकिकेनेत्यर्थः। लोके यथा प्रधानीभूतो राजामात्यो राजानम्प्रति गुणीभूतो
पि राजेति व्यपदिश्यते लौकिकस्तथा समुदायार्थम्प्रति गुणीभूतो प्युत्तरपदार्थः। पूर्वपदार्थनिरूपितप्राधान्यविशिष्ट इति तदर्थप्रति
पादकस्य तदन्तत्वव्यवहारो भविष्यतीत्यभिमानः परोक्तप्रथमदूषणमभ्युपेत्य समाधत्ते। एतदधीति· असहाय एवेति· लौकिको
व्यपदेशिवद्भावो ऽसहाय एवेष्यते न तु सहाये। वहुषु पुत्रेषु सत्सु नैकस्मिन्नयमेव ज्येष्ठो मध्यमः कनीयानिति व्यवहारः किन्त्वेकस्यैव
सत्वे तस्मिन्नयमेव ज्येष्ठो मध्यमः कनीयानिति व्यवहारः। अस्मिन्नेवार्थे ऽधिकारो पि ज्ञापक इति भावः। भाष्येपि व्यपदेशिवदेकस्मिन्का
र्य्यम्भवतीति वक्तव्यमित्युक्तम्· सिद्धान्तानुसारेणाह· अर्थवत्सूत्रेति· इदमेतत्सञ्ज्ञाफलभूतेत्यस्य पश्चाश्रुतार्थानुसारेण। एतत्स
ञ्ज्ञाफलभूतटिभक्तिभिन्नस्योपपदस्यापेक्षा सत्वेपि न पूर्वोक्तरीत्यानुपपत्तिरित्यत आह· तदादिनियमाभावेनेति· ननु न्यूनेति· अय
म्भावः। यथा प्रत्ययग्रहणपरिभाषया ऽधिकस्य प्रत्ययान्तत्वम्व्यावर्त्यते। न तु न्यूनस्य। अत एव· इरियानित्यादौ तद्विनान्तत्वनिवन्ध
न प्रातिपदिकत्वसिद्धिस्तथा प्रत्ययग्रहणपरिभाषायवाद भूत स्त्रीप्रत्यये चानुपसर्जनेनेति परिभाषन्यूनपि प्रत्यायग्रहणपरिभा

षाव्यावर्त्यस्याधिकस्यस्त्रीप्रत्ययान्तत्वम्बोध्यतेनतुन्यूनस्यस्त्रीप्रत्ययान्तत्वम्बोध्यतइत्यर्थः।किञ्चनतुन्यूनस्येतियदुक्तन्तत्रैतद
धिकारस्यापिज्ञापकत्वम्बोध्यम्।अन्यथाः उक्तप्रकारत्रयानङ्गीकारे।अवयवस्यकुम्भकारेत्यत्रकारेत्यस्य।यत्तुतदुक्तान्निष्कृष्येका
र्थीभाववृत्तिनिमित्तमित्ययुक्तमितितमेवार्थन्द्रढीकर्तुमाह·येनविधिरितीति·।उक्तन्यायादिति·प्रत्ययग्रहणेयस्मादितिन्याया
दित्यर्थः।अत्रेत्यर्थः।अत्रत्यभाष्येऽनुपसर्जनाधिकारस्यतदन्तविधिज्ञापकतोक्ता।सर्वादिसूत्रभाष्येतुप्रत्याख्यापतइत्युक्तमिति।
तिविरोधशङ्कानिवारणायाह·यत्तुसर्वादीति·वार्त्तिककृतेति·इत्थंहिवार्त्तिकग्रन्थः।अनुपसर्जनग्रहणमनर्थकम्।प्रातिपदिकेन
तदन्तविधिप्रतिषेधात्।आपिशलमधीतेआपिशलाब्राह्मणीत्येतदर्थमपिन·स्त्रियांयोऽण्विहितमित्येवंरीत्यागृह्यमाणविशेष।
णांस्त्रीत्वत्वम्।पूर्वत्रतदन्तस्यग्रहणंयथास्यादित्यर्थमपिन·अमहत्पूर्वग्रहणेनतत्रतस्यज्ञापनादिति·कुम्भकारीत्यादौतुकारशब्दा
देवाऽङीप्।ढक्तुस्त्रीप्रत्ययेनतदादिनियमाभावात्समुदायादेवानावपवादनभिधानादितितदाशयः।वस्तुतस्तुसर्वादिसूत्रस्थाप्रत्याख्या
यनइत्युक्तिरत्रत्यवार्त्तिकमप्रथममभिप्रेत्य·अतएवभाष्यकृता।अत्रउत्तरम्पठितस्येनेनतस्यवार्त्तिककृत्सिद्धान्तत्वंसूचितम्·उत्तरवाक्ये।
त्वाचार्यदेशीयस्य।पूर्वत्रतदन्ताप्रतिषेधेप्युत्तरत्रचारितार्थ्यानुपपादनात्।सञ्ज्ञोपसर्जनप्रतिषेधइत्यस्यप्रत्याख्यानायहितत्रेदं
सूत्रमन्यथाव्याख्यानम्।सञ्ज्ञोपसर्जनव्यावृत्तिरन्यथ्यातत्रसाधितेतितदर्थमपिनेतिप्रकृतसूत्रस्थाद्यवार्त्तिकतात्पर्यम्।इदन्तुहिप्रयो
जनमित्यारभ्यसिद्धान्तयुक्तिर्वार्त्तिकप्रत्याख्यानाभिप्रायेणेतिविभावनीयम्।यथाश्रुतार्थेपञ्चाश्वेत्यस्यवारणासम्भवादाह·प्रत्यासत्त्ये
ति·प्रत्ययलक्षणेनठगन्तत्वेपिवर्णाश्रयेप्रत्ययलक्षणाभावात्तदवयवादन्तत्वम्।ननुस्थानिवद्भावेनशास्त्रीयस्यैवातिदेशोभवि
ष्यत्यतआह·नत्वपीतिलिङ्गादित्यादि·ननुवैयर्थ्येसतिज्ञापकत्वन्तदेवतुनेत्याशयेनशङ्कते·नचेति·वृद्धिरिति·उतोवृद्धिरितिसूत्र

विद्धितेस्यर्थः। विनिगमनाविरहादिति· नत्वपीत्यस्यचारित्यार्थ्येवाच्यन्तदुक्तार्थज्ञापकतयावानिग्लक्षणात्वृद्धिनिषेधार्थत्वेनवास।
म्भवति एकत्रैवतुसाधकत्वान्नास्तीतिभावः। शङ्कोक्तन्नत्वपीतिसूत्रप्रयोजनमन्यथासिद्धमपीत्याह· उतऔदितिवक्तव्यइति· ।नन्वेवम्
लाश्रयात्नुवन्धकार्यस्यैवाभावकल्पने। अव्यवस्थांवारयति· लक्ष्यानुरोधेनेति· हलःश्रइतिसूत्रभाष्येशानजादेशस्यशकारोङित्वा।
र्थः। तेनकुषाणपुषाणेतिसिद्धम्। एतच्चस्थानिवद्भावेनसिद्धमित्युक्त्वासार्वधातुकादेशेऽनुवन्धानांस्थानिवत्वेतज्ज्ञापकमित्युक्तम्। तत्प्रयो
जनंहेरपित्वन्नप्रतिषेध्यामि। तथातानङिःकारोनोच्चार्यइतिच। रुधेनत्ताप्नेऽचिनवमसुनवमकरवमित्यत्रादेशस्यस्थानिवद्भावेनपि
त्वन्नस्यात्। तथासुनिङित्वाद्गुणोनस्यादितिदूषणमभिधायतस्मान्नार्थोऽनेनज्ञापकेन। यानिप्रयोजनानिक्रियन्तेन्यासस्व। एवमपिभवे
त्पित्करणसामर्थ्यात्पित्कृतंस्यात्। ङित्करणसामर्थ्यान्ङित्कृतमपिप्राप्नोतीतिशङ्कितम्। एवमपिब्रूतादित्यत्रस्थानिवद्भावेनपित्त्वा
दनुदात्तत्वम्। ब्रुवईडितीडागमश्च। यत्तुखलुपितिङित्कृतम्प्राप्नोतिङितिचपित्कृतंन्ननत्तस्यात्। तस्मादुक्तव्यम्पित्नङिद्भवतिङि
च्चपिन्नभवतीति। नवक्तव्यम्। एवम्वक्ष्यामिसार्वधातुकङिद्भवतिपिन्न। एवन्नावन्पितोङित्वम्प्रतिसिद्धम्। ततोङिच्चपिन्नभवतीति
एवंङितःऽपित्वम्प्रतिषिद्धम्। तेनतातङः स्थानिवद्भावप्राप्तम्पित्वम्प्रतिषिद्धमितिरीत्योक्तनदनुसारेणाह· परेत्विति· वक्ष्यमाणे
त्यादौतुगतिमाह· तस्मादिति· ननुपासुटोङित्वस्यङिदादेशानां ङित्वाभवेत्तापकनोग्नासानसङ्ग्रहोनेतिसिपुचारितार्थ्यादत
आह· यत्त्विति· ननुशानचःशित्वस्यप्रत्याख्यानमयुक्तम्। गाङ्कुटादितिसूत्रेगाङोङित्वंसानुवन्धकादेशेऽनुवन्धानांस्थानिवत्वेज्ञा
पकमितिगाङ्कुटादितिसूत्रभाष्यविरोधादतआह· यदपीति· ननुनिरनुवन्धकस्यशिलायाढःसभायायःढश्छन्दसीत्यस्यपुरस्ता
न्निकत्वात्सानुवन्धकङ्कि मित्युदाहृतमतआह· निरनुवन्धकस्येति· पूर्वोक्तयोःस्वभावतोनपुंसकत्वपुंस्त्वयोः सत्वादितिभावः। स्पष्ट

श्चेदमिति·ननुचायमस्ति।शिलायाढइतिनैषस्त्रियांवर्त्तते।अत्रकैयटःशिलेवशिलेयमितिनपुंसकलिङ्गएवंशिलेयशब्दःस्वभावा
त्।अयन्तर्हिसभायायःढश्छन्दसीतिनिरणषोपिनस्त्रियावर्त्तते।कथंस्त्रीनामसभार्यासाध्वीस्यात् यत्तसभायांविदुषामेवपुरुषाणांसा
धुत्वाधिकारात्।ननुसभायांसाधुरियंब्राह्मणायङ्क्तिःपरिषद्वेतिसम्भवतिस्त्रियाःसाधुत्वम्।एतेनछन्दसिसभेयशब्दस्यैवंविधायां
स्त्रियांप्रयोगाभावइतिविज्ञायते॰ एतेनस्वभावतःपुंस्त्वन्निदर्शितम्।अतएवेति·अयन्चःप्रत्ययान्तत्वादेव।अनुबन्धद्वयोपादानमि
ति·अस्यप्रकृतःसूत्रइतिशेषःवरजव्यावृत्तेरिति· अतएवतमीश्वरासाधुचचारसस्सादरेतिसिद्धमस्येशभासेतिवरच्।ईश्वरीतितु
पुंयोगेसिद्धम्।ईशधातोर्वनिपिवनोरचेतिचाइत्यर्थइति·यद्यप्यत्रछत्रादिभ्योणइतिणस्तथापिनाच्छीलिकेणेपीतिपरिभाषया
ङीप्।वयस्यचरमइति· प्रथमवयोवाचित्वाभावाद्वयसिप्रथमइतियथाश्रुतसूत्रेणानुनसिद्धिः।पुनरत्रग्रहणम्।वार्त्तिकेग्रहण
मित्यर्थः।तयोःङीवन्तङीषन्तयोःयत्तुतरुणतलुनयोर्वार्त्तिकेग्रहणङ्गौरादिपाठोप्यनयोर्मास्तुकिन्तुवाह्वादौपाठोऽनयोःकार्यस्तेन
वह्वादिभ्यश्चेतिपक्षेङीष्।तदभावेवयस्यचरमइतिङीप्प्रभविष्यतीतिस्वरस्यापिसिद्धिरिति।नत्र·नञ्स्नञीतिप्रतीकमुपादा
यतरुणतलुनशब्दयोरवयवयोऽर्थङ्ग्रहणम्।तरुणीसुरेति·प्राणिधर्मोहिवयइतिकैयटेनसमाधानस्यसूचनात्।वार्त्तिकेऽवयसि
टावन्तप्रयोगनिवृत्त्यर्थमनयोरुपादानमावश्यकम्।नचैतावतान्तोदात्तस्यसिद्धिस्तदर्थंगौरादिषुवह्वादिषुवापाठइत्यत्रफलतोन
विशेषःननुयत्रापियञ्चेतिसूत्रएवोपादानङ्कृतोनकृतमतआह·प्राचांष्फइत्यत्रेति·।नन्वनयस्याधिकाराप्रसिद्धानपत्याधिकार।
स्यादित्यनुपपन्नमतआह·अपत्याधिकारस्यभिन्नादि· व्याख्यानादिति·अपत्यग्रहणङ्कृतेम्यमितिवार्त्तिकमूलाद्व्याख्यानादित्यर्थः
नन्वापत्यग्रहणमितिवार्त्तिकस्यापत्येभवइत्येवार्थःकर्त्तव्यःसचार्थोद्वेष्येपिसम्भवति।याद्वीपेभवासाकस्यचिदपत्यम्भवत्येवं

तिचेन्न। एतद्वार्तिकप्रत्याख्यानैकवाक्यतयाप्रतिपदोक्तपरिभाषयाऽपत्यशब्दस्यापत्याधिकारपरतयाऽपत्यशब्दस्यतदधिकार
भवपरत्वात्। तथाहि। तर्हिवक्तव्यम्। नवक्तव्यम्। नैवंविज्ञायतेकञ्ञ्कञ्ञक्करपः यञश्चेति। कथन्तर्हिकञ्ञक्करपोऽपञश्चेति
। अयमयञ्प्रत्ययोगर्गादिभ्योविधीयतेतत्राकारोऽनुनासिकइत्संज्ञाकइहविशेषणार्थइतियञोग्रहणाभावाद्वैप्येनातिप्रसङ्गः
। यस्कादिभ्योगोत्रेयञञोश्चेत्यत्राप्यकारप्रश्लेषः। नचविच्छिद्यपाठेऽनुकरणेप्रकृतसूत्रघटकेऽकारश्रवणापत्तिरितिवाच्यम्। आ
र्षः संहितापाठएव। व्याख्यानकल्पितःपृथक्पाठः। अनुकरणादुपस्थितेत्वित्संज्ञयाऽकारनिवृत्तिः। एतेन। यञञोयोऽकारइतिव्या
ख्यानेन। उदीचाम्मतेसावकाशमिति। एतेनशार्ङ्गरवादौवनरडपाठवैयर्थ्यशङ्कापरिहृतानानुयञोयोऽकारइत्येवंव्याख्यानाभावे
पिवनरडिस्यत्रष्फप्रत्ययसञ्ञीनापरत्वाद्बाधएवस्यात्। ङीनश्चारितार्थ्यस्याधुनैवदर्शितत्वात्तुआह सर्वत्रग्रहणादिति। सर्व
त्रग्रहणापकर्षणादित्यर्थः। एतदपकर्षबीजन्तुतत्सूत्रव्याख्यानावसरेस्फुटीभविष्यति। अत्रेदमवधेयम्। प्रकृतसूत्रेतद्धितग्रहण
स्यफलन्नप्रातिपदिकसञ्ज्ञाद्वाराङीसिद्धिः। षित्वादेवसिद्धेः। नापियस्येतिचेतिलोपः। सवर्णदीर्घेणसिद्धेः। किन्त्वनुपतोऽप्ययमितिज्ञा
पनद्वारायस्येतिचेतिलोपार्थन्तेनासुरिशब्दादपीति। वस्तुतस्त्वेतदपिनष्फडितिन्यासेनसिद्धेः। यत्तुगोकक्षशब्दाद्गर्गादित्वाद्यञिततः
क्रौड्यादित्वेनष्फङि चापिप्रकृतसूत्रेणष्फप्रत्ययेचिकीर्षितेभस्याढइतिपुंवद्भावेगौकक्ष्यशब्दाद्यञन्तात्ष्फेगौकक्ष्यायणीसिध्यति।
नह्यत्रसञ्ज्ञाभवितुंपुंवद्भावप्राप्त्यायञन्तत्वाभावेनष्फोनस्यादितितदपिन। क्रौड्यादिषुगौकक्ष्याशब्दस्यपाठा[illegible]वेपिक्षत्यभावात्
चाष्नुषाद्यनश्चापूर्ववक्तव्यइत्येवसिद्धेः उदीचाम्मतेप्राचाम्मतेतुचापोबाधकस्यापिविषयेसर्वत्रग्रहणापकर्षात्ष्फः। तेनगौकक्ष्या
यणीत्यस्यसिद्धिरिति। नन्वपदेशग्रहणमनुवृत्त्याषोडशशब्देनातिप्रसङ्गइत्यतआह। षषउत्वमित्यत्रेति। इदम्प्राचामनुरोधेन। स्वसि

द्यानरित्याह· वस्तुतइति· ननुप्रत्ययान्यस्यषकारस्येत्सन्त्राहलन्यमितिसूत्रेणैवेष्टैवेतिकिमत्रादिग्रहणानुवृत्त्या। नचेष्टेणोऽवयव।
समध्यस्थस्यापिस्यादितिवाच्यम्‌ तस्यनस्वाभाविकत्वम्‌।नससकारमध्यगत्वमेवकल्प्यते।तस्यसकारस्यादेशप्रत्यययोरितिसूत्रे
णषकारइतिस्वीक्रियते।षत्वसत्त्वपः प्रत्ययस्येतिसूत्रदृष्ट्या सिद्धत्वान्नेत्वप्राप्तिरित्याशयादाह· आदिरितीति· उपरञ्जकत्वेपै
ति· यद्यपिमध्यान्तस्थषकारयोरुक्तरीत्यानेनसूत्रेणानस्त्वेप्तिपरिशेषादादेरेवभविष्यति।तथापिपरिशेषात्‌ दृष्टार्थकल्पनापे
क्षयाआदिग्रहणसम्बन्धस्वरूपानुवादकस्यस्वीकारेणैवेष्टसिद्धिरित्याशयः।अविषीमहिषीत्यादौतुटित्वादेवसिद्धम्‌।टिषच्‌
प्रत्ययस्यचित्त्वेनाविषमहिषमहिषशब्दयोरन्तोदात्तत्वादानतिवृत्तिस्वरेणान्तोदात्तत्वमपिभविष्यति।ननुप्रत्ययग्रहणेकृतेपिस्व
जादावतिप्रसङ्गंवारयतिस्वचाघनादाविति· योतितिपात्यर्थइति· एतत्सक्षस्यैवसिद्धान्तित्वात्‌।घचश्चित्वसामर्थ्यादिति· अत्रास्य
न्‌।घच्क्षौचेतिसूत्रविहितोघचक्वचिदिति· दोत्रात्वमोध्यतिलुनीतइत्यादौ।तदाश्रयणेद्योतकसमुच्चयाश्रयणे।प्रकृतसूत्रेनित्य
त्वार्थकंसर्वत्रग्रहणान्नकार्यमित्याह· प्राचामित्यस्येति· सर्वत्रग्रहणापकर्षेसतियत्फलितन्तदाह· तद्बाधकत्वमेवेति· ङीपबाध
कत्वमेव।इदम्परिशेषसिद्धार्थकथनम्‌।एतेनचापउभयवाधकत्वंस्यादनन्तस्येतिन्यायाश्रयणेतुष्फस्यैववाधकत्वन्स्यादितिश
ङ्कानवकाशः।ननुचापिकृतेप्येकादेशस्यपूर्वान्तत्वेनष्फप्राप्त्यासर्वत्रग्रहणाभ्यर्थमेवेत्यतआह· चापिकृतेत्विति· एतत्सूत्रेसर्व।
त्रशब्दोपादानन्तुवैचित्र्याय।ष्फाणाविति· तथाचशाकल्यायनी।शाकल्यस्यछात्राः शाकलाइत्येवन्नस्यान्‌।षष्ठीतत्पुरुषइति·
कतस्यान्तः कतन्तः।कएवस्यादिः।कएवादिरिति· अन्तशब्दःपरसमीपस्यादिशब्दश्चपूर्वसमीपस्यवाचकः।वहुव्रीहिश्चतद्गुण
संविज्ञानः।एकशेषेणास्वरभिन्नानामितिवचनेनवहुव्रीहेः शेषेराजातित्वादिति· एतेनकोरव्यसाहचर्यान्माण्डूकशब्दोऽपत्य

१९१

प्रत्ययान्त एवैतत्सूत्रे गृह्यते। तेन मण्डूकस्येयं भार्येत्यर्थे तस्येदमित्यणन्तस्मात् एड्कशब्दस्य सत्त्वेपि न ग्रहणं तेन यद्यपि सौकूपमा
एड्कितवैतावतिकःस्य इति सिद्धमिति ध्वनितम्। नायं तद्वाचक इति। वयोरूपप्रवृत्तिनिमित्तवाचकः। तत्र हेतुमाह। पापि।
ण्याध्यादीति। त्रीणि वयांसीति। तदुक्तमभियुक्तैः। पिता रक्षति कौमारे भर्ता रक्षति यौवने। पुत्रस्तु स्थविरे भावे न स्त्री स्वातन्त्र्यम
र्हतीति। चत्वारि वेति। तदप्युक्तम्। आद्ये वयसि नाधीतं द्वितीये नार्जितं धनम्। यत्र तु युवत्यां कुमारी धर्मोपलम्भेन प्रयोगस्तत्र
तु कुमारीशब्दस्य लक्षणा। तत्र पुंसा सम्प्रयोगो हि प्रवृत्तिनिमित्तं न तु प्रथमं वयः। अत एव वृद्धकुमारीति नमुनं इति सूत्रभाष्ये प्र
योगस्तत्रापि सिध्यति। सर्वं तद् इति। आरोहतः परिणाहश्च येन मीयते काष्ठादिनिर्मितेन प्रस्थादिना तदेव गृह्यते। तत्रैव शक्तिग्रहात्
नन्वेवं विस्तकम्बलयोरपरिमाणत्वादेव निषेधे सिद्धे सूत्रे पृथक्कृतयोरुपादानं व्यर्थमत आह। सुवर्णेत्यादि। उन्मानस्य चेदिति। अ
स्य निष्कोन्मानत्वेपि नात्र निषेधः उन्मानभिन्नस्य तु पारिभाषिकपरिमाणमि
परिमाणपदेन ग्रहणमिति शेषः। द्विनिष्कीति। अस्य निष्कोन्मानत्वेपि नात्र निषेधः। उन्मानभिन्नस्य तु पारिभाषिकपरिमाणमि
ति प्रतिषेधो भवत्येतदाह। द्वेवर्षे भूते त्यादि। नन्वेवं अङ्गुलस्याप्यपरिमाणत्वादनेनैव निषेधे सिद्धे काण्डवदादिति निषेधसूत्रमनर्थ
कमत आह। काण्डान्तादिति त्विति। अत्र भाष्ये द्वौ प्रतिषेधावुच्येते तत्र कः शक्योऽवक्तुम्। परिमाणान्ते तद्धितलुकि इदं नियमार्थम्भ
विष्यति परिमाणान्तादेव तद्धितलुकि न च समाहारे व्यावृत्त्यर्थम्परिमाणान्तात्तद्धितलुक्येवेति नियमः कुतो नेति वाच्यम्। लक्षणस्य
लक्ष्यानुसारित्वात्। तेन समाहारे द्व्याढकीति भवतीति कैयटः। ततो विस्ताचितकम्बल्येभ्यो नेति। तद्धितलुकीति प्रवर्तते। पूर्वनियमेन
सिद्धे इदमपि नियमार्थम्। उन्मानवाचका चेन्न तद्धितेभ्य एवेति एवम्प्रकारेणाकस्य नञोऽनुपादानेन यद्यपि सिध्यति तथापि योग
विभाग नियमयोर्विपरीतनियमशङ्कायाश्च वारणाय सल्लेशेन कल्पनया वा रणाप्रयासाधिक्यमिति मूले तथा नोक्तम्। केचित्त्वपरिमा

णविंस्ताचितकम्बल्येभ्योनतद्धितइत्येवसूत्रमस्तुलुग्ग्रहणन्त्वमास्तुद्विगोरित्यनुवर्त्तते।तद्धितपदस्यतद्धितार्थपरतयातद्धितार्थे
योऽपरिमाणान्तोद्विगुस्तस्मान्नङीवित्यर्थोस्तु।तेनसमाहारेपञ्चाश्वीत्यादौद्विगोर्निषेधोनभविष्यतीत्याहुः।तन्न·अपरिमाणाद्य
न्ताद्विगोर्यस्तद्धितस्तदन्तान्ङीप्रस्यादित्यर्थोपिसम्भाव्येततत्रश्वाध्यर्द्धकार्षापणिकीअध्यर्द्धसाहस्त्रीवडवेत्यत्रापिनिषेधःप्रस
ज्येत।अत्रहिविभाषाकार्षापणेतिविकल्पेनलुग्विधानम्।यत्रतुतद्धितस्यलुक्तत्रापिप्रत्ययलक्षणेनभविष्यतीतिलुग्ग्रहणस्या
वश्यकत्वात्।पूर्वकालस्थितरूपरसादिपरावृत्तिलक्षणस्यपाकस्यद्वौविशेषौपचतीत्यत्रासम्भव·सुवर्णेतादृशपाकासम्भवादाह
यच्चेरवीभावेति·अन्यमतमाह·आचितइति·स्वमतमाह·आचितोदशेति·अतएव·प्रमाणशब्दस्यपरिच्छेदकमात्रपरत्वादेव।त
त्रहीति·पुरुषात्प्रमाणसूत्रेहीत्यर्थः।उत्तरसूत्रेति·सङ्ख्यायाःसञ्ज्ञासङ्घेतिसूत्रेत्यर्थः।अतएवषाष्टिजीवितम्प्रमाणमस्ये
त्यैषाष्टिकइतिसिद्धम्।ऊधसइतिसूत्रस्यसमासान्तप्रकरणस्थत्वेप्यनङोनप्रत्ययत्वम्।ङकारोच्चारणसामर्थ्यात्।किन्त्वादेशो
यम्।स्थानिद्वारणाचायंसमासान्तः।अतएवकप्न·तत्र·अनङि·धो।स्त्रियामित्युपेति·ऊधसोनकारोलिङ्गा।धिकारइतिहितत्रा
त्यंवार्त्तिकम्।ननुबहुव्रीहेरूधसइतिसूत्रम्मध्येयवादन्यायेन·ङान्निषेधयोरेववाधकंस्यान्नतुअनउपधालोपिनसूत्रविहितस्यङी
पस्तस्यपरत्वादतआह·अनउपधेति·इत्यत्रेति·वाक्यभेदेनतत्रङीषविधानमित्यपितेयम्।एतेन·तत्रानुवर्त्तनेन।ङीष्विधानंस्वर
सिध्यर्थन्तेनान्तोदात्तत्वंसिध्यतितदाह·ङीपित्विति·यथाश्रुतमूलानुरोधेनकोशवाक्यस्यान्यथानयनमत्रनोचितमित्याशयेनाह·
वालेत्यस्येति·लक्षणान्तरसिद्धमिति·केवलमामकेतिलक्षणेनसिद्धमित्यर्थः·सत्वात्स्त्रीत्वमिति·स्वार्थिकाःप्रत्ययाःक्वचित्प्रकृतितो
लिङ्गवचनान्यतिवर्त्तन्तेइतिन्यायात्·घृतादिपाठसाधकमाह·उनापरमित्यादि·प्राक्सुबुत्पत्तेरिति·स्त्रीप्रत्ययोत्पत्तेःप्रागित्यपि

वोध्यम् नत्र·औषधे।रूढइतिशेषः ननुसुमङ्गलीरियमित्यनुपपन्नमनेनसूत्रेणङीपिहल्ङ्यादिलोपस्यदुर्वारत्वादतआह·सु
मङ्गलीरियमिति·ईप्रत्ययेति·छन्दसीवनिपौचवक्तव्यावितिवार्त्तिकेनविहितेईप्रत्ययइत्यर्थः नन्वप्राप्तस्यमतुपोनिपातने
शालायांवाव्याप्यामपिनादशप्रयोगापत्तिरतआह·नुगिति·ननुयज्ञसंयोगइत्येतावन्मात्रेणापुंसोयज्ञसंयोगइत्यपिप्रतीयेत
त्यत·आह·स्त्रियाइत्यर्थइति·पतिशब्दोयद्यपिपुंल्लिङ्गस्तथापिस्ववाच्यकर्तृकयज्ञफलनिरूपितविलक्षणसम्बन्धः स्त्रियांप
दाविवक्षितस्तदापुंवाचकोपितकारान्तरेकारस्थानिकनकारघटितोऽयमेवस्वपूर्वत्वसम्बन्धेनङीपविशिष्टः स्वभावात्तत्स्त्री।
याम्वर्त्ततइतिभावः।अत्रयज्ञसंयोगइत्यनुपपन्नम्।यज्ञस्यक्रियारूपतयातत्प्रतियोगिकसंयोगाप्रसिद्धेरतआह·संयोगपद
मिति·यज्ञेतियद्यत्कर्मणिदम्पत्योःसहाधिकारस्तस्यसर्वस्योपलक्षणम्· अवयववाचीति·ननुदिक्कालान्यतरावच्छिन्नवाची
।तथात्वेस्वघटितप्रातिपदिकानवयवगतपूर्वत्वमादायवाक्येऽतिप्रसङ्गःस्यात्एवंसतिविद्यमानःपूर्वावयवोयस्मिन्प्रातिप
दिकेतस्यप्रातिपदिकस्यावयवोयःपतिशब्दस्तस्यनकारादेशइत्यर्थः।व्यपदेशिवद्भावेनसम्भवम्मत्वाह·अव्यभिचारादि
ति·एवञ्चाधिकारप्राप्तस्यप्रातिपदिकस्यपत्युरितिविशेषणमितितदन्तविधिःननुश्रुतानुमितयोरितिन्यायेनतस्यपतिश
ब्दविशेषणत्वमेवोचितमित्यतआह·सपूर्वस्यस्येनेति·एतच्चप्राचामनुरोधेन।वस्तुतइहार्थोप्यनुपसर्जनाधिकारस्तदाह
बहवइति·ननुविभाषासपूर्वस्येतिसूत्रस्यापियज्ञसंयोगएवप्रवृत्त्यावृषलपत्नीतिसमस्तेपिशङ्कासत्वाद्धस्तएवकिमितिनिश
ङ्केत्यतआह·विभाषासपूर्वस्येत्यत्रेति·व्यस्तेकथमितिशङ्कायावीजमाह·वृषलत्वेनेति· उपचारोलक्षणासाचस्त्रीप्रत्यया
त्तस्यशक्तिसम्बन्धेनप्रवृत्तिर्ब्रीह्यएयम।अन्यत्रलक्षणायाप्रवृत्तेनकिञ्चिद्बाधकम् लक्षणायानिमित्तमाह·पाणिग्रहणे

भै॰
१९३

निगृह्यतेयस्मिन्तद्ग्रहणम्।पाणेर्ग्रहणम्पाणिग्रहणमितिव्युत्पत्त्यापाणिग्रहणशब्दोविवाहपरः स्वीयविवाहवाचकपद
प्रतिपाद्यविवाहसम्बन्धित्वमत्रशक्यसम्बन्धइत्युक्तम्‌॰ दृढमानाभावादिति॰ प्रातिपदिकसामान्यादन्येभ्योपीत्यनेनधातुसा
मान्याच्चक्विपोविधानेपिभाष्येकथन्तुषजकस्यपत्नीतिपूर्वपक्षःकृत्वापत्नीवपत्नीतिसमाधानस्यैवोक्तत्वादितिभावः।नन्वे
वम्पत्युर्नेतिसूत्रेयज्ञसंयोगइतिव्यर्थमतआह॰ पूर्वसूत्रइति॰ वृषलस्यपतिरिति॰ अत्रपतिशब्दः स्वामिनीपरः।तेनचेति॰ नि
पातनेनचेत्यर्थः।अतएव॰ स्त्रीविशेषरूढिस्वीकारादेव।ननुसमानःपतिर्यस्याइत्यर्थोऽत्रानुपपन्नः।समानत्वस्यभेदघटितत
यास्वस्मिन्स्वभेदासम्भवादाह॰ समानत्वञ्चैकस्यैवेति॰ भेदमारोप्येति॰ पत्नीगतस्यपरस्परप्रतियोगिकभेदस्यतत्सम्बन्धात्तत्रा
रोपः।व्याख्यानादिति॰ पूतक्रत्वादीनाम्पुंयोगप्रकरणोवचनमितिवार्तिकमूलकात्।अस्मिन्वार्तिकेवहुवचनोपादानेनकपिञ्ज
लाधिकरणन्यायेनत्रित्वस्यपुरस्फूर्तिकतयातत्रैवपर्यवसानमितिभावः।तदभावइति॰ तयोरभावइत्यर्थः सौत्रइति॰ सचात्र
तकारएवनतुदकारइतिस्पष्टम्प्रतीयतइतिशेषः।तदन्विति॰ वृत्तिकारादिव्याख्यानानुरोधेनेत्यर्थः।मूलादिदूषयन्स्वसिद्धान्त
माह॰ परेत्विति॰ अत्रापि॰ वर्णादनुदात्तादितिसूत्रेपि।तथैवोचितमिति॰ गृह्यमाणविशेषणत्वमेवोचितमित्यर्थः।तत्रसाधकमाह॰
तत्रहीति॰ इतिपक्षइति॰ अस्मिन्पक्षेशस्त्रीश्यामाइवायमिति।लौकिकविग्रहः।अस्मिन्पक्षेदूषणमुक्तम्।शस्त्रीश्यामोदेवदत्तइत्य
त्रह्रस्वत्वन्नसिध्यति।शस्त्रीश्यामइतिचेद्विग्रहस्तदास्वतोह्रस्वान्तस्यैवश्यामशब्दस्यप्रयोगइतितादृशप्रयोगनिर्वाहः सम्प्रतितु
शस्त्रीश्यामादेवदत्तइतिस्यादितिभावः।उपसर्जनह्रस्वत्वमिति॰ समासवाच्यमुपमेयम्प्रधानं।श्यामाशब्दार्थस्याप्रधानत्वादुपस
र्जनत्वमितितद्भावः।ईकारोनप्राप्नोतीति॰ अत्रापिकुम्भकपालंलोहितमिवेतिविग्रहः कार्यस्तथासत्युपसर्जनत्वाद्वर्णादनुदात्तादि

१९३

त्तिईकारो न प्राप्नोतीत्यर्थः। त्रिषु स्थानेष्विति· सुप्सुपेति समासः। आर्षमत्र णत्वमिति· समानपदत्वाभावादट्कुप्वाङिति सञ्ज्ञात्वाभा
वात्पूर्वपदादित्यस्याप्राप्तिरिति भावः श्वेतशब्दस्य घृतादिपाठे मानमाह· श्वेतो वाजीति· ञ्नादेशस्यानेकाल्त्वात्सर्वादेशत्वशत्वशङ्कायां
माह· नादेशापवाद इति· ङीप्सन्नियोगेति· ङीप्विधायकसूत्र एव भाष्ये पाठात्। तत्प्रवृत्तिनिमित्तकः। विशुद्धिप्रवृत्तिनिमित्तकः। नन्वे
वमवदातः सितो गौर इति कोशानुपपत्तिः। विशुद्धत्वसाधर्म्यात्तत्राप्यवदातशब्दप्रवृत्तिसम्भवात्। वर्णादनुदात्तादिति सूत्रानन्तर
मन्यतइत्यस्य पाठाद्विशेष्यभूतार्थवाचकस्य वर्णादित्यस्योपस्थितस्यान्यत्वे प्रतियोगितयाऽन्वयेनेति त्रिकल्माषीति भाष्यप्रयोगा
नुपपत्तिरत आह· अन्यत्वइति· व्याख्यानादिति· उक्तप्रयोगदर्शनमूलकादित्यर्थः। आद्युदात्त इति· क्तान्तत्वस्य यान्तत्वात्। अन्तोदात्त इ
ति· प्रातिपदिकस्वरेणान्तोदात्त इत्यर्थः। सचेत्सूर्याद्यवयव इति व्याख्यानफलमाह· सूर्यादीनामिति· सोऽसिद्ध इति· एवञ्च सूर्यश
ब्दस्याङ्गत्वमिति भावः। उपधाग्रहणादेवेति· अन्यथा सूर्यादीनाङीनिरूपिताङ्गानामित्यर्थे सूर्यं धरीत्यत्रैव सौरी वलाकेत्यत्रा सिद्धिः
स्यादिति भावः। ननूपधापदसत्वे सूर्यादीनामुपधाभूतो यकार एव सम्भवतीति यग्रहणाम्व्यर्थमत आह· यग्रहणान्त्न्तरार्थमिति·
हलस्तद्धितस्येति सूत्रार्थमित्यर्थः। तेनः नक्षत्रवाचकादिति व्याख्यानेन। नक्षत्रशब्दोच्चारणेन विहित इत्यर्थे तु सन्धिवेलेति सूत्रवि
हितस्यैव ग्रहणं स्यात्तथा चोक्तप्रयोगानुपपत्तिरिति भावः। इदमिति· पितृव्यमातुलेति सूत्रविहितं वार्तिकमित्यर्थः। क्रियाशब्दोय
मिति· क्रियाप्रवृत्तिनिमित्तक इत्यर्थः। कुडिदाहे इत्यस्येदित्त्वेन नुमि गुरुमत्त्वम्। अन्तर्भावितण्यर्थात्कर्तर्यकारप्रत्ययः। एतेन जा
तिवाचकत्वाभावो ध्वनितः। कुण्डशब्दस्य रूढत्वेप्याह· स्यादित्विति· अनेकविधसंस्थानेष्विति· एवञ्चानुगतसंस्थानव्यङ्ग्यत्वाभा
वान्न जातित्वमित्युक्तम्भवति· मतान्तरमाह· कमण्डलुसंस्थानेति· नियमार्थमेवेति। कुण्डशब्दाच्चेदमत्र एवेति नियमार्थम्· स

त्रन्त्वित्यस्यामत्रग्रहणन्त्वित्यर्थः। विधित्वानुरोधादिति· नतुजातिवाचकम्यनागशब्दस्यात्रसूत्रउपादानन्नियमार्थम्। विधिनियम
सम्भवेविधिरेवन्यायानितिन्यात· असङ्गतंस्यादिति· अस्यस्त्रीत्वमित्यादेः। इदमिति· प्रत्युदाहरणाभूतस्यनीलेस्यस्यकथनोतरन्नी।
त्यारक्तेस्यर्थकथनमित्यर्थः एवमभिधानेनोदाहरणेनीलीत्यत्रापिवार्तिकनिष्पन्नस्यप्रकृतित्वमितिमतीयतेतत्रयुक्तमित्याप्रायेना
हः प्रतिपदोक्तत्वादिति· नीलवर्णवती शाटीत्यर्थइति· एवङ्कथनेनगुणिनोरभेदोपचारोदर्शितः। ननुनीलारक्तागौर्नीलीतिव्यत्तिका
रमतेजायमानस्यभवन्मतेऽसिद्धिरित्यतआहः नीलारक्तेति· मैथुनादन्यदिति· भूषणादिकमित्यर्थः। वोतइतिसूत्रेगुणशब्दोनकृ
त्रिमाकृत्रिमन्यायेनादेङ्बोधकः। उतइत्यस्यविशेषणस्योपादानात्। नापिसंसर्गिभेदकंपद्यत्स्वव्यापारम्प्रतीयतेगुणत्वम्परत
न्त्रत्वात्तस्यशण्डस्ये उदाहृतलक्षितङ्गुणशब्दबोध्यम· विशेषणमात्रम्प्रथमलक्षणेनसंसर्गिभेदकमित्यनेनोच्यते। सव्यापारमिति।
द्वितीयंलक्षणन्तस्येतरव्यापाराधीनव्यापारकमित्यर्थः। आखुर्द्रव्यमित्यत्राखुशब्दस्यद्रव्यात्मकसंसर्गिभेदकतयातिप्रसङ्गात्।
क्रियायामतिप्रसङ्गाच्च। नापिनैयायिकपरिभाषाविषयः। मृद्वीयद्वीत्याद्यसिद्धापत्तेरतआह। अत्रगुणवचनेनेति· इत्थंहितत्रभाष्यम्
अर्थवत्प्रातिपदिकम्· गुणवचनञ्च· समासकृत्तद्धिताव्ययसर्वनामासर्वलिङ्गाजातिरिति। गुणवचनञ्चेत्यत्रार्थवदित्यनुवर्त्तते। एव
ञ्चप्रातिपदिकसञ्ज्ञागुणवचनसञ्ज्ञायोरेकविषयत्वात्समावेशार्थञ्चकारस्यकरणाञ्चोभयोः समावेशः। कृत्तद्धितपदञ्चतदन्तपर
म्। उभयत्रप्रातिपदिकमित्यनुवर्त्तते। एवञ्चप्रातिपदिकसञ्ज्ञापूर्वकाकृदन्तसञ्ज्ञातद्धितान्तसञ्ज्ञेतिएताभ्याम्प्रातिपदिकसञ्ज्ञायाः
समावेशः प्रातिपदिकसञ्ज्ञार[illegible]मानाधिकरण्योपपन्नपेकृत्तद्धितपदन्तदन्तपरत्वेनस्वीकृतम्· गुणवचनसञ्ज्ञात्वेताभ्यांबाध्येते
तेनकर्त्रीत्वन्द्वारावतीत्वमित्यत्रचतलोर्गुणवचनस्येतिनपुम्वत्वम्। नचगुणिपरस्यशुक्लादीनाङ्गुणवचनसञ्ज्ञातद्धितान्तत्वान्न

प्राप्नोति मतुपोऽत्र लोपादिति वाच्यम्· श्रूयमाणतद्धितानां स्यसञ्ज्ञाविधानात्· अथवा गुणगुणिनोरभेदोपचारादेव गुणिनि शुक्ल
दिशब्दानाम्प्रवृत्तिसम्भवेन मतुप एवानुत्पत्तेः। रूपादिशब्दानान्तु न गुणवचनसञ्ज्ञा। जातिसञ्ज्ञया बाधात्· तेन तेभ्यः ष्यञ्न्·
जातिसञ्ज्ञात्वसर्वलिङ्गत्वात्प्रवर्त्तते। एवमव्ययादिसञ्ज्ञाभिरपि प्रातिपदिकग्रहणानुवृत्त्या समावेशः। न च प्रातिपदिकमात्र
स्य गुणवचनसञ्ज्ञापदि तदा गुणवचनब्राह्मणादिभ्य इति सूत्रे ब्राह्मणादिग्रहणम्व्यर्थमिति वाच्यम् प्राणभृज्जातिलक्षणाण।
बाधनार्थत्वात्· जातिसञ्ज्ञया बाधाच्च। ऐक्यं राजपौरुष्यमित्यादौ ष्यञ् तु ब्राह्मणादित्वात्· एवं सङ्ख्या[illegible]सञ्ज्ञा एताः सञ्ज्ञा
अपि बाधिकाः। एकद्रव्योपनिवेशिनी सञ्ज्ञा रूपादिशब्दानां गुणवचनसञ्ज्ञाम्प्रकारान्तरेणावारयति· गुणवचनेत्यन्वर्थेति·
बहुविशेषणानां वैयर्थ्यादिति· सत्त्वन्द्रव्यन्तमाश्रयते तत एव पाकादिना पूर्वगुणस्य निवृत्तिरपि भवति। विभिन्नजातीयेषु घट
पटादिषु दृश्यते· एतेन जातिनिरासः। द्रव्यन्त्वविभिन्नजातीयेषु जलपृथिव्यादिषु पद्यपि दृश्यते तथापि कदापि नापैति· असत्त्वप्रकृ
तिरिति· अद्रव्यस्वभावः। तेन भिन्नजातीयतत्त्वारब्धस्यासमवायिकारणनाशजन्यनाशप्रतियोगिनः प[illegible]स्य निरासः। क्रियावारण
याह· आधेय इति· आधीयते उत्पाद्यते इत्यर्थः। एतेनानित्यत्वस्य लाभः। क्रियाज इत्यनेन नित्यत्वस्य च लाभे नित्यानित्यवृत्तिजातिमा
नि निष्फलितम्· न चैवमपि तादृशसत्त्वाजातिमत्त्वस्य क्रियायां सत्त्वादतिव्याप्तिरेवेति वाच्यम्· द्रव्यावृत्तित्वस्यापि जातिविशेषण
त्वात्· एतेनैव सर्वगुणासङ्ग्रहे सत्त्वे निविशत इत्यादि व्यर्थमिति भावः। न चात्र कृदन्तसञ्ज्ञया गुणवचनसञ्ज्ञाया बाधादेव नाति
प्रसङ्ग इति वाच्यम्· उणाद्यन्तानामव्युत्पन्नस्यैव सिद्धान्तितत्वात्। नन्वत इत्यस्य सम्बन्धादेव शुचिरित्यत्र नातिप्रसङ्ग इति वा
च्यम्· तस्यात्रासम्बन्धात्तदाह· खरुसंयोगोपधान्नेति· अभिमान इति· अत्रारुचिस्तूणादीनां व्युत्पन्नत्वेन वक्ष्यमाणस्य वृत्तिकृ

कारसम्मतस्यव्यवस्थितविभाषात्वस्यसत्वेनचतेनैवदोषनिरासे उक्तइतिकार्यम्।वार्त्तिकमप्यप्राप्तानुवादएवास्त्विति॰
प्रत्युदाहरणमुचितमिति॰ नचात्रापिसंयोगोपधत्वात्संयोगोपधान्नेति निषेधोभविष्यतीतिकथमेतत्प्रत्युदाहरणमिति॰
वाच्यम्॰ खरुशब्दसाहचर्येणसंयोगोपधस्याप्युकारान्तस्यैवग्रहणमित्याशयात्. नचातइत्यस्यसम्बन्धेनखरुसंयोगोपधा
न्नेतिनकार्यमितिवाच्यम्॰ पद्धीत्यादीनामसिद्ध्यापत्तेः विकल्पवाचीति॰ विकल्पावाग्पसास्तस्यामित्यर्थः।उक्तरीत्यागुणवचन
त्वाभावेनेति॰ सङ्ख्यासञ्ज्ञागुणवचनसञ्ज्ञायावाधेन।सर्वतइत्यस्यार्थमाह॰ अकृतोपि॰ अपिनाकृतः।शोणात्प्राचामिति
सूत्रात्प्राचामित्यनुवृत्तस्यैवसिद्धेर्वोतइतिसूत्रेवाशब्दोपादानंव्यवस्थितविभाषात्वसूचनायतदाह व्यवस्थितेति॰ वृत्तिरिति॰
देवत्रातइत्यादिनातस्याः परिगणनाद्देवत्रादिष्वस्यापाठादितिव्यवस्थितविभाषात्वमयुक्तमित्यरुचिः।तदुक्तप्रयोगसिद्धिस्तु
लिङ्गस्यलोकाश्रयत्वात्तत्रार्थस्यशास्त्रीयलिङ्गाभावकल्पनेन॰ चाग्रहणानुसर्वमतेविकल्पार्थम्॰ङीपू[illegible]बोरिति॰ अयंहिप्युल
न्तः पुराणप्रोक्तेतिनिपातनाद्युडभावः।एवञ्चटित्वान्ङीपप्राप्तः।सामर्थ्यादिति॰ केवलस्यस्त्रियाम्वृत्त्यसम्भवात्तस्मादुपसर्जनए
वप्रवृत्तिः पुंयोगादितिसूत्रेपरपञ्चमीनसम्भवतीत्यतआह॰ हेतौपञ्चमीति॰ एवंसतिकस्मादनेनप्रत्ययवि[illegible]नमित्याकाङ्क्षा
पूरणायाह॰ आख्यायामितीति॰ आख्याशब्दस्यससम्बन्धिकत्वादाह॰ उपस्थितत्वादिति॰ एवञ्चपादशोवाक्या[illegible]ः सम्पन्नस्त।
माह॰ पुंयोयाद्धेतोरिति॰ सर्ववाक्यमसतिवाधकेसावधारणमितिन्यायेनैवकारलाभः।विनापिप्रत्ययमितिवचनेनसंशब्दलो
पेसतियोगशब्दस्यसंयोगपरत्वभ्रमनिरासायाह॰ योगः सम्बन्धइति॰ देवदत्तेति॰ क्तिचक्तौचेतिसूत्रनिष्पन्नोयंस्वभावतः स्त्रि
यांवर्त्ततेनतुपुंयोगस्तत्रनिमित्तमितिभावः आख्यायांकिमिति॰ एतदभावेपिप्रातिपदिकादित्यधिकृतंसम्बध्यतएव॰ एवंसति

निष्पन्नं वाक्यार्थमाह· तदभावेहीति· प्राचाम्मतङ्कटाक्षयति· पुंयोगोत्रिति· एतेनजन्यजनकभावनिरासः।तथासतिदेवकी
त्यादिप्रयोगाणाङ्गतिरत आह· देवकीत्यादित्विति· आदिना केकेपीश्वशूद्रीत्यादिप्रयोगाणां संग्रहः· गोपालिके त्यत्र गवांपा
लिकेतिनविग्रहस्तदाह· गाः पालयतीति· इदम्प्राचाम्मतमनुरुध्य वस्तुतस्तादृशविग्रहेपिनक्षतिरि[illegible]याह· व[illegible]स्तुतइति· ननु
गतिकारकोपपदानामित्यत्रकारकपदोपादानेनकारकसञ्ज्ञासमानाधिकरणसञ्ज्ञानिमित्तकविभक्त्यन्त[illegible]समासइत्येवलभ्य
तइतिषष्ठ्यन्तस्यसमासः सुबुत्पत्तेः प्रागितिकथंलभ्यतइत्यत आह· यथाकथञ्चिदिति· कथञ्चित्कार[illegible]त्वमिति· शेषत्वेना
पिवस्तुतः कर्मणएवग्रहणमितिभावः· अत्रत्यभाष्यादिति· एवंहिभाष्ये उक्तम्· गोपालिकादीनाम्प्रति[illegible]धः।गोपालिकादीना
म्प्रतिषेधोवक्तव्यः।गोपालिका।पशुपालिकाइति· अत्रगोपालिकादीनाम्प्रतिषेधइतिप्रतियोगित्वात्[illegible]त्वादाह कैयटः सिद्ध
यइतिवाक्यशेषइति· एतेनतृजकाभ्याङ्क[illegible]र्तरीत्यस्यप्रवृत्त्याकर्मषष्ठ्यासमासासम्भवाच्छेषषष्ठ्यैव[illegible]समा[illegible]वाच्यः।तत्रयदि
गतिकारकोपपदानामितिपरिभाषाप्रवृत्ति[illegible]र्नस्यात्तदाऽपः सुपः परत्वादित्वन्दुर्लभमितिभाष्योक्तस्येत्वघ[illegible]टितस्यप्रयोगस्यसि
द्धयेशेषषष्ठीविषयेपिगतिकारकेतिपरिभाषाप्रवृत्तिः।ननुप्रकृतसूत्रस्थभाष्यस्यगोपालशब्दसाधपि[illegible]त्वातनः स्वार्थेकेपिसि
द्धिरित्यत आह· उपपदेति· तत्रहिषष्ठीसमासस्यवैकल्पिकत्वात्तदभावेचोपपदसमासइतिषष्ठीसमासादुपपदसमासोविप्र
तिषेधेनेतिवार्तिककृतोक्तस्यविप्रतिषेध[illegible]स्यखण्डनायोक्तम्· अत्रविप्रतिषेधविचारेणषष्ठीसमासस्यापिसुबुत्पत्तेः पूर्वमे
वोत्पत्तिरितिलभ्यते।अन्यथोपपदसमासस्यसुबुत्पत्तेः प्राक्प्राप्ति[illegible]ष्ठीसमासस्यतुतदनन्तरमितिविप्रतिषेधविचारोऽसङ्ग
तएवस्यादतः षष्ठीसमासस्यापिसुबुत्पत्तेः प्राक्प्राप्तिरितिस्पष्टमेवलभ्यते· षष्ठीसमासमासस्यसुबुत्पत्तेः प्राक्प्रवृत्तिमना

भ्युपगम्यसमाधानान्तरमाह॰ यद्वेति॰ नन्निषेधस्य॰ त्वजाकाभ्याङ्कन्नीतिनिषेधस्य॰ अनित्यत्वान्॰ तत्प्रयोजकोहेतुश्चजनि
कर्त्तुः प्रकृत्तिरितिनिर्देशेनानित्यत्वात्॰ आद्युदात्तेति॰ [illegible]नुखैररा[illegible]नित्यर्थः।एतेन॰ अन्तोदात्तस्यसूर्यशब्दस्यसाधनेनाङी
न्निषेधेन॰ सूर्यान्नेतिन्यासेन।ननुसूरीकुन्तीत्यनेनेवस्त्रीत्वाभिव्यक्तिसम्भवादियमिति चव्यर्थमित्याशङ्कानिवारणायाह॰ सूर्यस्ये
ति॰ ननुपुंयोगस्यदाम्पत्यभावरूपस्यैवपूर्वम्यवस्थापितत्वात्तस्यविवाहितायाम्प्रसिद्धेः कथमियंसूर्यस्यस्त्री।विवाहात्प्राक्सूर्य
सम्बन्धेनकर्णस्योत्पत्तिरितिप्रसिद्धमितिचेन्न॰ सूर्यस्यस्त्रीसूर्या।देवतायांकिम्॰ सूर्या।एतद्भाष्यप्रामाण्येनदेवतावाचकस्यपु
म् शब्दस्यतद्देवकर्त्तृकस्वीकारकर्मत्वसम्बन्धप्रयोज्यायस्याम्प्रवृत्तिः सापितत्स्त्रीत्वेनगृह्यतेइतिस्वीकृतम्।एवमेवेन्द्राण्यास्या
दीनामुपपत्तिः।नचजन्यजनकाकभावस्याधारणः पुंयोगः कुतोगृह्यतइतिवाच्यम्।पुंयोगोपपादनाय[illegible]यथैवत्वसावकु
तीकिञ्चित्सापम्भर्तृकृतान्वयबन्धनले शाङ्गभंतेएवम्प्रष्टशब्दमपीतिभाष्यस्वारस्यात्॰ तद्योगइति[illegible]त्वादियोगइत्यर्थः।
अतएवैषामित्यस्योपपत्तिः।हिमारण्ययार्महत्वइत्यादीनिवार्त्तिकानि।एतेषुवार्त्तिकेषूपात्तोयोयउप[illegible]स्तद्योगएषाम्प्रवृत्तिः
पदात्तुनतत्तदुपाधिविवक्षातदास्त्रीत्वमेवनैतितद्योगएवैभ्योङीष्।अन्यत्रटाबितिभ्रमोनकार्यः।अत[illegible]पङ्क्तौनतद्योगएवैषा
मितिविभाषयमिति॰ एतेनमातुलोपाध्याययोरितिवचनस्यपुंयोगएवप्रवृत्तिरू[illegible]ङीषः सिद्धत्वादानु[illegible]त्रंविकल्प्यते।ननुब्र
ह्माणीतिवदिन्द्रिमानयतीतिव्युत्पत्त्याइन्द्राणीत्यस्यापिसिद्धिरितीन्द्रवरुणेतिसूत्रम्व्यर्थमतआह॰ सूत्रेत्विति[illegible]तेन॰ तादृशवहु
व्रीहिसमासाश्रयणेन॰ करणेतिकिमिति॰ क्रीतात्सपूर्वादित्येवास्त्विितिप्रश्नः।स्वक्रीतेति॰ एवंसतिकर्तृपूर्वादपित्स्यादितिभावः
केयटइत्यनेनसूचितामरुचिम्प्रकटयन्स्वसिद्धान्तमाह॰ अशुमिति॰ धनक्रीतेत्यादिशब्दः।अतनन्नुतस्याः परिभाषायाअनित्य

१९६

त्वाभावेगोशब्दादिष्वपिस्याधातोः के। कान्तस्यसुवुत्पत्तेः प्राक् समासेपदादित्वाभावात्सात्पदाद्योरितिनिषेधप्राप्तेरादेशप्रत्यययो
रित्यनेनैवषत्वेसिद्धेअम्बाम्बेतिसूत्रेगेवादियद्ग्रहणंव्यर्थमतआह· अम्बाम्बेतीति· उत्तरपदभूतस्यस्थसकारस्यषत्वंस्त्रैवेदंभ्यए
वेतितेनहृदिस्थाशोभतेमालेत्यत्रनेतिभावः। एतेनगवादिग्रहणमेवगतीत्यादेरनित्यत्वेमानमित्यपास्तम्· नियमार्थत्वेन
चारितार्थ्यात् पदादादिरितिपक्षेतत्वासम्भवाच्च· वस्तुतस्तुनपदान्तसूत्रस्थपदात्तत्पदस्यपदेऽन्त[illegible]इतिसमासप्रदर्शनी
परेयोऽन्तस्तस्यकार्येकर्त्तव्यएवनिषेधइतिगोचेस्यादिसिध्यर्थमनित्यत्वम्परिभाषा[illegible]ः स्वीकार्यमन्यथा[illegible]च्चइतिसूत्रनिष्
त्तलोपस्यस्थानिवद्भावाद्वडादेशस्याप्याप्पत्तिरित्याहुः। पदशब्दस्यपदत्वयोग्योपलक्षणत्वमिति[illegible]माश्रयः विशि
ष्टस्यक्तान्तत्वमिति· यद्यपिवक्ष्यमाणरीत्याक्तान्तादित्यर्थेरूढग्रहणपरिभाषांविनापिनिर्वाहस्तथापि[illegible]तविधिद्वयाभावेपि
निर्वाहः प्रकृतेऽस्तीतिभावः। समुदायोपाधिरिति· स्त्रीप्रत्ययान्तसमुदायविशेषणमित्यर्थः। करण[illegible] अभ्रगतम्· ईषद
भ्रशालिन्नित्यर्थः। करणात्स्याल्पत्वेतत्क्रियस्य[illegible]स्वल्पत्वंसुकरमेवेत्याशयेनाह· क्रियागतमिति· अभ्रेणालि[illegible]ः प्रघातइतिभावः
स्त्रीप्रत्ययसमभिव्याहारस्तात्पर्यग्राहकप्रकारान्तरमाह· क्तान्तादितीति· एवंसतिप्रकृतेरूढग्रहणपरि[illegible]याश्रयणेपिनक्ष
तिः। भिन्नशब्दस्यविशेषणवाचकत्वात्पूर्वेनिपातशङ्कायामाह· जातिकालेति· पाणिगृहीतीत्यस्यपाणि[illegible]गृहीतेत्यस्याइत्यर्थः
प्राशस्त्यस्त्वग्रहणेविवक्षितन्तदभिप्रायेणाह· अग्निसाक्षिकेतियेति· यद्यपिभाष्येभार्यायामितिनाभिहितं[illegible]तत्रविशेषणइ
त्यभिधानादेवङ्गृहणमित्यभिप्रायेणाह· भाष्येत्विति· [illegible]नान्यएव[illegible]विशेषः कल्प्यतामितिवाच्यम्· पाणि[illegible]र्या। यस्मा
हियाकथञ्चित्पाणिर्गृह्यतेपाणिगृहीतासाभवती[illegible]भाष्यान्तर्था[illegible]मित्यभिप्रायात् अखाङ्गपूर्वपदादि[illegible]कर्मधारयस

मै· १९७

मासाश्रयणेोबीजमाह· उत्तरसूत्रइति· नचास्वाङ्गपूर्वप[illegible]दत्यत्रकर्[illegible]धर्[illegible]स्य: श्रयणे ऽस्वाङ्गादित्येव सिद्धेपूर्व[illegible]नास्मिन्सूत्रे
सफलमितिवाच्यम्· उत्तरसूत्रार्थमवश्यङ्कर्त्तव्यमित्या[illegible]शयात्· एव[illegible] उत्तरसूत्रेतादृशार्थाश्रय[illegible]णो= [illegible]शायेनहि
जातिपूर्वादित्यस्यप्रकृतसूत्रेपिसम्बन्ध[illegible]वसमाननिमित्तकत्वलाभेननित्यशास्त्राबाधकत्वमिति[illegible]स्यादाव
नेनसूत्रेणङीषभवतीतिवादिमतन्नयुक्तमितिध्वनयन्नाह· पुत्रादिनीस्यादाविति· स्पष्टार्थमिति· प्र[illegible]सूत्रे[illegible]स्थितस्या
र्थस्यस्पष्टप्रतिपत्त्यर्थम्·। फलान्तरमप्य[illegible]स्तीत्याह· किञ्चेति· इदमुपलक्षणम्पूर्वोक्तमपिफलम्बोध्यम्[illegible]व्रीहिविशेषणमि
ति· एवंसतिसाध्वीकल्याणपाणिपादे[illegible]भवतिप्रसङ्गः स्यादितिशेषः शिखेति· यदिसूत्रेउपसर्जन[illegible]त्त[illegible]शिखेत्य
त्रटापम्बाधित्वाङीष्स्यादितिभावः। अ[illegible]भाष्यविरोधशङ्कांवारयति· यदपीति· एकदेशराव[illegible]व। एतेन· अनेन
निषेधेनतस्यसिद्धौतत्रपा[illegible]फलाभावेन। केचित्तुशिखेतिप्रत्युदाहरणमित्यसङ्गतङ्कल्याणपाणि[illegible]त्यत्रदोषवारणा
यास्वाङ्गपूर्वपदादित्यस्य[illegible]त्रे ऽनुवृत्त्या ऽस्वाङ्गपूर्वपदात्परत्वस्यप्रकृते ऽभावेनङाहे ऽप्राप्तेरित्याहुस्त[illegible]तत्सूत्रव्याख्या
यामुपक्रमे ऽशिखेसुक्तन्नात्वि[illegible]प्रत्युदाहरणमित्यत्रभाष्यकृतानिर्भरः। अत्र[illegible]ग्रन्थस्यापितद[illegible]रितत्वात्· यदन राम
श्चबहुव्रीहिर्नादे ऽस्वङ्गपूर्वप[illegible]त्परंस्वाङ्गमिति। इदन्नर्हिप्रयोजनम्। बहुव्रीहेरितिवर्त्तमाने ऽप[illegible]ग्रह[illegible]मपसर्जन १९७
मात्राद्यथास्यात्। निष्केशीपूका। [illegible]तिकेशीमालाइतीसुक्तम्। एतेनभाष्यीयप्रघट्टकेनोपसर्जनग्रहणस्यबहुव्रीहेरित्य।
स्यनिवृत्तिरेवमुख्यम्प्रयोजनन्नतुपू[illegible]पक्रमस्थमशिखेतिप्रदर्शितम्भवति। सूत्रस्थस्वाङ्गशब्दस्यवा[illegible]र्तिककारीयपरिभा
षाविषयत्वन्नतुके[illegible]योगिकत्वमितिप्रदर्शयितुमाशङ्कते[illegible]न्विति· स्वमङ्गमिति· स्वीयमङ्गमित्यर्थे[illegible]शब्दस्यात्मीयपर

त्वात् अद्रवम् । द्रवतीति द्रवम् नद्रव[illegible]म् मूर्त्तिः काठिन्यम् अथवा असर्वगतद्रव्यपरिमाणम् अविभु[illegible]परिमाणमिति या
वत् एतेनाकाशादेर्व्यावृत्तिः । तत्स[illegible]लितार्थमाह स्पर्शवदिति तद्यस्यास्ति तत्स्वाङ्गम् स्वेदस्य स्वाङ्गत्वप्राप्तिर्द्वितीयार्थेऽए
वेति द्वितीयार्थ्य एव तात्पर्यम् । ज्ञानस्याद्रवत्वात्तत्रातिव्याप्तिवारणाय मूर्त्तिमदिति । सुमुखा शाले[illegible]ति व्याप्ति[illegible]वारणायप्रा
णिस्थमिति । सुशोफेत्यत्राति[illegible]प्तिवारणायाविकारजमिति । विकारो वातादिवैष[illegible]म्याद्यन्नजातः [illegible]शी । दीर्घकेशी
रथ्येत्यत्र स्वाङ्गत्वसिद्ध[illegible]माह अतत्स्थन्तत्र दृष्टञ्चेति सुस्तनी सुस्तनावा प्रतिमेत्य[illegible]सिद्ध्येतेनचेत्त[illegible]याद्युतमिति । भा
ष्ये तु तस्यचेत्तन्नथा युत[illegible]पाठो दृश्यते तस्याप्ययमेवार्थः । तत्र करणस्य शेषत्वविवक्षायां षष्ठी । भ[illegible]स्थन्तत्र दृष्टञ्चेति
लक्षणान्तरमिति प्रतीयते तन्नयुक्तम् प्रथमलक्षणेनैव द्वितीयलक्षणासङ्ग्राह्यस्यसङ्ग्रहसम्भ[illegible]गौरवस्य गौरवप
राहतत्वादित्याशयेनाह एवञ्चेदमिति पूर्वलक्षणेनासङ्ग्रहादाह प्रतिमादीति अतएव तृतीयव[illegible]प्राणिविषयक
त्वादेव । टावन्तोऽयमिति क्रुडनिमज्जनेऽस्मात्[illegible]तोः पचाद्यजन्तादित्यादिः विशेषविषयः । उरो विषयः [illegible]त । तेन समासेऽउप
सर्जनह्रस्वत्वे तदन्तात् क्रोडाशब्दस्य टावन्तस्य क्रोडादौ पाठाद्बहुजानन्तरवाञ्चायः क्रोड शब्दः स्त्रीनपुंसकलि[illegible]नात्क्रोडम्बुजान्तर
मिति कोशप्रसिद्धस्तेन समासे ङीषू विकल्पो भवत्येव कल्याणक्रोडी । कल्याणक्रोडा मयूरीति केवलयौगि[illegible]राक्षसस्त
रसाधारणयोगार्थमात्रविवक्षायाम् । तेन रावणभगिन्यान्तस्य योगरूढत्वेपि सणत्वात्सञ्ज्ञाति[illegible]स्य नि
धस्य च प्रवृत्तिरस्त्येव नान्दीमुख्यो मास इत्यत्र तु नन खमु[illegible]दिस[illegible]धः । तस्य नान्दीकर्मसमृ[illegible]साधु[illegible]स्याइत्य
र्थात । कर्मसमृद्धौ मुखशब्दस्य मुखमिव मुखमिव मुखमिति प्रधानत्वा अवृत्तिः । नखमुखात्सञ्ज्ञा[illegible]मित्यत्र स[illegible] । पदेन पौरुषे

त्वाभावेगोष्ठादिष्वपिस्थाधातोःके।कान्तस्यसुवुत्पत्तेःप्राक्सम[ा]सिपदादित्वाभावात्सात्पदाद्योरितिनिषे[ध]प्राप्तेरादेशप्रत्यययो
रित्यनेनैवषत्वेसिद्धेअम्बाम्बेतिसूत्रेगवादिग्रहणमभ्यर्थमतआह·अम्बाम्बेतीति·उत्तरपदभूतस्यस्थस्यसकारस्यषत्वंस्त्रैदेभ्यए
वेतितेनहृदिस्थाशोभतेमालेत्यत्रनेतिभावः।एतेनगवादिग्रहणमेवगतीत्यादेरनित्यत्वेमानमित्यप[ा]स्तम्·निय[मा]र्थत्वेन
चारितार्थ्यात्पदाद्यादिरितिपक्षेतत्वासम्भवाच्च·वस्तुतस्तुनपदान्तसूत्रस्थपदा[न्त]पदस्यपदेऽन्त[illegible]इतिस[मा]सप्रदर्शने
परेयोऽन्तस्तस्यकार्येकर्त्तव्यएवनिषेधइतिगोचेस्यादिसिध्यर्थमनित्यत्वम्परिभा[षा]याःस्वीकार्यमन्य[illegible]ञ्चइतिसूत्रनिषे
न्नलोपस्यस्थानिवद्भावाद्वङ्गादेशस्याप्राप्तिरित्याहुः।पदशब्दस्यपदत्वयोग्योप[illegible]णात्वमिति[illegible]माशयः विशि
ष्टस्यक्तान्तत्वमिति·यद्यपिवक्ष्यमाणरीत्याक्तान्तादित्यर्थेरूढग्रहणपरिभाषांविनापिनिर्वाह[स्]तथापि[illegible]नविधिद्वयाभावेपि
निर्वाहःप्रकृतेऽस्तीतिभावः।समुदायोप[ा]धिरिति·स्त्रीप्रत्ययान्तसमुदायविशेषणमित्यर्थः।करणा[illegible]अभ्रगतम्·ईषद
भ्रेणालिप्तेत्यर्थः।करणास्याल्पत्वेतत्कर्तृ[illegible]ाल्पत्वंसुकरमेवेत्याशयेनाह·क्रियागतमिति·अभ्रेणालि[illegible]ःप्रवृत्तुइतिभावः
स्त्रीप्रत्ययसमभिव्याहारस्तात्पर्यग्राहकःप्रकारान्तरमाह·क्तान्तादितीति·एवंसतिप्रकृतेरूढग्रहणपरि[भा]षा[illegible]पिनस्त
तिः।भिन्नशब्दस्यविशेषणावाचकत्वात्स्वेनिपातशङ्कायामाह·जातिकालेति·पाणिगृहीतीत्यस्यपा[illegible]गृहीतैवेत्यस्याइत्यर्थः
प्राशस्त्यस्यग्रहणेविवक्षितन्तदभिप्रायेणाह·अग्निसाक्षिकेतियेति·यद्यपिभाष्येभार्यायामितिनाभिहित[illegible]स्तत्रविशेषइ
त्यभिधानादेवङ्कृष्यनमित्यभिप्रायेणाह·भाष्येत्विति[illegible]नान्यए[illegible]षःकल्पनामितिवाच्यम्·पा[illegible]पौ।यस्या
हियथाकथञ्चित्पाणिर्गृह्यतेपाणिगृहीतासाभवतीति[illegible]भाष्यानन्यथा[illegible]मित्यभिप्रायात्अस्वाङ्गपूर्वपदा[illegible]कर्मधारयस

नि· नन्विदं लक्षणम्वृषलत्वादिजाताव्याप्तमतो लक्षणान्तरमाह· नन्वित्यादिना· सापेक्ष्यस्थलेपि [illegible]न्निप्रवृत्तौ गमकत्वमप्र।
योजकन्तच्च प्रकृतेस्तीत्याह· भाष्यप्रामाण्यादिति· अत्रेदम्बोध्यम्· नकेवलन्द्वितीयलक्षणमेवाभिप्रेतम्· किन्तु प्रथममाम
पितेन तदीसस्य सिद्धिरिति। उपदेश इति· ब्राह्मणाद्ब्राह्मण्यामुत्पन्नोपमित्यादिरूपः। तन्पित्रादिष्विति· ब्राह्मणपित्रादिब्राह्म
ण एव अत्र तदपत्यादिष्विति नोक्तम्। ब्राह्मणेन क्षत्रियादिषूत्पन्नस्यान्यजातीयत्वसम्भवात्। तदपत्येति· अत्र [illegible]त्यपित्रादिष्विति
नोक्तम्। वृषलपितुरन्यजातीयस्यापि सम्भवात्· अत्र भाष्ये आकृतिग्रहणेत्युक्त्वा अपर आहेत्यादिना [illegible]णान्तरम्प्रणीतमित
योर्थावद्वैलक्षण्यन्तदाह· अत्राकृतीति· नित्यानित्येत्तिनि सम्ब्राह्मणत्वादि। अनित्यं पुत्रत्वादि। इत्यादीति· एवं हि तत्रोक्त
म्। अपर आह· प्रादुर्भावविनाशाभ्यां सत्त्वस्य युगपद्गुणैः। असर्वलिङ्गाम्बह्वर्थान्ताञ्जातिङ्कवयो विदुः। [illegible] कः पुनरेतयोर्जातिल
क्षणयोर्विशेषः यथा पूर्वलक्षणन्तथा कुमारी भार्येइति भवितव्यम् यथोत्तरन्तथा कुमार भार्येइति भवितव्यमिति। अत्र कैय
टः। द्रव्यस्य प्रादुर्भावविनाशाभ्यायाआविर्भावतिरोभावौ प्राप्नुतस्साजातिः। जातेर्नित्यत्वान्न साक्षाज्जन्योत्पत्तौ सम्भव इत्याश
येन द्रव्यस्येत्याद्युक्तम्। नन्विदं पदाश्रयस्योत्पत्तिविनाशौ सम्भवतस्तत्र यद्यपि सम्भवति तथाप्यात्मत्वजातौ न सम्भवतीति
चेन्न: प्रादुर्भावेत्यादिना यावद्द्रव्यभावित्वस्योपलक्षणात्। यावद्द्रव्यभावित्वञ्च स्वाश्रयद्रव्यसत्वप्रतीतिसमनियतप्रतीति
विषयत्वम्· समनियतत्वञ्च कालिकमत्यासत्त्याबोध्यम्· युगपद्गुणैरिति· गुणैः सह युगपद्द्रव्येणासम्बध्यते यथा निर्गुण
स्य द्रव्यस्यनोपलम्भस्तथा जातिरहितस्यापीत्यर्थः। दैवदत्तेत्यादि सञ्ज्ञानिरासायाह· बह्वर्थामिति· एतन्मते युवत्वादीनाञ्जा
तित्वमयावद्द्रव्यभावित्वात्। एतन्मत इति· प्रथममतेनेत्यर्थः। नचवदं [illegible]स्थविरादिशब्दा अयमरीत्या जातित्वञ्जातिलक्षणेऽ

भै·
१९९

षस्यादितिवाच्यम्· अजादिगणेतेषाम्पाठेनङीपाबाधात् ननुपूर्वोक्तलक्षणभेदेनकुमारत्वस्यजातित्वसन्देहात्कथंसाधुत्व
व्यवस्थेतिचेत्।अत्रकैयटः।पूर्वोक्तमेवलक्षणम्भाष्यकारस्यमतम्· अपरआहेत्यभिधानादित्याहुरिति।वस्तुतस्तुलक्षणा
यप्रणेतृऋषिद्वयप्रामाण्याज्जातिकार्यस्यपुवशब्दादौविकल्पएव· अतएवयुवजानिर्युवतिजानिरित्यादौद्विविधमप्यनुशासनम्भग
वतइति· सर्वलिङ्गत्वादिति· स्त्रीपुंसयोरपत्यान्तइत्यमरान्नाडापनन्नपुंसकमितिदर्शनादपत्यप्रत्ययान्तस्यसर्वलिङ्गत्वन्तथा
शाखाध्येतृवाचिनोपिसर्वलिङ्गत्वङ्कठःकठीकठङ्कुलमितिदर्शनादितिभावः।अपत्याधिकारादन्यत्रलौकिकङ्गोत्रन्तच्चापत्य
मात्रमित्यभिप्रायेणकैयटेनैतद्वार्तिकव्याख्यावसरेपसमित्येवव्याख्यातमवन्तीकुन्तीत्यनन्तरापत्येउदाहरणाच्चदीक्षितेरपि
तदेवानुसृतन्तन्नयुक्तम्भाष्यविरोधादित्याशयेनाह· शास्त्रीयमत्रेति· अतएव· शास्त्रीयगोत्रग्रहणादेव· नप्राप्नोतीति· गो
त्ररूपस्यार्थस्ययूनियः प्रत्ययस्तदर्थविशेषणत्वात्· प्रौढेति· अनुपसर्जनादित्यस्यतदन्तविशेषणत्वेऽनुपसर्जनाधिका
रस्यैववैयर्थ्यंस्यादितितस्यगृह्यमाणविशेषणत्वमेवेतिभावः।प्रतिषेधोनप्राप्नोतीति· एतस्यपुवप्रत्ययान्ततयाशास्त्रीय
गोत्रेयः प्रत्ययस्तदन्तत्वाभावात्· नचयः प्रत्ययोगोत्रेउत्पन्नस्तदन्तत्वमस्त्येवेतिवाच्यम्· अणन्तादनुपसर्जनादितिभाष्य
स्ययःप्रत्ययोयूनुत्पन्नोलुप्तश्चतमाश्रित्यैवप्रवृत्ततयातम्प्रत्ययमाश्रित्यजातित्वंवाच्यमितिभावः।मा[illegible]देवम्· जातेश्चे
तिप्रतिषेधोमाभूदित्यर्थः।ग्लुचुकायनीति· प्राचामवृद्धादितिफिन्नन्तमेतत्।अन्यथा· अपत्यप्रत्ययमात्रग्रहणे· असङ्ग
तिश्चेति· जातित्वसञ्ज्ञावाञ्ज्ञानेश्चेतिनिषेधप्राप्तेर्जागरूकत्वात्· स्वसिद्धान्तरीत्याह· ग्लुचुकायनीभार्येदोषस्त्विति· अतएव
अपत्यविशेषस्यगोत्रशब्देनग्रहणादेव।व्याख्यानासङ्गतिमुक्त्वारूपासिद्धिमप्याह· ब्राह्मणीनारदश्चप्रसिद्धिरिति· एतस्यान।

राम
१९९

न्तरापत्यप्रत्ययान्तत्वेपिजातित्व सत्वेनाजानाविति निषेधः स्यादितिभावः।सामर्थ्येन· औचित्यात्।अथवा अपत्यस्यजा
नाविति विशेषणसामर्थ्यात् अनुपसर्जनादिति सूत्रस्थभाष्यविरोधम्परिहरति· अनन्तरापत्येति·नन्वेवंरीत्यागोत्राद्यू
नीतिसूत्रस्यलुग्विधायकत्वपक्षीयमेकोगोत्रइतिसूत्रस्थभाष्यमपिसुयोजमतआह· पूर्नित्विति· प्रस्त्रीविषयत्वाभावादि
तिः एवञ्चशाखायांङीषोऽभावेटापिकठशाखेति कर्मधारयसमासाभावेभवति कर्मधारयसमासस्यप्रवृत्तौतुपुम्वद्भावेन
कठशाखेत्येवप्रयोगः।केचित्तुकठशब्दस्यप्रोक्तार्थेकणिन्यन्तस्यशाखायाम्प्रवर्त्तमानस्ययोगार्थमादायपकल्पादिसाधारणा
तयाऽस्त्रीविषयत्वात्कठीशाखेतिसमासाभावेभवतीत्याहुः अध्येत्रर्थेकाणन्तस्यस्त्रियामात्वन्तिमुपपादयतिस्त्रियाइति·
स्वीयसिद्धान्तमाह·परेत्विति· उपदेशोपलक्षणमिति·एवञ्चोपदेशग्राह्याजातिरित्येवसिद्धम्·उपदेशग्राह्यत्वञ्चद्वाभ्याम्प्रका
राभ्याम् यद्वेतिपक्षेतूपदेशाकृत्यन्यतरग्राह्येतिलक्षणम्· लिङ्गानामिति· शास्त्रीयंलिङ्गञ्चातिरूपार्थेपिसम्भवतीत्याश
येनेदम्· तत्स्वरूपेति· जातिस्वरूपेत्यर्थः।तेनतादृशस्वरूपानुवादेन।नचानुवादमात्रेणातिव्याप्तिवारणमपितुन्नशक्यतइतिवा
च्यम्· विशेषणतयैतदर्थप्रवेशस्याभिप्रेतत्वात्।एवंसत्याकृतिग्रहणेत्येवेत्येवकारेणाद्वितीयलक्षणाकरणाम्व्यवच्छिद्यते
तत्वसर्वलिङ्गत्वेसतीतिविशेषणमितिवोध्यम्· अतएवजातावपिलिङ्गसम्बन्धसम्भवादेव· ननुयदालक्षणद्वैविध्यन्तदा
द्वितीयलक्षणस्याप्राप्तप्रापणार्थत्वपातनटन्त्रिष्विति कोशवलेननटशब्दस्यसर्वलिङ्गत्वेपिजातिकार्यंसिध्यतिएकलक्षणात्वे
त्वसर्वलिङ्गत्वेसतीतिविशेषणादनेनप्राप्नोतीत्यतआह· तच्चप्रापि[illegible]मितीति· केचित्· प्राञ्चः।विशेषणस्यलिङ्गानामित्यस्या
भावेऽपिकचिज्जातित्वमितितेषाम्भावः।स्वसिद्धान्तमाह· भाष्येति· ननुकोशस्यकागतिरतआह· तटमिति· सकृदित्यंशान्त

रप्रयोजनमाह·सकृदिति· एकत्वमनेकानुगतत्वमिति· एतेनजातिलक्षणयोग्यतादर्शिता। स्वरूपानुवादेन· वस्तुतः पूर्वंव
देतदपिविशेषणान्तेनदेवदत्तत्वादेर्व्यावृत्तिः।समानकालिकेत्यस्य[illegible]वैशेपिपूर्ववत्। प्राग्वदेव· अनिदेशएव।अतएव·।
आकृतिग्रहणोत्पस्यपूर्वोक्तार्थाङ्गीकारादेव।अनेन· एकलक्षणेन।गुणैर्युगपत्सम्बध्यतइत्युक्तेकेनेत्याकाङ्क्षाशान्तये।
आह· द्रव्येणेति· गुणैरिति प्रकृत्यादित्वात्तृतीयातेनैककालेइत्यर्थकेनयुगपच्छब्देनयोगेपिनक्षतिः· द्रव्येणेतितुसहार्थयो
गेतृतीया लक्षणान्तरत्वभ्रमन्निराचष्टे।अत्रलक्षणइति· अतएव· पूर्वोक्तस्याप्येकलक्षणत्वादेव· एकवचनमेवेत्यनेनस्व
व्याख्यादृढीकरणम् अतएव· पूर्वस्यैकलक्षणत्वादेव·।एतेन· अस्त्रीविषयादित्यस्यपूर्वोक्तकरणेन· अपास्तमिति· सर्वत्र
विसकणिठकात्वजातेः प्रवृत्तनिमित्तत्वाभावान्नानुपपत्तिरितिभावः।अतएवं· अस्त्रीविषयादित्यस्यपूर्वोक्तार्थाश्रयणादेव
वहुपुष्पेत्ति·यौगिकोयम्।नतुजातिप्रवृत्तिनिमित्तकः।ननुपाककर्णेतिसूत्रस्याप्राप्तप्रापणार्थतया।जात्यर्थमेतत्सूत्रमित्य
पिवक्तुंयुक्तमतआह· अजात्यर्थन्त्विति· निषेधादिति· तस्यङीषूबाधनार्थमारम्भात् एतस्मिन्नेवसूत्रेवार्तिककृतापठितम्।त
त्त्वभाष्यकृतासदच्काण्डप्रान्तशतैकेभ्यःप्रतिषेधोवक्तव्यइतिव्याख्यातम्।एवंव्याख्यानंयोपधादित्यस्यसूत्रेश्रवणेनयोपध
प्रतिषेधेगवयहयेत्यादिनाप्रतिप्रसवमतेनकृतम् यदीदसूत्रमजात्यर्थमित्येवस्यात्तदाअस्त्रीविषयादित्यस्यप्रकृतसूत्रेपि
सम्बन्धात्पूर्वसूत्रस्यास्यचाप्राप्तेरुक्तत्वादेवटापिसिद्धेतदारम्भोव्यर्थः स्यादितिभावः।इदमेवचवार्तिकमजाद्यन्तइतिसूत्रव्या
ख्यानावसरेमूलेउपनिबद्धम्।पूर्वसूत्रेणापाककर्णेत्यनेन· ननुतित्तिरिः ककुभोलावइतिकोशेककुभशब्दसाहचर्यात्पुंस्त्व
निर्णयसम्भवान्नास्यस्त्रीत्वमतआह· स्त्रीपुंसयोरिति·इदमुपलक्षणम्।नपुंसकत्वस्यापि।नाडायनन्नपुंसकमितिकोशस्थे।

पगवड्ढ्लमितिप्रयोगस्यचदर्शनात्। अन्यथानोङ्धात्वोरितिसूत्रेपिङ्कारानुच्चारणे बहुव्रीहौ। विति ब्रह्मवेदोबन्धुष्
यस्याइत्यर्थः। ननुह्रस्वोकारादुङ्विधानमेवास्तुसवर्णदीर्घेणारूपसिद्धेरत आह दीर्घोच्चारणमिति भाष्येस्पष्टमिति त
त्रहिकिमर्थोङ्कारः विशेषणार्थः। नोङ्धात्वोरिति नोङ्धात्वोरित्युच्यमानेयवाग्वायवाग्वेइत्यत्रापिप्रसज्येत। अथदी
र्घोच्चारणार्थम् ब्रह्मबन्धूः वीरबन्धूः। नद्यृतश्चेतिकप्प्रसज्येत। नैषदोषः। नद्यन्तानांयोबहुव्रीहिरित्यवचनात्। नचैषन
द्यन्तानाम्बहुव्रीहिः। शेषलक्षणास्तर्हिकप्प्राप्नोति। तस्माद्दीर्घोच्चारणाङ्कर्तव्यम्। अत्रत्रैकपदः। उकारद्वयन्दीर्घेणानिर्दिष्टम्
तत्रद्वितीयउकारः परत्वाद्बाधकस्यशेषलक्षणस्यकपोबाधनार्थमितिभावः। ननुयद्येकएवउकारोविधीयतेतदाश्वश्रुरस्ये
काराकारलोपश्चेत्यनेनोङिकृतेश्वश्रूरित्यस्यसिद्धिर्नस्यादतआह श्वश्रूरितित्विति सिद्धमिति तथाचतादृशनिर्देशएव
तादृशरूपसाधकोनतुनदर्थम्वचनान्तरमितिभाव। ननुस्त्रियावेदाध्ययनेऽधिकाराभावादध्वर्युरित्यसङ्गतमतआह।
अध्वर्युशाखेति यच्छाखाध्ययनेनाध्वर्युत्वम्भवतितच्छाखाध्यायिनीवंशोद्भवेत्यर्थः। उतइत्यस्यसम्बन्धेऽलाबूशब्दा।
दीर्घोन्तान्नस्यादतआह उतइतीति अलाबूरितीति ऊङिसत्यलाबेत्यत्रनोङ्धात्वोरितिविभक्त्युदात्तप्रतिषेधः सिद्धो
भवति। गुणवाचीभीति ननुजातिवाचीतिशेष श्वश्रूशब्दावयवाद्याकारस्यलोपाशङ्कानिवारणायाह श्वश्र्वेतिनिर्देशा
दिति ङ्याप्सूत्रस्थभाष्यस्वरसस्त्विति तत्रहिङ्याप्ग्रहणोङ्किमर्थन्त्राप्रातिपदिकादित्येवसिद्धमितिप्रश्नेप्रत्ययइतिप्रा
तिपदिकसञ्ज्ञाप्रतिषेधः प्राप्नोतीतिसमाधानेएवंसतिन्यूङ्ग्रहणाङ्कर्तव्यमितिपुनःप्रश्नइतिप्रत्ययस्यतद्धितत्वात्सिद्धमि
तिसमाधायऊङ्न्तादपिपूर्वान्तवद्भावेनसिद्धमित्युक्तम्। श्वश्रूशब्दोपधाद्ऊङन्तःस्यात्तदातदर्थमूङ्ग्रहणस्यावश्यकत्वेन

भाष्येतस्यानुक्तत्वेनन्यूनतापत्तिरतोऽयमव्युत्पन्नइतिकल्प्यतइति· ऊरूत्तरपदादित्यधिकारप्राप्तप्रातिपदिकविशेषणमू
रूत्तरपदादिबहुव्रीहिः। औपम्यइतिसप्तम्यर्थोवाचकत्वम्। पूर्वपदस्योपमानवाचकत्वेसमुदायस्यौपम्यवाचकत्वसम्भ
वइत्याशयेनाह· उपमीयतइत्यादि। अतः। उपमानवाचकस्यपूर्वपदस्यग्रहणेन· करभोपमोरूरित्यत्रेति· अत्रपूर्वपदस्योरु
शब्दसामानाधिकरण्येनोपमानवाचकत्वाभावःस्पष्टएवायतःपूर्वपदस्योपमानवाचकस्यविवक्षाऽतएवोत्तरपदग्रहणा।
च्चरितार्थम्। अन्यथोर्वन्तादित्येववदेत्। उपचारोलक्षणासाचशक्यतावच्छेदकारोपात्मिकातदाह· शफशब्देति· सनिमि
त्तिःसः। उपमानोपमेयभावः। सहेतेइतीति· एवञ्चसहशब्दःसौत्रःक्रियाशब्दोनतुसाहित्यवाचीत्युक्तम्भवति। मूलोक्तंयद्वे
तिद्वितीयार्थकल्पनमेवसमूलमित्याह· सहविद्यमानाविति· सर्वस्यापिविद्यमानोरूपमत्वेनविशेषणवैयर्थ्यशङ्कानिवार
णायाह· अतिरमणीयावित्यर्थइति· तत्रदृष्टान्तमाह· कमलानीति· तदाजायन्तेतेगुणायदासहृदयैर्गृह्यन्ते। रविकिरणानुगृ
हीतानिभवन्तिकमलानिकमलानि। अत्रचस्युद्धकमलत्वमुद्देश्यतावच्छेदकम्। शोभादिगुणयुक्तकमलत्वावच्छिन्नस्यवि
धेयत्वमितिनोद्देश्यतावच्छेश्यतावच्छेदकविधेयतावच्छेदकयोरेकत्वाच्छाब्दबोधानुपपत्तिरिति। लोकेकद्रूरितिकस्य
बोधकमतआह· नागमातुरिति· कमण्डलुशब्दस्यतुष्याञ्जातिवचनअतएवचतुष्पाद्भ्योढञितिसूत्रस्यकामण्डलेयइत्यु
दाहरणासङ्गतिः· पात्रवाचीतुनस्त्रीलिङ्गः। अञ्इत्यस्याकारविशेषणत्वंशार्ङ्गरवादेस्तुनेतिद्वन्द्वानुपपत्तिरतआह· शार्ङ्गरवी
तीति· अस्यःअञ्इत्यस्य। एवंटिड्ढत्यत्रापीति· तस्यषष्ठ्यन्तत्वेऽनुसर्जनादितिविभक्तिविपरिणामेनतद्विशेषणम्। विनिगमना
विरहादाह· तदन्तेति· अञोऽकारविशेषणत्वेफलम्। शूरसेनीति· जनपदशब्दात्क्षत्रियादित्यञोऽतश्चेतिन्तुकिजातिलक्षणो

ङीष्। तेनान्तोदात्तम् पदम्। शार्ङ्गरव्याः साधुत्वमाह· अण्यादीति· शृङ्गरुशब्दादपत्येऽणि आदिवृद्धावोर्गुणे णान्ताच्छार्ङ्गरु।
शब्दप्रकृतिकान्ङीष्युदात्तनिवृत्तिस्वरेणान्तोदात्तत्वम्। यदि तु गोत्रेऽण तदा जातिलक्षणो ङीष् परत्वान्ङीनम्बाधित्वा स्यात्त
थापि प्रत्ययस्वरेणान्तोदात्तत्वमतो ङीनाद्युदात्तत्वसिध्यर्थे विधीयत इति। सामर्थ्यादिति· सूत्रशब्दस्य पाठसामर्थ्यादिस
र्थः। नृनरयोरिति गणसूत्रे नरशब्दोपादानस्य प्रयोजनं वक्तुं शङ्कते· पद्यपीति· नरीति प्रयोगनिर्वाहेनैव प्रयोजनमस्त्विति स्या
त आह· नरीति त्विति· जातिमात्रेति· अत्र पात्रपदेन पुंयोगव्यावृत्तिः। पुंयोगे तु नरीतीष्यत एव· अत एव किन्नरीणान्नरीणा
मिति प्रयोगोपपत्तिः। नरशब्दान्त्याकारस्य लोपेनापहारेऽल्लोन्त्यपरिभाषयाऽन्त्यस्यैरेफस्य वृद्धिः स्यादत आह· अत्राद्येति· व्या
ख्यानादिति· नरः अः नरः कतन्नवत्परद्रूपम्। नाचनरश्चेति छन्द इति व्यानादित्यर्थः। अनार्षमिति· तत्रादर्शनात्। आद्यद
त्तस्वरूपस्य तर्हि कथं सिद्धिरत आह· नुर्नरस्य चेति· योगार्थमादायान्यत्रास्य प्रवृत्तिं वारयति· रूढ्येति· अत एव रूढिस्वीका
रेऽर्थभेदाभावादेव· उदीचाम्मतइति· प्राचाम्मते ष्फस्य सत्वादाह· उदीचाम्मतइति· सः। गौकक्ष्यशब्दः। नपाठ्य इति· ष्यङ्प्र
त्ययस्तत्र पठि भवति तत्रोपङ्श्चाविति चापज्जायन्ते स चाधुना पाद्यत्र ङस्य नेन सिद्ध इति भावः। नर् गौकक्षीपुत्र इत्यत्र ष्यङः
सम्प्रसारणमिति सम्प्रसारणान्तस्यादत आह· सम्प्रसारणान्त्विति· नेष्टमिति· तदुक्तम्भाष्ये। ष्याद्यन्ते चापूर्वक्तव्यः शार्करक्ष्या
।पौतिमाष्यागार्गादियञ्नत्ता एत इति कैयटः। तत्रायमप्यर्थः। गौकक्ष्यशब्दः क्रौड्यादिषु पठ्यते स न पठितव्यो भवति। यदि न
पठ्यते गौकक्षीपुत्र इति सम्प्रसारणान्न प्राप्नोति। इष्टमेवैतत्सङ्गृहीतम्। गौकक्ष्यापुत्र इत्येवं भवितव्यम्। एवं हि सौनागाः पठ
न्ति ष्यङः सम्प्रसारणे ग्गौकक्ष्यायाः प्रतिषेध इति नन्वस्य तद्धिताधिकारस्थोत्तरार्थत्वेऽद्दकरणमनर्थकमत आह· इहेति· के

चिदिति॰ घठघटीग्रहणेनैवतदनित्यत्वस्यसिद्धेरिदमपिप्रयोजनमन्यथासिद्धमित्यरुचिः। इतिश्रीमहामहोपाध्यायभैरव
मिश्रविरचितायांलघुशब्देन्दुशेखरव्याख्यायाञ्चन्द्रकलाख्यायांस्त्रीप्रत्ययप्रकरणंसमाप्तम्। ॐश्रीगणेशायनमः। ज्ञानान
न्दमयन्देवज्ञानकीवल्लभंविभुम्। आधारंसर्वविद्यानांश्रीरामंसमुपास्महे १ अथस्त्रीप्रत्ययानाम्प्रातिपदिकप्रकृतिकत्वा।
त्स्वादीनामपितथात्वात्तेषामपिनिरूपणमावश्यकमितिप्रसङ्गसङ्गत्यातदर्थान्निरूपति॰ स्वौजसौडिति॰ प्रथमायानकार
कविभक्तित्वमितिवादिमतन्दूषयितुमुपक्रमते। इदमपीति॰ क्रियायोगश्चनसाक्षात्कारकत्वप्रयोजकः किन्तुसाक्षात्परम्प
रासाधारणः। साक्षाद्यथाकर्मादीनाम्। परम्परयायथाधिकरणकारकस्य॰ एवम्प्रथमान्तस्यापि। साचक्रियायत्रक्रियावाचक
म्पदम्प्रयुज्यतेतत्रचैत्रः पचतीत्यादौ तदर्थभूतैव। यत्रतुनप्रयुज्यतेघटः पटइत्यादौतत्राप्यस्तिर्भवतिपरोऽप्रयुज्यमानोऽप्य।
स्तीतिन्यायेनगम्यमानास्तिक्रियामेवान्वयः। सचप्रत्ययार्थकर्तृकर्मादिद्वारा। अतएवतिङ्समानाधिकरणेप्रथमेतिवार्तिक
सङ्गतिः। कारकविभक्तित्वञ्चक्रियाजनकार्थकविभक्तित्वम्। इदमपीत्यपिनाकारकाधिकारीयसञ्ज्ञाप्रयोज्यसर्वविभक्ति
सङ्ग्रहः। भाष्ये॰ अनभिहितपादे। कृष्मादिशब्देष्विति॰ वाचकतासम्बन्धेनस्थितमितिशेषः। प्रातिपदिकार्थत्वादिति॰ प्राति
पदिकजन्योपस्थितिविषयत्वंहिप्रातिपदिकत्वन्नचलिङ्गस्याप्यस्तीतिभावः। अत्रोपस्थितिनिष्ठकार्यतायाअवच्छेदकः स।
म्बन्धोऽवच्छेदकता। प्रातिपदिकनिष्ठकारणतायास्तुस्वविषयकज्ञानावच्छेदकत्वम्॰ यस्मिन्निति॰ नचसाम्मन्यन्तराभा
वेप्रातिपदिकमात्रोच्चारणेनकस्याप्यर्थस्योपस्थितिकत्वन्नकस्यापीतिवाच्यम्॰ स्वस्वव्याप्येतरयावत्कारणसत्वइत्यस्यापि
पूरणात्॰ स्वम्ममातिकम्। तद्याप्यस्तदीपसम्बन्धः नाम्पामितरद्यावत्कारणमित्यर्थः। प्रातिपदिकजन्यनियतोपस्थितिकत्व

त्त्वं प्रातिपदिकोच्चारणकालानन्तरकालव्यापकोपस्थितिविषयत्वम्॰ कालश्च प्रातिपदिकोच्चारणानन्तरं यावत्स्वरणास
मूहेनार्थाभिव्यक्तिर्भवति तावान्समुदायः। नन्वेतादृशम्प्रातिपदिकार्थत्वं डित्थो वीहीकइत्यादि लाक्षणिकस्थलेनकस्यापिवा
हीकाद्यर्थस्येति तत्र प्रथमायाः साधुत्वन्नस्यादित्यत आह॰ अन्वयानुपपत्तीति॰ पद एव॰ सुबन्त एव॰ नलक्ष्यसङ्ग्रहइति॰ एव
ञ्च मुख्येस्वशक्ये एव तेषां साधुत्वम्पश्चात्पदान्तरार्थसम्बन्धवेलायामन्वयतात्पर्यान्यतरानुपपत्तिप्रतिसन्धानन्ततः।
स्वशक्यतावच्छेदकारोपात्मिकालक्षणेति भावः लिङ्गग्रहणसार्थक्यमाह॰ तदादिशब्दानामिति॰ सूत्रे मात्रशब्दोऽवधा
रणे तस्य च प्रत्येकं सम्बन्धइत्याशयेनाह॰ लिङ्गस्यैवाधिक्यइति॰ नन्वेवन्नीलो घटइत्यादावपि नियतत्वांशनिवेशे प्रथमान
स्यात्। विष्यविशेषणभावस्याधिकस्य भानेन मात्रपदेन व्यवच्छेदादित्याशयेन शङ्कते॰ यद्यपीति॰ संस्कारेति॰ प्रथमारू
पः योप्यभेदो भासते सोपि विशेष्यविशेषणभावान्नातिरिक्तः एवं सत्ययं वाक्यार्थ एव विशेष्यविशेषणभावः परं द्विविधः य
त्रभेदः संसर्गतया भासते तत्र तत्सम्बन्धावच्छिन्नः। समानविभक्तिकनामार्थयोर्यत्रान्वयस्तत्रेतरसम्बन्धानवच्छिन्नः। न
चैवङ्घटम्पश्यतीत्यादावपि प्रथमापत्तिः। कर्मत्वसंक्रियासापेक्षत्वेन तस्य वाक्यार्थत्वादिति वाच्यम्॰ एवं सति कर्मणि द्वि
तीयेत्यादिसूत्राणां वैयर्थ्यापत्तेः। प्रातिपदिकपदं देशस्य प्रथमया व्यावरुद्धत्वादतस्तासां स्वविषये बाधकत्वसुपपन्नमिति भावः
न संसर्गइति॰ राहोः शिरइत्यादावौपाधिकभेदमादाय षष्ठ्युपपादनपरभाष्यप्रामाण्येन तस्य संसर्गत्वाभावकल्पनात्॰ अन्य
त्र॰ मञ्जूषादौ॰ न च द्रोणो व्रीहिरित्यत्र प्रातिपदिकार्थ एव प्रथमास्तु तस्य च परिच्छेद्यपरिच्छेदकभावसम्बन्धेन व्रीहावन्व
योस्त्विति वाच्यम्॰ समानविभक्तिकनामार्थयोर्भेदसम्बन्धेनान्वयस्याव्युत्पन्नत्वात्। अन्यथा राजपुरुषइति वाक्येऽभेदसम्ब

न्येनान्वयवोधापत्तेः।नचयद्दिपरिमाणमात्रेप्रथमापरिमाणस्यचप्रत्ययार्थतयापरिच्छेद्यपरिच्छेदकत्वभावसम्बन्धेना
न्वयस्तदाद्रोणोव्रीहिमानयेत्यपिप्रयोगः स्यादितिवाच्यम्॰ प्रातिपदिकार्थसाहचर्येणपरिमाणमात्रेप्रथमापियत्रसमान।
विभक्तिकनामानरार्थेऽन्वयविवक्षातत्रैवनान्यत्रेतिकल्प्यतइत्यभिमानात्।अतएवतिङ् समानाधिकरणेप्रथमेतिवार्त्ति
कविरोधोन॰ उक्तार्थत्वादिति॰ एकत्वादिष्वर्थेषुविभक्तिर्विधेपातेचार्थाः प्रकृत्यैवप्रतिपादिताइतितेषामभिधानायविभ
क्तिर्नसाध्ययानहिभवतिघटोस्तिकलशइति।नन्वेकत्वविशिष्टेएकत्वान्तरान्वयायैकवचनमस्त्वित्यतआह॰ प्रातिपदिकेति॰।
सर्वविभक्त्यापत्तिरिति॰ सर्वप्रथमापत्तिरित्तिसङ्॰ स्यान्नरेत्यर्थः।एकादिशब्दान्नहिद्विवचनादिकमुत्पद्यतामित्यतआह॰ अन।
न्वितार्थकेति॰ सर्वविभक्त्यापत्तिरिति॰ सर्वप्रथमापत्तिरितिभावः।ननुहिमानीन्द्राणीत्यादौकथम्प्रथमामहत्वपुंयोगादेराधि
क्यादित्यतआह॰ लिङ्गविशिष्टपरिभाषयेति॰ प्रातिपदिकार्थमात्रइत्यत्रप्रातिपदिकपदम्प्रातिपदिकप्रकृतिकलिङ्गवोधक
प्रत्ययस्यापिवोधकमितियस्माल्लिङ्गवोधकप्रत्ययान्नात्प्रथमोत्पत्तिरभिप्रेतात्तज्जन्यनियतोपस्थितिकोर्थोविवक्षितः सच
प्रकृतेनास्तीतिभावः।उन्मानादिष्वपीति॰ पलम्सुवर्णमित्यादौनचप्रातिपदिकेनस्वार्थसोक्तत्वात्तत्रकथम्प्रथमेतिवाच्यम्॰
प्रातिपदिकार्थेप्रथमाविधानसामर्थ्येनतत्रोक्तार्थानामितिन्यायाप्रवृत्तेः।यथापञ्चकम्प्रातिपदिकार्थइतिपक्षेकारकस्यप्रा
तिपदिकार्थत्वेपितत्रद्वितीयादीनांविधानमन्यथाविभक्तिरहितस्यप्रयोगःस्यान्नसचनकेवलेत्यादिवचनवाधितोनापिते
भ्यःकर्मादिप्रतीतिः॰ कस्यापिभवतितथाप्रातिपदिकेनतदर्थेप्रतिपादितेपिप्रथमाभवतीतिप्राचीनमतनिगर्वः।स्वसिद्धान्त।
माह॰ परेत्विति॰ प्रवृत्तिनिमित्ति॰ यस्माच्छब्दात्प्रथमाविभक्तिविधानन्तत्तच्छब्दप्रवृत्तिनिमित्तमित्यर्थः सच॰ तदाश्रयश्च॰

आरोपिततदाश्रयः। प्रवृत्तिनिमित्तप्रकारकारोपविशेष्य इत्यर्थः। अत एव। आरोपिततदाश्रयग्रहणादेव। लाक्षणिकत्वपि
णापत्वप्रकारोपविशेष्यर्थबोधकत्वेति। अत एव प्रवृत्तिनिमित्ततदाश्रययोरेव प्रातिपदिकार्थपदेनग्रहणादेव। प्रातिपदि
कार्थतया। प्रातिपदजन्योपस्थितिविषयार्थतयानद्वैयर्थ्यम्। लिङ्गग्रहणावैयर्थ्यम्। अत एव। लिङ्गस्य प्रातिपदिकार्थत्वादेव सि
द्धान्तितमिति। स्त्रीत्वस्य प्रातिपदिकवाच्यत्वे हि स्त्रीप्रत्ययस्य तद्द्योतकत्वं युज्यते। पुंशब्दस्य प्रकृतित्वे इति त्वे इति। पुंवाचकश
ब्दस्य प्रकृतित्व इत्यर्थः। एतेन पुंसि विद्यमानेस्यश सद्इति नार्थइनिसूचितम्। वार्तिकविरोधशङ्कां वारयति। अभिहित इति। एते
न। उक्तव्याख्यानेन। तन्नये। वार्तिकमते। लिङ्गग्रहणसार्थक्यापभूमिकामारचयति। तदादिशब्दानामपीति। यदि प्रातिपदिक
जन्योपस्थितिविषयस्यैव प्रातिपदिकपदेनग्रहणं स्यात्तदा लिङ्गस्यापि तदादिशब्दजन्योपस्थितिविषयतया प्रातिपदिकार्थप
देनैतेभ्यः प्रथमासिद्धौ लिङ्गग्रहणमव्यर्थं स्यादिति भावः। ननु लिङ्गन्नततोनियतोपस्थितिकमत आह। नियमांश निवेशे त्विति।
अत एव अलिङ्गालिङ्गप्रवृत्तिनिमित्तकाश्च प्रातिपदिकार्थमात्रे इत्येतदुदाहरणत्वेन प्रातिपदिकार्थे किमुदाहरणाभितिप्र
श्ने स्त्रीपुमान्नपुंसकमित्येते दर्शिताः। अन्ये लिङ्गाधिका इत्यस्य अत्रैवार्थे वृत्तिकारसम्मतिमप्याह। इदमेवेति। प्रवृत्तिनिमि
त्तदाश्रययोरेव प्रातिपदिकार्थपदेनग्रहणस्याभिप्रेतत्वादेव। अव्ययपुमादय इति। अव्ययस्य प्रातिपदिकार्थ इत्येतदुदाह
रणे प्रमाणान्तु प्रातिपदिकग्रहणङ्कि मर्थम्। उच्चैर्नीचैरित्यत्रापि यथा स्यादिति भाष्यमेव। अन्ये सर्वे इति। वृक्षादयः। तत्र लि
ङ्गप्रतीतेराधिक्यात्। एवं खट्वादिशब्दानामपि लिङ्गप्रवृत्तिनिमित्तकत्वाभावेन लिङ्गाधिक्ये स्येतदुदाहरणत्वमेव। परिमाण
ग्रहणचारितार्थ्यमाह। द्रोणत्वादिप्रवृत्तीति। लिङ्गवदिति। यथा वृक्षादिशब्दजन्यप्रतीतिविषयस्य लिङ्गस्य विशेषणात

याभानन्तथाद्रोणः खारी आढकमित्यादिशब्देभ्यः परिमाणाभिन्नो द्रोणइत्याद्याकारो बोधो भवतीति द्रोणादिशब्दजन्यप्रतीतौ।
तौ परिमाणस्याधिकस्य भानमतः परिमाणाभिन्नो द्रोणइत्याद्याकारो बोधो भवतीति द्रोणादिशब्दजन्यप्रतीतौ परिमाणस्या
धिकस्य मानमतः परिमाणग्रहणमिति भावः। द्रोणत्वादिकमखण्डोसाधिर्जातिर्विशेषो वा। नचैयतावि शेषावच्छिन्नपला
दिपरिच्छिन्नपलादिपरिच्छिन्नधान्यादिपरिच्छेदकत्वसमानाधिकरणम्। काकादिवाचकस्यतुलिङ्गाधिक्यइत्येनदुदाहरणमे
मेव॰ ननु परिमाणमपि पदिद्रोणादिशब्दार्थस्तदा द्रोणः परिमाणमिति सहप्रयोगानुपपत्तिरत आह॰ द्रोणः परिमाणोति॰ सम्भे
देनान्यतरस्यैव यर्थ्यमितिन्यायात्। अभ्युपेत्यवादोयम् वस्तुतः सन्देहनिवृत्त्यर्थं तदा प्रयोगइत्याशयेनाह॰ द्रोणशब्दस्येति॰ मूलो
क्तरीत्या परिमाणग्रहणस्य सार्थक्यं खण्डयति॰ मूलोक्तमिति॰ नचतिङ् समानाधिकरणे प्रथमेतिवार्तिकसम्मत्या सम
नाधिकरणानामान्तरान्वय एव परिमाणमात्रे प्रथमा इति प्रागुक्तत्वात्तद्रीत्यानापन्दोषइतिवाच्यम्॰ पत्र द्रोणादिपदार्थस्तत
समानाधिकरणनामान्तरार्थेऽन्वयविवक्षा किन्तु तदर्थस्य सत्वमात्रप्रतिपिपादयिषा तत्र प्रथमानापत्तेरुक्तनियमास्वीकारा
त्। यद्विकल्पनाऽतिप्रसङ्गभङ्गायतादृशी क्रियते तदाप्याह॰ किञ्चेति॰ तिङ्सामानाधिकरण्यं हि ङर्थोऽभिन्नार्थाभिधापकत्व
न्तच्च मूलोक्तरीत्या नास्तीति भावः। प्रस्तुततिङर्थेऽन्वय एव साधुत्वमिति वार्तिकात्लभ्यते। मूलोक्तरीत्याऽन्वये त्वसाधुत्वमस्या।
स्यादित्यपि वोध्यम्। कैयटोक्तम्परिमाणग्रहणसार्थक्यन्दूषयति॰ नचेत्यादिना॰ मेये॰ परिच्छेद्ये॰ कर्मव्युत्पत्त्या॰ परिमीयतेयत्त
त्परिमाणमितिरीत्या। असिध्यापत्तेरिति॰ अत्र सिंहशब्दस्य सिंहसदृशप्रतिपादकतया कस्यापि सदृशस्य निरुक्तप्रातिपदिका
र्थत्वन्नास्ति॰ तद्वदिति॰ पदेएवलक्षणेति॰ प्रागुक्तरीत्या सार्थमात्रे सिंहेस्यस्य साधुत्वमिति रीत्यापदि सिंहोमाणवकइतिवाक्यं

राम
२०४

साध्वितिब्रूषेतदाद्रोणाइत्यादीनामपिसाधुत्वन्तथैवभविष्यतीतिभावः परिमाणमात्रविषयकप्रतीतिजनकात्प्रथमेत्यस्यद्रो
णखारिस्याद्युदाहरणमितिकथंलिङ्गस्याप्येभ्यः प्रतीतिरितिवाच्यम् परिमाणभिन्नत्वेसतिप्रातिपदिकार्थलिङ्गान्यतरभिन्नोप
स्तदविषयकत्वस्यप्रतीतिविशेषणत्वात्।ननुप्रातिपदिकेनप्रातिपदिकार्थस्योक्तत्वेपिप्रातिपदिकार्थेप्रथमेतिवचनसामर्थ्या
त्तदर्थगतसङ्ख्याया अनभिहितत्वमादायप्रथमा।एकादिशब्दस्थलेतुसङ्ख्याप्यभिहितेतिप्रथमानस्यात्।यदिनंकेवलेतिसू
मयपरिपालनायाव्ययेभ्यइवप्रथमेतिब्रूषेतदेकादिशब्देभ्योद्विवचनबहुवचनयोरप्यापत्तिरतआह एकोद्वावित्यादीति सङ्
ख्यावाकस्यान्वयित्वेनप्रातिपदिकस्यानभिहितत्वइत्यर्थस्तुपूर्वोक्तरीत्यावक्तुमशक्यः किन्तुतदर्थगतसङ्ख्यायामनभिहिताया
मित्येववाच्यमेवंसतितादृशवाक्यस्यान्यत्रचरितार्थत्वादेकोद्वौत्रयइत्यत्रयइत्यत्रनस्यादितिभावः।नन्वेवंरामावित्यादौप्रथ
मानस्यत्रेषुलिङ्गाधिक्येपितन्मात्राधिक्याभावादतआह रामावित्यादाविति सङ्ख्याधिक्येति सङ्ख्याधिक्यविवक्षायामि।
त्यर्थः लिङ्गमात्राधिक्येपिप्रातिपदिकार्थगतद्वित्वादौविवक्षितइत्यर्थः।नचरामइत्यत्रसङ्ख्याधिक्यसत्वात्प्रथमानस्यादि
त्येवैकवचनन्तस्यपुरः स्फूर्तिकत्वात्कुतोनशङ्कोक्तेतिवाच्यम् द्व्येकयोरितिसूत्रस्थैकशब्दस्यप्रत्याख्यानेनादोषात् सौत्र
मात्रग्रहणप्रयोजनमाह मात्रग्रहणन्त्विति मात्रग्रहणाभावेत्वितिपाठः अस्मइतिनियमः स्यादित्यनेनान्वयः।कर्मणीयत्र
द्वितीयेत्येवंविधनियमेन।यत्रकर्मत्वाज्ञानन्तत्रैवद्वितीयाव्यावर्त्यतइत्यभिप्रायेणाह यथाकर्मणीत्यादि कर्मत्वाज्ञानसमान
कालिकस्य।कर्मत्वाभावसमानाधिकरणस्य।अर्थान्तरस्य तृतीयादिप्रयोजककरणत्वादेः।अपादानत्वादिवोधिपीति गान्दो।
ग्धीपयइत्यत्रान्तः स्थितद्रवद्रव्यवृत्तिविभागानुकूलव्यापारानुकूलव्यापारोर्थइतिस्वीकारेतद्योगेऽपादानसञ्ज्ञाकर्मसञ्ज्ञयो।

प्राप्तावपादानमुत्तराणिकारकाणिवा धन्तइत्याकडारेनिसूत्रस्थभाष्योक्तरीत्यास्थितकर्मत्वमादाय द्वितीयायथाभवतीतिभावः
दार्ष्टान्तिकेयोजयन्ति। तथाऽनेनापीति· प्रातिपदिकार्थइतिसूत्रेणापीत्यर्थः प्रातिपदिकार्थसत्वएवप्रथमा। ननुतदसत्वइत्य
स्यप्रातिपदिकार्थसत्वाभावविशिष्टशब्दव्यावर्त्तकतास्यादितिभावः अनर्थकनिपातसमभिव्याहारइत्यर्थः। घटः पटोवैममस्व
इ· घटः। पटोमेस्वमित्यादौ। तत्सत्वइति· मात्रपदसत्वइत्यर्थः। कर्मत्वादियोग्यार्थकेति· कर्मत्वाद्याधिक्ये प्रथमाव्यावृत्त्यर्थंहिमा
त्रग्रहणन्तेनपर्युदासन्यायेनैतल्लाभः। नचार्थकनिपातेभ्योमात्रग्रहणाभावेपूर्वोक्तरीत्यायदिप्रथमानभवेत्तदाऽनर्थकस्यनिपा
तस्यप्रातिपदिकसञ्ज्ञेतिवार्त्तिकवैयर्थ्यमितिवाच्यम्· स्वरार्थत्वात्। नचनिपाताआद्युदात्ताइत्यनेनस्वरोभविष्यतीतिवाच्य
म्· अव्ययेभ्यःसप्तानामपिविभक्तीनांमेकवचनानीतिपक्षेद्वितीयाद्यर्थेत्वदित्याशयात् कर्मत्वयोग्यार्थकेतिनिवेशयित्वाय
मस्तदाऽनर्थकनिपातेभ्यः प्रथमासुतरांसिध्यतीतिभावः ननुभवदुक्तनियमेकिम्मानमतआह· इदमेवेति· तदकरणालाघवेनेति·
मात्रग्रहणाकरणालाघवेनेत्यर्थः। स्पष्टञ्चेदम्भाष्यइति· तत्रहिशङ्कासमाधानाभ्यामुक्तम्। अथमात्रग्रहणङ्किमर्थम्। एतन्मा
त्रएवप्रथमामात्रएवप्रथमापथास्यात् कर्मादिविशिष्टेमाभूदिति· अत्रकर्मादिशब्दस्तच्छक्तिपरः कटङ्करोति। नैतदस्तिप्रयोज
नम्। कर्मादिषुद्वितीयादयोयाः विभक्तयस्ताःकर्मादिविशिष्टेवाधिकाभविष्यन्ति अथवाचार्यप्रवृत्तिर्ज्ञापयति नकर्मादिविशि
ष्टेप्रथमाभवतीति। यदयंसम्बोधनेप्रथमांशास्ति· नैतदस्तिज्ञापकम्। अस्तिह्यन्यदेतस्यवचनेप्रयोजनम्। किमामन्त्रितमि
तिवक्ष्यामीति। यत्तर्हियोगविभागङ्करोति इतस्यासम्बोधनेअमन्त्रितमित्येवंरूपादिति· भाष्यप्रदीपोद्योतेनिरूपितमिति
शेखरोक्तरीत्यैवनिरूपितम् द्वितीयादयोयाविभक्तयइति· कर्मणिद्वितीयेत्येवमर्थनियमपक्षेद्वितीयादीनांस्वस्वविषये

प्रथमावाधकतयाकर्माद्याधिक्ये प्रथमायाअप्राप्त्यामात्रग्रहणान्नकार्यमितिसूचितम्।यदिमात्रग्रहणान्नक्रियतेतदासम्बो
धनेचेतिसूत्रंलिङ्गादिग्रहणाच्चनकार्यमित्यपिध्वनितम्॰ सम्बोधनेचेतिसूत्रम्व्याचष्टे॰ तत्रवर्त्तमानादिति॰ प्रातिपदिकादि
त्यधिकारतोलब्धम्।सूत्रकारमतेमात्रग्रहणाच्चनकार्यमित्यपिध्वनितम्॰ सम्बोधनेचेतिसूत्रम्व्याचष्टे॰ तत्रवर्त्तमानादिति॰प्रा
तिपदिकादित्यधिकारतोलब्धम्।सूत्रकारमतेमात्रग्रहणम्प्रातिपदिकार्थेतिसूत्रेस्त्रीत्यस्यारम्भः।अभिमुखीकरणमिति॰ स्वोच्चा
रितशब्दवोध्योयोऽज्ञातार्थस्तद्बोधानुकूलव्यापारानुकूलोव्यापारइत्यर्थः।सम्बोध्यश्चस्वव्यापारप्रयोज्योयस्मादृशार्थवोधानु
कूलोव्यापारस्तदाश्रयउच्यते॰ राममाम्पाहीत्यादौतादृशोऽज्ञानार्थवोधेप्रकृत्यर्थस्यसमवेतत्वसम्बन्धेनान्वयः।तत्रैवविषयभू
तार्थेऽभेदसम्बन्धेनप्रेरणाविषयमत्कर्मकरक्षणस्यान्वयः।सम्बोध्यतावच्छेदकत्वेनयोज्ञातः सएवोच्चारयित्राऽभिमुखीक्रि
यतेतेनरूपेण।अतएवब्राह्मणत्वेनयोज्ञातःसर्व्वहिब्राह्मणात्रगच्छेत्येवमभिमुखीकृत्योच्यतेनतुहे उ क्षत्रियेति।एवञ्चरा
मसमवेतायामत्कर्मकप्रेरणाविषयरक्षणाभिन्नार्थवोधस्तदनुकूलव्यापारानुकूलोव्यापारइत्याकारकः शाब्दवोधः।तत्फलञ्च
वृत्तिनिमित्तीइति।हेदेवदत्ततत्रगत्वाजलन्त्वआनीयतामितिवाक्यप्रयोगोपत्रकृतोमैत्रेणतत्रदेवदत्तस्यदेवदत्तसमवेतत्तद्देशा
धिकरणाकगमनविशिष्टजलकर्मकतद्देशापादानकप्रेरणाविषयानयनाभिन्नार्थवोधानुकूलव्यापारानुकूलोव्यापारइत्याका
रकः शाब्दवोधोजायतेतदनन्तरन्देवदत्तस्यप्रवृत्तिर्भवति।यत्रतुदेवदत्ततत्रारण्येव्याघ्रादिसेवितेनगन्तव्यमितियत्रदत्तेनो
क्तंतत्रदेवदत्तप्रेरणाविषयतद्देशाधिकरणाकगमनाभावाभिन्नार्थविषयकदेवदत्तसमवेतवोधानुकूलव्यापारानुकूलोव्याप
रइत्याकारकशाब्दवोधानन्तरम्प्रेरणाविषयत्वेनज्ञानक्रियायामिष्टसाधनताज्ञानमनन्तरम्प्रवृत्तिरित्यूहनीयम्।तत्त्वासम्भवा

दिति· तेनरूपेणसम्बोध्यत्वासम्भवादित्यर्थः। एतेनसम्बोध्यस्योद्देश्यत्ववीजन्दर्शितम्। सिद्धंहिलोके उद्देश्यम्भवति। अतए
व। अस्यानुवाद्यविषत्वादेव। एतदर्थोन्वयः। उद्देश्यस्यसम्बोधनान्तार्थे तपातस्यक्रियायांविधेयभूतायामन्वयः। सम्बोधनपद
स्यकारकवाचित्वव्यवहारोप्येतन्मूलकएवाभियुक्तानाम्· ननुपूर्वोक्तरीत्याबोधेसम्बोधनान्तार्थान्वयस्वीकारेतिङ्· समानाधि
करणेप्रथमेतिवार्तिकविरोधइतिचेत्। एवन्तर्हिसम्बोधनान्तार्थस्यविधेयभूतक्रियायांविशेषणतापन्नोप्यआख्यातार्थस्तत्रैवा
न्वयः स्वीकार्यः। बोधेसम्बोध्यवृत्तित्वस्यतुप्रत्यालाभः। अतएव· सम्बोध्यतावच्छेदकरूपेणसम्बोध्यस्ययत्रसिद्धत्वन्तत्रैवस
म्बोधनविभक्तिस्वीकारादेव· व्यवस्थैवप्रयोगइति· यथारामायणेवाल्मीकीये अयोध्याकाण्डेचित्रकूटेप्रसादनार्थंरामम्प्रति
समागतम्भरतम्प्रतिरामवाक्ये· त्वंराजाभवभरतस्वयन्नराणावन्यानामहमपिराजराण्मृगाणाम्। गच्छत्वम्पुरमद्यसम्प्रहृष्टः संहृ
ष्टस्त्वहमपिदण्डकान्प्रवेक्ष्येइति। यद्येवंराजाभवतिसम्बोधनविभक्त्यन्तभिन्नम्प्रयुक्तम्। इन्द्रशत्रोवर्द्धस्वेतिभागवतेप्रयुज्यमाने
सङ्गच्छतेकथमितिचेदार्षत्वात्। एवंसतियादृशोऽर्थः फलितस्तमाह· राममाम्याहीत्यादाविति· एवञ्चयद्रूपावच्छिन्नस्यस
म्बोध्यताप्रतीयतेतद्रूपावच्छिन्नएवत्वम्पदस्ययत्रप्रयोगस्तत्रपरामृश्यते। सम्बोध्यतावच्छेदकत्वोपलक्षितधर्मावच्छिन्न।
स्ययुष्मदर्थत्वात्। अतएवसम्बोधनविभक्त्यन्तसमानवचनकंसमानविभक्त्यन्तमेवत्वमित्यादिपदंसाधुयत्रतुविधेयभूतक्रिया
वाचकन्नश्रूयतेतत्रवाक्यार्थपर्यवसानाययत्किंचित्स्थलन्दर्शयति। त्वजानिदेवदत्तेत्यादि· यत्रतुदेवदत्तत्वम्पण्डितइत्येवोक्तन्त
त्रअसीत्यध्याहारः। अतएवविधेयभूतक्रियावाचकम्पदंलोडाद्यन्तमेवप्रयोक्तव्यमितिनियमइतिदिक्· ननुजानीहीत्यादेरध्या
हारेएकतिङ्वाक्यमितिलक्षणानाक्रान्तत्वात्तेषुनिघातादीनाम्प्रवृत्तिः कथंस्यादतआह· एकतिङिति· श्रूयमाणैकतिङीत्यर्थइ।

त्यत्रवहुव्रीहिः।इदंसमाधानम्प्राचीनरीत्या यदितुप्रविशपिण्डिमित्यत्रेववाक्यैकदेशन्यायेनवोधःस्वीक्रियते।ध्याहारपदार्थो
पिसएवाश्रीयतेतदायथाश्रुतमेवसाधु।उद्देश्यविधेयभावस्यकुतोलाभइत्यतआह उद्देश्यविधेयभावइति अभिमुखीभव
नानुकूलव्यापारमाह अभिमुखीति अतएव सम्बोधनविभक्त्यन्तस्यविधेयभूतक्रियायामन्वयादेव यदिधिक्शब्देनयोगःस्या
त्तदाद्वितीयास्यादितिप्रथमान्तसाध्याहृतोयोऽसीतिशब्दस्तत्प्रतिपाद्यक्रियायामन्वयः।अनध्याहारे असीतिशब्दानध्याहारे।तदा
धिक्शब्देनयोगेद्वितीयाभवतीतिभावः इतिप्रथमाविवरणम्।कारकइत्यधिकृतस्योत्तरसूत्रैकवाक्यतयावोधकत्वन्तदास्याद्यदित
दर्थपरिज्ञानंस्यात्तस्यार्थमाह कारकत्वमित्यादिना कारकशब्दःकरोतिकर्तृकर्मादिव्यपदेशानितिविवक्षयाक्रियापरः।जन
कमित्यध्याहारःसप्तम्यर्थोनिरूपितत्वम्।तस्यजनकशब्दार्थैकदेशजनकतायामन्वयः।एतेनक्रियाजनकत्वङ्कारकत्वमित्यर्थोदु
क्तम्भवतिकारकाधिकारप्रयोजनमाह ब्राह्मणस्येति अकथितञ्चेतिसूत्रमपादानादीनाम्प्रसक्तिपूर्वकाविवक्षायांसर्वथातदवि
वक्षायाञ्चप्रवर्त्ततेइत्यग्रेवक्ष्यते।एवञ्चब्राह्मणस्यपुत्रमित्यत्रसर्वथातदप्राप्तिसत्वादकथितञ्चेत्यनेनकर्मसञ्ज्ञाप्राप्तिःस्या
त्कारकाधिकारेकृतेसतितुब्राह्मणस्यकारकत्वाभावात्।कारकत्वाभावमुपपादयति पुत्रेणान्यथासिद्धेति जनकत्वस्यान्यथा
सिद्धत्वेनज्ञिन्नमन्यथासिद्धमित्यन्यथासिद्धिसत्वेनकारकत्वाभावात्।अतएव कारकाणांक्रियाजनकत्वादेव स्वस्वावान्तरक्रि
याद्वारेति स्वस्वनिष्ठफलोत्पत्त्यनुकूलक्रियाद्वारेत्यर्थः।सर्वस्मिन्नेवकारकत्वेनाभिप्रेतेफलानुकूलक्रियास्त्येवएतावान्परंवि
शेषः।यदापन्निष्ठक्रियायाःप्राधान्येनधातुवाच्यत्वविवक्षातदातस्यकर्तृत्वम्।काष्ठम्पचति।स्थालीपचतीतियथा।यदातुतत्त
न्निष्ठव्यापारस्यप्राधान्येनधातुवाच्यत्वविवक्षातदातेषान्नकर्त्तृत्वम्।किन्तुकरणत्वादिकम्।तदुक्तंहरिणा वस्तुतस्तदनिर्देश्य

न्नहिंवस्तुव्यवस्थितम्।स्यात्वापश्यतइत्येषाव्यवस्थादृश्यतेपतइति।ननुपक्षासन्निधानेस्थितःसन्मस्वन्नविप्राद्देहीतिदातारं
पांचतेतदमनन्तरंसददाति तदासम्प्रदानम्व्यापारस्यदानक्रियापूर्वकालिकत्वात्सम्भवतिकारकत्वम्।यदातुसोऽसन्निहितः।अथ
चममसापात्रमुद्दिश्यजलमध्येजलङ्क्षिपेत्।दातातत्फलमाप्नोतिप्रतिग्राहीनदोषभागित्युक्तत्वेनतादृशसम्प्रदानमुद्दिष्टस्तदा
तद्व्यापारस्यकथङ्कारकत्वन्तस्मिन्व्यापाराभावादतआह·असन्निहितेति·स्वज्ञानपूर्वकालत्वेनेति·स्वज्ञानम्पूर्वकालंयस्याःसास्वज्ञा
पूर्वकालातस्याःभावःस्वज्ञानपूर्वकालत्वम्।यथायागस्यसाक्षात्स्वर्गाव्यवहितपूर्ववृत्तित्वाभावेपिपरमापूर्वद्वारास्वर्गजनकत्व
न्तथाविषयविधयाऽसन्निहितसम्प्रदानजन्यंयत्तद्विषयकज्ञानन्तद्दानक्रियाऽव्यवहितपूर्वकालवृत्तीतिसम्प्रदानस्यापिक्रिया
जनकत्वमस्तीतिभावः।फलस्यापीति·स्वज्ञानद्वाराव्यापारजनकत्वम्·प्रथमफलज्ञानन्ततःफलेच्छाततस्तदुपायान्वेषणान्।
तस्तदुपायेफलसाधनताज्ञानन्ततउपायेच्छाततउपायनिष्ठसाध्यत्वाख्यविषयताकाप्रवृत्तिरित्येवङ्क्रमेणफलस्यक्रियाजन
कत्वमितिभावः·बौद्धघटादेरिति·बुद्धिसन्नासमाविष्टस्यघटशब्दवाच्यत्वात्।स्मृत्यादीनामिति·आदिनाघटङ्करोतीत्यादिसङ्ग्र
हः।अत्रक्रियापरइति·इदमुपलक्षणाम्।तथायुक्तम्।स्वहेरीप्सितः।वारणार्थानामितिसूत्रेष्वप्यरूढएव·अयम्भावःकर्तुरिति।
नशेषेषष्ठी।पैठनीलोजायतामितीच्छयानीलङ्करोयत्रप्रवृत्तिस्तत्रपटेनीलङ्करोतीतिप्रयोगानुपपत्तेः।अधिकरणासत्त्वावाधि
त्वापटस्यकर्मत्वस्यात्किन्तुकर्तुरितिकर्त्रेरिषष्ठी।एवंसत्यस्यरूढत्वेकर्तृषष्ठ्यन्तस्यान्वयापत्तिरतः क्रियाशब्दोसमिति।न
चाक्षिप्तक्रियायामन्वयोभविष्यतीतिवाच्यम्·श्रौतक्रियान्वयसम्भवेआक्षिप्तक्रियान्वयमादायकारकोपपादनन्नोचि
तमित्याशयात्।स्पष्टञ्चेदमिति·नत्रहिकिमुदाहरणाम्।माषेभ्योगांवारयति।भवद्यस्माषानगावःशस्माषाइप्सिताःस्युः

यस्यतुखलुगावोनमाषाः कथन्नस्यमाषाईप्सिताः स्युः।अभिप्रेतपर्य्यायमीप्सितशब्दम्मन्यतइतिकैयटः।तस्यापिमाषाएवेप्सि
ताः।एवकारोभिन्नक्रमः।माषाईप्सिताएवेत्यर्थः।आतश्चेप्सिताः यवेभ्योगांवारयति।अत्रकैयटः।ई[illegible]शब्दआ
श्रीयतेनतुरूढिशब्दः तत्रवारणाक्रियथापरकीयाअपिमाषाबारयितुमीप्सिताभवन्ति।मानशब्देनतेइत्[illegible]।सौगांवारय
ति।इहकूपादन्धंवारयतीतिकूपेऽपादानसञ्ज्ञानप्राप्नोतिनहितस्यकूपईप्सितः।कस्तर्ह्यन्धः।ईप्सितशब्दस्यरूढत्वाभिप्राये
णाप्रश्नः।तस्यापिकूपएवेप्सितः।पश्यत्वयमन्धःकूपम्मापप्तदितिक्रियाशब्दमेवेप्सितशब्दत्वमेवेप्सितशब्दस्येत्यभिप्राय
इति· मतिरिच्छेति· पुनर्ग्रहणात्।एवंसतिपाटशीवाक्यार्थःसम्पन्नस्तमाह· एवञ्चेति· आप्तिशब्दस्यव्याप्तिपरत्वभ्रम
निरासायाह· आप्तिश्चात्रेति· कर्त्ताचकेनाप्तुमिच्छतीत्याकाङ्क्षायाः शान्तयेआह· कर्त्तृपदार्थविशेषणीभूतेति· प्रधानीभू
तव्यापारस्यैवकर्त्तृपदार्थघटकतयातादृशव्यापारेणासम्बन्धस्यचतज्जन्यफलाश्रयत्वरूपस्यप्रकृतेग्रहणमितिभावः
फलेव्यापारजन्यताचसाक्षात्परम्परासाधारणीतिनतण्डुलम्पचतीत्यत्रसाक्षात्प्रधानीभूतव्यापारजन्यविक्लित्त्यादिफ
लस्यकर्मत्वमुपपादयति· फलस्यापीति· फलसम्बन्धित्वात्फलाश्रयत्वात्· अतएव· फलस्यकर्मत्वादेव· कर्मत्वसिद्धिः
कर्मसमानाधिकरणास्यकर्मत्वन्याप्यमेवेतिभावः।अत्रेदम्बोध्यम्।व्यपदेशिवद्भावेनफलाश्रयत्वात्।फलस्यसकर्मत्व
न्नसकर्मकधातुस्थलएव· किन्त्वकर्मकधातूपस्थाप्यफलाश्रयस्यापि· आस्तेशेतेइत्यादौकर्त्तुःकर्त्तृसञ्ज्ञयावाधान्नकर्म
त्वम्।व्यपदेशिवद्भावेनफलाश्रयस्यतुभवत्येवअतएवओजःसहोम्भसावर्त्ततेइतिसूत्रादर्त्ततइत्यनुवर्त्तमाने तद्वाच्यक्रि
यायाःसमानाधिकरणाङ्कर्मवाचकन्तस्मात्यनुपूर्वमीपलोममकूलमितिसूत्रेतदित्युपात्तम्।अत्रफलस्यकर्त्तुरितिसूत्रेणाक

मित्वम्भवत्येव· बाधिकायाः कर्तृसञ्ज्ञाया अप्राप्तेः।फलेनकर्मणासकर्मकत्वव्यवहारस्तुन·एतादृशकर्मणः सर्वत्रैवस
म्भवेनाकर्मकत्वव्यवहारस्यैवोच्छेदापत्तेरिति·।महासञ्ज्ञाक्षिप्तमिति·करोतीतिकारकमितिकिङ्करोतीतिप्रश्नेसाध्यत्वेनयो
र्थः।प्रतीयतेतन्निरूपितसाधनत्वमेवग्रहस्वत्तेसाचक्रियैवनतुद्रव्यमनन्तस्वभावतः सिद्धत्वेनैवभासते।एतत्पक्षेएकसञ्ज्ञाधिका
रात्सञ्ज्ञाद्वयविधानेपिपर्यायः स्यादितिद्वयोः समावेशसिद्धयेकारकंसदित्युक्तम्।गतिकारकोपपदादितिसूत्रेकारकशब्देन
कारकसञ्ज्ञकस्यैवोपस्थितिः एवमेवैतदधिकरणोक्तकर्त्रादिसञ्ज्ञासुबोध्यम्·तेनग्रामेवासइत्यादौकारकत्वात्कृदुत्तरपदप्र
कृतिस्वरस्थाथघञितिविहितोऽधिकरणत्वात्सप्तमीचसिध्यति।भाष्योक्तम्प्रथमपक्षमुक्त्वाद्वितीयपक्षमाह·यद्वेति·तत्रस्यै
वमुक्तम्।यावद्ब्रूयात्क्रियायामितितावत्कारकेइत्युक्तम्।एवञ्चकृत्वानिर्देशउपपन्नोभवतिकारकेइति।कारकशब्दस्यक्रि
यापरत्वेयुक्तिमाह· करोतिकर्तृकर्मादिव्यपदेशानिति· कारकइतिवैषयिकाधारेसप्तमीतदाह· विषयत्वमिति·स्वरित
त्वमिदन्दोषविशेषरूपङ्कारकशब्देबोध्यम्।स्वरितेनाधिकारइतिसूत्रस्यस्वरितेनाधिकङ्कार्यमित्यर्थादेतदधिकारोक्तस
ञ्ज्ञाविशिष्टस्यैवग्रहणमित्येवकार्यम्प्रकृतेग्रस्यते।नटश्रवणमिति·अत्रनटस्यश्रवणक्रियाजनकत्वेपितस्यैतदधिकारो
क्ताः कर्त्रादिसञ्ज्ञाः।कृदुत्तरपदप्रकृतिस्वरइति·उत्तरपदेश्रवणशब्देल्लितीतिसूत्रेणप्रथमाकारस्योदात्ततयासमुदायो
मध्योदात्तः स्यात्कर्त्रादिसञ्ज्ञाविरहात्तुन भवति।आदिनानरश्रुतिरित्यस्यसङ्ग्रहः समावेशफलन्दर्शयति·ग्रामेवासइति·
अत्राधिकरणसञ्ज्ञाकारकसञ्ज्ञयोः समावेशेसप्तमीथाथादिस्वरयोः सिद्धिः।प्रथमपक्षेद्वितीयपक्षेआह· तत्[illegible]सिद्धिरि
ति·थाथादिस्वरसिद्धिरित्यर्थः।यत्तुकृदुत्तरपदप्रकृतिस्वरस्यपूर्वमुक्तत्वात्तत्पदेनतस्यैवपरामर्शइतितन्न·थाथादिस्वरः।

भै·
२०९

क्रियायाः। पयोलाभेच्छाप्रयोज्यत्वन्तत्क्रियाया अतः पयउद्देश्यकत्वमितिभावः। विशिष्टोपादाने तु यथा नातिप्रसङ्गस्तथोप
पादयति· ईप्सिततमेति· तदा पयसः संस्कारकत्वमात्रविवक्षा न तु प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यफलाश्रय
त्वविवक्षेति भावः। यदा तु संस्कारकत्वेन करणत्वस्य फलाश्रयत्वेन कर्मत्वस्य च विवक्षा तदा परत्वात्कर्मत्वमेव भवति। तम
स्येति· तन्मात्रस्येत्यर्थः। तमपग्रहणाभावे कर्तृवृत्तिव्यापारवाचकधात्वर्थफलाश्र[illegible] यस्य पस्यतरस्य सर्वस्य कर्मत्वप्राप्तौ
वारणार्थो नामित्यनवकाशं सद्द्वारपतियोगे कर्मसंज्ञाबाधकमेव स्यादित्येतदुपपादयति· तदभावे हीत्यादिना· ननु प्रवृ
त्तिविघातस्यैव वारयत्यर्थतया संयोगस्य कथन्तदुपस्थाप्यत्वमत आह· वारयते श्चेति· संयोगादीत्यादिपदेन भक्षणादिस
ङ्ग्रहः· उभयत्र सूत्रद्वये· तमप्ग्रहणे हि यथा माणवकस्य कर्मत्वम्भवति तथाह। तमपूग्रहण इति· ईप्सितमात्रे प्रकृत
व्यापारवाचकधातूपस्थाप्यफलाश्रये कूपाम्यादौ। व्यापारप्रयोज्यप्रकृतधात्वर्थेति· एवञ्चैतादृशप्रयोज्य[illegible]लाभफलक
तमपूग्रहणमिति भावः। प्रत्यासत्तीति· कर्तृपद[illegible]र्थतावच्छेदकतया प्रकृतधात्वर्थप्रधानीभूतव्यापारलाभे तत्फलस्य शी
घ्रोपस्थितिकत्वात्तत्रापि प्रकृतत्वलाभः· प्रकृतधात्वर्थप्रधानीभूतव्यापारजन्येति परित्यज्य प्रयोज्येति[illegible]न्निवेशितन्तत्प्रयो
जनमाह· प्रयोज्यत्वनिवेशादिति· नन्वाधारनिरूढ्यर्थमित्यनुपपन्नम्फलाधारस्यैव कर्मसंज्ञाविधानादत आह· कर्तृकर्म
द्वारेति· एवञ्चान्वयस्य कर्तृकर्मद्वारा धात्वर्थाधारत्वं स एवाधार इत्युच्यते। तण्डुलम्पचतीत्यादौ तण्डुला[illegible]दिकन्[illegible]तादृशपर
म्परयाधार इति भावः· कर्मणि द्वितीयेत्यादिसूत्राणां स्वसिद्धान्तरीत्या अर्थमाह· कर्मपदेनैतदिति· क[illegible]र्मत्वे[illegible]ति· ए
वं सति शाब्दबोधेऽपि कर्मत्वशक्तिमत्त्वेन· ननु कर्मणि द्वितीयाया एवं विधानन्तत्त्वविभक्तेरिति द्वितीयादीनामित्यसङ्गतमिति

२०९

चेन्न·गत्यर्थकर्मणीतिसूत्रविहितचतुर्थ्याकर्त्तृकर्मणोरितिसूत्रविहितषष्ठ्याश्चसङ्ग्रहार्थेन्नथाकथनात् क्रियाकारकसम्ब।
न्धश्चेति·क्रियाकारकभावः क्रियात्वकारकत्वसमूहः तद्रूपः सम्बन्धश्चेत्यर्थः।कर्मत्वादिशक्तिवि[illegible]यादि
पद्वाच्यत्वेकर्मणिद्वितीयेत्यादिसूत्रंसाधकमितिसुप्रसिद्धमेव।सम्बन्धस्यवाच्यत्वेतुभाष्यंसाधक[illegible]ह·रा[illegible]षडित्ये
ति·एतेनाश्रयत्वेनाश्रयस्यवाच्यत्ववादिप्राचीनमतन्निरस्तम्·एवंसतियादृशोबोधस्तमाह·एव[illegible]ति·अनभिहितइति
सूत्रंयथाव्याख्यातन्तम्प्रकारमाह·पञ्चकेत्यादि·एतदभावेपीति·एतयोःसूत्रयोरभावेपीत्यर्थः।तत्रपदे[illegible]कर्म[illegible]णीस्यस्यनिश
मार्थत्वपक्षेइत्यादि·भाष्यप्रसिद्धप्रत्याख्यान[illegible]कारमुक्त्वाऽनभिहितसूत्रारम्भवादिसूत्रकारमतआह·यदा[illegible]ति·तत्त्वम्·
वाच्यत्वम्·सूत्रम्·अनभिहितइत्येतत्।द्वयोःपक्षयोर्मध्येद्योतकतापक्षएवमुख्योभाष्यसम्मतत्वात्।न[illegible]पञ्चकत्वेप्रा
तिपदिकार्थेस्तदाकर्मादिषुविभक्त्यर्थत्वव्यवहारस्यभाष्यसम्मतस्यकागतिरित्तआह·भाष्यइति·विभक्त्यर्थ[illegible]त्वव्यवहारइ।
ति·सुपाङ्कर्मादियोप्यर्थाःसङ्ख्याचैवतथातिङामित्यत्रतथाव्यवहारइत्यर्थः।ननुद्योतकविषयेउक्तार्था[illegible]मितिन्याय।
स्यव्यभिचारःपूर्वत्रदर्शितइतिकथन्तन्म[illegible]तमाश्रित्यप्रत्याख्यानमतआह·द्योतका[illegible]षयइति·दृश्यातइति·तत्रत्यपूर्वप
क्षइतिशेषः।तत्र·तत्सूत्रस्यभाष्येकेवलद्योतकस्थलमाह·अतएवेति·द्योतकविषये[illegible]पाङ्गीकारादेव·२२ अतएव·तन्नस
ञ्चकस्यतन्नद्वाच्यत्वादेव·अतएव·उक्तपञ्चकस्यधातुवा[illegible]त्वा[illegible]व·तद्दन्नात्·भावकर्मवाचकात्।उभयत्र·प्रातिपदिकस्थलेधातु
स्थलेच।एवञ्चहरिम्भजतीत्यादितःकर्मीभूतहरिकर्मकम्भजनमितिरीत्याबोधः।अतएवसत्वप्रधानानिनामानीतिवाक्यस्वार्थो
दिनिरूपितप्राधान्यंयतोनामार्थस्यातःसाधुसङ्गच्छते।पचतीत्यादौचैककर्तृविशिष्टावर्त्तमानापचिक्रियेतिरीत्याबोधः।ननु

प्रातिपदिकार्थे प्रथमैवेत्यपि कथन्तत्राप्यनभिहिताधिकारादत आह साहीति अत एव कर्मादीनामभिधानस्थले प्रथमायाः स
र्वसम्मतत्वादेव विशेषणात्सेति भीष्मपदाद्द्वितीयेत्यर्थः। एकगुणानप्रत्याख्यान आह यदात्विति एतन्मञ्जूषायादिकमेव।
शक्तिविशेषरूपत्वदीयपत्तिसुष्ठुसम्भवति। प्राचीनमतन्तु फलाश्रयत्वमाश्रयता च भेदेनभिद्यतेतुनाश्रय क्षेदीयद्यप्य
स्तितथाप्याश्रयतावच्छेदकभेदादाश्रयताभेदमङ्गीकृत्य यथाकथञ्चिल्लगनैया अत्र यथा यथाश्वेनयथा दीपिकपानि
शायाङ्ग्रामम्ब्रजति चैत्र इत्यादौ सर्वेषाङ्कारकाणां स्वात्वर्थे स्वातन्त्र्येणाविशेषणतया यस्तथाकटभीष्ममित्यादावपिस्वा
तन्त्र्येणोभयोः क्रियायाम्प्रकारकत्वं शाब्दबोधे पर्ण्किन्नु परस्पराभेदावगाहिमानसमितिसन्त्रयुक्तमित्याशयेनाह बाधस्त्विति
नयोः। द्वितीयान्तपदाद्द्वयार्थयोः। विशेष्यविशेषणभावेनेति इतरसम्बन्धानवच्छिन्नविशेषणविशेष्यभावेनैत्यर्थः समा
नविभक्तिकनामार्थयोरसतिबाधके भेदान्वयसौत्सर्गिकत्वात् भेदान्वबोधसामग्र्यभावसाम्पादनायकिञ्चित्प्रतिबन्धकङ्कल्प
नीयमिति गौरवम्। किञ्चैतद्वाक्यजन्यशाब्दबोधानन्तरङ्कटो भीष्मो नवेति सन्देहनिवृत्त्यर्थन्नियमेनतादृशमानसकल्पनाका
र्य एवं सति सामानसव्यक्तिरूपस्त्रागभावरूढं सम्बन्धकल्पनीयइत्यति गौरवम् किञ्चप्राचीनमतेकटभीष्ममितियाकारकवपज
न्यशाब्दबोधसामग्र्याः स्वातन्त्र्येण भाभिन्नः कटः सुन्दर इत्याकारकविशिष्टवैशिष्ट्यमितिरीत्यायत्प्रत्यक्षन तन्तिबन्ध
त्वङ्कल्पनीयमित्यति गौरवमसन्मतेतु शाब्दसामग्र्याः कटो भीष्म इत्याकारकयोग्यताज्ञानघटिततयातादृश [illegible] त्ववि
शेष्यतावच्छेदकप्रकारकज्ञानात्मककारणाभावादेव तादृशविशिष्टवैशिष्ट्यमितिरीत्यायत्प्रत्यक्षन्तदाणति वारणे शाब्दसाम
ग्र्याः स्वातन्त्र्येण प्रतिबन्धकत्वन्नकल्पनीयमिति लाघवमिति दिक् ननु भीष्ममित्यस्य द्वितीयान्तार्थस्याभेदेन कटे न्वयप्रतीकारेका

रकाणाम्भावनान्वयव्युत्पत्तिभङ्गः इत्य[illegible]ह· कारकाणामिति· अन्वयविषयेतीति· अस्यपद्युच्यतइतिशेषः। नन्वेवङ्कृतः कटः सु
न्दरइत्यत्रकटनिष्ठकर्मत्वस्याभिधाने[illegible] सुन्दरपदार्थनिष्ठकर्मत्वस्यानभिधानात् द्वितीयास्यादतआह· तिङ् कृ[illegible]· यस्यक
र्मेति· साक्षात्परम्परस्येतिशेषः। [illegible]नादिकङ्खण्डयति· अत्रवदन्तीति· कर्मादिपदेइति· अस्योच्चारि[illegible]त्या[illegible]स्थिते
पत्यानविभक्तिवाच्यतावच्छेदकरू[illegible]भानन्तथेतिशेषः। रूपेणः कर्मत्वशक्तिमत्वेनायथावाशाब्दजन्यविकल्पोपस्थित्यपे[illegible]
याविकल्पपदजन्यविकल्पोपस्थितिर्विलक्षणा सत्वासत्वाभ्यान्तयोर्वैलक्षण्यस्यानुभवसिद्धत्वात्· स[illegible]दायश[illegible]येति· औपग
गवइत्यत्रतत्सम्बन्ध्यपत्यमित्यर्थेप्रत्ययविधा[illegible] चित्रगुरित्यत्रषष्ठ्यर्थेबहुव्रीहिविधानादितिभावः। एतदधि[illegible]कारेति· अनभि
हिताधिकारेइत्यर्थः। औपगवश्चित्रगुरित्यत्रष[illegible]पादनन्तदासमुदायात्स्याद्यदाप्रातिपदिकार्थेविधीयमा[illegible]प्रथमपावा
धोनस्यादित्याशङ्कानिवारणायाह· घटइत्य[illegible]वेति· दृष्टानामेवेति· प्रवृत्तिनिमित्तनदाश्रयरूपाणाम्· नद्वि[illegible]त्वस्यैवेति· प्रवृ
त्तिनिमित्ततदाश्रयाभ्याम्भिन्नस्येत्यर्थः। षष्ठी[illegible]मत्वेनदृष्टत्वयेति· अनभिहिताधिकाराभावोऽभिहितानभि[illegible]तसाधारण
सम्बन्धमात्रस्यषष्ठीशेषइतिसूत्रेशेषपदेन[illegible]ग्रहसांख्यात्· अनभिहिताधिकारेतुकृ[illegible]नभिहितसम्बन्धस्यैवष[illegible]ष्ठीवाच्यतया
औपगवश्चित्रगुरित्यत्रप्रतीयमानस्यतुप्रातिपदि[illegible]कनाभिहिततयाऽपंषष्ठ्यवा[illegible]प्रवृत्तिनिमित्तरूपोयंसम्बन्धः। प्राति
पदिकार्थपदेनगृह्यतइतिप्रथमाभवतीतिभावः। अ[illegible]प्रकृतसूत्रेभाष्ये[illegible]णी[illegible]तीयेत्यादिविषये[illegible]धिकारफलमु
क्ताऽन्तेऔपगवश्चित्रगुरित्यत्राधिकारफलमुक्तम्। वस्तुतइदमपितप्रत्युदाहरणाफलमित्याशयेनाह· वस्तुतस्त्विति· अ
त्रेति· भीष्मादौ· नान्या· द्वितीयादयः। एवमभिसम्बन्धमिति· क्रियाकारकभावरूपम्। तेन· अशेषत्वादित्यनेन· अस्मिन्ने।

भै॰
२११

वार्थभाव्यान्तरभा[illegible]साधकमित्याह॰ तदुक्तमिति॰ स्वसिद्धान्तमाह॰ परे त्विति॰ साध्यत्वेननभानमिति॰ यद्यपि शातेनक्रीत
इत्यर्थे शताच्चठन्‌पतावितिसूत्रेणायतिनिष्पन्नस्यशतस्यशब्दस्यशतकरणाकत्र[illegible]णाकर्मबोधकतातथापिप्रत्ययान्तसमु
दायेनोपस्थितायाक्रियातस्यानसाध्यत्वेनभानम्‌ अत एव॰ साध्यत्वेनाभा[illegible]न॰ मन्दुरायांशत्यो॥श्वइतिवाक्यान्वययो।
ग्याक्रियाधातूपस्थितैवनतुतद्धितशक्त्योपस्थिता॰ अ[illegible]त एवसस्त्योश्वोदेवदत्तेना[illegible]प्रयोगः।एवम्प्राप्तोदको[illegible]ग्रामइत्यत्रप्रा
चीनसम्मतबोधप्रक्रियायान्दूषणमाह॰ एवम्प्राप्ते[illegible]त्यादि॰ आदिनाप्राप्तोदकेस्य[illegible]ह॰ कस्य॰ स्यादिति।[illegible]इत्थंचनयुक्त
म्‌।व्युत्पत्तिग्रहयोःसामानविशेषणविशेष्यभा[illegible]वानवगाहिबोधजनकत्वस्यसिद्धान्तिस[illegible]तत्वात्।विशेषणविशे[illegible]ष्यभावव्यत्या
सेदोषमप्याह॰ किञ्चेति॰ प्राचीनसम्मतबोधव[illegible]ान्तरमाह॰ किञ्चेति॰ तादृशबोधेरूपासिद्धिमप्याह॰ किञ्चेति॰ ननुकर्मत्वेङ्क्रि
यानिरूपितन्तुद्रव्यानन्दनिरूपितमितिप्रा[illegible]कर्तानन्दकर्मेतिकथम्बोधइत्यत आह॰ विशेष्यइति॰ आनन्द[illegible]तात्पर्यवसानमि
ति॰ कर्मतानिरूपकत्वपर्यवसानम्‌॰ विशेषणा[illegible]शिष्टेसविशेषणेविधिनिषेधौविशेषणमुपसङ्क्रामतः[illegible]विशेष्यबाध
इतिन्यायात्प्रकृतमाह॰ एवञ्चेति॰ अतएव॰ उ[illegible]तकर्मत्वशक्तिमत्वेनभानाभावादेव॰ कैयटेनोक्तमिति॰ एवञ्च[illegible]कारकशब्दज
न्यप्रतीतिविशेष्याभिन्नप्रतिपादकः परमशब्दोपिनोद्भूतरूधात्वर्थनिरूपितकारकशक्तिमत्प्रतिपा[illegible]कःगा[illegible]कारकोपप।
दादित्यस्यकृत्प्रत्ययप्रकृतिधात्वर्थनिरूपितोद्भूतशक्तिमत्कारकात्परत्वएवप्रवृत्तिरितिभावः।एतच्च[illegible]हरिणा[illegible]क्तम्।स्वप्रा
त्वैरभिधानेतुसधर्मोनाभिधीयतेविभक्त्यादिभिरेवासावुपकाराःप्रतीयतइति॰ सधर्मः शक्तिरूपः वि[illegible]क्त्यादि[illegible]दभि
रित्यादिभिरित्यादिनादोषादिवेत्यादिविभक्त्यर्थेशक्तिप्रधानाव्ययस्यदधिपश्येत्यादौलुप्तविभक्तिकप्रातिप[illegible]सङ्ग्रहः

२११

उपकारः। उपकारकः। स्वावेशेन प्रातिपदिकस्य क्रियाम्प्रति विशेषणानां नियामकः अत एव उद्भूतकारकशक्तिप्रतिपाद
कत्वाभावादेव तस्याः। कारककर्मादिशब्दप्रतिपाद्यशक्तेः। न क्रियान्वयनियम इति द्रव्येप्यन्वयदर्शनात्। [illegible]साधकम
प्याह अन्यथेति विभक्तिप्रयोजकरूपेण उद्भूतकर्मकत्वशक्तिमत्वेन एवञ्चाभिधानविषये प्रातिपदि[illegible]सोद्भू[illegible]क्तिवि
शिष्टार्थेन द्वितीयेति न तत्र सा सा विभक्तिः। पूर्वोक्तार्थभाष्यान्तरमपि साधकमाह ध्वनितश्चेदमिति अत्र चोप्यर्थे। सूत्राप्राप्तिमुप
पादयति सुप इति तत्रास्येवमुक्तम्। अथेहकथं चाभवितव्यमिष्टः पुत्र इष्यते पुत्रः केचित्तावदाहुः। न भविता[illegible]मिति किङ्कारणं स्व
शब्देनोक्तत्वात् स्वशब्देनेति इष्टशब्दसामाना[illegible]करण्यात् पुत्र इत्यनेन निर्भुक्ते विक्रियापेक्षकर्मभावस्याथस्य प्र[illegible]तिपादनादित्या
र्थः अयमर्थः यदा क्रियाफलस्य कर्मणः प्राधान्[illegible]प्रतिपिपादयिषितन्तदा वाक्यमेव प्रयुज्यते पुत्र इष्ट इत्यादि[illegible]तु कञ्जनाःगन
स्याकर्मकत्वात्कर्मणि प्रत्ययानुत्पादादिति कैय[illegible]। अपरस्त्वाह भवितव्यमिति किङ्कारणम् धात्वर्थे यद्भ[illegible]वि[illegible]यते स च धा
त्वर्थः केनचिदेव शब्देन निर्देष्टव्य इति। स च धा[illegible]र्थ इति इच्छायाः प्रत्ययार्थत्वन्दर्शयितु वाक्यमुपादेयम् तत्र वाक्ये कर्तृप्र
त्ययः प्रयुज्यताम्। कर्मप्रत्ययो वा प्रत्यये तू[illegible]कर्मकत्वात् कर्मप्रत्ययो न भवति। इ[illegible]वन्तस्तावदाहुः। न भवितव्यमिति। स
मानार्थेन वाक्येन भवितव्यम्प्रत्यपा[illegible]चायश्चेहार्थो वाक्येन गम्यते इष्टः पुत्रः इष्य[illegible]तिनासौ जातुचित्प्रत्यया[illegible]न गम्यते नासौ
जातुचिदिति प्रत्ययान्तस्याकर्मकत्वात्कर्मणि प्रत्यया[illegible]त् इति कैयटः। प्राच्यान्[illegible]रोक्तस्येति तिङ् कृत्तद्धि[illegible]समासैरिति न
परिगणानङ्किन्तूदाहरणमात्रमिति तद्भावः। प्राचाम्मतन्दूषयन्स्व[illegible]मतमाह परेत्वि[illegible]ष्यन्त इत्यध्याहारः। इदमपि पररीत्या स्वमते
तु अन्यत्राध्याहार[illegible]दार्थ उक्तः। अन्यथा तदनध्याहारे अन्याप्यमिति यद्यप्येतर्हि सिप्रतीदानीमधुना साम्प्रतन्तथेति कोशात्स॥

वै·
२१२

प्रतमित्यव्ययमिदानीमित्यर्थकमितिप्रतीयते।तथापिनिपातानामनेकार्थतयाएवमव्याख्यातम्।एवममुत्रारदइत्यत्रापीत्यत्रे
तिशब्देनोक्तत्वान्नद्वितीयेतिप्राचोक्तंखण्डयति।एवमिति·अतएव·तिङ्कृत्तद्धितसमासैरितिपरिगणनादेव·समासइति·नि
पातेनाधिकरणोक्तेपिसप्तमीभवतीतितदन्तस्यसमास[illegible]र्थः।ननुनिपातेना[illegible]तेप्यधिकरणवचनसामर्थ्यात्सप्तमीत्यन्यत्रो
क्तमेवेसतआह· तद्वचनेति·अतएवेति·परिगणनादेव·तत्तच्छक्तिमत्वेन·अधि[illegible]वादिशक्तिमत्वेन।अत्रसाधकमाह·श
क्तशक्तीति·नदोषः।नसम्प्रम्पाअनुपपत्तिः तत्त्वञ्चेति·तथायुक्तत्वञ्चेत्यर्थः।उपक्रमस्थाभि[illegible]योक्तमुदाहरणमन्यथासिद्धंयद्यपि त
थापितत्रस्यमुख्यमेवोदाहरणंवक्तुमुपक्रमते·[illegible]राधीनेति·नदर्शनोद्देश्याइति· एतेनप्रकृतधात्वर्थप्रधानीभूत[व्या]पारप्रकृत
धात्वर्थफलाश्रयत्वेनोद्देश्यत्वाभावान्नपूर्वस्य[illegible]णाकर्मत्वसिद्धिरितिभावः।तच्चेति· द्विधेतिशेषः।तथात्रणादे[र]पीति·एतेनत
द्दशफलाश्रयत्वेनोद्देश्यत्वाभावःसूचितः।तृ[णा]देरपीति·समभिव्याहृतधात्वर्थफलसंयोगस्तदाश्रयत्व[ञ्च]तृणादेरस्तीति
नथायुक्तत्वमस्ति।अनीप्सितपदप्रयोजनमाह·[अ]नीप्सितपदाभावइति·वारणार्थानामित्यनवकाशःस्यादिति·तथाचयदाय
वेभ्यागवांवारणायदण्डोद्यमनादिकङ्कृतन्तेनैवव्यापारेणगोषुसञ्चरन्त्योमहिष्योपिवारिताभवन्तितात्[द]शस्थलेपूर्वेभ्योमहि
षीर्वारयतीतिप्रयोगोनस्यादनी[प्सि]तमहिष्याअप्यपादानत्वस्यप्राप्तिरितिविशेषणोदनमितिशतधाधौ[illegible]नस्यघृतस्योद्देश्यत्वेपि
सितपासंयोगेउपकारकत्वज्ञा[ने]तस्यकारकत्वज्ञानेनतस्यकरणत्वविवक्षेतिभावः।तत्तत्वेत्विति· तथायु[क्त]मि[ति]तिपक्षत्वे
त्वित्यर्थः।तादृशस्थलेविषयस्यस्वव्यापारजन्यत्वसम्बन्धेनप्रधानीभूतव्यापारएवान्वयविवक्षान·तुगत[illegible]र्थः[illegible]पफला
श्रयत्वस्यविवक्षेतिभावः।एवम्प्रयागात्काशीङ्गच्छतीत्यत्रप्रयागस्यप्रकृतधात्वर्थफलसंयोगस्तदाश्रयत्वाविवक्षानेत्य

२१२

न्निमित्तत्वायकल्प्यते। आस्यतेमासः।मासमास्यतेदेवदत्तेनेत्तियथा· अत्रद्रव्यपदङ्कालादिभिन्नद्रव्यसामान्यपरम्· तेनका
लादेरपिलिङ्गसंख्यान्वयित्वरूपद्रव्यत्वसत्वेपिनक्षतिः।गतिबुद्धीतिसूत्रेयच्छब्दकर्मेकपदन्तद्याचष्टे· शब्दःकर्मका
रकमिति· व्याख्यानादिति· कृत्रिमाकृत्रिमन्यायेनकर्मशब्दस्यकर्मसञ्ज्ञकपरत्वस्यौचित्यमूलकादित्यर्थः किञ्चप्रकृ
तसूत्रेकर्मग्रहणोपपादनमूलकादित्यर्थः।अन्यथाऽर्थशब्दस्योत्तरत्रसम्बन्धेनगतिबुद्धिप्रत्यवसानशब्दार्थाकर्मकाणा
मित्येवब्रूयात्।तेन·तादृशव्याख्यानेन।ज्ञापयतीति· अनयोः शब्दार्थकत्वेपिशब्दःकर्मकारकंयेषान्तादृशार्थकत्वन्ना
स्तीत्यर्थः।एतत्सूत्रघटकंणिच्यदंहेतुमणिणाचएवबोधकमत्रमानम्व्याख्यानमुपवर्णितन्तदेवप्रकटयति· अतएवेति
हेतुमण्णिाच्चपरत्वादेव।इतिबोध्यमिति· णिचूसामान्यपरत्वेऽरायन्तावस्थानत्रनसम्भवतीतिभावः।गतिबुद्धीतिसूत्र
स्यनियमार्थत्ववास्दिमत्तमुपपादयति। अत्याननधीनत्वेत्यादिना· अन्तरङ्गादपीत्यपिनापरत्वोपजीव्यत्वयोःसमुच्च
यः।भाष्यकृतइति· तत्रहिकथमिदंविज्ञायतेहेतुमत्यभिधेयेणिज्भवतीति आहोस्विद्धेतुमतियोधातुर्वर्त्ततइतिरीत्या।
विचारेत्रस्तुप्रकृत्यर्थविशेषणमित्युक्तम्।अत्रकैयटः।विनापिणिचापञ्चभिर्हलैः कृषतीतिप्रयोजकव्यापारावगमा
त्प्रकृत्यर्थत्वेहेतुमत्तउपपद्यतइति।कोदोषः।इहहिउक्तःकरोति।प्रेषितःकरोतीतिणिच्प्राप्नोति।प्रकृतिविशेषणत्व
पक्षेयथाप्रकृत्याभिहितेप्रयोजकव्यापारेणिज्भवति।एवमुक्तप्रेषितादिशब्दाभिहितेपिप्राप्नोति।हेतुमद्विषयत्वात्करो
त्यर्थस्याप्रत्ययार्थविशेषणत्वेतुउक्तार्थत्वाण्णिजभावः।इहतर्हिपाचयत्योदनन्देवदत्तोयज्ञदत्तेनेतिउभयोःकर्तृत्वेनाभि
धानम्प्राप्नोति।प्रत्ययार्थविशेषणेसत्यपिनदोषः।प्रधानकर्त्तरिलादयोभवन्ति।प्रधानकर्तृत्वेनाभिधीयते।यश्चात्राप्र

धानंसिद्धान्तेतत्रग्रन्तीयाकर्त्तरीत्येवोक्तम्· अत्रप्रधानकर्त्तृत्वेनाभिधीयतइत्युक्त्याप्रधानाप्रधानसन्निधौप्रधानकार्य
स्यबलवत्त्वंसूचितम्· ततोग्रेप्रत्ययार्थविशेषणपक्षएवपाचयत्योदनंदेवदत्तोयज्ञदत्तेनेतिप्रयोज्येकर्त्तरिकर्मसञ्ज्ञाप्रा
प्नोतीतिशङ्कायामेवंसमाहितम्।गतिबुद्धिप्रत्यवसानार्थशब्दकर्मकाणामणीत्येतन्नियमार्थम्भविष्यति।एतेषामेवण्य
न्तानांयःकर्त्तासणौकर्मसञ्ज्ञोभवतिनान्येषामितिएवमुक्तम्भाष्ये।अत्रकैयटः।ण्यर्थस्यप्राधान्यात्तेनेप्सितस्यप्रयोज्यस्य
सिद्धाकर्मसञ्ज्ञा नचस्वव्यापारापेक्षयास्वातन्त्र्यात्परत्वात्कर्त्तृसञ्ज्ञाप्राप्नोतीतियुक्तंवक्तुम्· प्रयोज्यव्यापारस्याप्रधान्या
त्प्रधानाप्रधानव्यापारसन्निधौचप्रधाननिमित्तस्यकार्यस्यप्रयुक्तत्वान्नियमेनतुप्रधानकार्यव्यावृत्तौगुणनिमित्तकार्यसा
द्भावात्कर्त्तृत्वम्भवत्येव· तदुक्तंहरिणा।गुणक्रियायांस्वातन्त्र्यात्प्रेषणेकर्मताङ्गतः।नियमात्कर्मसञ्ज्ञायाःस्वधर्मेणाभिधी
यतइति· कैयटेस्पष्टमिति· तत्रस्थेवमुक्तम्।गुणप्रधानसन्निधौप्रयोजकत्वेसम्भवतिपृथग्गुणास्तद्विरुद्धंस्वकार्यन्न।
प्रयुञ्जते।ततश्चसिद्धायाम्प्रयोज्यस्यकर्मसञ्ज्ञायाङ्गत्यर्थादीनामेवाण्यन्तानाङ्कर्त्ताकर्मसञ्ज्ञोभवतिनान्येषामितिनिय
मः क्रियते।तेनपाचयत्योदनन्देवदत्तोयज्ञदत्तेनेतिकर्मसञ्ज्ञानभवतीतिनियन्तृकर्त्तृकेति· अत्रनियन्तापशुप्रेरक
मात्रम्· गत्यर्थत्वाभावेपीति· प्रापणाहिप्राप्त्यनुकूलव्यापारानुकूलव्यापारः।प्राप्तिश्चसम्बन्धमात्रन्नतुसंयोगएव।सुख
म्प्राप्नोतिविद्याम्प्राप्तइत्यादौसंयोगाभावेपिप्राप्तिव्यवहारादितिभावः अतएव· प्राप्त्यर्थकस्यगत्यर्थकत्वाभावादेव· इत्ये
वेति· अत्रगत्यर्थत्वाभावेननियमेनकर्मत्वाप्राप्तेः।ध्वनितन्नगतीतिसूत्रइति· तत्रस्युक्तन्नवहिर्गत्यर्थइति।नवेतिसू
त्रेचेति· तत्रस्थुभयत्रविभाषागणानावसरेहृक्रोरित्युभयत्रविभाषेत्युक्ताप्राप्तेऽव्यवहरतिमुदाहृत्याप्राप्तेहरतिभारु

न्देवदत्तोहारपतिदेवदत्तमित्युक्तम्· अत्राप्राप्तइत्यनेननप्राप्त्यर्थस्यगत्यर्थत्वाभावः सूचितः।नन्वेवन्नीवह्योर्नैत्य +॥
नेनपक्षेस्रायन्नावरायन्नावस्थायांयः कर्त्तातस्सरायन्तावस्थायाङ्कर्मसञ्ज्ञाप्राप्तिरेवनेतिनीयग्रहणाम्व्यर्थमतआह।· +॥
नयतेस्त्विति· अत्रनयतेस्त्वितितुनातस्यापिनगत्यर्थत्वमितिनीग्रहणमुक्तनियमलभ्याप्राप्त्यनुवादइतिध्वनित +॥
म्।हिंसाद्यइति· बहुव्रीहिः हिंसादुःखोत्पत्त्यनुकूलोव्यापारःसाङ्गम्फलंयस्येत्यर्थः।मूलकारोक्तङ्खरादयतिःपरे +॥
त्विति· तत्रपक्षइति·मानाभावादिति· एवञ्चपुत्रादिकर्मणाऽस्यधातोःसकर्मकत्वात्नगतिबुद्धीतिसूत्रप्राप्तिरिति +॥
भावः येषामित्यादिनायदुक्तन्तल्लाभप्रकारमाह· अयम्भावइति·उक्तसूत्रमिति·कर्त्तव्यमितिशेषः देशकालादिभि +॥
न्नेति· तेषांसर्वत्रैवसम्भावेनतेनाकर्मकत्वव्यवहारक्षतिरितिकर्मणोऽविवक्षाप्रभेदन्दर्शयति·तदविवक्षाद्वैधेति· +॥
तदचपयोग्येति·कर्मान्वयायोग्येत्यर्थः।सचव्यापारव्यधिकरणफलरूपः।सत्येवेति· तादृशफलस्यधात्वर्थत्वेपि +॥
तादृशफलाश्रयत्वन्नविवक्षितङ्किन्तुतद्धात्वर्थकर्मत्वाभिप्रेतस्यसम्बन्धित्वेनान्वयित्वमात्रम्· कैयटमतन्दूषय +॥
न्स्वमतमाह·परेत्त्विति·लुनातेरिति·द्विधाभवनानुकूलव्यापारार्थकोहिलुनातिस्तत्रव्यापारत्यागेल्लूयतेकेदारःस्व +॥
यमेवपुनस्तस्यकेदारस्यप्रयोज्यत्वविवक्षयाहेतुमणिचिकेदारस्यानेनसूत्रेणकर्मसञ्ज्ञायांलावयतिकेदारन्देवद +॥
त्तइतिभवति।अविवक्षितकर्मकस्याग्रहणेतुएतादृशप्रयोगानुपपत्तिः स्फुटैव· तत्वप्रत्यभिज्ञयाफलेपूर्वकालज्ञात +॥
फलाभेदस्यनदेवेदमितिप्रत्यभिज्ञया।तदुदाहरणान्तु।अर्थान्नरेह्नेरित्यस्योदाहरणान्वित्यर्थः।नदीवहतीति· अत्र +॥
स्कन्दग्रहणादिपूर्वकदेशान्तरप्रापणार्थकत्वस्याप्रतीतेः·भाष्येउदाहृतत्वाच्चेति· एवञ्चैतादृशभाष्यप्रयोगोपिशा +॥

भै॰
२१६

त्रेऽकर्मकपदेनाविवक्षितकर्मकाणाङ्ग्रहणमप्रमाणम्भाष्यान्तरविरोधशङ्कां वारयति॰ यत्त्विति॰ अस्मिन्भाष्येऽप्यव्या॥ +।
नेनचकेचिदितिकथनेनचकेचिदितिकथनेनकालादिसम्बन्धसत्त्वाभ्यांसकर्मकमकर्मकत्वमितिनयुक्तमित्यर्थः॥प्र +।
तीयतेसचनयुज्यतेयथाकृतपूर्वीकटम्भुक्तपूर्व्योदनमित्यत्रपूर्वङ्कर्मान्वयाविवक्षयाऽकर्मकत्वन्तथाकालाद्यन्वया +।
विवक्षयाकालादिभ्योऽप्यकर्मकत्वसम्भवादितिविरोधोनास्माकमतेइत्याशयेनाह॰ क्वचिदित्यस्येति॰ हित्वनरमाह॰ +।
विनिगमनाविरहादिति॰ उक्तार्थेप्रमाणमाह॰ अतएवेति॰ उभयविधाकर्मकग्रहणादेवामूलोक्तरीत्यन्तुसरणेतुश्रह +।
श्यादीनान्देशकालादिभिन्नकर्मसम्बन्धत्वेनाकर्मकत्वाभावादेषाम्कर्मकाधिकारेपाठोव्यर्थःस्यादितिभावः॥नन्व +।
कर्मकपदान्नविद्यतेकर्मयस्येतिव्युत्पत्त्याधात्वर्थक्रियाबोधादकर्मकाद्धातोरित्युपपन्नमतआह॰ अकर्मकशब्दे +।
चेति॰ ननुतथापिकथमविवक्षितकर्मणोऽकर्मकपदेनग्रहणंयावतातस्यैवयदाकर्मणोऽन्वयविवक्षातदाकर्म॥ +।
णोविद्यमानत्वेनाकर्मकपदवाच्यार्थविरोधादतआह॰ अर्थभेदेनेति॰ ननुकालाद्यन्वयित्वेनधातोरपितत्त्वम्बा +।
धितमेवेत्यतआह॰ कर्मत्वेनेत्यादि॰ अत्रकर्मत्वेनेत्यस्यनिवेशान्मातुःस्मर्यतेइत्यादिसङ्ग्रहः॥ व्यभिचारिद्रव्येति॰ +।
एतेन॰ उक्तभाष्यविरोधेन॥अतिप्रसङ्गइति॰ कैयटोक्तातिप्रसङ्गइत्यर्थः॥ननुहृक्रोःसकर्मकत्वाद्धृक्रोरितिसूत्रस्योभ +।
यत्रविभाषार्थत्वव्यवहारानुपपत्तिरतआह॰ तत्राभ्यवेति॰ अभ्यवहारयतिसैन्धवानित्यादौ।करोतेश्चाकर्मकत्वा +।
दिति॰ विकारयतिसैन्धवानित्यादौ॥ अर्थान्तरे॰ हरणार्थकहरतेरुत्पत्त्यनुकूलव्यापारार्थककरोतेश्चप्रयोगोयत्त्वा॥ +।
मिवादिदशोरित्यस्याव्याख्यानावसरेवदसन्देशवचनइतिधातोराध्वषीयस्यायन्निर्देशइत्याहतन्नेतिस्वचयन्नाह +।

२१६

हेतुमन्तस्येति । तेनाभिवदति गुरुं देवदत्तः । अभिवादयति गुरुं देवदत्तमिति भाष्यप्रयोगस्योपपत्तिः तस्यैव आधारस्यै
वाव्याख्यानादिति । मयूरव्यंसकादय इति सूत्रबलेन पूर्वनिपातेऽकर्तव्येऽभेः पूर्वनिपातकरणमूलकादित्यादिः । अस्य अभि
निविशश्चेति सूत्रस्य अतिप्रसङ्ग इति । पापेऽभिनिविशते इत्यत्रातिप्रसङ्ग इत्यर्थः कैयटोक्तं दूषयति । परे त्विति । एतत्प्र
वृत्तिरिति । पापेऽभिनिविशते इत्यत्र तु गुणदर्शनेन नास्य प्रवृत्तिरिति भावः । नमानमित्याहुरिति । अत एव देवग्रात इत्यादि
परिगणनविरोधो नेति भावः । भ्वादेरिति । निवासार्थस्येति शेषः । तेनाच्छादनार्थस्य न ग्रहणमिति फलितम् । रजनीमे
कामित्यादाविति । आदिनाऽहरिदिनमुपोषित इत्यस्य सङ्ग्रहः । अश्यर्थस्येति वचनस्य प्रत्याख्यानप्रकारमाह । ग्रामे
उपवसतीत्यत्रेति । ~~उपपदविभक्तिमिति~~ । उपपदस्य विभक्तिरित्यर्थः । षष्ठ्यर्थसम्बन्धश्च स्वयोगनिमित्तकत्वम् । षष्ठ्य
पवादत्वाच्चेति । अत्र चशब्दो वार्थे । नास्थायामापष्ठ्यपवादत्वस्यैव सम्बन्धार्थकत्वसाधकत्वज्ञ्ज्वनयुक्तम् । सर्वासां वि
भक्तीनाम् पदिकर्मणि द्वितीयेत्यादिसूत्रेनस्यात्तदा तत्र षष्ठी स्यात्तेषामारम्भे तु द्वितीयेति रीत्या कर्माद्यर्थकत्वमिति क
स्य नयासम्बन्धार्थकत्वापातात् । उभसर्वयोरिति । प्रकृतिद्वित्वादत्र द्विवचननिर्देशः । ~~ननु~~ नित्यमिति सूत्रेणावृत्तिविष
ये पूर्वमेवाय जिधानाद्भृशब्दस्यनतसिप्रत्ययप्रकृतित्वमेव ~~नास्ति~~ । ~~उभौ शाद्रिति~~ । आम्रेडितान्तेष्वित्यनुपपन्नमाम्रेडि
तसञ्ज्ञां विनापि प्रकृतेर्द्विवचनमात्रेणेष्टनिर्वाह इत्याशयेनाह । कृतद्विवचनेष्वित्यर्थ इति । उभयतः कृष्णमित्यादेः
कृष्णसम्बन्धिपार्श्वद्वयाभ्यामागता इत्यर्थः । कृष्णाभक्तिसम्बन्धिनिन्दति । एतेन यदर्थस्य सम्बन्धोऽधिकशब्दार्थं प्रती
यते तद्वाचकाद्द्वितीयेति । न चाभिमुख्यार्थकस्याखण्डस्याभित इत्यस्यैव प्रतिपदोक्तत्वाद्ग्रहणं युक्तमिति वाच्यम् । प

रितः शब्दसाहचर्येणानसिलन्तस्यापिग्रहणात् रामलक्ष्मणाविति वन्नसहचरणाम्प्रकृतेप्रसिद्धमतआह॰ साहचर्ये।
सादृश्यमिति॰ सहचरितासहचरितयोरितिपरिभाषायामेतादृशस्यैवसाहचर्यस्यविवक्षितत्वादितिभावः।तेन॰स।
दृशस्यैवग्रहणेनभाष्यानुरोधेनाह॰ यद्वेति॰ अनभिधानादिति॰ अत्रमानमन्तराशब्दोयमदृष्टापचारइतिभाष्यमे।
व।अन्तरात्वाम्मामित्यत्रद्वितीयाकिमनयोरन्तराइत्यादौषष्ठीत्यत्रकिन्नियामकमतआह॰ अवधित्वरूपइति॰ मध्या
न्तरेति॰ एवञ्चमध्यत्वस्यनित्यसाकाङ्क्षत्वात्तादृशैकदेशेत्वाम्मामितिद्वितीयान्तार्थान्वयः अवधित्वरूपसम्बन्धस्या
वधित्वत्वेनरूपेणविषयत्वविवक्षायान्द्वितीया।तस्यैवसम्बन्धत्वेनबोधइति॰ अतएवहलोऽनन्तराइतिसूत्रभाष्ये
अविद्यमानान्यन्तराणेषामितिप्रयोगः सङ्गच्छते।नन्वराशब्दार्थानुयोगित्वेनहरिशब्दार्थस्यापिभानाद्धरिशब्दाद
पिद्वितीयास्यादतआह॰ हर्यादिपदादिति॰ न्यायेनेति॰ प्रकृतेचहरिरस्तीत्यादिरीत्याहरिशब्दार्थस्यकर्तृत्वात्प्रथमे
तिभावः।क्रियान्नेति॰ क्रियागतविषयन्नेत्यर्थः।अस्या॰ कर्मप्रवचनीयसञ्ज्ञायाः नपो॰।गत्युपसर्गसञ्ज्ञापोदित्यर्थः।
तेनात्रनोगतित्वाभावेन।लक्ष्यलक्षणाभावात्मकोयः सम्बन्धसद्घटकलक्षणत्वेजपस्यान्वयेलक्षणत्वान्वितल
क्ष्यवर्षणक्रियायांसम्बन्धेसतितादृशसम्बन्धस्यलक्ष्यत्वघटिततयाक्रियानिरूप्यत्वंस्पष्टमित्यनोः कर्मप्रवचनी
यत्वम्।एवमेवान्यत्रकर्मप्रवचनीयसम्बन्धविषयेज्ञेयम् तदेतदुपपादयति॰ लक्षणात्वञ्चेत्यादिना॰ ज्ञानजनकेत्यत्र
ज्ञानंलक्ष्यस्य।विशेष्यस्यैतादृशः सम्बन्धः।लक्षणत्वेनाभिप्रेतस्यज्ञानजन्यज्ञानविषयत्वंसम्बन्धः।कदाचिदिस्यैव।
ङ्कःस्यचिन्त्यत्वेइदमुत्तरम्।मूलोक्तसञ्ज्ञायाः फलबाधकत्वमुपपादयति॰ कर्मप्रवचनीयसञ्ज्ञाबकादशइत्यादिना॰।

स्पष्टमिति॰ नचलक्षणेऽस्यमितिसूत्रसिद्धसञ्ज्ञायाजयमनुसिञ्चतीत्यत्रषत्वाभावसम्पादकतयाचारितार्थ्येनद्वितीया
विधायकत्वेमानाभावेनद्वितीयासाधकत्वेनेदमावश्यकमितिपुनः सञ्ज्ञाकरणेऽत्यनुपपन्नमेवेतिवाच्यम्॰ तत्सूत्रवि
हितसञ्ज्ञायाउपसर्गसञ्ज्ञाबाधकतयाचारितार्थ्येपिकर्मप्रवचेनितसूत्रेपिनस्योपस्थितिः स्यादेवेतिद्वितीयायाः प्राप्तेः॥
नदीमन्वसिनेत्यत्रन्तृतीयार्थः साहित्यमनुनाद्योत्यम् साहित्यञ्चप्रकृतेऽनुपयोगित्वलक्षणमेव।एवञ्चनद्यनुयोगि।
कसम्बन्धप्रतियोगित्ववतीसेनेतिबोधः।नद्याद्यपितादृशसम्बन्धानुयोगित्वन्तथापिकर्मप्रवचनीयद्योत्यसम्बन्ध
प्रतियोगित्वमक्षतमेव॰ हीनेउपोधिकेचेतिसूत्रयोर्हीनाधिकशब्दौभावप्रधाननिर्देशेनहीनत्वाधिकत्वपरौ॰ तादृ
शसम्बन्धप्रतियोगित्वम्पूर्ववत्।अनुहरिमित्यत्रानुद्योत्येहीनत्वेपिनिरूपितत्वसम्बन्धेनहरेरन्वयः न्यूनतापरिहारा
यमूलानुक्तमुपोधिकेचेतिसूत्रोदाहरणमाहरणमाह॰ उपखार्यान्द्रोणाइति॰ पयोनि॰ अत्राधिकत्वमुपद्योत्यन्तत्रखा
र्यानिरूपितत्वसम्बन्धेनान्वयः।अधिकत्वञ्चाधिकरणाधिकरणकस्थितिकर्तृत्वन्तदेकदेशाधिकरणत्वेतेनसम्ब
न्धेनान्वयः तथाहि॰ पलम्प्रकुञ्चकम्मुष्टिः कुडवस्तच्चतुष्टयम्।चत्वारः कुडवाः प्रस्थश्चतुः प्रस्थमथाढकम्।अष्टा
ढकोभवेद्द्रोणोद्विद्रोणाः शूर्प उच्यते।सार्द्धशूर्पोभवेत्खारीद्विशूर्पोगोण्युदाहृता।तामेवभारञ्जानीयाद्वाहोभारच
तुष्टयम्।शुष्कमेयेष्विदम्मानन्द्विगुणान्द्रवेषुतुइति॰ तदातनोभयमिति॰ उभयम्॰ खारीद्रोणाश्च।स्वनिष्ठपरिमाण
धिकपरिमाणख्यायात्पद्रोणखारीसुदाहरणम्बोध्यम्।आख्यायते॰ निरूप्यतेभक्तोविष्णुम्प्रतिपरिचान्वित्यत्रभ
क्तपदार्थैकदेशभक्तावन्वयः भागः स्वस्वत्वान्यपदार्थः।तद्वाचकादशेत्राद्यचितादृशपदार्थस्वामिलाभः।एवञ्चस्वामि

निबिषयभूतइतिलब्धम्।लक्ष्मीर्हरिम्प्रतीत्यत्रस्वामित्वनिरूपितस्वत्वन्द्वितीयार्थः।तस्यलक्ष्मीपदार्थेऽन्वयः।सूत्रे
वीप्सापदम्व्याप्यत्वपरम्· तदेववृक्षम्वृक्षम्प्रतीत्यत्रद्विर्वचनविशिष्टवृक्षशब्दादिद्योत्यम्।तस्मिन्व्याप्यत्वेऽऽधेयता
सम्बन्धेनप्रकृत्यर्थस्यान्वयः।व्याप्यत्वञ्चस्वनिरूपितव्यापकत्वसम्बन्धेनसेचनेऽन्वेतीत्येषाङ्कर्मप्रवचनीयत्वम्।
द्विर्वचनवलादेवेति·एवञ्चसम्बन्धपरिच्छेदकत्वाभावात्कथङ्कर्मप्रवचनीयत्वमितिभावः।सोऽपीति·व्यतिलुनीतइ
तिवत्प्रत्यादिरपीत्यर्थः।तत्वेन·कर्मत्वशक्तिमत्वेन।उक्तार्थेभाष्यसम्मतिमाह·अतएवेति· प्रत्यादीनाङ्क्रियाविशेष
कत्वाभावादेवेत्यर्थः।अतएव·कर्मप्रवचनीयसञ्ज्ञाया द्वितीयार्थत्वादिव· फलानन्तरम्कर्मप्रवचनीयसञ्ज्ञायाः फ
लान्तरम्· यद्वस्त्विति·पच्छब्दस्यबुद्धिस्थपरामर्शकत्वा तयाप्रकृतेबुद्धिस्थोभागःपरामृश्यते।एवञ्चमत्सम्बन्धियद्भा
गकर्तृका एतद्देशाधिकरणिकासम्भाव्यमानासन्नातत्कर्मकम्प्ररणाविषयोदानमितिबोधः।अत्रकर्मप्रवचनीयस
ञ्ज्ञायात्र्प्रभावेउपसर्गसञ्ज्ञासत्वादुपसर्गप्राडुर्भ्योमितिषत्वम्।ननुकुतइत्यत्राधिशब्दस्यक्रियायोगाभावाद्गतित्वा
स्यप्राप्त्यभावेनगतिसञ्ज्ञाबाधादित्युयुक्तमतआह·धात्वर्थमात्रेइति उपसर्गाः क्रियायोगइतिसूत्रेक्रियायोगपदम्भ
तुनाक्रियानिष्ठायास्वशक्यतावच्छेदकावच्छिन्नाविषयतातच्छाल्युपस्थितिजननेसहकारित्वन्तच्चप्रकृतेप्यस्ति
क्रियात्वक्रियातिरिक्ततद्गतविशेषविषयकबोधजननेसहकारित्वन्नास्तीतितदभावादेवानर्थकत्वव्यवहारइतिभा
वः·सुःपूज्यएवकर्मप्रवचनीयइत्याह· क्रियापूज्यत्वेति· सर्वेषामेवपदार्थत्वात्पदार्थइत्यस्याव्यावर्तकमतआह· पदस्येत्या
दि·एतेनयस्याप्रयुज्यमानपदस्यार्थोऽपिनाद्योत्यतेतस्यपदस्याध्याहारोऽपिशब्दवलादितिकथ्यतेननुसम्भावनायांलि

ङि·त्यसङ्ग· तन्नादृशसूत्राभावादत आह· उपसम्वादेति· अत्रयत्कर्मप्रवचनीययुक्तन्नादः प्रयुज्यतइतिभाष्याद्प्रयुज्य-
मानस्येतिलब्धम्।दौर्लभ्यप्रयुक्तदौर्लभ्यञ्चसम्वन्धः सोपिद्योत्यएव।तदेतदुक्तङ्कर्तृदौर्लभ्यप्रयुक्तन्दौर्लभ्यन्द्योतयन्ति
ति· प्रकृताभिप्रायमिति· एवञ्चकर्तृपदङ्कारकपरम् सर्पिषइत्यत्रधातोरकर्मकत्वात्कर्मणोऽसम्भवात्कर्तृपदमेवोपात्त
म्· क्रियाविषयमिति· स्तुतिक्रियाविषयमित्यर्थः अपिस्तुयादिति शब्दाद्विष्णुकर्मिकाएतत्कर्तृकाशक्यत्वेनसम्भाव्य
मानास्तुतिरितिशाब्दवोधः।शत्रुत्कर्षाविष्करणम्।शत्रुत्कर्षस्यव्यञ्जनयावोधनम्। अपिवेदान्तपारगमित्यादिश
ब्दाद्वेदान्तपारगकर्मकमेककर्तृकमुचितंहननंसम्भावनाविषयइतिवोधेसम्भावनाविषयक्रियायामौचित्योत्कर्षेबो
धे औचित्येसम्भावितत्वम्व्यञ्जनयाप्रतीयते यत्क्रियायामौचित्यन्निश्चितन्तस्यानुष्ठानमेव।यत्रतुवाक्येऽपिपदन्नश्रू
यते अथचतत्क्रियाया अननुष्ठानमेवतात्पर्यविषयस्तत्रापिशब्दाध्याहारः।तद्यथा।विप्रोनामनगर्ह्यायान्नस्यश्रेत्तुलसी
दलम्।परनिन्दानकर्तव्यापरञ्चिन्नानकदाचनेति।ननुगर्हायांलडपीतिसूत्रस्यसर्वावाधकतयाअपिस्तूयाद्वृषलमित्य
त्रकथंलिङित्यत आह· उपसम्वादेतीतिवार्त्तिकेन।उपसम्वादाशङ्कयोर्लिङित्यनेन।तत्कर्तुरिति· वृषलस्तुतिकर्तुरित्य
र्थः।ननुधिक्शब्दस्यनिन्दाप्रतीत्यर्थम्प्रयोगः साचेद्वृषलपदसमभिव्याहारादेवप्रतीयेततदाधिक्शब्दयोगोव्यर्थोऽत।
आह· तदेवेति· निरन्तरसम्वन्धोव्याप्तिरूपः।सचकिन्निष्ठइत्याकाङ्क्षायामाह· सचेति· नन्वेवङ्गुणादिरत्यन्तसंयोगेद्वि
तीयेतिसमुदायेकालाध्वनिष्ठव्याप्यतानिरूपितव्यापकतायांविवक्षितायान्द्वितीयेत्यस्यलाभेपिद्वितीयाप्रकृत्यलाभइ
त्यत आह· प्रत्यासत्त्येति· ननुपत्रैकमासव्यापकङ्गुणःशस्त्रोत्राध्ययनन्तत्रमासम।धीतेगणःशस्त्रोत्रमितिनस्यान्मासान्तरे

भै.
२११

तत्स्तोत्राध्ययनस्यकालिकसम्बन्धावच्छिन्नस्यप्रतियोगिव्यधिकरणाभावस्यसत्वादतआह॰ बुद्धिस्थयावदवयवेति॰ अ
वयवः।दिनादिरूपः।एवञ्चमासमधीतइत्यत्रमासपदम्बुद्धिस्थतत्तन्मासपरन्तदवयवयावद्दिननिष्ठव्याप्यतानिरूपित
व्यापकतायत्रतत्रैवतादृशःप्रयोगः।मासपदञ्चत्रिंशद्दिनसमुदायपरम्।दिनपदञ्चैकसूर्योदयावधिकापरसूर्योदयपर्य
न्तस्थिताखण्डजन्यद्रव्यपरम्।ननुषष्टिघटीसमुदायोदिनशब्दार्थः।यत्रप्रत्यहमेकघट्याङ्गणेशस्तोत्राध्ययनन्तत्रापिघ
ट्यन्तरेऽध्ययनस्याभावसत्वेनमासमधीतइतिप्रयोगानुपपत्तेः मासनिष्ठाव्याप्यताचतादात्म्यसम्बन्धावच्छिन्ना।व्याप
कतातुकालिकसम्बन्धावच्छिन्ना।व्यापकताघटकाभावश्चप्रतियोगिव्यधिकरणोविवक्षितः।अन्यथातत्प्राग्भाववयव
दिनेपिपद्घट्यवच्छेदेननाध्ययनन्तदवच्छेदेनकालिकसम्बन्धावच्छिन्नप्रतियोगिताकाध्ययनाभावस्यसत्वेपिनमा
समधीतइतिप्रयोगानुपपत्तिः।एकादश्यांरात्रौजागरयादित्यत्रद्वितीयातिप्रसङ्गन्निराचष्टे॰ एकादश्यामिति॰ नचैवमप्ये
कादश्यान्नान्नम्भुञ्जीतेतियत्रोच्यतेतत्रैकादशीव्यापकभोजनस्यैवाभावस्तात्पर्यविषयइतिद्वितीयापत्तिरितिवाच्यम्॰ ता
दृशतात्पर्येत्वेकादशीन्नभुञ्जीतेतिप्रयोगः प्रकृतेत्वेकादशीरूपस्यकालस्यभोजनाभावाधिकरणत्वविवक्षैव।सचाभावः
प्रतियोगिव्यधिकरणएवविवक्षितोतोनानुपपत्तिः।नन्वेवमासमधीतइत्यत्रधातोरध्ययनपूर्वकव्यापनेवृत्तिकल्पनयाकर्त्तु
रित्येवकर्मत्वसिद्धमितिकालाध्वनोरितिसूत्रवैयर्थ्यमितिवाच्यम्॰ मासन्देवदत्तस्यकौटिल्यम्भोजनाभावश्चेतियत्रप्रयोग
स्तदर्थमस्यावश्यकत्वात्॰ मासस्यद्विरधीतइतियत्रप्रयोगस्तत्रमासव्यापकत्वनिवृत्तावेवतात्पर्यन्नतुमासाधिकरणकत्वनि
वृत्तावितिकृत्वोर्थप्रयोगइतिसूत्रेणषष्ठ्येवनत्वनेनद्वितीयेतिबोध्यम्॰ इतिद्वितीयाविवरणम्।स्वतन्त्रःकर्त्ता।अत्रस्वत।

२११

त्रपदमन्यानधीनव्यापाराश्रयपरम् स च व्यापारो न शब्दवाच्यः किन्तु कारकाधिकारादुपस्थितक्रियारूपइत्याह कारकाधि
कारादिति इदरायनेप्यस्तीत्याह क्रियाजननइति तत्रप्रयोज्यनिष्ठव्यापारात्मकक्रियाजननेप्रयोजकः स्वतन्त्र एव किन्न।
स्वातन्त्र्यमतआह स्वातन्त्र्यञ्चेति प्रधानीभूतेति अत्रप्राधान्यञ्चतद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतानाश्रय
धात्वर्थत्वम्। एतादृशस्यस्वातन्त्र्यस्याविवक्षितत्वात्काष्ठम्पचतीत्यत्रकाष्ठस्यकर्तृत्वोपपत्तिः। धात्वर्थाश्रयत्वञ्चव्यापारता
वच्छेदकसम्बन्धेन। तेननकालिकसम्बन्धमादायातिप्रसङ्गः कर्तृप्रत्ययसमभिव्याहारइतीति अस्यचकर्तृप्रत्ययसमभि
व्याहारेपि प्राधान्येनदृष्टइत्यर्थोऽभिप्रेतः। एतेनकर्तृप्रत्ययसमभिव्याहारेप्राधान्यंयद्यपिकर्तृव्यापारस्यतथापिकर्मप्रत्य
यसमभिव्याहारेफलस्यैवप्राधान्यात्तत्रदेवदत्तेनपच्यतेतण्डुलइत्यादौदेवदत्तादेःकर्तृत्वन्नस्यादितिशङ्कायाअनवकाशः
। यद्यपिधातोःफलावच्छिन्नव्यापारेव्यापारावच्छिन्नफलेवाशक्तिस्तथापितत्तत्प्रत्ययसमभिव्याहाररूपतात्पर्यग्राहकव
शाद्यत्रकर्मणिविहितप्रत्ययसमभिव्याहारस्तत्रव्यापारावच्छिन्नफलस्यैवधातुनोपस्थितिः। णिजन्तेप्रयोज्यस्यकर्तृत्वोपप
त्तयेआह णिचस्त्विति वाचकत्वमेवेति नतुद्योतकत्वमितिशेषः। तथात्वेद्योत्यार्थस्यविशेषणत्वात्प्रयोज्यव्यापारप्राधा
न्यापत्तौगुरुः शिष्येणपाचयतीतिप्रयोगइष्यतेतत्रशिष्योगुरुणापाचयतीत्यादिप्रयोगापत्तेः। पच्यतेतण्डुलः स्वयमेवे
ति यत्रप्रयोगस्तत्रयद्यपिफलमेवधात्वर्थस्तथापितत्रव्यापारत्वारोपः। अन्तर्भावितण्यर्थतायाम्प्रयोज्यस्यकर्मत्वमकथि
तञ्चेति सूत्रव्याख्यानावसरेउपपादितमेव कारकइतिसूत्रभाष्यादिति तत्रहेवमुक्तम्प्रधानसमवायेस्थालीपरतन्त्राव्य
वायेस्वतन्त्रा। किम्पुनः प्रधानम्। कर्ता। कथञ्ज्ञायतेकर्ताप्रधानमिति। यत्सर्वेषुकारकेषुसन्निहितेषुकर्ताप्रवर्तयिताभवती

भै·
२२०

ति। ततः प्रयोज्यस्यास्वतन्त्रत्वात्कर्तृसंज्ञां न प्राप्नोतीति पूर्वपक्षे तस्यापि स्वेच्छाधीनप्रवृत्तिकस्वातन्त्र्यं साधितम्। प्रकृतसू
त्रेपि तन्त्रशब्दस्य प्रधानवाचकत्वमस्ति प्राधान्ये वर्त्तते तद्यथा स्वतन्त्रोसौ ब्राह्मण इत्युच्यते स्वप्रधान इति तद्यः प्राधान्ये वर्त्त
ते तन्त्रशब्दस्तस्येदं ग्रहणमित्युक्तम्· स्वशब्दश्चात्मवाची। स्वआत्मा तन्त्रं प्रधानं यस्य स स्वतन्त्रः। साधकतममिति सूत्र।
स्थतमपा प्रकर्षः सूचितः। स च कारकान्तरापेक्षया कारकपर्यायसाधकशब्दादुत्पन्नेन तमपा प्रकृत्यर्थापेक्षस्यैव प्रकर्षस्य
लाभात्। तत्र करणात्करणान्तरे प्रकर्षस्याभावेन कारकान्तरापेक्षयैव प्रकर्षो वाच्यः। स च यादृशस्तमाह· यद्व्यापाराव्यवधा
नेनेति· करणान्तरात्प्रकर्षश्चेद्विज्ञायते तदाश्वेन दीपिकया यथा व्रजतीत्यत्र सर्वेषां न स्यात् अधिकशब्दोपादाननिमित्त
म्प्रकर्षन्दूषयति· अधिकरणेति· तिलेषु तैलमित्यादावि वेति। आदिना दध्नि सर्पिरित्यस्य सङ्ग्रहः। न च आध्रियतेऽस्मिन्निति
व्युत्पत्त्या कर्तृकर्मणोर्धारणक्रियां प्रति य आधारस्सोऽधिकरणसंज्ञ इत्यर्थो भविष्यतीति वाच्यम्· एवमपि यो मुख्यस्तद्द्वारा
धारस्तस्यैव स्यान्न गङ्गायां घोष इत्यादौ। गङ्गाशब्दवाच्यो न मुख्याधार इत्यभिप्रायेण भूतले घटः स्थाल्यां पचतीति परित्यज्य
गङ्गायां घोष इत्युपात्तं न त्वस्य मुख्याधारपरमेवाधारपदं भविष्यतीति कल्पनेन सामञ्जस्यमित्याशयात्। यथा च प्रकृते गौण
त्वं तदुपपादयति· तीरधर्मस्येति· प्रवाहआरोपइति· एवञ्च गौणत्वं स्पष्टमेव। तीरलक्षणेति· गङ्गापदशक्यतावच्छेदकस्य ग
ङ्गात्वस्य तीरआरोपः। शक्यतावच्छेदकारोप एव लक्षणा न दा गङ्गापदबोध्यस्य गौणत्वं स्पष्टमेव। प्रकर्षेणाश्रीयत इति· एवञ्च यथा
कथञ्चिदाधारस्सोऽधिकरणसंज्ञः। एवञ्च मुख्याधारत्वाभावेऽपि यथा कथञ्चिद्यस्मिन्नाधारत्वं न तु मुख्यं गौणं वा सर्वमप्यधिकरणस
ञ्ज्ञम्। गौणाधारस्याप्यधिकरणसंज्ञायां भाष्यमपि साधकमित्याशयेनाह· एवञ्चाङ्गावइति· इदन्तत्र त्यक्त्वा गर्गकुलमित्यस्याप्युपल

२२०

क्षणाम् प्रकृतसूत्रभाष्य इति· तत्र हितमपग्रहणङ्किमर्थम्।सर्वेषाङ्कारकाणाङ्करणसञ्ज्ञा प्रसज्येतेति विचारे पूर्वसञ्ज्ञानामपवाद
त्वात्परसञ्ज्ञानाञ्च तथैव बाधकत्वम्भविष्यतीत्यभिधाय धनुषा विध्यतीत्यत्रापाययुक्तत्वादपादानसञ्ज्ञा साधकत्वाच्च करणस
ञ्ज्ञा प्राप्नोति।एवन्तर्हि लोकेऽभिरूपाय कन्या देयेति।न चानभिरूपे प्रवृत्तिरस्ति तत्राभिरूपतमायेति गम्यते एवमिहापि साधक
ङ्करणमित्युच्यते सर्वाणि च कारकाणि साधकानि न चासाधके प्रवृत्तिरिति साधकतममिति विज्ञास्यते।एवन्तर्हि सिद्धे सति य
त्तमग्रहणङ्करोति तज्ज्ञापयत्याचार्यः कारकसञ्ज्ञायान्तरप्तमयोगो न भवतीति।आधारमाचार्यः किन्न्याय्यम्मन्यते यत्कृ
त्स्न आधारान्माव्याप्नोति तेनेहैव स्यात्तिलेषु तैलन्दध्नि सर्पिः।गङ्गायाङ्गावः कूपे गर्गकुलमित्यत्र न स्यात्।कारकसञ्ज्ञायान्तर
तमयोगो न भवतीत्यत्रापि सिद्धम्भवतीति पक्षान्तरमाह·यदि त्विति·चरितार्थमिति·अन्यथा सन्निकृष्टलाभो न स्यात्।युक्तमन्त
रमाह·~~साधकतमस्येति~~·संसिद्ध्यर्थकधातुनिष्पन्नत्वात्·उक्तप्रयोगादिति·गङ्गायाङ्गावः।कूपे गर्गकुलमिति प्रयोगसाध
नायेत्यर्थः प्रकृते उद्देश्यवाचके साधकपदे·तदाभावः।स्वरितत्वाभावः।तमपा तु प्रकर्षो बोध्यत इत्यव्यवधानलाभः।एव
ञ्च·उक्तव्यवस्थासिद्धौ च।ननु व्यवधानेन फलोत्पादकेऽपि करणत्वन्दृश्यते।यथा राजा चतुर्भिरुपायैः शत्रून्वशीकरोति।अत्रा
मात्यभटादिद्वारैव वशीकरणन्न साक्षात्।न चाव्यवधानविवक्षया तथा प्रयोग इति वाच्यम्।तथा सति व्यवधानेन यत्र फलोत्पा
दस्तत्र सञ्ज्ञान्तरस्य प्राप्त्या तृतीयाया अप्राप्त्या तादृशोक्त्यसङ्गतेरिति चेन्न·नटस्य शृणोतीत्यत्र नटे गानद्वारा क्रियाजनकत्वेन का
रकत्वस्वीकारात्करणत्वप्राप्त्या तद्बाधस्यार्थेन मध्यग्रहणमित्याशयात्।करणत्वोपचारेणोत्पस्य करणत्वप्राप्त्येत्यर्थः।तत्र
नटस्य कारकत्वे आख्यातोपयोग इति सूत्रस्थमुपयोगग्रहणङ्किमर्थम्·नटस्य शृणोतीति भाष्यमेव साधकम्बोध्यमिति दि

भै. २२१

कृ।दिगिति·दिगर्थेसुपूर्वोक्तिगौरणाधारस्याधिकरणसञ्ज्ञायाअभ्युपपादनायद्वौराणसुखमन्यायोपन्यसनम्प्राचानन्दसङ्ग
तमेव।तस्यन्यायस्यपदकार्यविषयत्वाद्विशिष्टरूपोपादानविषयत्वाच्चेति·तच्छक्तिमत्त्वम्·करणत्वशक्तिमत्त्वम्।व्यापारव
त्त्वेति·अतएवकरणत्वम्व्यापारनियतमितिवक्ष्यमाणंसङ्गच्छते।प्रकृत्यादिभ्यइत्यत्रादिशब्दःप्रकारे।समुदायघटके
भ्यस्तृतीयेत्यर्थः।नाम्नासुतीक्ष्णश्चरितेनदान्तः अत्रनामपदार्थस्याभेदःसुतीक्ष्णशब्देभासते।चरितेनदान्तइत्यत्रचरि
तशब्दार्थस्य।प्रकृतिस्वरूपस्यदान्तत्वेऽन्वयः।घटत्वेनाभावः।अत्रतृतीयार्थोऽवच्छिन्नप्रतियोगिताकत्वम्।पटइतिज्ञाने
पटत्वेनपटस्यविषयत्वन्नतुद्रव्यत्वेनेत्यत्रावच्छिन्नत्वन्तृतीयार्थोबोध्यः·प्रकृत्याचारुःप्रकृतिसम्बन्धिचारुत्ववान्।नच
कृतइत्यध्याहारेणाकारणएवतृतीयास्तु।घटत्वेनेत्यादिष्वपिघटत्वादिपदानाङ्घटत्वावच्छिन्नप्रतियोगिताकत्वल
क्षणिकतयाज्ञातइत्यस्याध्याहारेणाकरणएवतृतीययासिद्धिरितिवाच्यम्·यदानमस्याध्याहारस्तदाशेषलक्षणावश्यं
प्राप्नोतितद्बाधनार्थमस्यावश्यकत्वात्।प्रायेणयाज्ञिकः।प्रायःपदमाचारातिशयपरम्।ज्ञातइत्यस्यचाध्याहारः·आचाराति
शयेनयाज्ञिकइत्यर्थोज्ञातइत्यर्थोविवक्षितः।गोत्रेणगार्ग्यः।गोत्रसम्बन्धिगार्ग्यत्ववान्।सामान्यविशेषभावेनान्वयः।समे
नविषमेणेतीत्यादौद्वितीयार्थेतृतीयाद्विद्रोणेनधान्यङ्क्रीणाति।यात्रादित्वात्स्त्रीत्वाभावः।परिच्छेद्यत्वन्तृतीयार्थः।तस्य
धान्येऽन्वयः।सुखेनदुःखेनयातीत्यत्रसुखदुःखपदन्तत्साधनपरम्।तच्चयाधात्वर्थेफलेऽभेदेनान्वेतीतिद्वितीयाया।
म्प्राप्तायामनेनतृतीया।शक्तिद्वययोगइति·करणत्वकर्मत्वात्मकशक्तिद्वययोगइत्यर्थः।तेनःसञ्ज्ञाद्वयसमावेशेन।
परस्मैपदाभावइति·अणावकर्मकादितिसूत्रेणप्राप्तन्त्यादिः।ननुकरणरूपेऽर्थेतृतीयायाविधानेनकथन्तृतीयया।

२२१

कर्मत्वबोधनमत आह· अत्रेति· अत्रकार्यकालपक्षे कर्मत्वसामानाधिकरण्यविशिष्टमपि करणत्वम्प्रकृतसूत्रप्रदेशोप
स्थितकर्तृकरणयोरितिसूत्रघटककरणपदेनग्रह्यत इति तृतीयैवोभयपूर्वबोधिकेतिभावः। ननु तस्यैवेक्षान्दीव्यतीतिनैवस्या
दत आह· यदाक्षाणामिति· अत्रेष्टपरिवर्त्तनाद्यनुकूलव्यापारो दीव्यतेरर्थः। फलञ्चेष्टपरिवर्त्तनं तदाश्रयत्वसमानाधिकरण
कर्मत्वस्यैकर्त्तुरितिसूत्रबोधितस्य विवक्षेत्यर्थः। यदोभयशक्तिमत्त्वन्तदैवोक्तःप्रकार इतिभावः ननु पूर्ववत्षष्ठीप्राप्त्याकथम्म
नसादेव इतिहरदत्तोक्तः प्रयोग इत्यत आह· मनसादेवइत्यादावपीति· अस्यसञ्ज्ञात्वेन मनसः सञ्ज्ञायामित्यलुक् असञ्ज्ञात्वेतु
तत्पुरुषेकृतीतिसूत्रघटकबहुलग्रहणेनालुक्· ननु मनसो दिवधात्वर्थेसाधकतमत्वसमानाधिकरणकर्मत्वशक्तिमत्त्वा
त्कथन्तृतीयेत्यत आह· हेतुतृतीयायामेवेति· अत्रकर्मणि· दिवः कर्मचेतिसूत्रबोधितकर्मत्वशक्तिमति। तृतीयापत्तिरिति· दी
व्यतेऽक्षानित्यादाविव्यादिः। इदमुपलक्षणम्। देवनाअक्षाइत्यत्र ल्युटा करणत्वस्याभिधानेपिकर्मत्वस्यानभिहितत्वात्षष्ठ्या
पत्तिरिति· तद्धत्प्रकाशेन· अभिहितशक्तिवत्प्रकाशेनात्र सिन्[illegible]थेऽपादानमुत्तराणिकारकाणिबाधन्त इति भाष्यमेवमान
म्। तथा हि· सञ्ज्ञयोः स्वतो न विरोधः। कृत्कृत्यसञ्ज्ञयोरिवसम[illegible]वेशसम्भवात्। किन्तु फलद्वारक एव वाच्यः सोपिचेन्नाश्री
यते तदापरत्वादित्यसङ्गतमेव स्यादिति तथाकल्पनमावश्यक[illegible]मितिप्राचामुक्तिं दूषयति। एकैवशक्तिरिति· तत्पूर्वकस्या
गः। फलप्राप्तिपूर्वकस्त्यागः। एवञ्चान्दाक्षो[illegible]शेनवाअनुवाकोधीत इत्यत्र त्यागस्तृतीयार्थः अहव्यापकत्यागप्रतियोग्यधीताध्य
यनकर्मानुवाक इति शाब्दबोधः नचात्र भूते विहितनिष्ठया त्यागस्यलाभे तृतीयायास्तत्र शक्तिकल्पनम्व्यर्थमिति वाच्यम्·
तयाऽतीतत्वलाभेपिनिवृत्तिरूपस्यत्यागस्याप्रतीतेः। अतीतत्वं हि वर्त्तमानध्वंसप्रतियोगिसमयकत्वम्· निवृत्तिश्चपुन

भै॰
२२२

स्नुस्याद्नमितिभावः। क्रियासमानकालेति॰ अत्रादिनागुणाद्रव्य[illegible]भावसङ्ग्रहः। पदार्गुणप्रधानभावेनैतेषुद्वयोः सम्बन्धस्त
दासाहित्यवाचिसहशब्दस्यप्रयोगोभवति। यथापुत्रेणसहागतः। पुत्रेणसहस्थूलः। देवदत्तेनसहचैत्रस्यधनम्। देवदत्तेनसह
चैत्रस्यनाशः। यद्विनाशोपिक्रियैवतदा मैत्रेणसहमैत्रस्याभावइत्युदाहरणम्। अभावपदेनऔ[illegible]विरोध्यर्थकत्वाद्भावविरोधी
पदार्थविशेषएवाभावः। स्पष्टञ्चेदम्मञ्जूषायाम्। समानदेशक्रियावत्वम्। समानोदेशोऽधिकरणरूपोयस्यास्तादृशीयाक्रिया
तद्वत्वमित्यर्थः। अतएवः द्वितीयस्यप्रकारस्याश्रयणादेव। एतत्सूत्रोदाहरणविषयेऽप्राधान्यञ्च शाब्दगुणाद्यन्वयित्वाभा
वरूपम्॰ यद्यपिपुत्रेणसहागतः। पितेत्यादौपुत्रशब्दार्थस्यनि[illegible]ज्ञसाहित्येऽन्वयेऽर्थोन्तदन्वयित्वन्तथापिनशाब्दबोधवि
षयभूततदन्वयित्वम्पुत्रसाहित्यवाग्मेता आगमनकर्त्ताइत्यर्थहिबोधइष्यते। तच्छाब्दत्वरूपविशेषणाभावकृतोविशि
ष्टाभावस्तत्रास्ति। एकेनैवसुपुत्रेणसिंहीस्वपितिनिर्भया। सहैवदशभिः पुत्रैर्भारंवहतीगर्दभीत्यादौविद्यमानवाचीसहशब्द
प्रयोगेप्यनेननतृतीया। पुत्रशब्दार्थेक्रियान्वयित्वमेवनेतिविशेष्याभावाद्विशिष्टाभावोऽस्त्वेव। नचविद्यमानताविशिष्टएव
सहशब्दार्थोस्तु। पुत्रशब्दोत्तरतृतीयायाउपपदविभक्तित्वेनषष्ठ्यपवादतयासहशब्दार्थेऽन्वयापत्तेः। यदिविद्यमानैः पुत्रै
र्युक्तागर्दभीत्यर्थस्तत्राश्रीयतेतदाकर्तृकरणयोरित्येवतृतीयाभविष्यति। सहयुक्तेइतिसूत्रेद्विविधोपिसहार्थोगृह्यत
इतिदिक्॰ सन्निधानलब्धमिति॰ अङ्गशब्दस्याङ्गिपरतयातत्सन्निधानेनयच्छब्दोऽङ्गपरइतिभावः व्याख्यानादिति अ
ङ्गशब्दोयंसमुदायशब्दइतिभाष्यमूलकादित्यर्थः। अस्येवकाणामिति॰ असाक्षिकाणामितिव्यवहारस्यसुप्रसिद्धत्वा
त्॰ नथाचपुरुषेकारणत्वरूपधर्माभावेनाक्ष्णाकाणइतिव्यवहारोनोपपद्यतइतिभावः। अवयवधर्मस्यकाणत्व

२२२

स्य।समुदाये।कारणावयवघटितसमुदायसमवेतेऽवयवि[नि]तदवच्छिन्नेतादृशावयवव्यवच्छेदे चैत्रादौ अक्षिणतविकारक
चकएवेति·तथाचकारणायमित्येतावतासर्वसामञ्जस्येऽक्ष्णो।तिप्रयोगोनप्राप्नोतीतिभावः·द्वौविप्रावितिवदिति·एवञ्चसम्भेदन्नाप
तरवैयर्थ्यमितिन्यायेनतादृशोऽत्रप्रयोगः।यद्यपिचक्षुर्नाशवान्सचक्षुष्कः काणपदार्थत्वेनलोकप्रसिद्धः।तथापिकणनिमील
नइत्यभियुक्तवचनस्वरसादातिशायनिकप्रकरणस्थभाष्यस्वरसाच्चाह·लेशतोपीति·प्रकारमात्रपरइति·इदमस्थमुरितिथमुप्रत्यय
नोयद्यथयमिदशब्दार्थसन्निकृष्टाभिन्नप्रकारप्रतिपादकइतिप्राप्नमेवञ्चप्रकारसामान्यस्यलाभोनस्यात्तथापिप्रकृत्यर्थविशिष्टप्र
त्ययमात्रेस्यलक्षणेतिभावः।एवञ्चकश्चिद्धर्मत्वप्राप्तोयेनलक्ष्यतेतद्वाचकप्रातिपदिकात्तृतीयेतिसूत्रार्थः।सूत्रवैयर्थ्यमाशङ्कते।यद्य
पीति·प्रकृतसूत्रविषयेप्राचीनोक्तविशेषमाह·इत्थम्भूतस्येत्यादिना·लक्षणवाचकात्पृथगुपस्थितिः।शक्त्यालक्षणवाचकशब्दजन्यो
पस्थितिरूपविषयत्वम् किन्त्वन्यशब्दजन्योपस्थितिविषयत्वम्।नत्वतीयेति·अस्यलक्षणवाचकोपः कमण्डलुपाणिशब्दस्तज्जन्योप
स्थितिविषयत्वादितिभावः·अनवयवत्वादिति·प्रातिपदिकसञ्ज्ञाप्रवृत्तिकालेसञ्ज्ञित्वेनाभिप्रेतसमुदायघटकत्वंयस्यतस्यतदवयवत्व
मितिभावः।अत्रप्रमाणन्तुप्रकृतसूत्रस्थ[भा]ष्यमेव।तत्रहिइत्थम्भूतस्य[ल]क्षणेतत्स्थेप्रतिषेधइतिवार्तिकम्।तत्स्थे·लक्ष्यवाचिशब्दस्थे
।अपिभवान्कमण्डलुपाणिञ्छात्त्र।त्रमद्राक्षीदिति।नवेत्थम्भूतस्यलक्ष[णे]।नापृथग्भावात्।यत्रेत्थम्भूतस्यपृथग्भूतलक्षणन्तत्रभवितव्य
मित्युक्तम्।कैयटेइत्यनेनसूचितामरुचिम्प्रक[ट]यति।परेत्वित्यादिना।कैयटोक्तमभ्युपेत्यापिदूषणमाह·किञ्चेति·अतएव·पश्चादुत्पन्न
स्यापितन्मध्यपतितन्यायेनतदवयवत्वादेव·यदुक्तञ्ज्ञानातेरितिवि[भ]क्तिमित्तमाह·ज्ञानातेरिति·लौकिकहेतुरपिकरणमिति·व्यापार
वदसाधारणङ्कारणङ्कारणमितिलोकवप्रसिद्धेः।कर्त्रणान्विति·कर्तृक[र]णयोरितिसूत्रघटककरणशब्दार्थस्त्वित्यर्थः।साधकतममि

भै॰
२२३

तिसूत्रेणाक्रियाजनकस्यैव करणसञ्ज्ञाविधानात्। वैषम्यान्तरेति लौकिककरणत्वस्य हेतुत्वापक्षयेत्यादि। भिन्नैवेति॰ हेतुत्वश
क्तिः हेतुत्वरूपो धर्मः। स चाखण्डोपाधिर्हेतुं हेतुरितिपुराणादिशब्दशो व्यापाररहितेपि व्यवहारादिति भावः। तथा च नेदं सूत्रं हेतुः क
रणयोरिति सूत्रेणागतार्थम्। एवम्व्याख्यां हेतुत्वविवक्षायां वीजमाह॰ तस्यापीति॰ जनकत्वात्। क्रियासाध्यकप्रवृत्तिजनकत्वा
त्। इत्थं हि लौकिकः क्रमः। यत्तज्ज्ञानम्। ततः फलेच्छा ततउपायज्ञानम्। अथोपायधर्म्मिकफलसाधनताज्ञानम्। ततउपायेच्छा। त
तः क्रियां साधयितुम्प्रवृत्तिरिति। गम्यमानापीत्यस्यानुसन्धीयमानध्याहृते स्येवम्व्यवह्रियमाणेतिनार्थः क्रियारूपस्याध्याहारे
तादृशानुसन्धानस्यपदाजन्यतया शाब्दबोधनियामकत्वासम्भवेन तस्यार्थस्य शाब्दबोधविषयत्वासम्भवात् नापि शब्दानुसं
न्धानम्॰ उच्चारितस्यैव शब्दस्योच्चारितः शब्दः प्रत्यायको नानुच्चारित इति भाष्योक्तेरनुसन्धीयमानस्य शाब्दबोधजनकत्वास
म्भवात्पिण्डीमित्यस्यैकदेशस्य शक्तिरेव कल्प्यते। न तावन्मात्राद र्थवोधस्तथा प्रकृतेपीत्याशयेनाह॰ अमेरोत्यादिपदजेत्यादि
ना॰ नामार्थत्वेनः सुवन्तार्थत्वेन। स्वावाच्येति॰ स्ववाच्यविशिष्टायावाक्यैकदेशसाध्यमित्यर्थसाधनक्रियातां प्रतिस्वस्य अमेरो
त्येकदेशार्थस्य करणत्वव्यवहार इत्यर्थः। वस्तुतस्तु श्रमेणालमितिवाक्यप्रयोगस्थले ज्ञातव्यम्। अशिष्टव्यवहारेत्यत्र कर्मधा
रयभ्रमनिवारणायाह॰ अशिष्टानामिति॰ अशिष्टपदमत्र न शिष्टभिन्नपरम् श्रुतिस्मृत्यादिप्रामाण्याभ्युपगन्तॄणामपि रागो
त्कृष्यान्तादृशव्यवहारस्थले दास्या संयच्छते इति प्रयोगदर्शनादत आह॰ सङ्कीर्णाचाराणामिति॰ कालभेदेन धर्माधर्मफलकाचार
कर्तॄणामित्यर्थः। प्रकृते च दासीशब्दार्थस्य रतिफलके दाने सम्प्रदानत्वेनान्वयात्तादृशव्यवहारसङ्कीर्णाचारकर्तृकत्वमिति भावः। दा
स्या संयच्छत इत्यत्र दाणश्च सा चेच्चतुर्थ्यर्थे इति सूत्रेणात्मनेपदम्। भार्याशास्त्रोक्तरीत्या विवाहितां तस्यै दानानन्तरयत्र तत्प्रीत्यनन्तर

२२३

नस्याउपयोगस्तत्रनचतुर्थ्यर्थेतृतीयाअशिष्टव्यवहाराभा[?]।दि[?]नतत्रात्मनेपदमित्याशयेनाह·मूलेधर्मेत्विति·॥इतितृतीयाविवरणम्
दानस्यकर्मणेतिसूत्रघटकदानेतिप्रातिपदिकार्थस्यनक्रियात्वमितिदानस्यकरणेत्यनुपपन्नमतआह·दाधात्वर्थस्येति·इदमिति·दाधा
त्वर्थस्येतत्।अतएवभाष्येक्रियाग्रहणङ्कर्तव्यम्।इहापियथास्यात्।श्राद्धायनिगर्हते।युद्धायसन्नह्यते।पत्येशेतेइति·तत्तर्हिवक्तव्यन्न
वक्तव्यम्।कथम्।क्रियांहिनामलोकेकर्मेत्युपचरन्ति।काङ्क्रियाङ्करिष्यसि।किङ्कर्मकरिष्यसीतिभाष्येउक्तम्।श्राद्धायेति·श्राद्धन्नि
न्दन्निनास्तिकत्वात्।युद्धायेति·युद्धविषयकंसन्नहनपूर्वकन्निश्चयङ्करोतीत्यर्थः पत्येशेतइति·पतिमुपसृत्यशेतेइत्यर्थः।कर्मणेत्यत्र
कर्मपदन्नयत्किञ्चित्क्रियाकर्मपरम्।किन्तूच्चारितवाक्यघटकधात्वर्थक्रियाकर्मपरम्।एवञ्चकर्मसम्बन्धित्वेनेच्छाविषयोयस्ससम्प्रदा
नंस्यादितिसिद्धम्।अतएवाजाङ्ग्राममन्नयतात्यत्रनग्रामस्यसम्प्रदानत्वन्तत्रत्यजाग्रामसम्बन्धोजायतामित्येवेच्छानतुग्रामोऽजासम्बन्धो
जायतामित्याकारेच्छा।यद्वातुसंयोगानुकूलव्यापारमात्रन्धात्वर्थःग्रामसंस्कारार्थञ्चाजानयनन्तदाग्रामायाजान्नयतीतिभवत्येव।
कर्मणेतितृतीयोपपन्नयेआह·सम्बद्धमिति·सत्वादीति·आदिनास्वामित्वपरिग्रहः।सएव·सम्प्रदानत्वशक्तिमाने।ननुकर्मणेतिन
कर्तव्यम्।अयमभिप्रैतीत्युक्तापिउद्देश्यस्यलाभा[त्]क्रियाग्रहणाच्चनका[?]मित्यपरमनुकूलम्भविष्यतीत्याशयेनाह·कर्मणेतिकिमिति·
उद्देश्यतयाधात्वर्थफलाश्रयत्वेनेच्छावि[षय]त्वादस्योद्देश्यत्वम्।अतएवान्तरङ्गत्वम्प्रथमतोऽस्यधात्वर्थफलाश्रयत्वप्रकारकेच्छात
नोविप्रादेस्तत्सम्बन्धित्वप्रकारकेच्छेति।कर्म[णा]योऽभिप्रैतीतिकर्म[णा]ऽभिप्रैतीत्युक्तेआख्यातार्थकर्तुरुपस्थितत्वात्योऽभिप्रैतीत्यस्य।
लाभोभविष्यतीत्यभिप्रायः।नचपंसङ्गस्या[ध्य]ाहारोभविष्यतीति[वा]च्यम्·अतपदार्थसम्बन्धेनैवाकाङ्क्षाशान्तेरध्याहारेमा।
नाभावात्।ननुकर्तुरीप्सितंहिकर्मभवति।नहि[त]दाकर्तास्तीतिकथ[ङ्क]र्मसञ्ज्ञेत्याह·नचेकर्तुरिति·स्वतन्त्रोपलक्षणत्वादिति·स्वातन्त्र्य

स्त्वयान्वर्थे प्रधानीभूतव्यापाराश्रयत्वनत्त्व प्रकृ[illegible]कर्त्तृसञ्ज्ञाभावेप्यस्य[illegible]वेतिभावः।कर्तुः सम्प्रदात्वेइष्टापत्तिरिति तु नश्रभितव्यम्।उ
पाध्यायायशिष्येणगौर्दीयतइतिप्रयोगोयत्र[illegible]त्रशिष्यायोपाध्याय[illegible]गौर्दीयतइतिप्रयोगापत्तेः अतएव कर्त्तृग्रहणस्यस्वतन्त्रोपल
क्षणत्वादेव कर्तुरपादानत्वेपीति सार्थएनन[illegible]जति।अयत्र्वसार्थो[illegible]स्यतइतिव्यत्रसम्प्रत्ययः।सार्थश्चमनुष्यसमुदायः समुदायश्चस
मुदायावयवाभिन्नोयमपितत्समुदायावयव[illegible]तिसार्थस्यापादानत्वेपि निरुक्तत्वातत्रान्तस्यास्तीतिभावः।अकर्मकक्रियोद्देश्यस्सः पत्ये
शेतइत्यादौपत्यादेः।नन्वकर्मकक्रियास्थले[illegible]प्रसङ्गनिवारणायकृतम्[illegible]क्रियस्यायमभिप्रैतीतिवचनस्यकर्मण्यतिप्रसङ्गइत्यत आह
कर्मरहितेति इदञ्चव्याख्यानत्रापूर्वमित्याशयेनाह सकर्मकेष्विति त[illegible]र्थान् सम्प्रदानत्वेनाभिमतेतोयोविप्रादिस्तत्पुष्ट्यादिप्रयोजककृत
याविप्रार्थत्वात् दासगोघ्नाविस्येतदर्थमिति सम्प्रदानेकारकेतेनसूत्रेणदाशगोघ्नशब्दायोर्निपातनात् अतएवमूलेदाशन्तितस्मैदाश
गोहन्नितस्मैगोघ्नोऽतिथिरिति नयोरर्थोन्वक्ष्यति ननुसम्प्रदानशब्दः स्वसम्प्रदीयतेयस्मै यत्पुष्ट्यादिकामतयाइत्यर्थः कल्प्यतेऽतोन
तत्सूत्रानुपपत्तिरतआह तत्सम्प्रदानकमिति सम्प्रदानंसञ्ज्ञायाःसत्वेविप्रायगान्ददातिदानीयोविप्रइतिवाक्याद्विप्रसम्प्रदानक
न्दानमितिदानसम्प्रदानाभिन्नोविप्रइत्यादिरीत्यावोधोभवति तादर्थ्येएवचतुर्थीविधानन्नदापूपायदार्वितिशब्दाद्यथापूपार्थे
न्दार्वितिवोधोभवतितथाविप्रायगान्ददातीत्यादिशब्दाद्विप्रार्थङ्गोकर्मकन्दानमित्याद्येववोधःस्यादितिभावःकिञ्चसम्प्रदानत्वे
नैतेभ्यः शब्देभ्योवोधश्चेत्स्वीक्रियतेतदाकर्मणायेतिसूत्रस्यक्रियार्थोपपदस्यचेतिसूत्रेणागतार्थतानभवत्यन्यथाविप्रम्पोषयि
तुमित्याद्यर्थकल्पनाऽस्यसूत्रस्यतेनसूत्रस्यतेनसूत्रेणागतार्थतास्यात् अतएव सम्प्रदानसञ्ज्ञासत्वादेव यत्तुचतुर्थीसमा
सेकारकपूर्वपदत्वाज्ञतिकारकोपपदादितिसूत्रन्नद्विषयेप्रवर्त्ततेइति तन्नतादर्थ्येचतुर्थ्यैवसिद्धेश्चतुर्थीसम्प्रदानइतिसूत्रं

रुच्यर्थानामित्यादिविषयेचतुर्थ्येर्थेमितिभाष्यात्तद्विषयेकारकपूर्वपदकस्वराभावस्यापिकल्पनसम्भवात्।पूजार्थत्वेत्विति·
एतेनण्वाद्बोधेवैलक्षण्यंसूचितम्।हरिर्भक्तिमभिलष्यतीत्यत्ररुच्यर्थानामितिसूत्रेणचतुर्थ्यप्रवृत्त्यर्थमर्थभेदन्दर्शयति·
अभिलष्यतीत्यादिना·प्रीतिव्यधिकरणमिति·एतेनकर्मसञ्ज्ञापवादभूतेयंसम्प्रदानसञ्ज्ञा।नचप्रीधातोरप्येवंसतिसम्प्रदा
नसञ्ज्ञाप्रयोजकत्वंस्यादितिहरिम्प्रीणयतीत्यनुपपन्नमितिवाच्यम्।प्रीयमाणइतिनिर्देशेनप्रीधातुयोगेसम्प्रदानत्वाभाव
स्यकल्पनात्।कारकाधिकारादाह·क्रियाजनकत्वमात्रेति·षष्ठीविषये।इत्यस्याप्याप्त्तेरिति·अत्रकर्मसञ्ज्ञाधिकरणसञ्ज्ञाव
द्वाधिकास्यादितिभाव·।ज्ञीप्स्यमानइत्यत्रज्ञाधात्वर्थकर्मणिचेत्प्रत्ययस्तदाज्ञानविषयस्यानेनसम्प्रदानसञ्ज्ञा।णिजन्तार्थक
र्मणिचेत्क्रियतेतदाज्ञानाश्रयस्यबोधइतिव्याख्याभेदेनार्थभेदन्दर्शयति·श्लाघादेरिति·आत्मानुरागमिति·ण्यर्थकर्मणिप्र
त्ययपक्षेइदम्।ज्ञाधात्वर्थकर्मणिप्रत्ययपक्षेआह·यद्वेति·सन्नन्तार्थकर्मत्वमुभयोरपिसम्भाव्यतइतिविनिगमनाविरहाद
न्यतरस्त्रैवेतिननियमइतिभावः।उभयथापिकर्मसञ्ज्ञापवादस्यम[illegible]ज्ञाप्यमानइत्येवनोक्तम्।किन्तुज्ञीप्स्यमानइत्यतोर्थभेदइति
तत्त्वम्।एतेनज्ञाधातोःप्रथमोपस्थितत्व[illegible]मेवविवितमकमित्यपास्तम्·यत्तुण्यन्तार्थकर्मण्येवप्राधान्यादत्रप्रत्ययइति तन्न·
सनुपादानस्वारस्यविरोधात्·धारेरितिसू[illegible]धृञोणिजन्तस्यग्रहणमितिभ्रमवारणायाह·धृङ्अवस्थानइतीति·व्याख्यानादि
ति·यदिधृञोहेतुमण्यन्तस्यायन्निर्देशइत्यु[illegible]ते तदामोक्षधृञ्धात्वर्थकर्तृत्वासम्भवः।किञ्चधृतःसकर्मकतयामोक्षस्यकर्म
त्वन्नस्यात्धृङ्स्त्वकर्मकतयाण्यन्ततायां कर्तृत्वम्मोक्षस्यास्तीतिहेतुमतिततोणिचिमोक्षस्यगतिबुद्धीतिसूत्रेणकर्मत्वसम्भ
वतीतिभक्तायधारयति मोक्षंहरिरितिप्रयोगउपपद्यतेइत्येतद्दूषणमूलकादित्यर्थः।भक्तस्यकारकत्वमुपपादयति·प्रेरणा

याइति। नन्वत्र मोक्षस्य करणत्वं स्वेनैव भक्तस्योन्नमर्गोत्वनत्स्वामित्वादुपपत्स्यते तन्न देवन। करणं हि नामयत्र सजातीयदान
मङ्गीकृत्य परदत्तद्रव्यादानन्तरं तत्कालिकं कं हो तद्रव्यसजातीयद्रव्यदानना भूयो दृष्टविशेषः। प्रकृते मोक्षस्यैवं विधकरणत्वा
भावेनैतत्स्वामिनो भक्तस्योन्नमर्गोत्वासम्भवात् तत्राह। अवश्यदेयत्वेनेति। स्पृहेरीप्सितइति सूत्रे यदीप्सितपदं न दिच्छाविषय
परम्। पुष्पेभ्यः स्पृहयती त्युदाहरणोऽस्य दि[...]च्छामात्रवाची। पुष्पपदार्थस्य च विषयितायाश्चतुर्थ्यर्थेऽन्वयः। क्रियाजनकत्वञ्च
विषयत्वेनैवेति। यदा तु प्रकर्षस्य प्रकृतधातुर्यात्तव्यापारजन्यफलाश्रयत्वस्य विवक्षा तदा कर्मसञ्ज्ञेति मूलग्रन्थात्स्मतीयते। अत
एव स्पृहणीयगुणोः स्पृहणीयाय शोभस्यत्र कर्मण्यनीयर। कुमार्यइवकान्तस्यत्र स्यन्तिस्पृहयतीत्यत्र तु इच्छासम्बन्धित्वमात्र
स्य विवक्षा न तु क्रियाजनकत्वरूपकारकत्वस्यापीत्यतः षष्ठीत्याशयेनाह। फलाश्रयत्वेनेति। प्रकृतसूत्रचारितार्थ्यमाह। इदं सूत्र
मिति। क्रियाजनकत्वमात्रेसत्र मात्रपदेन तादृश फलाश्रयत्वव्यवच्छेदः। स्वीयसिद्धान्तरीत्याशाब्दबोधमाह। पुष्पसम्प्रेति।
यत्र तु षष्ठी तत्र विशेषमाह। कुमार्यइवेति। क्रियासम्बन्धित्वमात्रेति। मात्रपदेन क्रियाजनकत्वव्यवच्छेदः। पन्तु प्रकृतसूत्रेण
सम्प्रदानसञ्ज्ञा क्रियासम्बन्धित्वविवक्षायामेव। अतएव षष्ठ्यपवादत्वमस्या इति व्यवहारः। एवं सति कुमार्यइवेत्यत्र कथं षष्ठी
त्याकाङ्क्षायामध्याह्रियमाणपदार्थान्वयविवक्षयेत्याहुस्तन्मतमाह। अन्ये त्विति। भोगायेत्येध्याहृत्येति। अत्र शब्दाध्याहारः।
यदि तु स्पृहयतियोगविवक्षैव वदाप्याह। कान्तायेतीति। आहुरित्यस्वरसबीजन्तु अस्य सूत्रस्य कारका धिकारीयत्वात् क्रियासम्बन्धि
त्वमात्रविवक्षायामित्यस्यासङ्गतेः। वदतो व्याघातात्। किन्त्व कुमार्यइवेत्यत्र शब्दाध्याहारे विभक्तिविपरिणामे वा गौरवम्। सू
त्रस्यैतस्य कर्तुरीप्सिततममित्यस्य च विषयविभागश्चो[...]व। स्पष्टप्रतिपत्तये सिद्धान्तमाह। स्पृहधातुरिति फलावच्छिन्नइति। अ

त्रफलत्वयिच्छायाएव।तस्याश्चान्ततोविलक्षणविषयतारूपमेवाश्रीपते।अत एवोक्तम्प्रकर्षविवक्षायामिति।एवञ्चकर्मसञ्ज्ञायाः
शेषषष्ठ्याश्चापवादयमित्युक्तिः प्रयुक्ता।त्रयाणांसूत्राणांपरस्परपरिहारेणैवप्रवर्तनेः क्रुधद्रुह· एषामर्थद्वार्थीयेषामित्यर्थः
।क्रोधश्चामर्षरूपोमनसोवृत्तिविशेषः।उत्कर्षविरोधिधर्मारोपानुकूलव्यापारात्मकः।द्रोहश्चापकाररूपः।सच्चतदीयगुणेदोषा
रोपानुकूलव्यापारइतितयोर्भेदः।ईर्ष्याचाक्षमासाच्चपरकीयपाण्डित्यादिगुणानामसहनन्तच्चगुणादिज्ञानजन्यद्वेषात्मक
म्· असूयाचगुणेषुदोषतादात्म्यारोपइतिद्रोहादस्यभेदः।द्रोहविषयेनैतदेवदत्तस्यगुणाः किन्तुदोषाएवेतिज्ञानम्।असूया
विषयेदेवदत्तोदुष्टइत्याकारकज्ञानम्। कोपश्चदेवदत्तीयविपरीताचरणज्ञानजन्योवृत्तिविशेषइत्येतेषाङ्कोपप्रभवोपपत्तिः
।वस्तुतस्तुचक्षुरादिविकारानुमेयः प्ररूढःकोपएवक्रोधः।द्रोहश्चापचिकीर्षारूपः।मूलोक्तमपकारपदमप्यपचिकीर्षापरम्
तान्नक्षमतेइति· अत्रक्षमाचपरपुरुषदर्शनप्रयोजकदेशविशेषस्थितिरूपफलानुकूलव्यापारानुकूलव्यापारएव।अत
एवतामितिकर्मत्वम्।ईर्ष्याचतदभावः।ननुक्रिययायमित्यनेनैवसिद्धेःसूत्रस्यवैयर्थ्यमतआह· हरेरिति· कुपधातुयोगे
कर्मसञ्ज्ञांवारयति· नत्वकुपितइति· क्रोधइतीति· बोधनेनेतिशेषः तदर्थत्वाभावेन· क्रोधार्थत्वाभावेन· नतद्योगइदम्।कु
पधातुयोगेसम्प्रदानत्वन्नकिन्तुतद्योगेक[illegible]सञ्ज्ञेतिशेषः।अतएवभाष्येकपरीक्तम्व्याकुप्यतेतिकर्मप्रयोगोमनोरमोक्तउप
पन्नोभवति।यद्विचशनिरशनिश्चतस्तुचैनिहन्तिकुप्यसिनरेन्द्रयस्मैत्वम् यस्मैप्रसीदसिपुनःसभास्युदारोऽनुदारश्चेतिका
व्यप्रकाशस्यप्रयोगानुपपत्तिरितिविभाव्यतेतदामहाकविप्रयोगदर्शनेनप्ररूढकोपार्थकत्वङ्कुपधातोरपिकल्पनीयम्।को
पसामान्यार्थककुपधातुयोगेतुनेतिसमर्थनीयम्· नचचित्तदोषार्थानामित्येवसूत्रमस्त्विति वाच्यम्· द्विषधातुयोगेऽनिष्ट

सङ्गात्। अत एवौषधन्दृष्टेति प्रयोग उपपन्नो भवति क्रोधादयश्चेतनविषया एव। द्वेषस्तु चेतनाचेतनविषय इति· ननू
पसृष्टपदस्य सोपसर्गयोरिति व्याख्यानकथमत आह· वैयाकरणेति· निकाय्ये· गृहे शास्त्ररूपे·। अत एव· पूर्वोक्तरी
त्याराधधातोरकर्मकत्वस्वीकारादेव। धात्वर्थैकदेशकृत्स्नपदार्थान्वयः। प्रश्नविषयशुभाशुभाश्रयत्वेन कर्मत्वं कृत्स्नस्ये
ति सकर्मको यन्धातुरिति तु न शक्यम्। तस्य फलस्य प्रकृतधात्वर्थप्रधानीभूतव्यापारजन्यत्वाभावात्। व्याख्यानादिति·
द्विवचननिर्देशदर्शनमूलकव्याख्यानादित्यर्थः। अनयोः। जन्नदुपसर्गपूर्वकयोः। अत्र विप्रपदाच्चतुर्थ्या आश्रयत्वमर्थः
। तस्य प्रवर्त्तनायामन्वयः। वस्तुतस्तु सम्प्रदानत्वशक्तिमत्त्वेनैवान्वय इति। अनुप्रतीति सूत्रे अनुप्रतिभ्यामिति समासः। य
द्वा प्रकृतिवदित्यतिदेशेन लुक्। तदाह· लुप्तपञ्चम्यन्तमिति· प्रत्येकमिति शेषः। अत एव प्रत्येकन्निमित्तत्वम्। तस्मादाह·
अनयोरिति· प्रासनस्येत्यर्थ इति· उपस्थितत्वात्। करणत्वस्य व्यापारनियतत्वसंरक्षणायाह· व्यापारश्चेति· तादर्थ्ये· त
स्मै इदन्तदर्थम्। तस्य भावस्तादर्थ्यम्। अस्याश्चतुर्थ्या उपपदविभक्तित्वेनेयं विशेषणादेव· उपकारकत्वमत्र न साक्षादे
व किन्तु परम्परयापि। अत एव· मुक्तये हरिम्भजतीत्यत्रेव ब्राह्मणाय पायसमिति वद्धीत्यत्रापि चतुर्थी सिध्यति। ब्राह्म
णाय वेद इत्यत्रापि तादर्थ्य एव। क्लृपीत्यत्रैकानिर्देशमत्र वारणायाह· सप्तमीति· अर्थग्रहणमिति· जायत इत्यादियोगे चतु
र्थीदर्शनमूलकव्याख्यानात्। न्यूनतावारयति· सुखयोगेपीति· यस्यात्स्मैहितमिति निर्देशाद्धितशब्दयोगे चतुर्थी
तथा चतुर्थी तदर्थार्थवेति सूत्रेण चतुर्थ्यन्तस्य सुखशब्देन सह समासविधानाज्ज्ञापकात्सुखयोगेपि भवतीति
क्रियार्थमिति· नपुंसकत्वमत्रोपपदापेक्षया। अत ए[illegible]न सता[illegible]तथा च यत्सिद्धं तदाह· क्रियाफलकार्थेति फलेभ्यो याती

फलान्याहर्त्तुमित्याकारकबोधश्चोच्चारितः शब्दइतिनियमान्नसम्भवतीतिशङ्कानिवारणायाह। यथावाक्यार्थइति। यत्तु
प्रकृतसूत्रबलादेतत्सूत्रोदाहरणघटितवाक्यात्पदानुपस्थितस्याप्याहरणस्यशाब्दबोधविषयत्वङ्कल्प्यते।परजन्यपदा·
र्थोपस्थितिरेवशाब्दबोधहेतुरित्यस्यौत्सर्गिकत्वादत्रत्यागएवेतितन्न· उक्तरीत्याभाष्याविरोधेनसत्याङ्गतावेवङ्कथनस्या
नुपयोगात्।नमस्कुर्मइत्यत्रनमःशब्दयोस्यार्थेन्नसिंहशब्दार्थोन्वयेनमःस्वस्तीतिसूत्रेणैवचतुर्थीसिद्धावस्यसूत्रस्यवैय
र्थ्यमतआह।नमःस्वस्तीत्यनेनेति।कर्मणिस्थानिनइत्येतावन्मात्रस्यैवोपादानमस्त्वित्यतआह। पिण्डीमित्यादाविति· तुम् श
ब्दस्तुमुन्प्रत्ययपरस्सचनकस्यापिभाववचनस्यार्थइत्यतआह· तुम्शब्देनेति। भाववचनग्रहणसामर्थ्यात्सूत्रविशेषस्य·
लाभेस्पष्टप्रतिपत्तयेतस्यसूत्रस्यार्थमाह· भावेयइति· यागाययातीत्यादौफलप्रयोजकत्वरूपसम्बन्धोविभक्त्यर्थः।तादर्थ्ये
चतुर्थीत्यनेनतुनैतत्सूत्रोदाहरणविषयेचतुर्थीसिद्धिः घञादिनातादर्थ्यस्योक्तत्वेनोक्तार्थानामप्रयोगइतिन्यायेनत्वतुर्थ्या
ऽप्राप्तेः।एवञ्चप्रातिपदिकार्थेतिसूत्रेणप्रथमाबाधनार्थमिदंसूत्रम्। द्विषोविघातायविधातुमिच्छतेत्यादिस्थलेतादर्थ्यएवच
तुर्थी।अन्यथातुमुलन्तस्यप्रयोगात्स्थानिनइत्युक्तत्वाच्चतुर्थीनस्यात्।नचोक्तार्थानामितिन्यायात्तादर्थ्येचतुर्थ्यपिकथमिति
शङ्क्यम्।विधानक्रियातादर्थ्यस्येच्छानिष्ठस्योक्तत्वेपिविधानक्रियानिष्ठंयद्विघाततादर्थ्यन्तस्यानुक्तत्वात्· वाचनिकमेवेदमि
ति· अतएवतत्रचदीयतइत्यत्रयस्यचभावेनेतिसूत्रविहितसप्तम्यपेक्षयाऽधिकरणसप्तम्याबलवत्वङ्के· यटेनोक्तं सङ्गच्छते।
केचित्।भाष्यतत्वविदः। अन्तरान्तरेणेतिसूत्रस्थकैयटोक्तन्दूषयितुन्तन्मतमाह।क्रियाकारकयोरि ति·अन्तरङ्गइति· त

भै·
२२७

योः परस्पराकाङ्क्षाया उत्थितत्वात्। यथा प्रकृते कृधात्वर्थः स्वनिष्ठापकृष्टत्वबोधानुकूलो व्यापारस्तस्यैव नमः शब्दो द्योतक
तस्योपकारकः। तद्घटकबोधश्च किन्निष्ठ इत्याकाङ्क्षा। देवाश्च किम्फलाश्रया आकाङ्क्षा अत्र द्रष्टव्या। यदि च प्रकृते नमः श
ब्दो वाचकः स्यात्तदा नमः शब्दार्थोऽवतादृशबोधानुकूलव्यापारमात्रम्। व्यापारश्च कृधात्वर्थस्तयोः शीघ्रम्परस्पराकाङ्क्षा
पान्वयोत्तरन्देवानां प्रधानीभूतव्यापारप्रयोज्यकृधात्वर्थफलाश्रयत्वविरहात्कर्मत्वन्न स्यात्। नमः पदस्य द्योतकत्वे तु धा
त्वर्थव्यापारप्रयोज्यफलाश्रयत्वात्तन्निर्वाहः। एवञ्च क्रियाकारकयोः साक्षात्सम्बन्धो जन्यजनकभावरूपो निपाताकाङ्-
क्षाप्रयोजकः। नमः पदस्य द्योतकत्वे तु धात्वर्थव्यापारप्रयोज्यफलाश्रयत्वात्तन्निर्वाहः। एवञ्च क्रियाकारकयोः साक्षात्स
म्बन्धो जन्यजनकभावरूपो निपाताकाङ्क्षाप्रयोजकः। नमः पदेन सम्बन्धश्च स्वद्योत्यव्यापारप्रयोज्यबोधाश्रयत्वरू
प इति बहिरङ्ग इत्येव। एवमेव सर्वत्रोपपदार्थेन सहान्वयस्य बहिरङ्गत्वमुपपादनीयमिति तेषामाशयः। तदेतद्दूषय
ति। अत्राहुरित्यादिना। क्रियाकारकभावेनैवेति· नमस्यतीत्यत्र करणरूपेऽर्थे नमो वरिवश्चित्रङः क्यजिति सूत्रेण क्यचो
विधानात्तत्र क्यजन्तार्थान्वयेनैव नमः शब्दार्थान्वयो वाच्यः। एवं सत्युभयविभक्त्योः समत्वादन्तरङ्गन्यायस्यैवासम्भवा
भावात्। एतेन प्रकृते उभयोरपि समत्वेन सहयुक्तेऽप्रधान इति सूत्रेऽप्रधानग्रहणं शक्यमकर्तुम्। न च पुत्रेण सहागतः पि
तेत्यत्र पितृशब्दात्पितृतीयापत्तिः। उपपदविभक्तेरितिन्यायेन प्रथमा भविष्यतीत्युक्तन्तत्र प्रथमायाः येनाभिप्रायेण कार
कविभक्तित्वमुक्तन्तदाविष्कर्तुमाह। कारकविभक्तित्वमिति· कर्त्रादिषट्कान्यतमत्यत्र कर्त्रादिपदङ्कर्तृत्वादिशक्तिपरम्।

राम·
२२७

अतस्तत्सामानाधिकरण्योपपत्तिः। अभिहितकर्त्तृत्वादौ प्रथमास्वीकारेऽपि कर्त्तृत्वादेर्व्विशेष्यं शाब्दबोधे भानापत्तिं वारयति।
द्वावित्यादाविति। नच स्वनिष्ठापकृष्टत्वबोधानुकूलव्यापारस्य नमः शब्दार्थत्वे देवोद्देशेन यत्र नमस्कारः कृतस्तत्र तादृश
फलस्य बोधस्य शूद्रादावपि सत्वाच्छूद्रन्नमस्करोमीत्यपि प्रयोगापत्तिः स्यादिति वाच्यम्। फलतावच्छेदकसम्बन्धेन फ=
लाश्रयत्वस्यैव द्वितीयाप्रयोजकत्वात् प्रकृते च स्वविषयापकर्षावधित्वसामानाधिकरण्यविशिष्टसमवायस्य फलताव
च्छेदकसम्बन्धत्वमनेन सम्बन्धेन फलाश्रयत्वन्नोद्देश्यातिरिक्त इति। अयमर्थो नमस्करोमीत्यत्र धातोरेव· नमः शब्द
स्तु द्योतकस्तदभिप्रायेणोक्तन्नमस्कारफलस्येति विष्णवे नम इत्यादौ तु नमः शब्दो निपातः स चोक्तार्थे निरुक्तसमवाय
विशिष्टतादृशबोधानुकूलव्यापारे शक्त इत्यतस्तत्रापि न शूद्राय नम इत्याकारको द्विजकर्त्तृकः प्रयोगः। नमस्करोतीत्यत्र
गतित्वं साक्षात्प्रभृतिषु पाठे। नेति न युक्तम्। साक्षात्प्रभृतिषु च्व्यर्थवचनं कृञ्योगे विभाषा कृत्यमिति वार्तिकविरोधादत आह। उर्यादिषु वे
ति· प्राचीनोक्तं खण्डयति· एकस्यावेति· यथा मासे दीपत इत्यत्राधिकरणसप्तमीयस्य च भावे नेति सप्तम्यपेक्षया वल
वत्वात्प्रवर्त्तत इति कैयटेनोक्तम्। पर्याप्त्यर्थानामिति· अत्र पर्याप्तिः सामर्थ्यम्। तदभिप्रायेण मूले दैत्येभ्यो हरिरलम्प्रभुः स
मर्थ इत्युक्तम्· व्याख्यानादिति। भूषणवारणार्थकालंशब्दस्य कन्यामलङ्करोति हरिदिने भोजनमलङ्करोतीत्यादौ क्रिया
वाचकधातुसमभिव्याहारे प्रयोगात्तत्रोपपदविभक्तेरिति न्यायेन द्वितीयैवेति प्राचीनकृतव्याख्यानादित्यर्थः। अत्र तस्मै
प्रभवति सन्तापादिभ्य इति निर्देशादर्थविवक्षा अलंशब्दविषये ऽवश्यकर्तव्यैव· सोऽर्थो भूषणाद्यर्थकालंशब्दप्रयोगेन प्रती

यतइतिनतत्रचतुर्थीकिन्तुषष्ठ्येवेतिव्याख्यातंकल्प्यते। अलमितिपर्याप्त्यर्थग्रहणङ्कर्त्तव्यमिह्यापियथास्यात्· अलम्मल्लोम
ल्ला। प्रभुर्मल्लोमल्लायेतिभाष्यमप्यत्रमानम्। अतएवालम्क्रमेणात्रभवति। यथापर्याप्त्यर्थकशब्दयोगेतस्मैप्रभवतीतिनिर्देशा
च्चतुर्थीतथातादृशेविषयेसएषामितिनिर्देशात्षष्ठ्यपिभवतीतिमूलोक्तम्। आशीर्विषयत्वेति। स्वस्त्यर्थस्याविषयत्वविव
क्षायामित्यर्थः। तदुक्तम्मूलेपरामपीतितत्त्वम्परस्परविषयपरिहारेणसम्भवतीत्याशयेनतथादर्शयति। स्वस्तियोगेइत्यादिना।
स्वस्तिशब्दार्थश्चमङ्गलम्। यथास्वस्तिगोभ्योभूयादित्यादौ। स्वस्त्यर्थस्याशीर्विषयत्वमेवेतितुननियमः। अतएवस्वस्ति
वृषलायेत्यत्रतत्त्वकथनेपिचतुर्थीभवति सूत्रेपूर्वोत्तरसाहचर्यात्स्वस्तिशब्दोऽव्ययसञ्ज्ञकएवगृह्यतेतदेतदाह। स्वस्ति
शब्दइति। मन्यकर्मणीतिसूत्रव्याख्यानवेलायांयदुक्तम्मूलेतिरस्कारइतितल्लाभोपायमाह। अनादरइति। व्याख्यानादिति
तिरस्कारग्रहणङ्कर्त्तव्यमितिवार्तिमूलकात्तिरस्कारश्चापकृष्टनिरूपितायेमेयत्वाभावोयत्रप्रतिपाद्यतेतत्रसएवप्रतीय
ते। अपकृष्टसादृश्यप्रतिपादनेयत्रतात्पर्यन्तत्रन्यूनगुणेषुसादृश्यप्रतिपादनस्यलोकप्रसिद्धत्वाद्यद्यपितिरस्कारस्तथापि
सूत्रेकुत्सितइत्येववक्तव्येःनादरइत्युपादानादतिशयविशिष्टानादरस्ययत्रप्रतीतिस्तत्रैवसूत्रप्रवृत्तिरित्यभिप्रायः। तादृ
शानादरप्रतीतिश्चनत्वान्तृणम्मन्यइत्यादौस्फुटैव। नत्वान्तृणस्मन्येतृणायवेत्यत्रोभयोरपिविभक्त्योःकर्मत्वशक्तिवि=
शिष्टएवशक्तिः। नतुपकाव्याख्यानादिति। अनभिहिताधिकारस्वारस्यमूलकाद्व्याख्यानादित्यर्थः। मूलकारस्यन्यूनता
म्परिहरति· श्यन्तूपलक्षणमिति। दैवादिकस्यधातोग्रहणमित्यर्थोपलक्षणमित्यर्थः। लिटादावपीति यथाकामाधिक्यादेश

क्तमप्रतिनत्वान्तृणामेनेरत्यादाविति स्त्रीणां वाक्येतासाङ्कर्माधिक्यञ्चाहाहारोद्विगुणः स्त्रीणाम्बुद्धिस्तासाञ्चतुर्गुणा षड्गुणोव्यवहा
रश्चकामश्चाष्टगुणः स्मृतइत्यत्रप्रसिद्धम्। नौकाकान्नशुकश्शृगालवर्जेष्विति मूलकारोक्त्यापरिगणनमिदमितिप्रतीयते। तच्चनयु
क्तम्· भाष्ये ऽनावादिष्विति न त्वामहं नावं मन्ये। नत्वामन्नम्मन्ये इत्युक्त्वायेषुप्राणिषु नेष्यते तेनावादयो भविष्यन्तीति कथनात्·
यदिभाष्यीयमुदाहरणमत्रमूलन्तदाश्शृगालशब्दोपादानमधिकमितितुनशक्यम्। भाष्योदाहरणेषुश्शृगालशब्दानुपादानेपितत्रत्य
बहुवचनादित्यादिप्रामाण्याच्चैवमुपादानात् तदेतदाह· नौकाकेति। गतिरितिवाच्यम्। गतेःकारकस्येत्येवसिद्धमित्याशयेनाह·कर्म
णीतिकिमिती॥ ॐ॥ शारीरेति। परिस्पन्दादिधात्वर्थभूताइत्यर्थः। अर्थपरइति· कर्मणीत्यनेनसामानाधिकरण्यात्। कर्मसञ्ज्ञाहिशा
स्त्रेणार्थस्यैवविधीयते· व्याख्यानादिति· अध्वन्यर्थग्रहणमितिवार्तिकमूलकात्। समकालिकेति· एतच्चफलैःन्वेति। आस्थितप्रति
षेधोवक्तव्यइतिवार्तिकसत्वमस्मिन्व्याख्यानेमूलम्। ननुजनैर्यदायत्रगम्यतेसएवाध्वालोकप्रसिद्धइतिस्त्रियङ्गच्छतीत्यत्रान
ध्वनीतिप्रतिषेधोनप्राप्नोतीत्यतआह· अध्वपदेनेति· स्पष्टञ्चेति· आस्थितप्रतिषेधइत्यादिनेत्यादिः उत्पथादितिल्यब्लोपेपञ्चमीत्या
शयेनाह। उत्पथंसन्त्यज्यइति· इष्यतइत्येतद्यन्मूलेकथितन्तल्लब्धमर्थस्यस्पष्टप्रतिपत्तयेआह। नत्वेति। उत्पथेनेति। करणेतृतीयागं
च्छतीत्येतन्निरूपिताचेत्कर्मकरणयोरैक्यंपथः कर्मत्वानुपपत्तिः। यदिपथःशब्दार्थउत्पथातिरिक्तस्तदोत्पथस्यकरणत्वानुपपः
त्तिरित्येतच्छङ्कानुत्थानायाह। गन्तुमशक्तइतिशेषइति· अत्रेदमवधेयम्· गत्यर्थकर्मणिचतुर्थीवेतिमन्यकर्मण्यनादरइत्यस्यान
न्तरङ्गत्यर्थानाञ्चेष्टायामनध्वनीतिवाकुतोनकृतमिति। यत्तुद्वितीयाग्रहणङ्कर्मणिप्राप्तायाषष्ठ्याग्रामङ्गन्तेत्यत्रतद्बाधनार्थमितितन्न·

सन्दर्शनादिक्रिययागत्यर्थक्रियायाः कृत्रिमकर्मवत्कर्मणा यमभिप्रैतीति ग्रामस्यसम्प्रदानत्वेनचतुर्थ्यां। गत्यर्थकर्मत्वेनद्वितीयाया
श्चसिद्धिमाश्रित्यैतस्यप्रत्याख्यानपरभाष्यप्रामाण्येनभाष्यमतेषष्ठीस्वीकारवत्सूत्रकारमतेपिकृदन्तेनयोगेषष्ठ्युत्पत्त्याविष्टा
पत्तेःस्वीकारात्। नचसूत्रारम्भेउभाभ्यामपिविभक्तिभ्यांकर्मत्वशक्तिमत्वेनैवार्थस्यशाब्दबोधभानम्प्रत्याख्यानपक्षेतुकर्मत्वसम्प्र
दानत्वाभ्यान्तत्तच्छाब्दबोधेभानंस्वीकार्यमितिवाच्यार्थभेदात्कथमेतत्प्रत्याख्यानमितिवाच्यम्। अर्थभेदेपीष्टापत्तिमाश्रित्यैवभ
गवत्ताप्रत्याख्यानात्। यथोत्तरम्मुनीनाम्प्रामाण्यात्। नचग्रामायगच्छतीत्यत्रगमधातोरुत्तरदेशसंयोगानुकूलव्यापारमात्रमर्थ
श्चेन्नतादृशक्रियायाःकर्मत्वमितितादृशव्यापारविषयकसन्दर्शनङ्गमधातोर्धातोरनेकार्थत्वाद्वृत्तिःस्वीकार्या। एवञ्चोत्तरदेश
संयोगरूपफलस्यप्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यत्वाभावेनकथङ्ग्रामस्यकर्मत्वप्राप्तिरितिवाच्यम्। अर्थभेदेपिप्रत्या
ख्यानेइष्टापत्तिवदेकस्मिन्नेवार्थधातोर्यदावृत्तिस्तदाग्रामङ्गमायवागच्छतीत्यस्यानभिधानएवेष्टापत्तेःस्वीकारात्। नचैवमर्थ
भेदेपिचेदत्रद्वितीयाचतुर्थ्योःस्वीकारस्तदाघटङ्करोतीत्यत्रकृधातोरप्यर्थभेदमाश्रित्यघटङ्घटावयवान्करोतीतिप्रयोगापत्ति
रितिवाच्यम्। लक्ष्यानुरोधेनैतादृशेविषयेतादृशार्थभेदेनविवक्षायाअस्वीकारइतिस्वीकारात्। तदुक्तंहरिणा·भेदाभेदविवक्षाच
स्वभावेनव्यवस्थितेति॥:॰:॥ इतिचतुर्थीविवरणम्॥ :॰:॥ ध्रुवमपाये·ध्रुधातोःस्थैर्यार्थकात्कुटादेःपचाद्यचिनिष्पन्नोध्रुवश
ब्दःस्थैर्यार्थकइत्यभिप्रायेणाह। ध्रुवंस्थिरमिति। अपायोविभागइति·नचनाशस्यापायपदार्थत्वंलोकप्रसिद्धमितिकथमेत
त्प्रत्याख्यानमितिवाच्यम्। विभागजनकव्यापारस्यस्वजनकविभागजनकत्वसम्बन्धेनोत्तरदेशसंयोगनाशसम्बन्धितयाऽपा

पपदस्य तस्मिन्व्यापारे लक्षणास्वीकारात्। पतनमात्रन्तु नापायः। वृक्षमजहत्यपि भूमिं स्पृशति पर्णे भूमिम्पततीति प्रयोगात्। त
त्र विशेषमाह। विभागश्चेति। स्वसिद्धान्तमाह। भाष्यानुसारिणस्त्विति। त्वदुक्तध्रुवत्वस्यातद्धात्वर्थव्यापारानाश्रयत्वस्वरूप
स्य एवं हि तत्र भाष्ये उक्तम्। गतियुक्तेष्वपादानसंज्ञा नोपपद्यते ध्रुवत्वात्। रथात्प्रवतात्पततीति। अश्वात्त्रस्तात्पततीति। सार्थाद्गच्छ
तो हीन इति। तत्र त्रासो मानसो धर्मः। न हि तेनाश्वस्य ध्रुवत्वहानिरिति शङ्कामपनेतुमाह कैयटः। त्रासपूर्वके परिस्पन्दने नेकार्थत्वा
द्धातुनां त्रसिर्वर्त्तते त्रस्तश्चाश्वः पातस्य निमित्तमिति पूर्वमश्वस्य त्रस्तत्वेन सम्बन्धः पश्चात्पततीत्यनेनेति ध्रुवत्वमश्वस्य न
स्तीत्तत्समाधानम्भाष्येन वा ध्रौव्यस्याविवक्षितत्वात्तन्वाराघदोषः। किङ्कारणमध्रौव्यस्याविवक्षितत्वात्। नात्र ध्रौव्यं विवक्षि
तम्। किन्तर्हि ध्रौव्यम्। अत्र कैयटः। ध्रुवमेकरूपम् तच्च ध्रौव्यमपायविषयमपायमाश्रीय तेन त्वनवच्छिन्नेम्। अपाय इति। प्र
त्यासत्तेति भावः। अपायेपतिः विभागजसंयोगानुकूलोगतिविशेषोह्यपायः स च प्रधानस्य च प्रगृह्यते स चात्र पतित्युपात्तः न च त
दाश्रयोऽश्वस्तथात्वे कर्त्तृत्वापत्तेः न त्वनवच्छिन्नमिति। अनिरूपितमित्यर्थः। ननु भाष्ये शङ्कासतो नामाविवक्षा स्यात् सतो
प्यविवक्षा भवति। तद्यथा। अलोमिका एडका। अनुदरा कन्यकेति। असतश्च विवक्षा भवति। समुद्रः कण्डिका विन्ध्यो वर्द्धितकमि
ति। एतद्भाष्ये सतश्चविवक्षेति निदर्शनार्थमुपात्तम्। यथा सतो विवक्षा भवतीति। यदि त्वत्कृत भाष्यकैयटरीत्या व्याख्यायते त
दा सिद्धान्तभाष्याक्षराणामक्षरस्वारस्यं नोपपद्यते प्रधानव्यापाराश्रयत्वरूपस्य त्वदभिमतस्याध्रौव्यस्यात्र कदाप्यसत्वात्
तस्मान्मदुक्तरीत्या व्याख्यानमेवोचितम्। लोकप्रसिद्धातिरिक्तेति लोकसिद्धः लोकप्रसिद्धो यो ध्रुवपदार्थो निश्चलरूपस्तद

तिरिक्त इत्यर्थः। शक्तिरिति। नचोक्तरीत्या लक्षणैव कल्प्यत इति वाच्यम्। प्रसिद्धशक्यार्थमादाय शाब्दबोधसम्भवे लक्षणाया अ
नुचितत्वात्। सूत्रार्थमाह। तस्मादित्यादि। स्वरीत्याशङ्कासमाधानभाष्यं योजयति। त्रासादेरिति। आदिना धावनपरिग्रहः। ननु
यदि वैयटोक्तरीत्या ध्रुवमपाय इत्यस्यार्थो वर्ण्यते तदा कर्त्तृवारणाय ध्रुवमपाय इति चरितार्थम्। तन्मते ऽपाये गतिविशेष य=
द्ध्रुवन्तदाश्रय इत्यर्थात् ध्रुवग्रहणाभावे ऽपायात्मकक्रियाजनकमित्यर्थे कर्त्तरि सूत्रप्राप्तेरेव वाच्यतया कर्त्तृसञ्ज्ञाया इयमप
वादः स्यात्। परन्त्वेवन्ध्रुवग्रहणाभावे सूत्रार्थो वक्तुमशक्यः। ध्रुवग्रहणङ्किमर्थम्। ग्रामादागच्छति शकटेनेति करणे ऽतिप्रस
ङ्गापादानपरभाष्यविरोधात्। नहि करणं विभागजन्यसंयोगजनकक्रियात्मकापायजनकम्। किन्तु तादृशापायघटकविभाग
जनकत्वेन करणस्य कारकत्वादपादानसञ्ज्ञायाः प्राप्तिरिति भाष्यस्याभिप्रायो वर्णनीयः। एवञ्चोत्तरभाष्येण करणसञ्ज्ञात्र बा
धिका भविष्यतीत्यनेन यथा परत्वात्करणसञ्ज्ञाया बाधकत्वन्दर्शितन्तथा ग्रामादायातीत्यत्र ग्रामे चरितार्था मपादानसञ्ज्ञाङ्कर्त्तृ
सञ्ज्ञा बाधिका भविष्यतीति न कर्त्तृवारणन्ध्रुवग्रहणप्रयोजनमित्याशयेनाह। ध्रुवमपाय इति त्विति। इदन्त्व प्रयोजनमपायपदस्य।
एतदभावे ध्रुवङ्कारकमित्येवोक्तौ वृक्षस्य पर्णम्पततीत्यत्र वृक्षस्य यथा ऽपादानत्वप्राप्तिस्तथाह वस्तुत इत्यादि। अत्र वृक्षस्य=
क्रियायामेवान्वयो न तु पर्णे तथा सति तस्य कारकत्वाभावसम्भवः स्यात्। ध्रुवग्रहणप्रयोजनमाह। ध्रुवग्रहणप्रयोजनमाह·
ध्रुवग्रहणन्त्विति तथा च तदभावपूर्वोक्तस्थले करणे ऽतिप्रसङ्गः। अतिरिक्तव्यापाराभावेति· स च वृक्षस्य पर्णभिन्नस्य वृक्षे
नास्तीति भावः। वृक्षात्पततीत्यादाविति· अत्र विभागजन्यः संयोगो ऽर्थः पत्तेः वृक्षाद्भूमिम्पततीत्यादाविति· अत्र विभागजन्यसंयो

गानुकूलव्यापारः पतधात्वर्थः। ननु परस्परस्मान्मेषावपसरत इत्यत्र मेषपदोपात्तयोरेव परस्परशब्दार्थत्तया तयोरवधिभावो पगमातिरिक्तव्यापारानाश्रयत्वाभावेन कथमपादानत्वमत आह। परस्परेति वाचकशब्दरूपेणाधिगतभेदस्य वाच्यार्थे आरोपेण तयोरप्यर्थयोर्भेदात्तत्त्वापादानत्वयोरुपपत्तिरिति भावः। अन्यत्र। उद्योते। कैयटादिमतं दूषयति। पतितेति। अत एव। निवृत्तस्यैवोपादानादेव· ननु व्यवधात्वर्थेऽपि विभागस्य प्रवेशात्तद्योगे धनुषा विध्यतीत्यत्राप्यपादानसंज्ञा प्राप्नोतीत्यत आह धनुषेति· ननु त्यजधातोर्विभागानुकूलव्यापारार्थकत्वात्तद्योगेऽप्यपादानत्वं स्यादत आह। वृक्षमिति। स्पन्दे विभागानुकूलव्यापारार्थत्वेन तद्योगे प्राप्तामपादानसंज्ञां वारयति। स्पन्दे त्विति· कर्मप्रत्ययान्तेति· अत एव देवदत्तः स्वार्थं जहातीत्यत्र नापादानत्वम्। सार्थस्य ज्ञापकेनापादानत्वेऽपि कर्मसंज्ञामुपपादयति। कर्मसंज्ञायामिति। धावत इत्यत्रोभयमतेऽप्यपादानत्वमुपपादयति· त्रिपाविष्टस्य· भीत्रार्थेति सूत्रे भयहेतुरित्यस्योपादानादाह। हेतुतृतीयेति · असोढाग्लानिविषय इति· अत्रासोढपदार्थे विशेषणीभूतग्लानिरसहनम्। किञ्चिद्द्विषयकदुर्हरलज्ञानमिति यावत्। असोढ इत्यत्र कर्मणि क्तः। कर्म चात्र ग्लानिविषय एव सच्चाध्ययनादि। परापूर्वको जिधातुश्च क्वचिदभिभवे वर्तते। यथा शत्रून्पराजयत इति इह लसोढग्रहणान्न्यूनीभावार्थकः। न्यूनीभावश्च शक्तिवैकल्यादिरूपः। अध्ययनाच्च षष्ठ्याम्प्राप्तायामिदं वचनम्। ग्लायतीत्यस्य शक्तिविकलो भवतीत्यर्थः· धातोरकर्मकत्व एवैतत्सूत्रोदाहरणम्। यदा त्वयं सकर्मकस्तदा प्रत्युदाहरणम्। उदाहरणे पराजयत इत्यत्र कालेन विवक्षितः। तेनाध्ययनात्पराजिष्यत इत्यत्रापि सिद्धम्। यवेभ्यो गां वारयति कूपादन्धं वारयति दुराचारादनुकम्प्यम्वारयतीत्यादिसकलसाधारण्येन वारयते

र्थमाह। भक्षणेस्यादिना। आदिनास्थानानुकूलव्यापाराभावानुकूलव्यापारसङ्ग्रहः। धात्वर्थफलाश्रयइतिप्रधानीभूतव्यापार
प्रयोज्याभावप्रतियोगिव्यापारजन्यभक्षणसंयोगाद्याश्रयइत्यर्थः। अप्रधानेति· अभावप्रतियोगिभूत· एवञ्चतद्व्यापारजन्यफ
लाश्रयत्वादापदाभिधेयत्वंपवादेः। इप्सितइत्यत्रकर्मणिक्तः। आश्रयमात्रस्य। कर्त्तुः। ननुकर्मसञ्ज्ञापत्तिरतआह। कर्मलक्षण
इति। कर्त्तुरीप्सिततममित्यत्रेत्यर्थः। तद्घटकमिति। प्रत्यासत्त्याऽयमेवयेनेत्यत्रयच्छब्दार्थः। साचान्तर्द्धियद्यपीच्छतिशब्द घटका·
ख्यातार्थंकर्त्तृनिष्ठा तथापिदृश्येशात्वेतिवदन्तर्द्धाविति सप्तमी। उपपदविभक्तेरितिन्यायात्· नतुसतिसप्तमी॥ ❀॥ ननुमातुर्नि
लीयतेइत्युदाहरणेव्यवहितदेशस्थितेर्मातुप्रतिपादनेपीच्छायाः कथंलाभइत्यतआह· आक्षेपलभ्येति· इच्छायाप्रयत्नप्रयो
जकत्वादाक्षेपः। ननुदिदृक्षतइत्यत्रसन्नन्तादृर्शनेच्छालाभेपियेनादर्शनमित्यर्थालाभात्कथमपादानत्वप्राप्तिरतआह। इच्छा
मात्रस्येति। विशिष्टस्येति· चोरकर्त्तृकस्वकर्मकदर्शनाभावरूपविशिष्टस्येत्यर्थः। यदिच्छतीत्यर्थइति। इच्छतिशब्देनकर्त्तुरु
पस्थितत्वात्कर्त्तृलाभइतिभावः। उपयोगशब्दस्यप्रयोजनादिपरत्वभ्रमतिरासायाह। उपयोगशब्दस्येति। नटजनन्यमिति·
कश्चित्तुगाथामितिपाठः सचायुक्तः। षष्ठ्यन्तार्थस्यस्वान्वययोग्येनामसमभिव्याहारतेत्रैवान्वयस्यक्लृप्ततयाकारकत्वानुप
पादनात्। प्रकृतिरूपादानकारणमिति। अस्मिन्नेवार्थेप्रकृतिशब्दस्यलोकप्रसिद्धेः। मूलासङ्गतिपरिहारायाह। वृत्ताविति· मे
वेति· वेदान्तसिद्धान्तात्॥ ❀॥ ननुब्रह्मशब्दार्थस्यगुणत्वाभावात्कथंविभाषेत्यस्यप्राप्तिरतआह· तत्रहीति· भुवःप्रभवइतिसूत्रघ
टकप्रभवशब्देऽधिकरणेऽवित्याशयेनाह। तदधिकरणमिति· जन्महेतौ· जन्मभूमौ। अतिप्रसङ्गंवारयति· प्रकाशतइतिसूत्रेप्र

शब्दोपादानात्कथमप्रकाशार्थकधातुयोगएवेदमितिभावः। ननुल्यप्लोपविधायकशास्त्रस्यानुपलम्भाल्ल्यप्लोपइत्यनुपपन्नम
तआह। ल्यबन्तशब्दाज्ज्ञानइति। बोधप्रक्रियेति। वाक्यैकदेशन्यायेनेत्यर्थः। नन्वाजघ्नइत्यत्रयथाश्रुतान्वये कर्मकत्वस्याङ्गकत्व
योरभावेनकथमात्मनेपदमतआह। आजघ्नइति। कर्मणः। विषमविलोचनशब्दार्थस्यवक्षइत्यस्यानन्वितत्वंवारयति। प्राप्येतिशे
षइति। एवञ्चात्रप्राप्येतिशब्दाध्याहारेणल्यबन्तशब्दज्ञानसत्वान्नल्यप्लोपइतिपञ्चम्यापत्तिरितिभावः। इत्यत्रेवेति। वाक्यैक
देशन्यायेनेत्यादिः। अतएव। अन्यशब्दस्यभेदविशिष्टार्थकत्वादेव। मूलोक्तरीत्या। त्यशब्दस्यार्थपरत्वेनव्याख्यानस्यप्रयोजनमुक्त्वा
स्वमतमाह। परेत्विति। भेदस्यापीति। अपिनापूर्वोक्तार्थसङ्ग्रहः। ननुतस्यनधात्वर्थत्वमतमाह। भिदिरिति। अतएव। तस्यापितस्मिन्
सूत्रेऽपायशब्देनग्रहणादेव। तस्य। नञर्थभेदवतः। ननुमूलोक्तरीत्याघटादिकइतिभवति। अन्यशब्दस्यार्थपरत्वाभावेतन्नसि
द्धेरतआह। घटादिकइति। अतएव। अर्थपरत्वादेवअतएव। घटाद्भिन्नइत्यादौ ध्रुवमपायइतिसूत्रेणैवपञ्चम्युपपत्तेरेव। ननु
चैत्रात्पूर्वइत्यत्रपूर्वशब्दः कालवाचकोनदिक्शब्दइतिकथम्पञ्चमीत्याशङ्क्यनावतारयति। नन्वयमिति। नन्वेवमैन्द्र्यादिशब्दयो
गेपिप्राप्नोतीत्यतआह। तैश्चेति। व्याख्यानादितितेषांयत्रयोगस्तत्रपञ्चम्यदर्शनमूलकाद्व्याख्यानादित्यर्थः। नह्याचीति। अनेय
ववाचीत्यर्थः। अतएव। अवयववाचकादेवज्ञापकेनपञ्चम्याभावस्वीकारादेव। अस्मादिति। भागविशेषादित्यर्थः। अत्रपू
र्वशब्दः पूर्वकालावच्छिन्नपरः तस्य। अञ्चूत्तरपदस्य। प्रत्ययग्रहणादिति। प्रत्ययशब्दस्यप्रत्यायकपरतया श्रूयमाणत्वलाभ
। श्रूयमाणएवहित्यायकोभवति। भाष्येस्पष्टमिति। तत्रह्येवमुक्तम्। प्रत्ययग्रहणङ्किमर्थम्। इहमाभूत्। प्राग्ग्रामात्। प्रत्यग्ग्रामा

त्। अञ्चूत्तरपदस्याप्येतत्प्रयोजनमुक्तम्। तत्रान्यतरच्छक्यमवक्तुमिति। कार्त्तिक्याः प्रभृतीति भाष्यप्रयोगात्प्रभृतिशब्दयो
गे पञ्चमीति भ्रमनिवारणायाह। प्रभृत्यर्थेति। अन्यथा· प्रभृतिशब्दयोगेपि पंचम्यङ्गीकारे एवसति यत्फलितं तदाह। एव
ञ्चेति। प्रभृत्यर्थयोगे पञ्चमीत्यर्थस्वीकारे च। नन्वेवमर्वाचीमारभ्येत्यत्रापि पञ्चमी कुतो नेत्यत आह। अर्वाचीमारभ्येति। प्र
भृतीत्यारभ्येत्यर्थकमव्ययम्॥ ॥ एतदर्थकतापि। अवधिमादायेत्यर्थतापि। अपिना गृहीत्वेत्यर्थकतायाः सङ्ग्रहः। मेरुपृष्ठा
दारभ्येति वाक्यस्योपपत्तिमाह· तन्वर्वाचीमारभ्येत्यस्य कथमुपपत्तिरित्यत आह। आरभ्येत्यस्येति। अर्वाच नरकविशेषः।
इत्यादाविति। अत्रादिना प्रातःकालमारभ्य पठतीत्यादिसङ्ग्रहः। ज्ञापनं विनापि कार्त्तिक्याः प्रभृतीति प्रयोगोपपत्तिमाह। वस्तु
तइति। समभिव्याहृतपदार्थो मासादिः। गम्यमानक्रियापेक्षमिति। गम्यमाना या क्रिया गमनादिरूपा तदपेक्षमित्यर्थः। त
दैवोपपादयति। कार्त्तिकीत इति। नन्वपपरिवहिरञ्चव इति सूत्रस्थ पञ्चम्या इत्यस्यापादियोगे चारितार्थ्यात्सञ्चम्यन्तेन समा
सविधानाज्ज्ञापकादित्यस्यानुपपत्तिरत आह· अयम्भाव इति। सिद्धः समास इति। एवञ्चेपञ्चम्या इत्यस्याभावेपि तृतीया
न्तस्य सुपेत्यस्याभावेपि तृतीयान्तस्य सुपेत्यस्यानुवृत्त्यैवेष्टसिद्धिरित्यर्थः। अञ्चूत्तरपदस्य पञ्चम्यन्तेन समासार्थमपि न प
ञ्चम्या इतीत्याह। तत्साहचर्यादिति· पञ्चम्या अपि ज्ञापनार्थमिति· एतेन पञ्चम्येत्यस्यापादियोगे चारितार्थ्यात्तत्सामर्थ्येनासु
बन्तेन षष्ठ्यन्तेन चासमासोस्त्विति परास्तम्· ननु ज्ञापकेन वहिः शब्देन योगे पञ्चमी चेत्स्वीक्रियते तदा पञ्चमी प्रकरणअ
न्यारादितरर्तइति सूत्र एव वहिर्योगे चेति कर्त्तुमित्यत आह सापीति· अपिना षष्ठीसमुच्चयः। सम्बन्धः। प्रतियोगित्वादिरूपः।

अस्मादेवेति। यस्मादितिनिपातनादित्यर्थः। मूलेएतत्सूत्रवृत्तौ बहुवचनम्प्रयोगभेदात्। दत्ततुल्येति-दत्तस्यैवप्रत्यर्पणंसर्वत्र
नसम्भवतीत्येवमुक्तिः। कर्त्तृवर्जितमित्यस्यकर्त्तृत्वावच्छिन्नप्रतियोगिताकभेदवदित्यर्थः। प्रतीयतेसचासङ्गतः। शतपदा
र्थस्यापिस्वस्वरूपधारणात्मकव्यापाराश्रयत्वेनकर्तृत्वादतआह। कर्त्तृसञ्ज्ञेति। एवञ्चकर्त्तृसञ्ज्ञायाः क्रियायोगएवप्रवृ
त्त्याशताद्बद्ध इत्यत्रयावन्धनक्रियातद्योगनिमित्तककर्त्तृसञ्ज्ञाभावस्यतत्रसत्वाददोषः। हेतुतृतीयापवादभूतेयम्पञ्चमी। ननुतृतीया
वाच्यकोटिनिविष्टमिति। अतएवकरणत्वेनशाब्दबोधविषयन्न-प्रकृतसूत्रोदाहरणेशताद्बद्ध इत्यत्रशतस्यहेतुत्वविवक्षैवनतुक
र्त्तृसञ्ज्ञा। प्रत्युदाहरणेशतेनबन्धितइत्यत्रतत्प्रयोजकोहेतुश्चेतिसूत्रेणशतस्यहेतुसञ्ज्ञाकर्त्तृसञ्ज्ञाच। विभाषागुणेस्त्रियामिति
सूत्रेयोगविभागस्यपदमञ्जर्य्युक्तस्यापिदर्शनादाह। बाहुलकमिति। इत्युक्तेति-अस्योणादयइतिसूत्रभाष्यइत्यादि। प्रकृतसूत्रो
दाहरणेनाड्यादित्यत्रजाड्यस्यान्तःकरणविशेषावच्छिन्नशरीरनिष्ठधर्मस्यबन्धनक्रियाकरणत्वंसम्भवतिगुणत्वञ्चतस्य
सञ्ज्ञाक्रियाजातिभिन्नत्वात्सम्भवति। धूमादग्निमानग्निरत्रधूमपदस्यजात्याश्रयवाचकतयाकथङ्गुणत्वम्। कथञ्चाग्निमन्नि
रूपितंहेतुत्वन्धूमपदार्थस्यतत्कारणत्वाभावादतआह-धूमपदस्यज्ञानमिति। एवञ्चधूमपदस्याग्निज्ञानेऽनुमितिरूपेकारणता
याः प्रसिद्धत्वान्नसूत्रोदाहरणत्वानुपपत्तिरितिभावः। स्पष्टञ्चेदमिति। नचान्यतरस्याङ्ग्रहणस्यविकल्पार्थत्वेपितृतीयाया अ
भावेप्रकृतसूत्रेपञ्चमीद्वितीयायाअनुवर्त्तनादेवतयोःपर्यायेण प्रवृत्तिर्भविष्यतीतिकिंसमुच्चयार्थत्वंवर्णनेनेतिवाच्यम्। पृथगादि
षुपञ्चमीविधानम्। पृथगादिषुपञ्चमीविधेया। पृथग्देवदत्तात्। किङ्कारणम्। नप्रकृतपञ्चमीग्रहणमनुवर्त्तते॥ क्वप्रकृतम्। अपा

दानेपञ्चमीति। अनधिकारात्। अनधिकारः सः। अधिकारेहि द्वितीयाषष्ठीविषयेप्रतिषेधोवक्तव्यः। दक्षिणेनग्रामन्दक्षिणतो ग्राम
स्य· एवन्तर्हि अन्यतरस्याङ्ग्रहणसामर्थ्यात्पञ्चमीभविष्यतीति भाष्यदर्शनेनसमुच्चयार्थत्ववर्णनात्। निपातानामेकार्थत्वात्सम्
च्चयार्थत्वञ्च नानुपपन्नम्। नचैवम्पञ्चमीद्वितीयेऽनुवर्त्तेतइति। मूलेयदभिहितन्तदसङ्गतिरितिवाच्यम्। अनुवृत्त्यभिधानस्य
तद्भाष्योत्तरभाष्यग्रन्थेनानुवृत्तिरप्यभिहितेत्यभिप्रायादितिनसन्दर्भविरोधः। एतेन। उक्तभाष्यविरोधेन। अन्यतरस्यामित्यस्य
शब्दस्यैतदर्थकत्वेहक्रोरन्यतरस्यामित्यत्राप्ययमेवार्थोवाच्यस्सचासङ्गतः। अभावस्यविधेयप्रतियोगिकस्यतत्रानुपस्थित
त्वेनतत्रान्यतरशब्देनभावस्याभावस्यचग्रहण सम्भवात्। तन्मतेभाष्यान्तरविरोधमप्याह। विकल्पविषयइति· प्राचीनमत
न्दूषयन्स्वसिद्धान्तमाह। परेत्विति। विनावर्षमिति। केनेमोपातिद्रुमावितिशेषः। द्वितीयासमुच्चयेनोक्तइति। अन्यतरस्याङ्ग्रहणसा
मर्थ्यात्पञ्चमीभविष्यतीत्यवम्भाष्येउक्तम्। अनेनद्वितीयायाःसमुच्चयकथनन्दूषयित्वाऽनुवृत्तिकथनमप्यसङ्गतमित्याह·प
ञ्चम्याअधिकारइति। प्रागितिचेति। एवञ्चषष्ठ्यतसर्थेतिसूत्रेद्वितीयायाअसम्बन्धवत्प्रकृतसूत्रेपिसम्बन्धोनभविष्यतीति
ध्वनितम्। अतएव· प्रकृतसूत्रेतदसम्बन्धादेव· यद्यत्रद्वितीयासमुच्चयःस्यात्तदाकरणेचेतिसूत्रेपिपञ्चमीसमुच्चयार्थम्प्रकृता
न्यतरस्याङ्ग्रहणस्यसम्बन्धावश्यकत्वेततत्रापिद्वितीयासमुच्चयःस्यादितिभावः। करणेचस्तोकेतिसूत्रेकतिपयस्येतिषष्ठ्यनुप
पत्तिःप्रत्ययविधौपञ्चम्यायुक्तत्वादतआह। षष्ठीगायोष्ठगितिवदिति। अद्रव्यवचनेभ्यइत्यस्यद्रव्यवचनभिन्नेभ्यइतिनार्थःप्र
स्तोकादिशब्दानांशुक्लादिशब्दवद्गुणेगुणिनिशक्ततयाद्रव्यवचनभिन्नत्वाभावादतआह· द्रव्यभिन्नवचनेभ्यइति। एवञ्चपदा

धर्ममात्रपराणांस्तोकादिशब्दानाम्प्रयोगस्तदोदाहरणम्। धर्मिपरत्वेप्रत्युदाहरणम्। ननुधर्मवचनत्वे करणत्वमनुपपन्नमत आह॥ ॰।
करणत्वञ्चेति। ननुस्तोकंम्पचतीत्यत्र धर्मिपरत्वात्कथमद्रव्यवचनत्वमत आह। सत्वभूतेति॰ ननुपचधात्वर्थ फलंविक्लितिस्तासाविक्लि
त्तिरित्येवंरीत्यासर्वनाम्नापरामृश्यतएवेतिकथमसत्वामिति चेन्न। विक्लितिशब्देनपदासो ऽर्थउच्यतेतदातस्यसर्वनाम्नापरामर्शेपि
धातुप्रतिपाद्यत्वावस्थायान्तस्यसर्वनाम्नापरामर्शाभावात्। विकल्पशब्दार्थविकल्पस्यवाशब्देनप्रतिपाद्यत्वावस्थायामसत्ववत्
॥ॐ॥ ननुव्यवहितसमुच्चयः प्रागेवनिरस्तइतिकथमत्रतृतीयार्थत्वकथनमत आह व्याख्यानादिति। व्यवहितसमुच्चयार्थकचका
रोपादानमूलकव्याख्यानादित्यर्थः। ननुदूरान्तिकार्थेभ्योविहितानान्द्वितीयातृतीयापञ्चमीनाम्प्रातिपदिकार्थमात्रेप्रवृत्तौ कि॰
म्मानमत आह। व्याख्यानादिति॰ दूरान्तिकार्थैः षष्ठ्यन्यतरस्यामितिसूत्रानन्तरन्तेभ्योद्वितीयाचेत्येवसिद्धे दूरान्तिकार्थेभ्यइत्यु
पादानन्तत्सूत्रविहितविभक्तीनांपूर्वविहिताभ्योवैलक्षण्यसूचनाय। एवञ्चविशिष्यार्थोनुक्तेरनिर्दिष्टार्थाः प्रत्ययाः स्वार्थेभव
न्तीत्यनेनताः प्रातिपदिकार्थमात्रेभवन्तीतिलभ्यतेइतिव्याख्यानादित्यर्थः॥ॐ॥ इतिपञ्चमीविवरणम्॥ ॐ॥ षष्ठीशेषइति।
सूत्रेपच्छेषपदन्तत्रशेषइत्युच्यतेकः। शेषः कर्मादिभ्योयेऽन्येऽर्थाः सशेषइतिभाष्येउक्तन्तन्मूलकव्याख्यानादाह। उक्तादन्य
इति। तत्तद्रूपेण। स्वत्वत्वादिरूपेण। सम्बन्धत्वेनरूपेणचेति। वाच्यइतिशेषः। राज्ञः पुरुषोस्तीतिवाक्यजन्यशाब्दबोधानन्तर
म्पुरुषोराजस्वत्ववान्नवेतिसन्देहोनभवतीतियथाविशेषरूपेवाच्यताकल्प्यते। तथाराजसम्बन्धीनवेतिसन्देहानुत्पत्तेः सामा
न्येनसम्बन्धत्वेनरूपेणचवाच्यताकल्प्यते। तन्मूलकइति। कर्त्तृत्वनिरूपकक्रियात्वमथवाक्रियानिरूपितकर्त्तृत्वम्मूलंयस्य

तस्मिन्विवक्षितइत्यर्थः। स्वस्वामिभावादिरित्यस्यस्वस्वामिनोर्भावस्वत्वत्वंस्वामित्वंवासम्बन्धः षष्ठ्यर्थइतिप्रतीयते परन्तुतस्य
तद्रूपेणषष्ठीवाच्यतानयुक्ताराज्ञः पुरुषइत्यत्रषष्ठ्यर्थः स्वामित्वञ्चेत्तस्याभिधेयतासम्बन्धेनराजसम्बन्धित्वेपिपुरुषावृत्ति
त्वात्स्वनिरूपितस्वत्वाश्रयत्वसम्बन्धेनस्वामित्वम्पुरुषेप्यस्तीतितुन। तस्यवृत्त्यनियामकतयापुरुषवृत्तितानियामकत्वस्य
वक्तुमशक्यत्वात्। यदितुस्वत्वसम्बन्धस्तदातस्यराजवृत्तित्वाभावेनसम्बन्धत्वंवक्तुमशक्यम्। स्वनिरूपितस्वामित्वसम्ब-
न्धेनराजवृत्तित्वन्तुवक्तुमशक्यम्। तस्यवृत्तिनियामकत्वादत आह। स्वस्वामित्वसमूहइति। अन्यत्र॰ मञ्जूषादौ॰ तत्रस
म्बन्धोहिसम्बन्धिभ्याम्भिन्नउभयसम्बन्धीत्युक्तम्। एवंसर्वत्र॰ अन्वयवाक्यविभावजन्यजनकभावादौ। सञ्ज्ञाविधयैवे
ति। अत्रैवकारेणषष्ठ्यर्थस्यप्रकारत्वम्व्यवच्छिद्यते। अतएवप्रकृतसूत्रेभाष्येराज्ञः पुरुषइत्यत्रराजाविशेषणम्पुरुषोविशे
ष्यइत्युक्तम्। अन्यथासम्बन्धंविशेष्यतयाविशेषणतयाब्रूयात्। एतदेकवाक्यतेयाक्रियाकारकभावसम्बन्धस्यवाचिकाद्वि
तीयेतिभाष्योक्त्याह। कारकविभक्तिभ्यइति। प्राचीनमतेनाह। सम्बन्धत्वेनभानइति। सम्बन्धःकारकेभ्योन्यः क्रियाकारक
पूर्वकः। श्रुतायामश्रुतायांवाक्रियायामभिधीयतेइतिहर्युक्तेराह॰ यद्वेति। कारिकायाङ्कारकपदङ्कर्मत्वादिशक्तिपरम्। त
न्मूलकसम्बन्धश्चविशेषणविशेष्यभावएव। इयञ्चषष्ठीविशेषणत्वेनविवक्षितादेव। नचसम्बन्धेषष्ठीसम्बन्धश्चद्विष्ठइति
साविशेषणत्वेनविवक्षितादेवभवतिनविशेष्यत्वेनविवक्षितादित्यत्रकिंचिद्विनिगमकमितिवाच्यम्। विशेषणवाचकस्यराज्ञ
इत्यादेःपरस्यकेवलस्यप्रयोगेपिविशेषणत्वंस्वसामान्यनिरूपितम्प्रतीयतेतच्चविशेषणत्वंसम्बन्धसाकाङ्क्षमितिविशेषणा

देव सा· तदुक्तं भाष्ये। षष्ठीशेष इति चेद्विशेष्यस्य प्रतिषेधः। षष्ठीशेष इति चेद्विशेष्यस्य प्रतिषेधो वक्तव्य इति· तत्र प्रथमाविधिः। तत्र
षष्ठीं प्रतिषिध्य प्रथमा विधेया। राज्ञः पुरुष इति। उक्तम्पूर्वेण। किमुक्तं त्ववावाक्यार्थत्वादिति। पदत्राधिक्यं वाक्यार्थः। सः। अत्रैकै
यटः। राज्ञ इत्येतत्पदसन्निधाने पुरुषस्सम्बन्धित्वम्प्रतीयते नान्यथा। पुरुष इति प्रतिपादकन्तु स्वार्थमात्रे वर्त्तत इति प्रथमासि
ध्यतीत्यर्थः। ततोग्रे भाष्ये शङ्कितम्। कुतो नु खल्वेतत्पुरुषे पदाधिक्यं वाक्यार्थ इति न पुनराजनि पदाधिक्यं स वाक्यार्थः। स्यात्।
पुरुषपदसन्निधान एव राज्ञः सम्बन्धित्वावगमनो नान्यथेति ततः प्रथमाप्रसङ्गः। वाक्यार्थत्वञ्च पदान्तरसन्निधाने प्रतीयमा
नत्वन्तच्चोभयत्राविशिष्टमिति पुरुषनिष्ठविशेष्यत्ववद्राजनिष्ठविशेषणत्वमपि वाक्यार्थ एव भविष्यतीति पुरुषपदादिव रा
जन्शब्दादपि प्रथमाप्रसङ्ग इति भावः। ततः समाधानम्भाष्ये। अन्तरेणापि पुरुषशब्दप्रयोगं राजनि सोऽर्थो गम्यते। अन्तरेणे
ति। राज्ञ इति केवलेपि पदे उच्चार्य्यमाणे सम्बन्धित्वमपि नियतप्रतियोगित्व[illegible]म्यते तस्माद्राज्ञा परोपकारित्वेन विवक्षितो न
स्वनिष्ठत्वेन। अत्र सम्बन्धित्वं विशेषणत्वरूपम्। अनियतप्रतियोगीत्यस्य[illegible]नियतविशेष्यनिरूपितमित्यर्थः। अत एवोक्तं रा
ज्ञा परोपकारित्वेन विवक्षित इति· न स्वनिष्ठत्वेन। न स्वार्थनिष्ठविशेषणतये[illegible]ते। हरि[illegible]णाप्युक्तम्। द्विष्ठोप्यसौ परार्थत्वाद्गुणेषु
व्यतिरिच्यते। तत्राभिधीयमानश्च प्राधान्यप्युपयुज्यत इति। असौ सम्बन्धः। परार्थत्वात्। परं विशेषणत्वमर्थः प्रयोजनं यस्य
तत्वाद्विशेषणतानियामकत्वादित्यर्थः। भेदे सति विशेषणता[illegible]विवक्षितस्य सम्बन्धं विना विशेषणतासम्भवेन तदाकाङ्क्षित
त्वात्तत्र सम्बन्धो व्यतिरिच्यते उद्भूततया प्रतीयत इति तत्रैव षष्ठीत्यर्थः। विशेष्यस्य स्वनिष्ठत्वादेव न विशेष्यतानियामकसम्ब

५

ध्याकाङ्क्षेतिभावः प्रधानेप्युपयुज्यते। तस्यद्विष्ठत्वस्वभावत्वाद्राजादिनिरूपितविशेष्यतायाराजादिपदसन्निधानेप्रतीय
मानायाउपकारको भवतीत्यर्थः। ननुकर्मादीनामपीतिग्रन्थेनयथातेषांसम्बन्धत्वेनविवक्षाप्रतिपादितातथाकर्त्तुर्नप्रदर्शिते
तिकर्त्तुस्तथाविवक्षानभवतीतिकश्चिद्भ्राम्येदतः कर्त्तुरपिविवक्षामाह। कर्त्तुरपीति। कर्मादीनामित्यनेनसंयोगसम्बन्धाव=
च्छिन्नाधारस्यापितथाविवक्षेतिभ्रमनिवारणायाह। संयोगसम्बन्धेति। ते[illegible]भूत[illegible]स्यघटइतिनप्रयोगः। तत्रभाष्यमपिसा
धकमाह। अतएवेति। ननुतर्हिलोहितोष्णीषेत्यादौषष्ठ्यर्थेबहुव्रीहिर्नस्यादतआह। लोहितइति। यदुक्तमेधःकर्त्तृकर्त्तो·
वातदुपपत्तयेआह। एधशब्दइति-उदकस्येत्यर्थइति। भुवनममृतञ्जीवनीयन्दकञ्चेतिहलायुधकोशात्रमानम्। यदुक्त
म्मूलेहेतौद्योत्यइतितत्फलमाह। हेतुहेतुमद्भावेनेति। हेतुपदार्थस्यस्वनिष्ठहेतुत्वनिरूपितहेतुमत्वसम्बन्धेनेतरान्वयइ
त्यर्थः। हेतुवाचकादिति। हेतुवाचकत्वञ्चविशेषणविशेष्ययोरुभयोरपिवाचकयोरितिहेतुशब्दात्तच्छब्दाच्चषष्ठीत्यर्थः। ष
ष्ठीहेतोरितिनिवक्तव्येप्रयोगग्रहणाद्यत्रहेतुबोधनायहेतुशब्दस्यप्रयोगस्तत्रहेतुवाचकसामान्यात्तस्मिन्वाक्येषष्ठीयथा=
स्यादिति। अतएवान्नस्यशोभनस्यहेतोर्वसतीतिभवतीतिदिक्। सर्वनाम्नस्तृतीयाच। अत्रसर्वनाम्नइतिप्रयोगापेक्षयाषष्ठी
पञ्चम्यान्तुहेतुशब्दात्पञ्चमीतृतीयेनस्याताम्। निमित्तादिप्रयोगेभ्यइति। अत्राप्यर्थेप्रयोगशब्दोपादानमेवमानम्। सूत्रेव्य
र्थइति। अनेनैवसूत्रद्वयसाध्यप्रयोगस्यसिद्धेः। मूलादिदूषणायाह। भाष्यइति। नन्वप्रतिषिद्धमनुमतम्भवतीतिन्यायेनोक्त
म्भाष्यकारसम्मतमेवेत्यतआह। विपरीतमिति। स्त्र्यधिकारात्परेणेत्यादीयथायथंशास्त्रेणेत्यादिविशेष्यानुरोधात्तृतीया

राम
२३५

प्रत्यासत्तिन्यायेनाह· पदपेक्ष्यमिति। तस्याएवेति। पञ्चम्याएवेत्यर्थः। शिष्टकृतम्व्याख्यानमत्रशरणम्। व्याख्यानादिति। जा
नातेरिति· मातुर्गुणस्मरणमिति। गुणेनस्मरणमित्यर्थः। इहगुणरूपस्यशेषत्वविवक्षायामपि अनेनसूत्रेणषष्ठ्यभावेषष्ठी
शेषइतिसूत्रेणषष्ठ्यांसमासोभवत्येव। एतत्सूत्रविषयेपितेनसूत्रेणषष्ठ्यांसिद्धायामेतत्सूत्रन्नियमार्थमितिहिप्रसिद्धोमार्गः
। अतएव। नियमार्थत्वस्येष्टत्वादेव। एतेषान्नियमार्थत्वेवार्तिकमपिसाधकमित्याशयेनाह। प्रतिविधानेति। तद्वार्तिकमपि
नापूर्वङ्किन्तुनियमसिद्धमेवेतिभावः। रुजार्थानामितिसूत्रेउपात्तन्तत्ररुजाशब्दोयद्यपिव्याधौरूढस्तथापिप्रकृतेरोगमात्रं
विवक्षितमित्याशयेनाह· रोगार्थानान्धातूनामिति। अत्ररोगशब्देप्रकृत्यर्थमात्रंविवक्षितम्· व्याख्यानादिति· भावकर्तृ=
काणामित्यस्यनदीकूलानिरुजतीतिप्रत्युदाहरणम्भाष्येउक्तन्तन्मूलकादित्यर्थः। ल्युट्प्रकृत्यर्थोविवक्षितइति। भाव
कर्तृकादितिभाष्यीयव्याख्यानात्भाष्येभावकर्तृकादितिल्यबलोपेपञ्चमी। भावकर्तृकेमाश्रित्येत्यर्थः। अतएव· दिव
स्तदर्थस्येतिसूत्रेशेषपदासम्बन्धादेव· नित्यषष्ठीप्राप्ताविति। दिवस्तदर्थस्येत्यनेननित्यषष्ठीप्राप्तावित्यर्थः। तिङन्तमिति· यदिशेष
पदासम्बन्धेनेदंसूत्रमपिसमासनिवृत्तिफलकम्भवेत्तदायत्रसमासस्यप्राप्तिसम्भावनातादृशङ्कृदन्तमेवोदाहृतंस्यादितिभावः।
पूर्वोक्तमेवार्थंशङ्कासमाधानाभ्यान्द्रढयति। यद्यपीत्यादिना· अतएव· अत्रापिशेषपदासम्बन्धादेव। कृत्वोर्थइतिसूत्रेशेषइति
मण्डूकानुवृत्त्यासम्बध्यतेइत्यत्रबीजन्दर्शयति· अधीगर्थेतिसूत्रइति· बहुवचनेति· अधिकरणस्यसङ्ग्रहेहिबहुवचनंयुक्त
म्भवतीतिभावः स्वसिद्धान्तमाह। वस्तुतस्त्विति· सूत्रोपात्तेति। यद्यप्येवमानुपूर्वीभाष्येवार्तिकस्यनास्तितथापिकैयटव्याख्या

नवशास्फलतीतिप्रकृतएवमुक्तम्। तथाहि· अधीगर्थेतिसूत्रेकर्मादिष्वकर्मकवद्वचनम्। कर्मादिष्वकर्मकवद्भावोवक्तव्यः कि
म्प्रयोजनम्। अकर्मकाणाम्भावेलोभवतीतिभावेलोयथास्यात्। मातुःस्मर्यतेपितुःस्मर्यते। एतद्वार्तिकेकर्मादिष्वित्यत्रादि
शब्दः कर्मव्यतिरिक्तस्याभावादनुपपन्नइत्याशङ्कानिवारणायाहकैयटः॥ आदिशब्दोऽत्राश्रयवाचीति· यथाविष्णुरादिः पृ
थास्सूनोर्भीष्मादिश्चसुयोधनः। तेजयन्तिरणेशत्रून्येषांविष्णुःसमाश्रयइति· तेनहउदाहरणइति। व्याख्यानादिति। उत्तर
सूत्रद्वयस्यपाणिनिपठितानुपूर्वीकस्योपादानसामर्थ्यमूलकव्याख्यानादित्यर्थः॥ अयम्भावः। यद्यत्रशेषइत्यस्यस
म्बन्धस्तदाविभाषोपसर्गइत्यत्रशेषपदसम्बन्धोऽस्तिनवा। आद्येदिवइतिसूत्रेणसमासाभावस्यसिद्धौविभाषोपसर्गइति
सूत्रवैयर्थ्यम्· नचपदानानेनषष्ठीतदाषष्ठीशेषइतिसूत्रेणषष्ठीनदासमासप्रवृत्तिरेवफलमस्त्विततिवाच्यम्। नोपसर्ग
इतिन्यासेनदिवसूत्रस्यनिषेधेशेषषष्ठ्यांसमासविकल्पेनरूपद्वयसिद्धौविभाषाग्रहणस्यतथापिवैयर्थ्यानुद्धारात्।
द्वितीयेविभाषेतिसूत्रस्यकर्मण्येवविकल्पेनषष्ठीविधायकतयाछन्दस्यापाद्यमानरूपाभावाद्ब्राह्मणेविभाषेतिसूत्रवि
हितषष्ठीभावेकर्मणिद्वितीयेतिसूत्रेणद्वितीयायाः सिद्धौब्राह्मणइतिसूत्रवैयर्थ्यंदुर्वारमेव· नचतन्निरुपसर्गेद्वितीया
मर्थमस्त्विततिवाच्यम्। कर्मत्वविवक्षायान्दिवसूत्रस्याप्राप्तेस्तत्रकर्मस्तिद्वितीयेतिसूत्रेणद्वितीयायाः सिद्धेतस्यसूत्रस्य
वैयर्थ्यानुद्धारात्। द्वितीयाब्राह्मणेइतिसूत्रेशेषपदसम्बन्धेनशेषत्वविवक्षायान्द्वितीयार्थन्तदितितुवक्तुमशक्यम्· विभा
षोपसर्गइतिसूत्रेणविच्छिन्नस्यशेषपदस्यपुनस्तत्रसम्बन्धासम्भवात्। नचकृदन्तेनयोगेद्वितीयाब्राह्मणइतिसूत्रेवि

भाषापदसम्बन्धेनपक्षेदिवइतिसूत्रसिद्धषष्ठ्याः पुनर्विधानेनसमासाभावार्थन्तदस्त्विति वाच्यम्। द्वितीयाब्राह्मणेक
र्माश्रयाः द्वितीयाविधिनिमित्तभावेनोपात्तः सकर्मकाअधीगर्थादयः प्रेष्यदुपर्यन्ताः कर्मादिशब्देनोच्यन्ते॥ द्वितीयावि
धिनिमित्तभावेनेति· अत्रद्वितीयाशब्दोलक्षणयाद्वितीयापवादषष्ठीपरः। तेनषष्ठीनिमित्तभावेनेतिफलितम्। दिवधातुविषये
विभाषोपसर्गेद्वितीयाब्राह्मणइतिसूत्रद्वयारम्भाच्छेषपदासंबन्धइत्यतोवार्तिकारम्भः। तत्तर्हिवक्तव्यन्नवक्तव्यम्। अवि
वक्षितेकर्मणिषष्ठीभवतीतिकिम्वक्तव्यमेतत्। नहिकथमनुच्यमानङ्गंस्यते। शेषइतिवर्त्तते। शेषश्चकः कर्मादीनामविवक्षावि
शेषः। यदाचकर्मविवक्षितम्भवतितदाषष्ठीनभवति। स्मराम्यहम्मातरम्। स्मराम्यहम्पितदमितिभाष्येउक्तम्। अत्राविवक्षिते
कर्मणीत्यनेनाकर्मकत्वाङ्गावेलादयः सिद्धाभवन्तीतिदर्शितम्। ततोऽविवक्षितकर्मकत्वेनाकर्मकत्वप्रदर्शनायशेषपदानुवृ
त्तिः प्रदर्शिता। शेषइतिवर्ततेइति। नन्वेवंषष्ठीशेषेइतिसूत्रेणैवषष्ठ्यासिद्धायामेतत्प्रकरणम्व्यर्थमतआह। कैयटाप्रकरणञ्चे
त्ति समासप्रतिषेधार्थमिति। अत्रप्रकरणपदोपादानेनमण्डूका[illegible]तेरयुक्त[illegible]त्सर्वत्रशेषपदसंवन्धइतिदर्शितम्। स्मारितम्।
यथाषष्ठीशेषइतिसूत्रेकर्मादीनाङ्क्रियाकारकभावेनसंवन्धम। विवक्षितङ्कृत्वासंवन्धित्वमात्रविवक्षयाषष्ठीभवतीत्युक्तन्त
थेहापिकर्मादीनामविवक्षयाभावेलादयोभविष्यन्तीतिद[illegible]मित्यर्थः। कर्माश्रयषष्ठीविषयइत्यनेनाधीगर्थेत्यादिदिवस्तद
र्थस्येतिसूत्रसमुदायोगृह्यते॥ नैतावतेति। षष्ठीशेषइतिसू[illegible]वदत्रापिसूत्रेआदिशब्दउपात्तइतिभावः। प्राचीनव्याख्यायान्तो
षमप्याह। किञ्चेति। एतद्भाष्यवलादिति· अव्यवहि[illegible]भाष्यवलादित्यर्थः। अ[illegible] [illegible]सूत्रेशेषपदासंबन्धइत्यर्थः।

वार्त्तिकरीत्येति। तत्र हि यतः कर्मादिष्वकर्मकवद्भूवचनमि[illegible]पा[illegible]म्। अत्र कैयटेन प्रेष्य ब्रुपर्यन्तादित्येवोक्तं न तु कृत्वोर्थप्रयोग इत्ये
तत्पर्यन्तमिति तेन कृत्वोर्थ इति सूत्रे शेषपदासंबन्धो लभ्य[illegible]। दिव इति सूत्रे शेष इत्यस्य संबन्ध इदमेव भाष्यम्मानम्। दिव इति सू
त्रस्यापि तन्मध्यपाठात्। अत्र प्रेष्यब्रुपर्यन्त इत्युपादानेन कटि[illegible]न्तं वास इत्य[illegible]वा[illegible] शेषपदासम्बन्ध इति स्पष्टमेव लभ्यते।
एतत्सूत्रद्वयेति। विभाषोपसर्गे द्वितीया ब्राह्मणे इति सूत्रद्वयेत्यर्थः। न[illegible]वं द्वितीय[illegible] ब्राह्म[illegible] इति सूत्रभाष्ये गामस्य तदहः सभायां दी
व्येयुरित्यत्र शेषपदासंबन्धेन दिव इति सूत्रेण प्राप्तषष्ठीवाधनार्थ[illegible]तत्सूत्र[illegible]त्युक्तं तस्य का गतिरित्यत आह। द्वितीया ब्राह्म
ण इतीति। वार्त्तिकरीत्येति। वार्त्तिककारेण हि शेषपदानुवृत्तिर्नोक्ता किन्त्वकर्मवद्भाव एवोक्त इति भावः। सिंहावलोकनन्यायेनाह
। किञ्चेति। एवञ्च। पूर्वोक्तव्यवस्थासिद्धौ च। तदसंबन्धः। ज्ञोविदर्थस्येति सूत्रे शेषपदासंबन्धः। तथासति यत्फलितन्तदाह। एव
ञ्चेति। तद्योगे। अज्ञानार्थकजानातियोगे। शतन्दीव्यतीत्यादिचेति· दिवस्तदर्थस्येति सूत्रे पूर्वोक्तरीत्या शेषपदासंबन्धे सति
पदासंबन्धित्वेन विवक्षा तदा षष्ठी यदा तु कर्मत्वशक्तिमत्वेन विवक्षा तदा द्वितीयेति रूपद्वयसिद्धिरिति भावः। ननु ज्ञो विदर्थे
ति सूत्रे शेषपदासंबन्धेः धीगर्थेति सूत्रे कथं शेषपदसंबन्धो भाष्य उक्त इत्यत आह। अधिगर्थेत्यादाविति। कर्त्तृकर्मणोः
अत्र सूत्रे शेषपदासंबन्धे साधकमाह। सूत्रवैयर्थ्यापत्तेरिति· षष्ठीशेष इति सूत्रेणैव तस्याः सिद्धेः। तन्विदं सूत्रमपि ज्ञोविद
र्थस्येति सूत्रवत्समासनिवृत्तिफलकम्भविष्यतीत्यत आह। कृद्योगाषष्ठीति· कर्त्तृसाहचर्यादिति· कर्त्तृपदार्थो यथा नामेदे
न क्रियान्वयी तथा भेदेनेतरसंबन्धावच्छिन्नविशेषणविशेष्यभावेन क्रियान्वयियत्कर्मतद्बोधकमेव कर्मपदमिति भावः।

स्तोकम्पाक इति । फलस्य व्यपदेशिवद्भावेन फलाश्रयतया कर्मत्वेन तत्राभेदेनान्वितोयः स्तोकपदार्थः सोपि कर्मैवेति भावः । अ
त्र विशेषमाह । किञ्चेति । असामर्थ्यादिति । सुबन्तार्थविशेष्यान्वये समाससञ्ज्ञाविधायकतया । नयोश्चारितार्थ्यादिति भा
वः । ननु स्तोकम्पाक इत्यत्रैव समासाभावे प्रदर्शनीये स्तोकम्पाचक इति प्रयोगान्तराभिधानङ्किमर्थमिति चेन्न । ओदन
स्य पाचक इत्यत्र तृजकाभ्यामिति सूत्रोदाहरणविषये यथा षष्ठी क्रियाविशेषणवाचकाद्भवति तथा स्तोकम्पाचक इत्यत्रा
पि स्यादिति शङ्कावारणाय प्रयोगान्तराभिधानस्य कृतत्वात् । षष्ठी तु स्तोकम्पाक इत्यत्रैव स्तोकम्पाचक इत्यत्रापि धात्वर्थे
भेदेनान्वयान्न भवतीति पूर्ववद्यद्यपि सम्भवति तथापि वार्तिकविरोधादपि भवतीत्याह । अत एवेति । एतदेव भाष्यमित्या
दि । ननु कष्टश्रितः कष्टश्रित इत्यत्रापि सुबन्तार्थविशेष्येण श्रयणकर्त्रा कष्टमित्यस्यानन्वयात्कथं समास इत्याशङ्कायामाह ।
द्वितीयाश्रितेत्यादेस्त्विति । सामर्थ्यात् । सूत्रारम्भसामर्थ्यात् । उक्तरीत्या । यथाप्राप्तोदकेत्यत्र वृत्तिविग्रहवाक्ययोः समानार्थ
तोपपत्तये प्राप्तिकर्त्रुदककर्मेति बोधः स्वीक्रियते तथा श्रयण[illegible]नरिकष्टक[illegible]र्मणो द्वितीयान्तार्थस्यान्वयेन कष्टकर्मकाभिन्न
श्रयणकर्त्रैत्यर्थकल्पनेसुबन्तार्थविशेष्येणाप्यन्वयो वक्तुं श[illegible]य इति भा[illegible] । उक्ता[illegible]र्थे भाष्यसम्मतिमप्याह । अत एवेति । नेना
न्वयाभावेन समासाभावादेव । भाष्य इति । पूजनात्पूजित[illegible]मित्येतावदेव सूत्रमित्याशयेन वार्तिककारेणोक्तम्पूजितस्यानुदात्त
त्वे काष्ठादिग्रहणम् । पूजितस्यानुदात्तत्वे काष्ठादिग्रहणङ्[illegible]व्यम् । काष्ठादिभ्यः पूजनादिति वक्तव्यम् । इह मा भूत् । शोभनो
ध्यापकः । मलोपवचनञ्च । दारुणाभिरूपकः । तत्रेत्ययं टः । क्रियाविशेषणन्दारुशब्दो द्वितीयान्तं यथा ग्रामङ्गन इत्यादौ दारुणम् ।

तायाअपिक्रियायाः साधनयोगस्तथाविशेषणेनापि[illegible]त्रवैयधिकरण्यात्समासाभावइति। अन्यथा· एतादृशविशेषणवा
चकादपिषष्ठीस्वीकारे। उक्तसामर्थ्येपि ·अवयवव्यवहारकसामर्थ्येपि। षष्ठीसमासस्यवैकल्पिकत्वात्तदभावेदारुणाध्यापकइ
त्यस्यसिद्ध्यर्थम्भलोपवचनमस्त्विति शंकते। नचैति· स्पष्ट[illegible]पत्यर्थंवा[illegible]ग्रहणेकर्त्तव्येतदकरणात्समासार्थमेतत्स्यात्
तथाचवचनम्व्यर्थमेवस्यादित्याशयेनसमासाप्राप्तिविषयक[illegible]मेवतद्व[illegible]नमित्याशयेनसमाधानमाह· तथासनीति· अतएव
वैयधिकरण्येनसमासाप्राप्तिविषयकत्वादेव· ननुवैयधिकरण्येप्यवयवव्यवहारकसम्बन्धमादायसुप्सुपेतिवामपूर्वव्यंसकेतिवा
समासोस्त्वित्यतआह· सुप्सुपेत्यादीति· तदाशयः। तद्भाष्याशयः। परमतखण्डनपूर्वकम्प्रमेबीजन्दर्शयति· कर्त्तृकर्मभ्याभि
ति· धातुरेवेति· अत्रैवकारेणप्रातिपदिकव्यवच्छेदः। ननुशत्यस्त्राभ्रिकइत्यादिशब्दानाङ्कृपणखननादिरूपक्रियोपस्थापक
त्वमस्त्येवेत्यतआह। शत्योभ्र्वइति· तेनरूपेण· साधत्वेन ·अतएवटेवदनेनशत्योऽभ्रः। चैत्रोभूमिमाभ्रिकइतिनप्रयोगः। एतद्भा
ष्येति। कृतपूर्वीकटम्भुक्तपूर्वीओदनमितिविलक्षणस्थलस्वकृतीत्यस्यप्रयोजनप्रदर्शनपरभाष्यप्रामाण्यादित्यर्थः। अतएव
धातुनस्वकारकान्वयितावच्छेदकसध्यत्वेनोपस्थितिसत्वादेव। एतेनउक्तप्रकारेणानन्वध्यारूढमित्यर्थे अधिकमितिसू
त्रेणाधिकशब्दस्यव्युत्पादनारम्भनमतेऽधिकारवारीद्रोणेणेतिप्रयोगोपपत्तिर्भवति। यदिधातुतस्वतेनरूपेणोपस्थितिरिति
नियमोभवन्मतेतदाकथन्तादृशप्रयोगइत्यतआह। अधिकेति· ननुकृतोयेकर्त्तृकर्मणीनतत्रषष्ठीत्येवम्व्यवस्थार्थङ्डसं
ग्रहणमस्त्वित्यतआह। धातोश्चहृयइति· तदक्तम्भाष्ये· तस्यकर्मकर्त्रर्थन्तदिकृद्ग्रहणङ्कर्त्तव्यम्· कृतोएकर्त्तृकर्मणीत

त्रयथास्यात्। अन्यस्य ये कर्त्तृकर्मणी तत्र मा भूत्। नैतदस्ति प्रयोजनम्। धातोर्हि द्वये प्रत्यया विधीयन्ते तिङः कृतश्च तत्र कृत्प्रयो
गइष्यते। तिङ्प्रयोगे प्रतिषिध्यत इति। अत्र द्वये प्रत्यया इति भाष्यप्रयोगादेव द्वय इत्यस्य साधुत्वम्। ननु कृतीत्येतदुत्तरसूत्रे
नुवर्त्य कृति अव्ययेनेति वचनव्यक्त्या कृदव्ययनिरासार्थं तदस्त्वित्यत आह। नलोकेतीति। ननूभयप्राप्ताविति सूत्रेऽन्यपदार्थ
लाभार्थं कृतीत्यस्त्वित्यत आह। उभयेति। व्याख्यानादिति। ओदनस्य पाको ब्राह्मणानाम्प्रादुर्भाव इत्यादौ भिन्नक्रियाकर्तृकर्मवा
चकशब्दप्रयोगे उभयत्र षष्ठीदर्शनमूलकाद्व्याख्यानादित्यर्थः। अयञ्च प्रयोगोऽत्रैव भाष्ये दृश्यते। एकदेशिनोक्तं कृतीत्यस्य प्र
योजनं खण्डयितुमाह। नच भेदिकेत्यादि। भेदिकेत्यत्र भिदेर्ण्यन्तात्पर्यादिषु ण्वुच्। अत्र णिजर्थव्यापारस्य प्राधान्यात्प्रयोजकक
र्त्ता प्रधानम्। प्रकृत्यर्थस्य त्वप्राधान्यात्प्रयोज्यकर्त्ताऽप्रधानमिति प्रधानाप्रधानसान्निध्ये प्रधान एव कार्यमिति न्यायेनाप्रधाना
न्नस्यादित्याशयः। परमिति। एवञ्च वाक्यभेदेन कृति कर्त्तरि षष्ठ्यस्मादित्यर्थो भवतीति भावः। अत्र प्रधानस्य गतिबुद्धीति सूत्रस्य
नियमार्थत्वान्न कर्मत्वम्। तृतीयावदिति। यथा देवदत्तेन यज्ञदत्तेन पाच्यते तण्डुल इत्यत्रानुक्तयोर्भिन्नपदवाच्ययोः कर्त्रोस्तृतीया
विरोधाभावाद्भवति तथा प्रकृतेऽपि भविष्यतीति भावः। कृतीत्यस्य प्रयोजनमाह। न द्विष इत्यादिना। तद्धिते मा भूदित्यस्य कृदन्तात्त
द्धिते सति मा भूदित्यर्थः। प्रतीयते सत्त्वयुक्तस्तण्डुलानाम्पाचकतर इत्यत्र षष्ठीदर्शनादत आह। तद्धितान्तशक्तिमात्रेति। कृदन्तशक्ति
ग्रहत्वावच्छिन्नकारणतानिरूपितायोपस्थितित्वनिकार्यतावच्छेदिकाया विषयतातद्वत्क्रियाकर्तृकर्मणोः षष्ठीति पर्यवसि
तोऽर्थः। तादृशी च च विषयता प्रत्ययार्थनिष्ठविशेष्यतानिरूपितप्रकारतारूपा बोध्या। एतच्च कृतो ये कर्तृकर्मणी तत्र यथा स्यात्तद्धि

त्रयथास्यात्। अन्यस्ययेकर्तृकर्मणी तत्रमाभूत्। नैतदस्तिप्रयोजनम्। धातोर्हि द्वयेप्रत्ययाविधीयन्तेतिङः कृतश्चतत्रकृतप्रयो
गइष्यते। तिङ्प्रयोगेप्रतिषिध्यतेइति। अत्रद्वयेप्रत्ययाइति भाष्यप्रयोगादेव द्वयइत्यस्यसाधुत्वम्। ननुकृतीत्येतदुत्तरसूत्रे
नुवर्त्यकृतिअव्ययेनेतिवचनव्यक्त्याऽकृदव्ययनिरासार्थन्तदस्त्वित्यत आह। नलोकेतीति॰ ननूभयप्राप्ताविति सूत्रे न्यपदार्थ॰
लाभार्थङ्कृतीत्यस्त्वित्यत आह। उभयेति॰ व्याख्यानादिति॰ ओदनस्यपाकोब्राह्मणानाम्प्रादुर्भावइत्यादौभिन्नक्रियाकर्तृकर्मवा
चकशब्दप्रयोगेउभयत्रषष्ठीदर्शनमूलकाद्व्याख्यानादित्यर्थः। अयञ्चप्रयोगोऽत्रैवभाष्येदृश्यते। एकदेशिनोक्तं कृतीत्यस्यप्र
योजनङ्खण्डयितुमाह। नचभेदिकेत्यादि। भेदिकेत्यत्रभिदण्यन्तात्पर्यादिषुण्वुच्। अत्रणिजर्थव्यापारस्यप्राधान्यात्प्रयोजकक
र्त्ताप्रधानम्। प्रकृत्यर्थस्यत्वप्राधान्यात्प्रयोज्यकर्ताऽप्रधानमिति प्रधानाप्रधान। सान्निधौप्रधानएवकार्यमिति न्यायेनाप्रधाना
न्नस्यादित्याशयः। परमिति। एवञ्चवाक्यभेदेन कृतिकर्तरि पत्तस्मादित्यर्थो भवतीतिभावः। अत्रप्रधानस्यगतिबुद्धीतिसूत्रस्य॰
नियमार्थत्वान्नकर्मत्वम्। तृतीयावदिति। यथादेवदत्तेनयज्ञदत्तेनपाच्यतेतण्[illegible]लइत्यत्रानुक्तयोर्भिन्नपदवाच्ययोः कर्त्रोस्तृतीया
विरोधाभावाद्भवति तथाप्रकृतेपिभविष्यतीतिभावः। कृतीत्यस्यप्रयोजनमाह। न[illegible]इत्यादिना। तद्धितेमाभूदित्यस्यकृदन्तात्त॰
द्धितेसतिमाभूदित्यर्थः। प्रतीयतेसत्वयुक्तास्तण्डुलानाम्पाचकतरइत्यत्रषष्ठीदर्शनादत आह। तद्धितान्तशक्तिमात्रेति। कृदन्तशक्ति
ग्रहत्वावच्छिन्नकारणतानिरूपितायोपस्थितिवृत्तिकार्यतावदुपच्छेदिकायाविषयतायात द्वक्रियाकर्तृकर्मणोः षष्ठीति पर्यवसि
तोर्थः। तादृशीचचविषयताप्रत्ययार्थनिष्ठविशेष्यतानिरूपितप्रकारतारूपाबोध्या। एतच्चकृतीयेकर्तृकर्मणीतत्रयथास्यात्तद्धि

तस्ययेकार्त्तृकर्मणीत्तत्रमाभूदितिक्तपूर्वीकटम्।भुक्तपूर्वीओदनमितीतिभाष्याल्लभ्यते।क्तपूर्वीत्यत्रयथातद्धितान्तशक्तिग्रह
मात्रप्रयोज्योपस्थितिविषयक्रियानिरूपितकर्मत्वन्तदुपपादयति।उदाहरणइति· अत्रसकर्मकेत्यभिधानेनप्रसिद्धरीत्याभावे
प्रत्ययस्यभवनेभाष्योपप्रयोगातिरिक्तेहेत्वभावःसूचितः।तस्य·भावक्तान्तस्य।क्ताप्यप्रयोगेण अस्योपदर्शितत्वस्यनिरिक्त
वाक्येस्यादिः।कृदन्तशक्तिग्रहप्रयोज्येति· कृदन्तमात्रशक्तिग्रहप्रयोज्येत्यर्थः।नचात्रतथा।नचात्रकृदन्तमात्रशक्तिग्रहप्रयो
ज्योपस्थितिविषयक्रियानिरूपितकर्मत्वम्। यथातण्डुलानाम्पाचक इतिवाक्यघटकस्यपाचक इत्यस्यवृत्त्यघटकस्यपाकेका
र्त्तरिशक्तिग्रहेसतितादृशशक्तिग्रहप्रयोज्यायापाककर्त्तृरुपस्थितिस्तस्याम्प्रकारतयाभासमानायांयच्चिक्रियातन्निरूपितकर्म
त्वस्यतण्डुलपदार्थेसत्वाद्भवतितत्रषष्ठी· अतएव·यथाश्रुतानद्धितइतिवाक्यात्प्रतीयमानस्यार्थस्यानभिप्रेतत्वादेव।नन्वस्यके
वलस्यकृदन्तस्यकथन्नप्रयोगइत्यतआह।अत्रकर्मविशेषस्येति· भावेक्तइति· अविवक्षितकर्मणोप्यकर्मकपदेनग्रहणस्येष्ट
त्वाद्भवेक्तइत्यर्थः।ननुप्रागन्वयाविवक्षायामपिकृतेत्यस्यकर्माकांक्षायाःसत्वेनसापेक्षत्वेनासामर्थ्यात्कथम्वृत्तिरित्यतआह
वृत्तेः।पूर्वमिति।इत्यादावपीति· अन्यथातत्रापिकर्मण्येवक्तप्रत्ययःस्यात्तथाचकर्मणोऽनभिहितत्वाभावेनक्तस्येन्विषयस्येति
सप्तमीनस्यादितिभावः।योर्थइति।करणादिरूपइत्यर्थः स्पष्टमेवोक्तम्।भाष्यकृतेतिशेषः।तद्भावइति· भाष्यकृद्भावइत्यर्थः
।नचात्रनिष्ठान्तार्थभूतायातन्निरूपितकर्मत्वसत्वान्नलोकेतिनिषेधस्यप्राप्तिरितिकथंषष्ठ्यापादनमितिवाच्यम्।तस्यापिपू
र्वोत्तरसाहचर्येणप्रत्यासत्त्याचनिष्ठान्तमात्रशक्तिग्रहप्रयोज्योपस्थितिविषयक्रियानिरूपितकर्मकत्वविशिष्टषष्ठीनेत्य

र्थकल्पनात्। अत्रापि निष्ठान्तशक्तिग्रहजन्यतावच्छेदकता दृशप्रकारतामादाय परिष्करणीयम्। तेन नैहत्यान् हतवत्तरामिति विशि
ष्टजन्योपस्थितिमादाय नाव्याप्तिः। तस्याप्यकर्मकेभ्य इति। नपुंसके भावे क्त इति सूत्रविहितक्तस्येत्यर्थः। अत्र। एतादृशे ष्टो। इदमेव
भाष्यम्। यदा वाक्यमित्यादि भाष्यम्। यद्दिपद्येदं देदुःखस्येत्यत्रानेन सूत्रेण चेदुःखपदानभिहितकर्मवाचकत्वेन षष्ठी तदाधार्ये रा
मोदमित्यत्रापि कुतो नेति शङ्कानुत्थानायाह। ददैदुःखस्येति। गृहीत्वेति। एवञ्च मोदमिति न धार्यैरित्यस्य कर्मेति न षष्ठीप्राप्तिरिति भा
वः। एवञ्च दुःखस्येत्यस्य देहलीदीपकन्यायेनोभाभ्यामन्वयान्नोभयकर्मकांक्षेति भावः। ज्वलेर्णः। कर्तरीति शेषः। अत्र ज्वलेर्णो
इत्यभिधानं ज्वलइति णप्रत्ययेन साधनीयमित्यभिप्रायेण किन्त्वस्य कैकल्पिकतया एतदभावे पचाद्यजित्यभिप्रायेण। एतदभि
धानं तु तस्यानेन स्मरणार्थमेव। अत एव क इत्यत्र प्रथमा। अत्र नपुंसके भावे क्त इति सूत्रविहितस्य। क्तस्याप्यकर्मकेभ्य एव प्रवृ
एवञ्च कृत्यादयस्तयोरेव। भावे तु अकर्मकेभ्य एवेति द्रष्टव्यम्। तेन। उभयोः प्राप्तिर्यस्मिन्निति बहुव्रीहिसमासाश्रयणेन। प्रादुर्भाव
इति। अस्याश्चर्यमेतदिति शेषः। प्रयोग एवेति। प्रयुज्यमानाद्व्याप्तिर्भवतीति भावः। [illegible]स्पष्टप्रतिपत्तये आह। स्त्रियामिति। भ्रमनिवार
णायाह। नियमस्येति। केचिदिति। तथा च शेषे विभाषेत्यस्यापमेव मुख्यो[illegible]र्थ इति [illegible]निनम्। करणे ल्युडिति। तेनाचार्यपदार्थस्यानु
ताल्वमस्मीति शेषः। नन्वभयप्राप्ताविति नियमात्कथमोदनपदादत्र षष्ठीत्यत आह। उभयेति। लादेश इत्यस्य लस्यादेश इति भ्रमनि
वारणायाह। लकारसंबन्धिन इति। एवञ्चादेशशब्दस्य संबन्धिनि लक्षणेति भावः। ददिर्ग इतीति। अत्रादृगमेति सूत्रेण कि कि नो

प्रत्ययौ तयोश्चालिङ्गावविधानेन लिट्प्रयोज्यद्विलप्रयोजकत्वरूपसंबन्धवत्तया ऽस्ति लकारसंबन्धित्वमिति भावः। न च लान्तस्य
स्यैवास्तु लस्य स्थाने कृतेपि स्थानिवद्भावेन लत्वव्यवहारादिति वाच्यम्। अल्विधित्वेन तदसम्भवात्। नन्वादेशपदम्मूले ऽधिकमत
आह। केवलस्येति। स्थिष्ठ्वर्णे त्यत्र तृन्ग्रहणेन निषेधसिद्धेरेतस्य लादेशो[illegible]त्वकथनमधिकमत आह। तृन्प्रत्याहारेति·
तस्य· लग्रहणस्य। अस्मिन्सूत्रे उकारोप्यत्र निर्दिश्यत इति भाष्यादुकशब्दात्सूत्रे[illegible]मुकारो बोध्यः। स च प्रत्ययसाहचर्यात्प्रत्ययरूपस्य·
शब्दस्वरूपस्य विशेषणम्। उकारोप्यत्र निर्दिश्यत इत्यत्र कारप्रत्ययस्य प्रयोगे[illegible] तस्य वर्णरूपत्वबोधनात्। वर्णग्रहणे च सर्वत्र तद
न्तविधिः। तथा चोकारान्तो यः प्रत्ययस्तदन्तेन योगे षष्ठी नेति फलितम्। तेन कन्यामलङ्करिष्णुरित्यादावपि निषेधसिद्धिः। उश्च उकः
श्च ऊकौ लश्च ऊकौ चेत्यादिविग्रहः। व्याख्यानादिति· कन्यामलङ्करिष्णुरित्यादिप्रयोगदर्शनमूलकाद्व्याख्यानादित्यर्थः। उकान्त
स्येतीति। उकप्रतिषेधे कमेर्भाषायामप्रतिषेध इति वार्तिकस्वारस्यात्। तेन लक्ष्मीङ्कामयमान इत्यत्र प्रतिषेधो भवत्येव। एतदप
वादतया· निष्ठेत्येतदपवादतया। अत एव। तत्सूत्रविहितक्तक्तान्तस्य ग्रहणादेव· नोत्र· भ्रान्तं देशमित्यादौ· एवेष्टेरिति· तद्बीजमु
क्तम्। भ्रमधातुश्चासकर्मकस्तस्मान्नपुंसके भावे क्त इत्यनेन क्तस्यासम्भवाद्गत्यर्थेत्यनेन भावे क्तप्रत्ययो यदा क्रियते तदा भ्रमणक्रिया
कर्तृवाचकात्कर्तृकर्मणोः कृतीति प्राप्तषष्ठ्या निष्ठेति निषेधो भवत्येवेति तृतीयैव भवतीति भावः। एवञ्च पूर्वोक्तव्यवस्थासिद्धौ च। अ
कर्मकधातुविषये विशेषमाह। अहेः सृप्तमिति· अत्र सृधातोश्चलनमात्रमर्थः। परत्वेन· वार्त्तिकात्परत्वेन· शेषत्वविवक्षैव· कर्तृ·
शेषत्वविवक्षैव· कर्तृकर्मणोरिति तु निष्ठेति प्रतिषिद्धम्। भाष्ये प्रत्याख्यातमिति· तत्र हि क्तस्य च वर्तमाने नपुंसके भावे उपसङ्ख्या

नम्‌क्तस्यचवर्त्तमानेनपुंसकेभावउसङ्ख्यानङ्कर्त्तव्यम्। नटस्यभुक्तम्। छात्रस्यहसितम्। मयूरस्यनृत्तम्। कोकिलस्यव्याहृ
तमिति। अत्रक्तस्यवर्त्तमानइत्यस्योपादानमस्मिन्वार्त्तिके क्तस्येत्यस्यानुवृत्तिसूचनाय। नपुंसकेभावेविहितः क्तस्तुकालेदा
सीनएव। एवञ्चकालोदासीनभावविहितक्तान्तेनयोगएवनिष्ठेतिनिषेधम्बाधित्वानपुंसकेभावइतिषष्ठी· यद्यप्यत्रकर्त्तुः। शेष
त्वविवक्षयासिध्यति· तथापिकर्तृत्वप्रकारकबोधेषष्ठ्यर्थमिदमितिवार्त्तिककाराशयः। ततोभाष्येपूर्ववार्त्तिकम्प्रत्याख्यां[illegible]म्
शेषविज्ञानात्सिद्धम्। शेषलक्षणात्रषष्ठीभवति। शेषइतिउच्यते। शेषश्चकः। कर्मादीनामविवक्षाशेषः। साचाविवक्षासतोप्यविव
क्षाभवतीत्यनेनप्रकारेणोपपादिता· इदन्नपुंसकेभावेइत्येतत्· विशेषवक्तुम्पुनराह· वार्त्तिकेनेति। एतदिति। वार्त्तिकमित्यर्थः। क्ता
दिरिक्तेति। एतेनपदसंस्कारपक्षे। भ्रान्तन्देशमित्यादौचाविवक्षितकर्मत्वेनाकर्मकत्वाङ्गावेभूतेक्तेनिष्ठान्तेनयोगेषष्ठीनेतिनिषेधा
न्नषष्ठीकिन्तुपुनःकर्मयोगेपिद्वितीयैवेतिपरास्तम्। एवंरीत्यास्यसाधनेपदसंस्कारपक्षमादायकटङ्कृतमितिप्रयोगस्यापत्तेः
ननुवार्त्तिकारम्भप्रत्याख्यानयोःफलभेदाभिप्रायेणापुनर्भाष्येशङ्कितम्· यद्येवमुत्तरत्रचातुःशब्द्यम्प्राप्नोति। इदमहेःसृप्तम्· अ
त्राधिकरणेक्तः। षष्ठीकर्त्तरि। इहाहिनासृप्तम्। अत्रभावेक्तः। इहाहिःसृप्तः। अत्रकर्त्तरि। अहेःसृप्तमिति। अत्रभावे। अत्रशेषष
ष्ठ्यपिप्राप्नोति। वार्त्तिकारम्भेतुक्तोधिकरणेचेतिक्तविषयेनपुंसकेभावेक्तइत्यस्माप्रवृत्त्यावार्त्तिकेनकर्त्तरिषष्ठीन। शेषत्वविव
क्षायाश्चतन्मतेःभावएवेतित्रिशब्द्यमितिचेन्न। इहाहेःसृप्तङ्ग्रामस्यपार्श्वेग्रामस्यमध्यइति। दृष्यतएवचातुःशब्द्यमिति।
अत्रग्रामस्यपार्श्वइतिसप्तम्युल्लेखेनाधिकरणस्यानभिहितत्वोपपत्त्यर्थम्भावएवप्रत्ययोविधेयस्तदावार्त्तिकेनकर्त्तरिषष्ठीस्या

देव। इड्ढेस्यस्यविवरणाङ्काभस्यपार्श्वइतीतिफलभेदाभावात्। क्तातिरिक्तविषयइत्यनेनान्यत्रत्वादेशादिनिषेधविषयेशेषत्वविवक्षा
भावोबोधितः। तत्रसाधकमाह। पूरणेति। असामर्थ्यात्· ब्राह्मणस्येत्यस्यस्वान्वययोग्यनामार्थेऽन्वयेनासामर्थ्यात्। इदञ्चिन्त्य
मिति। यदिब्राह्मणस्येत्यस्यक्रियायामन्वयः स्यात्तदेदसूत्रोदाहरणंयुक्तन्नामार्थान्वयेतुक्रियायामनन्वयेनशेषेषष्ठीतिवक्तु
मशक्यमितिभावः। नेष्यतइति· अकस्यभविष्यतीतिवक्तव्यम्। यवान्लावकोव्रजति ओदनम्भोजकोव्रजति। सक्तून्पायको
व्रजतीति इनआधमर्ण्येचेतिवक्तव्यम्· शतन्दायीसहस्रदायीग्रामङ्गमीति। अत्रैताहृशयोगविभागेनव्याख्यान्नान्नेष्यत
इतिसिद्धम्। नन्वेवमुभयोरुभयत्रसम्भवोऽस्त्वित्यतआह। अकस्येत्यादि· कर्तृमात्रार्थकइति ·अत्रमात्रपदेनभविष्यत्वव्य
वच्छेदः सूत्रेति। अकेनोरितिसूत्रइत्यर्थः। तत्सूत्रइति। आवश्यकाधमर्ण्ययोरितिसूत्रेइत्यर्थः अतएव· उपलक्षणादेव भू
तवर्त्तमानयोरिति· भूतस्यजातत्वेनतत्रतथाकथनम्व्यर्थमेव वर्त्तमानेचप्रमाणान्तरेणैवतथानिश्चयसम्भवादेतत्कथना
नुपयोगइतिभावः तत्वेन· भविष्यत्वेन॥ अतएव णिनेर्भविष्यदर्थकत्वाभावादेव· नव्याइति। अनेनसुप्यजातावितिसूत्रेण
णिनिप्रत्ययेप्युक्तरीत्याभविष्यत्वप्रतीतावपिनदोषइतिसूचितम्। निषेधोयमिति। कृत्यानामितिनिषेधइत्यर्थः। कर्त्तरिकर्म
णिचेति· विशेष्यानुपादानादुभयत्रनिषेधोयमितिभावः प्राचीनोक्तइ· खण्डयति। व्रजमिति। नचानभिहिताधिकारावैयर्थ्यापत्त्या
दनावसरेकर्त्तव्यः। कटइत्यत्रपरत्वात्कृद्योगलक्षणषष्ठीप्रसङ्गादितिमनोरमायाभिहितन्तस्यकथमुपपत्तिरितिवाच्यम्· यत्रो
भयोः प्रयोगस्तत्रैवोभयोः प्राप्तिरितिकर्त्तव्यः कटइत्यत्रनास्यनिषेधस्यव्यापारइत्याशयात्· नचोभयप्रयोगएवचेदाकृष्टव्या

ग्रामंशाखेतिकृत्स्नानामितिविभक्तेः सूत्रोदाहरणभाष्येउक्तस्तस्यकागतिरितिवाच्यम्. कर्त्तृपदार्थस्वपदाध्याहारेणतस्यभाष्यस्यो
पपत्तेः यथाश्रुतेतुल्यशब्दस्यधर्मिवचनतयासाम्यङ्कृष्णस्यकृष्णेनवाप्रद्युम्नइत्यादौप्रामासङ्गेनिःपरिहारायाह.तुल्यत्वार्थैरिति
अतएव.भावप्रधाननिर्देशादेव।अन्यथातुलोपमाशब्दयोस्तुल्यार्थकत्वासम्भवेनयोरुपादानम्व्यर्थमेवस्यादितिभावः अतएव
अस्मादेव।चतुर्थीसम्प्रदानइतिवच्चतुर्थीचाशिषीत्युक्तत्वेनाशीश्चतुर्थ्यर्थइतिभ्रमवारणायाह. आशीर्विषयेति. तदध्याहारकोऽत्र
क्रियाध्याहारकेत्यर्थः अतएव.क्रियाध्याहारकसंवन्धस्वीकारादेव.उभयोरपीति. देवदत्तायसुखम्भूयादित्यादौदेवदत्तापेत्यस्यसुख
मित्यादेश्चक्रियान्वयेनसुखमित्यस्यकर्त्तृतयादेवदत्तोपेत्यस्यसंवन्धित्वेनभूयादित्येतच्छब्दबोध्यक्रियामन्वयेन।अतएव.रा
तद्धितचतुर्थ्यन्तस्यतेनसमासाभावादेव. अनेनसूत्रेणचात्रचतुर्थीतत्रचतुर्थ्यन्तार्थस्योद्देश्यत्वमाशीर्विषयक्रियान्वयिन
श्चविधेयत्वमितिवाक्यस्योद्देश्यविधेयभावावगाहिबोधजनकत्वेनोचनतथेतिवृत्तिविग्रहयोः समानार्थत्वाभावान्नैतद्धितद्धित
चतुर्थ्यन्तेनसमासइतिप्राचोक्तेःखण्डयति यत्त्विति.तत्रान्वयात्. उद्देश्यविधेयभावेनान्वयात् नसमासः उद्देश्यविधेयभावेना
न्वयबोधेपृथगुपस्थितेस्तन्त्रत्वादितिभावः वृत्तावभिप्रायाप्राप्तविवेकेनयेऽप्राप्तंतदुद्देश्यप्राप्तन्तद्विधेयमितिकल्पनयो
द्देश्यविधेयभावेनान्वयेनवृत्तौसर्वत्रतथान्वयइतिनियमेमानाभावइत्यभिप्रायेणदूषयति।तन्नेति।लोहितोष्णीषाइत्यादावितिसो
ष्णीषाऋत्विजः प्रचरन्तीतिवाक्येनोष्णीषस्यप्राप्तत्वात्तदनुवादेनलोहित्यमात्रस्यविधानादितिभावः॥ वृत्तेस्तथात्वभावेप्र
माणमाह. भाष्यइति।मूलेव्याख्यानादिति।प्राचाम्व्याख्यानादित्यर्थः। ननुसुखशब्दान्नद्वन्द्वः.त्वार्थशब्देनवहुव्रीहिसमासे

भै·
२५२

कृतेद्वन्द्वान्तइतिन्यायेनैवार्थलाभेव्याख्यानादित्ययुक्तमतआह· सूत्रेऽर्थेशब्दइति· तथाचार्थशब्दान्तोद्वन्द्वएवापन्नस्त्वर्थशब्देनबहु
व्रीहिरितिभावः प्राचोक्तन्दूषयति। भाष्येत्विति॥ ॐ॥ ॥इतिषष्ठीविवरणम्॥ ॐ॥ तदाश्रयस्य क्रियाश्रयस्येव्याख्यानादिति
कर्त्तृकर्मव्यवहितामसाक्षाद्धारयत्क्रियाम् उपकुर्वत्क्रियासिद्धौशास्त्रेऽधिकरण[illegible]स्म[illegible]मितिहर्याद्युक्तिमूलकव्याख्यानादित्यर्थः
हरिकारिकार्थायदुक्तमसाक्षाद्धारयत्क्रियामितितद्व्यभिचारोपिक्वचिदस्तीत्याह। यद्यपीति· ननुसम्भवतिसाक्षात्तदाधारत्वेकथ
म्परम्परयातदाधारस्यग्रहणमतआह। आधारपदइति· साक्षात्तदाधारस्यतुचैत्रादितुल्यत्वमेवेत्याशयेनाह। किञ्चेति· तत्रदृ
ष्टान्तमाह· कालइति· एवञ्चपरम्परयाधारस्यग्रहणसिद्धौच अस्यआधारस्य। अतएव। पूर्वोक्तनियमस्वीकारादेव। कारकाणाङ्क्रि
यान्वयित्वमितिनियमोप्यधिकरणविषयेपरम्परयैव। अक्षशौण्डइत्यादाविति· यथाकटेशेतचैत्रइतिवाक्यात्कटाधिकरण
कचैत्रकर्त्तृकंशयनमितिबोधस्तथाक्षेषुशौण्डइतिवाक्यादपिअक्षाधिकरणकशौण्डकर्त्तृकाभवनक्रियेत्येवंरीत्याबोधात्सा
क्षादेवसप्तम्यन्तस्यशौण्डादिभिः सामर्थ्यमितिसमाससत्त्वासिद्धिः। अत्र· अक्षशौण्डइत्यादौ· नयुक्तमिति· भाष्यकृतात[illegible]स्या
र्थस्यानुक्तेरितिशेषः। यत्रतुक्रियावाचकम्पदन्नश्रूयतेतत्रापितदन्वययोग्यक्रियावाचकम्पदमध्याहृत्यक्रियाधारत्व[illegible]मु
पादनीयम्। तदाह· मूलेवृक्षइति। फलतीति। एवमभिधानेनकपिसंयोगादौमूलावच्छेद्यत्वावगाहिनीमानसीप्रतीतिरित्युक्त
म्। तत्रकटेशेतेस्थाल्याम्पचतीत्यादावाधारत्वेनाभिप्रेतेकर्त्तृकर्मणोः संयोगोस्तीतितद्द्वाधारत्वम्। क्वचित्त्ववच्छेदकता
संबन्धेनशिरसिमेवेदनापादेमेसुखमित्यादौयथा। क्वचित्तुप्रतियोगिनानिरूपितानुयोगितया। यथाऽभावेप्रतियोगितया

रुत्न
२५२

घटःप्रकारोऽस्तीत्यादौ। एवमन्यत्राप्यूह्यम्। चकारेण विहिताया सप्तमी सा स्वार्थे ननु तस्मिन्वाक्येऽधिकरण इत्यस्य संबन्धः॥ वाक्यभे
दसामर्थ्यात्तदभिप्रायेणाह-प्रातिपदिकार्थ इति। तत्र तेषु मध्ये। सकलेति। सकलावच्छेदेन व्याप्तिरित्यर्थः। व्याप्ताविति-अत्र व्या
पनम्व्याप्तिपदार्थः। सच व्यापकत्वाभिन्न इत्यभिप्रायेणाह। व्यापकाधारत्वमिति। व्यापकत्वञ्च व्याप्यतानिरूपितम्। व्याप्य
ता च किन्निष्ठेत्याकाङ्क्षायामन्यस्यानुपस्थितत्वात्प्रकृत्यर्थनिष्ठैव ग्राह्या प्रकृत्यर्थस्य व्याप्यता च समवायसंबन्धेन। व्याप
कत्वन्तु संयोगसंबन्धावच्छिन्नमाधेयनिष्ठं विवक्षितुमिति संयोगसंबन्धावच्छिन्नाधेयनिष्ठव्यापकतानिरूपिता पा[illegible]
वायसंबन्धावच्छिन्नाव्याप्यता तद्विशिष्टाधारोऽभिव्यापकाधारः। तिलेषु तैलमित्यत्र स्वावयवेषु समवायेन तिलस्य स[illegible]
नेषु सर्वत्र तैलस्य संयोगेन सत्त्वादुक्तव्याप्यव्यापकभावो द्रष्टव्यः। एवमेव दध्नि सर्पिरित्यादावपि ज्ञेयम्। मुख्यमिति-आधा
रमाचार्यैः किन्त्वाप्यमन्यते यत्र कृत्स्न आधारात्मा व्याप्तो भवति तेनेहैव स्यात्तिलेषु तैलन्दध्नि सर्पिरिति हि साधकतममिति
सूत्रभाष्येऽभिहितम्। अत एव। औपश्लेषिकपदस्योक्तार्थस्वीकारादेव-एवञ्चैकोपणचीत्यादौ निमित्तत्वेनाभिप्रेते चूपदा
र्थैक्यपदार्थसामीप्यादेव गाधारत्वव्यवहारः। एतादृशाधारस्य गौणत्वव्यवहार[illegible]। अत एव साधकतममिति सूत्रभाष्ये गङ्गाऽ
याङ्गादः कूपे गर्गकुलमिति तत्र न स्यात्कारकसञ्ज्ञायान्तरतमयोगो न भवतीत्यत्रापि सिद्धम्भवतीत्युक्तम्। औपश्लेषिका
धारस्याप्यधिकरणकालपूर्वत्वरूपः। औपश्लेषिकमप्यधिकरणसप्तमीशब्द[illegible]मित्यत्र मानान्तरमाह। तदस्मिन्निति-तत्र हे
कादृशाधिका अस्मिन्शत इत्यत्र शतस्याधिकरणत्वाभावात्कथं सप्तमीत्याशङ्क्यौपश्लेषिकमिदमधिकरणमित्युक्तम्। श

तसमीपेहितेभवन्तिनतुतदन्तर्भूताइति। नौपश्लेषिकमिति· औपश्लेषिकपदस्यावयवेनमर्यादयायोऽर्थः। प्रतीयते सोऽत्रनास्ती
तिभावः। तदेतदाह। उक्तभाष्येति। सूत्रस्थभाष्येत्यर्थः। नन्वेवङ्कटेआस्तेस्थण्डिलेशेतेइत्यौपश्लेषिकाधारेसप्तमीतिग्र
न्थानाङ्कुगतिरितिचेन्तेषामपियथाकथञ्चित्तदभिप्रायोणाद्ह। यद्वेति· ए[illegible]सर्वमिति। औपश्लेषिकंसर्वाधिकरणमित्यर्थः
गङ्गायाङ्गावइत्यादिकञ्चेति। आदिनाकूपेगर्गकूलमित्यस्यसङ्ग्रहः। अत्रयद्य[illegible]पेगङ्गापदस्यसामीप्यात्तीरेगङ्गात्वारोपा
त्सद्वृत्तिस्तथापिनसर्वावयवावच्छेदेनगौसंबन्धइतिभावः। शक्यएवेति आधारोऽधिकरणमितिसूत्रस्थाधारपदेस्वरित
त्वप्रतिज्ञानात्। अधिकःकारोऽधिकारइत्यर्थाश्रयणात्। एतदतिरिक्तमिति। उभाभ्याम्भिन्नमित्यर्थः। यथामोक्षेइच्छा
स्ति। खेशकुनयइत्यादौ। उक्तद्वयातिरिक्तत्वेनसर्वसङ्ग्रहोनतुविषयतासंबन्धावच्छिन्नाधिकरणमेवत्याग्रहः। एवञ्चवैषयि
कपदमुभयातिरिक्तेरूढइतिभावः। शक्तिमांश्चेति· चकारेणक्रियाधिकरणभावसंबन्धपरिग्रहः॥ तेन· इन्विषयस्येत्य=
स्योक्तार्थकरणेन। अभिहितत्वेनेति· सप्तम्यधिकरणेचेतिसूत्रेऽस्यवार्त्तिकस्यपाठादनभिहितइत्यस्यसंबन्धः। यन्मूलेक
र्त्तरीत्युपात्तन्तल्लोभोपापमाह· तत्रेति· ननुप्राकृतमेवेदङ्कर्मेतिरीत्याकालस्यापिकर्मत्वात्तस्मिन्नपिसप्तमीस्या[illegible]ते
मासमधीतीव्याकरणइत्यत्रमासपदादपिसप्तमीस्यादतआह। अत्रकर्मशब्देनेति। व्याख्यानादिति· अधीतइत्येता[illegible]
न्मात्रोपादानेवेदादिरूपपदसन्दर्भाकाङ्क्षानियमोस्तीत्येतादृशङ्कर्मान्तरङ्गमित्येतन्मूलकव्याख्यानादित्यर्थः। कै
यटइति। अत्रारुचिबीजन्तुकालादिकर्मणांसकर्मकाकर्मकसाधारण्येनधातुसामान्यकर्मतयानत्यागेमानाभावः। प

दसन्दर्भस्यापशब्दत्वात्मकसामान्यरूपेण प्रज्ञातधात्वर्थकर्मतयाकस्मिन्निति विशेषाकाङ्क्षापि सामान्यज्ञानपूर्विका भवतीति तस्यापि ग्रहणमिति। एतद्वार्तिकव्याख्यानोत्तरम्मूले निमित्तात्कर्मयोग इतिपस्य चेति सूत्रम्व्याख्याय साध्वसाधु प्रयोग इति वार्त्तिकं व्याख्यातम्। तन्नयुक्तम्। भाष्ये तस्येन्विषयस्येत्येतद्व्याख्यानानन्तरं साध्वसाधु प्रयोगे चेत्यस्य व्याख्यानादिति तेनैव क्रमेण व्याचष्टे। साध्वसाध्विति। तत्वकथनेपीति· अर्चादियत्राविद्यमानस्यापि धर्मस्य पूजनीयत्वद्योतनाबोधनम्भवतीति भावः। निपुणार्थमिति। अतएव मूलेऽर्चायाङ्कि म्। निपुणो राज्ञो भृत्य इत्येवोपात्तम्। इनोऽग्रेऽहीणाभिस्येतद्व्याख्यानानन्तरम्भाष्यीयक्रमानुरोधेन व्याख्यानमुचितम्। मूलकारानुरोधेन तु व्याचष्टे। निमित्तादितीति· फलंसन्नम्यर्थ इति· अनिर्दिष्टार्थ इतिन्यायादिति भावः। तल्लाभेच्छाधीनत्वादिति· एवञ्च फलेच्छाया उपायेच्छा प्रयोजकत्वस्य प्रसिद्धत्वादूनेनरूपोपायेच्छाप्रयोजकेच्छाविषयचर्मलाभस्येव मुख्यफलत्वम्। चर्मणस्तु लाभकर्मत्वात्फलत्वमुपचरितम्बोध्यम्। चर्मणि द्वीपिनं हन्तीत्यादि भाष्योदाहरणादिति भावः। स्वरूपसम्बन्धे वनिमित्तमिति· ननु तस्य शाब्दबोधाविषयत्वमायह इति शेषः। कर्मयोग इत्यत्र प्रयोगपदे संबन्धावाचि। सच संबन्धः संयोगसमवायान्यतरात्मकस्तदभिप्रायेणाह। द्वीपिचर्मणो रित्यादि। अण्डकोशमृगयोरिति। यद्यपि मृगशब्दस्याल्पाच्तरत्वन्तथापि सीम्नि पुष्कलकोहत इति भाष्येयेन क्रमेणोपादानङ्कृतन्तेनैव क्रमेण व्याख्यानमुचितमित्यभिप्रायेण पूर्वनिपातप्रकरणं समुद्राभ्राद्घ इति सौत्रनिर्देशेनानित्यमतो वैपरीत्येन व्याख्यातम्। मुक्ताफलापेत्यत्र चतुर्थ्याअसाधुत्वभ्रमनिरासायाह। ज्ञापकक्रियाश्रयवाचकादिति क्रियापदस्य धात्वर्थप्रतिपादक

तस्याः फलव्यापारयोश्च धात्वर्थत्वादाह। कर्त्ता कर्मं चेति। अत्र कर्मकर्त्तारौ चेति वक्तव्ये कर्त्तृशब्दस्य प्रथममुपादानङ्कर्मसञ्ज्ञावि
धायकसूत्रे कर्त्तृशब्दस्य प्रथमोपादानाभिप्रायेण। क्रियायाः परस्परञ्ज्ञाप्यज्ञापकभावः प्रकृतसूत्रस्य प्रवृत्तौ नियामकः। न
त्र निर्ज्ञातकाला क्रियाः निर्ज्ञातकाला क्रियाया ज्ञापिका अत्र कालो न वर्त्तमान एव विवक्षितः किन्तु भूतभविष्यतोरपि सम्भवति
घटकत्वमित्याशयेन तत्तत्कालस्थले सूत्रप्रवृत्तिन्दर्शयति। तत्र काचित्क्रियेति। [illegible]त्र ज्ञापकक्रियासु। ज्ञापकत्वमिति। न च स
प्तम्यर्थज्ञापकत्वे कृदन्तार्थविशेषणतापन्नक्रियाया एकविशेषणत्वेनोपस्थितस्यान्यत्र विशेषणतयाऽन्वयायोगः इति व्युत्पत्ति
विरोधाद्विशेषणतयाऽन्वयो न सम्भवतीति वाच्यम्। प्रकृत्यर्थस्य क्रियाविशिष्टकृदन्तार्थस्याधेयतयाऽन्वयस्वीकारात्। विशे
ष्ये ज्ञापकत्वबाधे पि विशेषणे पर्यवसानम्। स्वर्गो ध्वस्त इति यथा। तस्य च ज्ञापकत्वस्य स्वनिरूपितज्ञाप्यत्वसंबन्धेन गतशब्दा
र्थघटकगमनक्रियायामन्वयः। वस्तुतस्तु क्रिययोर्ज्ञाप्यज्ञापकभावः सूत्रप्रवृत्त्या पदस्य साधुतायामुपयुज्यते। सप्तम्यास्तु
ज्ञापकत्वेनाभिप्रेता क्रियैवार्थः। तस्याश्च समानकालिकत्वञ्ज्ञाप्यक्रियायां संबन्धो गोषु दुह्यमानासु गत इत्यादौ वर्त्तमानार्थक
कृत्समभिव्याहारो एवञ्च दुह्यमानगोवृत्तिदोहनसमानकालिकगमनकर्त्तेति शाब्दबोधः यत्र भविष्यदर्थककृत्समभिव्या
हारस्तत्र गोषु धोक्ष्यमाणास्वित्यादौ सप्तम्यर्थ दोहनक्रियायाः प्राक्कालिकत्वसंबन्धेन ज्ञाप्यगमनक्रियायामन्वयः। यत्र
भूतार्थकः कृत्तत्र गोषु दुग्धास्वित्यादौ सप्तम्यर्थ दोहनक्रियाया उत्तरकालिकत्वसंबन्धेन गमनक्रियायामन्वय इत्यूह्यम्। अ
स्मिन्पक्षे च ज्ञाप्यज्ञापकभावस्य शाब्दबोधाविषयत्वेन लक्ष्यलक्षणभावः शाब्दबोध्य एवैतच्छास्त्रप्रवृत्तौ निमित्तमित्युक्त

रथान्यासङ्गतिरितिनवाच्यम्॥ तस्यपूर्वोक्तपक्षाभिप्रायकत्वात् द्वितीयपक्षेतुवस्तुतः क्रियाद्वयनिष्ठइत्यर्थः कार्यः। ननुलक्ष्यल
क्षणभावोयत्रभूयः सहचारदर्शनन्तत्रयुक्तः। यथावह्निधूमयोः। प्रकृतेतुगमनक्रियासकृदेवजातेतिकथङ्कालिकसंबन्धघटितो
ज्ञाप्यज्ञापकभावइत्यतआह। लक्ष्यलक्षणभावइति। मानान्तरम्। ज्ञानान्तरम्। अन्यथा भूयः सहचारदर्शनसहकारेणयत्रज्ञा
प्यज्ञापकभावप्रतीतिस्तत्रैवैतत्सूत्रप्रवृत्तिस्वीकारे। मानान्तरेण· प्रमाणान्तरेण। ज्ञातस्वरूपस्यार्थस्य। ज्ञातंस्वरूपंयस्यतादृश
स्यार्थस्यक्रियाद्वयस्य। यथागोदोहनम्मनोजन्यस्मृतिविषयः। पुरुषविशेषगमनन्तुतद्देशाधिकरणस्थितिकर्तृत्वाभावेनानु
मितम्। भाष्यस्वरसादिति। नावश्यन्तदेवलक्षणम्भवतियेनपुनःपुनर्लक्ष्यते। सकृदपियन्निमित्तत्वायकल्प्यतेतदपिलक्ष
णम्भवतीतिभाष्यस्वरसादित्यर्थः। निमित्तत्वाय। परिच्छेद्यपरिच्छेदकभावनिमित्तत्वायेत्यर्थः। सचपरिच्छेद्यपरिच्छेदकभावः
। क्रियाद्वाराकालयोःफलति। क्वचित्तुनिर्ज्ञातदेशक्रियाअनिर्ज्ञातदेशविशेषक्रियायालक्षणम्भवति। यथाद्रव्यङ्गुणकर्मान्यत्वे
सतिसत्वादित्यादौ। भिद्यतेहृदयग्रन्थिश्छिद्यन्तेसर्वसंशयाः। क्षीयन्तेचास्यकर्माणि तस्मिन्दृष्टेपरावरे इत्यादौच। अत्रसतीत्य
स्याध्याहारः। सत्वादित्यत्रतुसतीत्यनन्तरंसतइत्यस्याध्याहारोविवक्षितः। नन्वेवंराहूपरागेस्नायादित्यत्रज्ञापकक्रियावाच
कपदाभावात्कथमेतत्सूत्रप्रवृत्तिरतआह। राहूपरागइत्यादि। अधिकरणसप्तम्येवेति। यद्यत्रराहूपरागेसतिस्नायादित्येव
क्रियावाचकपदाध्याहारेणयस्यचभावेनेतिसप्तमीत्युच्यतेतदाराहूपरागेसत्वस्नानयोर्लक्ष्यलक्षणभावस्यसमानकालि
कत्वस्यवालाभेपिराहूपरागसत्वस्यस्नाननिमित्तत्वालाभः। इष्टापत्तिस्तुन। स्नाननिमित्तत्वाभावेसति आलस्यादिनाशक्तेन

मै॰
२४५

स्नानाद्यकरणेप्रायश्चित्तविधेरनुपपत्तेः। अधिकरणसप्तम्यास्तुराहूपरागकालत्वावच्छेदेनस्नानस्यविधानेनराहूपरागस्यनिमि
त्तत्वम्फलति। यथादेशेऽचइवेतिभावः। तथैवाह। विवाहइति। लक्षणयाउदाहरणान्तरमप्याह। गवामितिमानान्तरेसिद्धस्यका
लदेशविशेषज्ञापनाययत्रप्रयोगस्तत्रैवयस्यचेतिसप्तमीस्वीकारेणतेषुस्नानादीनामेतैरेवविधानेनतत्तत्राप्राप्तेः। राहूपरागा
दीनान्निमित्तौतद्देशकालत्वाभावाच्चेतितदाह। अन्यत्रविस्तरइति। अर्हाणाम्। भाष्येयद्यप्यत्रकारकार्हाणाञ्चकारकत्वेकारका॰
र्हाणाञ्चकारकत्वेसप्तमी। अकारकार्हाणाञ्चाकारकेसप्तमीवक्तव्या। ऋद्धेषुभुञ्जानेषुदरिद्राआसतेब्राह्मणेषुतरत्सुवृष॰
लाआसते। तद्विपर्यासेचसप्तमीवक्तव्या। ऋद्धेषुआसीनेषुमूर्खाभुञ्जतेब्राह्मणेष्वासनेवृषलास्तरन्तीत्युक्तम्। कारकशब्दस्त्वभा
वप्रधानः। कारकत्वमर्हन्तीतिकारकार्हाइत्यर्थः। तथापिप्रत्यासत्त्याअर्हताकारकत्वस्यैवलभ्यतइत्याशयेनकारकशब्दःपरि
त्यक्तः। अत्रार्हत्वमनर्हत्वंवानभिन्नक्रियामादायकिन्त्वेकक्रियामादायैव। अन्यथासर्वेषामेवयत्किञ्चित्क्रियाकर्तृत्वेनार्ह॰
तयाऽनर्हाणामप्रसिद्धिःस्यात्। अर्हाणामितिवचनस्यफलान्तरमप्याह। यद्यपीत्यादि। षष्ठीचानादरइतिसूत्रेयस्यचभावेने
त्याद्यनुवृत्तौयादृशोवाक्यार्थस्तमाह। अनादरेगम्यमानइति। षष्ठीजात्यर्थेति। इदमुपलक्षणम्। सप्तम्यपितत्त्वेनतात्पर्यग्रा
हिका। वैशिष्ट्यञ्चसमानकर्तृकत्वस्योत्तरकालिकत्वोभयसंबन्धेन। पर्यायान्तरेति। प्रभ्वादेरित्यर्थः। समुदायविशेषणत्वेऽ
थोसङ्गतिपरिहारायाह। गवादिकञ्चेति। गवाङ्गोपुवादायादइत्यत्रेत्यादि। स्वामिपर्यायइति। अस्यात्रेत्यादिः। एतेनपृथि
व्यादायादोराजेतिप्रयोगापत्तिनिरासः। नन्वासेवापदादेतत्रपर्यायत्वात्तात्पर्यस्यनचतदस्यतआह आसेवापदस्येति। तेस्क

ग्रास॰
२॰॰

परता। तन्मात्रसाध्यकप्रवृत्तिमत्त्वम्। अधिकरणत्वविवक्षयेति। वैषयिकाधारत्वंविवक्षयेत्यर्थः। अत्र· आयुक्तशब्दभोगोवचन
मिति· षष्ठ्यर्थेसप्तम्यर्थेञ्चवचनमित्यर्थः। यतश्चनिर्द्धारणमितिसूत्राद्यथाश्रुतात्यस्मात्समुदायान्निर्द्धारणम्पृथक्करणन्तादृ
शसमुदायघटकावृत्तिधर्मवत्त्वबोधनंयत्रतत्रतादृशसमुदायवाचकप्रातिपदिकात्षष्ठीसप्तम्याविल्यर्थः। प्रतीयतेपरन्त्वयन्न
युक्तः नराणाङ्क्षत्रियः शूरइत्यत्रनृशब्दस्यसमुदायवाचकत्वाभावादनुपपत्तिरतःसूत्रार्थउक्तोमूलाजातिगुणक्रियासञ्ज्ञादि
भिरिति· एवमपिजात्यादिभिरेवपृथक्करणमितिभ्रान्तिर्भवतीत्यतआह। विशिष्टस्येत्यध्याहारइति· एवमपिजात्यादिविशिष्टस्यैव
यतोनिर्द्धारणमितिभूयः स्यदतः पूरणेनव्याचष्टे। एकदेशस्येति। एतेनतादृशसमुदायवृत्तिधर्माश्रयस्यलाभः। यथानराणाङ्क्ष
त्रियःशूरइत्यत्रनृसमुदायवृत्तिनरत्वाश्रयस्यक्षत्रियस्यजातिविशिष्टस्यलाभः। समुदायवृत्तित्वञ्चसमुदायत्वाश्रयवृत्तित्वमे
वनतुसमुदायत्वपर्याप्त्यधिकरणपर्याप्तत्वम्। क्षत्रियत्वस्यतथात्वासम्भवात्। नहिनृत्वंसमुदायत्वपर्याप्त्यधिकरणेसमुदाय
पर्याप्तम्। तस्यप्रत्येकपर्याप्तत्वात्। एवञ्चप्रकृतेनृशब्देनृसमुदायबोधःक्रस्तादृशसमुदायेवर्त्तमानंयत्समुदायत्वंस्वरूपसंब
न्धेनतादृशसमुदायत्वाश्रयक्षत्रियस्यतादृशसमुदायत्वाश्रयवृत्तिनृत्वावच्छिन्नस्यलाभः। क्षत्रियपदार्थञ्चात्रैकदेशः। स्वघ
टितसमुदायात्। नृसमुदायात्। स्वेनरसमुदायघटकेतिसचब्राह्मणादिः। स्वंमकदेशोजात्यादिविशिष्टः। स्वेनरेत्यस्य समुदाय
घटकेऽन्वयः। तस्यचव्यावृत्तौतादृशसमुदायघटकावृत्तिर्धर्मः। शूरत्वन्तत्करणम्पृथक्करणञ्चक्षत्रियस्यशूरत्वाश्रयत्वबोधन
मेवेतिनृशब्दात्षष्ठ्युपपत्तिः। यद्यपितद्धर्माश्रयत्वबोधनस्यतद्धर्मप्रकारकबोधानुकूलव्यापाररूपतयातस्यधर्मस्यकर्मत्वं

सम्भवति। नत्वर्थोपि तद्धर्मवत्त्वबोधनेनास्यधर्मस्यकरणत्वाविवक्षयैवं लेखः। एवञ्चजात्यादिविशिष्टस्ययद्धर्मावच्छिन्नस्यताद्दशजात्यादिशून्यतद्धर्मावच्छिन्नावृत्तिविधेयवत्त्वबोधनंयत्रतत्रतद्धर्मावच्छिन्नवाचकात्प्रातिपदिकात्षष्ठीसप्तम्यौ भवत इति सूत्रार्थः पर्यवसन्नः। यथाक्षत्रियत्वविशिष्टस्यनरत्वावच्छिन्नस्यक्षत्रियत्वशून्यनरत्वावच्छिन्नब्राह्मणावृत्तिशूरत्ववत्त्वबोधनन्नराणाङ्क्षत्रियः शूरइत्यत्रास्तीति भवतिनृशब्दाद्विभक्तिः। यतइत्यस्याभावेऽस्यजातिविशिष्टस्येत्यस्यलाभः स्यात्तद्दाक्षत्रियपदादेवषष्ठीस्यादित्याशयेनाह। यतः किमित्यादि। ननुक्षत्रियपदात्प्रथमपरत्वात्स्यादतआह। षष्ठ्यपवादत्ववदिति। अतएव। निरुक्तविभक्त्यर्थत्वादेव। नृणामितिवक्तुवचनोपपत्तयेआह। उद्भूतावयवेति। यद्धर्मावच्छिन्नस्येत्युपादानान्नराणाम्व्याघ्रः शूरइतिनकिन्तुनरेभ्योव्याघ्रः शूरइत्येव। ताद्दशजात्यादिशून्येत्युपादानाद्विधेयतयाविवक्षितस्यशूरत्वस्यनरत्वावच्छिन्नावृत्तित्वबाधेपिनक्षतिः। तद्धर्मावच्छिन्नावृत्तित्वम्परित्यज्यताद्दशजात्यादिशून्यसामान्यावृत्तित्वनिवेशः॥ ॥ ननुनिर्द्धारणस्थलेयदिनैकवचनन्तदातावाक्यस्यकागतिरतआह। द्वन्द्वइत्यादि। पञ्चमीवि॰ अस्मिन्सूत्रेपिअनुवर्त्तमानन्निर्द्धारणपदमवृत्तिधर्मप्रकारकज्ञानविषयीकरणमेव। एतद्घटकाभावप्रतियोगित्वं तिलप्रकृत्यर्थतावच्छेदकावच्छिन्नस्यनिरूपितत्वसंवन्धेनान्वयोनिर्द्धारणस्यचविशेष्यतासंवन्धेनभेदाश्रयेविशेषणत्वम्। भेदश्चप्रकृत्यर्थतावच्छेदकानाश्रयत्वमेवात्रपारिभाषिकोविभक्तग्रहणसामर्थ्यान्नत्वन्योन्याभावः। एवञ्चसतियाद्दशोवाक्यार्थबोधस्तमाह। पाटलिपुत्रकावधिकेतित्रितयोपादानइतिनिरुक्तोनिर्द्धारणनिरूपकवाचकस्यतदाश्रयवाचकस्यनिरुक्तनिर्द्धारणप्रयोजकधर्मवाचकस्यचयत्रोपाद

तद्इतिनिरुक्तनि[illegible]रण निरूपकवाचकस्यतदाश्रयवाचकस्यनिरुक्तनिर्द्धारणप्रयोजकधर्मवाचकस्यचत्रोपादानंशब्देनोच्चा
रितेनप्रतीतिस्तत्रैनत[illegible]त्रनि[illegible] पञ्चम्यन्तस्यसाधुत्वमितिफलितम्। यत्रतुसाङ्काश्यंकानाम्पाटलिपुत्रकाणाञ्चपाटलि
पुत्रकाअभिरुपतमाइ[illegible] प्रयुज्यते। तत्रनिर्धार्यमाणेषुपाटलिपुत्रके पुनभेदस्व। चशब्दार्थैकबुद्धिविषयत्वरूपसाहित्याश्र
यत्वेनाभेदस्यापिसत्वात। [illegible]बुद्धि[illegible]श्चपूर्वकालिकीसाङ्काश्यकाश्चपाटलिपुत्रकाश्चाभिरूपाइत्याकाराप्राप्तेनिनतत्रपञ्चमी
। ननुपुरुषोत्तमइत्यत्रपुरुषाणामुत्तमइत्यर्थः। प्रतीयतेएवञ्चात्रपूर्वसूत्रेणषष्ठीवाच्यातथाचनर्निर्द्धारणइतिसूत्रेणसमास
निषेधापत्तिरतआह। संवन्धासामान्यइति॥ ॥ तथाचननिर्द्धारणइतिसूत्रप्राप्तिरितिभावः। कैयटइति। अत्रारुचिवीजन्तु
पुरुषोत्तमइत्यत्रषष्ठीसमाससत्वेहितदुक्तरीत्यापुरुषोत्तमपदस्यसाधुत्वङ्कल्पनीयम्। सएवतुन। उत्तमः पुरुषस्त्वन्यः परमा
त्मेत्युदाहृतइतिवाक्यात्कर्मधारयस्यैवप्रतीतेः। नचोत्तमपदस्यपूर्वनिपातापत्तिः राजदन्तादित्वात्पूर्वनिपातप्रकरणस्यानित्य
त्वाद्वा। अर्चतेश्चेति। अर्चनेस्त्वित्यर्थः। गणपाठेप्रत्यादिपाठाभावादाह लक्षणाइति। नचसाधुशब्दोपादानमत्रविफलम्। साध्व
साधुप्रयोगेचेत्येवसिद्धत्वादितिवाच्यम्। अर्चायाम्प्रत्यादियोगनिषेधार्थमस्योपादानात। प्रसितोत्सुकाभ्याम्। प्रसितशब्दोत्रा
शक्तपरोनतुप्रकर्षेणसितइत्यर्थः। तत्परेप्रसितासक्ताइतिकोशात। लुपशब्दस्याभाववोधकतयानक्षत्रवाचकस्यतस्मि
न्नर्थेनवृत्तिरतआह। लुपशब्देनेति। अधिकरणइति किमिति। मण्डूकप्लुत्याधिक[illegible]शब्दानुवृत्तिः किमर्थैत्यर्थः। अनुवृत्त्य
भावेसर्वविभक्त्यपवादत्वमस्यस्यात। अनिर्दिष्टार्थाइतिन्यायात। अन्तरङ्ग[illegible]त्वात। इतरानपेक्षत्वेनान्तरङ्गत्वादित्यर्थः।

मै॰
२५७

सङ्ख्यायावृत्तौभानानुरोधेनाह। बोध।
द्विवचनान्तेनसमासइति। अन्यथासूत्रस्यैवैतस्यानुपपत्तिः स्यादितिभावः। अभेदैकत्व[illegible]सस्येति। शक्तिरेवकारकमिति। अत्रकारक
त्वमिति। कारकस्यद्रव्यरूपत्वयातन्मध्यत्वमुपपन्नमित्यभिप्रायेणाह। ननुकर्तृ[illegible]कालसत्वक्रियाभेदेन। तदाधारकालग्रहणादि
पदेनविवक्षितेत्यर्थः। धर्मधर्मिणारभेदादितिभावः॥ क्रियाभेदेन। भिन्ने भि[illegible]कर्तृसिद्ध्युत्तरप्रत्ययान्ते
नि। लक्षणयाशक्त्याधारकालग्रहणादित्यर्थः। अत्रकालाध्वनोर्विभक्त्योश्चनयथासङ्ख्यमस्वरितत्वात्। कर्त्तरिक्तप्रत्ययान्ते
ति॰ अधिकमिति सूत्रेणकर्त्तरिक्तस्त्यर्थेकेनिउत्तरपदलोपेचसिद्धोयस्तेनयोगइत्यर्थः। षष्ठ्यामिति। निरूपितत्वार्थकषष्ठ्यामि
त्यर्थः। ज्ञापकादिति। उक्तसूत्रद्वयनिर्देशरूपकादित्यर्थः। ननुसप्तम्यधिकरणेचेतिसूत्रेणसप्तमीक्रियायोगाभावादिनिभाव
इदमनध्याहारपक्षेऽध्याहरित्वधिकरणसप्तम्येवतदाह॰ तदस्मिन्नेति। यस्त्वकर्मार्थकाध्यारूढशब्दात्कनिक्तेउत्तरपद
लोपेचसिद्धोऽधिकशब्दस्तद्योगेत्वाह। कर्मणीति॰ अधिकमितिसूत्रेणतन्त्रेणोभयोरप्यधिकशब्दयोर्निपातनादितिभावः। अ
धिकमिति। सूत्रेभाष्येस्य[illegible]नत। रपशब्दस्यकर्मप्रवचनीयत्वमुपपादयति। उपोधिकइति। परार्द्धादधिकेत्यत्रपूर्वोक्तज्ञापकादे
वपञ्चमी। मूलेपर्याये[illegible]यदि परयचेश्वरवचनमित्यत्रपञ्चशब्दः स्ववाचीश्वरशब्दस्तुधर्मिपरएवतदायस्येश्वरउच्यते
तद्वाचकात्सप्तमीर[illegible]यस्य॥ न्वाचकात्सप्तमीत्यर्थः। उभयत्राप्यधिरीश्वरइतिकर्मप्रवचनीयसञ्ज्ञा इयञ्चसप्तमीविशेषणवाच
कादेव॰ षष्ठ्यपव[illegible]दत्वात्। विशेष्य[illegible]वाचकान्नप्रातिपदिकार्थेप्रथमैव। अधिभुवीत्यस्माद्भूनिरूपितस्वामित्ववानितिबोधः। अ
[illegible]मात्तुरामनिरूपितस्वत्ववतीभूरितिबोधइतिभावः। अधिशब्दस्यशौण्डादिगणेपाठफलमाह॰ सप्तमीशौण्डै
रिरामइत्से[illegible]

राम॰
२५७

[illegible] भूरितिप्रयोगः। ईश्वरेऽर्थे इ[illegible] गम्यमान इत्यर्थः। तदुपपादयति। विनियोक्तु

नुविभ[illegible] त्यर्थः। व्यथे भा[illegible] द्वितीया भविष्यति किं तु कर्मप्रवचनीयसंज्ञा[illegible]त्याशयेन शङ्कते न न्विति। अत्रेति

मित्यत्र कर्मणि द्वितीये[illegible] तत्त्वमिति। विकरणेभ्यो नियमस्य बलवत्त्वेन [illegible]रिष्यतीत्यत्र तिङि कृते विकरणे च

करिष्यतीत्यत्रे[illegible] द्विरिति। सर्वेषामिष्टानामनिघातवारणकर्मप्रवचनीय[illegible]संज्ञाफलोदात्तश्रवणरूपाणा

त्वमिति भाव[illegible]निमङ्गलान्तानीति भाष्यकारोक्ते मैङ्गलस्यावश्यकत्वाभिप्रायेणात्र सिद्धिशब्दोपादा

मङ्गलादीनि म[illegible]दीश्वर इत्यतो विभाषा कृञीति सूत्रे ईश्वरशब्दोऽनुवर्तते। न तु तज्ज्ञानेनेश्वरस्मरणरूपमङ्ग

धिरीश्वर इति[illegible] कारणान्तेऽस्य सूत्रोपन्यास इति शिवम्॥ ॥ ॥ इति सप्तमीविवरणम्॥ ॥ ॥ इति श्री

वत्वित्यभिप्राये[illegible] निधानाखिलपण्डितसार्वभौमभूमण्डलप्रसारिविमलतरानवद्यसद्यःपार्वणपीयूषभानुप्रभवा

याणसद्गुण[illegible]श्री भवदेवमिश्रात्मजभैरवमिश्रकल्पितायाश्चन्द्रकलायाङ्कारकान्तशब्देन्दुशेखरव्याख्यानं समा

प्तं[illegible]

॥इतिश्रीशब्देन्दुशेखरकीटीकाभैरबीसमाप्तम् शुभं॥



